श्रीव्यासतीर्थविरचितम्

तर्कताण्डवम्

श्रीविजयीन्द्रतीर्थकृतया
युक्तिरत्नाकराख्यटिप्पण्या

श्रीराघवेन्द्रयतिकृतया
न्यायदीपाख्यटिप्पण्या

श्रीलक्ष्मीनाथतीर्थकृतया
टिप्पण्या च सहितम्

प्रथमं सम्पुटम्

प्रकाशनम् - विद्याधीशस्नातकोत्तरसंस्कृतशोधकेन्द्रम्, बेङ्गळूरु-४

श्रीव्यासतीर्थविरचितम्

तर्कताण्डवम्

श्रीविजयीन्द्रतीर्थकृतया युक्तिरत्नाकाराख्यटिप्पण्या
श्रीराघवेन्द्रयतिकृतया न्यायदीपाख्यटिप्पण्या
श्रीलक्ष्मीनाथतीर्थकृतया टिप्पण्या च सहितम्

प्रथमं सम्पुटम्

Edited originally by

Mahāmahopādhyāya

Prof. K.T. Pandurangi

Founder, Vidyadhisha Post-Graduate Sanskrit Research Centre

Edited with revisions

Editor-in-Chief

Dr. Satyadhyanacharya Katti

Vidyadhisha Post-Graduate Sanskrit Research Centre

Associate Editor

M. Madhava Acharya

This volume is published with the grant from the Govt. of Karnataka

Published by

Vidyadhisha Post-Graduate Sanskrit Research Centre, B'lore.

Tarkatāṇḍavam of **Śri Vyāsatirtha** with the Commentary of **Yuktiratnākara** of **Śri Vijayindra tirtha, Nyāyadipa** of **Śri Rāghavendra tirtha** and commentary from **Śri Lakṣminātha tirtha**.

Originally edited by Prof. K.T. Pandurangi, revised edition by Editor-in-Chief Dr. Satyadhyanacharya Katti and associate editor M Madhava Acharya. Published by Vidyadhīsha Post-Graduate Sanskrit Research Centre, No.11, Uttaradhi Matha Compound, Basavanagudi, Bangalore-04.

No. of Pages : xcii+646

No. of Copies : 500

Price : Set of 4 Volumes Rs.1000/-

Year of Publication : 2020

© The Editor

ISBN No.: 978-93-83679-96-6

Typeset and Printed at : Vāgartha, B'lor-19.
Email : vagartha@yahoo.com

अनुग्रहसन्देशः

प्लव ज्येष्ठ, कृष्ण, त्रयोदशी । विजयीन्द्रतीर्थानामाराधना ।
सुवर्णपुरी, गोदावरीतीरम् ।

श्रीकृष्णो यथा कालियफणारङ्गमञ्चे अनर्तीत् तथा श्रीकृष्णोपसकाः विद्वत्कुलचक्रवर्तिनः विदितसर्वशास्त्राः तपस्विवरेण्याः प्रातःस्मरणीयाः श्रीमद्व्यासराजश्रीमच्चरणाः नव्यन्यायनागोत्तमाङ्गे ताण्डवं व्यदधुः । तदेवेदं तर्कताण्डवंनाम ।

अयि भोः न रङ्गो नागं नाङ्गं वितेने । किन्तु रमणकान्तरीपान्त-रङ्गगम् ।

सत्यम् । अथ किम् ? परं व्यासराजश्रीचरणाः घनमपि तर्कमनपघनमेव वितेनिरे । न न । किन्तर्हि ? स्वोत्प्रेक्षाविषफूत्कारेण सन्मनोयमुनावनविदूषणं परित्याज्य, सदागमप्रत्यक्षलक्षणरमणकद्वीपं प्रत्येव तर्कफणिनं प्रस्थापयाञ्चक्रिरे ।

ननु स्वतन्त्रः मुख्यामृतः श्रीकृष्णः। न विषयो विषस्य । पारमगमत् । कथमेते ? एतेऽपि पीतन्यायसुधाः । तदाहुर्गुर्जालाचार्याः

तर्काशीविषमूर्ध्नि ताण्डवमहो श्रीव्यासराट्केकिनो
यस्य श्रीसुधया व्यधुर्विहरणाच्छ्रान्तात्मनां यस्य च ।
नानादुर्मतखण्डनेऽद्भुतसुधाविप्लुट्शरण्या इमे
छिन्द्याच्छ्रीजयनाकिराण्मम दयावज्रेण पापाचलम् ।।

ननु तर्कशास्त्रमेव परागधिगतिपथात् । तत्ताण्डवं तु सुतराम् । मा चिचिन्तो भोः । महानुभावा ज्ञानिवरेण्याः श्रीविजयीन्द्रतीर्थश्रीपादाः श्रीराघवेन्द्रश्रीमच्चरणाः श्रीलक्ष्मीनाथतीर्थाः स्वकीयै व्याख्यानैः भूषयाञ्चक्रिरे तर्कताण्डवम् । यैर्दुरधिगमतामतिक्रम्य स्वधिगमतां प्रापदयं ग्रन्थः ।

कथं तदध्ययनसौभाग्यं प्राप्नुयादस्मान् ? इदानीं विद्याधीश-स्नातकोत्तरसंस्कृतसंशोधनकेन्द्रत आविरकारि सव्याख्यानं तर्कताण्डवम् ।

महामहोपाध्यैः कृष्णाचार्यैः पाण्डुरङ्गीत्युपाधिनामधयैः समपादि । आङ्ग्लभाषायां प्रस्तावनाऽपि व्यलेखि ।

पण्डितेन अस्मच्छिष्येण श्रीमाधवाचार्येण समशोधि च । व्याख्यानानां योजनायाम् अक्षराणां पदादीनां च शोधने पर्यश्राम्यत् प्रभूतमयम् । अधष्टिप्पण्यादिकमप्ययोजयत् । ग्रन्थं ग्रन्थकारांश्च सम्यक्पर्यचाययत् ।

श्री कृ.त. पाण्डुरङ्गीमहोदयान्सद्गतिप्रदानेन समनुगृण्हन्त्विति,तथा द्वैतवेदान्ताध्ययनसंशोधनकेन्द्रस्य निर्देशकान् पण्डितान् श्रीसत्यध्यानाचार्यान् तथा विद्याधीशस्नातकोत्तरसंस्कृतसंशोधनकेन्द्रस्य निर्देशकान् पण्डितान् श्रीकृष्णाचार्यान् उपाध्यायोपाह्वान्, संशोधकं पण्डितं श्रीमाधवाचार्यं च ज्ञानादिदानेन इतोऽप्यतिशयेन वाङ्मयीं सेवां विधातुं शक्तिदानेन च समनुगृण्हन्त्विति अस्मदुपास्यान् श्रीमूलसीतासमेतश्रीमन्मूलराम-दिग्विजयराम-वेदव्यास-वंशराम-प्रसन्नविठ्ठलान् संप्रार्थयामहे ।

श्रीमत्सत्यात्मतीर्थाः
उत्तरादिमठः

Preface

Tarkatāṇḍavam of Śrī Vyāsatīrtha is an important work of Indian epistemology. It deals with the problems of Śabdapramāṇa and Anumānapramāṇa. Among the six systems of Indian philosophy Nyāyaśāstra or Tarkaśāstra is primarily concerned with epistemology. In this field, Tatvachintāmaṇī of Gangesha holds the central position. The entire Navyanyāya is developed on the basis of this text. Though the writers of Navyanyāya have tried their best to provide definitions for these pramāṇas, some inadequecies still remain. Tarkatāndava identifies these inadequecies and improves upon them.

Tarkatāndava is primarily a detailed review of Tatvachintāmaṇi. In addition to this, the views of Bhatta and Prabhākara on this subject are also reviewed. The views of other schools of Vedānta on this subject are not reviewed here, since, these are dealt with in Nyāyāmṛta and Tātparyachandrikā of the author.

We thank Former Director Prof. K.T. Pandurangi who originally edited the entire Tarkatāṇḍava supported by Late Sri Venkannacharya Katti and Sri Nagendracharya Deshpande. He had also discussed the main issues in detail in his introduction in English which is also carry forwarded here in this revised edition.

I take this opportunity to record my appreciation for the assistance given by young scholar Sri M. Madhavacharya who has studied under Śrī 1008 Śrī Satyātmatīrtha Swāmīji. He gave Nyāyamṛta exam in front

of all pandits and His Holiness Śrī 1008 Śrī Satyātmatīrtha Swāmīji and earned the title Nyāyāmṛta Viśārada.

We offer our pranamas to Śrī 1008 Śrī Satyātma tīrtha Swāmīji of Sri Uttaradi Matha with whose blessings this entire publication has happened.

We thank Late Prof. K.T. Pandurangi for providing the manuscript of Yuktiratnākara of Śrī Vijayīndra tīrtha.

We thank Pt. Sri Veeranarayanacharya Pandurangi for kindly allowing us to use the manuscript of commentary by Śrī Lakṣmīnārāyaṇa tīrtha.

We thank Vagartha for good printing and neat get up.

Dr. Satyadhyanacharya Katti
Managing Trustee, Vidyadhisha Post-Graduate
Sanskrit Research Centre

Introduction by Late Prof. K.T. Pandurangi

Every system of philosophy develops its own epistomology. In Indian Philosophy Nyāya has developed its epistemology in greater detail. It has set a model for other schools of Philosophy. Therefore it is called प्रमाणशास्त्र. Realistic schools of Indian Philosophy broadly follow this model. However, they differ from Nyāya in some important respects. Dvaita Vedānta is a realistic school of Philosophy. It differs from Nyāya in two important respects viz. प्रामाण्यस्वरूप and वेदापौरुषेयत्व. Nyāya accepts परतस्त्व of प्रामाण्य while Dvaita accepts स्वतस्त्व of प्रामाण्य. Nyāya holds the view that वेद is पौरुषेय i.e. ईश्वरकृत, while Dvaita holds the view that वेद is अपौरुषेय. In respect of the nature and status of वर्ण i.e. syllables, also the two differ. Nyāya considers वर्ण as a quality of आकाश and अनित्य while Dvaita considers वर्ण as a separate द्रव्य and नित्य. The concepts of ईश्वर of these two schools of Indian philosophy differ. Dvaita does not accept समवाय relation and निर्विकल्पक stage of प्रत्यक्ष. Dvaita concept of जाति also differs from that of Nyāya. Dvaita does not accept अनुगतजाति.

In respect of the nature of word meaning, the theory of sentence formulation etc issues related to शब्दप्रमाण also the two schools considerably differ. In respect of the nature of व्याप्ति, the procedure of व्याप्तिग्रह, number and nature of fallacies also the two schools considerably differ.

In two important manuals of Dvaita epistemology viz. प्रमाणलक्षण and प्रमाणपद्धति, these differences are noted. In अनुव्याख्यान and न्यायसुधा these are discussed in detail. However, a consolidated presentation of these issues with an interdisciplinary approach was necessary. This is done in तर्कताण्डव by Śrī Vyāsatīrtha in a masterly way.

Nyāya epistemology had reached its climax at the time of Gangeśa. He has given a detailed exposition of Nyāya view in his Tattvachintāmaṇi. Śrī Vyāsatīrtha takes it as a representative text and reviews the Nyāya view. He clearly points out the inadequacies of Nyāya view and presents the Dvaita view that improve upon it. Almost on all important issues of epistemology he verbetum quotes Tatvachintāmaṇi and reviews. He also quotes the views of other major writers of Nyāya such as Udayana, Yajñapati, Vardhamāna and from Līlāvati. Just as his Nyāyāmṛta is a thorough review of advaita his Tarkatāṇḍava is a thorough review of Nyāya. It is very useful to the scholars and students of Nyāya to introspect on important concepts of Nyāya epistemology just as Nyāyāmṛta is useful to introspect for advaita scholars.

This valuable work is arranged in three chapters. The first chapter deals with six topics viz. प्रामाण्यवाद, वेदापौरुषेयत्ववाद, ईश्वरवाद, वर्णवाद, समवायवाद and निर्विकल्पकवाद. The प्रामाण्यवाद and वेदापौरुषेयत्ववाद are the central themes. The other topics are intended to support these.

The second chapter contains a long section on शक्तिवाद. All aspects of शक्ति are dealt with in this chapter. The theories of पदशक्ति and the theories of sentence meaning are discussed in detail. The views of Bhātta and Prābhākara are reviewed. This chapter divided into two volumes, i.e. second and third volume.

The Third chapter deals with अनुमान. This is put in the Fourth volume. we give below a summary in English of the main point of these topics to enable the modern scholars to have an idea of the contribution of this valuable work to Indian epistemology, particularly, the epistemology of Dvaita Vedānta.

1. प्रामाण्यवादः

1.1 स्वमते ज्ञप्तौ स्वतस्त्व निरुक्तिः

प्रामाण्यस्वतस्त्वम् i.e. Intrinsic nature of the validity of cognition.

1-1-1) Tarkatāṇḍva quotes the Nyāyasudhā statement 'ज्ञानगतयाथार्थ्यस्य ज्ञानग्राहकमात्रग्राह्यत्वं स्वतस्त्वम्' i.e. The cognition of the validity of the cognition is generated by the same means by which the cognition is generated. This is intrinsic validity i.e. प्रामाण्यस्वतस्त्वम्.

1-1-2) Quoting the above statement, Tarkatāṇḍava elaborates it in three ways :

i) याथार्थ्यरूपस्य तत्तज्ज्ञानप्रामाण्यस्य ग्राह्यप्रामाण्यविरोध्युपस्थापक-सामग्र्यसमवहितग्राह्यप्रामाण्याश्रय तत्तज्ज्ञानविषयकसाक्षिज्ञानविषयत्वनैयत्यम् ।

This explanation first states the very nature of validity of ज्ञानप्रामाण्य as याथार्थ्यरूपस्य. Then the clause ग्राह्यप्रामाण्यविरोध्युपस्थापकसामग्र्यसमवाहित states that it should not have been generated by such means which lead to the opposit of validity. The next clause 'ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञान-विषयकसाक्षिज्ञानविषयत्वम्.' It should have been cognised by the साक्षी that cognises the cognition concerned.

The first clause ensures निर्दुष्टकरणजन्यत्व and the second clause ensures that the validity of a cognition is cognised by the same means viz. साक्षी by which the cognition is cognised.

1-1-3) In the second explanation the scope of साक्षिज्ञानविषयत्व is extended to साक्षिज्ञानविषयत्वयोग्यत्व i.e. the capacity to be cognised by the साक्षी. This makes it clear that capacity of साक्षी. to cognise the validity is natural. However, in the case of wrong cognition it is temporarily prevented from cognising the validity or otherwise of the cognition and only the cognition is cognised without its specific nature as valid or otherwise. The invalidity is discovered later by verification.

i) साक्षी एव ज्ञानं तत्प्रामाण्यं च विषयीकर्तुं क्षमः । किन्तु प्रतिबद्धो ज्ञानमात्रं गृहीत्वा तत्प्रामाण्यग्रहणस्य नेष्टे ।

ii) प्रामाण्यग्रहणशक्तेः सहजत्वात् प्रामाण्यग्रहणस्य औत्सर्गिकत्व-रूपस्वतस्त्वसिद्धिः । (न्या.दी.)

1-1-4) The third explanation is same as given in Mīmāmsā.

आद्यपक्षद्वयं स्वमतासाधारणम् । तृतीयं तु मीमांसकादिमतसाधारणम् ।

1-2 परोक्तस्वतस्त्व निरुक्तिभङ्गः

After presenting its own view of the concept of प्रामाण्यस्वतस्त्व, Tarkatāṇḍava reviews the Mīmāmsā view of स्वतस्त्व given in Tatvachintāmaṇi by Gangeśa while presenting pūrvapakṣa for his प्रामाण्यपरतस्त्व view.

1-2-1) Gangeśa puts the explanation of स्वतस्त्व in five ways in the form of विप्रतिपत्ति i.e. dispute, by adding न वा in each case.

i) ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यम् न वा

ii) तज्ज्ञानविषयकज्ञानाजन्यज्ञानग्राह्यम् न वा

iii) स्वाश्रयग्राहकेण गृह्यत एव न वा

iv) प्रत्येकमेव वा । स्वाश्रयेण गृह्यते न वेति

v) घटोऽयमिति ज्ञानप्रामाण्यम् एतज्ज्ञानग्राहकमात्रग्राह्यम् न वा

All these make two points i) The validity of cognition is cognised by the very cognition that cognises the cognition concerned ii) It does not require a separate cognition to cognise its validity.

1-2-2) Tarkatāṇḍava quotes the first explanation which represents the pūrvamīmāmsā concept of प्रामाण्यस्वतस्त्व and points out its in adequacy in two ways.

i) The cognition of the cognition generated by the statement 'ज्ञानं समवेतम्, ज्ञानममूर्तम्' etc does not cognise the validity of these cognitions. Hence, this explanation of स्वतस्त्व fails in such instances.

ज्ञानं गुणः इत्यादिवाक्यजन्यस्य ज्ञानज्ञानस्य प्रामाण्याविषयकत्वात् । The cognition of the cognition generated by the statement ज्ञानं गुणः does not cognise the validity of that cognition.

ii) The explanation यावज्ज्ञानविषयकज्ञानविषयत्व is sufficient. The inclusion of the clause ग्राहकसामग्रीग्राह्य is unnecessary.

The explanation of स्वतस्त्व offered by Tarkatāṇḍava is free from such drawbacks. The other four explanations given by Gangeśa by way of विप्रतिपत्ति are also duly reviewed.

1.3 प्रामाण्यस्वतस्त्वे अनुमानानि

Tarkatāṇḍava has formulated a number of syllogisms to establish प्रामाण्यस्वतस्त्व. We will notice here some of them.

1-3-1) ज्ञानप्रामाण्यं स्वतः ग्राह्यम् परतः अगृह्यमाणत्वे सति गृह्यमाणत्वात् ।

The validity of cognition is cognised by the very cognition, since it is not cognised by any other cognition yet it is cognised. In otherwords, it is self-evident and intrinsic.

1-3-2) सुखम् अनुभवामि इति प्रत्ययः स्वग्राह्यप्रामाण्यविषयकः तद्विरुद्धाविषयकत्वे सति तद्विषयक व्यवहारहेतुत्वात् ।

The cognition 'I am experiencing happiness cognises its validity also as it is not about its opposit and communicates experiencing of happiness.

1-3-3) निष्कम्पप्रवृत्तिहेतुभूतज्ञानस्य अनुव्यवसायः स्वग्राह्यज्ञान-प्रामाण्यविषयकः ।

तत्संशयविरोधिनिश्चयत्वात्

The cognition of the cognition that leads to the activity without any doubt or hesitation cognises its validity as it is not about the opposit of it and a firm cognition as against the doubt about it.

The first syllogism makes it clear that the validity of a cognition is self evident as it does not depend upon another verificatory cognition.

The second syllogism informs that the validity of the cognition of happiness etc is self evident as it does not cause an opposit experience and the person concerned expresses his happiness.

The third syllogism informs that the validity of a cognition that leads to the activity without hesitation or doubt is self-evident.

In this way Tarkatāṇḍava brings home the self-evident nature of the validity of cognition by

formulating the syllogisms on the basis of actual experiences.

1-3-4) अनुव्यवसायः स्वग्राह्यज्ञानप्रामाण्यविषयीकरणयोग्यः अनुव्यवसायत्वात् ।

The अनुव्यवसाय stage of cognition cognises the validity of the व्यवसाय stage of cognition, since, it is the अनुव्यवसाय stage of the same.

The content of अनुव्यवसाय is the same as the content of व्यवसाय. The धर्मधर्मिवैशिष्ट्य is the content of व्यवसाय. Hence, अनुव्यवसाय cognises the same. It also cognises the प्रामाण्य of व्यवसाय level cognition. Since, प्रामाण्य i.e. validity is an attribute of the cognition.

1-3-5 i) व्यवसाय विषयभूतं धर्मधर्मिवैशिष्ट्यं स्वविषयव्यवसाय-विषयकानुव्यवसायं प्रति सत्तया विषयत्वयोग्यं व्यवसायविषयत्वात् ।

ii) तत्तज्ज्ञानप्रामाण्यं स्वाश्रयज्ञानविषयकानुव्यवसाययोग्यं ज्ञानधर्मत्वात् ।

These two syllogisms establish that the validity of the cognition is cognised by the very means by which the cognition is cognised. It is inbuilt in the very epistemological process of the cognition.

However, in the case of invalidity, it has to be ascertained by the disagreement between the the object of the cognition and the actual fact. Therefore अप्रामाण्य is परतः.

अप्रामाण्यं तु विसंवादे सत्येव गृह्यते इति न स्वतः तद्ग्रहः । प्रामाण्यधीस्तु संवादाद्यनुसंधानं विनापि दृष्टा इति विशेषः ।

1.4 स्वतस्त्वानुमानेषु बाधोद्धारः

1-4-1) Those who do not accept स्वतस्त्व of प्रामाण्य raise an objection against the above syllogism that states that the अनुव्यवसाय level of cognition cognises the validity also of the व्यवसाय level cognition. They argue that अनुव्यवसाय may cognise रजतत्वप्रकारकत्व but it cannot cognise रजतत्ववद्विशेष्यकत्व as it is a fact that is outside the scope of Manasa pratyakṣa.

ननु याथार्थ्यं न साक्षिणः अनुव्यवसायस्य वा विषयः रजतत्वप्रकारकत्वे तस्य विषयकत्वेपि रजतत्ववद्विशेष्यकत्वे संदेहदर्शनेन रजतत्ववत्त्वरूपे बहिरर्थे तस्य असामर्थ्यात् । (p.43)

This argument does not hold good. अनुव्यवसाय cognises the व्यवसाय with its contents duly related. रजत is cognised as रजतत्वविशिष्ट at the व्यवसाय stage. Hence अनुव्यवसाय also cognises it in the same way.

अनुव्यवसायस्य ससम्बन्धिकव्यवसाय विषयकसाक्षात्कारत्वेन सम्बन्धितावच्छेदकरजतादि वैशिष्ट्यविषयकत्व नियमात् धर्मधर्म्यंशयोरिव तद्वैशिष्ट्यां शेपि व्यवसायप्रत्यासत्तेः सत्त्वेन तदप्रीतौ हेत्वभावात् । (p.43)

1-4-2) स्वतः प्रामाण्य is more clear in the case of the cognition of bliss. The सुखवत्व is as much comprehended as सुख both at व्यवसाय and अनुव्यवसाय level as these are not outside the scope of मनस्.

सुखवत्त्वादेः बहिरर्थत्वाभावेन साक्षिवेद्यसुखादिज्ञाने स्वतः प्रामाण्याप्रतिहतेः ।
(p.43)

1-5 स्वतस्त्वे संशयोपपादनम्

1-5-1) An objection is raised against प्रामाण्यस्वतस्त्व on the ground that if the validity of a cognition is considered as intrinsic and natural, then, there will be no scope for the doubt in respect of any congition. However, we do find that doubts arise in respect of the cognitions of unfamiliar matters.

ननु स्वतस्त्वे अनभ्यासदशायां संशयो न स्यात् ज्ञानग्रहे प्रामाण्यग्रहात् ।

This is answered by pointing out that though the साक्षी that cognises the validity of cognition has a natural capacity to cognise it, when there is an obstruction for it, the validity is not cognised by it. The presence of the means to identify अप्रामाण्य is an obstruction to cognise प्रामाण्य. This leads to doubt or the detection of अप्रामाण्य.

असति प्रतिबन्धके साक्षिवेद्यत्वनियमो वा साक्षिवेद्यत्वयोग्यता वा स्वतस्त्वमित्युक्तम् । अप्रामाण्य संशयस्थले च प्रामाण्यग्रहणशक्तिप्रतिबन्धिका अप्रामाण्यग्रहणसामग्री समहितैव । अन्यथा अप्रामाण्य संशयायोगात् ।

1-5-2) It should be noted here that though the cognition is cognised in such cases, the validity is not cognised. This can be explained in two ways i) The capacity to cognise the cognition and the capacity to cognise the validity are two distinct capacities. However, both are natural. When one of them viz the capacity to

cognise the validity is obstructed, the other capacity viz to cognise the cognition only operates. As a result the cognition is cognised but its validity is not cognised. This can be compared with the two capacities of Fire viz to burn and to light, both of these are natural. But sometimes, one of them is prevented and the other functions.

तद्ग्रहणशक्त्योः भिन्नत्वेपि ज्ञानत्वग्रहणशक्तिवत् प्रामाण्यग्रहणशक्तिः सहजा । न तु अप्रामाण्यग्रहणशक्तिरिव आहिता । दृश्यते च वह्नौ दाहप्रकाशनशक्त्योः सहजत्वेपि प्रतिबन्धकभेदः ।

ii) Another explanation is that the capacity to cognise the cognition and its validity is one but its area of operations are two viz cognition and validity, naturally it will not operate on that area in which there is some obstruction but continues to operate on the other area.

अस्तु वा तयोरेकैव ग्रहणशक्तिः तथापि विषयभेदेन प्रतिबन्धाप्रतिबन्धौ युक्तौ ।

1-6 प्रामाण्यनिश्चयस्य प्रवर्तकत्वम्

1-6-1) The question whether अप्रामाण्याज्ञान i.e. absence of the cognition of invalidity is the ground for प्रवृत्ति i.e. initiative to undertake the activity or deal with the object of the cognition, or प्रामाण्यनिश्चय i.e. firm cognition of the cognition is the ground is raised in this section.

Tarkatāṇḍava concludes that प्रामाण्यनिश्चय is the ground for प्रवृत्ति. It is pointed out that considering

अप्रामाण्यज्ञानाभाव as the ground involves a round about procedure. It is a negetive approach. If such a procedure is adopted, then, one can argue that व्याप्तिज्ञान is not the ground for अनुमान but व्यभिचारज्ञानाभाव is the ground, पक्षे लिङ्गज्ञान is not the ground for अनुमान but पक्षे लिङ्गासंसर्गग्रहाभाव is the ground, विशिष्टज्ञान is not the ground for प्रवृत्ति but भेदग्रहाभाव is the ground and so on. Hence, it is better and simple to say that प्रामाण्यनिश्चय is the ground for प्रवृत्ति.

1-6-2) The prāmāṇya is cognised by साक्षी. Its firmness is also cognised by it when there is no abstruction of doubt etc.

i) साक्षिरूपस्य सुखादिज्ञानस्य स्वप्रकाशत्वेन स्वस्यैव स्वप्रामाण्य-निश्चयरूपत्वात् ।

ii) घटादिज्ञानस्य तु परग्राह्यत्वेपि तद्ग्राहकेण नित्येन साक्षिणा प्रमाणत्वेनैव ग्रहणात् तस्य च स्वप्रकाशत्वेन अनवस्थाभावात् निश्चितप्रामाण्यमेव ज्ञानं प्रवर्तकम् ।

1-7 परतस्त्वे अनवस्थोक्तिः

1-7-1) Considering प्रामाण्य as परतः involves अनवस्था i.e. infinite regress, in two ways :

i) If the validity of a cognition depends upon the verification by another cognition, the latter's validity also requires verification by another cognition and that again requires further varification. This leads to अनवस्था. This

अनवस्था is designated as फलमुखी अनवस्था. Since it leads to a series of consquential verifications.

i) परतस्त्वे प्रामाण्यज्ञानस्यापि प्रामाण्यं संवादादिलिङ्गजन्यानुमितिरूपेण अन्येन ज्ञानेन ग्राह्यम्, एवं तत्प्रामाण्यमन्येनेति फलमुखी अनवस्था ।

1-7-2) There is no room for any अनवस्था in स्वतस्त्व theory.

साक्षी is the final authority. No परीक्षा is necessary to comprehend the validity. It is comprended in a natural way. It is only अप्रमाण्य that is ascertained by परीक्षा.

ननु त्वन्मते दोषशङ्कादिरूपप्रतिबन्धनिरासार्थं सा अपेक्षितैव । तथा च तत्रापि दोषशङ्कायां तन्निरासाय परीक्षान्तरमित्यनवस्था तुल्यैवेति चेन्न । साक्षिवेद्यसुखदुःखादिज्ञाने दोषशङ्काया एव अभावेन परीक्षानस्थाभावात् । उक्तं च भगवत्पादैः न परीक्षानवस्था स्यात् साक्षिसिद्धेत्वसंशयात् ।

1-8 परतस्त्वे प्रथमप्रामाण्यानुमित्यसम्भवः

1-8-1) According to परतस्त्व theory the प्रामाण्य has to be inferred. However, the साध्य viz. प्रामाण्य is yet to be known. Hence, the syllogism proposed to establish प्रामाण्य will suffer from साध्याप्रसिद्धि ।

किञ्च प्रामाण्यमनुमेयं चेत् कथं प्राथमिकं तज्ज्ञानम् । अप्रसिद्धविशेषणत्वेन अनुमानाप्रवृत्तेः ।

Further, गुणजन्यत्व, दोषाभावजन्यत्व or दोषाजन्यत्व cannot be utilised as हेतु to infer प्रामाण्य. Since, these are to be ascertained by their result pramā itself and hence cannot be utilised to establish it.

गुणजन्यत्वस्य दोषाभावजन्यत्वस्य दोषाजन्यत्वस्य च प्रमारूपकार्य-कल्प्यत्वेन जन्यतावच्छेदकप्रमात्वाज्ञाने गुणजन्यत्वादेः दुर्ज्ञानत्वेन च अन्योन्याश्रयात् ।

1-8-2) After pointing out that the very idea of inferring the validity proposed by परतस्त्ववादिन् is untenable, Tarkatāṇḍava explains the procedure of the cognition of प्रामाण्य and अप्रामाण्य by साक्षी as per स्वतस्त्व theory.

मन्मते तु उत्सर्गतः प्रामाण्यं गृण्हन्नपि साक्षी बाधानन्तरमुक्तरीत्या विसंवादलक्षणापवादात् अप्रामाण्यमपि गृण्हाति ।

साक्षी cognises the validity in the natural course. However, when it finds that there is no agreement between the content of the cognition and the actual fact, it comprehends the invalidity of the cognition concerned. From this it is clear that both validity and invalidity are cognised by साक्षी only in the respective cognitions.

1-8-3) In this context the remark in विष्णुतत्त्वनिर्णय as 'अनुमेयमेव अप्रमाण्यम्' and in वादावली as अप्रामाण्यस्य अनुमेय-त्वावसायात् need clarification. These remarks give an impression that अप्रामाण्य has to be inferred. However, this is not the intention of these remarks. These remarks only mean that for the cognition of अप्रामाण्य by साक्षी the presence of विसंवाद i.e. disagreement between the content of the cognition and the actual fact is the ground. It is only in this limited sense that परतस्त्व of

प्रामाण्य is stated as अनुमेय not in the sense of regular अनुमेयत्व as claimed in Tatvachintāmaṇi.

i) या तु विष्णुतत्त्वनिर्णयटीकायां अनुमेयमेव अप्रामाण्यमित्युक्तिः सा साक्षिणो अप्रामाण्यग्रहणे विसंवादापेक्षा नियतेत्यभिप्रेत्य । अत एव तत्रैव 'न पुनर्ज्ञानग्राहकमात्रग्राहकत्वमित्युक्तम् ।'

ii) वादावल्यां च अप्रामाण्यस्य अनुमेयत्वावसायात् इत्युक्त्वा न च अप्रामाण्यं निरपेक्षेण साक्षिणा निश्चितचरमित्युक्तम् ।

1-9 ज्ञप्तौ परतस्त्वानुमानभङ्गः

1-9-1) Tarkatāṇḍava quotes three syllogisms proposed by the परतस्त्ववादिन् to establish परतस्त्व. The points made in the three are the same in different forms of parīṣkaras. Hence we will notice one of them only.

स्वाश्रयविषयकनिश्चयावधिकतृतीयक्षणवृत्तिसमानाधिकरणसंशयविषयीभूतं ज्ञानप्रामाण्यं स्वाश्रयग्राहकयावज्ज्ञानाग्राह्यम् स्वाश्रयविषयकनिश्चयसमानकालीन-सामग्रीजन्यसंशयविषयत्वात् ।

The import of this syllogism may be put in simple words as follows : The validity of the cognition that co-exists with a doubt about its object will not be cognised by the very cognition for which the validity is claimed, as it is an object of the doubt generated by the same means by which the cognition concerned is generated.

Tarkatandava examines this syllogism clause by clause and points out अपसिद्धान्त, बाध and व्याघात.

i) उक्तरूपेण स्वाश्रयग्राहकत्वस्य परमतेपि सिद्धत्वात्तदभावसाधने अपसिद्धान्तः । प्रामाण्यग्राहकेण प्रामाण्यं न ग्राह्यमित्युक्ते बाधः व्याघातश्च स्फुट एव । (न्या.दी)

1-10 उत्पत्तौ परतस्त्वे चिरन्तनानुमानभङ्गः

1-10-1) Nyāya holds that the validity of cognition is generated by some other additional means than the means that generate the cognition. They propose the following syllogism to establish it.

अनित्यप्रमा ज्ञानहेत्वतिरिक्तहेतुजन्या कार्यत्वे सति तद्विशेषत्वात् अप्रमावत् ।

The valid cognition is generated by a cause that is different from the cause of the cognition. This is because this is a special form of cognition. Mere cognition or ज्ञान is सामान्य while प्रमा is विशेष a special form. Just as अप्रमा that is विशेष form of ज्ञान is generated by some other cause viz. दोष, the प्रमा is also generated by some other cause viz. गुण.

1-10-2) This contention is rejected by pointing out that valid cognition is a cognition. Hence, it does not require any separate cause than the cause of the cognition. To envisage a separate cause is a contradiction.

प्रमायाः ज्ञानत्वेन तद्धेतोर्ज्ञानहेतुतया तदतिरिक्तजन्यसाधने बाधात् विरोधाच्च । (p.98)

A few more syllogisms are formulated in Tattva-chintāmaṇi by Gangesha, all these are duly reviewed in Tarkatāṇḍava and their drawbacks are pointed out. We will notice one more which is slightly differently formulated.

अनित्यप्रमा अप्रमाकारणविजातीयकारणजन्या अप्रमाविजातीय कार्यत्वात् ।

The valid cognition is generated by a different cause than the invalid cognition, since, these two are different types of effects.

The idea behind this contention is that both these are generated by a common cause viz. इन्द्रियसन्निकर्ष. However, these are different. Therefore, a different element has to be envisaged as a cause of these to account for their difference. This different element is गुण in the case of प्रमा and दोष in the case of अप्रमा.

This contention is also rejected by pointing out that one and the same cause may generate different effects due to some other factor in one of them. For instance when heat applied to a mango fruit both the colour and taste develop. Here the cause is the same but the effects are different. Similarly इन्द्रियसन्निकर्ष may generate प्रमा or अप्रमा depending upon the other circumstances. प्रमा being natural it does not require any additional cause while अप्रमा requires दोष. Hence, प्रामाण्य is स्वतः and अप्रामाण्य is परतः.

पाकजरूपरसादौ कारणावैजात्येपि कार्यवैजात्यदर्शनात् ।

Here, the different nature of रूप and रस leads to different results while in the case of different objects of the cognition viz. सत् and असत् lead to the difference while ज्ञानसामग्री viz. इन्द्रियसन्निकर्ष is the same.

1-11 अनित्यप्रमामात्रानुगतधर्मभङ्गः

1-11-1 उत्पत्तौ परतस्त्ववादिन् considers गुण as the cause of प्रामाण्य. However, he is not able to identify a गुण that is commonly found in different instances of प्रमा, that is to say, they are not able to identify 'प्रमामात्रानुगतगुण'.

Tarkatāṇḍava quotes their explanation :

अनुगत– विशेष्यविशेषणज्ञानं गुणः प्रमामात्रे अनुगतो हेतुः ।

Cognising the object and its attributes is गुण.

विशिष्टप्रमां प्रति विशेष्यनिष्ठविशेषणज्ञानत्वेन हेतुता

To cognise the complex of the object and its attribute, the cognition of the attribute as present in the object is the ground. This avoids the contengency of considering a cognition of an object in which the attribute concerned is not present as प्रमा. For instance, in the instance of the cognition of रजत as रजत the attribute रजतत्व is present in रजत while in the instance of cognising शुक्ति as रजत the attribute रजतत्व is not present in the object शुक्ति. This makes the former प्रमा and the latter अप्रमा. Cognising the

object in the former way is गुण. It is this गुण. that invests the cognition with प्रामाण्य. In later Nyāya work it is put as तद्वति तत्प्रकारकत्वज्ञानं गुणः ।

1-11-2) This explanation of the nature of गुण is not acceptable to Tarkatāṇḍava. The very idea that the cognition of the attribute proceeds the cognition of the object as qualified by it is not acceptable. In the very first instance the object is cognised as qualified by the attribute. Therefore, there is no cause and effect relation between the cognition of the attribute and that of the object qualified by it. Hence, the cognition of the object qualified by the attribute is a very normal event and need not be considered as special गुण. Much less as a common nature i.e. अनुगतधर्म.

विशिष्टज्ञानं प्रति विशेषणज्ञानकारणत्वस्यैव मां प्रत्यसिद्धेः । वक्ष्यते चैतन्निर्विकल्पकभङ्गे ।

In the case of अनुमिति and शाब्दज्ञान also लिङ्गपरामर्श and शब्दकारणकत्व are the grounds in the natural course and these need not be considered separately as गुण.

अनुमितित्वशाब्दत्वादेश्च लिङ्गपरामर्शशब्दकारणकत्वादिनैवोपपत्त्या लिङ्गपरामर्शादिप्रतिनियतगुणोक्ति र्व्यर्था ।

1-12 यज्ञपत्युक्तवक्त्रानुमानभङ्गः

1-12-1) Tarkatāṇḍava quotes the view of Yajñapati to the effect that परतस्त्व can be worked out even

without अनुगतगुण and states that his explanation amounts to the acceptance of स्वतस्त्व.

प्रमामात्रानुगतगुणाभावेपि परतस्त्वं सेत्स्यति ।

अनित्यप्रमात्वं, स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्ति, स्वाश्रयमात्रावृत्तिधर्मावच्छिन्नकार्यता प्रतियोगिककारणत्वाश्रयमात्रानुत्पाद्य-कार्यमात्रवृत्तिधर्मत्वात् अप्रमावत् इत्यनुमानं तत्र प्रमाणम् ।

The import of this syllogism may be put in simple words as under :

Validity is present only in such cognition in which the attribute presented in the cognition is present in the object of cognition, since, it is present in the cognition that is not generated by the cognition of an object in which the attribute concerned is absent.

1-12-2) Quoting the above syllogism Tarkatāṇḍava points out that you have not said anything new.

स्वतस्त्वेपि अनित्यप्रमामात्रवृत्तिना तत्तत्प्रमात्वरूपेण धर्मेण अवच्छिन्ना या तत्तत्प्रागभावनिरूपिता कार्यता तदाश्रयमात्रवृत्तित्वस्य अनित्यप्रमात्वे सत्त्वेन सिद्धसाधनात् ।

According to स्वतस्त्व theory the validity is present in the cognition generated by the means by which the cognition concerned is generated. Yajñapati's syllogism does not say anything more than this.

1-13 प्रत्यक्षादिप्रमासु प्रत्येकानुगतगुणभङ्गः

1-13-1) परतस्त्व वादिन् claims that अनुगतगुण can be worked out for प्रत्यक्षप्रमा etc. and states प्रत्यक्षप्रमायामिन्द्रियार्थ-सन्निकर्षस्य अर्थस्य च अनुमितिप्रमायां यथार्थलिङ्गपरामर्शस्य शब्दप्रमायां यथार्थवाक्यार्थज्ञानस्य च गुणस्य अनुगमात् ।

This contention is not accepted by Tarkatāṇḍava. सन्निकर्ष and अर्थ will be present in अप्रमा also. Therefore, these two cannot constitute गुण. दोषाभाव has to be taken into account. This means निर्दुष्टेन्द्रियसन्निकर्ष is प्रमासामग्री. Hence, there is no point in considering सन्निकर्ष and अर्थ as गुण.

प्रत्यक्षप्रमामात्रे न सन्निकर्षार्थौ हेतू । शुक्तौ रूप्यभ्रमकालेपि तयोः सत्त्वेन शुक्तित्वेन शुक्तिप्रमाप्रसङ्गात् । दोषः प्रतिबन्धक इति चेत् तर्हि आवश्यकत्वात् दोषाभावादेव प्रमास्तु ।

1-13-2) Further, in योगिप्रत्यक्ष and the तत्ता aspect of प्रत्यभिज्ञा there is no इन्द्रियसन्निकर्ष.

किञ्च योगिप्रत्यक्षादौ प्रत्यभिज्ञायां च तत्तादौ नास्ति ।

In the instance of the inference of the fire by mist as the smoke, there is no यथार्थलिङ्गपरामर्श. Similarly in the verbal cognition arising from the utterances of parrot, there is no यथार्थवाक्यार्थज्ञान.

i) बाष्पे धूमभ्रमेण उत्पन्नायां यादृच्छिकसंवादेन प्रमायामनुमितौ न यथार्थलिङ्ग परामर्शोस्ति ।

ii) शुकादिवाक्यजन्यायां यादृच्छिकसंवादेन प्रमायां न यथार्थवाक्यार्थ-ज्ञानमस्ति ।

1-13-3) The claim that बाधाभाव has to be added, does not help, since, बाधाभाव itself can serve the purpose.

न च बाधाभावसहकृतसत्यपरामर्शादिर्गुण इति वाच्यम् । आवश्यकत्वाद् बाधाभावेनैव प्रमात्वसम्भवेन गुणस्य हेतुत्वासिद्धेः ।

1-13-4) The contention that योग्यता is गुण is also not correct. The योग्यता is of the nature of non-contradiction by प्रमाण. Thus it is an aspect of प्रामाण्य itself. Hence, it cannot be considered as गुण that causes प्रामाण्य.

i) ननु शाब्दप्रमायां योग्यता तत्प्रमा वा गुणः ।

ii) प्रमाणाबाधरूपा स्वरूपसती योग्यतातु प्रामाण्यान्तर्गतविषय-सत्त्वात्मकत्वात् न गुणः ।

1-14 स्थूलावयवप्रत्यक्षप्रमादौ भूयोवयवेन्द्रियसन्निकर्षहेतुत्वभङ्गः

1-14-1) परतस्त्ववादिन् insists that for the cognition of gross objects contact of the sense with a larger number of constituents of the objects is required. This is गुण i.e. an additional requirement. Hence the validity of such a cognition is परतः. He proposes the following syllogism.

अनित्यप्रमात्वम् अनित्यज्ञानत्वप्रयोजकाधिकप्रयोज्यं तदन्वयव्यतिरेकानु-विधायित्वात् ।

The validity of cognition needs something more than the means of cognition to generate it as it is generated when there is such an additional cause and not generated when such cause is absent.

Such an additional cause is भूयोऽवयवेन्द्रियसन्निकर्ष.

1-14-2) This contention is rejected by pointing out that in the instance of the cognition of पीतः शङ्खः and also वंशे उरगभ्रम there is भूयोवयवेन्द्रियसन्निकर्ष but still प्रमा has not arisen. If it is argued that in these cases the पित्तदोष and मण्डूकवसाञ्जनदोष has prevented the प्रमा, then, it amounts to saying that दोषाभाव is the cause. Hence, there is no need to consider something additional as गुण. The correct position is as follows :

दोषाभावेन अप्रमारूपविपरीतकार्यानुत्पत्तौ ज्ञानसामग्र्यैव प्रमोत्पत्तिः ।

1-15 प्रमायां दोषाभावस्य हेतुत्वभङ्गः

Though दोषाभाव is helpful for the validity of the cognition, it cannot be considered as the cause. Sense etc means of cognition have a natural capacity to generate valid cognition. The दोष only prevents it and leads to the generation of अप्रमा. However, दोषाभाव by itself does not generate the valid cognition. Hence, it is not a cause.

i) अस्तु तर्हि दोषाभावादेव प्रमा इति चेन्न दोषाभावस्य अपेक्षितत्वेपि प्रमाजननशक्तिः सहजा ।

ii) प्रयोजकत्वमात्रस्य आपादने इष्टत्वात् ।

1-16 उत्पत्तौ स्वतस्त्वे अनुमानानि

At the close of प्रामाण्यवाद Tarkatāṇḍava states the syllogisms that establishes उत्पत्तौ स्वतस्त्व. Since the points made in these are already stated while refuting परतस्त्व. We will notice only two syllogism that make out a good case for स्वतस्त्व.

i) भूयोऽवयवेन्द्रियसन्निकर्षः न प्रमायामसाधारणं कारणम् भ्रमजनकत्वात् । मनः संयोगवत् ।

ii) संशयोत्तरप्रमा विशेषप्रमाजन्या न तां विनापि उपपन्नत्वात् । भ्रमवत् ।

These two syllogisms rule out the claim of भूयोवयवेन्द्रियसन्निकर्ष and विशेषप्रमा to be the additional factors for generating validity. Consequently it is established that the normal ज्ञानसामग्री is प्रमासामग्री. Nothing additional to this, and outside this is required to generate the validity of the cognition.

2. वेदापौरुषेयत्वे अनुमानानि

2-1-1 Tarkatāṇḍava has formulated a number of syllogisms to establish अपौरुषेयत्व of वेद. We will notice some of them.

i) वेदतात्पर्यविषयः पौरुषेयशब्देतरप्रमाणकः पौरुषेयशब्दाप्रमाणकत्वे सति सप्रमाणकत्वात् ।

The Subjects conveyed by Veda are conveyed by a pramāṇa other than pauruṣeya śabda as these are valid

but not conveyed by pauruśeya śabda. This syllogism is intended to counter the view of Gangeśa in Tatva-Chintāmani which claims pauruṣeyatva for Veda.

Gangeśa argues that the words convey that which the speaker intends to convey. Therefore, Veda also must be stated as conveying that the speaker of Veda intends to convey. Hence, Veda is also pauruṣeya.

यः शब्दः यदिच्छया वक्त्रा प्रयुक्तः स तत्परः इति तदिच्छया वक्तृप्रयुक्त-शब्दगोचरत्वमेव शब्दतात्पर्य विषयत्वमिति इति वेदगततात्पर्यपर्यालोचनया तस्य पौरुषेयत्वमिति मणिकृदुक्तिखण्डनाय वेदतात्पर्यविषय इति पक्षनिर्देशः । (भा.दी)

In this context Bhāvadīpa raises the question as to what is Veda and explains in three ways (i) साक्षाद् धर्मबोधकः शब्दो वेदाः ii) क्रमविशिष्टवर्णाः वेदाः, iii) पूर्वतन्त्रे मन्त्राधिकरणे मन्त्रपदार्थोक्तरीत्या वेद इत्यभियुक्तप्रयोगविषयो वेदः ।

Bhāvadīpa quotes the explanation offered by Gangeśa in Tattvacintāmaṇi.

'शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे इति शब्दजन्ययथार्थवाक्यार्थज्ञानजन्य प्रमाणशब्दत्वम्' इति मण्युक्तरीत्या (भा.दी)

ii) Another syllagism is formulated to establish अपौरुषेय प्रमाणकत्व of वेद as under.

वेदः अपौरुषेयशब्दप्रमाणकम् इन्द्रियलिङ्गपौरुषेयशब्दाप्रमाणकत्वे सति सप्रमाणकत्वात् ।

Veda is of the nature of apauruśeya pramāṇa, since, it is not of the nature of pratyakṣa, anumāna or pauruṣeya Śabda.

iii) A third syllogism is also formulated as वेदत्वम् अपौरुषेयवृत्ति तदितरावृत्तित्वे सति वृत्तिमत्वात् ।

The attribute of Vedatva is to be found in apauruṣeya only as it is not found in any other but it is found.

2-1-2) An important point to be noted here is that the import of Veda viz., धर्म and अधर्म cannot be comprehended by perception etc., other pramāṇas.

i) वेदार्थे धर्माधर्मादौ अस्मदादिप्रत्यक्षस्य अप्रवृत्तेः ।

It cannot be argued that these are perceived by Īśvara and yogins, since, this fact has to be established by Veda itself. It will result in reciprocal dependence.

ईश्वरयोगिप्रत्यक्षयोश्च धर्मादिवद्वेदं विना असिद्धेश्च । धर्मादिकं कस्यचित् प्रत्यक्षं वस्तुत्वाद् घटवत् इत्यादौ अद्यापि धर्माद्यसिद्धेः अन्योन्याश्रयात् ।

The fact of the inability to ascertain धर्म-अधर्म etc., without अपौरुषेय वेद is made clear by Sri Ānanda tīrtha in Viṣṇutatvanirṇaya with the remark 'तदभावे सर्वसमयाभिमत-धर्माद्यसिद्धेः ।

The pauruṣeya works cannot convey dharma as the puruṣas concered are likely to have the drawbacks of ignorance, wrong knowledge, intention to misrepresent etc.,

न च पौरुषेयवाक्येन तत्सिद्धिः । पुरुषेषु अज्ञानमिथ्याज्ञानविप्रलम्भप्रमाद-करणापाटवादीनां सम्भावितत्वेन अनाश्वासात् ।

2-1-3) It cannot be argued that the omniscient Īśvara can be envisaged as the author of Veda. In this case, it has also to be envisaged that he is omniscient, without any drawback etc., which amounts to envisaging many things. Therefore, it is better to envisage only apouruṣeyatva of Veda and consider it as a source of the knowledge of dharma, adharma etc.,

i) ईश्वरस्य सार्वज्ञ-अविप्रलम्भकत्व–अप्रमादकरणपाटवोपदेष्ट्रत्वादीनां वेदे तत्कृतत्वस्य च कल्पनीयत्वे कल्पनागौरवं स्यात् ।

ii) अपौरुषेयवाक्याङ्गीकारे न किञ्चित् कल्प्यम् ।

A syllogism is formulated to establish नियतानुपूर्वीकत्व i.e., a fixed order of words and syllables as under

वेदः कालभेदेन अनियतानुपूर्वीको न दोषामूलकत्वे सति प्रमाकरणा-मूलकत्वात् ।

The order of words and syllables in the veda does not change at different times as it is free from the drawbacks and not generated by any other pramāṇa.

This is made clear in the सुधा by the remark नियतैक-प्रकारत्वम् अपौरुषेयत्वम् ।

The absence of pauruṣeyatva is established by another syllogism as under :

वेदः आप्ताऽप्रणीतः प्रमाकरणामूलकत्वात् । शुकादिवाक्यवत् ।

Veda is not composed by आप्त person as it is not caused by any causes of cognition. Neither the knowledge of an आप्त nor his desire to compose has any role in respect of Veda.

Finally, a syllogism is formulated to show that apauruṣeya veda is the source of the knowledge of dharma.

धर्मादिकं प्रमाणोपतं वस्तुत्वात् घटवत् । इत्यादिना अपौरुषेयवाक्यसिद्धिः ।

2-2 अपौरुषेयत्वे अनुकूलतर्कः

Tarkatāṇḍava mentions a number of अनुकूल तर्क in support of वेदापौरुषेयत्व. We will notice some of them.

i) यदि वेदः पौरुषेयः स्यात् तर्हि अध्येतृणां कर्तृविशेषस्मरणं स्यात् ।

If veda was composed, then, the teachers and students would have remembered him.

ii) If veda was composed by Īśvara, then, smṛti would not have stated Īśvara sees them.

स्मृतिषु ईश्वरेणापि दृष्टत्वस्यैव उक्तिः न स्यात् ।

iii) If veda was pauruṣeya, then, there would not be any source for the knowledge of dharma and adharma as no other pramāṇa including pauruṣeya vākya could convey these.

धर्मादिसिद्धिः न स्यात् । प्रकारान्तरेण तदसिद्धेरुक्तत्वात् ।

iv) If veda was pauruṣeya then, they would be on par with the works of Buddha, Jina and Turuṣkāgama and will not be acceptable sacred works.

पौरुषेयत्वे वेदस्य बौद्धागमतुल्यत्वम् ।

The Śruti supports apauruṣeyatva of Veda.

i) वाचा विरूपनित्यया

ii) श्रुतिर्वाव नित्या अनित्याः वाव स्मृतयः

iii) सर्गे सर्गे अमुनैवेते उद्गीर्यन्ते तथैव च ।
तत्क्रमेणैव तैर्वर्णैः तैः स्वरैरेव नान्यथा ।
इति क्रमाद्यव्यासत्वोक्तेः ।

iv) तदुत्पत्तिवचश्चैव भवेद् व्यक्तिमपेक्ष्य तु । इति वेदोत्पत्ति-वाक्यगतिकीर्तनाच्च ।

v) यावद् ब्रह्म विष्टतं तावती वाक्.

The above śruti statements support the apauruṣeyatva of Veda.

2-3 पौरुषेयत्वानुमानभङ्गः

Tarkatāṇḍava mentions some of the syllogisms formulated by Gangeśa in Tatvachintāmani in support of the pauruṣeyatva of veda and rejects the same. We will notice some of them to give an idea of his approch.

2-3-1) वेदः पौरुषेयः वाक्यत्वात् लौकिकवाक्यवत् ।

Veda is composed by some one as it consists of sentences.

This claim does not stand scrutiny. It is already pointed out that the order of words in the veda is fixed and the teacher after teacher recite it in the same way. Even Īśvara recites it in the same way in different kalpas. This nature of fixed order of veda its apauruṣeyatva.

i) अध्यापकेन स्वबुद्धिस्थपूर्वपूर्वदिवसीयक्रमानुसारेण उत्तरोत्तरदिवसेषु इव ईश्वरेणापि स्वबुद्धिस्थ प्रवाहानादिपूर्वपूर्वकल्पीयक्रमानुसारेणैव उत्तरोत्तरकल्पेषु उच्चारयति ।

ii) उक्तं च सुधायाम् – नियतैकप्रकारत्वमपौरुषेयत्वम् ।

2-3-2) अत्रोक्तं मणौ वेदः सजातीयोच्चारणानपेक्षोच्चारितजातीयः वाक्यत्वात् ।

Veda does not depend upon previous recitation of similar sentence, since, it consists of the sentences composed by someone.

In the case of apauruṣeyatva, the recitation of the veda by a student depends upon its recitation by the teacher and his recitation by his teacher, that is to say, it is सजातीयोच्चारणापेक्षोच्चारित अपौरुषेयत्वपक्षे सर्वस्यापि वेदाध्ययनस्य गुर्वध्ययनपूर्वकत्वेन सजातीयोच्चारण सापेक्षत्वात् ।

However, Manikara does not want to assign such a possition to veda, therefore, he has puts the साध्य as सजातीयोच्चारणानपेक्षित. The हेतु given by him viz., वाक्यत्व

implies that a वाक्य is always newly formed and hence it does not depend upon सजातीयोच्चारण.

Tarkatāṇḍava points out that this syllogism does not affect apauruṣeyatva of Veda. Even in the case of Veda सजातीयोच्चारानपेक्षत्व is found in the case of first recitation by Īśvara at the commencement of a kalpa and those seers to whom Veda is self revealed.

प्रतिसर्गादौ ईश्वरेण स्वबुद्धिस्थपूर्वपूर्वकल्पोच्चारणेऽपि तस्य उच्चारणान्तरा-नपेक्षत्वेन सिद्धसाधनात् ।

ii) स्वयं प्रतिभातानां वेदवाक्यानां सजातीयोच्चारणानपेक्षत्वेन अंशे सिद्धसाधनात् ।

2-3-3) बुबोधयिषुपठितः वेदः स्वानपेक्ष स्वसमानविषयकज्ञानपूर्वकः बुबोधयिषु वाक्यत्वात् । लौकिकवाक्यवत् ।

The Veda recited by a teacher to enable the students to learn it is a result of the cognition of a sentence not generated by a similar sentence recited earlier, since, it is a separate sentence uttered to enable the students to learn like any other ordinary sentence.

The implication of this syllogism is that just as the utterance of a laukika sentence is not preceded by the knowledge of the same sentence earlier, the utterance of the vedic sentence also need not be preceeded by the knowledge of the same sentence earlier. In other words it is also a newly composed sentence as much as a laukika sentence.

In this syllogism the expression तदनपेक्षम् means तदजन्यम् and the expression बुबोधयिषु means शिष्यान् बोधयितु-मिच्छन्.

2-3-4) वेदो वाक्यार्थगोचरयथार्थज्ञानजन्यः । प्रमाणशब्दत्वात् भारतवत् । वेदस्य यथार्थज्ञानपूर्वकत्वाभावे अन्धपरम्परा स्यात् ।

Veda is the result of the knowledge of the import of its sentences, since, it is valid verbal communication.

The implication of this syllogism is that there is a person behind the vedic sentences whose knowledge is communicated through the vedic sentences. This means it is pauruṣeya.

These two syllogisms do not help to establish pauruṣeyatva of Veda. Iśvara recites Veda without depending upon the previous recitation of it. Therefore, the first syllogism suffers from सिद्धसाधन. मन्मते ईश्वरज्ञानस्य वेदानपेक्षत्वेन सिद्धसाधनात् ।

The second syllogism also does not prove its point. Just as प्रत्यक्ष is not preceeded by the knowledge of a person veda also need not be preceeded by the knowledge of a person. प्रत्यक्षवत् ईश्वरज्ञानवच्च तदपूर्वकत्वेऽपि अन्धपरम्पराभावोपपत्तेः ।

2-3-5) वैदिकम् अहं पदं स्वतन्त्रवक्त्रपरम् अहं पदत्वात् इत्यनेन पौरुषेयत्वसिद्धिः ।

The expression अहम् i.e., I, in the veda indicates a person who speaks. Therefore veda is pauruṣeya.

This centention also cannot be accepted. This leads to rediculous results.

i) In the vedic statements like शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा. The body and the tongue referred may have to be considered as belonging to Īśvara.

ii) The statements in Gītā 'किं नो राज्येन गोविन्द' शिष्यस्तेहं शाधि मां त्वां प्रपन्नम् may have to be considered as a statement of वेदव्यास.

iii) The statement in रघुवंश 'वाच्यस्त्वया मद्वचनात् स राजा' may have to be considered as a statement कालिदास.

It amounts to saying that in these statements, the expression अहं, मे etc., apply to the authors of the works instead of the characters in these literary works.

Therefore, the expression 'अहम्' in Veda cannot be taken as referring to the author of Veda to support 'the pauruṣeyatva of veda.

2-3-6) वेदः तात्पर्यपूर्वकः प्रमाणशब्दत्वात् भारतवत् Veda has a tātparya, since, it is a valid verbal communication.

The expression तात्पर्य is explained as अर्थप्रत्यायनेच्छया उच्चरितत्व i.e., a statement that is made with an intention to convey a particular sense. Such intention has to be on the part of a person. Therefore, veda is pauruṣeya.

तात्पर्यज्ञान is a necessary requirement for verbal communication. Otherwise it becomes difficult to select a meaning of a word that has more than one meaning.

तात्पर्यज्ञानस्य शाब्दज्ञानानियामकत्वे हि नानार्थे श्लिष्टे च विनिगमकाभावेन अर्थविशेषधीः न स्यात् ।

Therefore, the necesity of तात्पर्यज्ञान has to be accepted. This is stated in a metephorical way.

तस्मात् श्रुतिकुमार्याः तात्पर्यरूपो गर्भ एव पुंयोगे मानम् ।

The claim of this syllogism viz., the necessity of तात्पर्यज्ञान is accepted. However, this does not help to envisage pauruṣeyatva.

In apauruṣeya veda ईश्वराभिप्राय is तात्पर्य. Hence, no other person is required for this purpose.

अपौरुषेयत्वेपि मन्मते ईश्वराभिप्रायपूर्वकत्वस्य सत्त्वम् ।

Mīmāmsakas explain it differently. According to them अर्थाभिज्ञाध्यापकाभिप्राय serves the purpose of तात्पर्य.

मीमांसकमतेपि अनादौ संसारे अर्थाभिज्ञाध्यापकाभिप्रायस्य सत्त्वम्

In view of the above, it is concluded that तस्मात् पौरुषेयत्वे अनुमानं न प्रमाणम् ।

2-3-5) Certain śruti statements such as 'छन्दांसि जज्ञिरे' appear to state the generation of veda. However the उत्पत्ति stated in these should be taken in the sense of अभिव्यक्ति i.e., revelation.

तदुत्पत्तिवचश्चैव भवेद् व्यक्तिमपेक्ष्य तु ।

Just as vedas have no begginning, these have no end also. This is explained as follows :

क्रमविशेषविशिष्टा वर्णाः एव वेदाः । क्रमश्च बुद्धिनिमित्तकः एव । न तु स्वतः इत्युक्तम् । ततश्च सर्वेषां सर्वथा वर्णविषयविवक्षितक्रमोपाधिभूत-बुद्ध्युपरम एव वेदे विनाशो वक्तव्यः । न च ईश्वरस्य तथाविधबुद्ध्युपरमो युज्यते । तस्य सर्वदा सर्वज्ञत्वात् ।

3. ईश्वर वादः

3-1) Nyāya tries to establish Īśvara by inference. The following syllogisms are formulated to establish the same. These syllogisms are loaded with technical adjuctives to avoid certain pitfalls. However, the core part of it is sufficient to comprehend the point made in the syllogism. Hence, we will mention the core part of the syllogisms.

i) भावकार्याणि उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि भावकार्य-त्वात् । प्रागभावप्रतियोगित्वाद्वा

The positive products are produced by a person who has the cognition of the material cause of these, a desire to produce these, and takes initiative for the same, since, these are products and were absent previously.

The driving point of this syllogism is to establish an agent to produce such products also for which there is no observable agent.

For instance, the earth, mountains etc., have no observable agent. Hence, Īśvara has to be envisaged as their agent. The standard Nyāya texts give a syllogism in simple words as क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वात् । The earth, the sprouts etc., have an agent, since, these are products.

3-2) Tarkatāṇḍava rejects this argument on the ground that these are not products in the sense in which Nyāya explains the nature of a product. These have no प्रागभाव.

अत्रोच्यते । अनुपलब्धप्राक्कोटिषु भूभूधरादिषु कार्यत्वमेव कुतः ।

The word प्राक्कोटि means प्रागभाव. These have no प्रागभाव, hence these are not कार्य.

Nyāya's claim that these are कार्य because, these are सावयव is not acceptable. सावयत्वात् कार्यत्वमिति चेत् न.

The parts of earth etc., are not the अवयवs that produce the object but these are only अंश.

भूम्यादेः उपलभ्यमानाः भागाः न आरम्भकाः अवयवाः किन्तु गगनस्य प्रदेशभेदा इव कालस्य क्षणादय इव च अंशा एव सन्तु ।

कार्यत्व cannot also be explained as द्रव्यारब्धद्रव्यत्व since, अकार्यत्ववादिन् will not accept it.

It cannot also be explained as द्रव्यसमवेतद्रव्यत्व, since such an entity need not be a कार्य as in the case of जाति.

It cannot also be explained as मध्यमपरिमाणत्व since, the nature of मध्यमपरिमाणत्व can be explained without depending upon सावयवत्व.

i) द्रव्यारब्धद्रव्यत्वं चेत् अकार्यत्ववादिनं प्रति असिद्धम् ।

ii) द्रव्यसमवेतद्रव्यत्वं चेत् जात्यादेरिव अकार्यत्वेनापि उपपत्त्या अप्रयोजकता ।

iii) मध्यमपरिमाणत्वं चेत् तदापि अप्रयोजकतैव । गगनप्रदेशस्येव सांशत्वेनैव तदुपपत्तेः ।

Further, a product can arise on the basis of its causes without an agent.

किञ्च कर्तृभावेपि कार्यत्वस्य सकारणकत्वमात्रेण उपपन्नत्वेन अप्रयोजकता ।

3-3) Nyāya formulates some more syllogisms to establish Īśvara.

i) विमतं परमाण्यादि चेतनाधिष्ठितं स्पन्दते जडत्वात् शरीरवत् ।

The paramāṇu etc., non-sentients move only when these are guided by sentient, because, these are non-sentient.

ii) विमतं ब्रह्माण्डादि धारकप्रयत्नवता धृतम् गुरुत्वे सति अपातित्वात् वियति विहङ्गमवत् ।

The Brahmāṇḍa etc., are held by the effort of a person as these have weight but still do not fall like a bird moving over the sky.

These syllogisms do not help to establish Īśvara, since, the first movement of paramāṇu and the stability of Brahmāṇḍa may be explained as due to the adṛṣṭa of the persons who are going to utilise these.

अस्मदादीनामेव अदृष्टद्वारा अधिष्ठातृत्वस्य सम्भवेन सिद्धसाधनात् ।

3-4) In respect of the formation of परिमाण i.e. dimension of परमाणु, द्वयणुक and त्र्यणुक, Nyāya has a peculiar view. They talk of two types of परिमाण viz., अणु and महत्. The परमाणु and द्व्यणुक have अणुपरिमाण while त्र्यणुक onwards महत् परिमाण commences. They have also a guideline in respect परिमाण as परिमाणं समानजातीयोत्कृष्ट-परिमाणजनकम् ।

In view of this they hold a peculiar view in respect of the formation of परिमाण of द्व्यणुक and त्र्यणुक. Two परमाणुs make a द्व्यणुक. The dimension of the latter is due to the number two of the two परमाणुs that are the constituents of it. The अणुपरिमाण of each constituent परमाणु is not the cause. If this is taken as the cause, then the परिमाण of द्व्यणुक will be required to be अणुतर as per the above guideline. This is not desirable. Therefore, number two present in the two परमाणूs has to be considered as the cause of the dimension of द्व्यणुक. Similarly, the number three present in the three द्व्यणुकs that make a त्र्यणुक is the cause of the dimension of त्र्यणुक.

Now, these numbers two, three etc., are not natural as in the case of number one. These are mentally envisaged by the person who counts. That is to say these are अपेक्षाबुद्धिजन्य. The अपेक्षाबुद्धि of ordinary persons cannot be envisaged at the time of creation when two परमाणुs move to make a द्व्यणुक and three द्व्यणुकs move to make a त्र्यणुक. This has to be the अपेक्षाबुद्धि of ईश्वर only. Hence, Iśvara has to be accepted.

त्रित्वद्वित्वे अपेक्षाबुद्धिजन्ये अनेकवृत्तिसङ्ख्यात्वात् घटवृत्तिद्वित्वादिवत् । अपेक्षाबुद्धिश्च अस्मदादिषु असम्भाविनी तदाधारं ईश्वरं कल्पयति ।

This contention is rejected by pointing out that द्वित्वसङ्ख्या and त्रित्वसङ्ख्या are not the causes of परिमाण of द्व्यणुक and त्र्यणुक but the conjunction of परमाणु and द्व्यणुक is the cause respectively. Therefore, the question of dependence on अपेक्षाबुद्धि does not arise.

द्रव्यारम्भकत्वेन कृप्तस्य संयोगस्यैव परिणामहेतुता कल्प्या ।

Even if सङ्ख्या is the ground the एकत्व present in each परमाणु and each द्व्यणुक itself can be considered as the cause.

परमाणुगतेकत्वयोः त्र्यणुकगतैकत्वानाम् असमवायिकरणत्वसम्भवात् ।

This means that there is no need of अपेक्षाबुद्धि. Moreover, द्वित्व is not अपेक्षाबुद्धिजन्य. किञ्च द्वित्वादेः अपेक्षाबुद्धिजन्यतैव न । व्यञ्जकत्वेनाप्युपपत्तेः ।

Strictly speaking there is no sub-division of परिमाण as अणु and महत् । There is only उत्कर्ष and अपकर्ष of परिमाण–

किञ्च परसिद्धं परिमाणत्वावान्तरमणुत्वादिजातिभेदमङ्गीकृत्य इदमुदितम् । वस्तुतस्तु परिमाणमवान्तर जातिरहितमेव सर्वद्रव्येषु उत्कर्षापकर्षवद्वर्तते ।

4. वर्णवादः

4-1 Those who do not accept apauruṣeyatva of veda base their arguments on the anityatva of varṇas i.e., syllables.

ननु तथापि वर्णसमुदायरूपस्य वेदस्य न नित्यत्वम् । वर्णानामेव अनित्यत्वात् ।

They support thir argument by प्रत्यक्ष and अनुमान.

i) We have the experiences like 'the syllable ga' 'that was heard earlier is not heard now' 'The loud talking is over now.' These prove the perishable nature of syllables. This is a perception of their perishable nature.

'शान्तः कोलाहलः' श्रुतपूर्वो गकारो नास्तीति प्रत्यक्षेण.

ii) The syllables are perishable, since, these are products.

वर्णः अनित्यः भावत्वे सति कृतकत्वात् इत्यनुमानेन वर्णानां अनित्यत्वात् ।

This contention is rejcted by pointing out that the experience 'the loud talking is over now' relates to the sound but not to the syllables.

शान्तः कोलाहलः इति धीः ध्वनिविषयैव ध्वनिविशेषस्यैव कोलाहलत्वात्

ii) There is प्रत्यभिज्ञा i.e., recognition type of experience like the gakara heard earlier is again heard, 'The same gakara is uttered again and again'.

This proves that the gakāra did not perish. The statement 'the gakara that was heard earlier is not heard now' means that 'the gakara that was manifested by the utterance, is now not made manifest.'

श्रुतपूर्वो गकारो नास्तीति धीस्तु नास्त्येव । श्रुत एव गकारः पुनः श्रूयते । एक एव गकारः असकृदुच्चरितः इत्यादिप्रत्यभिज्ञाविरोधात् । किन्तु उच्चारणेन उपलब्धवर्णस्य अनुपलब्धिमात्रेण श्रुतपूर्वो गकारो न श्रूयते इत्येव धीः ।

4-2 वर्णानित्यत्वे अनुमानभङ्गः

To establish the perishable nature of the syllables a few more syllogisms are formulated by Nyāya.

i) वर्णः प्रयत्नोत्पाद्यः तदनभिव्यङ्ग्यत्वे सति तदनन्तरमुत्पाद्यमानत्वात् ।

The syllable is perishable, since, it is produced.

This is not acceptable as it is already pointed out that it is only manifested but not generated.

iii) वर्णः अनित्यः उत्कर्षापकर्षवत्त्वात् ।

The syllable is perishable, since it is of the nature of being raised and lowered.

This contention is not valid. In the case of मन्द्र and तार only one level viz., lowest, and highest are found. No variation is found.

उत्कर्षवत्वे सति अपकर्षवत्त्वस्य मन्द्रतमे तारतमे च असिद्धेः ।

4-3 वर्णानित्यत्वे प्रत्यभिज्ञाविरोधः

There is recognition as 'स एवायं गकारः' in respect of syllables. If the earlier gakara is taken as perished and the later gakara as newly generated, then the experience of recognition cannot be accounted for. Hence, the syllable has to be accepted as eternal.

किञ्च स एवायमिति प्रत्यभिज्ञाबाधः

It cannot be argued that the प्रत्यभिज्ञा conveys the identity of पुरोवर्तिगकार with the गकार in general by a reference to गत्वजाति. It does not particularly convey the identity of the present गकार with the earlier गकार that has perished.

न चेयं प्रत्यभिज्ञा पुरोवर्तिनि गकारे गत्वेनोपस्थितगकाराभेदविषया सा च पुरोवृत्तिगकारस्य स्वाभेदेनापि उपपन्ना । नतु तत्कालाद्यवच्छेदेनोपस्थितगकाराभेद विषयेति वाच्यम् ।

The above argument does not hold good, since, there is a clear reference to past and present of the two of which the identity is conveyed प्रत्यभिज्ञा ।

सोऽयमिति तत्तेदन्ताधिकरणाभेदप्रतीतेः ।

Further, in the statement स एवायं गकारः If सः refers to जाति and अयम् refers to व्यक्ति, then, it amounts to saying the identity between जाति and व्यक्ति which is not intended here. This will result in wrong cognition.

किञ्च प्रत्यभिज्ञाजनके स एवायं गकारः इति वाक्ये स इत्यस्य जातिपरत्वे अयमित्यस्य व्यक्तिपरत्वे जात्या सह व्यक्तेरेव अभेदः प्रतीयेत । तथा च निरसिष्यमाणभ्रान्तिपक्ष एवान्तर्भावः स्यात्–

It is further argued that in the statement 'सैव इयं घर्घरी' 'स एवायं ध्वनिः' etc., प्रत्यभिज्ञा of the sound is also stated. Therefore, let the sound also be eternal.

न चैवं सति 'सैवेयं घर्घरी' 'स एवायं ध्वनिरित्यादिप्रत्यभिज्ञया ध्वनिरपि नित्यः स्यादिति मण्युक्तं युक्तम् ।

If both the sound and the syllable are eternal, then, both of them would have to be heard eternally. Therefore, one of them has to be considered as eternal and the other as manifester. Between these two the sound cannot be considered as eternal. Hence, the syllable is eternal and the sound is its manifester.

ध्वनिवर्णयोः द्वयोरपि नित्यत्वे सदोपलब्धिप्रसङ्गात् ।

तस्माद् द्वयोरेकः नित्यः अन्यस्तु व्यञ्जकः इति वक्तव्ये वर्ण एव नित्यः ध्वनिस्तु व्यञ्जकः इति युक्तम् । ध्वन्यभावे वर्णाग्रहात् ।

4-4 वर्णानां नित्यत्वे अनुमानानि

Tarkatāṇḍava gives nine syllogisms to establish the eternity of the syllable. We will notice only three of them-

i) शब्दत्वं नित्यवृत्तिघ्राणभिन्नबहिरिन्द्रियव्यवस्थापकतावच्छेदकत्वात् ।

The attribute शब्दत्व is an attribute of an eternal

object the cognition of which enables to infer an external sense other than ghrānendriya viz., srotra.

घ्राणभिन्नं यद् बहिरिन्द्रियं श्रोत्ररूपं तदस्तित्वावधारकता नियामकत्वा-दित्यर्थः शब्दज्ञानं हि कार्यं स्वकारणभूतं श्रोत्राख्यमिन्द्रियमनुमापयति । (न्या.दी)

ii) शब्दत्वं नित्यवृत्ति सकलशब्दवृत्तित्वात् । सत्तावत् । शब्दत्व is an attribute of an eternal object as it is found in all śabdas.

iii) वर्णः नित्यः ध्वनिशब्दत्वव्याप्यभिन्नत्वे सति श्रावणत्वात् शब्दत्ववत् ।

The syllable is eternal, since, it is comprehended by the ear and it is different from the sound.

4-5 वर्णानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वम्

The syllables are manifested in an orderly way through the respective व्यञ्जकs. The pronounciation of the respective sounds are the व्यञ्जकs for the respective syllables. Therefore, though the syllables are eternal, the contengency of their cognition at all the time does not arise.

ननु वर्णानां नित्यत्वे सर्वदोपलब्धिः स्यात् । उच्चारणजन्यस्य ध्वनिरूपव्यञ्जकस्य कादाचित्कत्वात् न दोषः ।

त्वन्मते वर्णोत्पादकानामिव मन्मते तद्व्यञ्जकानामपि नियतत्वात् ।

Tarkatāṇḍava points out that a number of points will have to be envisaged if one goes by the उत्पत्ति theory of syllables

किञ्च उत्पत्तिपक्षे 1) प्रतिपुरुषं प्रत्युच्चारणं क्षणमात्रस्थितिकवर्णधाराया: 2) तत्प्रागभावानाम् 3) तद्ध्वंसानाम् 4) अन्यत्र अदृष्टस्य पूर्वपूर्ववर्णे उत्तरोत्तरवर्णोत्पादकत्वस्य 5) उत्तरोत्तरवर्णे पूर्वपूर्व वर्णनाशकत्वस्य 6) अन्त्योपान्त्यवर्णयो: सुन्दोपसुन्दन्यायेन अन्योन्यं वध्यधातकभावस्य कल्पनमित्यतिगौरवम् ।

4-6 वर्णानां नित्यत्त्वेपि क्रमोपपादनम्

It is argued that if the syllables are eternal, there cannot be any sequence of them in the word. Hence, these have to be considered as temporal.

न च नित्यत्वे कालादिकृतक्रमाभावात् वर्णनित्यत्वे क्रमानुभवो बाधकम्. This argument is not valid. Since, sequence can be explained on the basis of manifestation. यदि उत्पत्तिक्रमानुसन्धानादर्थधी: तर्हि अभिव्यक्तिक्रमादर्थधी: इति समम् ।

5. समवायवादः

5-1) Samavāya can not be established by perception, since, there is no perceptual cognition such as 'इमौ समवेतौ' or 'अनयो: समवाय:' as in the case of the perception of samyogya 'इमौ संयुक्तौ' The syllogism proposed to establish the pratyakṣatva of samavāya viz.

तन्तुपटसम्बन्धप्रत्यय: चाक्षुष: चक्षुरन्वयव्यतिरेकानुविधायित्वात् । The cognition of the relation between the threads and the cloth is perceptual, since, it arises from the contact with the eyes.

This relation is claimed to be samavāya. However, it is svarūpasambandha but not samavāya.

स्वरूपसम्बन्धस्य चाक्षुषत्वेन अर्थान्तरत्वात् ।

An attempt is made by Gangeśa to establish samavāya by inference. He proposes the following syllogism.

गुण्यादिना गुणक्रियाजातिविशिष्टयथार्थबुद्ध्यः सम्बन्धिभिन्नसम्बन्धविषयाः विशिष्टविषयत्वात् ।

The cognition of the object qualified by quality, action, universal etc., cognises the relation between these attributes and the object as it is a cognition of a qualified object. This relation is claimed to be samavāya. This claim is rejected by pointing out that the relation concerned can be svarūpasambandha.

The Svarūpa sambandha is already accepted by Nyāya between the ground and the absence of jar, between the cognition and the object. Hence, this process of svarūpasambandha may be extended to the object and its attributes also.

किञ्च अभाववद् भूतलमिति अभावविशिष्टबुद्धिवत् ज्ञातो घटः इति सविषयकज्ञानादिविशिष्टबुद्धिवच्च गुणादिविशिष्टबुद्धेरपि स्वरूपसम्बन्धेनैवोपपत्तिः ।

5-2 समवाये बाधकम्

A relation between Samavāya and the object has to be envisaged. If this relation is also samavāya, then, one more relation between samavāya number one and samavāya number two will have to be envisaged this leads to infinite regress. To avoid such a contengency,

if svarūpasambandha is envisaged between the samavāya and the object, then, it is better to envisage the svarūpa sambandha between the object and quality etc., attributes instead of introducing a new relation called samavāya.

किञ्च समवायस्यापि स्वसम्बन्धिना सह सम्बन्धाङ्गीकारे अनवस्या । तत्र स्वरूपसम्बन्धाङ्गीकारे च गुणादेरेव गुण्यादिना स्वरूपसम्बन्धोऽस्तु ।

6. निर्विकल्पक वादः

6-1 Nyāya accepts an earlier stage of the perception designated as Nirvikalpaka. At this stage the object and its attributes are cognised in an isolated way. In the next stage designated as Savikalpaka the object is cognised as qualified by its attributes. The second stage is the perception proper for them. The earlier stage is considered by them as atīndriya. In view of this they cannot establish it by pratyakṣa pramāṇa. Nor it can be ascertained on the basis of Vyāvahāra i.e., a statement and the activity arising out of it, since, these arise only from savikalpaka cognition.

निर्विकल्पके न प्रत्यक्षं प्रमाणम् । तस्य अतीन्द्रियत्वाभ्युपगमात् । नापि व्यवहारः तस्य सविकल्पक साध्यत्वात् ।

6-1-2) However, Gangeśa has formulated a syllogism to establish it.

एतज्जन्मनि प्राथमिकं गौरिति प्रत्यक्षम् जन्यविशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वात् ।

स्वरूपसम्बन्धस्य चाक्षुषत्वेन अर्थान्तरत्वात् ।

An attempt is made by Gangeśa to establish samavāya by inference. He proposes the following syllogism.

गुण्यादिना गुणक्रियाजातिविशिष्टयथार्थबुद्धयः सम्बन्धिभिन्नसम्बन्धविषयाः विशिष्टविषयत्वात् ।

The cognition of the object qualified by quality, action, universal etc., cognises the relation between these attributes and the object as it is a cognition of a qualified object. This relation is claimed to be samavāya. This claim is rejected by pointing out that the relation concerned can be svarūpasambandha.

The Svarūpa sambandha is already accepted by Nyāya between the ground and the absence of jar, between the cognition and the object. Hence, this process of svarūpasambandha may be extended to the object and its attributes also.

किञ्च अभाववद् भूतलमिति अभावविशिष्टबुद्धिवत् ज्ञातो घटः इति सविषयकज्ञानादिविशिष्टबुद्धिवच्च गुणादिविशिष्टबुद्धेरपि स्वरूपसम्बन्धेनैवोपपत्तिः ।

5-2 समवाये बाधकम्

A relation between Samavāya and the object has to be envisaged. If this relation is also samavāya, then, one more relation between samavāya number one and samavāya number two will have to be envisaged this leads to infinite regress. To avoid such a contengency,

if svarūpasambandha is envisaged between the samavāya and the object, then, it is better to envisage the svarūpa sambandha between the object and quality etc., attributes instead of introducing a new relation called samavāya.

किञ्च समवायस्यापि स्वसम्बन्धिना सह सम्बन्धाङ्गीकारे अनवस्या । तत्र स्वरूपसम्बन्धाङ्गीकारे च गुणादेरेव गुण्यादिना स्वरूपसम्बन्धोऽस्तु ।

6. निर्विकल्पक वादः

6-1 Nyāya accepts an earlier stage of the perception designated as Nirvikalpaka. At this stage the object and its attributes are cognised in an isolated way. In the next stage designated as Savikalpaka the object is cognised as qualified by its attributes. The second stage is the perception proper for them. The earlier stage is considered by them as atīndriya. In view of this they cannot establish it by pratyakṣa pramāṇa. Nor it can be ascertained on the basis of Vyāvahāra i.e., a statement and the activity arising out of it, since, these arise only from savikalpaka cognition.

निर्विकल्पके न प्रत्यक्षं प्रमाणम् । तस्य अतीन्द्रियत्वाभ्युपगमात् । नापि व्यवहारः तस्य सविकल्पक साध्यत्वात् ।

6-1-2) However, Gangeśa has formulated a syllogism to establish it.

एतज्जन्मनि प्राथमिकं गौरिति प्रत्यक्षम् जन्यविशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वात् ।

The first perception of a cow is generated by the cognition of its odjective, since, it is a cognion of an object qualified by its odjective.

This cognition of the odjective is nirvikalpaka cognitions.

The fact of the necessity of the cognition of the adjective before one arrives at the cognition of qualified object is found in the case of the inference, and the verbal communication. In the case of the inference the sādhyā which is an adjective of pakṣa has to known. In the case of verbal communication, the cognition of the meaning of the word is necessary. These instances give rise to a ruling that the cause and effect position observed in some specific cases may be taken as a general, if there is no other obstacal to accept it. This establishes that the cognition of the adjective is necessory before the cognition of the qualified object.

अनुमितिशाब्दज्ञानादौ हि साध्यप्रसिद्धिपदार्थोपस्थित्यादिः हेतुः । साध्यादीनि विशेषणानि । एवं च यद्विशेषयोः कार्यकारणभावः असति बाधके तत्सामान्ययोरपि सः इति न्यायेन साध्यप्रसिद्ध्यादेः जन्यविशिष्टज्ञानसामान्ये जन्यविशेषणज्ञानत्वेन हेतुत्वसिद्धिः ।

6-1-3) This argument does not help to establish nirvikalpaka cognition. The very contention that the sādhyāprasiddhi is necessary for the inference, is not acceptable. When vyāptijñāna etc., other requirements

are available inference does arise without waiting for sādhyaprasiddhi.

अनुमित्यादौ साध्यप्रसिद्ध्यादेरहेतुत्वेन यद्विशेषयोरिति न्यायानवकाशात् । न हि व्याप्त्यादिज्ञाने सति तद्विलम्बेन अनुमितिविलम्बः ।

Further, even if साध्यप्रसिद्धि is required, it is not required as the cognition of an adjective.

अस्तु वा साध्यप्रसिद्ध्यादिरनुमितिहेतुः । तथापि वह्निमानित्यादिज्ञानं प्रति वह्निज्ञानस्य न विशेषणज्ञानत्वेनैव कारणता । तथा च न निर्विकल्पकसिद्धिः ।

Further, Nyāya also has dispensed with विशेषणज्ञान in the following cases.

i) घटाभाववद् भूतलमिति ज्ञाने अभावरूपविशेषणस्य ।

ii) संयुक्तौ इमौ समवेतौ इमौ इत्यादिज्ञाने संयोगसमवायादि विशेषणस्य

iii) अनुव्यवसाये व्यवसायगतरजतत्वप्रकरकत्वरूपविशेषणस्य ।

iv) अभावज्ञाने प्रतियोगित्वादिरूपस्य विशेषणस्य
पूर्वमज्ञातस्यैव स्वीकृतत्वात् ।

In all these instances, विशेषण is not known earlier.

6-1-4) It is argued that the cognition of a qualified object requires the cognition of the relation between its adjective and the object. This requires the cognition of the odjective earlier. Hence, nirvikalpakajñāna is necessary. This argument also does not help. The adjective and the object are simelteneously cognised

along with their relation. Hence, there is no need of any earlier cognition of the adjective.

विशिष्टज्ञानं सम्बन्धविषयकं सम्बन्धज्ञाने च सम्बन्धिज्ञानं हेतुः । सम्बन्धि च विशेषणमिति निरस्तम् । सम्बन्धिनोः युगपदिन्द्रियसन्निकर्षे ताभ्यां सहैव इन्द्रियसंनिकष्टसम्बन्धस्यापि धीरित्युक्तत्वात् । इयांस्तु विशेषः सम्बन्धः सम्बन्धिनौ विना न भाति तौ तु तेन विनापि भातः ।

6-2 निर्विकल्पके बाधकम्

6-2-1 Since, the nirvikalpaka stage of cognition is not comprehended by the sense, the comprehension of its absence cannot be properly explained. Yogya-anupalabdhi is the ground for the cognition of the absence but nirvikalpaka is not upalabdhi yogya as it is atīndriya.

किञ्च अतीन्द्रियज्ञानोपगमे योग्यानुपलब्धेः अभावेन ज्ञानाभावस्य निश्चेतुमशक्यतया अभावधीः न स्यात् ।

It cannot be contended that the absence of nirvikalpaka can be ascertained by the absence of savikalpaka, because, every nirvikalpaka is not necessorily followed by savikalpakas.

न च सविकल्पकाभाव एव निर्विकल्पकाभावे लिङ्गम् । निर्विकल्पके सति सविकल्पकावश्यम्भावाभावेन निर्विकल्पकं प्रति सविकल्पकस्य अव्यापकत्वात् ।

6-2-2) Further, at the time when savikalpaka arises from nirvikalpaka, the means of nirvikalpaka viz., contact with the sense continues. This will result in the

mutual obstruction of the means of savikalpaka and nirvikalpaka as in the case of satpratipakṣa. As a result none of the two can arise.

अपि च निर्विकल्पकजन्यसविकल्पकोत्पत्तिदशायामतीन्द्रियनिर्विकल्पक-सामग्री सत्त्वेन सत्प्रतिपक्षवत् सामग्रीद्वयस्य परस्परप्रतिबन्धादेकमपि ज्ञानं नोत्पद्येत ।

It may be also pointed out that in the cognition 'A person with a stick' just as the core nature of the stick and the person are cognised in nirvikalpaka let the core nature of the relation be cognised.

किञ्च दण्डपुरुषसन्निकर्षे तदुभयस्वरूपमात्रविषयकनिर्विकल्पकवत् सम्बन्धस्यापि सन्निकर्षे तत्स्वरूपमात्रविषयकं निर्विकल्पकमपि कस्मान्न स्यात् ।

6-2-3) Finally nirvikalpaka cannot be considered as cognition. Since, it does not lead to Vyāvahāra i.e., activity, it does not leave any samskāra, does not lead to any desire. It is not of the form of nischaya i.e., firm cognition, nor it is a valid cognition.

अपि चास्य निर्विकल्पकजातीयस्य ज्ञानकार्यं व्यवहारं संस्कारं इच्छादिकं च कदाप्यजनयतः न ज्ञानत्वं युक्तम् । नतरां च अस्य स्वविषये कदापि निश्चयत्वम् । न चास्य स्वविषये प्रमात्वम् ।

There is no difficulty in the cognition being Savikalpaka without being preceded by nirvikalpaka

i) द्रव्यादिविकल्पानां प्रथममेव उत्पत्तौ बाधकाभावेन निर्विकल्पकानुपपत्तेः ।

ii) तस्मात् सर्वमपि ज्ञानं सविकल्पकमेव ।

The above summary of the contents of Tarkatāṇḍava is intended to help the modern scholars to get an idea of the contribution made by Tarkatāṇḍava to Indian epistemology. Particularly, th epistemology of Dvaita Vedanta. Tarkatāṇḍava is a critical review of Tattva-chintāmani of Gangeśa. Hence, this summary will be useful to the students of Nyāya also. It is hoped that this will enkindle the interest in young scholar to study the whole text of Tarkatāṇḍava with the help of traditional scholars and evaluate from modern point of view.

We give below a brief account of the life and works of the author of Tarkatāṇḍava Śrī Vyāsatīrtha and the commentator Śrī Rāghavendratīrtha,

Śrī Vyāsatirtha

Śrī Vyāsatīrtha the author of Tarkatāṇḍava has a high place in the field of Indian Philosophy, particularly in Dvaita Vedānta tradition. In a traditionally quoted verse of Pakṣadhara-Miśra, the well-known Navyanyāya scholar of Navadvīpa the high esteem in which Vyāsatīrtha was held by his contemporary scholar is enshrined. The verse reads as :

यदधीतं तदधीतं यदनधीनं तदप्यधीतम् । पक्षधरविपक्षो नावेक्षि विना नवीनव्यासेन ।।

His high place in Dvaita Vedānta tradition is indicated by another traditionally quoted verse :

श्रीमध्वः कल्पवृक्षस्तु जयार्यः कामधुक् स्मृतः । चिन्तामणिस्तु व्यासार्यो मुनित्रयमुदाहृतम् ।।

This great scholar was born in or about 1460 A.D. in a village Bannur in the Mysore District of Karnataka. He was ordained to sannyāsa by Brahmaṇyatīrtha when he was just about sixteen years of age. He went to Kānchi a centre of learning in those days and mastered the Nyāya, Vyākaraṇa and Mīmānsā Śastras. Then, he proceeded to Mulbagal another centre of learning, particularly, of Dvaita Vedānta and studied Dvaita Vedānta under Lakṣmīnārāyaṇa Muni also known as Śrīpādarāja.

Sāluva Narasimha the king of Candragiri near Tirupati was a disciple of Śrīpādarāja. He invited Śrī Vyāsatīrtha to his court and honoured him. Later Sāluva Narasimha became the king of the famous Vijayanagar empire and invited Śrī Vyāsatīrtha to stay at Vijayanagar. Since then, Śrī Vyāsatīrtha made Vijayanagar his head quarter. Sāluva Narasimha's successor Krishna Devarāya developed great admiration for him and took his blessings and guidance in the welfare of the kingdom.

In a biographical poem on Vyāsatīrtha viz. व्यासयोगिचरितम् composed by सोमनाथकवि a detailed account of Śrī Vyāsatīrtha's life and works is given. Śrī Vyāsatīrtha composed his three great works : न्यायामृतम्, तात्पर्यचन्द्रिका and तर्कताण्डवम् during his stay at Vijayanagar.

His तात्पर्यचन्द्रिका is a work of अधिकरणप्रस्थान । It is written as a commentary on तत्त्वप्रकाशिका of Jayatīrtha. However, it is more a वादग्रन्थ then a mere commentary. The bhāṣyas of Śaṅkara and Rāmānuja, their commentaries viz., Bhāmati and Śrutaprakāśikā respectively are critically examined in this work. His third great work तर्कताण्डव is a criticism of तत्त्वचिन्तामणि of गङ्गेश the source book of नव्यन्याय । It also reviews the views of Bhātta and Prābhākara Mīmānsā in respect of प्रमाण, प्रामाण्य, पदार्थ, वाक्यार्थ etc., epistemological and the linguistic issues. It is a work of a comparative study of these issues. His other works viz., भेदोज्जीवन and मन्दारमञ्जरी are also important works. The merit and the contents of all works of Śrī Vyāsatīrtha are fully dealt with in the history of Dvaita literature by Dr. B.N.K. Sharma in a masterly way, Dr. Dasgupta also has highlighted the contribution of Vyāsatīrtha to Dvaita-Advaita dialectics and the polemics of Indian Philosophy. Therefore, only a brief reference to the life and works of Śrī Vyāsatīrtha is made here.

Sri Vijayindra Tirtha (AD 1514-95)

Śrī Vijayīndra tīrtha was an all-round scholar, a prolific writer, an intellectual and a Yogi. He is credited by Śrī Sumatīndra tīrtha, with proficiency in all the sixty four kalas (arts) and the epithet 'Sarvatantrasvatantra' is found applied to him in many of his works. That this was no empty boast is clear from a few of his works bearing on

the Pūrvamīmāmsā, Nyāya and Kāvya literature. The Gurugunastava distinctly says that he was a relentless critic of Śaiva and Advaita systems.

He was ordained monkhood (Śrī Viṣṇutīrtha) by Śrī Vyāsatīrtha and was his disciple learning all the shastras from him. Later he succeeded Śrī Surendra Tīrtha in 1539 AD. and was the paramaguru of Śrī Rāghavendra tīrtha. He is credited with one hundred and four works. He was contemporary of Appayya Dikshita, who was a shiva and advaita follower. Many of works of Śrī Vijayīndra tīrtha repel Appayya Dīkṣita's works.

One of his works is very detailed commentary on Tarkatāṇḍavam. His style is terse compared to Śrī Rāghavendra tīrtha.

Śrī Rāghavendra tīrtha, himself in his mangalācharaṇa mentions -

गुरुपादकृताऽप्यस्ति व्याख्या साऽत्यन्तविस्तरा ।
व्याख्येयं मन्दबोधाय क्रियतेऽशेषगोचरा ।।

"Although there is already a detailed commentary from my paramaguru, but it may not be understood by one and all."

However, the manuscript that we have contains commentary for only ten prakaranas.

His तात्पर्यचन्द्रिका is a work of अधिकरणप्रस्थान । It is written as a commentary on तत्त्वप्रकाशिका of Jayatīrtha. However, it is more a वादग्रन्थ then a mere commentary. The bhāṣyas of Śaṅkara and Rāmānuja, their commentaries viz., Bhāmati and Śrutaprakāśikā respectively are critically examined in this work. His third great work तर्कताण्डव is a criticism of तत्त्वचिन्तामणि of गङ्गेश the source book of नव्यन्याय । It also reviews the views of Bhātta and Prābhākara Mīmānsā in respect of प्रमाण, प्रामाण्य, पदार्थ, वाक्यार्थ etc., epistemological and the linguistic issues. It is a work of a comparative study of these issues. His other works viz., भेदोज्जीवन and मन्दारमञ्जरी are also important works. The merit and the contents of all works of Śrī Vyāsatīrtha are fully dealt with in the history of Dvaita literature by Dr. B.N.K. Sharma in a masterly way, Dr. Dasgupta also has highlighted the contribution of Vyāsatīrtha to Dvaita-Advaita dialectics and the polemics of Indian Philosophy. Therefore, only a brief reference to the life and works of Śrī Vyāsatīrtha is made here.

Sri Vijayindra Tirtha (AD 1514-95)

Śrī Vijayīndra tīrtha was an all-round scholar, a prolific writer, an intellectual and a Yogi. He is credited by Śrī Sumatīndra tīrtha, with proficiency in all the sixty four kalas (arts) and the epithet 'Sarvatantrasvatantra' is found applied to him in many of his works. That this was no empty boast is clear from a few of his works bearing on

the Pūrvamīmāmsā, Nyāya and Kāvya literature. The Gurugunastava distinctly says that he was a relentless critic of Śaiva and Advaita systems.

He was ordained monkhood (Śrī Viṣṇutīrtha) by Śrī Vyāsatīrtha and was his disciple learning all the shastras from him. Later he succeeded Śrī Surendra Tīrtha in 1539 AD. and was the paramaguru of Śrī Rāghavendra tīrtha. He is credited with one hundred and four works. He was contemporary of Appayya Dikshita, who was a shiva and advaita follower. Many of works of Śrī Vijayīndra tīrtha repel Appayya Dīkṣita's works.

One of his works is very detailed commentary on Tarkatāṇḍavam. His style is terse compared to Śrī Rāghavendra tīrtha.

Śrī Rāghavendra tīrtha, himself in his mangalācharaṇa mentions -

गुरुपादकृताऽप्यस्ति व्याख्या साऽत्यन्तविस्तरा ।
व्याख्येयं मन्दबोधाय क्रियतेऽशेषगोचरा ।।

"Although there is already a detailed commentary from my paramaguru, but it may not be understood by one and all."

However, the manuscript that we have contains commentary for only ten prakaranas.

Śrī Rāghavendra tīrtha (AD 1595-1671)

Nyāyadīpa of Śrī Raghavendra tīrtha is a detailed commentory on Tarkatāṇḍava. Śrī Rāghavendra tīrtha was a Pīthādhipati from 1623-1671 A.D. He was a successor to Śrī Sudhīndra tīrtha. He was a contemporary of Raghunātha Nāyaka and Vijaya Rāghava Nāyaka of Nāyaka of Tanjor. He was a great scholar and a great saint with mystic power. He has forty works to his credit. His works on Sūtraprasthāna are most important. Particularly, his commentary Parimaḷa on Nyāyasudha of Śrī Jayatīrtha and Prakāśika on Tātparya Chandrika are very helpful. His commentary, Tarkatāṇḍava extensively quotes Tatvachintāmaṇi of Gangeśa and other Nyāya works that are reviewed in Tarkatāṇḍava and explains the points made in Tarkatāṇḍava. His commentary viz. Tattvamañjarī on Aṇubhāṣya, his other small treatises on Brahmasūtras viz. Nyāyamuktāvaḷī and Tantradīpikā give good grounding for the study of Sūtraprasthāna. His Upaniṣatkhaṇḍārthas give word by word meaning of principal upaniṣads. He has also written commentories on Daśaprakaraṇas and Ṛgbhāṣya. His contribution to Dvaita literature is very rich both in quality and quantity.

Śrī Lakṣmīnātha tīrtha (AD 1640-1665)

Śrī Lakṣmīnātha tīrtha was Pontiff of the Vyāsarāja Mutt after Lakṣmī vallabha. He was the seventh in succession from Vyāsatīrtha. He was present during

Tirumala Nayaka (1623-1659) and Sri Rangaraya III (1642-1667), the last of the Emperors of Vijayanagar.

He remained on the Pitha of the Vyāsaraja Mutt for about twenty-five years. The exact dates of his succession and demise are not known. He mentions Śrī Yādavendra tīrtha as his Vidyāguru. Śrī Yādavendra tīrtha is probably the same as the senior disciple of Sudhīndra (1596-1623). His Brindāvanam is in Śrī Ranga.

He has written commentary on Nyāyāmṛta, Tarkatāṇḍava and Chandrika.

The commentary on Tarkatāṇḍava is only for three prakaraṇas. This manuscript was provided by Pt. Sri Veeranarayanacharya Pandurangi.

Note from Editor-in-Chief

I am happy to present the 1st Volume of the revised edition of Tarkatāṇḍava by Śrī Vyāsatīrtharu. The original edition of this book was edited by Prof. K.T. Pandurangi. This revised edition of the 1st volume, contains the entire first chapter (परिच्छेद) of Tarkatāṇḍava, with 6 sections starting from **प्रामाण्यवाद** to **निर्विकल्पकवाद**, including **वेदापौरुषेयत्ववाद, ईश्वरवाद, वर्णनित्यत्ववाद** and **समवायवाद**. This revised edition includes the following :

1. Two new commentaries for the Tarkatāṇḍava, hitherto unpublished. One by Śrī Vijayīndratīrtha (called Yuktiratnākara) and another by Śrī Lakṣmīnāthatīrtha. The commentary from Śrī Vijayīndratīrtha is very detailed compared to the commentary of Śrī Rāghavendra tīrtha (called Nyāyadīpā). However, this is available for 12 sections (**यज्ञपत्युक्तवक्रानुमानपर्यन्तं**). Similarly the commentary of Śrī Lakṣmīnāthatīrtha is available only for the first 4 sections (**प्रामाण्यस्वतस्त्वे अनुमानपर्यन्तं**).

We only had one manuscript of Śrī Vijayīndratīrtha (provided by the Dwaita Vedānta Research Centre). Unfortunately, this manuscript has several missing and incorrect readings. Wherever there were incorrect readings in the manuscript (and there are no relevant readings from other sources, including other manuscripts, previously published books like Oriental Research Institute, Mysore etc.,) readings are

hypothesized and added in the footnote ("इति भाति" or "इति स्यात्" इत्यादिना). However, wherever it was not possible to even postulate certain missing passages, we had no other choice, but to include whatever was present in the manuscript. We hope that we may be able to correct these missing passages, in our next recension, if we could get another manuscript of this commentary.

2. In this revised edition, in number of relevant passages of Tarkatāṇḍava and Nyāyadīpa, where we believe that a variant reading (पाठान्तर), is much more appropriate than what is currently present in the original edition, we have added these variant readings in the footnotes of this revised edition taken from the book published by Government Oriental Library, Mysore (published in 1932).

3. At relevant places, we have given exact references for several works (e.g. Tatvachintāmaṇi, Vardhamāna) referred by Śrī Vyāsatīrtha in Tarkatāṇḍava and in the commentaries.

4. In many cases in Tarkatāṇḍava (e.g. ईश्वरवाद), Śrī Vyāsatīrtha, has given multiple interpretations for Śrī Madwāchārya's sentences. These different interpretations have been numbered for easy read.

5. Also, in several places, both in the Tarkatāṇḍava and Nyāyadīpa, there are references made to other sections (e.g. इति पूर्वमेव उक्तं). The exact page numbers in these cases have been added for easy reference.

6. Several typographical errors present in the first original edition have now been corrected.

We are profusely indebted to the Oriental Library, Mysore and the authors of that edition (Late Vidwan Srinivasacharya and Late Vidwan V. Madhwacharya), from which we have taken the variant readings at relevant places and placed in the foot notes.

I thank our young Vidwan M. Madhwacharya for his massive efforts, working day and night, in making this revised edition much closer to the original work of the authors.

Dr. Satyadhyanacharya Katti

।। श्रीकृष्णाय नमः।।
।। श्रीव्यासराजतीर्थगुरुभ्यो नमः ।।

सम्पादकवचांसि

श्रीमन्न्यायामृततर्कताण्डवतात्पर्यचन्द्रिकाख्यमेरुकृतिनिर्मातारः सर्वतन्त्र-स्वतन्त्राः पदवाक्यप्रमाणपारावारपारङ्गताः श्रीव्यासराजगुरुसार्वभौमाः मुनित्रयान्तर्गतत्वेन प्रख्याताः

श्रीमध्वः कल्पवृक्षस्तु जयार्यः कामधुक्स्मृतः ।
चिन्तामणिस्तु व्यासार्यः मुनित्रयमुदीरितम् ।।

इति । एते न केवलं अस्मदीयैः किं पुनः परैरपि श्लाघनीयश्लोकाः ।

अद्वैतमतावलम्ब्यनन्तकृष्णशास्त्रिभिः न्यायामृताद्वैतसिद्धीनामक-ग्रन्थप्रस्तावे एते सानन्दं मुक्तकण्ठेण स्तूयन्ते । तद्वाक्यान्येवात्रोद्धियन्ते ।

द्वैताद्वैतप्रस्थानप्रसङ्गेन तत्र तत्र न्यायमकरन्दचित्सुखीप्रमाणमाला-द्वैतदीपिकादिग्रन्थेषु विशकलिततयोपलभ्यमानानां खण्डनमण्डनादि-प्रसङ्गेनोट्टङ्कितानां प्रक्रियाविशेषाणामेकत्र सङ्कलनेन विनैव कलङ्कं तत्तन्मतप्रक्रियाविशेषाणामतिगम्भीरया प्रणाल्या सरलतयोपपादनेन श्रीव्यासतीर्था एव न्यायामृतकारा मूलाचार्याः इति नेयमतिशयोक्ति-रिति । वयं विश्वसिमो यत्र केवलं द्वैतिनः किन्त्वद्वैतिनोपि विमर्शन-कुतूहलाः अधमर्णाः एव न्यायामृतकाराणां व्यासराजमठादिपुरुषाणां सर्वतन्त्रस्वतन्त्राणां परश्शतनिबन्धनिर्मातृणाम् । विश्वसिम यत् व्यासतीर्थाः अनितरसाधारणमहिमशालिनः सर्वविद्याधिष्ठानदेवताः शान्तप्रकृतयश्च यतिवर्याः इदानीमपि स्वतेजसा जीवन्ति श्रीव्यासराय-मठास्थाने यत्र तत्पीठाधिष्ठानमात्रेण बालोपि बृहस्पतिसमानो मूकोपि वाग्मिप्रवरः भवति इति वयमद्वैतमतावलम्बिनोपि तच्चरणकमलाश्रयण-मात्मनो भूषणमेव मन्महे ।। इति ।।

प्रकृततर्कताण्डवाख्यग्रन्थश्चायं नवीनन्यायकुलतिलकगङ्गेशोपाध्याय-प्रणीततत्वचिन्तामणिखण्डनार्थमुद्युक्तः । मणिग्रन्थव्याख्यातृपक्षधरमिश्राख्यः न्यायकुलभूषणः व्यासराजश्रीमच्चरणैः वादे पराजितः कलिङ्गदेशादागत्य श्रीपादराजान् प्रति भवच्छिशष्यः सर्वतन्त्रस्वतन्त्रः-

यदधीतं तदधीतं यदनधीतं तदप्यधीतम् ।
पक्षधरविपक्षः नावैक्षि विना नवीनव्यासेन ।।

इति मुक्तकण्ठः अस्तौत् । तादृशपक्षधरपक्षाश्चात्र तत्र तत्र निराक्रियन्ते । व्यासयोगिचरिताख्यग्रन्थस्थेन **"मणिकारमतमनूद्य विरचिते समयबन्धे"** इति वाक्येन अयमेव प्रसङ्गविशेषः अभिप्रेतः इति भाति ।

अप्पय्यदीक्षितैः विजयीन्द्रतीर्थान् प्रति **"पिरिन्दुपोन वेळ्ळिक्कायै मूणाग सेर्तार् व्यासर्"** । इति द्राविडभाषायामुक्तं । तदर्थश्चैवं । परैः मध्वशास्त्रं उर्वारुकमिव छिन्नमपि व्यासराजश्रीमच्चरणैः व्यासत्रयं विरचय्य तदेकीकृतमिति । परमिदं वयं न अङ्गीकुर्महे । अप्पय्यदीक्षितानां हार्दन्तु त्रेधा विभिन्नमुर्वारुकं यथा न सुतरामेकीकर्तुं शक्यं तथा यद्यपि व्यासत्रयेण एकीकृतत्वेन परिदृश्यमानमपि तत् विच्छेदयुक्तमेवेति । एतदर्थे इयं सुकुमारोक्तिः । परं व्यासराजश्रीमच्चरणाः एवेदं न मन्यन्ते । मध्वसिद्धान्तस्य भूतभाविभवदात्मभिः कैरपि क्वचिदप्यभेद्यत्वात् । तदेतत्प्रदर्शनायैव व्यासत्रयविरचनम् ।

व्यासराजश्रीमच्चरणानां जीवनचरित्रं एते ग्रन्थाः निरूपयन्ति ।

१) सोमनाथकविविरचितं **व्यासयोगिचरितम् ।**

सोमनाथकविः श्रीव्यासराजयतिवरेण्यानां पाण्डित्येन विस्मितचेताः कूडलि आर्याक्षोभ्यमठाधीशानां नारायणयतिवरेण्यानां सहायेन एतान् ददर्श तेजःपुञ्जान् शुद्धश्लोकानेतान् दृष्ट्वा पुलकितान्तरः इमं ग्रन्थमारचयत् । व्यासराजश्रीमच्चरणसविधे इमं ग्रन्थं प्रादर्शयच्च यदाह स्वयमेव तत्र ।

भगवतो व्यासतपोनिधे समक्षं तत्कटाक्षवीक्षाप्रसादसूचितानुमति-स्सोमनाथकविः अनतिसमीपवर्तिनौ परस्परोपमेयसुषुमाकारौ अतिमधुर-शीलीरवाग्भिः परतन्त्रितसामाजिकश्रवणपुटी कम्बुकण्ठकलकण्ठनामानौ पाठकौ तदीयपावनचरितकोरकिते सकलविबुधगणश्रवणाभरणं निरुदाहरणमुदाहरणमपारयत् । इत्यादिना ।

२) श्री श्रीपादराजयतिवरेण्यविरचितकन्नडपद्यम् ।

सासिरजिह्वेगळुळ्ळ शेषने कोण्डाडबेकु व्यासरायर सन्यासदिरव इति ।

३) श्रीविजयीन्द्रतीर्थविरचितः **श्रीव्यासराजाभ्युदयः** । अयं ग्रन्थविशेषः राघवेन्द्रप्पकविः सारस्वतपरिणयाख्ये स्वग्रन्थे समुल्लिखत् । परमिदानीं नोपलभ्यते इति शोकास्पदम् । एभिरेव विरचितं **श्रीव्यासराजस्तोत्रं** च ।

४) श्रीसुधीन्द्रतीर्थविरचिता **गुरुगुणरत्नमाला** । अयमपि नोपलभ्यते इति विषादास्पदम् ।

५) राघवेन्द्रप्पकविविरचितसारस्वतपरिणयः । अयं ग्रन्थः कर्णाटक-भाषायामुपलभ्यते परं सम्पूर्णं नोपलभ्यते । व्यासराजश्रीमच्चरणविषये अपूर्वविषयाः अत्र सम्प्रदृश्यन्ते ।

६) श्रीश्रीनिवासतीर्थविरचितत्वेन प्रथितः **व्यासविजयः** ।

७) पुरन्दरदासादिभिः विरचितानि कन्नडपद्यानि ।

८) मीर् आलं इति उर्दुपण्डितेन उर्दुभाषायां रचिता **गर्दङ्कहने** इति कृतिः ।

९) श्रीविद्यारत्नाकरतीर्थविरचितं **श्रीव्यासयतीशचरितम्** ।

१०) फेर्नाओ न्यूनीस् नामकेन कृतः विजयनगरप्रशंसापरः ग्रन्थः ।

The King Of Bisnaga (Vijayanagara) is a Brahmin; Everyday he hears the preaching of a Learned

Brahmin, who never married nor ever touched a women (Chronicles of Fernao Nuniz collected by Robert Sewell in the Forgotten Empire) इति तदीयवाक्यं । अत्रत्यब्राह्मणशब्देन एते एव अभिप्रेताः ।

११) **रायवाचकमु** इति तेलुगुभाषायां रचितग्रन्थः ।

१२) The Tidings of King इति आङ्ग्लभाषायां रचितग्रन्थः ।

१३) Palomics and Patronage In The City of Victory. Vyasateertha, Hindu Sectarianism, and The Sixteenth Century Vijayanagara Court. इति आङ्ग्लभाषायामाधुनिकेन Valerie Stoker नामकेन लिखितम् ।

जीवनवृत्तान्तचिन्तनम्

सर्वतन्त्रस्वतन्त्राणामेषां जीवनचरित्रोपन्यासविषये अस्मदीया प्रवृत्तिः अपरिपूर्णैव । तथापि यथामति तत्सेवार्थमत्र किञ्चिद्वक्तुं प्रयते ।

क्रिस्तशकसप्तचत्वारिंशदधिकचतुश्शताधिकैकसहस्रतमे अब्दे बन्नूरुनामकग्रामवरे एते भूमिमलमकुर्वन् । एते पूर्वाश्रमे अयं ब्रह्मण्यतीर्थ-श्रीमच्चरणानुग्रहेण यतीनां राजा भविष्यति इति सूचनाय यतिराज इति अन्वर्थनाम प्रापुः । एतेषां पितृचरणः बल्लण्णसुमतिः इति । माता च लक्ष्मीबाई इति । एते च ब्रह्मण्यतीर्थयतिवरेण्यात् तुर्याश्रमं प्रापुः । विद्यागुरवश्च श्रीपादराजनाम्ना प्रसिद्धाः लक्ष्मीनारायणयतिवरेण्याः ।

प्रकृतस्यास्य ग्रन्थस्य वादरूपत्वेन व्यासराजश्रीमच्चरणकाले वाक्यार्थसभा कथमासीत् इति किञ्चिद्वक्तुं प्रयते ।

व्यासराजश्रीमच्चरणकीर्तिमसहमानाः केचन पण्डिताः वादेन तं विजिगीषवः तोरणस्तंभनासायां बिरुदपत्रिकां बबन्धुः । तथा चाह सोमनाथकविः ।

एकदा तु तस्य व्यासमुनेः अन्यादृशपरिपाटीं विजयकथामाकर्ण्य महेर्ष्यया परिवेल्लिताः केचिदङ्गवङ्गकलिङ्गमालवचोलकेरलादिविविध-देशेभ्यः सरोषोद्वेगमापतितमात्राः एव विपश्चितः सङ्गीभूय अहंप्रथमिकया वादेन विजिगीषवः राजकुलद्वारतोरणस्तम्भनासायां दर्वीकरजिह्मयामिनीं बिरुदपत्रिकां बबन्धुः । इति ।

एतान् समीक्ष्य नरसभूपालश्च त्रस्तोभवत् । यथाह ।

आडम्बरेण महता भुवि दृश्यमानाः सर्वेपि ते युगपदेव धराधिपस्य ।
आमर्दितां सचिवपौरपुरोहिताद्यैरास्थानभूमिमधिरुह्य ततो निषेदुः ।।

वैदेशिकानां सुधियां क्षितीन्द्रः तादृग्विधामारभटीं समीक्ष्य ।
तं व्यासयोगीशितुरानुभावं जानन्नपि त्रस्त इवावतस्थे ।

इति । तदनन्तरं व्यासराजश्रीमच्चरणानामागमनं दृष्ट्वा सभायां तालध्वनिः समुदजृंभत ।। तथा चाह ।

सम्प्रेषितेन पुरतो विकलय्य पत्रीं तां शैबिकेन तरसा यतिकुञ्जरस्य ।
आगच्छतो नृपसभां गगनावगाहि तालध्वनिस्समुदजृंभत संभ्रमेण ।।

तदानीं,

कल्प्यमानजगदद्भुतमोदः कथ्यमानपरतन्त्रविभेदः ।
विद्विषामभवदाहितखेदः व्यासयोगिजयतालनिनादः ।

इति च । पुनः विजिगीषया कलिङ्गदेशवासिनं बसवभटनामानं पुरस्कृत्य कथां प्रारभन्त । तथा चाह ।

ते च दर्पोन्मत्तैर्बिरुदपत्रिकायास्तथाभूतेन छेदेन द्विगुणितरोषावेशाः विमतसुमतयः यूथपतिमिव मतङ्गजाः प्रवावदूकतातिरेकेण धिषणमपि तृणाय मन्वानं बसवभटनामानं कञ्चन कालिङ्गमनीषिणं पुरस्कृत्य तेन तापसकेसरिणा सह विजिगीषया पक्षद्वयस्थापनावतीं कामपि कथां प्रारभन्त । इति ।

तदनन्तरं बसवभटनामकोयमपि त्रिंशद्दिनपर्यन्तं वादं कृत्वा पराजितोभूत् । यथाह-

परस्परोद्भम्भितयुक्तिगुम्फाः समुल्लसत्तादृशवीरवादाः ।
अथो तदानीमुभयोपि धीराः क्षणादिव त्रिंशदहान्यनैषुः । इति ।

विस्मयमानैः सर्वैरपि सभ्यैः उपलाल्यमानवाग्वैखरीप्रभावः सः भगवान् महतीं विजयलक्ष्मीं समाश्लिषत् । इति च ।

तदनन्तरं च व्यासराजश्रीमच्चरणेभ्यः बसवभटेन स्फटिकलिङ्गं समर्पित-मद्यापि तन्मठे दृश्यते । व्यासराजश्रीमच्चरणमेधाशक्तिश्च असदृशीति वयमनेन वृत्तान्तेन अनुमातुं शक्नुमः ।

पुनरेकदा केनचित् कळिंगाधिपेन विद्याधरपात्रनाम्ना व्यासराजमुनिं वादे विजिगीषया, कतिपयैर्दिनैरेव इमं ग्रन्थं निराकृत्य पुनः प्रेषितव्यं इति ग्रन्थः एकः प्रेषितः । तं दृष्ट्वा च कृष्णदेवरायः अतीव त्रस्तो-भवत् । अस्य ग्रन्थस्य खण्डनं लेख्यमिति व्यासराजमुनिं व्यजिज्ञपत् । तं दृष्ट्वा झटित्येव तत्सर्वस्यापि ग्रन्थस्य खण्डनं क्षणकले एव विलिख्य प्रेषयेति कृष्णदेवरायाय प्रादात् । तथाचाह कविः ।

जानुभागनियन्त्रितयोगपट्टिकया व्यत्यस्तचरणतया तपनीयवेणुकाण्ड-घटितमिव सरस्वतीपीठं तं भगवन्तं व्यासयोगिनं रभसादासाद्य विश्लत्यकेशः दूरतः स्थितो व्यजिज्ञपत् ।

द्वारि कृष्णनृपतिस्समेत्य स्वस्वामिनः सहपुरोहितादिभिः ।
दर्शनावसरमीक्षतेऽधुना पाकशासन इवाब्जजन्मनः ।।

तावत्प्रवेशनविधौ गुरुणा नियुक्तैश्शिष्यैरुपेत्य विहितावसरः प्रधानः । भक्त्या नृपो भगवतः पदपद्मयुग्मविन्यस्तमौलिमवनौ नमयाञ्चकार ।

तुष्यन्नभीष्टां स्वयमेव पृच्छाव्यातन्वते व्यासयतीश्वराय ।
कृत्वांजलिं कृष्णधराधिनाथो विज्ञापयामास विनीतपूर्वम् ।।

स्वामिन् प्रमाणभूतं मायामतस्य तत्वं व्यामोहकशब्दाभिधेयस्य, भूमिमनृतस्य, दृष्टपक्षं बन्धिग्राहमिव गृहीत्वा शुकनीडारकायां पुस्तिकायामाबध्य विद्याधरपात्रनामा कलिङ्गाधिपतिः कैश्चिदहंयुभिः विपश्चिद्भिः प्रबलितोत्साहो भगवते व्यासयोगिने प्रदर्शनीयो दुस्तर-युक्तिभिस्सह विस्तारितोयं महान् ग्रन्थः इति स्वसेनापतिकरे मह्यं प्रेषिषत् । तदवश्यं तमेनं कतिपयैर्दिनैरेव दुर्लङ्घ्याभिः वाचोयुक्तिभिः भगवान् शरद्वलाहकमिव झञ्झाभिः शकलीकर्तुमर्हतीति पुस्तिकां सन्निधौ सन्दर्शयामास । व्यासतपोनिधिरपि तामादाय मुहूर्तमात्रे बह्वीभिः अतिवज्रपातिभिः उपरिदूषणानवकाशप्रदायिनीभिः युक्तिपरम्पराभिः शतशः खण्डयित्वा पुनरपि कलिङ्गाधिपतये झटिति ग्रन्थमेनं प्रेषयेति तस्मै भूपतये प्रादात् ।

विलोक्य वाचां विभवं तदीयं विशेषतो विस्मयमानचेताः ।
कृष्णक्षितीन्द्रः कृतसम्प्रणामः तस्मादनुज्ञाप्य स गेहमाप ।।

इति ।।

एतेभ्यः भगवती भारती स्वयमागत्य ग्रन्थलेखनार्थं लेखनीं प्रादा-दित्यपि श्रूयते ।

अस्मै ननु कृतनिर्मित्सवे चतुराननायेव प्रेमभारेण साक्षात्सन्निहिता भगवती भारती महनीयमहःप्ररोहां कामपि मणिलेखिकां व्यतरीत् । इत्याह कविः ।

तथा चानेन व्यासराजश्रीमच्चरणानां भगवन्निष्ठप्रेमा भगवतः व्यासराज-श्रीमच्चरणनिष्ठानुग्रहः तेषां मेधाशक्तिः असदृशीत्यादिकं ज्ञायते ।

व्यासराजश्रीमच्चरणाः पदवाक्यप्रमाणाद्यनेकवेदवेदान्तशास्त्रपारङ्गताः कर्नाटकगानशास्त्रे च प्रवीणाः । एतेषां शिष्यवरेण्याः अनेके अवर्तन्त । एतेषां शिष्यपरम्परे द्वे । गीर्वाणभाषया द्वैतसिद्धान्तप्रचारकाणामेका कर्नाटकभाषायां द्वैतसिद्धान्तप्रचारकाणामपरा । तत्र प्रथमपरम्परायां

चतुष्षष्ठिकलाविद्यापारङ्गताः चतुरधिकशतग्रन्थनिर्मातारः विजयीन्द्रतीर्थ श्रीचरणाः, युक्तिमल्लिकाद्यनेकग्रन्थनिर्मातारः वादिराजश्रीचरणाः, कूडली आर्याक्षोभ्यमठस्थनारायणयतिवरेण्याः, गोविन्द वोडेयर् इत्याद्याः सुप्रसिद्धाः । केशवादिचतुर्विंशतिनामकयतिवरेण्या अपि एतेषां अन्तेवासिनः इत्यपि श्रूयते । द्वितीयपरम्परायां पुरन्दरदासकनकदासादयः अधीतगीर्वाणशास्त्रा अपि लोकोपकाराय कर्नाटकभाषया प्रबन्धानबन्धयन् ।

एते च आभारतं विद्यापीठान् प्रवर्तयामासुः इति सारस्वतपरिणये श्रूयते । तत्र चैवं विवरणम् ।

उत्तरभारतेषु

	नगराणि	**अध्यक्षकाः**
१)	हरिद्वारे	सत्यनाथाः
२)	गयायां	हरिमिश्रः
३)	काशीनगरे	जयदेवः
४)	वङ्गदेशे	ईश्वरसूरयः

दक्षिणभारतेषु

५)	कुम्भघोणे	विजयीन्द्रतीर्थाः
६)	उडुपि	वादिराजतीर्थाः
७)	मुळुबागिलु	प्रज्ञानिधितीर्था
८)	काञ्ची(विद्यानगर)	श्रीनिवासतीर्थाः

उक्तञ्च सारस्वतपरिणये ।

ಗುರುವರರು ವ್ಯಾಸರಾಯರು ಪರಂಧಾಮಕ್ಕೆ ತೆರಳುವ ಮುನ್ನ ತಮ್ಮ ಘನತರದ ವಿದ್ಯಾಪೀಠದಧ್ಯಕ್ಷತೆಯ ಭಾರವನ್ನು ಹಲವು ಶಿಷ್ಯರಿಗೊಲಿದು ವಿಂಗಡಗೈದು ಕೊಟ್ಟರು. ಮುಂದೆ ಬಹುಕಾಲದೊಳು ಈ ರೀತಿಯಲ್ಲಿ ನಡೆಯಲದೆಂಬ ಭರವಸದಿ । ವಿಜಯನಗರದ ವಿಶ್ವವಿದ್ಯಾಲಯದೊಳನುದಿನ ಓದುತಿರ್ಪರು ಹತ್ತು ಸಾಸಿರದೆಣಿಕೆಯುಳ್ಳ ದ್ವೀಪದ್ವೀಪಾಂತರದ ಭಾರತದ ಹಲವು ವಿದ್ಯಾರ್ಥಿಗಳ ತಂಡವು ಅವರವರ ಪ್ರತ್ಯೇಕ ಸ್ಥಳದೊಳುಪಚರಿಸಿ

ಅನುಕೂಲಗೈತಿರ್ದರು, ವ್ಯಾಸರಾಯರು ತಾವೇ ಪ್ರತಿದಿನದಿ. ಸತ್ಯನಾಥಗೆ ಆ ಹರಿದ್ವಾರದ ಸುವಿದ್ಯಾಪೀಠದಧ್ಯಕ್ಷತೆಯ, ಗಯೆಗೆ ಹರಿಮಿಶ್ರ, ಜಯದವಾಖ್ಯ ಕಾಶೀಪುರಕೆ, ಈಶ್ವರಸೂರಿಯೆಂಬುವರು ವಂಗದೇಶಕೆ, ನೀವಿಹುದು ಪೋಗೆಂದು ನಿರೂಪಕೊಟ್ಟರು. ಬರೆದು ಕೈಯೊಳಗೆ ಕುಂಭಕಾಪುರವರಕೆ ವಿಜಯೀಂದ್ರರು, ಉಡುಪಿಗೆ ವಾದಿರಾಜರು, ಮುಳುಬಾಗಿಲಿಗೆ ಪ್ರಜ್ಞಾನಿಧಿಗಳೆಂಬುವರು ಉಳಿದ ವಿದ್ಯಾನಗರದಧ್ಯಕ್ಷತೆಯು ತಿರುಪತಿ ಕ್ಷೇತ್ರದೇವಾಲಯದಧ್ಯಕ್ಷತೆಯು ಶಿಷ್ಯರಾಗಿಹ ಶ್ರೀನಿವಾಸರಿಗೆ ಇತಿ । एते स्वकीये अन्तिमे वयसि इदानीं नववृन्दावनेति विख्याते क्षेत्रे स्वकीयं भौतिकं शरीरं तत्यजुः ।

श्रीव्यासराजश्रीमच्चरणैः विरचितकृतयः

१) **न्यायामृतम्** २) **तात्पर्यचन्द्रिका**

३) **तर्कताण्डवम्** ४) **उपाधिखण्डनमन्दारमञ्जरी**

५) **मायावादखण्डनमन्दारमञ्जरी** ६) **प्रपञ्चमिथ्यात्वानुमानखण्डन मन्दारमञ्जरी**

७) **तत्त्वविवेकमन्दारमञ्जरी**

८) **भेदोज्जीवनम्**

९) **सत्तर्कविलासः**

मायावादखण्डनमन्दारमञ्जर्यां "**प्रपञ्चस्तु सत्तर्कविलासे अस्माभिः कृते द्रष्टव्यः**" इति वाक्यमस्ति । तेनायं ग्रन्थः एतैः विरचितः इति ज्ञायते । तर्कताण्डवस्यैव नामान्तरमेतदिति केचिद्वदन्ति । तन्न समीचीनमिति भाति । यतः "**वृत्त्युपलक्षित आत्मा मोक्ष इति चेत् तथापि जीवन्मुक्तौ प्रसङ्गः इत्येषा दिक्**" इति टीकाव्याख्यावसरे इदं वाक्यं दृश्यते । तर्कताण्डवे च कुत्रापि जीवन्मुक्तिविचारः न कृतः । न्यायामृते तु जीवन्मुक्तिभङ्ग इति प्रकरणं वर्तते तत्र च मन्दारमञ्जर्युक्तविचारः प्रसरति तथापि न्यायामृतस्य सत्तर्कविलास इति नामान्तरं न प्रसिद्धम् । न्यायामृतं विबुधतृप्तये इत्येव न्यायामृतमङ्गलाचरणे श्रूयते । तद्व्याख्यानेष्वपि कुत्रापि सत्तर्कविलास इति नाम न श्रूयते, अतः इदं एतैः विरचितं ग्रन्थान्तर-मित्येव स्वरसम् । परमिदानीं नोपलभ्यते इति विषादास्पदम् ।

१०) वेदान्तसारसङ्ग्रहखण्डनम्

पूर्वमेव विद्याधरपात्रनामकपण्डितेन प्रेषितो ग्रन्थः व्यासराजश्रीमच्चरणैः निराकृतः इत्युक्तं । स एवायमिति पण्डितमध्ये प्रथा वर्तते ।

११) भेदसञ्जीविनी

उपाधिखण्डनमन्दारमञ्जर्यां विशेषसमर्थनवादे विशेषस्य लक्षणान्तर-समर्थनवेलायां "**भेदसञ्जीविन्यां तु अस्माभिः विशेषमाच्छाद्य नैयायिकादिपक्षाश्रयणेन भेदपटादिशब्दानां अपर्यायत्वं प्रत्यपादीति न तेनास्य विरोधः**" इति वाक्येनायं ग्रन्थः एतैः कृतः इति ज्ञायते । भेदसञ्जीविनी इति भेदोज्जीवनस्यैव नामान्तरमिति वक्तुं न शक्यते । भेदोज्जीवने भेदपटादिशब्दानां पर्यायत्वाक्षेपस्यादर्शनात् । तत्र हुलिगीश्रीनाथाचार्यैः स्वकृतव्याख्यानस्य भेदसञ्जीविनीति नामकरणाच्च । अपि च भेदोज्जीवने अन्योन्यं जीवभेदे अनुमानकथनवेलायां "**आत्मनां स्वाभाविकाभेदे सुखदुःखादिव्यवस्थानुपपत्तिर्बाधिका मन्दारमञ्जर्या-मस्माभिरुपपादिता द्रष्टव्या ।**" इति वाक्ये भेदोज्जीवने मन्दारमञ्जर्याः उल्लेखस्य सत्वेन भेदोज्जीवनात्पूर्वमेव मन्दारमञ्जरी रचिता इत्येव पक्षपातो युक्तः । अतः मन्दारमञ्जर्यामुल्लिखितभेदसञ्जीविनी भेदोज्जीवन-मेव इति वक्तुं न शक्यते । अतः इदमपि एतैः विरचितं ग्रन्थान्तरमेव इति ऊह्यते । इदमपीदानीं नोपलभ्यत इत्यहो दौर्भाग्यम् ।

१२) ग्रन्थमालिकास्तोत्रम्
१३) प्रमेयनवमालिकास्तोत्रम्
१४) श्रीनिवासस्तोत्रम्
१५) श्रीकृष्णमङ्गलाष्टकम्
१६) श्रीयन्त्रोद्धारकहनूमत्स्तोत्रम्
१७) लघुशिवस्तुतिः
१८) श्रीश्रीपादराजपञ्चरत्नमालिकास्तोत्रम्
१९) श्रीब्रह्मण्यतीर्थपञ्चरत्नमालिकास्तोत्रम्
२०) वायुस्तुतिपुनश्चरणपद्धतिः
२१) षाष्टिकमङ्गलाष्टकम्
२२) अनेकानि कन्नडपद्यानि

२३) तत्वोद्योतटिप्पणी

इदं एतैः कृतो वा न वा इति न ज्ञायते । कुत्रापि अस्य उल्लेखाभावात् । तथापि अस्य उल्लेखः अत्र मया तस्मात् क्रियते यस्मात् व्यासराजग्रन्थमालिकास्तोत्रे तस्य उल्लेखः वर्तते ।

टिप्पणीस्तत्वोद्योतस्य तथा श्रीतर्कताण्डवम् ।

इति । अतः अयं एभिः कृतः इति ज्ञायते । परमिदं स्तोत्रं विश्वासार्हं वा इति न ज्ञायते । तत्त्वसङ्ख्यानतत्वविवेकमन्दारमञ्जर्यादीनामत्र असङ्ग्रहात् ।

२४) **तत्त्वसङ्ख्यानमन्दारमञ्जरी**

अयं ग्रन्थः तञ्जावूरु प्यालेस् पुस्तकभाण्डारपेटिकायां उपलभ्यते इति वदन्ति । ग्रन्थैरेभिः अशेषाननुगृण्हतामेषां विशेषतः मध्वमतावलम्बिनः अधमर्णाः एव ।

प्रकृतग्रन्थविचारः

तत्र प्रकृतग्रन्थमधिकृत्य किञ्चिद्विचारयामः । एतादृशग्रन्थविचारणेपि नास्माकं शक्तिः । तथापि यथामति तत्सेवार्थं किञ्चिद्वक्तुं प्रयते । अस्य ग्रन्थस्य तर्कताण्डवमिति नामकरणे एवं विशेषः भाति । तर्कताण्डवमित्यत्र

१) तर्कैः ताण्डवम्
२) तर्काय ताण्डवम्
३) तर्काणां ताण्डवम्
४) तर्केषु ताण्डवम् इति चतुर्धा विग्रहीतुं शक्यते ।

१) तत्र तर्कैः ताण्डवमित्यत्र ब्रह्मतर्कोक्तश्रीमदानन्दतीर्थभगवत्पादोक्तश्रीमट्टीकाकृत्पादोक्तसत्तर्कसहायेन श्रीव्यासराजश्रीमच्चरणैः क्रियमाणं ताण्डवं इत्यर्थः । ताण्डवेन यथा स्वभावाविष्करणं जायते तथा व्यासराजश्रीमच्चरणैः क्रियमाणेन ताण्डवेन श्रीमदानन्दतीर्थभगवत्पादोक्तानां

पूर्वोक्तानां भावः आविष्क्रियते इति । यथा मध्ये मध्ये अमृतपानेन ताण्डवं सुमनोहरं, तथैवात्रापि मंध्ये मध्ये तदुक्तं सुधायां तदुक्तं सुधायां इति सुधामृतपानेन ताण्डवं सुमनोहरमेव ।

२) सत्तर्कैः ताण्डवं कुतः इत्यतः तर्काय ताण्डवमिति । मीमांसाख्यः विचारः अत्र तर्कशब्दार्थः । आत्मा वा अरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यः इत्यत्र अत्मा द्रष्टव्यश्चेत् निदिध्यासितव्यः, निदिध्यासितव्यश्चेत् मन्तव्यः मन्तव्यश्चेत् श्रोतव्यः इति क्रमेण सर्वमूलसुधाद्यध्ययनानन्तरं तत्वनिर्णयार्थं ताण्डवमिति ।

३) तर्काणां ताण्डवमिति । श्रीमदानन्दतीर्थभगवत्पादाचार्याद्युक्ततर्कोपबृंहितानां स्वोक्ततर्काणां ताण्डवमिति । स्वोक्ततर्ककर्तृकं ताण्डवमिति यावत् ।

४) तर्केषु ताण्डवमिति । नैयायिकोक्तदुस्तर्केषु ताण्डवमित्यर्थः ।

तथा च तर्कताण्डवमित्यत्र ब्रह्मतर्कश्रीमदानन्दतीर्थभगवत्पादोक्तश्रीमट्टीकाकृत्पादोक्तसत्तर्कैः मध्ये मध्ये सुधामृतपानसहितैः सर्वमूलसुधाद्युक्ततत्वनिर्णयार्थं श्रीमदानन्दतीर्थभगवत्पादाद्युक्तसत्तर्कोपबृंहितस्य स्वोक्ततर्कस्य नैयायिकोक्तदुस्तर्केषु ताण्डवमिति फलितोर्थः ।

ग्रन्थमेनमधिकृत्य उद्गारश्चैवं विद्वन्मण्डलेषु विराजते

अमृतेनार्जिता कीर्तिः ताण्डवेन विनाशिता ।

इति । तदर्थश्चैवं । न्यायामृताख्ये अद्वैततताण्डवपरे ग्रन्थे नैयायिकनयोपबृंहितेन अद्वैतखण्डनेन प्राप्तगर्वाणां नैयायिकानां कीर्तिः अत्र विनाशिता इति । ..... **ताण्डवेन विभूषिता** इत्यपि क्वचिदुपलभ्यते । तदर्थश्चैवं । न्यायामृतेन या कीर्तिः व्यासराजश्रीमच्चरणैः अर्जिता सा ताण्डवेन इतोपि विभूषिता इति । न्यायामृतोक्तः

विक्षिप्तसङ्ग्रहात् क्वापि क्वाप्युक्तस्योपपादनात् ।
अनुक्तकथनात्क्वापि सफलोयं श्रमो मम ।।

इति श्लोकः अत्रापि समन्वेति । सर्वत्र प्रकरणेषु मध्ये मध्ये उक्तञ्च टीकाकृद्भिः, तदुक्तं सुधायां इत्यादिवाक्यानां सत्वात् ।

अस्मिन्ग्रन्थे प्रत्यक्षपरिच्छेदः शब्दपरिच्छेदः अनुमानपरिच्छेदः इति त्रिधा विभागः कृतः । तत्र प्रामाण्यवादमारभ्य निर्विकल्पकवादपर्यन्तं प्रत्यक्षपरिच्छेदः वर्तते । प्रथमसम्पुटे चायं मुद्रितः । शब्दपरिच्छेदश्च आकाङ्क्षानिरूपणमारभ्य श्रुत्यादिबलाबलवादपर्यन्तमस्ति । तत्र द्वितीयसम्पुटे आकाङ्क्षानिरूपणमारभ्य ''प्राभाकरोक्त अग्निशोमीयवैशम्य-भङ्ग'' पर्यन्तं, अपूर्ववादमारभ्य श्रुत्यादिबलाबलवादपर्यन्तं तृतीयसम्पुटे इति शब्दपरिच्छेदोयं विभज्य मुद्रितः । अनुमानपरिच्छेदश्च चतुर्थसम्पुटे मुद्रितः ।

व्याख्याकर्तारः

श्रीविजयीन्द्रतीर्थाः

सम्प्रति श्रीमद्विजयीन्द्रतीर्थगुरुवरेण्यचरितं किञ्चिद्वक्तुं प्रयते । तदीयासाधारणप्रभावातिशयवर्णनपराणि वचनानि प्राचीनाचार्यकृतान्येव-मुपलभ्यन्ते । तानि यथा-

चतुष्षष्टिकलाविद्याजुषे विद्वन्महोमुषे ।
जयीन्द्रज्योतिषे कुर्यां वन्दनानि यशोजुषे ।।

इति श्रीराघवेन्द्रविजये । तथा-

षड्वारं व्यासराजेन्दुमुखात् श्रुत्वा विशेषतः ।
मध्वशास्त्रार्थसारन्तु व्याचक्षाणं निजान्प्रति ।।

नवकृत्वो न्यायसुधां व्यासतीर्थपयोनिधेः ।
उद्धृत्य पीतवन्तञ्च नाकीन्द्रमिव सन्नुतम् ।।

इत्यादि । भारतभूभागविश्रुततत्वशास्त्रप्रपञ्चे विभूतिपुरुषाः परैरजय्याः न केवलं चतुरधिकशतसंख्याकस्वतन्त्रप्रौढवाक्यार्थविजृम्भितशास्त्रग्रन्थ-रत्नकर्तारः परन्तु चतुःषष्टिकलाविद्यापारङ्गताः । श्रीविजयीन्द्रतीर्थ-गुरुवरेण्याः स्वजीवितसमये कुम्भघोणक्षेत्रे प्रतिवादिदिग्गजगणस्य मृग-राजायमाना व्यराजन्त । दक्षिणभारतदेशप्रसिद्धाप्पय्यदीक्षितप्रभृतिमाया-वादिभिः विरचिताः जीवब्रह्मैक्यप्रतिपादकग्रन्थाः प्रायः सर्वेऽपि सयुक्तिकं सप्रमाणमेतैः निराकृताः ।

श्रीराघवेन्द्रश्रीमच्चरणाः

श्रीराघवेन्द्रश्रीमच्चरणानां जीवनचरित्रं सर्वैः सुविदितमेव राघवेन्द्र-विजयादिकाव्ये दरीदृश्यते ।

श्रीलक्ष्मीनाथतीर्थाः

बि.एन.के.शर्मविरचिते द्वैतवेदान्तेतिहासग्रन्थे लक्ष्मीनाथतीर्थानां विषये एते विषयाः निर्दिष्टाः । व्यासतीर्थपीठे एतेऽधिष्ठिताः । एते लक्ष्मीनाथतीर्थाः मध्वाचार्येभ्य एकोनविंशतितमाः, व्यासतीर्थेभ्यः अष्टमाः इति ज्ञायते । एतेषाम् आश्रमगुरवः लक्ष्मीवल्लभतीर्थाः । चन्द्रिका-सुबोधिन्याः अन्तेऽयमंश उल्लिखितः । एतेषां पीठाधिपत्यकालः किस्तशक १६४० वर्षादारभ्य १६६५ वर्षपर्यन्तम् ।

व्याख्याविचारः

अस्य ग्रन्थस्य व्याख्यात्रयमुपलभ्यते । युक्तिरत्नाकराख्या व्यासराजश्रीमच्चरणान्तेवासिभिः विजयीन्द्रश्रीमच्चरणैः निर्मिता । अस्याः सम्पूर्णतां नोपलभामहे । न्यायदीपे "**अत्र स्वतःप्रामाण्यज्ञप्तिवादपर्यन्तं विस्तरस्तु गुरुपादकृतयुक्तिरत्नाकरे द्रष्टव्यः**" इत्यस्ति । अतः इयं सम्पूर्णा उत इयत्येव इति न ज्ञायते ।

अस्य व्याख्यानस्य अशोधितैका मातृका द्वैतवेदान्ताध्ययनसंशोधनकेन्द्रे एतावत्पर्यन्तं अमुद्रिता आसीत् । तस्य च यथाशक्ति यावच्छक्ति

गुर्वनुग्रहेण मया संशोधनं कृतम् । तत्र प्रायः सर्वाणि वाक्यानि अशोधितान्येव दृश्यन्ते । तन्मध्ये यत्र अक्षरलोपो वा पदलोपो वा वाक्यलोपो वा सम्भावयितुं शक्यते तत्र अधः(Footnotes) "**इति स्यात्,**" "**इति भाति,**" इत्यादिरीत्या सूचितम् । यत्र तु न सम्भावयितुं शक्यते तत्र अधः न ज्ञायते इति वा अशोधितमेव वा मुद्रितम् । तत्र प्रायः अशीतिभागपर्यन्तं संशोधनं कृतम् । बहुसंशोधन-सापेक्षोयं ग्रन्थः इदानीमस्य मुद्रणं मास्त्वित्यपि विचारः आसीत् । परं विद्वन्मणीनां अध्ययनसौकर्यायात्र अशोधितमपि मुद्रितम् । अशोधितभागे क्लेशोनुभूयते चेत् क्षन्तव्योहं ।

न्यायदीपाख्यव्याख्या अपि श्रीराघवेन्द्रश्रीमच्चरणैः विरचिता अत्र मुद्रिता । श्रीलक्ष्मीनाथतीर्थश्रीमच्चरणैः विरचिता तर्कताण्डवटीकायाः प्राचीनैका मातृका पण्डितवरेण्यश्रीवीरनारायणाचार्यमहोदयसकाशे आसीत् । तत्सम्पादनं च अध्ययनार्थं मया ३-४ वर्षात् प्राक्कृतम् । तदप्यत्र मुद्रितं । मन्नारीकृष्णाचार्यैः कृताया अपि व्याख्याया सम्पादने बहुवारं प्रयत्नः कृतः । परं सफलो न जातः । श्रीनिवासतीर्थैः कृताप्येका व्याख्या अस्तीति बहुप्राचीनमातृकापट्टिकायां उल्लिखितत्वेन तत्सम्पादनेपि बहु प्रयत्नः कृतः । परं सफलो न जातः ।

युक्तिरत्नाकरश्च यज्ञपत्युक्तवक्रानुमानभङ्गपर्यन्तमुपलभ्यते तावदत्र मुद्रितः । न्यायदीपश्च संपूर्णम् । लक्ष्मीनाथतीर्थटीका च प्रामाण्यस्वतस्त्वे अनुमानवादपर्यन्तं दृश्यते तावदत्र मुद्रिता ।

कृतज्ञतावचांसि

पदवाक्यपारावारपारीणानां कारुण्ये पृथवीं धिक्कुर्वाणानां अनवरतं सुधादिसच्छास्त्रपाठकानां नैकशिष्यसम्पत्तिमतां मम स्वरूपोद्धारकाणां उत्तरादिमठाधीशानां **श्री श्री १००८ श्रीमत्सत्यात्मतीर्थश्रीमच्चरणानां** चरणनलिनयोः साष्टाङ्गप्रणतयः ।

जयतीर्थविद्यापीठकुलपतिपदभाजां सुधाविशारदानां मम न्यायामृतादिग्रन्थपाठकानां विद्वत्कुलमणीनां **पं.पू. गुत्तलाचार्याणां (गुत्तल रङ्गाचार्याणां)** चरणेषु भूयांसि नमांसि ।

श्रीजयतीर्थविद्यापीठप्रांशुपालकेभ्यः द्वैतवेदान्ताध्ययनसंशोधनप्रतिष्ठान-संस्थायाः गौरवनिर्देशकेभ्यः ग्रन्थस्यास्य प्रधानसम्पादकेभ्यः विद्याधीश स्नातकोत्तरशोधकेन्द्रे माध्वग्रन्थसंशोधनाख्ये शुभकर्मणि, विशेषतः एतद्ग्रन्थसम्पादने मां प्रवर्तितवद्भ्यः **पं.पू. सत्यध्यानाचार्येभ्यः** सादरप्रणतयः ।

साधनशरीरमिदं प्रदाय श्रीमदाचार्यशास्त्रे रुचिमन्तं कृतवतोः मातापित्रोः **श्रीमतिरेवतीमोहनाचार्य**दम्पत्योः चरणनलिनेषु साष्टाङ्गप्रणतयः ।

न्यायवेदान्तशास्त्रेषु कृतभूरिपरिश्रमेभ्यः नैकग्रन्थसंशोधकेभ्यः संशोधन कार्ये प्रोत्साहकेभ्यः आशुकविभ्यः विद्याधीशस्नातकोत्तरसंस्कृतशोधकेन्द्र निदेशकेभ्यः **पं.पू. डा. उपाध्यायकृष्णाचार्येभ्यः** सादरप्रणतयः ।

न्यायवेदान्तशास्त्रेषु तत्रापि काव्यविभागे कृतभूरिपरिश्रमेभ्यः नैकग्रन्थसंशोधकेभ्यः संशोधनकार्ये प्रोत्साहकेभ्यः **डा. एल्.एस्. वादिराजाचार्येभ्यः** सादरप्रणतया ।

मम तर्कताण्डवपाठकेभ्यः सुधान्यायामृतादिसच्छास्त्राध्ययनाध्यापनेषु निरतेभ्यः **पं.पू. श्रीरङ्गं वेङ्कटेशाचार्येभ्यः** सादरप्रणतयः ।

कर्नाटकसंस्कृतविश्वविद्यलयस्य वेदान्तनिकायनिदेशकेभ्यः नैकग्रन्थ-सम्पादकेभ्यः नैकग्रन्थलेखकेभ्यः श्रीलक्ष्मीनाथतीर्थटीकामातृकाप्रदानेन उपकृतवद्भ्यः विद्वद्भ्यः **डा. पाण्डुरङ्गी वीरनारायणाचार्येभ्यः** सादरप्रणतयः ।

महिशूरपुरस्थ ओ.आर्.ऐ. पुस्तकालयत मुद्रिततर्कताण्डवपुस्तक-सहायेनापि अयं ग्रन्थः मया समशोधीति तद्ग्रन्थसम्पादकेभ्यः अहं कृतज्ञ्यतां निवेदयामि ।

अस्मिन् संशोधनकर्मणि साहाय्यमाचरितवतां द्वैतवेदान्ताध्ययनसंशोधन-प्रतिष्ठानसंस्थायाः कार्यदर्शिपदभाजां **डा. एस्.आर्. पाण्डुरङ्गिः** इत्येतेषां हार्दं कार्तज्ञं निवेदयामि ।

मुद्रकेभ्यः वागर्थमुद्रणालयकार्यकर्तृभ्यः सर्वेभ्यः विशेषतः फणीमहोदये-भ्यश्च कृतज्ञतां निवेदयामि ।

पुनरपि अस्मिन् शोधनकर्मणि परोक्षतः अपरोक्षतश्च उपकृतवद्भ्यः सर्वेभ्यः कृतज्ञतां निवेदयामि ।।

इति सुजनविधेयः

माधवः

विषयानुक्रमणिका

मङ्गलाचरणम्		1-9
	अथ प्रामाण्यवादानुक्रमणिका (10-402)	
1)	स्वमते ज्ञप्तौ स्वतस्त्वनिरुक्तिः	10-51
1.1)	प्रथमस्वतस्त्वनिरुक्तिः	10-33
1.2)	द्वितीयस्वतस्त्वनिरुक्तिः	33-39
1.3)	तृतीयस्वतस्त्वनिरुक्तिः	40-46
1.4)	निरुक्तित्रयस्य सुधारूढताप्रदर्शनम्	46-51
2)	परोक्तस्वतस्त्वनिरुक्तिभङ्गः	52-97
2.1)	प्रथमस्वतस्त्वनिरुक्तिखण्डनम्	52-76
2.2)	द्वितीयस्वतस्त्वनिरुक्तिखण्डनम्	76-81
2.3)	तृतीयस्वतस्त्वनिरुक्तिखण्डनम्	81-85
2.4)	चतुर्थस्वतस्त्वनिरुक्तिखण्डनम्	85-97
3)	प्रामाण्यस्वतस्त्वेनुमानानि	98-154
3.1)	प्रथमानुमानकथनम्	98-106
3.2)	अनुमानचतुष्टयकथनम्	106-114
3.3)	सुखानुभवविषयकप्रत्ययादिपक्षकानुमाने हेतुसमर्थनम्	114-128
3.4)	पञ्चमानुमाननिरूपणम्	128-143
3.5)	पञ्चविधानुमानान्तरनिरूपणम्	143-150
3.6)	अनुव्यवसायत्वनिरूपणम्	150-153
3.7)	स्वोक्तानुमानानां मूलारूढताप्रदर्शनम्	153-154
4)	स्वतस्त्वानुमानेषु बाधोद्धारः	155-185
4.1)	उक्तयाथार्थ्यस्य साक्षिणः अनुव्यवसायस्य चाविषयत्वशङ्का परिहारश्च	155-160
4.2)	अनुव्यवसायस्य वैशिष्ट्यविषयकत्वसाधनम्	160-165
4.3)	अनुव्यवसायस्य तद्वद्विशेष्यकत्वविषकत्वसाधनम्	165-167

4.4)	अनुव्यवसायस्य अर्थसत्वविषयकत्वसाधनम्	167-183
4.5)	उक्तार्थे मूलकृत्सम्मतिः	184-185
5)	स्वतस्त्वे संशयोपपादनम्	185-207
5.1)	उक्तार्थे मूलसम्मतिः	204-207
6)	प्रामाण्यनिश्चयस्य प्रवर्तकत्वम्	208-234
6.1)	स्वतस्त्वहेतूनां सामान्यतोप्रयोजकत्वपरिहारः	208-210
6.2)	अर्थनिश्चयस्य प्रवर्तकत्वखण्डनम्	211-229
6.3)	प्रामाण्यनिश्चयस्याप्रामाण्यशङ्कानिवर्तकत्वे-नोपयोगखण्डनं	229-234
6.4)	उक्तार्थे मूलसम्मतिः	230-234
7)	परतस्त्वेनवस्थोक्तिः	234-243
7.1)	धर्म्यज्ञानादिनाप्रामाण्यशङ्काभावसिद्धिखण्डनम्	234-241
7.2)	विशेषदर्शनेनाप्रामाण्यशङ्काभावसिद्धिखण्डनम्	241
7.3)	उक्तार्थे मूलसम्मतिः	241
7.4)	स्वमते अनवस्थापरिहारः	241
7.5)	तत्र मूलानुमतिः	241
8)	परतस्त्वे प्रथमप्रामाण्यानुमित्यसम्भवः	243-276
8.1)	परतस्त्वे अप्रसिद्धविशेषणत्वोपपादनम्	243
8.2)	परतत्स्त्वे हेतुप्रमित्यसिद्धिः	266
8.3)	परतस्त्वे सप्तहेतुनिरूपणम्	272
8.4)	स्वमते अप्रामाण्यपरतस्त्वे अनवस्थापरिहारः	272
8.5)	तत्र मूलसम्मतिः	273
9)	ज्ञप्तौ परतस्त्वानुमानभङ्गः	276-304
9.1)	मण्युक्तपूर्वपक्षानुमानम्	276-289
9.2)	तत्खण्डनम्	289-300
9.3)	कुसुमाञ्जल्युक्तानुमानखण्डनम्	300

विषयानुक्रमणिका

मङ्गलाचरणम्		1-9
	अथ प्रामाण्यवादानुक्रमणिका (10-402)	
1)	स्वमते ज्ञप्तौ स्वतस्त्वनिरुक्तिः	10-51
1.1)	प्रथमस्वतस्त्वनिरुक्तिः	10-33
1.2)	द्वितीयस्वतस्त्वनिरुक्तिः	33-39
1.3)	तृतीयस्वतस्त्वनिरुक्तिः	40-46
1.4)	निरुक्तित्रयस्य सुधारूढताप्रदर्शनम्	46-51
2)	परोक्तस्वतस्त्वनिरुक्तिभङ्गः	52-97
2.1)	प्रथमस्वतस्त्वनिरुक्तिखण्डनम्	52-76
2.2)	द्वितीयस्वतस्त्वनिरुक्तिखण्डनम्	76-81
2.3)	तृतीयस्वतस्त्वनिरुक्तिखण्डनम्	81-85
2.4)	चतुर्थस्वतस्त्वनिरुक्तिखण्डनम्	85-97
3)	प्रामाण्यस्वतस्त्वेनुमानानि	98-154
3.1)	प्रथमानुमानकथनम्	98-106
3.2)	अनुमानचतुष्टयकथनम्	106-114
3.3)	सुखानुभवविषयकप्रत्ययादिपक्षकानुमाने हेतुसमर्थनम्	114-128
3.4)	पञ्चमानुमाननिरूपणम्	128-143
3.5)	पञ्चविधानुमानान्तरनिरूपणम्	143-150
3.6)	अनुव्यवसायत्वनिरूपणम्	150-153
3.7)	स्वोक्तानुमानानां मूलारूढताप्रदर्शनम्	153-154
4)	स्वतस्त्वानुमानेषु बाधोद्धारः	155-185
4.1)	उक्तयाथार्थ्यस्य साक्षिणः अनुव्यवसायस्य चाविषयत्वशङ्का परिहारश्च	155-160
4.2)	अनुव्यवसायस्य वैशिष्ट्यविषयकत्वसाधनम्	160-165
4.3)	अनुव्यवसायस्य तद्वद्विशेष्यकत्वविषकत्वसाधनम्	165-167

4.4)	अनुव्यवसायस्य अर्थसत्वविषयकत्वसाधनम्	167-183
4.5)	उक्तार्थे मूलकृत्सम्मतिः	184-185
5)	स्वतस्त्वे संशयोपपादनम्	185-207
5.1)	उक्तार्थे मूलसम्मतिः	204-207
6)	प्रामाण्यनिश्चयस्य प्रवर्तकत्वम्	208-234
6.1)	स्वतस्त्वहेतूनां सामान्यतोप्रयोजकत्वपरिहारः	208-210
6.2)	अर्थनिश्चयस्य प्रवर्तकत्वखण्डनम्	211-229
6.3)	प्रामाण्यनिश्चयस्याप्रामाण्यशङ्कानिवर्तकत्वे-नोपयोगखण्डनं	229-234
6.4)	उक्तार्थे मूलसम्मतिः	230-234
7)	परतस्त्वेनवस्थोक्तिः	234-243
7.1)	धर्म्यज्ञानादिनाप्रामाण्यशङ्काभावसिद्धिखण्डनम्	234-241
7.2)	विशेषदर्शनेनाप्रामाण्यशङ्काभावसिद्धिखण्डनम्	241
7.3)	उक्तार्थे मूलसम्मतिः	241
7.4)	स्वमते अनवस्थापरिहारः	241
7.5)	तत्र मूलानुमतिः	241
8)	परतस्त्वे प्रथमप्रामाण्यानुमित्यसम्भवः	243-276
8.1)	परतस्त्वे अप्रसिद्धविशेषणत्वोपपादनम्	243
8.2)	परतस्त्वे हेतुप्रमित्यसिद्धिः	266
8.3)	परतस्त्वे सप्तहेतुनिरूपणम्	272
8.4)	स्वमते अप्रामाण्यपरतस्त्वे अनवस्थापरिहारः	272
8.5)	तत्र मूलसम्मतिः	273
9)	ज्ञप्तौ परतस्त्वानुमानभङ्गः	276-304
9.1)	मण्युक्तपूर्वपक्षानुमानम्	276-289
9.2)	तत्खण्डनम्	289-300
9.3)	कुसुमाञ्जल्युक्तानुमानखण्डनम्	300

9.4)	अनुमानान्तरनिराकरणम्	300
9.5)	अस्य सर्वस्य मूलारूढंताप्रदर्शनम्	300
10)	उत्पत्तौ परतस्त्वे चिरन्तनानुमानभङ्गः	304-324
10.1)	प्रथमः	304-310
10.2)	द्वितीयः	310-315
10.3)	तृतीयः	315
10.4)	चतुर्थः	315
10.5)	पञ्चमः	316
10.6)	मूलारूढताप्रदर्शनम्	319
11)	अनित्यप्रमामात्रानुगतगुणभङ्गः	325-338
12)	यज्ञपत्युक्तवक्रानुमानभङ्गः	338-348
13)	प्रत्यक्षादिप्रमासु प्रत्येकानुगतगुणभङ्गः	348-368
13.1)	पूर्वपक्षः	348-349
13.2)	समाधानम्	349-351
13.3)	प्राचीनमतनिरासः	352-357
13.4)	मण्युक्तपक्षान्तरनिरासः	358-366
13.5)	उपसंहारः	366
13.6)	तत्र मूलानुमतिः	366-368
14)	स्थूलावयविप्रत्यक्षप्रमादौ भूयोवयवेन्द्रियसन्निकर्षादेर्हेतुत्वभङ्गः	368-378
14.1)	पूर्वपक्षः	368
14.2)	अन्वयव्यभिचारेण समाधानम्	368-371
14.3)	व्यतिरेकव्यभिचारेण समाधानम्	371-377
14.4)	उपसंहारः	377
14.4)	तत्र मूलसम्मतिः	377-378
15)	प्रामायां दोषाभावस्य हेतुत्वभङ्गः	378-383

15.1)	दोषाभावस्य प्रयोजकत्वनिरासः	378-380
15.2)	दोषाभावस्य कारणत्वनिरासः	380-382
15.3)	मूलसम्मतिः	383
16)	उत्पत्तौ स्वतस्त्वेनुमानानि	383-393
16.1)	अनित्यप्रमामात्रानुगतो गुण इति पक्षेनुमानम्	383-387
16.2)	प्रत्यक्षादिप्रमासु प्रत्येकानुगता गुणा इति पक्षेनुमानम्	387-389
16.3)	यज्ञपतिमते अनुमानम्	389-391
16.4)	भ्रमे पित्तादिरिव प्रामायामननुगता एव गुणाः हेतवः इति मते अनुमानम्	391-392
16.5)	मूलसम्मतिः	393
17)	अप्रामाण्यस्य परतस्त्वम्	394-398
18)	करणप्रामाण्यस्य स्वतस्त्वम्	398-402
18.1)	ज्ञप्तौ स्वतस्त्वलक्षणम्	398
18.2)	अप्रामाण्यस्य परतस्त्वलक्षणम्	398
18.3)	अस्मिन् विषये मूलसम्मतिः	399
18.4)	उत्पत्तौ स्वतस्त्वलक्षणम्	400
18.5)	अप्रामाण्यस्य परतस्त्वलक्षणम्	400
18.6)	तत्र मूलानुमतिः	400
18.7)	आदितः निगमनम्	400

इति प्रामाण्यवादानुक्रमणिका

अथ वेदापौरुषेयत्ववादानुक्रमणिका (402-451)

19)	वेदापौरुषेयत्वेनुमानानि	402-422
19.1)	पौरुषेयत्वपूर्वपक्षः	402
19.2)	अपौरुषेयत्वानुमानम्	402
19.3)	तस्मिन्नेवानुमाने साध्यान्तरकथनम्	405

19.4)	अपौरुषेयत्वे अनुमानान्तरकथनम्	406
19.5)	वेदाभावे धर्माद्यसिद्धिकथनम्	407
19.6)	तत्र मूलसम्मतिः	407
19.7)	अपौरुषेयत्वे लाघवम्	409
19.8)	तत्र मूलसम्मतिः	409
19.9)	पौरुषेयत्वे गौरवम्	411
19.10)	स्वोक्तार्थस्य मूलारूढताप्रदर्शनम्	411
19.11)	ईश्वरज्ञानं न प्रमा इति मतेनुमानम्	413
19.12)	प्रमा इति मते अनुमानम्	413
19.13)	प्रमा इति मते द्वितीयानुमानम्	415
19.14)	प्रमा इति मते तृतीयानुमानम्	415
19.15)	वेदस्यापौरुषेयत्वे बाधशङ्का तत्परिहारश्च	417
19.16)	उक्तार्थे मूलारूढताप्रदर्शनम्	417
19.17)	अपौरुषेयत्वे अनुमानान्तरकथनम्	417-420
19.18)	परिशेषप्रमाणेन वेदापौरुषेयत्वसाधनम्	420
19.19)	तत्र मूलसम्मतिः	420
20)	अपौरुषेयत्वे अनुकूलतर्काः	422-429
20.1)	कर्तृमत्वप्रसिद्ध्यभावस्मृतिः	422
20.2)	कल्पनागौरवम्	422
20.3)	पौरुषेयत्वे धर्माद्यसिद्धिकथनम्	422
20.4)	वेदस्य पौरुषेयत्वे तस्य प्रामाण्याभावापत्तिः	422-425
20.5)	तत्र मूलानुमतिः	425-426
20.6)	श्रुतिस्मृतिविरोधः	427
20.7)	तत्र मूलारूढताप्रदर्शनम्	428
21)	वेदपौरुषेयत्वे अनुमानादिभङ्गः	429-451
21.1)	अनुमाननिराकरणम्	429-439
21.2)	वैदिकेनोत्तमपुरुषेण पौरुषेयत्वखण्डनम्	439

21.3) वैदिकेन युष्मच्छब्देन पौरुषेयत्वखण्डनम् 440
21.4) वैदिकाभ्यां यत्तच्छब्दाभ्याम् पौरुषेयत्वखण्डनम् 440
21.5) समाख्यया पौरुषेयत्वसिद्धिखण्डनम् 442
21.6) पौरुषेयत्वे अनुमानान्तरखण्डनम् 443
21.7) श्रुत्यादिना पौरुषेयत्वखण्डनम् 446
21.8) वेदस्यानित्यत्वखण्डनम् 449

इति वेदापौरुषेयत्ववादानुक्रमणिका

अथ ईश्वरवादानुक्रमणिका (452-532)

22) ईश्वरवादपूर्वपक्षः 452-472
22.1) अदृष्टाद्वारकेत्यादिपक्षककार्यत्वादिहेतुकानुमानकथनम् 452
22.2) पक्षनिर्वचनम् 454
22.3) साध्यनिर्वचनम् 456
22.4) क्षितेः पक्षत्वं 459

23) ईश्वरवादसिद्धान्तः 472-532
23.1) कार्यत्वहेतुखण्डनम् 472
23.2) कार्यत्वसाधकसावयवत्वखण्डनम् 472
23.3) द्रव्यारब्धद्रव्यत्वं सावयवत्वं इति मतखण्डनम् 473
23.4) उक्तार्थे मूलसम्मतिः 475
23.5) क्षित्यादिषु सावयवत्वानुमानखण्डनम् 476
23.6) उक्तार्थे मूलसम्मतिः 477
23.7) कार्यसामान्यं प्रतिकृतेः कारणत्वमङ्गीकृत्या-
प्रयोजकत्वकथनम् 478
23.8) साध्यादिपूर्वपक्षोक्तानां क्रमशो दूषणम् 478-499
23.9) शरीराजन्यत्वे व्यर्थविशेषणत्वमिति
मण्युक्तस्य निष्कृष्यानुवादः 499-505
23.10) अस्य समाधानम् 505-516
23.11) व्यर्थविशेषणस्य दूषणतारूपम् 513

23.12) कार्यायोजनस्य ईश्वरसाधकत्वखण्डनम् 516
23.13) धृतेः ईश्वरसाधकत्वखण्डनम् 518
23.14) पदादीश्वरसिद्धिखण्डनम् 519
23.15) प्रत्ययादीश्वरसिद्धिखण्डनम् 520
23.16) सङ्ख्याविशेषादीश्वरसिद्धिखण्डनम् 523
23.17) उपसंहारः 530

इतीश्वरवादानुक्रमणिका

अथ वर्णवादानुक्रमणिका (532-590)

24) वर्णानित्यत्वस्य प्रत्यक्षत्वभङ्गः 532-547
24.1) श्रुतपूर्वो गकारो नास्तीति प्रतीतिमभ्युपेत्य समाधानम्534
24.2) शब्दाभावप्रत्यक्षे प्रत्यासत्यभावखण्डनम् 535-539
24.3) स्वमतेनाभावप्रत्यक्षे सहकारिविचारः 540
24.4) अभावप्रत्यक्षे अधिकरणयोग्यतायाः तन्त्रत्वम् 541
24.5) अत्र अनुव्याख्यानसम्मतिः 544

25) वर्णानित्यत्वेनुमानभङ्गः 547-553
25.1) योग्यानुपलब्ध्या वर्णानित्यत्वखण्डनम् 547
25.2) मणिकृताद्युक्तहेतूनां निराकरणम् 547-553

26) वर्णानित्यत्वे प्रत्यभिज्ञाविरोधः 553-570
26.1) प्रत्यभिज्ञायाः भ्रान्तित्वापादकयुक्तिखण्डनम् 556
26.2) ध्वनेः अनित्यत्वसमर्थनम् 562
26.3) उत्पत्त्यादिधियः बाधकत्वखण्डनम् 563
26.4) उक्तार्थे मूलसम्मतिः 565

27) वर्णानित्यत्वेनुमानानि 570-578
27.1) वर्णानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वम् 578-589
27.2) वर्णानां नित्यत्वेपि क्रमोपपादनम् 590-591

इति वर्णवादानुक्रमणिका

अथ समवायवादानुक्रमणिका (592-626)

28)	समवाये प्रमाणभङ्गः	592-613
28.1)	पूर्वपक्षः तत्खण्डनं च	592
28.2)	समवायप्रत्यक्षत्वसाधकानुमानखण्डनम्	593
28.3)	समवायसाधकप्राचीनानुमानखण्डनम्	593
28.4)	नव्यास्तु इत्यादिना मण्युक्तखण्डनम्	596
28.5)	उक्तार्थे सूत्रानुकूल्यम्	596
28.6)	उक्तानुमानेषु तर्कपराहतिः	598
28.7)	अस्य सूत्रात्लाभः	598
28.8)	समवायानुमाने व्यभिचारः	599
28.9)	हेतोः अप्रयोजकत्वसमर्थनम्	600
28.10)	अस्य सूत्रात्लाभः	601
28.11)	मणिकृदुक्तानुमानखण्डनम्	602
28.12)	अस्य सूत्रात्लाभः	602
28.13)	अभावप्रतीत्यापादनपरिहारः	603
28.14)	परिहारान्तरम्	607
28.15)	बाधकान्तरशङ्का तत्परिहारश्च	608
28.16)	समवायसाधकमण्युक्तानुमानान्तरखण्डनम्	611
28.17)	पक्षधरोक्तपक्षखण्डनम्	613
29)	समवाये बाधकम्	616-627
29.1)	समवायस्य सम्बन्धत्वनिरासः	616
29.2)	समवायस्य एकत्वनिराकरणम्	619
29.3)	समवायस्य नाशोक्तिः	620-621
29.4)	समवायाभावे मानम्	624

इति समवायवादानुक्रमणिका

अथनिर्विकल्पकवादानुक्रमणिका (627-647)

30)	निर्विकल्पके प्रमाणभङ्गः	627-640

30.1)	प्रमाणशङ्का तत्खण्डनं च	627
30.2)	तत्र पूर्वपक्षान्तरम्	627
30.3)	अस्य उत्तरम्	628
30.4)	नानापूर्वपक्षसमाधानानि	630-637
30.5)	विशेषणज्ञानस्य कारणत्वमङ्गीकृत्यापि निर्विकल्पकासिद्धिकथनम्	637
31)	निर्विकल्पके बाधकम्	640-646
31.1)	निर्विकल्पकाभावे प्रमाणम्	644
31.2)	अस्य पद्धत्यारूढता	644
31.3)	परिच्छेदार्थोपसंहारः	645

इति निर्वकल्पकवादानुक्रमणिका

॥ श्रीकृष्णार्पणमस्तु ॥

॥ श्रीः ॥

श्री व्यासतीर्थयतिविरचितं

तर्कताण्डवम्

अनन्तकल्याणगुणैकराशिमशेषदोषोज्झितमप्रमेयम् ।
मुमुक्षुभिस्सेव्यमनन्तसौख्यप्रदं रमेशं प्रणमामि नित्यम्
॥ १ ॥

श्रीशपादाम्बुजासक्तः करुणापूरशीतलः ।
मध्वाख्यो मरुदंशो मे सन्तापान् हन्तु सन्ततम् ॥ २ ॥

आनन्दतीर्थोपदिष्टो निधिर्नारायणाह्वयः ।
प्रदर्शितो येन सम्यग् जयतीर्थं तमाश्रये ॥ ३ ॥

श्रीमदानन्दतीर्थार्यस्वामिनः कमलापतेः ।
प्रीतये क्रियते व्यासयतिना तर्कताण्डवम् ॥ ४ ॥

श्रीराघवेन्द्रयतिविरचितः

न्यायदीपः

विश्वोत्पत्तिस्थितिध्वंसकारणं रमणं श्रियः ।
प्रणम्य पूर्णबोधादीन् व्याकुर्वे तर्कताण्डवम् ॥
गुरुपादकृताऽप्यस्ति व्याख्या साऽत्यन्तविस्तरा ।
व्याख्येयं मन्दबोधाय क्रियतेऽशेषगोचरा ॥

ग्रन्थादौ विशिष्टेष्टदेवतानतिरूपं मङ्गलमाचरति ।। **अनन्तेति** ।। सत्त्वादिषु गुणत्वप्रसिद्धेः दुःखादीनां गुणत्वेन परैः परिगणनाच्च तद्व्युदासाया-नन्दज्ञानबलद्युतिप्रभृतिशुभधर्मलाभाय कल्याणगुणेत्युक्तिः । तार्किकरीत्या गुणगुणिनोर्भेदभ्रमनिरासाय गुणैकराशिमित्युक्तिः । ''अष्टावेवेश्वरे गुणा'' इति धीनिरासाय**अनन्तेति** । ''दोषैकदृक् पुरोभागी'' इत्यमरे ''ह्लादैकमर्यी'' इत्यादिकाव्यप्रकाशादौ प्रयोगदर्शनात् सङ्ख्यार्थकस्यैवैकशब्दस्य ''पूर्वकालैक'' इति पूर्वनिपतो न केवलार्थस्येति तत्वनिर्णयटीकाद्युक्त्या गुणैकराशिमित्यस्य साधुत्वं ध्येयम् । उक्तरूपगुणानां मुख्यराशिमिति वा भेदशून्यराशिमिति वाऽर्थः ।

गुणवद्दोषो नाशङ्क्य इत्याह ।। **अशेषेति** ।। चिन्तासन्तापादिदोषहीन-मित्यर्थः । ननु गुणविशिष्टस्य मायाशबलत्वात्कथं दोषोज्झितत्वमित्यतो नेदं मायाशबलमिति भावेनोक्तं अप्रमेयम्, देशतोऽपरिच्छिन्नमिति । शबलं तु परिच्छिन्नमित्यभ्युपेतत्वादिति भावः । तत्र हेतुर्नित्यमिति । अनिवर्त्यम् । शबलं तु मिथ्यात्वान्निवर्त्यमित्यर्थः । एवं देशकालगुणानन्त्य-रूपब्रह्मशब्दार्थस्यात्रोक्त्या रमेश एव ब्रह्मशब्दार्थ इति सूचितम् । अत एव मुमुक्षुभिः सेव्यम्, न तु मन्दोपास्यमित्यर्थः । किं फलम् ? अनन्त-सौख्यप्रदम्, अविनाशिसुखप्रदमित्यर्थः । स्वार्थे ष्यञ् । अत्र न्यायचिन्तापरे ग्रन्थे ब्रह्मतन्त्राध्यायचतुष्टयोक्तगुणवैशिष्ट्योक्तिः,

''प्रमाणन्यायसच्छिक्षा क्रियते तर्कशास्त्रतः ।
मानन्यायैस्तु तत्सिद्धैर्मीमांसा मेयशोधनम्''

इत्युक्त्या ब्रह्मतन्त्रोक्तप्रमेयनिर्णयोपयुक्तप्रमाणन्यायचिन्तापरत्वा-त्तद्विषयादिनैवास्य विषयादिमत्तेति सूचनार्था । एवं च न्यायपञ्चाध्यायानुरोधेन

कुसुमाञ्जलौ पञ्चपरिच्छेदकृतिवद् ब्रह्मतन्त्रानुरोधेन परिच्छेदचतुष्टये कार्येऽपि प्रमाणत्रित्वद्योतनाय परिच्छेदत्रयकृतिरिति ।। १ ।।

देवतानतिसमनन्तरं भाष्यकर्तृनर्थयते ।। **श्रीशेति** ।। अत्राद्येन विशेषणेन सौरभ्यस्य द्वितीयेन शैत्यस्य अंश इति मान्द्यस्य वायुगुणस्योक्तिर्ज्ञेया । टीकाकर्तृन् नमति ।। **आनन्देति** ।। फलोक्तिपूर्वं चिकीर्षितं प्रतिजानीते ।। **श्रीमदिति** ।। २-४ ।।

श्रीलक्ष्मीनाथतीर्थकृत

तर्कताण्डवटीका

व्यासतीर्थयतीन्द्रेण पूजितं पुरुषोत्तमम् ।
श्रीकृष्णमाश्रये नित्यं सर्वाभीष्टफलप्रदम् ।। १ ।।

पूर्णबोधान्गुरून्वन्दे योगपूर्ण ..... (तृटितमस्ति)
गुरुप्रसादो बलवानिति वेदविनिर्णयः ।। २ ।।

जयतीर्थाख्यतरणिं जगदीशप्रदीपकम् ।
सेवे सेवकभक्तस्य चाज्ञानतिमिरापहम् ।। ३ ।।

व्यासतीर्थार्यमहिमा वर्णितुं केन शक्यते ।
येन वैष्णवसिद्धान्तो विख्यातस्तमहं भजे ।। ४ ।।

यदनुग्रहमात्रेण विदुषामग्रणीर्भवेत् ।
तं यादवेन्द्रमनिशं मम विद्यागुरुं भजे ।। ५ ।।

शब्दे तर्के च वेदान्ते भाट्टे प्राभाकरे तथा ।
रामचन्द्रगुरोस्तुल्यः कोनु वा वर्तते भुवि ।। ६ ।।

लक्ष्मीवल्लभयोगीन्द्रं लक्षणार्यमहं भजे ।
वचसा मन्त्सा नित्यं गुरुराजशिखामणिम् ।। ७ ।।

व्यासतीर्थार्यवरदस्वामिनः कमलापतिः ।
प्रीतये क्रियते तर्कताण्डवस्य प्रकाशनम् ।। ८ ।।

तर्कताण्डवविख्यातो ग्रन्थोयं तर्कवादिनाम् ।
कर्कशो हृदयस्यार्थो व्यज्यते विदुषां मुदे ।। ९ ।।

क्व तर्कताण्डवं चाहं क्वचाल्पमतिमान्भुवि ।
यते च तस्य टीकार्थं व्यासतीर्थकृपावशात् ।। १० ।।

भाष्यानुभाष्यादिग्रन्थेषु तट्टीकासुधादिग्रन्थेषु अल्पमतीनामन्यथाप्रतीत्या प्राप्तं विरोधं परिहर्तुं तर्कताण्डवाख्यं ग्रन्थं कर्तुकामा व्यासतीर्थार्याः अविगीतशिष्टाचारपरम्पराप्राप्तमिष्टदेवताप्रणामरूपं मङ्गलमादावाचरन्ति ।। **अनन्तेति** ।। रमेशं प्रणमामीति योजना । उत्तमपुरुषप्रयोगादहमिति लभ्यते । नमनस्य भक्तिपूर्वकत्वं प्रेत्युपसर्गेणद्योतयति । भक्तिपूर्वकनमनस्यैव सकलपुरुषार्थसाधनत्वादिति भावः ।

रमायाः सकलविद्याभिमानिदेवतात्वेपि जगन्मातृत्वेपि पतिपारतन्त्र्येणैव तद्वन्दनं कार्यमिति द्योतयितुमाह ।। **रमेशमिति** ।। आरभमाणस्य तर्कताण्डवस्य[1] प्रकरणत्वद्योतनाय तदारम्भोपयुक्तमङ्गलाचरणे तत्प्रतिपाद्य-गुणवत्त्वेन रमेशं विशिनष्टि ।। **अनन्तेति** ।। सत्वादीनां शब्दरसादीनां दुःखादीनां च गुणत्वप्रसिद्धेः तद्व्युदासाय कल्याणेत्युक्तम् ।

अनन्ताः अपरिमिताः प्रत्येकं पूर्णाः कल्याणगुणाः तेषां राशिः समुदायः । गुणस्वरूपमिति यावत् । गुणविजातीय[2]जनकर्मादिव्यावृत्त्यर्थं

---

१. "तृटितमस्ति । मीमांसा इति पुनश्शोधितम् । २. "ज्ञान" इति स्यात् ।

एकेत्युक्तम् । स च एकशब्दः केवलार्थोत्र विवक्षितः । तेन परनिपातो युक्तः । ततश्च केवलसद्गुणस्वरूप इति फलितोर्थः । कल्याणगुणास्तेषामेकराशिः । गुणैकस्वरूपः । तमित्यर्थः । अनेन परमात्मनस्तद्गुणानां च भेदं वदन्तो नैय्यायिकादयो निरस्ताः भवन्ति । यद्यपि पूर्वकालैकसवजगत्पुराणनवकेवलाः समानाधिकरणेन इत्यनेन एकशब्दस्य पूर्वनिपातो वक्तव्यस्तथापि दोषैकदृक्पुरोभागी आल्हादमयीत्यादिप्रयोगदर्शनात्सङ्ख्यार्थस्यैकशब्दस्य पूर्वनिपातेपि केवलार्थस्यैकशब्दस्य न पूर्वनिपातः ।

एवं प्रथमाध्यायार्थमुक्त्वा द्वितीयाध्यायार्थवत्त्वेनापि रमेशं विशिनष्टि ।। **अशेषेति** ।। जरामरणपारतन्त्र्यादिसमस्तदोषरहितमित्यर्थः । तृतीयाध्यायार्थवत्त्वेनापि विशिनष्टि ।। **मुमुक्षुभिः सेव्यमिति** ।। यद्वा सगुणस्य मायाशबलितत्त्वेन कथमशेषदोषोज्झितत्त्वमित्यत आह ।। **मुमुक्षुभिः सेव्यमिति** ।। चतुर्थाध्यायार्थवत्त्वेनापि विशिनष्टि ।। **अनन्तसौख्यप्रदमिति** ।। नाशरहितस्वरूपानान्दप्रदमित्यर्थः । मुक्तानामिति शेषः । उक्तं च–

अज्ञानां ज्ञानदो विष्णुर्ज्ञानिनां मोक्षदश्च सः ।
आनन्ददश्च मुक्तानां स एवैको जनार्दनः ।।

इति । उक्तविशेषणेषु सम्भावकमाह ।। **अप्रमेयमिति** ।। साकल्येन सकलवेदाद्यगोचरमित्यर्थः । अनन्तकल्याणगुणान्तर्गतजगत्कर्तृत्वान्यथानुपपत्तिलब्धविग्रहवत्त्वात् विग्रहस्य च[1] नाशविनाभावात् अनित्यत्तवं देहहानिर्दुःखप्राप्तिरपूर्णता इत्यत आह ।। **नित्यमिति** ।।

---

१. "नाशाविनाभावात्" इति स्यात् ।

अनित्यत्त्वं देहहानिर्दुःखप्राप्तिरपूर्णता ।
नाशश्चतुर्विधो ज्ञेयः तदभावो हरेस्स्मृतः ।।

इत्यादिप्रमाणोक्तचतुर्विधनाशरहितम् । अथवा नित्यं सर्वदा अनन्त-सौख्यप्रदमिति योजनीयम् । अनेन कालान्तरे रुद्रादेः मोक्षदत्वं निराकृतं भवति ।। १ ।।

यस्य देवे परा भक्तिः यथा देवे तथा गुरौ ।
इति वचनादेवताप्रणामानन्तरं गुरून्प्रार्थयते ।।

श्रीशेति ।। श्रीशः रमेशः । तस्य पादौ अम्बुजे [1]इति तयोः **आसक्तः** निरतिशयभक्तियुक्तः । करुणाख्यपूरेण शीतलः । मध्व इत्याख्या नाम यस्य सः । **मरुदंशः** मरुतः वायोः तृतीयांशः । **सन्तापान् । सन्ततं** निरन्तरम् । नाशयत्वित्यर्थः ।। २ ।।

ग्रन्थकरणे स्वप्रकाश्यग्रन्थकर्तृटीकाकारस्याश्रयणमावश्यकमिति मनसि निधाय तस्यातीव माहात्म्यं प्रकटयन्नाह ।। **आनन्देति** ।। नारायणाख्य-निधिः सर्वपुरुषार्थसाधनभूतः **आनन्दतीर्थोपदिष्टः** अस्तीत्येवोपदिष्टः । **येन** जयतीर्थाख्येन सम्यक्प्रदर्शितः । **तं जयतीर्थं आश्रये** ग्रन्थकरणसमये तदीयप्रसादो मे भवत्वितु भावः ।। ३ ।।

वेदव्यासेन क्रियमाणे वैष्णवमतोद्धारे आचार्याणां प्रथमाङ्गत्वं जयतीर्था-चार्याणां द्वितीयाङ्गत्वमिति द्योतयितुं द्वयोरेव वन्दनं कृत्वा प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते इति न्यायात्कीदृशप्रयोजनायेदं ग्रन्थकरणमित्यपेक्षायां परमप्रयोजनं संज्ञया वदन्स्वनामपूर्वकं चिकीर्षितं प्रतिजानीये ।। **श्रीमदानन्देति** ।। अनेनादावानन्दतीर्थस्य प्रीत्यर्थं अनन्तरं रमायाः

१. "इव" इति स्यात् ।

प्रीत्यर्थं अनन्तरं सर्वोत्तमस्य श्रीकृष्णस्य प्रीत्यर्थं तर्कताण्डवाख्यग्रन्थः क्रियते । तेषां प्रीतिः परमपुरुषार्थप्राप्तय इति भावः । तर्कताण्डवमित्यनेनावान्तरप्रयोजनं सूचितम् । तर्केन नर्तनं क्रियत इत्यनेन तार्किकमतदूषणस्यावान्तरप्रयोजनत्वलाभात् । अनेनैवानन्दतीर्थानां प्रीतिः परमप्रयोजनमित्येतत्प्राच्युक्तमुपपादितं भवति । यद्वा तर्के ब्रह्मतर्कादिरूपे तदुक्तप्रमेयविषये इति यावत् । ताण्डवं नर्तनं क्रियते । तदीयप्रमेयसाधनाहितोल्लासादिनेति भावः ॥ ४ ॥

तर्कताण्डवम्

स्वतःप्रमाणैराम्नायैरादरेणादिवर्जितैः ।
अख्यातानन्तकल्याणगुणं श्रीरमणं भजे ॥ ५ ॥

श्रीविजयीन्द्रतीर्थकृत

युक्तिरत्नाकरः

''स्वतःप्रमाणैः'' इत्यत्र स्वतः प्रमाणं प्रमितिः यैस्ते स्वतःप्रमाणा इति प्रमास्वतस्त्वस्योपक्षिप्ततया तत्स्वरूपं निरूपयति– ॥ **याथार्थरूपस्येति** ॥ यद्वा आम्नायैरित्यत्राम्नायस्येमानि इति अण् प्रत्ययेन आम्नायजन्यैरित्यर्थः । स्वतःप्रमाणैरिति तत्पुरुषः । आख्यातत्वं तु विषयीकृतत्वम् । आदिवर्जितत्वं च प्रवाहानादित्वं वेदस्येति ज्ञानप्रामाण्यस्वतस्त्वोक्तिर्युक्ता ।

अथवा स्वतःप्रमाणैरित्यत्र विशिष्टान्वयबलादेव प्रकृतिप्रत्ययप्रतिपाद्ययोः प्रमात्वकरणत्वयोरुभयत्रापि स्वतस्त्वालाभे लघूपस्थिति-

कस्य ज्ञानप्रामाण्यस्य प्रथमतो निरूपणम् । वस्तुतस्तु यथार्थज्ञान-साधनकरणप्रामाण्यस्य ज्ञानकरणत्वग्राहकमात्रग्राह्यत्वरूपं स्वतस्त्वं ज्ञानप्रामाण्यस्वतस्त्वसिद्ध्यधीनमिति तदर्थमेव तन्निरूपणादुपोद्घात-सङ्गतिरेवेति । अत्राद्यपक्षयोरुत्तरत्र करणे प्रामाण्यस्वतस्त्वनिरूपणं प्रासङ्गिकं नान्त्ययोरिति ध्येयम् ।

न्यायदीपः

आनुमानिकत्वादीश्वरात्मनो नाष्टगुणाधिकगुणवत्त्वमित्यत आद्यपद्योक्त-रमेशविशेषणानि मानोक्त्या स्थिरीकुर्वंस्ताण्डवकरणस्य प्रसञ्जकं पूर्वरङ्गं निबध्नाति ।। **स्वत इति** ।। आम्नायैः सजातीयानुपूर्वीविशिष्टवेदैः । आख्यातेति नित्यसापेक्षत्वात्समासः ।

> ''वेदास्ते नित्यविन्नत्वाच्छ्रुतयश्चाखिलैः श्रुतेः ।
> आम्नायोऽनन्यथापाठात्''

इति तत्त्वनिर्णयोक्तेः । गुणमिति निर्दोषतादेरुपलक्षणम् । गुणपदेन वा निर्दोषत्वमुमुक्षुसेव्यत्वानन्तसौख्यप्रदत्वरूपधर्मग्रहः । आम्नायत्वे हेतुरादिवर्जितैरिति स्वतन्त्रपुरुषाप्रणीतैरित्यर्थः । नन्वपौरुषेये वेदेऽदृष्टार्थके चाप्तोक्तत्वफलसंवादादिहेतोः प्रामाण्यनिश्चायकस्याभावात् निश्चितप्रामाण्य-कस्यैव प्रमाणस्यार्थसत्त्वनिर्णायकत्वस्याग्रे प्रामाण्यनिश्चयप्रवर्तकत्ववादे व्यक्तत्वात् कथं वेदे प्रमाण्यनिश्चयः । आप्तोक्तत्वगुणाभावात् प्रामाण्यं वा कथमित्यतो ''न विलक्षणत्वादस्य'' इत्यधिकरणसिद्धमाह ।। **स्वतः-प्रमाणैरिति** ।। करणे ल्युट् । ज्ञानजननशक्तिग्राहकमात्रग्राह्यप्रमाजनन-शक्तिमद्भिः इत्यर्थः । तथा ज्ञानजननशक्तित एव प्रमाजनकैरित्यर्थः । ज्ञप्ता-वुत्पत्तौ च अन्यानपेक्षणात् ज्ञानजननशक्तिग्राहकेणैव प्रमाजननशक्ति-

ग्रहरूपप्रामाण्यग्रहस्य, ज्ञानजननशक्त्यैव प्रमोत्पादकत्वस्य च सम्भवादपवादस्य च दोषस्य वेदापौरुषेयत्ववादे वक्ष्यमाणदिशा अपौरुषेयेऽभावनिश्चयादिति भावः ।

ननु प्रमाणेनापि तात्पर्याविषयोऽर्थो न सिध्यतीत्यत उक्तम् ।। **आदरेणाख्यातेति** ।। आङो मुख्यत्वमर्थः । तात्पर्यपूर्वं मुख्यवृत्त्योक्तेरित्यर्थः । लक्षणयोदितत्वे गुणासिद्धेः तादृशगुणे विष्णौ वेदानां शक्तितात्पर्ये इत्येतदन्यत्र व्यक्तम् । अत्र स्वतःप्रामाण्यज्ञप्तिवादपर्यन्तं विस्तरस्तु **गुरुपादकृतयुक्तिरत्नाकरे** द्रष्टव्यः ।

श्रीलक्ष्मीनाथतीर्थटीका

प्रमाणानां प्रामाण्यस्य स्वतस्त्वसमर्थनेन कमलापतेरनन्तकल्याणगुणपरिपूर्णत्वसमर्थनं अस्मिन्तर्कताण्डवे क्रियते इति द्योतयन् सम्भाविताशेषविघ्नपरिहारार्थत्वेन श्रीरमणस्य कृष्णस्य भजनरूपमङ्गलं पुनःकरोति ।। **स्वत इति** ।। स्वतः प्रामाण्यं प्राप्तैः । **आदिवर्जितैः** उत्पत्तिरहितैः ।। **आम्नायैः** ऋगादिवेदैः । **आदरेण** तात्पर्येण । **आख्याताः** प्रमिताः । **अनन्तकल्याणगुणाः** यस्य तम् । **श्रीरमणं** लक्ष्मीशं भजे इति श्लोकार्थः ।। ५ ।।

प्रामाण्यवादः

स्वमते ज्ञप्तौ स्वतस्त्वनिरुक्तिः

याथार्थ्यरूपस्य तत्तज्ज्ञानप्रामाण्यस्य ग्राह्यप्रामाण्यविरोध्युपस्थापकसामग्र्यसमवहितग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकसाक्षिज्ञानविषयत्वनैयत्यं स्वतस्त्वम् । तार्किकाभिमतानुव्यवसाय एवास्माकं साक्षी ।

युक्तिरत्नाकरः

अत्र प्रामाण्यस्येत्युक्ते विशेष्यावृत्यप्रकारकत्वादीनामपि पक्षतापत्त्या बाधप्रसक्तौ प्रामाण्यपदेन विवक्षितार्थोपदर्शनं– **याथार्थ्यरूपस्येति ।।**

एवञ्च प्रामाण्यपदं प्रमाणप्रवृत्तिनिमित्तपदं गम्यते । तच्च न विशेष्यावृत्त्यप्रकारकत्वादिरूपम् । गुरुत्वात् । न चैवं प्रमाणत्वादेरपि प्रमाणपदप्रवृत्तिनिमित्तत्वेन तस्यापि पक्षतापत्त्या बाधानिरासः । ज्ञानवृत्तित्वविशेषणमहिम्ना ज्ञानभिन्नावृत्तित्वलाभात् । तथा च प्रमाणत्वादेः परामर्शतदितरज्ञानवृत्तित्वेऽपि चक्षुरादिवृत्तितया ज्ञानवृत्तित्वमिति न तस्य पक्षता । तथा च तत्तज्ज्ञानप्राामाण्यस्येत्येव पक्षनिर्देशो, याथार्थ्यरूपस्येति तु पर्यवसितार्थप्रदर्शनपरम् ।

याथार्थ्यनिर्वचनपूर्वपक्षः

ननु किं याथार्थ्यम् ? न तावत् तद्वति तत्प्रकारकत्वम् । [1]अघटत्वं, ''आकाशे शब्द'' इत्यादौ घटाकाशयोर्विशेष्यावृत्तित्वेनाव्याप्तेः, परम्परासम्बन्धेन लौहित्यवति साक्षात्सम्बन्धेन तद्वैशेष्यावगाहिज्ञानस्यापि प्रमात्वापत्तेश्च । वह्निगुञ्जापुञ्जयोर्वह्नि[2] इति ज्ञानस्य

१. ''घटे घटत्वं'' इति स्यात् । २. ''इमौवन्ही'' इति स्यात् ।

सर्वांशप्रमाणत्वापत्तेश्च । अत एव यत्र यदस्ति तत्र तद्भानत्वं तत्त्वं इति निरस्तम् ।

नापि यत्र यद्वैशेष्यमति तत्र तद्भानत्वम् । घटत्वे घटः, वायौ रूपमिति ज्ञानयोरपि प्रमात्वापत्तेः उभयवैशेष्यस्य समवायस्य तत्र सत्वात् ।

नापि यत्र धर्मिणि यन्निरूपितं वैशेष्यमस्ति तत्र तद्भानत्वम् । अग्रावच्छेदेन कपिसंयोगवति वृक्षे मूलावच्छेदेन तद्वैशिष्ट्यावगाहिनोऽपि प्रमात्वापत्तेः । एतेन यत्र वैशेष्ये यस्य प्रकारस्य यः सम्बन्धोऽस्ति तत्प्रकारक–तद्विशेष्यकतत्सम्बन्धावगाहित्वं स्वविषये सर्वत्र प्रमात्वमिति निरस्तम् ।

नापि यदवच्छेदेन यद्वैशिष्ट्यमस्ति तदवच्छेदेन तत्र तद्वैशिष्ट्यावगाहित्वम् । वृक्षः संयोगीति, पाकरक्ते श्यामोऽयमिति च शाब्दादिप्रमायामवच्छेदशाखाद्यविषयिण्यामव्याप्तेः । न च तत्रावच्छेदकान्तराभाने स्वस्यैवा[1]वच्छेदभानमिति कल्प्यम् । तथापि तस्या[2]नवच्छेदकत्वानवगाहनात् । अन्यथा[3] अग्रवान् वृक्षो मूले संयोगवान्नेति भ्रान्तेरवच्छेदकाग्रविषयतया प्रमात्वापत्तेः ।

न च तदवच्छेदेनेत्यनेन तद्विरुद्धधर्मानवच्छेदेनेति विवक्षितम् । वृक्षत्वावच्छेदेन कपिसंयोगावगाहिधियोऽपि प्रमात्वापातात् । तस्य तद्विरुद्धत्वाभावात् । न च तदनतिप्रसक्तधर्मावच्छेदकतावगाहीति विवक्षितम् । वृक्षत्वस्य च अतिप्रसक्तत्वादिति वाच्यम् । अतिप्रसक्तधर्मावच्छेदकधर्मावगाहित्वस्य व्यवसायानुपनीतत्वेन साक्षिविषयत्वात् ।

१. "अवच्छेदकत्वेन" इति स्यात् । २. "अवच्छेदकत्व" इति स्यात् ।
३. "अग्रे संयोगवान् वृक्षः मूले संयोगवान्" इति स्यात् ।

न चैवमपि परतस्त्वपक्षे नायं दोषं इति वाच्यम् । तेनापि स्वातन्त्र्येणानुव्यवसायविषयत्वस्य स्वीकारात् स्वतस्त्वपरतस्त्व-विवक्षा[१]विषयस्यैकरूपस्यैवोभाष्यामपि निर्वक्तव्यत्वाच्च । उक्तप्रामाण्ये स्वतस्त्वाभावसाधनसिध्यभानापत्तेश्चेति चेत् ।

याथार्थ्यनिर्वचनसिद्धान्तः

उच्यते । येन ज्ञानेन यत्कालीनं यन्निरूपितं यद्वैशिष्ट्यं यस्मिन्प्रदेशे विषयीक्रियते तत्प्रदेशनिष्ठतत्कालीनतन्निरूपिततद्वैशिष्ट्यकत्वं तस्य ज्ञानस्य तत्र प्रामाण्यमित्यर्थात् । तथा च [२]अपाकरक्ते इदानीं श्याम इति प्रतीतेर्न प्रमात्वम् । तत्कालीनवैशिष्ट्यस्य तत्राभावात् । श्यामता-मात्रावगाहिप्रतीतौ न चाव्याप्तिः । [३]तत्कालीनश्यामवस्तुनिष्ठतत्काली-नस्य भासमानवैशिष्ट्यस्य तत्र सत्वात् । वायौ रूपं घटत्वे घट इत्यादौ च नातिव्याप्तिः । समवायमात्रस्य तत्र सत्त्वेऽपि तन्निरूपितवैशिष्ट्यस्य तत्रासत्वात् । परम्परासम्बन्धेन लौहित्यवति स्फटिकलोहिते ''स्फटिक'' इति साक्षात्सम्बन्धावगाहिनि च नाव्याप्तिः । भासमान-वैशिष्ट्यस्य तत्राभावात् । मूलावच्छेदेन कपिसंयोगावगाहिनि च ना-व्याप्तिः । तत्प्रदेशे वैशिष्ट्याभावात् । वृक्षः संयोगीति [४]शब्दादिप्रमायां च नाव्याप्तिः । वस्तुतस्तत्प्रदेशीयवैशिष्ट्यस्यैव तत्राभावात् । अन्यथा प्रमात्वानुपपत्तेः । ''वह्निगुञ्जापुञ्जयोः वह्नी'' इत्यत्र वह्न्यंशे वैशिष्ट्य-सत्वेऽपि गुञ्जापुञ्जप्रदेशे तदभावात् न प्रमात्वापत्तिः ।। [५]तद्वैशिष्ट्यं च साक्षिभानत्वेनापि सम्भवतीति न किञ्चिदनुपपन्नम् ।

---

१. ''अविषयकस्यैव'' इति स्यात् । २. ''पाकरक्ते'' इति स्यात् ।
३. ''तत्कालीन'' इति न स्यात् । ४. ''शाब्द'' इति स्यात् । ''शब्दादिजन्य'' इति वा तस्यार्थः । ५. तद्वैशिष्ट्यस्य च साक्षिभावस्य स्थस्य च साक्षिभावस्य नापि सम्भवतीति न किञ्चिदनुपपन्नम् इति वाक्यमातृकायां अशोधितं दृश्यते ।

एतदेवाभिप्रेत्योक्तं पद्धतौ ''यद्देशकालतया यद्वस्तु ज्ञानेन यादृशं गृह्यते तद्देशकालयोस्तस्य तथात्वम्'' इति ।

यद्वा अननुगतमेव तावत्प्रमात्वम् । तथा च तद्देशकालावच्छेदेन तस्य तत्र तद्वैशिष्ट्यविषयकत्वमेव प्रमात्वम् । तदनवगाहिप्रमासु चान्यदेवेति निर्वाच्यम् । वस्तुतस्तु यत्र वैशिष्ट्ये यत्प्रतियोगिकं यद्वैशिष्ट्यं प्रतीयते तत्र तत्प्रतियोगिकविद्यमानवैशिष्ट्यकमेव सर्वानुगतं प्रमात्वम् । न चैवं संयोगावच्छेदकमूलावच्छेदेन तद्वैशिष्ट्यावगाहिन्यति-व्याप्तिः । तत्र वृक्षे संयोगवत्त्वैशिष्ट्यांशे प्रमात्वस्येष्टत्वात् । अवच्छेद-कत्वांशे च तद्वैशिष्ट्यस्याभावेनापादकस्यैवाभावात् । एवमापादकपक्षे गट इदानीं श्यामः इत्यत्रापि घटे श्यामवैशिष्ट्यस्य सत्वेन प्रमात्वमिष्टमेव । अवच्छेदकेनेदं कालवैशिष्ट्यस्य श्यामरूपवृत्तित्वं तथा तदंशे लक्षणमेव नास्तीत्यलं विस्तरेण । उक्तञ्च सुधायां ''यद्वा यद्यथानुभूतं प्रतीतं तस्य तथाभूतस्य सत्वमित्युक्त एव नातिप्रसङ्गः'' इति ।।

अथ प्रमात्वं जातिः । न च प्रमात्वपरिहारेण साक्षात्वस्य परत्वं एतत्परित्यागेन अनुमित्यादौ प्रमात्वस्य वृत्तेः । एवमनुमितित्वत्यागेन साक्षातत्कारे च वृत्तेश्च प्रत्यक्षत्वानुमितित्वादिना साक्षादपि धर्म्यंशे प्रमात्वसत्वेन साक्षात्वव्यापकत्वसत्त्वात् । न चैवमव्याप्यवृत्तित्वान्न जातिता इति वाच्यम् । अव्याप्यवृत्तित्वस्य जातिबाधकत्व एव माना-भावात् । व्यक्तेरभेदस्तुल्यत्वमित्यत्रापरिगणनाच्च । अन्यथा भावमात्रे तदवधारणे संयोगस्यापि व्याप्यवृत्तितापत्तेः । न चैवं ज्ञानत्वेन सह तुल्यव्यक्तिकत्वेन घटत्वसमनियतकलशत्ववदजातित्वमिति वाच्यम् । स्मृतौ ज्ञानत्वे सत्त्वेऽपि प्रमात्वस्याभावेन तुल्यव्यक्तित्वाभावात् । न च निष्कम्पप्रवृत्तिहेतुनिश्चयविषयस्य प्रमात्वस्येह विचार्यतया तस्या-

पक्षता । ज्ञानत्वसमनैयत्येऽपि निर्विकल्पके निष्कम्पप्रवृत्तिजनके प्रमात्वाभावेऽपि ज्ञानत्वसत्वात् । न च सप्रतियोगिकत्वादजातित्वं अनुगतमत्या समर्थप्रवृत्तिजनकतावच्छेदकत्वेन च जातिसिद्धौ तारत्व-मन्दत्ववत्सर्वप्रतियोगिकस्यापि तदबाधकत्वादिति चेत् ।

मैवम् । अव्याप्यवृत्तितया संयोगतदभाववत् अजातित्वात् । न च तत एवोपाधित्वमपि न स्यादिति वाच्यम् । अव्याप्यवृत्तीनां संयोग-वत्वादीनां तेषां बहुलमुपलम्भात् । अन्यथा संयोगतद्रूपादीनां अव्याप्य-वृत्तित्वासम्भवे नीलपटारब्धं चित्ररूपं सुरभ्यसुरभ्यवयवारब्धे निर्गन्धत्वं मधुरारब्धे नीरसत्वमिति वत् सिद्धान्तभङ्गापत्तेः । यदि च रूपत्व-रसत्वाद्यवच्छेदेन व्याप्यवृत्तिताया निरुपाधिकसहचारदर्शनात् तेषु तथात्वं तदा जातित्वावच्छेदेनापि व्याप्यवृत्तिताया निरुपाधिकसहचारा-देव तथात्वमाद्रीयताम् । तत्तु तत्तद्विषयकत्वावच्छेदेन व्याप्यवृत्तित्वमेव [१]प्रमात्वाप्रमात्वमत्योरिति तथात्वापत्तेः न जातिबाधकेष्वगणनं दोषः । रूपादावपि तस्य बाधकत्वेन जातिमात्रबाधकपरिगणनोपपत्तेः ।

विषयघटितशरीरतया सप्रतियोगिकस्य कथं जातिता । प्रवृत्ति-सामर्थ्यस्य देशकालपुरुषादिगतशरीरस्याननुगतत्वेन समर्थप्रवृत्तिजनकता-वच्छेदकत्वे तद्गजात्यसिद्धेः । तारत्वादेरजातित्वाच्च । जातित्वे वा सप्रतियोगिकासिद्धेर्वक्ष्यमाणत्वाच्च । निर्विकल्पकानभ्युपगमेन ज्ञानत्वेन तुल्यव्यक्तिकत्वाच्च । ज्ञानत्वस्य तु व्याप्यवृत्तित्वाद्युक्तं जातित्वं निर्विकल्पकाभ्युपगमेन साक्षात्वेन सङ्करात् अजातित्वं निर्विकल्पके प्रमात्वस्यानुमितौ साक्षात्वस्याभावात् । न च निर्विकल्पके प्रमात्वम् । स्वसमानप्रकारकज्ञानत्वेनेच्छाप्रयत्नौ प्रति जनकत्वेन समर्थप्रवृत्ति-जनकताच्छेदकजातेस्तत्राभावात् । न च प्रमात्वेन सह सङ्करात्

१. "प्रमात्वमत्वयोः" इति मातृकायां दृश्यते ।

साक्षात्वमेव जातिः । अव्याप्यवृत्तित्वादिबाधकान्तर सधीचीन-साक्षात्करोमीत्यनुगतमत्यैव तद्गतजातित्वसिद्धावतथाभूतप्रमात्वस्यैव जातित्वात् ।

न चेन्द्रियत्वशरीरत्वयोः पृथिवीत्वेन बहुविशेषणसङ्करात् साक्षात्वस्यैवाजातित्वम्, न तु पृथिवीत्ववद्बहुविषयस्य प्रमात्वस्य । अत एव भूतत्वमूर्तत्वयोः समानविषययोः नोभयोरपि जातित्वम्, द्रव्य-विभाजकपञ्चकासमवृत्तित्वेनाऽन्यतरजातित्वस्य नियन्तुमशक्यत्वात् इति वाच्यम् । तत्रेन्द्रियत्वशरीरत्वयोर्द्वयोर्जातित्वकल्पनेन पृथिवीत्वादि-जातिचतुष्टयापलापप्रसङ्गस्यैव बाधकत्वात् इहापि साक्षात्वानुमिति-त्वाद्यनेकधर्मजातित्वकल्पनापेक्षयैक प्रमात्वाज्जातित्वकल्पनस्यैवोचित-त्वात् । भूतत्वमूर्तत्वयोरेकत्वेन विनिगमकाभावात् अजातित्वम् । न तु बहुविषयत्वाल्पविषयत्वाभ्याम् । अन्यथैकाकाशवृत्तित्वापेक्षयाऽ-नन्तमनोवृत्तिमूर्तित्वस्य त्वदुक्तविनिगमकसत्वेन जातित्वोपपत्तेः । न चानुमिति त्वोपमिति त्वव्यापकमेव प्रमात्वमिति साक्षात्वेन एकेनैव साङ्कर्ये भूतत्वादिवद्विनिगमनाविरहादुभयोरजातित्वमिति वाच्यम् । लिङ्गोपहितलैङ्गिकभानपक्षे भ्रमरूपपरामर्शजन्यप्रमारूपानुमितौ परामर्श-विषयांशे वृक्षान्तरेऽप्यनुमेयधर्मांशेऽप्यनुमितित्वसत्त्वेऽपि प्रमात्वाभावेना-व्यापकत्वात् । एवमुपमिति त्वादावपि सङ्करो द्रष्टव्यः । न च यदव-च्छेदेनेति विशेषेण गौरवात् यत्रानुमितित्वं तत्र प्रमात्वमिति, व्याप्ति-सम्भवान्नोक्तदोष इति वाच्यम् । तथा सत्यग्रावच्छिन्नकपिसंयोगस्यापि स्वाभावव्याप्यसत्वेनाग्रावच्छेदेनापि तदभावसिद्धिप्रसङ्गात् । न च बाधादेव तदसिद्धिः । बाधानवतारदशायां तत्सिद्ध्यापत्तेः । देशान्तरा-भावेन दैशिकव्याप्तेरभावाच्च ज्ञानत्वादिना साङ्कर्याच्च । न च ज्ञानत्व-व्याप्यमेतदिति वाच्यम् । समर्थप्रवृत्तिजनकतावच्छेदकस्य तस्येच्छाया-

मपि वाच्यत्वात् । अर्थसंवादित्वरूपस्य ज्ञानेच्छाप्रयत्नेषु त्रिष्वपि वाच्यत्वाच्च । नैय्यायिकाभिमतप्रमाणलक्षणोपयुक्तस्य प्रमाणत्वस्य स्मृतिव्यावृत्तस्यापरोक्षत्वपरित्यागेन स्मृतौ विद्यमानेन परोक्षत्वेन सह साक्षात्कारे अविद्यमानतया अनुमित्यादौ तेन सह साङ्कीर्णत्वाच्च । न च ज्ञानत्वं व्याप्यं नानैव तदिति वाच्यम् । तथा सत्यनेकजाति-कल्पनापत्तेः । न च सिद्धान्ते अनन्तप्रमात्वरूपोपाध्यपेक्षयैव लाघव-मिति वाच्यम् । तेषां प्रकाररूपविषयाणां क्लृप्तत्वेनाकल्पनाकल्पत्वात् । एवं सति जातिसाङ्कर्यस्य काप्यदूषणत्वापातात् । भ्रमत्वस्याप्येवं जातित्वसम्भवे जातेश्च व्यक्तिग्रहणयोग्यतान्तर्भूतयोग्यकत्वे नियमेन प्रमात्वाप्रमात्वयोरुभयोरपि स्वतस्त्वापत्तेः ।

किञ्च दृष्टत्वं न जातिः । कार्यकारणलक्षणानामभावादित्युदयनोक्त्या दृष्टादृष्टत्ववत् प्रमात्वस्यापि नित्यानित्यवृत्तेः कार्यताऽनवच्छेदक-तयाऽनुगतकार्यावच्छेदकाभावेन च कारणतावच्छेदकव्यवस्थापकाभावाच्च न जातित्वमिति । अन्यथा दृष्टत्वस्यापि जातित्वापत्त्या अप-सिद्धान्तादिति दिक् ।

यत्तु गुणगतजातौ साङ्कर्यं न दोषायेति विनिगमनाभावेन द्रव्यगत-जातावपि तथात्वापातात् । यदपि उपाधिवज्जातिसाङ्कर्यं स्यादप्य-दूषणत्वम् । अन्यथोपाधि साङ्कर्यस्यापि दोषातापत्तिरिति तत्र पृच्छामः । किं यदेकत्र दूषणं तदन्यत्रापीति नियमः, किं वा यज्जातौ दूषणं तदुपाधावपि उक्तः तस्य जातिदूषणत्वेनाभाव इति । नाद्यः अतिप्रसङ्गात् । न द्वितीयः । एकव्यक्तित्वस्यापि तथात्वे घटत्वसमनियतपृथुबुध्नो-दरत्वोपाधेरसत्वापत्तेश्च । अन्यथा त्वदुक्तरीत्या आकाशत्वकलशत्वयो-रप्यजातित्वापत्तेः । सामान्यविशेषसमवायेषु जात्यङ्गीकारे क्रमेणावस्था-रूपहान्यसम्बन्धापत्तिवत् उपाध्यङ्गीकारेऽपि तदापत्या तेषु प्रमेयत्वादि-

धर्माणामप्यभावापत्तेश्चेति यत्किञ्चिदेतत् । नापि तृतीयः । यत्र सङ्कीर्ण-धर्मत्वं तत्र न जातित्वमिति निरुपाधिकसहचारस्यैव मानत्वात् । नह्येव-मुपाधौ नियमः शतशो व्यभिचारात् । उपाधिसाङ्कर्यदूषणत्वस्य जातिसाङ्कर्य-दूषणत्वस्य च सकलवादिभिरभ्युपगतत्वेन तत्र विनिगमकगवेषणे अणुरपि विशेषो अध्यवसायक इति न्यायेनास्यापि व्यवस्थापकत्वसम्भवात् । वस्तुतस्तु–

''ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः परिकीर्तितः
क्षत्रियायां क्षत्रियात्तु जातः क्षत्रिय उच्यते''

इत्याद्यागमैरनुलोमप्रतिलोमभावेनानेकजातिप्रतिपादनं कृतमित्यविवादम् । तत्र ब्राह्मण्यादिषु ब्राह्मणक्षत्रियादिभ्यो जातानां ब्राह्मणत्वक्षत्रियत्वादि-जातिद्वयसमावेशेनोपपत्तावतिरिक्तजातित्वोक्तेर्नस्मृत्यादिषु क्रियमाणसङ्करस्य जातिबाधकतां व्यवस्थापयतीति सङ्क्षेपः ।

।। इति प्रमात्वविचारः ।।

।। **ग्राह्येति** ।। [1]ग्राह्यं यत्प्रामाण्यं घटत्ववति घटत्वप्रकारकत्वाभावस्य तद्व्याप्यस्य घटत्वाभाववति घटत्वप्रकारकत्वस्य तद्व्याप्यस्य चोपस्थापिका या सामग्री तदसमवहितः ग्राह्यप्रामाण्याश्रयीभूतं अयं घट इत्यादि यत्तत्तज्ज्ञानं तद्विषयकश्च यः साक्षी तद्विषयत्वे नैय्यत्यमित्यर्थः ।

प्रमाण्यविरोधित्वपूर्वपक्षः

ननु किं प्रामाण्यविरोधित्वम् । न तावत् प्रामाण्यविरहत्वं भावरूप-प्रामाण्यतद् व्याप्यादेतथात्वेन तज्ज्ञानसामग्रीसमवहितेन साक्षिणा प्रामाण्यग्रहणेन बाधापत्तेः ।

१. अत्र वाक्यमेवं स्यात् । ग्राह्यं यत् प्रामाण्यं घटत्ववति घटत्वप्रकारकत्वरूपं तदभावस्य तद्व्याप्यस्य ..... इति ।

नापि तद्विरहव्याप्यत्वम् । प्रामाण्याभावे तदभावात् । अभेदे व्याप्य-व्यापकभावाभ्युपगमेऽपि अप्रामाण्यघटकघटत्वादेरपि प्रामाण्यविरहव्याप्यतया तदुपस्थापकसामग्रीसमवहितेन साक्षिणैव प्रामाण्याभावेन बाधात् । अन्यथा रसादेः रूपाद्यनुमापकत्वमपि न स्यात् । नहि तत्र निरुपाधिकसहचारादन्यन्नियामकमस्ति । अत एव न सहानवस्थितित्वस्य तत्वम् ।

अथ प्रामाण्यघटकान्यत्वे सति प्रामाण्यासमानाधिकरणत्वं वा प्रामाण्यासमानाधिकरणत्वे सति ज्ञानवृत्तिधर्मत्वं वा तत्त्वम् । तच्च न प्रामाण्यघटक[1]घटत्वादिति चेत् अप्रामाण्यघटकघटत्वादीनामेव तद्विरुद्धतया प्रतीयमानानां ज्ञानवृत्तित्वारोपे वा ज्ञानवृत्तितया प्रतीयमानानां ज्ञानवृत्तित्वारोपे वा ज्ञानवृत्तितया प्रतीयमानानां प्रामाण्यनिश्चयविरोधिधीविषयत्वमिहापि विरोधित्वस्य सहानवस्थित्यादिरूपस्यासङ्गतत्वेन विरोधिविषयत्वस्यैव वाच्यत्वे प्रागुक्तविकल्पावकाशात् । प्रामाण्ये कदाचित्प्रामाण्यविरोधित्वेन प्रतीयमानघटत्वाद्यभेदभ्रमसम्भवेन प्रामाण्यस्यापि प्रामाण्यनिश्चयविरोधिधीविषयत्वसम्भवेन बाधात् । एतेन प्रामाण्यनिश्चयानुत्पादव्याप्यधीविषयत्वं तत्वमिति निरस्तम् । उक्तरीत्या प्रामाण्यस्यापि तथात्वात् ।

किञ्च कथञ्चिद्विरोधित्वनिर्वचनेऽप्यप्रामाण्यग्रहदशायां अप्रामाण्यादिग्राहकसामग्र्यसमवहितेनापि साक्षिणा प्रामाण्याग्रहाद्बाधः एव । न च प्रामाण्यनिश्चायानेकवत्यधीतप्रामाण्यविरोध्युपस्थापकसामग्र्यसमवहितेत्यनेन विवक्षितमिति वाच्यम् । प्रामाण्यनिश्चयस्याप्युत्तरात्मविशेषगुणत्वेन धारावाहिकस्थले प्रतियोगितया प्रामाण्यनिश्चयजन्यवृत्तित्वं च प्रति हेतुत्वेन बाधात् । प्रामाण्यनिश्चयत्वेन वृत्यस्य चाप्रामाण्याभावघटकघटत्वाभाववद्विशेष्यकत्वाद्यैकैकज्ञाने अभावेन तत्समवहितसाक्षिणा तद्ग्रहापत्तेः ।

---

१. घटत्वादीति स्यात् ।

नापि प्रामाण्यनिश्चयत्वेन वा तद्घटकनिश्चयत्वेन वा [1]निवृत्यत्वं विवक्षितम् । अप्रामाण्यगोचरप्रत्यक्षादावनुमित्यादिसाधारण प्रामाण्यनिश्चयत्वस्य निवर्तकतानवच्छेदकत्वाज्ज्ञानविशेष्यतया गृह्यमाणे पुरोवर्तिनि प्रामाण्यघटकत्वाभावादेः चक्षुषाग्राहके अनुमित्यादिसाधारणघटत्वादिनिश्चयत्वस्य निवर्तकतानवच्छेदकत्वाच्च ।

साक्षित्वपूर्वपक्षः

किञ्च साक्षित्वमपि न तावन्नित्यज्ञानत्वम् । परं प्रत्यसिद्धेः । ईशज्ञानमादाय सिद्धसाधनतापत्तेश्च । नापि वक्ष्यमाणरीत्या पराभिमता [2]नुव्यवसायित्वम् । तस्य ज्ञानविषयकज्ञानरूपत्वे[3] घटज्ञानमिति शाब्दज्ञानेन [4]प्रमाणग्रहापत्तेः । नापि तद्गोचरप्रत्यक्षत्वं परकीयादिज्ञानगोचरेण ज्ञानत्वादिसामान्यप्रत्यासत्तिजन्येन तत्प्रत्यक्षेण तत्प्रामाण्यग्रहणापत्तेः । नापि ज्ञानांशे लौकिकत्वविशेषितम् । षोढा सन्निकर्षजन्यत्वस्य वा स्वगतसाक्षात्कारजनकप्रत्यासत्तिजन्यत्वादेर्वा लौकिकत्वस्य साक्षिण्ययोगात् । प्रत्यक्षस्यापीन्द्रीयत्वेनेन्द्रियजन्यत्वस्य विषयत्वेन विषयजन्यत्वस्य च साक्षिण्ययोगात् सिद्धान्तविषयस्याजनकत्वाच्चेति चेत् ।

प्रामाण्यविरोधित्वसिद्धान्तः

मैवम् । प्रामाण्यनिश्चयप्रतिबन्धकत्वं प्रामाण्यविरोधीत्यादिना विवक्षितम् । अत एवाप्रतिबद्धसाक्षिवेद्यत्वं स्वतस्त्वमिति सुप्रसिद्धम् । अत एव वक्ष्यति ग्राह्यप्रामाण्यविरोधिग्राहकसामग्रीसमवधानात्मके प्रतिबन्धे सति साक्षिणा प्रामाण्याग्रहणादिति ग्राह्यप्रामाण्यविरोधीत्यादिरूपेण तद्वस्तुप्रामाण्याभावादिज्ञानतत्सामग्र्योरेव प्रतिबन्धकमस्तीति ज्ञापनाय उपस्थापकेति च जन्योपस्थितेरप्युपलक्षणार्थम् ।

१. "निवर्त्यत्वं" इति स्यात् । २. "अनुव्यवसायत्वं" इति स्यात् ।
३. "रूपत्वेन" इति स्यात् । ४. "प्रामाण्यग्रहापतेः" इति स्यात् ।

प्रतिबन्धकत्वनिष्कर्षः

ननु किं प्रतिबन्धकत्वं न तावत्कारणीभूताभावप्रतियोगित्वम् । सिद्धान्ते शक्तेरभ्युपगमेन प्रतिबन्धकाभावस्याहेतुत्वात् । नापि कार्यानुकूलकिञ्चिद्धर्मविघटकत्वं । न्यायमते प्रामाण्यनिश्चयादेः प्रामाण्यनिश्चयहेतुस्वाभावविघटनरूपत्वेन तद्विघटकत्वात् । नापि कार्यानुत्पादव्याप्यत्वम् । सिद्धान्ते प्रामाण्यनिश्चयस्य साक्षिणः कार्यतया तदनुत्पादशब्दितप्रागभावाभावादिति चेत्, साक्षिरूपप्रामाण्यनिश्चयस्य प्रागभावाभावेऽपि अनुमित्यादिरूपतन्निश्चयानुत्पादव्याप्यत्वेनापि तन्निर्वाहात् । नहि सर्वस्यापि तन्निश्चयानुत्पादेन भाव्यमित्यस्ति नियमः । अन्यपरमपीश्वरज्ञानास्यानुत्पादाभावेनाप्रामाण्यनिश्चयादेः प्रामाण्यनिश्चयानुत्पादव्याप्यतानापत्तेः । वस्तुतः योगधर्मो ज्ञानेनानिष्टतया प्रामाण्यनिश्चयानुत्पादव्याप्यतावच्छेदकमद्विषयकज्ञानतत्सामग्र्यसमवहितत्वमेव तत्वम् । प्रामाण्याभावतद्घटकतद्वत्वाभावादिगोचरनिश्चयादेः प्रामाण्याभावविषयकनिश्चयत्वादिना प्रामाण्यनिश्चयानुत्पादव्याप्यताया अवच्छेदेन प्रामाण्याभावादेः । तत्र विषयतया अवच्छेदकत्वनियमात् । प्रामाण्याप्रामाण्योभयघटकज्ञानत्वतत्प्रकारकत्वादेः तत्तन्निश्चये विषयतया प्रामाण्यनिश्चयानुत्पादव्याप्यतावच्छेदकत्वम् । न हि यदा ज्ञानत्वस्य तत्प्रकारकस्य वा निश्चयस्तदा प्रामाण्यनिश्चयानुत्पादः । विरोधाभावान्न[1] । न चैवमप्यप्रामाण्यनिश्चयत्वादिकमपि तत्तन्निश्चयानुत्पादव्याप्यतावच्छेदकं[2] तद्घटकघटत्वप्रकारकत्वादिभागस्याविरोधादिति वाच्यम् । तन्मात्रविरोधित्वेऽपि तद्घटितमूर्तिकस्वप्रकाराभाववद्विशेष्यकत्वादि रूपाखण्डाप्रामाण्यस्य तद्विरोधित्वेनावच्छेदकत्वासम्भवात् । एवञ्च प्रथमविवक्षायां प्रामाण्यसंशयस्य ग्राह्यसंशयतया प्रामाण्यसंशयानुत्पादव्याप्यत्वाभावेन तत्समवहितेन साक्षिणा प्रामाण्य-

१. अत्र तृटितमस्ति । २. तृटितमस्ति ।

ग्राहाद्बाध इति दूषणमलग्नकं बोध्यम् । अप्रमादिनिश्चयस्यैव प्रामाण्यनिश्चयानुत्पादव्याप्यत्वेऽपि न प्रामाण्यानिश्चयविषयगोचरज्ञानतत्सन्निध्य समवहितसाक्षिवेद्यत्वस्यैवेह विवक्षणादिति दिक् ।

परमार्थस्तु प्रामाण्यसामानाधिकरण्याज्ञानाय माने तज्ज्ञानवृत्तित्वावगाहिज्ञानतत्सामग्र्यसमवहितत्वमेव तत्त्वं विवक्षितम् । एवञ्च प्रामाण्यसाधकसाक्षिणः प्रामाण्यघटकघटत्वादिज्ञानतत्सामग्रीसमवहितत्वेऽपि प्रामाण्यसामानाधिकरण्येन ज्ञायमानघटत्वादौ तज्ज्ञानवृत्तित्वज्ञानतत्सामग्रीसमवहितत्वमस्तीति नासम्भवः । एकज्ञानत्वादौ तज्ज्ञानवृत्तित्वज्ञाने सत्यपि न प्रामाण्यसामानाधिकरण्येनाज्ञायमानत्वमिति विशेषणाभावेन तद्वशिष्टाभावसत्वान्नासम्भवः । अप्रामाण्यादिज्ञानकालीनस्य तु प्रामाण्यग्राहकसाक्षिणः प्रामाण्यसामानाधिकरण्येन ज्ञायमाने अप्रामाण्यादौ ज्ञानवृत्तित्वावगाहिज्ञानतत्साग्रीसमवहितत्वमेवेति न बाधशङ्कावकाशः ।

साक्षित्वपरिष्कारः

साक्षित्वं [१]न ज्ञानांशे लौकिकप्रत्यक्षत्वम् । [२]लौकिकं चालौकिकप्रत्यासत्यजन्यत्वं अलौकिकत्वं चानागतगोचरसाक्षात्कारहेतुत्वम् । न चैवमपीदं वर्तमानमिति वर्तमानत्वसामान्यप्रत्यासत्तिजन्यस्य प्रामाण्यविरोध्युपस्थापकसामग्र्यसमवहितस्यापि ज्ञानज्ञानस्य प्रामाण्यविषयकत्वाद्बाध इति वाच्यम् । तादृक्प्रत्यासत्तिजातीयजन्यत्वस्यातदर्थत्वात्सामान्यादिप्रत्यासत्तित्रयाजन्यत्वं वा लौकिकत्वमिति नोक्तदोषः । प्रत्यक्षत्वं च ज्ञानकरणत्वं, तच्च सव्यापारकज्ञानजन्यत्वम् । न तु ज्ञानजन्यत्वमात्रम् । तथा सति न्यायमते ईश्वरज्ञानस्यैव तथात्वेन विधिनिषेधयोः सिद्धसाधनबाधापत्तेः ।

न चैवमपि तन्मते जन्यमात्रस्यैवादृष्टादिव्यापारकेश्वरज्ञानजन्यतया

---

१. 'च' इति स्यात् । २. ''लोकिकत्वं'' इति स्यात् ।

सव्यापारकज्ञानाजन्यमानमीश्वरीयमेवेति प्रागुक्तदोषानिस्तार इति वाच्यम् । ज्ञानव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगिद्वाराज्ञानजन्यत्वाभावस्य तदर्थत्वात् । एवं चेश्वरज्ञाने व्यतिरेकशब्दितप्रागभावाप्रतियोगित्वेन ज्ञानकारणत्ववत्तदनुव्यवसायस्यापि तथात्वेनोक्तसकलसाक्षिविषयत्वरूपनैय्यत्यस्य तेनानभ्युपगमेनोक्तसिद्धसाधनत्वाद्यनवकाशात् । न हि व्यवसायेनेश्वरज्ञानेन वा अनुव्यवसाये जननीये स्वप्रागभावप्रयुक्तप्रागभावप्रतियोगी व्यापारोऽस्ति । आद्ये व्यापाराभावात् द्वितीये स्वप्रागभावाभावात् ।

न चैवमपि व्यवसायानन्तरज्ञानत्वनिर्विकल्पकापेक्षायामनुव्यवसायस्य व्यवसायकरणकत्वमेवेति वाच्यम् । अनुव्यवसायस्य नरसिंहरूपतया ज्ञानांशनिर्विकल्पकत्वस्याभ्युपेतत्वेन मध्ये तदकल्पनात् । क्वचित्तत्कल्पकेऽपि तस्यासार्वत्रिकत्वेनाद्वारत्वात् । स्वाविषयकव्यापारद्वारकज्ञानजन्यत्वाभाव एव वा तदर्थः । एवञ्च निर्विकल्पकस्य स्वजनकव्यवसायविषयकत्वनियमेन विशिष्टाभावसत्वान्न कोऽपि दोषः । वस्तुतस्तु साक्षित्वं जातिरूपमेवोभयसिद्धं विवक्षितमिति न दोषगन्धोऽपीति सङ्क्षेपः ।

ननु किं साक्षित्वं नित्यज्ञानत्वं तादृक्प्रत्यक्षत्वं वा । ईश्वरज्ञानमादायापि सिद्धसाधनापत्तेः । नापि जीवभिन्नत्वादिविशेषितम् । तत्परमते असिद्धेरित्यत आह– **तार्किकेति** ।। स च प्रागुक्त एवानुसर्तव्यः । यद्यपि साक्षात् शब्दात् ''साक्षाद्द्रष्टरि संज्ञायाम्'' इति (५.२.९१) इनि प्रत्यये अत्प्रत्ययानां भाषामात्रे टिलोपो वाच्यः इति टिलोपे उपद्रष्टरि साक्षिशब्दनिष्पत्या नानुव्यवसायवाचित्वम् । तथापि सिद्धान्ते द्रष्टृजीवाभिन्नत्वात् अनुव्यवसायेऽपि वृषल्यपत्नीत्वादिवत् भागप्रयोगो युक्त इति भावः ।

न्यायदीपः

वेदरूपकरणप्रामाण्यस्य स्वतस्त्वं निश्चितप्रामाण्यकज्ञानेन ज्ञातव्यम् । तच्च तज्जन्यज्ञानप्रामाण्योत्पत्तिस्वतस्त्वसिद्ध्यधीनोत्पत्तिस्वतस्त्वमिति क्रमाज्ज्ञप्तावुत्पत्तौ च तदेवादौ समर्थयितुं ''ज्ञानग्राहकमात्रग्राह्यत्वं स्वतस्त्वम्'' इति टीकाकृदुक्तं वाक्यं विवृण्वानो ज्ञप्तौ स्वतस्त्वं तावन्निर्वक्ति ।। **याथार्थ्यरूपस्येति** ।। अर्थं ज्ञेयम् अनतिक्रम्य वर्तमानं यथार्थम् । ''यथाऽसादृश्य'' इत्यव्ययीभावः । यथार्थं भावो याथार्थ्यं, यथावस्थितज्ञेयविषयीकारित्वरूपं ज्ञेयाव्यभिचारित्वं तद्रूपस्येत्यर्थः । एतच्च परोक्षापरोक्षजन्याजन्यसर्वप्रमितिमात्रनिष्ठमित्युपेत्य ज्ञानप्रामाण्यस्येत्युक्तम् । अनुभूतित्वानधिगतार्थगन्तृत्वप्रमाकरणत्वसाधनाश्रययोरन्यतरत्वप्रमाव्याप्तत्वादेरव्याप्त्यसम्भवादिदुष्टत्वादिति भावः । अस्यानुप्रमाणसाधारण्येऽपि साक्षाज्ज्ञेयविषयीकारित्वलाभायापि ज्ञानप्रामाण्यस्येत्युक्तम् । एतच्च भिन्नं भिन्नमेवेति सर्वप्रमितिनिष्ठप्रामाण्यस्वतस्त्वद्योतनाय तत्तदिति ज्ञानविशेषणम् । तस्य तस्य ज्ञानस्य यत्तत्तदर्थाव्यभिचारित्वरूपं प्रामाण्यं तस्येत्यर्थः । प्रमापदप्रवृत्तिनिमित्तप्रामाण्यस्येति यावत् । ''याथार्थ्यमेव मानत्वं'' इति द्वितीयाद्यपादीयानुभाष्योक्तेः । निर्धारितं चैतद्याथार्थ्यं तत्रैव सुधायाम् । प्रपञ्चितं गुरुपादैरत्रैव प्रामाण्यस्वतस्त्वानुमानवादे । ''घटत्ववति घटत्वप्रकारकत्वादिरूपं पराभिमतमेवास्माकं याथार्थ्यं'' इति वक्ष्यमाणदिशा स्वपरसाधारणमेवेदमिति ज्ञेयम् ।

उपाधिखण्डनटीकाव्याख्यानमन्दारमञ्जर्यां ''अथ केयं प्रमा'' इत्यादिना प्रमात्वमाक्षिप्य

''यथार्थज्ञानमित्येव प्रमाया लक्षणस्थितिः ।
स्मृतेरपि च लक्ष्यत्वादतिव्याप्तिकथा मुधा''

इति प्रतिज्ञापूर्वकं ''सादृश्यस्य यथाशब्दार्थत्वात् । सादृश्यं च ज्ञानार्थयोः सत्तया ·। नच भ्रमेऽतिव्याप्तिः । तत्र ज्ञानस्य सत्त्वादर्थस्य चासत्त्वात् ज्ञानार्थयोः सत्तया सादृश्याभावात् । एवं च **यथा** सादृश्यविशिष्ट एवा**र्थो** यस्येति बहुव्रीह्याश्रयणे यथार्थशब्दस्य यथाथा प्रतीतिरित्याद्यभिधेय-वल्लिङ्गं लोकसिद्धं सिद्धम्'' । ''यथाशब्दोऽनतिक्रमे वर्तत'' इति टीकाकार-वचनं तु फलितप्रदर्शनपरतया व्याख्येयम् । ज्ञानार्थयोः सादृश्यकथने ज्ञानस्यार्थानतिक्रमस्यावश्यकत्वात्'' इत्यादिग्रन्थेन बहुव्रीह्युपादानेनोक्तार्थस्य ग्रहणे तु न स्वपरसाधारण्यं प्रामाण्यस्य लभ्यते । परमते भ्रमविषयस्य सत्त्वेन लक्षणस्यातिव्याप्तेः । यद्वा तन्मतेऽपि प्राचां रीतौ वैशिष्ट्यस्य भ्रमेऽसत्त्वा-न्नवीनमते च पुरतोऽसत्त्वात् तदपि तन्मतसाधारणमेवेत्याहुः ।

अत्र यद्यप्याम्नायजन्यज्ञानप्रामाण्यस्वतस्त्वमात्रं प्रकृतम् । तथापि तत्स्वरूपग्राहिप्रत्यक्षज्ञानस्य तदनुग्राहकन्यायजानुमितिरूपज्ञानस्य तत्प्रामाण्यज्ञानस्य च प्रामाण्यनिश्चयोपायस्याप्यावश्यकत्वाज्ज्ञानप्रामाण्य-मात्रस्यापि धर्मित्वेनोपादानम् । यद्वा प्राचीनतार्किकमत इव क्वचित् प्रामाण्यं स्वतः क्वचित् परत इति न भ्रमितव्यम् । किन्तु सर्वत्रापि । नवीनमते सर्वत्र परतस्त्वोपगमेन तद्व्युदासायेति ध्येयम् ।

।। **ग्राह्येति** ।। ग्राह्यप्रामाण्यस्य यद् विरोधि प्रामाण्याभावा-प्रामाण्यप्रमाण्याभावव्याप्याप्रामाण्यव्याप्यरूपं तस्य या उपस्थापकसामग्री दोषशङ्कादिरूपा तदसमवहितं ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकं यत्साक्षिज्ञानं तेन गृह्यत एवेत्येवंरूपतद्विषयत्वनैयत्यमित्यर्थः । विप्रतिपत्ते-रनावश्यकत्वस्य **न्यायामृते** व्युत्पादनात् नैयत्यमस्ति न वेत्यनुक्त्वैकैव कोटिरुक्ता । अत्र प्रामाण्यविरहरूपत्वतद्व्याप्यत्वादिरूपविरोधित्वस्य प्रामाण्याभावादिषु चतुर्ष्वेकस्याभावेऽपि यज्ज्ञाने सति प्रामाण्यनिश्चयः

प्रतिबध्यते तज्ज्ञानविषयत्वरूपं ग्राह्यप्रमाण्यविरोधित्वं प्रामाण्याभावादौ ध्येयम् । वक्ष्यति च[1] प्रामाण्यनिश्चयस्य प्रवर्तकत्ववादे ''अभावानां प्रामाण्यनिश्चयविरोध्यभावत्वेन'' इत्यादि ।

प्रामाण्यनिश्चयप्रतिबन्धकत्वं तदनुकूलकिञ्चिद्धर्मविघटकत्वं वा तदनुत्पादव्याप्यत्वं वा । प्रामाण्यनिश्चयस्य साक्षिरूपतया नित्यज्ञानत्वेऽपि प्रामाण्यविषयकत्वादिकमुत्पत्तिमदेवेति तद्विशिष्टप्रामाण्यनिश्चयानुत्पादो न दुर्लभः । उपस्थापकेत्यत्र विरोध्युपस्थितितज्जनकसामग्रीभ्यामसमवहितेत्यर्थो ध्येयः । तथाच प्रामाण्यविरोध्युपस्थितिवेलायां तत्सामग्र्यभावेन तदसमवहितेनापि साक्षिणा गृह्यत एवेति नैयत्यं नेति शङ्कानवकाशः । असमवहितत्वं च तदसामानाधिकरण्ये सति तदसमानकालिकत्वम् । ''प्रत्यक्षं सप्तविधं साक्षिषडिन्द्रियभेदेन'' इति प्रमाणलक्षणे, ''स्वरूपेन्द्रियं साक्षीत्युच्यत'' इति पद्धत्यादौ च साक्षिणोऽनुप्रमाणत्वोक्तेरिह पराभ्युपेतानुव्यवसायरूपत्वस्फोरणाय साक्षिज्ञानेत्युक्तम् ।

''साक्षिप्रत्यक्षतो ह्येव मानानां मानतेयते''

इत्यादौ ज्ञानेऽपि प्रयोगात् । तथा युक्तिपादे ''न विलक्षणत्वात्'' इति नये–

''सुखदुःखादिविषयं शुद्धं संसारगेष्वपि''

इत्यस्य व्याख्यावसरे सुधायां ''स्वरूपभूतं चैतन्येन्द्रियं साक्षीत्युच्यते तदभिव्यक्तं ज्ञानं च'' इत्युक्तत्वाच्च ।

नन्वात्मस्वरूपज्ञानत्वादिरूपसाक्षित्वस्य परमतेऽप्रसिद्धिरित्यत आह ।। **तार्किकेति** ।। [2]स्वतस्त्वानुमानवादे वक्ष्यमाणदिशा व्यवसायप्रकार-

१. पृ.सं.२११ २. पृ.सं.१५०

प्रकारकतया व्यवसायप्रकारवद्विशेष्यकतया च तद्विषयकप्रत्यक्षत्वं वा ज्ञानांशे लौकिकप्रत्यक्षत्वं वाऽनुव्यवसायत्वम् । साक्षित्वमप्येवंरूपमेवात्र स्वतस्त्व-निरुक्तौ प्रविष्टमित्यर्थः । यन्मते वैशिष्ट्यमनुव्यवसायविषयोऽपि, न स्वातन्त्र्येण विषय इति तन्मतेनाद्यः कल्पः । तत्र च विषयत्वनैयत्यं स्वातन्त्र्येणेति प्रवेशनीयम् । यन्मते वैशिष्ट्यमनुव्यवसायविषय एव नेति तन्मतेनान्त्यः । तत्र तु न स्वातन्त्र्येणेति विवक्षणीयम् । लौकिकत्वं च पराभिमतसामान्यादिप्रत्यासत्तित्रयाजन्यत्वम् । ज्ञानांश इति विशेषणात् स्मृत्युपनीतेऽतीते घटज्ञाने तद्विषयकमहं घटज्ञानवानिति यज्ज्ञानमात्मांशे लौकिकप्रत्यक्षं तेन प्रामाण्याग्रहणाद्बाधवारणमिति ध्येयम् । वस्तुतस्त्वत्र अन्त्यपक्षप्रवेश एव साधुः । तथाच प्रामाण्यविरोधीत्यादिविशेषणवैयर्थ्य-शङ्कावकाशलेशोऽपि नेति ज्ञेयम् ।

श्रीलक्ष्मीनाथतीर्थटीका

प्रयोजनाभावेन विप्रतिपत्तेर्न्यायामृते निरस्तत्वादादौ स्वमतसाधारणं ज्ञानप्रामाण्यस्वतस्त्वं निर्वक्ति ।। **याथार्थ्यरूपस्येति** ।। अर्थशब्दोऽर्यते इति व्युत्पत्त्या ज्ञेयवाची । ज्ञेयमनतिक्रम्य वर्तमानं यथावस्थितमेव ज्ञेयं यद्विषयीकरोति तत् यथार्थं प्रमाणम् । तस्य भावः याथार्थ्यं तादृशस्य याथार्थ्यरूपस्येत्यर्थः ।

एतेन किं प्रमाकरणत्वं प्रामाण्यं उत तद्वति तत्प्रकारकत्वं वा । नाद्यः । ज्ञाने अव्याप्तेः । न द्वितीयः । करणे अव्याप्तेः इति [१]**न्यायामृते** उच्यमानं दूषणं नास्मन्मते इति सूचितम् । याथार्थ्यरूपप्रामाण्यस्य ज्ञानतत्करण-साधारणत्वात् । अत एव करणनिष्ठप्रामाण्यं व्यावर्तयितुं **ज्ञानेति** ।

१. "न्यायमते" इति स्यात् । न्यायामृते एतादृशवाक्यस्य कुत्राप्यदर्शनात् । तार्किकाभिमतलक्षणत्वाच्चास्य ।

अनुगतप्रामाण्यव्यक्तेरभावादाह ।। **तत्तदिति** ।। घटादिज्ञानप्रामाण्यस्येत्यर्थः ।। **ग्राह्येति** ।। ग्राह्यं यत्प्रामाण्यं तस्य विरोधी अप्रामाण्यं प्रामाण्याभावश्च [१]तदुभयोपस्थापिकायाः सामग्रीतया असमवहितं ग्राह्यप्रामाण्याश्रयघटज्ञानादिविषयकं साक्षिरूपं यद्भानं तद्विषयत्वनैय्यत्यमित्यर्थः ।

ननु साक्षिरूपज्ञानस्य नैय्यायिकादिभिरनङ्गीकृतत्त्वात्कथं तद्विषयत्वनैय्यत्यं सुज्ञेयमुच्यते इत्यत आह ।। **तार्किकेति** ।। तथा च ज्ञानविषयकज्ञानं मतद्वयेति सिद्धमिति भावः । तस्य न्यायमते अनुव्यवसाय इति संज्ञा अस्मन्मते तु सक्षीति । एवञ्च संज्ञामात्रे भेद इति भावः ।।

तर्कताण्डवम्

अत्रच नियमोक्त्या न्यायमतेऽपि क्वचिदनुव्यवसायेन प्रामाण्यग्रहस्य वक्ष्यमाणत्वात् सिद्धसाधनमिति शङ्का, साक्षीत्युक्त्या घटज्ञानमस्तीत्यादिशब्दजन्यमप्रतिबद्धं घटज्ञानविषयकं ज्ञानं प्रति घटज्ञानप्रामण्यस्याविषयत्वाद् बाध इति शङ्का, ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकेत्युक्त्या घटज्ञानं गृह्णता साक्षिणा पटज्ञानप्रामाण्यस्य अग्रहणाद् बाध इति शङ्का, अवशिष्टेन मन्मतेऽपि दोषशङ्कादिरूपे ग्राह्यप्रामाण्यविरोधिग्राहकसामग्रीसमवधानात्मके प्रतिबन्धे सति साक्षिणा प्रामाण्यस्य अग्रहणाद् बाध इति शङ्का च निरस्ता ।

अत्र यद्यपि विषयत्वं साक्षिज्ञानं प्रत्येवेति नियमो न युक्तः । मन्मतेऽपि प्रामाण्यस्यानुमित्याऽपि ग्राह्यत्वात् । तथाऽपि साक्षिज्ञानं प्रति विषयत्वमेवेति नियमो युक्त एव । मणिकृताऽपि हि तदप्रामाण्याग्राहकेति विशिंषता प्रामाण्यग्रहणेऽप्रामाण्योपस्थापकसामग्र्यसमवधानस्य प्रयोजकतोक्तैव ।। १ ।।

१. "तदुभयोपस्थापकसामग्र्याः" इति स्यात् ।

युक्तिरत्नाकरः

।। **क्वचिदनुव्यवसायेनेति** ।। गन्धवती पृथिवीति व्यवसायानन्तरं इमां पृथिवीत्वेन जानामि इत्यनुव्यवसाये जाते अनुव्यवसायाहित-संस्कारजन्यस्मृत्युपनीते व्यवसाये व्यवसायजन्यसंस्काराहितस्मृत्युपनीतं तत्वं यदा मनसा परिच्छिद्यते ममोत्पन्नं ज्ञानं पृथिवीत्ववति पृथिवीत्व-प्रकारकमिति तत्र तार्किकैरप्यनुव्यवसायस्य प्रामाण्यविषयकत्वाभ्युपगमा-द्यथोक्तसाक्षिविषयत्वसाधने सिद्धसाधनशङ्का स्यात् । तद्वारणायोक्तसकल-साक्षिविषयत्वलाभाय नैय्यत्यपर्यन्तं साध्यमित्यर्थः ।

न च ज्ञानांशलौकिकप्रत्यक्षत्वरूपस्य साक्षित्वस्यानुव्यवसाये अभावान्न सिद्धसाधनमिति वाच्यम् । तत्प्रकारप्रकारकतया [१]प्रकारवद्विशेष्यत्वकतया च व्यवसायविषयक प्रत्यक्षत्वस्य साक्षिशब्दार्थत्वाभिप्रायेणैतदभिधानात् । प्रागुक्तसाक्षित्वपक्षे तु गृहीतप्रामाण्यसजातीयज्ञानान्तरानुव्यवसायमीश्वर-ज्ञानञ्चादाय सिद्धसाधनवारणाय तदुपादानमित्यर्थात् । शब्दजन्यमित्युप-लक्षणम् । ज्ञानांशा[२]लौकिकसामान्यप्रत्यासत्त्यादिजन्यज्ञानं प्रतीत्यपि द्रष्टव्यम् । [३]अप्रतिबन्धविरोध्युपस्थितितत्सामग्र्यसमवहितम् ।। **ग्राह्य-प्रामण्येति** ।। इदमुपलक्षणम् । तत्तदित्युक्त्या एकप्रामाण्याश्रयग्राहकेण तस्य ग्राह्यत्वरूपस्वतस्त्वं सिद्धान्तेऽपि यदाहि ज्ञानप्रामाण्ये सा न स्यादिति शङ्का निरस्तेत्यपि द्रष्टव्यम् । अत एव पक्षेऽपि तत्तदित्युक्तम् । तेन वीप्साया यथा घटज्ञानप्रामाण्ये उक्तरूपं स्वतस्त्वं तथा घटज्ञानप्रमादिष्वपि स्वतस्त्वं निर्वाह्यमिति ज्ञापनेन प्रामाण्याननुगमेऽपि न दोष इति भावेन तत्तदित्युक्तमिति वेदितव्यम् । ज्ञानपदन्तु स्पष्टार्थम् ।

---

१. "तत्प्रकारवत्" इति स्यात् । २. "लौकिक" इति स्यात् ।
३. "अप्रतिबद्धं विरोध्युपस्थिति" इति स्यात् ।

।। **दोषशङ्केति** ।। इदं ज्ञानं करणदोषजन्यं न वेति भावः । शङ्कादिपदेनाप्रामाण्यादिनिश्चायकदोषनिश्चयादिपरिग्रहः । **सामग्र्यसमवधानात्मक** इत्युपलक्षणम् । अप्रामाण्यादिशङ्का तन्निश्चयसमवधानात्मक इत्यपि द्रष्टव्यम् ।

साक्षिविषयनैयत्यमित्यत्र साक्षिणं प्रत्येव विषयत्वं साक्षिणं प्रति विषयत्वमेवेति नैयत्यस्योभयथान्वयसम्भावात् । द्वितीय एव नियमो विवक्षित इति वक्तुं आद्यं दूषयति– **अत्र यद्यपीति** ।। अपीत्यवधारणे । अयुक्त एवेत्यर्थः ।

नन्वेतदप्ययुक्तम् । विशेषणसङ्गतनियमवाचित्वस्य शङ्खःपाण्डुर एव शङ्खे पाण्डुरत्वनैय्यत्यमित्यादौ विशेष्ये विशेषणायोगव्यवच्छेदकत्वव्युत्पत्त्या प्रामाण्यमुक्तसाक्षिविषय एव प्रामाण्ये उक्तसाक्षिविषयत्वनैय्यत्यमित्यत्रापि सर्वस्मिन् प्रामाण्ये यत्किञ्चिदुक्तसाक्षिविषयत्वमादायापि साध्यपर्यवसानसम्भवेन नैय्यायिकानभिमतस्य सकलानुव्यवसायविषयकत्वस्यानेनासिद्धेः । न च साक्षिपदं अनुव्यवसायित्वावच्छिन्नसर्वपरं नैय्यत्यमित्यस्य वैय्यर्थ्यापत्तेरिति चेत् प्रामाण्ये साक्षिविषयत्वोक्तौ समानसंवित्संवेद्यतयोक्तसाक्षिणि प्रामाण्यविषयकत्वविषयसम्बन्धस्यापि लाभेन तत्रैव च नियमत्वे सर्वस्मिन्नपि साक्षिणि प्रामाण्यमित्यसिद्ध्या स्वतस्त्वानपायात् । एवं च प्रामाण्यं स्वविषयकतानियतोक्तसाक्षिताकमिति विधिकोट्यर्थः पर्यवसितो वेदितव्य इति यत् स्वतस्त्ववादिभिरप्रामाण्याग्राहकज्ञानग्राहक ग्राह्यत्वस्येव स्वतस्त्वरूपतयाभिधानात् कथमित्थमिह स्वतस्त्वाभिधानमित्यत आह– **मणिकृतापीति** ।। तत्र ह्यप्रामाण्यग्राहकजनकत्वमात्रविशेषांशे गुरुतमे अप्रामाण्यभ्रमस्य ग्रहणस्मरणात्मकतया स्मृतिरूपाप्रामाण्यग्रहजनिकतया ग्रहणसामग्र्याप्रामाण्यग्रहेण बाधापत्त्या तदुक्तविप्रतिपत्तावप्येवं विवक्षणीयत्वादिति भावः ।

वस्तुतः ज्ञानग्राहकमात्रग्राह्यत्वमेव स्वतस्त्वम् । न तु विरोध्युपस्थापकसामग्र्यसमवधानेनापि तद्विशेषणीयम् । अन्यथा ज्ञानग्राहकातिरिक्तस्योक्तसमवधानस्योपेक्षणेन परतस्त्वाविशेषापत्तेरित्याह– **मणिकृताऽपीति** ।। प्रतिबन्धकीभूतविरोधिसामग्र्या असमवधानस्याहेतुभूतस्यापेक्षणेऽपि न स्वतस्त्वहानिः । ज्ञानग्राहकहेत्वतिरिक्तहेत्वपेक्षणे एव तद्धानेः । अन्यथा विरोधिसामग्रीसमवहितेन कारणलापेन क्वापि प्रामाण्यस्याग्रहेण यावद्ग्राहकग्राह्यत्वरूपस्वतस्त्वस्यैवासम्भवदुक्तिकत्वापत्तेरिति । तदिदमुक्तं ''समवधानस्य प्रयोजकतोक्तैवे''ति ।।

न्यायदीपः

विशेषणकृत्यादि स्वयमेव व्यनक्ति ।। **अत्रेति** ।। निरुक्तिवाक्य इत्यर्थः । नियमोक्त्या गृह्यत एवेति नैयत्योक्त्येत्यर्थः ।। **वक्ष्यमाणत्वादिति** ।। [१]बाधोद्धारग्रन्थादौ घटादिज्ञानानुव्यवसायजन्यसंस्कारोत्पन्नस्मृत्युपनीते घटादिज्ञाने घटादिज्ञानजन्यसंस्कारोत्पन्नस्मृत्युपनीतं घटघटत्वतद्वैशिष्ट्यरूपप्रामाण्यम्, पञ्चमानुव्यवसायेन गृह्यत इति वक्ष्यमाणत्वादित्यर्थः । शङ्का निरस्तेत्यन्वयः । एतच्च तत्प्रकारप्रकारकतया इत्युक्तानुव्यवसायत्वरूपसाक्षित्वविवक्षया बोध्यम् । अन्त्यकल्पे तु गृहीतप्रामाण्यकज्ञानसजातीयज्ञानान्तरानुव्यवसायमीश्वरज्ञानं वाऽऽदाय सिद्धसाधनता ध्येया । शब्दजन्यमित्युपलक्षणम् । सामान्यप्रत्यासत्तिजन्यं ज्ञानांशेऽलौकिकं ज्ञानवानहमिति ज्ञानं च प्रतीत्यपि ध्येयम् । साक्षित्वस्य द्विरूपस्यात्राभिमतत्वात् तत्प्रकारकेत्यादिरूपेण शब्दजन्यज्ञानस्य ज्ञानांशेलौकिकेत्यन्त्यपक्षरूपेण च सामान्यप्रत्यासत्तिजन्यस्य निरासात् ।

।। **अप्रतिबद्धमिति** ।। विरोध्युपस्थितितत्सामग्र्यसमवहितमित्यर्थः ।

१. पृ.सं.१७८

यस्तु घटज्ञानमिति ज्ञानेनापि प्रामाण्यं गृह्यत इति पक्षधरोद्घाटितः पक्षः, स त्वपदार्थत्वादवाक्यार्थत्वादिति रुचिदत्तादिनैव दूषितत्वादुपेक्ष्यः । अत्र विवक्षिततत्प्रकारप्रकारकतादिरूपज्ञानज्ञानत्वाभावाच्च ।। **तत्तज्ज्ञानेति** ।। ग्राह्यप्रामाण्याश्रयविषयकेत्युक्तावपि घटज्ञानपटज्ञानयोर्द्वयोरपि ग्राह्य-प्रामाण्याश्रयत्वेनान्यतरग्राहकेण अन्यतरप्रामाण्याग्रहणेनोक्तदोषतादवस्थ्यात् तत्तज्ज्ञानविषयकेत्यप्यनुवादः । अत एव धर्मिनिर्देशेऽपि तत्तदित्युक्तिः । ग्राह्यप्रामाण्याश्रयेत्यनुक्तावप्रामाण्याश्रयस्यापि ज्ञानस्य तत्तज्ज्ञानपदेन ग्रहणप्रसङ्गात् तद्विषयकेण साक्षिणा प्रामाण्याग्रहणाद्बाध एव । साक्षिण एकत्वेऽपि पटज्ञानप्रामाण्यग्रहणस्य पटज्ञानग्रहणप्रयुक्तत्वेन घटज्ञानग्रहणप्रयुक्तत्वाभावाद् बाधशङ्का युक्तैवेति भावः ।

।। **दोषशङ्केति** ।। दुष्टकरणजन्यत्वशङ्का तन्निश्चयतज्जनकादिरूपे-त्यर्थः । नैयत्यस्य साक्षिणैव गृह्यते साक्षिणा गृह्यत एवेति च द्वेधा सम्भवा-द्विवक्षितमाह ।। **अत्रेति** ।। निरुक्ताविवत्यर्थः ।। **अनुमित्येति** ।। चैत्रज्ञानं प्रमा अर्थसंवादादित्यादिरूपेण मैत्रादेरनुमित्युदयादित्यर्थः ।

ननु ज्ञानग्राहकसाक्षिणो विरोधिसामग्र्यभावमपेक्ष्य प्रामाण्यग्राहकत्वे निरपेक्षज्ञानग्राहकग्राह्यत्वरूपस्वतस्त्वायोग इत्यत आह ।। **मणिकृताऽ-पीति** ।। परतस्त्ववादिनाऽपीत्यर्थः । विरोध्युपस्थापकसामग्र्यसमवधानस्य प्रामाण्यग्रहणकारणत्वे हि दोषः । गमनशक्तस्य गजस्य गोक्षुरकापसारणस्येव प्रयोजकत्वे तु न दोष इति भावेनोक्तम् ।। **प्रयोजकतेति** ।। १ ।।

श्रीलक्ष्मीनाथतीर्थटीका

विशेषणानां प्रयोजनान्याह ।। **अत्र चेति** ।। उक्तस्वतस्त्वनिरुक्ता-वित्यर्थः । उक्तविधसाक्षिज्ञानविषयत्वं प्रामाण्यस्य परतस्त्वं वदतो

नैय्यायिकस्य मते पञ्चमानुव्यवसायग्राह्यत्वेन सिद्धमिति सिद्धसाधनतावारणाय नैय्यत्यमिति विशेषणमित्याह ।। **नियमोक्त्येति** ।। अस्य पदस्य निरस्तेति वक्ष्यमाणेन सम्बन्धः । एवमुत्तरत्रापि द्रष्टव्यम् । तथा च प्रथमानुव्यवसायादि-ग्राह्यत्वाभावेन नियमाभावादिति भावः ।

तादृशज्ञानविषयत्वनैय्यत्यमित्येवोच्यतां किं साक्षिग्रहणेनेत्यतस्तस्य प्रयोजनमाह ।। **साक्षीत्युक्त्येति** ।। प्रामाण्यविरोध्युपस्थापकसामग्री-समवहितत्वेन प्रतिबद्धत्वात् तेन प्रामाण्यग्रहणे न दोषः इत्यत उक्तम् ।। **अप्रतिबद्धमिति** ।। **अविषयत्वादिति** ।। न च तादृशज्ञानेप्रामाण्यमिति वाच्यम् । तर्हीदं रजतमिति भ्रमानन्तरं रजतज्ञानमस्तीत्यादिरजतविषयक-ज्ञानेनापि प्रामाण्यग्रहणापत्तेः । किञ्च तेनापि प्रामाण्यग्रहणे घटज्ञानमस्ती-त्यनन्तरं घटज्ञानं प्रमाणं न वेति संशयोः न स्यात् ।

साक्षिज्ञानविषयत्वनैय्यत्यमित्येतदेवालं किं ग्राह्यप्रामाण्यश्रयविशेषणेनेत्यत आह ।। **ग्राह्यप्रामाण्याश्रयेति** ।। **अवशिष्टेनेति** ।। ग्राह्यप्रामाण्य-विरोध्युपस्थापकसामग्री[1]समवहितेत्यनेनेत्यर्थः ।। **प्रामाण्यस्याग्रहणा-दिति** ।। न च प्रामाण्यग्रहार्थं साक्षिणः दोषादिलक्षणप्रतिबन्धकाभावापेक्षायां ज्ञानग्राहकमात्रग्राह्यत्वाभावेन परतस्त्वमेव स्यादिति वाच्यम् । अप्रति-बद्धानुव्यावसायत्वावच्छेदेन सकलानुव्यवसायग्राह्यत्वरूपमेव स्वतस्त्वं न तु ग्राहकमात्रग्राह्यत्वमिति भावः ।

ननु साक्षिविषयत्वनैय्यत्यमित्यत्र नियमो अयुक्तः । इदं ज्ञानं प्रमाणं समर्थप्रवृत्तिजनकत्त्वादित्यनुमितिं प्रति प्रामाण्यस्य विषयत्वाङ्गीकारादिति शङ्कते ।। **अत्र यद्यपीति** ।। परिहरति ।। **तथापीति** ।। तथा च

१. "असमवहित" इति स्यात् ।

नियमपदेन प्रामाण्ये साक्षिज्ञानविषयत्वस्य [1]योगो व्यवच्छिद्यते इति भावः । अप्रतिबद्धज्ञानग्राहकसामग्रीग्राह्यत्वं स्वतस्त्वमित्येतन्**मणि**कृतोपि सम्मतमित्याह ।। **मणिकृतेति** ।। ज्ञानप्रामाण्यस्य तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यत्वं स्वतस्त्वमिति वदता **मणि**कृता अप्रामाण्योपस्थापकसामग्रीदशायां प्रामाण्यग्रहस्य अनङ्गीकारात् । अप्रतिबद्धज्ञानग्राहकसामग्रीग्राह्यत्वं तस्यापि सम्मतमिति भावः ।

तर्कताण्डवम्

यद्वा तत्तज्ज्ञानप्रामाण्यस्य ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकसाक्षिज्ञानविषयत्वयोग्यत्वं स्वतस्त्वं । योग्यत्वं च साक्षिनिष्टां सहजां ग्रहणशक्तिं प्रति स्वविषयज्ञानद्वराऽवच्छेदकत्वं । एवं च प्रतिबन्धदशायामपि करतलादौ दाहयोग्यतावत् प्रामाण्ये ग्रहणयोग्यताऽस्त्येव । तथा च प्रामाण्यग्रहणशक्तेः सहजत्वात् प्रामाण्यग्रहणस्यौत्सर्गिकत्वरूपस्वतस्त्वसिद्धिः । उक्तं च टीकाकारैः ''साक्ष्येव ज्ञानं तत्प्रामाण्यं च विषयीकर्तुं क्षमः । किन्तु प्रतिबद्धो ज्ञानमात्रं गृहीत्वा तत्प्रामाण्यग्रहणस्य नेष्ट'' इति ।। २ ।।

युक्तिरत्नाकरः

उक्तप्रतिपत्तावनेकविशेषणप्रक्षेपेण गौरवं मन्वान आह यद्वेति । फलोपधानापेक्षयैकं पक्षमभिधायस्वरूपयोग्यतापेक्षया पक्षान्तरमाह– **यद्वेति** ।। घटज्ञानग्राहकसाक्षियोग्यत्वस्य प्रामाण्ये अभावात् बाधवारणाय– **ग्राह्येति** ।। न च तद्योग्यता तत्राप्यस्त्येवेति वाच्यम् । तदुभयग्राहकशक्त्योः परस्परं भिन्नत्वेन तच्छक्तौ प्रामाण्यविषयतावच्छेदकत्वरूपयोग्यताया अभावात् ।

१. ''अयोग'' इति स्यात् ।

नैय्यायिकस्य मते पञ्चमानुव्यवसायग्राह्यत्वेन सिद्धमिति सिद्धसाधनतावारणाय नैय्यत्यमिति विशेषणमित्याह ।। **नियमोक्त्येति** ।। अस्य पदस्य निरस्तेति वक्ष्यमाणेन सम्बन्धः । एवमुत्तरत्रापि द्रष्टव्यम् । तथा च प्रथमानुव्यवसायादि-ग्राह्यत्वाभावेन नियमाभावादिति भावः ।

तादृशज्ञानविषयत्वनैय्यत्यमित्येवोच्यतां किं साक्षिग्रहणेनेत्यतस्तस्य प्रयोजनमाह ।। **साक्षीत्युक्त्येति** ।। प्रामाण्यविरोध्युपस्थापकसामग्री-समवहितत्वेन प्रतिबद्धत्वात् तेन प्रामाण्यग्रहणे न दोषः इत्यत उक्तम् ।। **अप्रतिबद्धमिति** ।। **अविषयत्वादिति** ।। न च तादृशज्ञानेप्रामाण्यमिति वाच्यम् । तर्हीदं रजतमिति भ्रमानन्तरं रजतज्ञानमस्तीत्यादिरजतविषयक-ज्ञानेनापि प्रामाण्यग्रहणापत्तेः । किञ्च तेनापि प्रामाण्यग्रहणे घटज्ञानमस्ती-त्यनन्तरं घटज्ञानं प्रमाणं न वेति संशयोः न स्यात् ।

साक्षिज्ञानविषयत्वनैय्यत्यमित्येतदेवालं किं ग्राह्यप्रामाण्यश्रयविशेषणेनेत्यत आह ।। **ग्राह्यप्रामाण्याश्रयेति** ।। **अवशिष्टेनेति** ।। ग्राह्यप्रामाण्य-विरोध्युपस्थापकसामग्री[1]समवहितेत्यनेनेत्यर्थः ।। **प्रामाण्यस्याग्रहणा-दिति** ।। न च प्रामाण्यग्रहार्थं साक्षिणः दोषादिलक्षणप्रतिबन्धकाभावापेक्षायां ज्ञानग्राहकमात्रग्राह्यत्वाभावेन परतस्त्वमेव स्यादिति वाच्यम् । अप्रति-बद्धानुव्यावसायत्वावच्छेदेन सकलानुव्यवसायग्राह्यत्वरूपमेव स्वतस्त्वं न तु ग्राहकमात्रग्राह्यत्वमिति भावः ।

ननु साक्षिविषयत्वनैय्यत्यमित्यत्र नियमो अयुक्तः । इदं ज्ञानं प्रमाणं समर्थप्रवृत्तिजनकत्त्वादित्यनुमितिं प्रति प्रामाण्यस्य विषयत्वाङ्गीकारादिति शङ्कते ।। **अत्र यद्यपीति** ।। परिहरति ।। **तथापीति** ।। तथा च

१. "असमवहित" इति स्यात् ।

नियमपदेन प्रामाण्ये साक्षिज्ञानविषयत्वस्य [१]योगो व्यवच्छिद्यते इति भावः । अप्रतिबद्धज्ञानग्राहकसामग्रीग्राह्यत्वं स्वतस्त्वमित्येतन्**मणि**कृतोपि सम्मतमित्याह ।। **मणिकृतेति** ।। ज्ञानप्रामाण्यस्य तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यत्वं स्वतस्त्वमिति वदता **मणि**कृता अप्रामाण्योपस्थापकसामग्रीदशायां प्रामाण्यग्रहस्य अनङ्गीकारात् । अप्रतिबद्धज्ञानग्राहकसामग्रीग्राह्यत्वं तस्यापि सम्मतमिति भावः ।

तर्कताण्डवम्

यद्वा तत्तज्ज्ञानप्रामाण्यस्य ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकसाक्षिज्ञानविषयत्वयोग्यत्वं स्वतस्त्वं । योग्यत्वं च साक्षिनिष्ठां सहजां ग्रहणशक्तिं प्रति स्वविषयज्ञानद्वराऽवच्छेदकत्वं । एवं च प्रतिबन्धदशायामपि करतलादौ दाहयोग्यतावत् प्रामाण्ये ग्रहणयोग्यताऽस्त्येव । तथा च प्रामाण्यग्रहणशक्तेः सहजत्वात् प्रामाण्यग्रहणस्यौत्सर्गिकत्वरूपस्वतस्त्वसिद्धिः । उक्तं च टीकाकारैः ''साक्ष्येव ज्ञानं तत्प्रामाण्यं च विषयीकर्तुं क्षमः । किन्तु प्रतिबद्धो ज्ञानमात्रं गृहीत्वा तत्प्रामाण्यग्रहणस्य नेष्ट'' इति ।। २ ।।

युक्तिरत्नाकरः

उक्तप्रतिपत्तावनेकविशेषणप्रक्षेपेण गौरवं मन्वान आह यद्वेति । फलोपधानापेक्षयैकं पक्षमभिधायस्वरूपयोग्यतापेक्षया पक्षान्तरमाह– **यद्वेति** ।। घटज्ञानग्राहकसाक्षियोग्यत्वस्य प्रामाण्ये अभावात् बाधवारणाय– **ग्राह्येति** ।। न च तद्योग्यता तत्राप्यस्त्येवेति वाच्यम् । तदुभयग्राहकशक्त्योः परस्परं भिन्नत्वेन तच्छक्तौ प्रामाण्यविषयतावच्छेदकत्वरूपयोग्यताया अभावात् ।

१. ''अयोग'' इति स्यात् ।

प्रामाण्याश्रयेत्यनुक्तौ ग्राह्यपदस्य ज्ञानविशेषणत्वपर्यवसानेनाप्रामाण्याश्रय-ज्ञानग्राहकसाक्षिणि प्रामाण्यग्राहकत्वस्य कदाप्यभावेन तद्योग्यत्वाभावात् बाध इत्यत– **आश्रयेत्युक्तम्** । तत्तत्पदं तु वीप्साया सर्वप्रामाण्ये एवंप्रकारेण स्वतस्त्वनिर्वचनद्योतनार्थम् । एवं घटज्ञानप्रामाण्यं घटज्ञानग्राहकसाक्षि-विषयत्वयोग्यं पटज्ञानप्रामाण्यं पटज्ञानग्राहकसाक्षिविषयत्वयोग्यमित्य-ननुगतत्वरूपेणैव स्वतस्त्वं निर्वक्तव्यमित्युक्तं भवति । घटज्ञानत्वादि-रूपसामान्यप्रत्यासत्तिजातज्ञानस्य मय्यज्ञानमस्तीत्यादिशब्दज्ञानस्य च प्रामाण्यग्रहणयोग्यत्वाद्बाध इत्यतो– **साक्षीति** ।। पदार्थश्चोक्त एव । ग्राह्य-प्रामाण्याश्रयग्राहकेणापि प्रतिबन्धदशायां प्रामाण्याग्रहाद्बाध इत्यतो **योग्यत्वं** इति बोध्यम् ।

ननु स्वाश्रयग्राहकसाक्षिविषयत्वयोग्यत्वमात्रे[1] न स्वतस्त्वं अप्रामाण्यस्यापि स्वतस्त्वापत्तेः । तस्यापि बाधाद्यवतारकालीनस्वाश्रय-ग्राहकसाक्षिणा ग्राह्यत्वेन तद्योग्यताया अवश्यं वाच्यत्वादित्यत आह– **योग्यत्वं च इति ।। ग्रहणशक्तिः** विषयीकरणशक्तिः । स्वं विषयो यस्य तत् स्वविषयं ज्ञानं साक्ष्येव । साक्षिनिष्ठशक्तिं प्रति प्रामाण्यस्य न साक्षात् विषयत्वमित्यतः स्वविषयज्ञानद्वारेत्युक्तम् ।

एवञ्च यस्य यद्विषयत्वं यच्छक्तिप्रयोज्यं तत् तद्वारा तच्छोक्तेरपि विषयः, यथा करतलादेर्दाहविषयत्वं दाहशक्तिप्रयोज्यमिति करतलादिकमपि दाहद्वारा तच्छक्तिविषयः । तथा च प्रामाण्यस्य साक्षिद्वारा तन्निष्ठसहजशक्तिविषयत्वं, न तु तदप्रामाण्यस्य । तद्विषयीकरणशक्तेर्बाधावताराद्याधेयत्वेनासहजत्वादिति नाप्रामाण्यस्य स्वतस्त्वापत्तिरिति भावः । ननु न्यायमते साक्षिशब्दार्थ-स्यानुव्यवसायस्य प्रसिद्धावपि तन्निष्ठसहजशक्तेरप्रसिद्ध्या कथं तत्र विषयतयावच्छेदकत्वं तद्योग्यत्वमिति चेत् स्वमतानुसारेणैतदुक्तेः ।।

१. "मात्रं" इति स्यात् ।

कोटेरुभयसाधारण्यार्थं तु ग्राह्यप्रामाण्याश्रयविषयकानुव्यवसायत्वसमनियत-धर्मावच्छिन्नस्वविषयताकत्वं वा तादृशानुव्यवसायमात्रवृत्तिधर्मा-वच्छिन्नस्वविषयताकत्वं वा विवक्षितम् । तादृशधर्मो न्यायमते विशिष्टानु-व्यवसायत्वम् । अभेदेऽपि व्याप्यव्यापकभावसद्भावात् । सिद्धान्ते उक्तसाक्षितिष्ठसहजशक्तिरेव तस्याः साक्षिनिष्ठप्रामाण्यविषयकताया-मवच्छेदकत्वात् । अप्रामाण्यविषयकता तु नाप्रामाण्याश्रयविषयकानु-व्यवसायमात्रेणावच्छेद्या । तदभाववत्वाद्युपनयाभावेनोक्तानुव्यवसायेनापि तदग्रहात् ।

न चैवमपि सिद्धान्ते अप्रामाण्यविषयकतावच्छेदिकायाः शक्तेराधेयत्वेऽपि स्वाश्रयविषयकसाक्षिमात्रवृत्तित्वादुक्तदोषतादवस्थ्यम् । अप्रामाण्याश्रयं विषयीकुर्वतापि साक्षिणा अप्रामाण्यघटकतदभाववत्वाद्युपनयदशायाम-प्रामाण्यग्रहेण तस्या उपनयसहकृतसाक्षिनिष्ठत्वेन तस्यास्तन्मात्रवृत्तित्वा-भावात् । विशिष्टस्यातिरेकात् । न चैवं प्रामाण्यविरेध्युपस्थिति तत्सामग्री-समवधानदशायां स्वाश्रयग्राहकेणाप्यनुव्यवसायेन तदग्रहात्तन्मात्रवृत्तेः सहज-शक्त्यादेः प्रामाण्यविषयकतावच्छेदकत्वमपि नेति वाच्यम् । तथा सति [१]सहकार्यन्तरद्वारा अजनितघटे दण्डेऽपि [२]विद्यमानतया दण्डत्वस्यापि घटकारणतानवच्छेदकत्वापातात् । अत एव रजतभ्रमस्थले शुक्तिग्रहणकाले दोषवशात् शुक्तित्वाग्रहणेऽपि जातेर्व्यक्तिग्रहणयोग्यतान्तर्भूतयोग्यताकत्व-मित्युत्सर्गरूपनियमस्य न भङ्गः । तदिदमाह– **एवञ्च प्रतिबन्धक-दशायामित्यादि ।।**

ननु प्रमाण्यग्रहणशक्तेः सहजत्वे ज्ञाने ज्ञानत्वस्येव प्रामाण्यमपि नियमेन स्यात् । अत्राह– **एवञ्चेति । दाहयोग्यतावत्** दाहविषयत्वयोग्यतावत्

१. "सहकार्यन्तराभावाद्वा" इति स्यात् । २. "विद्यमानदण्डत्वस्यापि" इति स्यात् ।

"तेन तुल्यं क्रिया चेद्वतिः" इति वतिः । करतलादिदाहजननशक्तेर्वह्नौ सहजत्वेऽपि प्रतिबन्धकदशायां करतलादेर्दाह[1]विषयत्ववत् प्रामाण्यग्रहणशक्तेः साक्षिणः सहजत्वेऽपि प्रतिबन्धकदशायां प्रामाण्यस्य साक्ष्यविषयत्वं युक्तमेवेति भावः ।। **औत्सर्गिकत्वरूपेति** ।। यो यत्प्रामाण्याश्रयविषयकः साक्षी स बाधकाभावे प्रामाण्यविषय इत्यौत्सर्गिकत्वरूपेत्यर्थः । साक्षिनिष्ठशक्तेः सहजत्वे तथात्वेऽपि प्रतिबन्धकदशायां प्रामाण्यस्याग्रहणे टीकाकृत्सम्मतिमाह– **उक्तञ्चेति** ।। **प्रामाण्यग्रहणस्येति** ।। "अधीगर्थदयेषां कर्मणि" इति षष्ठी । तथा च प्रामाण्यविषयीकरणरूपफलं प्रति न समर्थ इत्यर्थः ।

न्यायदीपः

पूर्वं फलोपधानापेक्षया प्रयोजकविशेषणोक्त्या निरुक्तिः कृता अधुना तु तादृशविशेषणत्यागेन प्रकारान्तरमाह ।। **यद्वेति** ।। सार्वत्रिकसार्वकालीनप्रामाण्यस्वतस्त्वलाभाय वाऽऽह ।। **यद्वेति** ।। नन्वेवं स्वतस्त्वस्याप्रतिबद्धसाक्षिवेद्यत्वरूपत्वे "ज्ञानग्राहकः साक्षी प्रमाणतयैव गृह्णातीत्युत्सर्ग एव विसंवादलक्षणात्परतोऽपवादादप्रामाण्यं च गृह्णाति" इति तत्वनिर्णयटीकाद्युक्तौत्सर्गिकत्वविरोध इत्यतस्तदनुरोधेन वा पक्षान्तरमाह ।। **यद्वेति** ।। अत्र योग्यत्वमित्युक्त्या यथोक्तविशेषणेनापि साक्षिज्ञानेन प्रतिबन्धदशायां प्रामाण्याग्रहाद्बाध इति शङ्का, साक्षीत्युक्त्या घटज्ञानमस्तीत्यादिशब्दजन्यं घटज्ञानविषयकज्ञानं प्रति तथा ज्ञानांशालौकिकं सामान्यप्रत्यासत्तिजन्यं ज्ञानं च प्रति प्रामाण्यस्य कदाप्यविषयतया योग्यत्वं नेति बाध इति शङ्का, ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकेत्युक्त्या घटज्ञानं गृह्णता साक्षिणा पटज्ञानप्रामाण्यस्य कदाप्यग्रहेण योग्यत्वं नेति बाध इति शङ्का च निरस्तेति

१. "अविषयत्व" इति स्यात् ।

पूर्ववद्युक्तमिति भावः । अत्रापि ज्ञानपदं पूर्ववत्स्वरूपेन्द्रियभ्रमनिरासाय । साक्षित्वमपि व्यवसायप्रकारप्रकारकतया तत्प्रकारवद्विशेष्यकतया तद्विषयकप्रत्यक्षत्वरूपं वा ज्ञानांशे लौकिकप्रत्यक्षत्वरूपं वाऽनुव्यवसायत्वमेवेति भावः । अत्रापि पूर्वत्रेव ग्राह्यप्रामाण्याश्रयेत्यंशकृत्यं बोध्यम् ।

नन्वत्र स्वाश्रयज्ञानग्राहकग्राह्यत्वयोग्यत्वं स्वतस्त्वमित्युक्तं स्यात्, तच्चाप्रामाण्यस्याप्यस्ति । नच तत्र ज्ञानं साक्षिवेद्यमप्रामाण्यं त्वनुमेयमिति न दोष इति युक्तम् । प्रथमप्रामाण्यानुमित्यसम्भववादे विसंवादाहितशक्तिकेन साक्षिणैवाप्रमाण्यग्रहणस्य वक्ष्यमाणत्वादित्यतो वा, साक्षिविषयत्वयोग्यत्वं यदि साक्षिजन्यव्यवहारयोगित्वादिरूपं तदैतत्फलोपधानपर्यवसन्नमिति न प्रतिबन्धकालीनप्रामाण्यस्वतस्त्वलाभ इत्यतो वाऽऽह ।। **योग्यत्वं चेति** ।। **सहजामिति** ।। स्वाभाविकीं विषयीकरणशक्तिं प्रति स्वस्य साक्षिणस्तच्छक्तेर्वा यो विषयो ग्राह्यप्रामाण्याश्रयरूपं ज्ञानं तद्वाराऽवच्छेदकत्वं विषयतया व्यावर्तकत्वम् । ज्ञानग्रहणशक्तिरितिवत् प्रामाण्यग्रहणशक्तिरिति व्यवहारापादकत्वमेव प्रामाण्यस्य साक्षिविषयत्वयोग्यत्वमित्यर्थः । साक्षिशक्तिर्ज्ञानद्वारैव तन्निष्ठप्रामाण्यं गृह्णाति । न साक्षात् । यथा प्रत्यक्षं व्यक्तिद्वारैव जातिं न साक्षादिति स्वविषयज्ञानद्वारेत्युक्तम् । ज्ञानग्राहकैकशक्तिविषयत्वं प्रामाण्यस्य साक्षिविषयत्वयोग्यत्वम् । नैतदप्रामाण्येऽस्ति । भिन्नशक्तिविषयत्वादित्यग्रे व्यक्तम् ।

गुरुपादास्तु ''स्वपदेन प्रामाण्यम् । बहुव्रीहिसमासः । स्वविषयकं यज्ज्ञानं साक्ष्येव । साक्षिनिष्ठशक्तिं प्रति प्रामाण्यस्य न साक्षाद्विषयत्वमित्यतः स्वविषयज्ञानद्वारेत्युक्तम्'' इत्याहुः । परमते शक्तेरप्रसिद्धावपीदं स्वमतासाधारणमिति वा परेणापि शक्तिमङ्गीकारयिष्यामीति वा ज्ञान[1]ग्रहणसामग्रीमात्रं

१. 'ग्राहक' इति पाठान्तरम् ।

प्रति स्वविषयज्ञानद्वारावच्छेदकत्वमिति वा ज्ञानग्राहकतावच्छेदकधर्मावच्छिन्नग्राहकताकत्वं वा तदर्थ इति भावः ।

नन्वेतावतापि कथं प्रतिबन्धदशापन्नज्ञानप्रामाण्यस्य स्वतस्त्वलाभः येन सर्वप्रामाण्यानां स्वतस्त्वं स्यादित्यत आह ।। **एवं चेति** ।। योग्यतारूपे स्वतस्त्वे सतीत्यर्थः । योग्यत्वस्योक्तरूपत्वे सतीति वार्थः ।। **दाहेति** ।। दाहविषयत्वयोग्यतावदित्यर्थः । द्वितीयनिरुक्त्या अन्यदप्यनुकूलितमित्याह– **तथाचेति** । उक्तरूपयोग्यत्वगर्भनिरुक्तौ सत्यामित्यर्थः ।। **औत्सर्गिकत्वेति** ।। ''ज्ञानग्राहकः साक्षी प्रमाणतयैव गृह्णातीत्युत्सर्ग एव'' इति तत्वनिर्णयटीकाद्युक्तौत्सर्गिकत्वेत्यर्थः ।। **उक्तं चेति** ।। प्रामाण्यस्य सहजशक्तिविषयत्वं प्रतिबन्धस्थले योग्यतास्तीत्येतच्चोक्तं तत्वनिर्णयटीकायामित्यर्थः । कारणान्तरोपनिपातेन मानसापराधेन प्रतिबद्ध इत्येवंरूपेण तत्र पाठेऽप्ययमेकदेशानुवाद इत्यदोषः ।। २ ।।

श्रीलक्ष्मीनाथतीर्थटीका

ननु साक्षिज्ञानं प्रति विषयत्वमेवेति नियमोऽप्ययुक्तः । प्रतिबद्धसाक्षिज्ञानं प्रति प्रामाण्यस्य विषयत्वाभावात् । न च अप्रतिबद्धसाक्षिज्ञानं प्रति विषयत्वमेवेति नियम इति वाच्यम् । यत्प्रामाण्यविरोध्युपस्थापकसामग्रीसमवधानदशायां साक्षी ज्ञानमात्रं गृहीत्वा प्रामाण्यं न गृण्हातीत्यविवादं तत्र प्रामाण्यविरोध्युपस्थापकसामग्र्योचितकालानुवृत्तौ सत्यां कदाचित् कारणोपनिपातेन प्रामाण्यविरोध्युपस्थापकसामग्रीनिरासे कामिनीजिज्ञासादिप्रबलव्यासङ्गेन प्रामाण्यं यत्र न गृह्यते तत्र तज्ज्ञाननिष्ठप्रामाण्यमादाय बाधः स्यात् । तदानीं साक्षिणः प्रामाण्यविरोध्युपस्थापकसमवधानस्यापि सत्त्वात् । कमिनीजिज्ञासादिव्यासङ्गस्य प्रामाण्यविरोध्युपस्थापकसामग्रीत्वाभावात् ।

तथात्वे कामिनीजिज्ञासादिदशायामप्रामाण्यं गृह्येत् । तदानीं प्रामाण्यमपि न गृह्यते अप्रामाण्यं च न गृह्यते इत्यविवादम् । तथा च तज्ज्ञाननिष्ठ-प्रामाण्यस्योक्तसाक्षिविषयत्वाभावेन प्रामाण्ये साक्ष्यविषयत्वव्यवच्छेद-रूपनैय्यत्यं नास्त्येवेतीत्यस्वरसात्पक्षान्तरमाह ।। **यद्वेति** ।। दोषशङ्कादि-रूपप्रामाण्यविरोध्युपस्थापकसामग्रीसमवधानदशायामपि प्रामाण्यस्य साक्षिज्ञानविषयत्वयोग्यत्वमस्तीत्युपपादयितुं योग्यत्वं निर्वक्ति ।। **योग्यत्वं चेति** ।। साक्षिज्ञाने प्रामाण्यमस्ति सा सहजा न त्वागन्तुकी । तादृशशक्तिं प्रति प्रामाण्यस्य स्वज्ञानद्वाराप्यवच्छेदकत्वं योग्यत्वमित्यर्थः ।। **प्रतिबन्धेति** ।। दोषशङ्काविलक्षणप्रतिबन्धदशायामित्यर्थः । दृष्टान्तमाह ।। **करतलादाविति** ।। मणिमन्त्रादिलक्षणप्रतिबन्धदशायां करतलादौ स्थितस्य वन्हेः दाहकत्वयोग्यता अस्त्येव यथा तथा दोषशङ्कादिलक्षण-प्रतिबन्धदशायां प्रामाण्यस्य साक्षिणा अग्रहेपि साक्षिज्ञानविषयत्वयोग्यता अस्त्येवेति भावः । नन्वेतावतापि प्रतिबन्धदशायां साक्षिणा प्रामाण्यग्रहणा-भावात्प्रामाण्यग्रहणरूपफलोपहितत्वगर्भस्वतस्त्वं न प्राप्तमेवेत्यत आह ।। **तथा चेति** ।। तथा च योग्यतागर्भं स्वतस्त्वमुक्तरीत्या सार्वत्रिकत्वा-दनौत्सर्गिकमेव । फलोपहितत्त्वगर्भन्तु औत्सर्गिकम् । तदिदमाह ।। **प्रामाण्यग्रहणस्येति** ।। शक्तेः सहजत्वे फलोपधानगर्भप्रामाण्य-स्यौत्सर्गिकत्वे च टीकाकारसम्मतिमाह ।। **उक्तश्चेति** ।। **तत्प्रामाण्य-श्चेति** ।। तज्ज्ञानप्रामाण्यश्चेत्यर्थः ।। **विषयीकर्तुं क्षम इति** ।। अप्रतिबद्ध-दशायां विषयीकरोत्येवेति भावः ।। **किन्त्विति** ।। दोषलक्षणप्रतिबन्ध-दशायां प्रामाण्यस्य ग्रहणाय न क्षम इत्यर्थः । विषयीकर्तुं क्षम इत्यंशेन शक्तेः सहजत्वमुपपादितं किंत्वित्यादिना फलोपधानगर्भस्य स्वतस्त्वस्यौ-त्सर्गिकत्वमिति विवेको द्रष्टव्यः ।

तर्कताण्डवम्

यद्वा उभयसिद्धप्रामाण्याविषयकज्ञानभिन्नज्ञानविषयत्वनैयत्यं स्वतस्त्वं । तत्र प्रामाण्याविषयकज्ञानभिन्नेत्युक्त्या घटोऽयमित्यादि-घटादिविषयकप्रत्यक्षज्ञानं प्रति, ज्ञानं गुण इत्यादिशब्देन घटज्ञान-मित्यादिशब्देन च जन्यं ज्ञानविषयकज्ञानं प्रति, 'प्रतिबद्धानुव्यवसायं प्रति च, स्वतस्त्वपक्षेपि प्रामाण्यस्य अविषयत्वाद्विषयत्वनैयत्यसाधने बाध इति शङ्का निरस्ता । उक्तस्य त्रिविधस्यापि ज्ञानस्य प्रामाण्या-विषयकत्वेन तद्भिन्नत्वाभावात् ।

युक्तिरत्नाकरः

साक्षिगर्भतया स्वमतासाधारणं स्वतस्त्वं द्वेधा निरुच्यतदगर्भतया स्वतस्त्ववादिमात्रसाधारणं तन्निर्वक्ति– **यद्वेति** ।। प्रामाण्यपदं तत्त-त्प्रामाण्यपरम् । तदविषयकेति च भावप्रधाननिर्देशनेनोभयवादिसिद्धं प्रामाण्यविषयकत्वं यस्मिन्ज्ञाने तद्भिन्नज्ञानविषयत्वनैय्यत्यम् । तच्च प्रागेतादृशज्ञाने प्रामाण्यविषयकत्वनैय्यत्यं द्रष्टव्यम् ।

ननूभयवादिपदं न सकलस्वतस्त्वपरतस्त्ववादिपरं परतस्त्ववाद्यभिधान-वैय्यर्थ्यात् । न हि स्वतस्त्ववादिभिः प्रामाण्यविषयकत्वेनाभ्युपगतं न्यायमते प्रामाण्यविषयकं येन तत्सार्थकं स्यात् । नाहि सकलस्वतस्त्ववादिमात्रपरं उभयपदास्वारस्यात् । मिश्रमते प्रामाण्यविषयकस्यापि व्यवसायस्य स्वप्रकाशतयैव प्रामाण्यविषयकत्वे सकलस्वतस्त्ववादिसम्मतप्रामाण्यविषयक-ज्ञानभिन्नतया तेन मिश्रादिमते प्रामाण्यग्रहेण बाधाच्च । नापि तत्तद्वादिपरं तेन मिश्रमतसिद्धप्रामाण्यविषयकज्ञानभिन्नज्ञानविषयत्वं गुरुमतसिद्ध-प्रामाण्यविषयकज्ञानभिन्नज्ञानविषयत्वमित्याद्येव स्वतस्त्वमित्यर्थः पर्यवस्यतीति वाच्यम् । एवं सति विप्रतिपत्तेः शब्दत एव साधारण्यं नार्थत

इति स्यात् । किञ्च गुरुमतसिद्धप्रामाण्यविषयकभिन्नेनापि व्यवसायेन मिश्रमते प्रामाण्यग्रहेण यावत्तद्ग्राह्यत्वाभावाद्बाधतादवस्थ्यम् । न च मिश्रमत-सिद्धप्रामाण्याविषयकभिन्नयावज्ज्ञानेन तन्मते प्रामाण्यं गृह्यत इत्येव साध्यं विवक्षितमिति वाच्यम् । एवं हि तन्मते सिद्धप्रामाण्यविषयकभिन्नयावज्ज्ञानेन तन्मते प्रामाण्यं गृह्यत इत्यस्यार्थस्य न्यायमतेऽपि सिद्धत्वेन सिद्धसाधनता-पत्तिरिति चेत् ।

मैवम् । गुरुमतसिद्धप्रामाण्य[1]विषयकज्ञानभिन्नज्ञानविषयत्वनैय्यत्यं गुरुमते स्वतस्त्वम् । एवं गुरुपदस्थाने मिश्रादिपददाने तदेव तत्तन्मते स्वतस्त्वम् । न चाननुगमो दोषः । तेन तेन वादिना नैयायिकं प्रति स्वतस्त्वसाधनेन तन्मतासाधारण्यस्य गुणत्वात् । न चैवं तृतीयं तु मीमांसकादिसाधारण-मित्युत्तरग्रन्थविरोधः । एकवादिवाचकप्रदस्थाने वाद्यन्तरवाचकपदो-पादानमात्रेणैव सर्ववादिभिः स्वतस्त्वं साधयितुं शक्यमित्यभिप्रायेण तदभिधानात् । न च नञ्द्वयादरणवैय्यर्थ्यम् । गुरुमतसिद्धप्रामाण्य-विषयकज्ञानविषयत्वनैय्यत्यस्यैव तन्मते स्वतस्त्वरूपत्वसम्भवादिति वाच्यम् । एवं निरुक्तौ तद्वैय्यर्थ्येऽपि उभयवादिसिद्धेति यथाश्रुताभिप्रायेण तत्सार्थकत्वात् । अन्यथा गुरुतार्किकसम्मतप्रामाण्यविषयकज्ञानविषयत्व-नैय्यत्यमित्येतावन्मात्रकरणे न्यायमतसिद्धप्रामाण्यानुमित्यादिग्राह्यत्वेन सिद्धसाधनतापत्तेः ।

वस्तुतस्तु उभयवादिसिद्धेत्येव साधु । तदर्थस्तु गुरुतार्किकमत-प्रामाण्य[2]विषयकज्ञानभिन्नज्ञानविषयत्वनैय्यत्यं गुरुमते स्वतस्त्वं, मिश्रतार्किकमतप्रामाण्य[3]विषयकज्ञानभिन्नज्ञानविषयत्व नैय्यत्यं मिश्रमते स्वतस्त्वं, एवं मतान्तरेऽपीति । न चैवमुक्तदिशा सर्वत्र तार्किकपद-वैय्यर्थ्यम् । प्रामाण्यविषयकत्वरूपविशेषकतया खण्डाभावसम्पादकत्वे वा

१-३. "अविषयक" इति स्यात् ।

तदनवकाशात् । नञ्द्वयादरणं तु सिद्धसाधनवारणायैव । यद्यप्यत्र ज्ञानपद-द्वयानुपादानेऽपि न दोषः । तथापि प्रथमे ज्ञानपदस्याखण्डाभावसम्पादकत्वे-नान्योन्याभावाश्रयविकासकतया वा अवैय्यर्थ्यम् । द्वितीयज्ञानपदं तादृशघटाद्यविषयतावधारणाय विशिष्टविशेषणकृत्यं स्फुटमाकरे एवेति ।

न्यायदीपः

प्रौढ्या स्वतस्त्ववादिमात्रसाधारणं पक्षान्तरमाह ।। **यद्वेति** ।। तत्तज्ज्ञानप्रामाण्यस्य इत्यनुषङ्गः । साध्ये ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञान-विषयकेति ग्राह्यम् । स्वतस्त्ववादिनो ह्यनेके । ग्रन्थकर्तैकः । भट्टो गुरुर्मुरारिमिश्र इति च त्रयः । मायावाद्यादयो वेदान्तिनश्च । तत्र भट्टो ज्ञानातीन्द्रियत्ववादी । गुरुर्ज्ञानमात्रस्वप्रकाशत्ववादी । मिश्रस्तु न्यायमत इवास्वप्रकाशानुव्यवसायवादी । तत्रोभयेत्यस्य सिद्धान्तितार्किकोभयेति भट्टतार्किकोभयेति गुरुतार्किकरूपोभयेति मिश्रतार्किकोभयेति मायितार्किको-भयेत्येवंरूपेणत्यर्थः । एकदाऽनेकैः सह विवादायोगात् । उभयसिद्धं यत्प्रामाण्याविषयकं ज्ञानं, प्रामाण्याविषयकत्वेन उभयसम्मतं यज्ज्ञानं, अयं घट इत्यादिरूपं ज्ञानं, तद्भिन्नं ग्राह्येत्यादिरूपं च यज्ज्ञानं, सिद्धान्ते प्रागुक्तरूपसाक्षिज्ञानं, भट्टमते ज्ञानानुमितिरूपं, गुरुमते स्वप्रकाशघटादिज्ञानं, मिश्रमते तदनुव्यवसायः । तेन गृह्यत एवेत्येवंरूपं तद्विषयत्वनैयत्यं तत्तन्मते स्वतस्त्वमित्यर्थः ।

न च गुरुमते सर्वज्ञानयाथार्थ्यस्वप्रकाशत्वयोरुपगमेन प्रामाण्याविषयकं ज्ञानं नास्त्येवेति शङ्क्यम् । इदं ज्ञानमप्रमाणमित्याद्यप्रामाण्यारोपस्थले ज्ञानस्य प्रामाण्याविषयकत्वस्य गुरुतार्किकसम्मतेः । आरोपस्तु गुरुमते इच्छास्थस्य व्यधिकरणप्रकारकत्वरूपाप्रामाण्यस्यासंसर्गाग्रहो न्यायमते विशिष्टज्ञानमित्यन्यदेतत् । अत्र ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकेत्युक्त्या

तदंश एवोक्तरूपज्ञानभिन्नत्वस्याभिमतत्वाज्ज्ञानविषयकं ज्ञानं प्रमेति ज्ञानस्याद्यज्ञाने प्रामाण्याविषयकत्वेऽपि ग्राह्यप्रामाण्याश्रयज्ञाने प्रामाण्याविषयकभिन्नत्वसत्त्वान्न दोषः । प्रामाण्यपदं ग्राह्यतत्तत्प्रामाण्यपरं वा । तथाच यथान्यासेनैवोक्तस्थले न दोषः । अत्र नञ्द्वयाप्रवेशेन उभयसिद्धप्रामाण्यविषयकज्ञानविषयत्वनैयत्यमित्युक्ते तादृशानुमित्यादिना सिद्धसाधनम् । अतोऽविषयकभिन्नेत्युक्तिः ।

अत्राद्यज्ञानपदं यथोक्तरूपघटादिभिन्नेन घटज्ञानादिना प्रामाण्याग्रहाद् बाध इति शङ्कानिरासाय । अन्त्यं तु तादृशज्ञानभिन्नघटादिविषयत्वाभावेन बाध इति शङ्कानिरासायेति व्यक्तमिति शिष्टपदकृत्यान्याह ।। **तत्रेति** ।। प्रामाण्याविषयकज्ञानभिन्नेत्यनुक्त्वा उभयसिद्धज्ञानविषयत्वनैयत्यमित्येतावत्युक्ते सति प्रष्टव्यम्, उभयसिद्धज्ञानपदेन किं प्रत्यक्षज्ञानमभिमतं उत शाब्दं अथानुव्यवसायरूपम् । द्वितीयेऽपि किं [1]ज्ञानविषयकं, विषयालिङ्गितज्ञानविषयकं वेति विकल्पान् वा, विषयग्राहिज्ञानमिति वा ज्ञानग्राहिज्ञानमिति वा उभयग्राहिज्ञानमिति वा उभयग्राह्यनुव्यवसायरूपप्रत्यक्षं वेति विकल्पान्वा हृदि निधाय क्रमेण निराह ।। **घटोयमित्यादिना** ।। प्रत्यक्षज्ञानं प्रतीत्यादेः प्रामाण्यस्याविषयत्वादित्यन्वयः । गुरुमते घटोयमिति ज्ञानेनापि प्रामाण्यग्रहादिदं ज्ञानमप्रमाणमित्यादिज्ञानं प्रतीति ग्राह्यम् ।

शङ्कानिरासं व्यनक्ति ।। **उक्तस्य त्रिविधस्यापीति** ।। यत्तु घटज्ञानमिति शब्दजन्यज्ञानेन घटत्ववति घटत्वप्रकारकत्वरूपं प्रामाण्यं गृह्यत इति, तत्त्वपदार्थत्वादवाक्यार्थत्वादयुक्तम् । प्रतिबद्धानुव्यवसायं प्रतीत्यत्र गुरुमते इदं ज्ञानमप्रमाणमित्यादिप्रतिबद्धज्ञानं प्रतीति भट्टमते प्रतिबद्धज्ञानानुमितिं प्रतीत्यपि ध्येयम् ।

---

१. **विषयानालिङ्गितज्ञानविषयकम् इति यावत् ।**

श्रीलक्ष्मीनाथतीर्थटीका

ननु प्रामाण्याश्रयज्ञानविषयकज्ञानविषयत्वयोग्यत्वं प्रामाण्यस्य न्यायमतेऽप्यस्त्येव । प्रतिबद्धदशायां त्वयापि प्रामाण्यग्रहणानङ्गीकारात् । अप्रतिबद्धदशायां पञ्चमानुव्यवसायेन प्रामाण्यग्रहस्य नैय्यायिकेनाप्यङ्गीकारात् । प्रथामानुव्यवसायादेः प्रामाण्यग्रहणे प्रतिबद्धत्वाङ्गीकाराच्चेत्यतः पक्षान्तरमाह ।। **यद्वेति** ।। स्वतस्त्वपरतस्त्वोभयवादिसिद्धं प्रामाण्यविषयकं घटज्ञानमित्यादिशब्दजन्यं यज्ज्ञानं साक्ष्यादिरूपं तद्विषयत्वनैय्यत्यं स्वतस्त्वमित्यर्थः । प्रामाण्याविषयकज्ञानभिन्नेत्यस्य प्रयोजनमाह ।। **तन्नेति** ।। प्रामाण्येषु घटोयमिति घटविषयकप्रत्यक्षरूपव्यवसायविषयत्वस्याभावात् बाधशङ्का स्यादित्यर्थः । ननु ज्ञानविषयकज्ञानविषयत्वमतो नोक्त दोषः इत्यत आह ।। **ज्ञानं गुण इत्यादीति** ।। तथा च ज्ञानं गुण इति शब्दजन्यज्ञानस्य ज्ञानविषयकत्वात् तेन प्रामाण्याग्रहणात् बाधशङ्का स्यादिति भावः । ननु विषयघटितत्त्वेन ज्ञानविषयकं यज्ज्ञानं तद्विषयत्वं विवक्षितमतो नोक्तदोष इत्यत आह ।। **घटज्ञानमित्यादीति** ।। घटज्ञानमित्यादिशब्दजन्यज्ञानस्य विषयघटितज्ञानविषयत्त्वात् तेन प्रामाण्याग्रहणात् बाधशङ्का स्यादिति भावः । नन्वनुव्यवसायविषयत्वं विवक्षितमतो नोक्तदोष इत्यत आह ।। **प्रतिबद्धेति** ।। निरसनप्रकारं विशदयति ।। **उक्तस्येति** ।। **त्रिविधस्यापीति** ।। यद्यपि चातुर्विध्यमुक्तं न तु त्रैविध्यम् । तथापि ज्ञानं गुणः घटज्ञानमिति शब्दजन्यज्ञानयोः शाब्दज्ञानत्वेनैक्यात्त्रिविधस्येत्युक्तम् ।

तर्कताण्डवम्

उभयसिद्धेत्युक्त्या न्यायमतेऽप्रतिबद्धस्याप्यनुव्यवसायस्य प्रामाण्याविषयकत्वेन तद्भिन्नत्वाभावादिति सिद्धान्त्यभिप्रेतस्य

अप्रतिबद्धानुव्यवसायं प्रति विषयत्वस्यासिद्ध्याऽर्थान्तरमिति शङ्का परास्ता । अप्रतिबद्धानुव्यवसायस्य न्यायमते प्रामाण्याविषयकत्वेऽपि मन्मते तदभावेनोभयसिद्धात् प्रामाण्याविषयकाद्भिन्नत्वसम्भवात् । नैयत्यमित्युक्त्या न्यायमते प्रामाण्यस्यैवंविधां प्रामाण्यानुमितिं प्रति क्वचिदनुव्यवसायं प्रति च विषयत्वात् सिद्धसाधनमिति शङ्का व्युदस्ता ।

युक्तिरत्नाकरः

अप्रतिबद्धस्य प्रामाण्यविरोध्युपस्थितितत्सामग्र्यसमवहितस्य ।। **प्रामाण्यानुमितिं प्रतीति** ।। इदं ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वादित्यनुमितिं गन्धवतीत्वोपनयानन्तरमित्यादि वक्ष्यमाणानुव्यवसायविशेषं च प्रतीत्यर्थः ।

न्यायदीपः

उभयसिद्धेत्युक्त्येति ।। प्रामाण्याविषयकेत्यादावुक्ते सत्यन्यतरसिद्धं प्रामाण्याविषयकं यदप्रतिबद्धानुव्यवसायरूपं ज्ञानं तद्विषयत्वमादाय प्रामाण्यस्य स्वतस्त्वं सिद्धान्ते न सिध्येत् । तस्य प्रामाण्याविषयकभिन्नत्वाभावात् । उभयसिद्धेत्युक्तौ अप्रतिबद्धानुव्यवसायस्य प्रामाण्याविषयकत्वेनोभयसिद्धत्वाभावादुभयसिद्धतादृशज्ञानभिन्नत्वमस्त्येवेति नार्थान्तरत्वदोष इत्यर्थः । अनुव्यवसायस्येत्युपलक्षणम् । अप्रतिबद्धज्ञानानुमितेः अप्रतिबद्धस्वप्रकाशज्ञानस्येत्यपि ध्येयम् । एवमग्रेऽपि । अप्रतिबद्धत्वं च प्रामाण्यविरोध्युपस्थितितत्सामग्र्यसमवहितत्वम् ।

शङ्कानिरासप्रकारं व्यनक्ति ।। **अप्रतिबद्धेति** ।। उभयसिद्धादित्यादेः प्रामाण्याविषयकत्वेन उभयसिद्धाद्भिन्नत्वसम्भवादित्यर्थः ।। **एवंविधामिति** ।।

उभयसिद्धप्रामाण्याविषयकज्ञानभिन्नज्ञानरूपां इदं ज्ञानं प्रमाणं समर्थ-प्रवृत्तिहेतुत्वादित्यनुमितिं प्रति, वक्ष्यमाणदिशा स्मृत्युपनीते व्यवसाये स्मृत्युपनीतप्रामाण्यावगाह्यनुव्यवसायं गृहीतप्रामाण्यकज्ञानसजातीय-ज्ञानगोचरानुव्यवसायं च प्रति ।

श्रीलक्ष्मीनाथतीर्थटीका

उभयसिद्धेति विशेषणस्य प्रयोजनमाह ।। **उभयसिद्धेति** ।। तथा च सिद्धान्ते प्रामाण्यग्राहकत्वेन सम्मतस्य अप्रतिबद्धस्य अनुव्यवसायस्य न्यायमते प्रामाण्याविषयकत्वेन तद्भिन्नत्वाभावात्तादृशानुव्यवसायग्राह्यत्वेपि अभीप्सितस्वतस्त्वासिद्ध्या अर्थान्तरता स्यादिति भावः । निरासप्रकारं दर्शयति ।। **अप्रतिबद्धेति** ।। तथा च प्रतिबद्धानुव्यवसायस्य प्रामाण्या-विषयकत्वं नोभयवादिसिद्धमिति भावः । प्रामाण्यस्य ज्ञानं प्रमाणं समर्थप्रवृत्तिजनकत्त्वादित्यनुमितिग्राह्यत्वेप्युक्तविधस्वतस्त्वसिद्ध्या सिद्धसाधनं पञ्चमानुव्यवयसायग्राह्यत्वेनापि सिद्धसाधनं स्यात् तद्व्युदासय नैय्यत्यमिति विशेषणमित्याह ।। **नैय्यत्यमित्युक्त्येति** ।। **एवंविधामिति** ।। उभयसिद्धप्रामाण्याविषयकज्ञानभिन्नज्ञानरूपामित्यर्थः । उक्तविधानुमितेः प्रामाण्यग्राहकत्वेनोभयसम्मतत्त्वादिति भावः ।। **व्युदस्तेति** ।। अयं भावः । घटं घटत्वेन जानामीत्यनुव्यवसायस्योभयसिद्धप्रामाण्याविषयकज्ञानभिन्न-ज्ञानत्वेन तद्ग्राह्यत्वस्य न्यायमते असिद्ध्या न सिद्धसाधनमिति ।

तर्कताण्डवम्

अत्राद्यं पक्षद्वयं स्वमतासाधारणम् । तृतीयं तु मीमांसकादि-मतसाधारणमिति ज्ञेयम् । एतदेव पक्षत्रयं अभिप्रेत्योक्तं सुधायां 'ज्ञानगतयाथार्थ्यस्य ज्ञानग्राहकमात्रग्राह्यत्वं स्वतस्त्वं' इति ।

अत्राद्ये पक्षे सुधास्थेन ज्ञानग्राहकशब्देन ग्राह्यप्रामाण्याश्रय-तत्तज्ज्ञानविषयकसाक्षिज्ञानं ग्राह्यशब्देन तद्विषयत्वं मात्रपदेन कात्स्न्र्यपरेण तन्नियमः अवधारणपरेण प्रतिबद्धव्यवच्छेदश्च विवक्षितः ।

द्वितीयपक्षे ग्राह्यशब्देनोक्तसाक्षिज्ञानविषयत्वयोग्यता अवधारण-परेण मात्रपदेन ज्ञानत्वग्रहणशक्तिवत् प्रमात्वग्रहणशक्तेरपि सहजत्वं विवक्षितम् ।

तृतीयपक्षे ज्ञानग्राहकशब्देन साक्षितदितरसाधारणं ज्ञानं मात्रशब्दे-नावधारणपरेणोभयसिद्धप्रामाण्याविषयकज्ञानव्यवच्छेदः, कात्स्न्र्या-र्थेनाप्रतिबद्धसर्वानुव्यवसायसङ्ग्रहश्च विवक्षित इति ज्ञेयम् ।। ३ ।।

युक्तिरत्नाकरः

अत्राद्यमिति ।। आद्यपक्षद्वयस्य साक्षिघटिततया तस्य च मीमांसकै-रनभ्युपगततया स्वमतासाधारणम् । न च मिश्रमते साक्षिशब्दितानु-व्यवसायसद्भावात् साधारण्यमिति वाच्यम् । अलौकिकप्रत्यासत्यजन्यत्व-रूपलौकिकत्वघटितसाक्षिणस्तन्मते अलौकिकप्रत्यासत्यप्रसिद्ध्या अप्रसिद्धेरिति भावः ।। **तृतीयं त्विति ।।** स्वतस्त्वनिर्वचनमित्यर्थः । तेन नपुंसकोपपत्तिः ।

ननु ज्ञानग्राहकमात्रेत्यादिसुधावाक्येन प्रामाण्यविरोध्युपस्थापकेत्यादेः कथमप्यप्रतीतेः कथं तल्लाभ इत्यतस्तत्प्रकारं दर्शयति– **अत्राद्य इति ।। ज्ञानग्राहकशब्देनेति ।।** व्यतिवचनानां सन्निहितवाचित्वस्य व्रीहीन-वहन्तीत्यादौ सिद्धतयेहापि ज्ञानपदस्य प्राक् सन्निहितप्रामाण्याश्रय-ज्ञानपरत्वम् । सन्निधिज्ञापनार्थमेव ज्ञानगतयाथार्थस्येति सुधास्थपक्षनिर्देशकं वाक्यमुपात्तम् । अन्यथा ज्ञानग्राहकमात्रग्राह्यत्वं स्वतस्त्वमित्येतावतैव उक्तपक्षत्रयलाभे तदुपादानवैय्यर्थ्यापत्तेरिति भावः । ज्ञानग्राहकसर्वस्यापि

प्रामाण्यग्राहकत्ववर्णने घटज्ञानमित्यादिशाब्दज्ञानादीनां प्रामाण्यविषयकत्वेन बाधापत्या ग्राहकपदस्य तद्बोधकस्य प्रत्यक्षपरत्वे ग्राह्यप्रामाण्याश्रय-तत्तज्ज्ञानविषयकसाक्षिज्ञानं लभ्यत इति भावः ।

ग्राह्यशब्देनेति ।। ज्ञानग्राहकेनेति ग्राहकशब्देनैव ज्ञानलाभे प्रकृत्यर्थस्य पुनरभिधानवैय्यर्थ्यात् ण्यत्प्रत्ययार्थविषयत्वमात्रपरो ग्राह्यशब्द इति भावः । **कात्स्न्र्यपरेणेति** ।। सर्वेण ज्ञानग्राहकेण प्रामाण्यं गृह्यत इत्युक्ते ज्ञानग्राहके प्रामाण्यविषयकत्वनियमो लभ्यत इति भावः ।। **अवधारणपरेणेति** ।। ज्ञानग्राहकमात्रेत्यवधारणपरस्य मात्रपदस्य विशेष्यमात्रान्वयित्वे ज्ञानस्य ग्राहकमेव, यत्सत्त्वग्राहकं तद्ग्राह्यत्वं प्रामाण्यस्य स्वतस्त्वमित्यर्थः स्यात् । तस्य च नैय्यायिकेनाप्यभ्युपगमात् विवक्षावैकल्यं स्यादिति विशेषणा-न्वयित्वमात्रमावश्यकम् । एवञ्च ज्ञानस्यैव ग्राहकत्वं नान्यस्येति लाभे ज्ञानत्वादेरपि ग्राहकतया बाधापत्तेस्तात्पर्यवशात् ग्राह्यप्रामाण्यविरोधिन एव व्यवच्छेद इति भावः ।

ननु ''सकृत्प्रयुक्तशब्दस्य लभ्यते ह्युभयार्थता'' इति न्यायेन कथने कस्मिन्प्रयोगे मात्रशब्दस्य ह्युभयार्थकत्वम् । दर्शितात्कटदानामित्यादौ तात्पर्यवशादनेकार्थकत्वस्यापि सर्वानुभवसिद्धतयोक्तनियमासिद्धेः । परैरपि नानार्थकातिरिक्त एव तथाभ्युपगमाच्चेति ।

उक्तेति ।। अर्हार्थविहितप्रत्यये योग्यतावाचित्वस्य सुप्रसिद्धेरिति भावः ।। **अवधारणेति** ।। ज्ञानग्राहकपदेनोक्ताया ज्ञानविषयीकरणसामान्यसामग्र्या मात्रार्थावधारणान्वयज्ञानत्ववत् ज्ञानविषयीकरणसामान्यसामग्र्यैव प्रामाण्यं गृह्यते न त्वप्रामाण्यवदागन्तुकसामग्र्येत्यर्थलाभे प्रामाण्यविषयीकरणशक्तेः सहजत्वं लभ्यत इति भावः ।। **ज्ञानत्वग्रहणशक्तिवत्** ।। तच्छक्तेरिव । तत्र तस्यैवेति वतिः । साक्षीति । ग्राहकशब्दस्य ज्ञानमात्रवाचित्वादिति

भावः । अवधारणार्थेन येन ग्राहकमात्रमित्यनेन मात्रस्य ग्राहकमेव न तु अग्राहकमित्यग्राहकव्यवच्छेदे तात्पर्यवशादुभयवादिसिद्धप्रामाण्यग्राहकस्यैव व्यवच्छेद्यत्वसिद्धिरिति भावः । **अप्रतिबद्धेति** पर्यवसिताभिप्रायेण न तु तदपि विवक्षितम् । अवधारणार्थकमात्रस्यैव लाभात् । अनुव्यवसायश्च ज्ञानज्ञानमात्रपरम् ।।

।। इति स्वमते ज्ञप्तौ स्वतस्त्वनिरुक्तिः ।। १ ।।

न्यायदीपः

।। **अत्रेति** ।। उक्तस्वतस्त्वे निरुक्तित्रयमध्ये इत्यर्थः ।। **स्वमतेति** ।। तार्किकमतसाधारण्येपि मीमांसकत्रितयसाधारणं नेत्यर्थः । मीमांसकादीत्यादिपदेन मुरारिमिश्रः सिद्धान्ती मायावादिप्रभृतिर्वा ग्राह्यः । उक्तपक्षत्रयं **सुधा**वाक्यारूढं करोति ।। **एतदिति** ।। **उक्तमिति** ।।

''प्रत्यक्षवच्च प्रामाण्यं स्वत एवागमस्य हि''

इति जिज्ञासानयानुव्याख्यानव्याख्यावसर उक्तमित्यर्थः । तद्व्यनक्ति ।। **अत्रेत्यादिना** ।। मात्रपदस्य द्व्यर्थत्वमुपेत्याह ।। **कात्स्न्र्येत्यादि** ।। यावान्ति ज्ञानग्राहकाणि तावद्भिर्ग्राह्यत्वोक्तौ ज्ञानग्राहकेण गृह्यत एवेति नियमलाभादिति भावः ।। **प्रतिबद्धेति** ।। ज्ञानग्राहकेण गृह्यत इत्युक्ते न तु विरोधिसामग्रीसमवहितेनेत्यर्थलाभादिति भावः ।

अर्हार्थण्यत्प्रत्ययान्तत्वमुपेत्याह ।। **ग्राह्यशब्देनेति** ।। **प्रमात्वेत्यादि** ।। ज्ञानग्राहकमात्रेण इत्यस्य ज्ञानग्राहकेणैव न त्वधिकेनेत्युक्तौ प्रमात्वग्रहणशक्तेरपि सहजत्वलाभादिति भावः । यद्यपि शक्तेरेकत्वमेव लभ्यते । तथापि प्रतिबन्धस्थले साक्षिणः प्रामाण्यग्रहणशक्तेः प्रतिबन्धेऽपि न ज्ञानत्वग्रहणशक्तेरिति शक्तिद्वित्वमुपेत्य सहजत्वं विवक्षितमित्युक्तम् ।।

तदितरेति ।। साक्षीतरस्वप्रकाशानुमित्यनुव्यवसायरूपमित्यर्थः । नैयत्यलाभप्रकारमाह ।। **कात्स्न्यर्थेनेति** ।। **अप्रतिबद्धेति** ।। विरोधिसामग्र्यसमवहितज्ञानगोचरसर्वज्ञानग्रहश्च विवक्षित इत्यर्थः ।। ३ ।।

।। इति स्वमते ज्ञप्तौ स्वतस्त्वनिरुक्तिः ।। १ ।।

श्रीलक्ष्मीनाथतीर्थटीका

नन्वाद्यद्वितीयस्य स्वतस्त्वनिर्वाचने साक्षिग्रहः प्रमाणं तृतीये तु तदग्रहणं कृतम् । इदं तु वैचित्र्यं कुतः इत्यत आह ।। **आद्यमिति** ।। **पक्षद्वयमिति** ।। प्रामाण्यविरोध्युपस्थापकसामग्र्यसमवहितग्राह्यप्रामाण्याश्रयतत्तज्ज्ञान[1]विषयकनैय्यत्यं प्रामाण्याश्रयतत्तज्ज्ञानविषयकसाक्षिज्ञानविषयत्व[2]योग्यं चेति पक्षाद्वयमित्यर्थः ।। **स्वमते इति** ।। साक्षिरूपज्ञानस्य मीमांसकादिभिरनङ्गीकृतत्वादिति भावः ।। **तृतीयं त्विति** ।। उभयसिद्धप्रामाण्य[3]विषयक ज्ञानविषयत्वनैय्यत्यमित्यर्थः ।। **मीमांसकादीति** ।। तार्किकादिरादिशब्दार्थः । अद्वैती च । तेन स्वमतासाधारणमिति पूर्ववाक्येन तार्किकमतग्रहणं युक्तमिति ध्येयम् । अत्र निर्वचने साक्षिणो प्रवेशादिति भावः । उक्तविधज्ञानशब्देन **प्राभाकरमते** स्वप्रकाशरूपं ज्ञानं भाट्टमते ज्ञाततालिङ्गकानुमितिरूपं ज्ञानं **मुरारिमते** अनुव्यवसायरूपं **सिद्धान्ते** साक्षिरूपमिति विवेक्तव्यम् । उक्तपक्षत्रयस्य सुधादावदर्शनादित्यतः सुधायामेवोक्तमित्याह ।। **एतदिति** ।। **सुधायामिति** ।। प्रत्यक्षवच्च प्रामाण्यं इत्याद्यनुव्याख्यानसुधायामित्यर्थः ।

---

१. "विषयत्वनैय्यत्यं" इति स्यात् । २. "योग्यत्वं" इति स्यात् । ३. "अविषयक" इति स्यात् ।

ननु ज्ञानगतयाथार्थ्यस्य ज्ञानग्राहकमात्रग्राह्यत्वं स्वतस्त्वमित्युक्तेः इत्यतः तदुक्तिं पक्षत्रये योजयितुं आद्यपक्षे योजयति ।। **अत्रेति** ।। मात्रशब्दस्य कात्स्न्यर्थत्वं अवधारणार्थत्वं चेत्यर्थद्वयमभिप्रेत्याह ।। **मात्रशब्देनेति** ।। **तन्नियम इति** ।। विषयत्वनियम इत्यर्थः ।। **अवधारणपरेणेति** ।। **मात्रशब्देनेत्यनुषज्यते** ।। **प्रतिबन्धेति** ।। प्रामाण्यविरोध्युपस्थापकसामग्री-समवहितत्वलक्षणप्रतिबन्धव्यवच्छेदः ।

द्वितीयपक्षे सुधोक्तिं योजयति ।। **द्वितीयपक्षे इति** ।। **उक्तसाक्षि-ज्ञानेति** ।। [१]आद्यप्रामाण्याश्रयतत्त्वज्ञानविषयकसाक्षिज्ञानेत्यर्थः ।। **प्रमात्व-ग्रहणशक्तेरपीति** ।। ननु शक्तेः सहजत्वे एकत्वे च प्रतिबन्धदशायां साक्षिणो ज्ञानत्वग्रहवत् प्रमात्वग्रहोपि स्यात् । अन्यथा ज्ञानत्वग्रहोपि न स्यात् । शक्तेः सहजत्वं वा न स्यात् इति चेन्न । न्यायमते सादृश्यादि-लक्षणदोषस्य शुक्तित्वादिग्रहे प्रतिबन्धकत्वेपि न शुक्तिव्यक्तिग्रहे प्रतिबन्ध-कत्वं तथा प्रकृतेपि फलबलेन प्रमात्वाग्रहेपि ज्ञानत्वग्रहो युक्त एवेति भावः ।

सुधोक्तिं तृतीयपक्षे योजयति ।। **तृतीयेति** ।। **तदितरेति** ।। **प्राभाकरमते** स्वप्रकाशत्वरूपं भट्टमते ज्ञाततालिङ्गकानुमिति रूपं मुरारिमते अनुव्यवसायरूपं मतत्रयसाधारणमित्यर्थः । मात्रशब्दस्य अर्थद्वयमभिप्रेत्याह ।। **मात्रशब्देनेति** ।।

।। इति स्वमते ज्ञप्तौ स्वतस्त्वनिरुक्तिः ।।

---

१. ''ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञान'' इति स्यात् ।

परोक्तस्वतस्त्वनिरुक्तिभङ्गः

यत्तु मणावुक्तं । तदप्रमाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यत्वं स्वतस्त्वं तदभावश्च परतस्त्वं इति तन्न । तदभाववति तत्प्रकारकत्व-रूपाप्रामाण्याग्राहकस्यापि तद्वति तत्प्रकारकत्वरूपप्रामाण्यात्यन्ता-भावविषयकस्य ज्ञानज्ञानस्य प्रामाण्यग्राहकत्वेन बाधात् ।

अप्रामाण्यपदेन प्रामाण्यविरोधिविवक्षायामपि ज्ञानं गुण इत्यादि-वाक्यजन्यस्य ज्ञानं प्रमेयमिति सामान्यप्रत्यासत्तिजन्यस्य च ज्ञान-ज्ञानस्य प्रामाण्याविषयकत्वाद् बाधतादवस्थ्यात् । ज्ञानग्राहकपदेन स्वविषयघटितत्वेन ज्ञानग्राहकत्वविवक्षायामपि घटज्ञानमित्यादि-शब्दजन्यस्य ज्ञानज्ञानस्य प्रामाण्याविषयकत्वेन बाध एव ।

युक्तिरत्नाकरः

एवं स्वमते स्वतस्वं निरुच्य **मण्युक्तां** मीमांसकादित्रितयसाधारणीं [१]विप्रतिपत्तिं दूषयितुमनुवदति ।। **यत्विति** ।। **तदिति** ।। यत्र ग्राह्य-प्रामाण्याश्रये ''अयं घट'' इत्यादिज्ञाने अप्रामाण्यग्रहाद्याकारवती ज्ञानग्राहकसामग्री **गुरुमते** ''पटमहं जानामि'' इत्याकारकस्वप्रकाश-रूपव्यवसायजनिका **मिश्रमते** तदनुव्यवसायजनिका मनः संयोगादिरूपा **भट्टमते** घटो ज्ञानविषयः ज्ञाततताधारत्वादित्याद्यनुमिति जनकव्याप्तिज्ञानादि-रूपा तदावद्ग्राह्यत्वं स्वतस्वमित्यर्थः । अत्र घटत्ववद्विशेष्यकत्वा-वच्छिन्नघटत्वप्रकारकत्वादीनां सर्वप्रामाण्यानामप्रामाण्यत्वेनानुगतीकृतानां पक्षत्वेन पक्षीकृतप्रामाण्याश्रये दोषवशादप्रामाण्यग्राहकसामग्रीसम्पन्नतदनु-व्यवसायादि सामग्रा प्रामाण्याग्रहात् बाध इत्यतो अप्रामाण्यग्राहिकेत्युक्तम् ।

---

१. ''स्वतस्त्वनिरुक्तिं'' इति स्यात् ।

न च **गुरुमते** सर्वधियां याथार्थ्येनाप्रामाण्याप्रसिध्या तदग्रहका-प्रसिद्धिस्तदभाववति तत्प्रकारकत्वरूपाप्रामाण्यस्येच्छायां प्रसिद्धिश्च । ततः स्मर्यमाणस्य कृतिज्ज्ञाने भ्रमसम्भवात् ।

न च तन्मते भ्रमाभावेन तदप्रामाण्यसम्भवः । मतान्तराभ्युपगता-न्यथाख्यातिरूपस्य तस्याभावेऽप्यसंसर्गाग्रहरूपस्य तस्य तन्मतेऽपि सत्वात् ।

न च ''इदं ज्ञानं प्रमा'' इत्यत्र अप्रमेत्यस्य स्मरणस्याप्रामाण्य-ग्राहकत्वेऽपि इदं ज्ञानमित्यस्य ग्रहणस्याप्रामाणग्राहकत्वात्तेन प्रामाण्या-ग्रहाद्बाध इति वाच्यम् ।

अप्रामाण्याग्राहकेत्यनेनाप्रामाण्यग्राहकसामग्र्यसमवहितेन तेन प्रामाण्या-ग्रहेऽप्यबाधात् । न चैवं **मणि**कृदुच्यमानसंशयानुपपत्तेर्न तन्मते दोषता स्यात् । संशयस्थलीयधर्मिज्ञानस्योक्तस्मृतिरूपाप्रामाण्यग्रहसामग्री-समानकालीनत्वेन तया ज्ञानग्राहकसामग्र्या प्रामाण्यग्रहेण तन्मतेऽपि संशयोपपत्तेरिति वाच्यम् । धर्मिज्ञानानन्तरं यत्र प्रामाण्याप्रामाण्यकोटिस्मृतिः तत्र तस्य धर्मिज्ञानस्याप्रामाण्यग्रहसामग्र्यसमवहितत्वेन प्रामाण्यनिश्चया-वश्यम्भावेन संशयानुपपत्तेस्तन्मतेऽपि दोषत्वसम्भवात् । एवमपि यत्र शुक्त्यादौ रजतादिभ्रमानन्तरं इदं अप्रमाणं विसंवादिप्रवृत्तिजनकत्वादित्यादिना अप्रामाण्यानुमितौ जातायां ''इदं अप्रमात्वेन जानामि'' इत्यनु-व्यवसायादिनाऽनुमिति निष्ठस्याप्रामाण्यवत्यप्रामाण्यत्वरूपं कारकत्व-रूपप्रामाण्यस्य प्रथमज्ञाननिष्ठाप्रामाण्यग्रहेणैव ग्रहणादंशतो बाधः ।

नैय्यायिकमतेऽपि इदं ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वादित्याद्यनुमिति जनिकयोक्तरूपया सामग्र्या प्रामाण्यग्रहात्सिद्धसाधनमतो यावदिति सामग्री-विशेषणम् । ज्ञानग्राकत्वञ्च ज्ञानग्रहजननस्वरूपयोग्यत्वं विवक्षितम् । तथा च सामग्रीपदाभावे अप्रामाण्यग्राहकेत्यादेः ग्राहकविशेषणत्वेन तादृशेनापि

परोक्तस्वतस्त्वनिरुक्तिभङ्गः

यत्तु मणावुक्तं । तदप्रमाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यत्वं स्वतस्त्वं तदभावश्च परतस्त्वं इति तन्न । तदभाववति तत्प्रकारकत्व-रूपाप्रामाण्याग्राहकस्यापि तद्वति तत्प्रकारकत्वरूपप्रामाण्यात्यन्ता-भावविषयकस्य ज्ञानज्ञानस्य प्रामाण्यग्राहकत्वेन बाधात् ।

अप्रामाण्यपदेन प्रामाण्यविरोधिविवक्षायामपि ज्ञानं गुण इत्यादि-वाक्यजन्यस्य ज्ञानं प्रमेयमिति सामान्यप्रत्यासत्तिजन्यस्य च ज्ञान-ज्ञानस्य प्रामाण्याविषयकत्वाद् बाधतादवस्थ्यात् । ज्ञानग्राहकपदेन स्वविषयघटितत्वेन ज्ञानग्राहकत्वविवक्षायामपि घटज्ञानमित्यादि-शब्दजन्यस्य ज्ञानज्ञानस्य प्रामाण्याविषयकत्वेन बाध एव ।

युक्तिरत्नाकरः

एवं स्वमते स्वतस्वं निरुच्य **मण्युक्तां** मीमांसकादित्रितयसाधारणीं [१]विप्रतिपत्तिं दूषयितुमनुवदति ।। **यत्विति** ।। **तदिति** ।। यत्र ग्राह्य-प्रामाण्याश्रये ''अयं घट'' इत्यादिज्ञाने अप्रामाण्यग्रहाद्याकारवती ज्ञानग्राहकसामग्री **गुरुमते** ''पटमहं जानामि'' इत्याकारकस्वप्रकाश-रूपव्यवसायजनिका **मिश्रमते** तदनुव्यवसायजनिका मनः संयोगादिरूपा **भट्टमते** घटो ज्ञानविषयः ज्ञाततादारत्वादित्याद्यनुमिति जनकव्याप्तिज्ञानादि-रूपा तदावद्ग्राह्यत्वं स्वतस्वमित्यर्थः । अत्र घटत्ववद्विशेष्यकत्वा-वच्छिन्नघटत्वप्रकारकत्वादीनां सर्वप्रामाण्यानामप्रामाण्यत्वेनानुगतीकृतानां पक्षत्वेन पक्षीकृतप्रामाण्याश्रये दोषवशादप्रामाण्यग्राहकसामग्रीसम्पन्नतदनु-व्यवसायादि सामग्र्या प्रामाण्याग्रहात् बाध इत्यतो अप्रामाण्यग्राहिकेत्युक्तम् ।

---

१. ''स्वतस्त्वनिरुक्तिं'' इति स्यात् ।

न च **गुरुमते** सर्वधियां याथार्थ्येनाप्रामाण्याप्रसिध्या तदग्रहका-प्रसिद्धिस्तदभाववति तत्प्रकारकत्वरूपाप्रामाण्यस्येच्छायां प्रसिद्धिश्च । ततः स्मर्यमाणस्य कतिज्ज्ञाने भ्रमसम्भवात् ।

न च तन्मते भ्रमाभावेन तदप्रामाण्यसम्भवः । मतान्तराभ्युपगता-न्यथाख्यातिरूपस्य तस्याभावेऽप्यसंसर्गाग्रहरूपस्य तस्य तन्मतेऽपि सत्वात् ।

न च ''इदं ज्ञानं प्रमा'' इत्यत्र अप्रमेत्यस्य स्मरणस्याप्रामाण्य-ग्राहकत्वेऽपि इदं ज्ञानमित्यस्य ग्रहणस्याप्रामाणग्राहकत्वात्तेन प्रामाण्या-ग्रहाद्बाध इति वाच्यम् ।

अप्रामाण्याग्राहकेत्यनेनाप्रामाण्यग्राहकसामग्र्यसमवहितेन तेन प्रामाण्या-ग्रहेऽप्यबाधात् । न चैवं **मणि**कृदुच्यमानसंशयानुपपत्तेर्न तन्मते दोषता स्यात् । संशयस्थलीयधर्मिज्ञानस्योक्तस्मृतिरूपाप्रामाण्यग्रहसामग्री-समानकालीनत्वेन तया ज्ञानग्राहकसामग्र्या प्रामाण्यग्रहेण तन्मतेऽपि संशयोपपत्तेरिति वाच्यम् । धर्मिज्ञानानन्तरं यत्र प्रामाण्याप्रामाण्यकोटिस्मृतिः तत्र तस्य धर्मिज्ञानस्याप्रामाण्यग्रहसामग्र्यसमवहितत्वेन प्रामाण्यनिश्चया-वश्यम्भावेन संशयानुपपत्तेस्तन्मतेऽपि दोषत्वसम्भवात् । एवमपि यत्र शुक्त्यादौ रजतादिभ्रमानन्तरं इदं अप्रमाणं विसंवादिप्रवृत्तिजनकत्वादित्यादिना अप्रामाण्यानुमितौ जातायां ''इदं अप्रमात्वेन जानामि'' इत्यनु-व्यवसायादिनाऽनुमिति निष्ठस्याप्रामाण्यवत्यप्रामाण्यत्वरूपं कारकत्व-रूपप्रामाण्यस्य प्रथमज्ञाननिष्ठाप्रामाण्यग्रहेणैव ग्रहणादंशतो बाधः ।

नैय्यायिकमतेऽपि इदं ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वादित्याद्यनुमिति जनिकयोक्तरूपया सामग्र्या प्रामाण्यग्रहात्सिद्धसाधनमतो यावदिति सामग्री-विशेषणम् । ज्ञानग्राकत्वञ्च ज्ञानग्रहजननस्वरूपयोग्यत्वं विवक्षितम् । तथा च सामग्रीपदाभावे अप्रामाण्यग्राहकेत्यादेः ग्राहकविशेषणत्वेन तादृशेनापि

ज्ञानग्राहकेणात्ममनोयोगादिना ग्राह्यपदेन विवक्षितस्य तत्र ज्ञानगोचरज्ञान-प्रामाण्यस्य प्रकारत्वेऽपि पक्षीभूतप्रामाण्यस्याविषयत्वेन तदभावादिति भावः ।

यद्वा ज्ञानं गुण इति सामान्यप्रत्यासत्तिजन्यज्ञाने प्रामाण्यस्य विषयत्वात् बाधः । ज्ञानं प्रमेयमिति सामान्यप्रत्यासत्त्युपवर्णनं तु अशोकवनिकान्यायेनेति द्रष्टव्यम् ।

ननु ज्ञानग्राहकपदेन स्वविषयघटितज्ञानग्राहकत्वं विवक्षितम् । एवं च नोक्तदोषः । न च ज्ञानं गुण इत्यादिशब्दज्ञानस्य स्वविषयघटितज्ञान-विषयत्वेनाप्युक्तसामान्यप्रत्यासत्तिज्ञानस्य मनः सन्निकृष्टज्ञानधर्मिकत्वेन तस्य च स्वविषयघटितस्यैव भाननियमादुक्तदोषतादवस्थ्यम् । स्ववृत्तिवर्तमानज्ञान-ग्रहमात्र एव प्रामाण्यभानस्वीकारेणोक्तप्रत्यासत्तिजन्यज्ञानस्य योग्यधर्मिकत्वे बाधशङ्कानवकाशात् । ज्ञानपदस्य स्मृत्याद्युपनीतयोग्यपरकीयादिज्ञानधर्मिकत्वे तु स्वविषयाघटितज्ञानविषयत्वेनोक्तविवक्षया तद्दोषपरिहारादित्यत्राह– **ज्ञानग्राहकपदेनेक्ति ।। घटज्ञानमित्यादीति ।।** अपदार्थत्वादवाक्यार्थत्वाच्च न तत्र प्रामाण्यभानमिति भावः ।

ननु घटज्ञानमिति शाब्दस्थलेऽपि **मीमांसक**मते प्रामाण्यग्रहोऽस्त्येव । तथा हि– यथा घटेन जलमाहरेत्यत्र छिद्रेतरत्वं **गुरुनये** योग्यताबलात् ''पीनो देवदत्तो दिवा न भुङ्क्ते'' इति श्रुत्यर्थापत्तिस्थले रात्रिभोजनं **भट्टमते** शब्दानुपस्थितमप्यन्वयितावच्छेदकत्वेन भासते, तथेहापि घटविषयकत्व-ज्ञानत्वयोः घटेच्छापटज्ञानादावतिप्रसक्त्या यद्घटविषयकं तज्ज्ञानमित्य-भेदान्वयासम्भवात् घटविषयकदिशि घटत्ववद्विशेष्यकज्ञानत्वं, ज्ञानदिशि घटत्वप्रकारकज्ञानत्वं वान्वयितावच्छेदकयोग्यतयानुपस्थितमपि भासते । न च **भट्टमिश्र**योरन्यथाख्यातिसत्वात् घटत्वप्रकारकं ज्ञानं तद्घटित-विशेष्यकमित्यन्वयस्य मतत्रयेऽपि घटविशेष्यकस्य द्रव्यत्वप्रकारकस्य

घटत्वाप्रकारकस्यापि सत्वात् घटविशेष्यकं ज्ञानं तद्घटत्वप्रकारकमित्यन्वयस्य सम्भवात् नोक्तयोरप्यवच्छेदकत्वमिति वाच्यम् । तन्मतेऽपि घटत्वप्रकारकज्ञानत्वघटत्व वद्विशेष्यकज्ञानत्वयोरौत्सर्गिकनियमत्वेनान्वयबोधसम्भवात् । एवं च यद्घटत्वप्रकारकं ज्ञानं तद्घट[1]विशेष्यमिति वा यद्घटविशेष्यकं ज्ञानं तद्घटत्वप्रकारकमिति वौत्सर्गिकनियमबाधस्य घटत्वप्रकारकमपि ग्रावादवयवं घट इति ज्ञानं घटविशेष्यकं, घटविशेष्यकमपि इदं द्रव्यमिति ज्ञानं न घटत्वप्रकारकमिति व्यभिचारस्य यद्युपस्थितिः तदा प्रामाण्यविरोध्युपस्थितिसामग्रीसमानकालीनत्वात् घटज्ञानमितिशब्देन प्रामाण्यग्रहेऽपि न बाधः । यदि नोपस्थितिः तदा तयोरेवान्वयितावच्छेदकत्वग्रहसम्भवात्तेनाप्रामाण्यं[2] गृह्यते एवेति न बाध इति चेत् ।

न । येन पुंसा घटविशेष्यकज्ञानत्वघटत्वप्रकारकत्वयोः अन्वयितावच्छेदकत्वं न गृहीतं, तेन घटज्ञानमिति शब्देन प्रामाण्याग्रहेण बाधात् । नहि घटेन जलमाहरेत्यादौ छिद्रेतरत्वादेरिवेहाप्यन्वयितावच्छेदकयोरनुपस्थित्या अन्वयबोधासम्भवः । तद्वदिहान्वयानुपपत्तेरसम्भवात् । किञ्च यथा "स्वरूपवान्मैत्र" इत्यत्र गौरत्वादिकोट्यन्तरव्यतिरेकानिश्चये श्यामत्वादिकं नान्वयितावच्छेदकत्वेन भासते [3]यथा घटज्ञानमित्यत्रापि घटतदितरविशेष्यकत्वसम्भवेन तदितरविशेष्यकत्वव्यतिरेकनिर्णयदशायां न घटविशेष्यकत्वमन्वयितावच्छेदकत्वेन भासत इति तेन शब्देन प्रामाण्याग्रहाद्बाध एव । किञ्च विशेष्यकत्वघटत्वप्रकारकत्वयोरिव घटविषयकत्वघटत्वप्रकारकत्वयोरौत्सर्गिकनियमसम्भवात् यदा घटविषयकत्वादेरेवान्वयितावच्छेदकत्वग्रहस्तदापि बाध एव । नहि घटविषयकत्वे सति घटत्वप्रकारकत्वमेव प्रामाण्यम् । किञ्च द्रव्यत्वप्रकारकघटविशेष्यकज्ञाने

---

१. "विशेष्यकं" इति स्यात् । २. "प्रामाण्यं" इति स्यात् । ३. "तथा" इति स्यात् ।

घटत्वप्रकारकतानिश्चयदशायामप्युक्तशब्दात् प्रामाण्याग्रहाद्बाध एवेति न किञ्चिदेतत् । घटज्ञानमित्यादिशब्दजन्यस्येत्युपलक्षणम् । अयं घटज्ञानवानित्याद्यनुमितिरूपस्येति द्रष्टव्यम् ।

न्यायदीपः

मीमांसकत्रितयसाधारणीं परोक्तस्वतस्त्वनिरुक्तिमनूद्य निराह ।। **यत्त्विति ।। मणिग्रन्थे** ''ज्ञानप्रामाण्यमिति पूर्ववाक्यनिर्दिष्टं ज्ञानं तदिति परामृश्यते । तत्र ग्राह्यप्रामाण्याश्रयेऽयं घट इत्यादिज्ञाने अप्रामाण्याग्राहिका यावती ज्ञानग्राहिका सामग्री गुरुमते घटमहं जानामीत्येवमाकारस्वप्रकाश-व्यवसायजनिका चक्षुर्घटसंयोगादिरूपा मिश्रमते तदनुव्यवसायजनकमनः-संयोगादिरूपा भट्टमते घटो ज्ञानविषयः ज्ञाततताधारत्वादित्याद्यनुमितिजनक-व्याप्तिज्ञानादिरूपा । तावत्या ग्राह्यत्वं स्वतस्त्वमित्यर्थः । अत्र निरुक्तौ तत्रेत्युक्त्या यत्र शुक्तिरजतादिज्ञाने विसंवादादिलिङ्गेन अप्रामाण्यानु-मित्यनन्तरमिदमप्रमात्वेन जानामीत्यनुव्यवासयः तत्राप्रामाण्यवत्यप्रामाण्य-प्रकारकत्वरूपाप्रामाण्यघटितानुमितिनिष्ठप्रामाण्यस्य प्रथमज्ञाननिष्ठाप्रामाण्य-ग्राहिणैवानुव्यवसायेन ग्रहणाद्बाध इति शङ्का, **अप्रामाण्याग्राहके**त्युक्त्या इदं ज्ञानमप्रमेत्यादावप्रामाण्यग्राहकसामग्र्या तज्ज्ञाननिष्ठस्य प्रामाण्यस्याग्रहणाद् बाध इति शङ्का **याव**दित्युक्त्या न्यायमते ज्ञानग्राहकानुमितिसामग्र्या क्वचिदनुव्यवसायेन च प्रामाण्यग्रहात्सिद्धसाधनमिति शङ्का निरस्ता । विधिकोटौ बाधवारकाणां तदभावकोटौ सिद्धसाधनतावारकत्वं तद्वारकस्य च बाधवारकत्वं ज्ञेयम् । गुरुमते सर्वज्ञानानां प्रमात्वेपि तदभाववति तत्प्रकारकत्वरूपा-प्रामाण्यस्येच्छायां प्रसिद्धस्येदं ज्ञानमप्रमेत्यादौ स्मरणसम्भवेनागृहीता-संसर्गरूपाप्रामाण्यग्रहसम्भवात् तन्मतेप्यप्रामाण्याग्राहकपदवैयर्थ्यं नेति ।

अत्र यदुक्तं प्रामाण्यघटकाप्रामाण्यग्राहिणा ज्ञानेन प्रामाण्यग्रहणाद्बाधवारणाय तत्र ग्राह्यप्रामाण्याश्रयज्ञाने इत्यर्थकं तत्पदमिति तन्न । इमौ वह्नी इति वह्निद्वयगोचरैकज्ञानविषयकानुव्यवसायादिरूपज्ञानेन दोषवशादन्यतरांशाप्रामाण्यग्राहिणाप्यन्यतरांशे प्रामाण्यग्रहणेन बाधात् ।

यत्तु तदित्यस्य तत्र तदंशे ग्राह्यप्रामाण्याश्रयज्ञानांशे अप्रामाण्याग्राहकेत्यर्थत्वान्न दोष इति तन्न । तथापि तदंशे भावरूपाप्रमाण्याग्राहिणापि नेदं ज्ञानं प्रमाणमिति तदंशे प्रामाण्याभावावगाहिना प्रामाण्याग्रहणेन बाधादिति मूलोक्तदोषग्रासात् ।

यदपि तत्पदं ग्राह्यपरं सत्प्रामाण्यपदेनान्वीयमानं ग्राह्यप्रामाण्यविरोधीत्यर्थलाभार्थमतो न दोष इति तदपि न । तथात्वेऽतत्प्रामाण्येति निर्देशापातेन यथोक्तनिर्देशे तत्पदस्य प्रामाण्यपदेनासामर्थ्यात् । गुरुमते इदं ज्ञानमप्रमेत्यादावप्रमेति स्मृतेरप्रामाण्यग्राहकत्वेपि इदं ज्ञानमितिग्रहणात्मकस्याप्रामाण्यस्मृतिप्रतिबन्धेन प्रामाण्याग्रहणेन बाधापत्त्योक्तस्वतस्त्वनिरुक्तेर्गुरुमतसाधारण्यायोगाच्च ।

नचोत्पत्तिप्रामाण्यग्रन्थे **मणि**कृतैव ''प्राभाकरास्तु'' इत्यादिना गुरुमते संशयानुपपत्त्युपपादनप्रस्तावे इदं ज्ञानं प्रमा न वेत्यादावपि प्रामाण्यग्रहोस्तीत्युपेत्य संशयस्यान्यविषयत्वोपपादनात् तादृशस्थलेऽपि प्रामाण्यग्रहसद्भावान्न बाध इति शङ्क्यम् । तथात्वे तन्मते तदप्रामाण्याग्राहकपदवैयर्थ्यापत्तेः । तादृशस्थले[1] प्रामाण्यग्रहमुपेत्याग्राहकपदेन ग्राहकसामग्र्यसमवधानविवक्षायां च मिश्रादिमतेऽप्रामाण्यग्रहस्थले तत्सामग्र्यभावेन तदसमवहितेनापि ज्ञानग्राहकेण तत्र प्रामाण्याग्रहाद्बाध एवेत्यादिदूषणं स्फुटत्वादुपेक्ष्योक्तनिरुक्तौ यावज्ज्ञानविषयकज्ञानविषयत्वमित्येव सामञ्जस्ये ग्राहकसामग्रीत्युक्तिवैयर्थ्या-

१. ''प्रामाण्याग्रहमुपेत्य'' इति पाठेन भाव्यमिति भाति ।

द्वौरवाच्चेत्युपेत्य ग्राहकसामग्रीपदत्यागेन ज्ञानपदेनैवानुवदन्यथाश्रुता-प्रामाण्यपदार्थे तावद्दोषमाह ।। **तदभाववतीति** ।। **अप्रामाण्याग्राहकस्या-पीति** ।। उक्तविधभावरूपाप्रामाण्याविषयकस्यापीत्यर्थः । प्रामाण्यात्यन्ता-भावेत्युपलक्षणम् । अप्रामाण्यव्याप्यप्रामाण्यात्यन्ताभावव्याप्यविषयकस्येत्यपि ज्ञेयम् । तेन नञोऽभावार्थविवक्षापि प्रत्युक्ता ध्येया ।

ननु नञो विरोधार्थत्वे प्रामाण्याभावतद्व्याप्याप्रामाण्यतद्व्याप्यानां चतुर्णामप्यप्रामाण्यपदेन प्रामाण्यविरोधिवाचिना ग्रहणसम्भवान्नोक्तदोषः । विरोधित्वस्य प्रामाण्यनिश्चयप्रतिबन्धकज्ञानविषयत्वरूपत्वादित्याशयेन **पक्षधराद्युक्त**विवक्षामनूद्य निराह ।। **अप्रामाण्येति** ।। अपिपदेनैतत् सूचयति । यद्यपि ग्राह्यप्रामाण्यविरोधिलाभो नैतावता भवति । तत्पदमिलितेनाप्यसामर्थ्यादलाभ एव । विरोधितामात्रं त्वप्रयोजकम् । तथाप्यभ्युपगमोयमिति ।। **इत्यादिवाक्येति** ।। ज्ञानं समवेतं ज्ञानममूर्त-मित्यादिवाक्यजन्यस्य गुणत्वादिप्रकारकज्ञानविशेष्यकस्येत्यर्थः । ज्ञानज्ञान-स्येत्यन्वयः । साक्षाज्ज्ञानत्वव्यापकधर्माप्रकारकेत्यपि ग्राहकविशेषण-मस्त्वित्यत उक्तम् ।। **ज्ञानं प्रमेयमितीति** ।। ज्ञाने प्रमेयत्वं ज्ञातं सत् प्रत्यासत्तीभूय स्वविशेषणतासम्बन्धेन स्वाश्रयभूतानि सर्वज्ञानरूपवस्तून्युप-स्थापयतीति प्रमेयत्वप्रकारकज्ञानविशेष्यकज्ञानज्ञानस्य प्रमेयत्वाश्रयज्ञाने प्रामाण्याविषयकत्वादित्यर्थः । उक्तदोषपरिहाराय शङ्कते ।। **ज्ञानग्राहकपदे-नेति** ।। **प्रामाण्याविषयकत्वेनेति** ।। अपदार्थत्वादवाक्यार्थत्वाच्च घटत्व-वद्विशेष्यकत्वादेस्तेन सर्वथा भानाभावादिति भावः । यत्तु शब्दानुपस्थितमपि प्रामाण्यमन्वयितावच्छेदकतया घटज्ञानमिति ज्ञाने भातीति पक्षधरोत्प्रेक्षितं मतं तत्तेनैव दूषितमित्युपेत्योक्तम् ।। **बाध एवेति** ।। विवृतं **चैतद्गुरुपादैः** । ननु [१]शब्दान्यत्वे सति स्वविषयघटितत्वेन ज्ञानग्राहकत्वविवक्षास्त्विति

१. "शब्दाजन्यत्वे सति" इति स्यात् ।

चेन्न । तथाप्ययं घटज्ञानवान् तद्व्यवहारवत्वात् इत्याद्यनुमानजन्यज्ञान-ज्ञानस्यापि प्रामाण्याविषयकत्वेन बाधात् । ज्ञानं प्रमेति शब्दजन्यज्ञानस्य प्रामाण्याविषयकत्वापाताच्चेति भावः ।

श्रीलक्ष्मीनाथतीर्थटीका

यावत्परमतं न निराक्रियते तावत्स्वमतं न प्रतिष्ठितं स्यादिति न्यायेन **मण्युक्तं** स्वतस्त्वं दूषयितुमनुवदति ।। **यत्तु मणावुक्तमिति** ।। ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं न वेति विप्रतिपत्तावुक्तमित्यर्थः ।। **तदप्रामाण्येति** ।। ग्राह्यप्रामाण्याश्रये ज्ञाने अप्रमाण्याग्राहिका यावती ज्ञानग्राहिका सामग्री तद्ग्राह्यत्वमित्यर्थः । इदन्तु प्राभाकरभट्टमुरारिमिश्रमतत्रयसाधारणम् । प्राभाकरमते ज्ञानग्राहिका सामग्री स्वप्रकाशरूपा । भ मते ज्ञाततालिङ्गकानुमितिरूपा । **मुरारिमते** अनु-व्यवसायरूपेति विवेकः । ज्ञानग्राहकसामग्रीग्राह्यत्वमित्येवोक्तौ न्यायमते पञ्चमानुव्यवसायग्राह्यत्वेन सिद्धसाधनं स्यात् । अतो यावदित्युक्तम् । यावतां मध्ये प्रथमानुव्यवसायादेरपि प्रवेशात् । तेन प्रामाण्यग्रहणस्य नैय्यायिकेनानङ्गीकारात् । न सिद्धसाधनम् । तावत्युक्त इदं ज्ञानमप्रमाणमिति अप्रामाण्यग्राहकज्ञाग्राहिका या सामग्री तया प्रामाण्यस्याग्रहणात् मतत्रये बाधः स्यात् अत उक्तं **तदप्रामाण्याग्राहकेति** ।

अत्रानुगतस्य ज्ञानप्रामाण्यस्याभावात्कथं तस्य लक्ष्यत्वोक्तिः । न च गोव्यक्तिसामान्यस्य अनुगतस्य लक्ष्यस्याभावेपि गोत्वरूपलक्ष्यतावच्छेदक-स्यानुगतस्य सत्वेन यथा लक्ष्यता तथा ज्ञानत्वाख्यलक्ष्यतावच्छेदकस्य अनुगतस्य सत्वेन ज्ञानप्रामाण्यस्य लक्ष्यता सम्भवतीति वाच्यम् ।

अलक्ष्यव्यावृत्तस्य गोत्वस्येव ज्ञानत्वस्य भ्रमेपि सत्वेन अतिप्रसक्ततया अलक्ष्यतावच्छेदकत्वात् ।

किञ्च प्रामाण्यं किं तद्वति तत्प्रकारकत्वं उत तद्वति तत्प्रकारकज्ञानत्वं वा । नाद्यः । इच्छादिसाधारणस्य उक्तविधप्रामाण्यस्य स्वाश्रयग्राहक-ग्राह्यत्वाभावात् । द्वितीये आकाशे शब्दः इति ज्ञानस्य प्रामाण्यमेव न स्यात् । तस्य स्वतस्त्वं तु दूरादेवेति पक्षदूषणं मनसि निधाय स्वतस्त्वं दूषयितुमुपक्रमति ।। **तन्नेति** ।। तदप्रामाण्येत्यत्र अप्रामाण्यपदेन तदभाव-वति तत्प्रकारकज्ञानत्वरूपमप्रामाण्यं विवक्षितं उत प्रामाण्याभावो वा । द्वितीये इदं ज्ञानमप्रामाणमिति ज्ञानग्राहिकया प्रामाण्याभावग्राहिकया प्रामाण्यस्याग्रहणाद्बाधः इति मनसि निधायाद्ये दोषमाह ।। **तदाभाव-वतीति** ।। तदाभाववति तत्प्रकारकत्वरूपाप्रामाण्यस्य प्रामाण्यात्यन्ताभावस्य च भिन्नत्वात् अन्यतरग्राहकस्य अन्यतराग्राहकत्वादिति भावः । ननु अप्रामाण्यपदेन तदभाववति तत्प्रकारकत्वं वा प्रामाण्याभावो वा न विवक्षितः । येनोक्तदोषः स्यात् । किन्तूभयानुगतं प्रामाण्यविरोधित्वमात्रं विवक्षितमतो न पूर्वोक्तदोष इति शङ्कते ।। **अप्रामाण्यपदेनेति** ।। तर्हि ज्ञानग्राहकपदेन ज्ञानग्राहकमात्रं विवक्षितं उत स्वविषयघटितत्वेन ज्ञानग्राहकञ्चेति विकल्प्य बाध इत्याह ।। **ज्ञानं गुण इत्यादिना** ।। **सामान्येति** ।। प्रमेयत्वसामान्यप्रत्यासत्तिजन्यत्येत्यर्थः । द्वितीयमनुवद-न्निराह ।। **ज्ञानग्राहकपदेनेति** ।। तथा च ज्ञानं गुण ज्ञानं प्रमेयमित्यादि-ज्ञानज्ञानस्य स्वविषयज्ञानविषयघटज्ञानत्वाभावात् न पूर्वोक्तदोष इति शङ्कितुहृदयम् । अत्रापि बाध इत्याह ।। **घटज्ञानमित्यादीति** ।। अत्रादि-शब्देन घटविशेष्यकं ज्ञानं घट[१]विशेषणज्ञानं चेत्यादि शब्दजन्यं ज्ञानज्ञानं गृह्यते ।

---

१. "विशेषणकं" इति स्यात् ।

तर्कताण्डवम्

ननु ज्ञानग्राहकपदेन ग्राह्यप्रामाण्याश्रयज्ञानप्रकारप्रकारकतया [१]तत्प्रकारवद्विशेष्यतया च तद्विषयत्वं विवक्षितम् । अत्र च विशेषणद्वयेन तव घटविशेष्यकं ज्ञानमिति तव घटत्वप्रकारकं ज्ञानमिति च शब्दाभ्यां जन्ययोः घटज्ञानविषयकज्ञानयोः प्रामाण्याविषयकत्वाद् बाध इति शङ्काद्वयं क्रमेण निरस्तमिति चेदुच्यते ।

त्वदुक्तं यद्ग्राह्यप्रामाण्याश्रयज्ञानप्रकारप्रकारकतया तत्प्रकारवद्विशेष्यतया च तद्विषयत्वं तत्प्रामाण्यविषयकत्वमेव । स्वप्रकारवद्विशेष्यकत्वस्यैव प्रमाण्यरूपत्वात् । तथा च यावती प्रामाण्यविषयिका सामग्री तद्ग्राह्यत्वं स्वतस्त्वमित्युक्तं स्यात् । तथा चैतादृशस्वतस्त्वस्य परतस्त्वपक्षेऽपि सत्वात्सिद्धसाधनम् । एतदभावरूपपरतस्त्वसाधने अपसिद्धान्तश्च । न हि परतस्त्वपक्षे अनुव्यवसायाविषयोऽपि प्रामाण्यं प्रामाण्यानुमितेरप्यविषयः । अस्मिन्पक्षेऽप्रामाण्याग्राहकत्वविशेषणवैयर्थ्यं च ।

युक्तिरत्नाकरः

अत्रोपाध्यायविवक्षामाशङ्कते– **नन्विति** ।। एवञ्च घटज्ञानमित्यादिसामग्री नोक्तरूपानुव्यवसायादिसामग्री तथैव इदं घटत्वेन जानामीत्यादौ विशेष्यत्वेनैव घटत्वाश्रयस्मृतिप्रकारकत्वेनैतद्घटत्वादेर्भानादिति भावः ।। **तत्प्रकारद्विशेष्यकतयेति** ।। यद्यपि स्वाश्रयप्रकारकतया स्वाश्रयविशेष्यविशेष्यकतया स्वाश्रयग्राह्यत्वमेवोपाध्यायोक्तम् । तथापि तावन्मात्रस्य रजतत्वप्रकारकं पुरोवर्तिविशेष्यकमिदं ज्ञानमिति शाब्दसमाप्तिसत्वात् । तथा च प्रामाण्याग्रहाद्बाधः स्यादिति । स्वाश्रयविशेष्यविशेष्यकतयेत्यस्य

१. अत्र उत्तरत्र सिद्धान्ते च "विशेष्यकतया" इति पाठः स्यात् ।

स्वाश्रयप्रकारनिरूपितवैशिष्ट्यानुपयोगि विशेष्यकतयेत्यर्थे तत्प्रकारवद्विशेष्यकत्वमेव लभ्यत इति भावः । तत्प्रकारवद्विशेष्यकत्वेनेत्यत्र किं तत्प्रकारोपलक्षितव्यवसायधर्मिविशेष्यकत्वं विवक्षितं उत विशिष्टतद्धर्मिविशेष्यकत्वम् । नाद्यः । घटत्वप्रकारकं किञ्चिद्विशेष्यकमित्यादि प्रागुक्तसामग्र्या प्रामाण्याग्रहेण बाधात् ।

यदत्रोक्तं **नरहरिणा** । अनयापि सामग्र्या गृह्यत एव प्रामाण्यं ज्ञानज्ञानस्य तद्विषयधर्मधर्मिविशेष्यावगाहित्वनियमेन विशेष्ये घटत्ववत्वस्यानयापि ग्रहादन्यथाप्रकारकत्वादिग्रहानुपपत्तेः तस्य तद्घटितमूर्तिकत्वादिति तत् नोक्तनियमस्य प्रत्यक्षादिमात्रविषयत्वेन घटत्वनिरूपितपुरोवर्त्यनुयोगिकवैशिष्ट्यस्य पदवाक्यार्थयोरन्यतरत्वाभावेन तत्राभावात् । प्रकारत्वभानान्यथानुपपत्या तज्ज्ञान इव घटत्वप्रकारकमिति शब्देनापि प्रामाण्यं भासेत । यदि च भासमानवैशिष्ट्यप्रतियोगित्वमात्रस्यैव प्रकारशब्दार्थत्वेन पुरोवृत्यनुयोगिकस्य भासकाभावेन तत्र प्रामाण्याग्रहस्तदात्रापि प्रकारांशे पुरोवृत्यनुयोगिकस्यैव विशेष्यांशे घटत्वप्रतियोगिकत्वस्यापि भासकाभावात् । अन्यथा तदुत्तरकालं घटत्वप्रकारकमिदं ज्ञानं घटत्ववद्विशेष्यकं न वेति प्रमाणं न वेति संशयानापत्तेरिति दिक् ।

अस्तु तर्हि द्वितीयस्तत्राह– **त्वदुक्तमिति । तत्प्रकारवद्विशेष्यकतया** तत्प्रकारनिरूपितवैशिष्ट्यानुयोगित्वेन व्यवसायधर्मिणि विषयकतयेत्यर्थः । **तद्विषयकत्वं** व्यवसायविषयकत्वम् । प्रागुक्तशाब्दसामग्र्यां व्यवसायधर्मिणि तत्प्रकारनिरूपितवैशिष्ट्यानुयोगित्वाभानेऽप्यनुव्यवसायादिसामग्र्याः सम्बन्धितावच्छेदकरूपतयेत्यादिवक्ष्यमाणयुक्त्या व्यवसायधर्मिणि तन्निरूपितवैशिष्ट्यानुयोगिकत्वभासकत्वमस्त्येवेति भावः ।

यच्च तेनैवोक्तं अप्रामाण्याग्राहकेति नञ् व्यत्यासेनाप्रामाण्याभावग्राहकेत्यर्थे

प्रामाण्यग्राहकत्वमेव पर्यवस्यति । एवं च प्रामाण्यग्राहकयावज्ज्ञानग्राहकत्वं विधिकोट्यर्थः । ततश्च घटज्ञानमित्यादिना प्रामाण्यग्रहेऽपि न बाधः । नापि सिद्धसाधनम् । ग्राह्यपदेन विवक्षितस्य स्वातन्त्र्येण ग्राह्यत्वस्य नैय्यायिकैरनभ्युपगमादिति ।

तदपि न । अग्राहके नञो अप्रामाण्याभावार्थकत्वे पूर्वपदेन समासायोगात् नञ्द्वयवैय्यर्थ्याच्च । न हि घट इति वक्तव्ये अनघट इति वदन्ति । तत्पदं च व्यर्थम् । न च घटज्ञानग्राहकेण पटज्ञानप्रयोजनमिति वाच्यम् । तत्पदस्य प्रामाण्यविशेषणत्वेनैवोक्तलाभे ज्ञानग्राहकपदस्य सर्वथा व्यर्थत्वात् । प्रामाण्यपदस्याननुगततत्तत्प्रामाण्यपरत्वावश्यम्भावेनोक्तबाधस्यासम्भवदुक्तिकत्वाच्च । तत्पदस्य ज्ञानविशेषणत्वे असमर्थत्वाच्च । स्वातन्त्र्येण प्रामाण्यग्राहकेत्युक्तौ सिद्धसाधनापत्त्या स्वातन्त्र्यपारतन्त्र्यसाधारणग्राहकमात्रस्य वाच्यतया अप्रामाण्यग्राहकस्यापि त्वदुक्तदिशा तत्प्रकारकत्वभानानुरोधेन तद्धत्वभासकत्वे प्रामाण्यविषयकत्वस्यावश्यकत्वेन स्वातन्त्र्येण प्रामाण्याग्रहेण बाधाच्चेति दिक् ।

न्यायदीपः

नन्वस्तु तर्हि स्वाश्रयप्रकारप्रकारकतया स्वाश्रयविशेष्यविशेष्यकतया स्वाश्रयग्राहकग्राह्यत्वमिति **यज्ञपतिनोक्त**मतम् । तत्र यद्यपि यथाश्रुते घटत्वप्रकारकं किञ्चिद्विशेष्यकं इति ज्ञानेनापि प्रामाण्याग्रहात्स्वाश्रयप्रकार-प्रकारकतया स्वाश्रयप्रकारवद्विशेष्यकतयेति वाच्यम् । तत्रापि प्रकारवदित्यत्र प्रकारस्योपलक्षणत्वे प्रागुक्तदोषापत्त्या तत्प्रकारविशिष्टविशेष्यविशेष्यक-तयेत्युच्यते । अतो न कोपि दोष इति भावेन शङ्कते ।। **नन्विति** ।। **तत्प्रकारवदिति** ।। तत्प्रकारविशिष्टविशेष्यकतयेत्यर्थः ।। **तद्विषयत्वम्** ।। व्यवसायविषयत्वम् ।

स्वाश्रयप्रकारनिरूपितवैशिष्ट्यानुपयोगि विशेष्यकतयेत्यर्थे तत्प्रकारवद्विशेष्यकत्वमेव लभ्यत इति भावः । तत्प्रकारवद्विशेष्यकत्वेनेत्यत्र किं तत्प्रकारोपलक्षितव्यवसायधर्मिविशेष्यकत्वं विवक्षितं उत विशिष्टतद्धर्मिविशेष्यकत्वम् । नाद्यः । घटत्वप्रकारकं किञ्चिद्विशेष्यकमित्यादि प्रागुक्तसामग्र्या प्रामाण्याग्रहेण बाधात् ।

यदत्रोक्तं **नरहरिणा** । अनयापि सामग्र्या गृह्यत एव प्रामाण्यं ज्ञानज्ञानस्य तद्विषयधर्मधर्मिविशेष्यावगाहित्वनियमेन विशेष्ये घटत्ववत्वस्यानयापि ग्रहादन्यथाप्रकारकत्वादिग्रहानुपपत्तेः तस्य तद्घटितमूर्तिकत्वादिति तत् नोक्तनियमस्य प्रत्यक्षादिमात्रविषयत्वेन घटत्वनिरूपितपुरोवर्त्यनुयोगिकवैशिष्ट्यस्य पदवाक्यार्थयोरन्यतरत्वाभावेन तत्राभावात् । प्रकारत्वभानान्यथानुपपत्या तज्ज्ञान इव घटत्वप्रकारकमिति शब्देनापि प्रामाण्यं भासेत । यदि च भासमानवैशिष्ट्यप्रतियोगित्वमात्रस्यैव प्रकारशब्दार्थत्वेन पुरोवृत्यनुयोगिकस्य भासकाभावेन तत्र प्रामाण्याग्रहस्तदात्रापि प्रकारांशे पुरोवृत्यनुयोगिकस्यैव विशेष्यांशे घटत्वप्रतियोगिकत्वस्यापि भासकाभावात् । अन्यथा तदुत्तरकालं घटत्वप्रकारकमिदं ज्ञानं घटत्ववद्विशेष्यकं न वेति प्रमाणं न वेति संशयानापत्तेरिति दिक् ।

अस्तु तर्हि द्वितीयस्तत्राह– **त्वदुक्तमिति । तत्प्रकारवद्विशेष्यकतया** तत्प्रकारनिरूपितवैशिष्ट्यानुयोगित्वेन व्यवसायधर्मिणि विषयकतयेत्यर्थः । **तद्विषयकत्वं** व्यवसायविषयकत्वम् । प्रागुक्तशाब्दसामग्र्यां व्यवसायधर्मिणि तत्प्रकारनिरूपितवैशिष्ट्यानुयोगित्वाभानेऽप्यनुव्यवसायादिसामग्र्याः सम्बन्धितावच्छेदकरूपतयेत्यादिवक्ष्यमाणयुक्त्या व्यवसायधर्मिणि तन्निरूपितवैशिष्ट्यानुयोगिकत्वभासकत्वमस्त्येवेति भावः ।

यच्च तेनैवोक्तं अप्रामाण्याग्राहकेति नञ् व्यत्यासेनाप्रामाण्याभावग्राहकेत्यर्थे

प्रामाण्यग्राहकत्वमेव पर्यवस्यति । एवं च प्रामाण्यग्राहकयावज्ज्ञानग्राहकत्वं विधिकोट्यर्थः । ततश्च घटज्ञानमित्यादिना प्रामाण्यग्रहेऽपि न बाधः । नापि सिद्धसाधनम् । ग्राह्यपदेन विवक्षितस्य स्वातन्त्र्येण ग्राह्यत्वस्य नैय्यायिकैरनभ्युपगमादिति ।

तदपि न । अग्राहके नञो अप्रामाण्याभावार्थकत्वे पूर्वपदेन समासायोगात् नञ्द्वयवैय्यर्थ्याच्च । न हि घट इति वक्तव्ये अनघट इति वदन्ति । तत्पदं च व्यर्थम् । न च घटज्ञानग्राहकेण पटज्ञानप्रयोजनमिति वाच्यम् । तत्पदस्य प्रामाण्यविशेषणत्वेनैवोक्तलाभे ज्ञानग्राहकपदस्य सर्वथा व्यर्थत्वात् । प्रामाण्यपदस्याननुगततत्तत्प्रामाण्यपरत्वावश्यम्भावेनोक्तबाधस्यासम्भवदुक्तिकत्वाच्च । तत्पदस्य ज्ञानविशेषणत्वे असमर्थत्वाच्च । स्वातन्त्र्येण प्रामाण्यग्राहकेत्युक्तौ सिद्धसाधनापत्त्या स्वातन्त्र्यपारतन्त्र्यसाधारणग्राहकमात्रस्य वाच्यतया अप्रामाण्यग्राहकस्यापि त्वदुक्तदिशा तत्प्रकारकत्वभानानुरोधेन तद्धत्वभासकत्वे प्रामाण्यविषयकत्वस्यावश्यकत्वेन स्वातन्त्र्येण प्रामाण्याग्रहेण बाधाच्चेति दिक् ।

न्यायदीपः

नन्वस्तु तर्हि स्वाश्रयप्रकारप्रकारकतया स्वाश्रयविशेष्यविशेष्यकतया स्वाश्रयग्राहकग्राह्यत्वमिति **यज्ञपतिनोक्त**मतम् । तत्र यद्यपि यथाश्रुते घटत्वप्रकारकं किञ्चिद्विशेष्यकं इति ज्ञानेनापि प्रामाण्याग्रहात्स्वाश्रयप्रकार-प्रकारकतया स्वाश्रयप्रकारवद्विशेष्यकतयेति वाच्यम् । तत्रापि प्रकारवदित्यत्र प्रकारस्योपलक्षणत्वे प्रागुक्तदोषापत्त्या तत्प्रकारविशिष्टविशेष्यविशेष्यक-तयेत्युच्यते । अतो न कोपि दोष इति भावेन शङ्कते ।। **नन्विति** ।। **तत्प्रकारवदिति** ।। तत्प्रकारविशिष्टविशेष्यकतयेत्यर्थः ।। **तद्विषयत्वम्** ।। व्यवसायविषयत्वम् ।

अस्मिन् पक्ष इत्यादि वक्ष्यमाणदोषदार्ढ्याय दलद्वयकृत्यं व्यनक्ति ।। **अत्र चेति** ।। विवक्षायामित्यर्थः । किमेतद्वादिमते तद्वत्वरूपं वैशिष्ट्यमनुव्यवसायविषय एव नेति मतिरुत स्वातन्त्र्येण? आद्ये दोषमाह ।। **त्वदित्यादिना** ।। **स्वप्रकारवदिति** ।। स्वप्रकारविशिष्टेत्यर्थः । सिद्धसाधनापसिद्धान्तौ व्यनक्ति ।। **नहीति** ।। **प्रामाण्यमिति** ।। तद्वत्त्वादिरूपमित्यर्थः । वैशिष्ट्यमनुव्यवसायविषय एव नेति पक्षे तादृशानुव्यवसायविषयत्वमादाय सिद्धसाधनादिदोषाभावेपि इदं ज्ञानं प्रमाणं समर्थप्रवृत्तिजनकत्वात् इत्यनुमितिसामग्रीरूपा यावती त्वदुक्तलक्षणा ज्ञानग्राहिका सामग्री तावत्त्यापि प्रामाण्यग्रहात् सिद्धसाधनतापसिद्धान्तावित्यर्थः । अनुमितिविषयत्वोक्तौ तत्सामग्रीविषयत्वं सिद्धमेवेत्युपेत्य अनुमितेः इत्येवोक्तम् । न त्वनुमितिसामग्र्या अपीति । यद्वा तेन सामग्रीत्युक्तावपि ग्राहकज्ञानेत्येव युक्तम् । न तु सामग्रीत्युपेत्यैवमुक्तम् । द्वितीये स्वातन्त्र्येण तद्वद्विशेष्यकत्वग्राहकत्वमिति मतम्, उत ग्राहकत्वमात्रमिति? आद्येप्येतदेवोत्तरम् ।। **त्वदुक्तमित्यादि** ।। प्रामाण्यविषयिका स्वातन्त्र्येण तद्वद्विशेष्यकत्वादिविषयिकेत्यर्थः ।। **अनुव्यवसायाविषयोपि** ।। स्वातन्त्र्येणानुव्यवसायाविषयोपीत्यर्थः ।। **प्रमाण्यानुमितेः** स्वतान्त्र्येण तद्वत्वविशिष्टधर्मिविशेष्यकत्वादिविषयिकानुमितेरपीत्यर्थः । द्वितीयेपि ग्राह्यमित्यत्र ग्राह्यत्वमात्रमभिमतम् उत स्वातन्त्र्येण? आद्ये तादृशानुव्यवसायविषयत्वमादायापि सिद्धसाधनतापसिद्धान्तौ स्पष्टौ । द्वितीये तूक्तरूपानुव्यवसायं प्रति प्रामाण्यस्य न्यायमते स्वातन्त्र्येणाविषयतया यावतीति ज्ञानग्राहकसामग्रीविशेषणेनैव सिद्धसाधनतानापपत्तेर्दोषान्तरमाह ।। **अस्मिन् पक्ष इति** ।। ग्राह्यत्वमित्यत्रैव स्वातन्त्र्येण ग्राह्यत्वमिति पक्ष इत्यर्थः । तथा अस्मिन्पक्ष इत्यस्य स्वातन्त्र्येण तद्वद्विशेष्यकत्वादिग्राहिकेति पक्ष इत्यप्यर्थमुपेत्य प्राचीनपक्षेप्ययं दोषो बोध्यः । तद्वद्विशेष्य-

कत्वग्रहे तदभाववद्विशेष्यकत्वरूपाप्रामाण्यग्रहासम्भवेनोक्तविवक्षया तद्धारणादिति भावः ।।

ननु तदभाववति तत्प्रकारकत्वरूपाप्रमाण्यग्राहिकापि तद्वद्विशेष्यकत्व-ग्राहिकैव । तत्प्रकारकत्ववित्तिवेद्यत्वात् तद्वद्विशेष्यकत्वस्य । तद्वद्विशेष्य-कत्वाभाने तत्प्रकारकत्वग्रहणायोगादिति चेत् तर्हि अप्रामाण्याग्राहकत्वरूप-विशेषणदानेऽपि तव घटत्वप्रकारकं ज्ञानमिति शब्दजन्यज्ञानेनाप्रामाण्या-ग्राहकेण त्वदुक्तदिशा प्रकारवित्तिवेद्यतया तद्वद्विशेष्यकत्वग्राहिणापि प्रमाण्याग्रहणाद्बाधापत्तेः । यदि चात्र तद्वत्त्वेन विशेष्यस्याभानान्न बाधः । तर्हि अप्रामाण्यग्राहकसामग्र्यामपि तत्तुल्यम् । अत एव पूर्वं दलद्वयकृत्यं व्यक्तीकृतम् ।।

यदत्रोक्तं **नरहरिणा** ''अप्रामाण्याग्राहकेत्यत्र नञ्व्यत्यासेनाप्रामाण्या-भावग्राहकेत्यर्थे प्रामाण्यग्राहकेति पर्यवसानात् प्रामाण्यग्राहकयावज्ज्ञान-ग्राहकग्राह्यत्वं विधिकोट्यर्थ'' इति तदपि ''यावती प्रामाण्यविषयिका सामग्री तद्ग्राह्यत्वं स्वतस्त्वमित्युक्तं स्यात्'' इति ग्रन्थकृदुक्त्यैव सिद्धसाधनादिदोषेण निरस्तं भवति । न च ग्राह्यपदेन स्वातन्त्र्येण ग्राह्यमित्यभिमतत्वाद्या-वदित्युक्त्यैव सिद्धसाधनत्वदोषाभावः, तथात्वेन अनुव्यवसायविषयत्वस्य न्यायमतेऽभावदिति वाच्यम् । नञो अप्रामाण्याभावार्थकत्वे पूर्वपदेन समासायोगात्, नञ्द्वयवैयर्थ्यात्, तत्पदवैयर्थ्याच्चेति ध्ययेम् । तदेतदाह ।। **अप्रामाण्याग्राहकत्वविशेषणवैयर्थ्यमिति** ।।

श्रीलक्ष्मीनाथतीर्थटीका

उक्तदोषपरिहारकं पक्षान्तरं शङ्कते ।। **नन्विति** ।। **ग्राह्यप्रामाण्या-श्रयेति** ।। ग्राह्यप्रमाण्याश्रये[१] यद्धट इत्यादिज्ञानं तस्मिन्योयं प्रकारः

१. ''आश्रयं'' इति स्यात् ।

घटत्वादिः स एव प्रकारः यस्य तस्यभावः तयेत्यर्थः ।। **तत्प्रकारवदिति** ।। प्रामाण्याश्रयज्ञानप्रकारवदित्यर्थः । तद्विषयकत्त्वं ज्ञानविषयकत्त्वमित्यर्थः । तथा च घटज्ञानं गुणः इति शब्दजन्यं ज्ञानं सामान्यप्रत्यासत्तिजन्यं ज्ञानं प्रमेयमिति च ज्ञानं ग्राह्यप्रामाण्याश्रयज्ञानप्रकार[1]तया तत्प्रकारवद्विशेष्यतया च न घटज्ञानादिस्वरूपं गृह्णाति । किन्तु गुणत्वप्रमेयत्वादिप्रकारकतयैवेति च न पूर्वोक्तदोषः । इदं ज्ञानं घटत्वप्रकारकं घटत्ववद्विशेष्यकमित्याकारकमेव ज्ञानं ग्राह्यप्रामाण्याश्रयज्ञानप्रकारप्रकारकतया तत्प्रकारवद्विशेष्यतया व्यवसायविषयकं नान्यविषयकमित्याशयो बोध्यः । विशेषणद्वयस्य प्रयोजनं स्वयमेवाह ।। **अत्र चेति** ।। **क्रमेणेति** ।। तव घटविशेष्यकं ज्ञानं वृत्तमिति ज्ञानज्ञानस्य ज्ञानप्रकार[2]प्रकारतया ज्ञानविषयकत्त्वाभावात् तव घटत्वप्रकारकं ज्ञानमिति शब्दजन्यस्य ज्ञानज्ञानस्य ज्ञानप्रकारवद्विशेष्यकतया ज्ञानग्राहकत्त्वाभावाच्च शङ्काद्वयं निरस्तमित्यर्थः ।

दूषयति ।। **उच्यते इति** ।। ज्ञानग्राहकपदेनैवं विवक्षायां ज्ञानग्राहकस्य प्रामाण्यविषयकत्त्वमेवोक्तं इत्याह ।। **त्वदुक्तमिति** ।। तत्र हेतुमाह ।। **स्वप्रकारवदिति** ।। ज्ञानप्रकारवद्विशेषविषयकत्त्वमेव ज्ञानस्य प्रामाण्यरूपमित्यर्थः । अस्त्वित्यत आह ।। **तथा चेति** ।। प्रामाण्यग्राहकसामग्रीग्राह्यत्वं प्रामाण्यस्य स्वतस्त्वमित्युक्तं स्यादित्यर्थः । तावतापि किमित्यत आह ।। **तथा चेति** ।। प्रामाण्यग्राहकसामग्री अनुव्यवसायादिरूपा तया ग्राह्यत्वं प्रामाण्यस्य स्वतस्त्वमित्युक्तं स्यादित्यर्थः । प्रामाण्यग्रहस्य नैय्यायिकेनानङ्गीकारान्न सिद्धसाधनमित्यतः सिद्धसाधनं व्यनक्ति

१,२. "प्रकारकतया" इति स्यात् ।

।। **न हीति** ।। प्रामाण्यग्राहकसामग्र्यां सामग्रीत्वमेव प्रविष्टं न त्वनुव्यवसायादित्वं नाप्यनुमितित्वमिति भावः । अनुव्यवसायत्वादिना सामग्री विवक्षिता इति वदन्तं मूर्खं प्रत्याह ।। **अस्मिन्निति** ।। तत्प्रकारप्रकारकत्वादिपक्षे इत्यर्थः ।। **पक्षे इति** ।। इदं ज्ञानं प्रमाणमित्यप्रामाण्यग्राहकसामग्र्या उक्तरूपेण ज्ञानग्राहकत्त्वाभावादिति भावः । नत्वविषयज्ञानग्राहकसामग्रीग्राह्यत्वमेव विवक्षितम् ।।

तर्कताण्डवम्

ननु यया ज्ञानग्राहकसामग्र्या ज्ञानग्रहार्थं यावदपेक्षितं तावदेव विषयग्रहार्थमप्यपेक्ष्यते सैव सविषयज्ञानग्राहकसामग्री विवक्षिता । अनुव्यवसायसामग्री चैवंविधा । तया व्यवसायग्रहे अपेक्षितस्य व्यवसायसम्प्रयोगस्यैव तद्विषयघटग्रहेऽप्यपेक्षितत्वात् । घटज्ञानमिति शब्दस्तु ज्ञानग्रहे ज्ञानपदगतां शक्तिमपेक्षते । घटग्रहे तु घटपदगतां शक्तिमिति चेन्न । तथाप्येकयैव शक्त्या प्रकरणप्राप्तघटज्ञानपरामर्शकेन तत्पदेन जनितज्ञानस्य प्रामाण्याविषयकत्वेन बाधतादवस्थ्यात् (१) ।

युक्तिरत्नाकरः

पक्षधरविवक्षां प्रतिक्षेप्तुमाक्षिपति– **नन्विति** ।। यया सामग्र्या ज्ञानग्रहार्थं यावदपेक्षितं तावदेव विषयग्रहार्थमपेक्ष्यत इति कोऽर्थः । किं तयोः समाग्र्योरैक्यम् उत ज्ञानग्राहकत्वव्यापकं विषयग्राहकत्वं यस्यामिति, उत तद्विषयग्रहार्थं ज्ञानग्राहकातिरिक्तानपेक्षतेति, आहोस्वित् विशयग्राहार्थं ज्ञानग्राहकातिरिक्तानपेक्षतेति, आहोस्वित् विशयग्राहार्थं ज्ञानग्राहकत्वातिरिक्तहेत्वनपेक्षतेति । किं वा ज्ञानग्राहकसामग्रीत्वावच्छेदकधर्मावच्छेदेन पर्याप्तविषयग्राहकत्वं यस्यामिति ।

नाद्यः । ज्ञानग्राहकस्य संयुक्तसमवायस्य विषयग्राहिकया व्यवसाय-प्रत्यासत्तेश्च भेदेनानुव्यवसायस्थलेऽपि बाधात् । न च व्यवसायस्यापि विषयतयाऽनुव्यवसायं प्रति हेतुत्वात् सामग्र्यैक्यमेव । एवमपि संयुक्त-समवायस्य विषयग्रहाहेतुत्वात् । अनुव्यवसायं प्रति विषयतया व्यवसायस्य हेतुत्वेऽपि प्रत्यासत्तितया अहेतुत्वात् । न द्वितीयः । अनुव्यवसायस्यापि ज्ञानग्राहकत्वं ज्ञानपदादौ विद्यमानत्वेन तत्र विषयग्राहकत्वाभावेन यत्र ज्ञानग्राहकत्वं तत्र विषयग्राहकत्वमिति व्याप्त्यभावात् । अनुव्यवसाय-सामग्रीत्वावच्छिन्नज्ञानग्राहकत्वस्य विषयग्राहकत्वव्याप्युक्तौ तु घटज्ञान-ग्राहकत्वस्यापि विषयग्राहकत्व व्याप्तत्वेनोक्तदोषानतिवृत्तेः । न तृतीयः । घटज्ञानमिति वाक्यजन्ये ज्ञानग्रहे पदद्वयस्यापि जनकतया विषयग्रहार्थं ज्ञानग्रहातिरिक्तानपेक्षणात् । न चात्र ज्ञानविषयीकरणांशहेत्वतिरिक्तघटपदस्य विशयविषयीकरणांशेऽपेक्षितत्वेनोक्तसामग्रीत्वमिति वाच्यम् । तथा सति यावत्पदवैय्यर्थ्यापत्तेः । प्रमानुमितौ ज्ञानस्य विषयत्वे व्याप्ते घटस्य विषयत्वे च व्यापकतावच्छेदकत्वस्य तन्त्रत्वादिति त्वयैवोक्तत्वेन विषय-ग्रहार्थं ज्ञानग्रहहेत्वतिरिक्तापेक्षणात् । प्रमापदेऽपि विशेषणशक्तत्वस्य विषयग्रहार्थमतिरिक्तस्यापेक्षणात् । गन्धवती पृथिवीत्वोपनयानन्तरमित्यादि नैयायिकाभिमतप्रामाण्यग्राहकानुव्यवसायेऽपि विषयग्रहार्थं ज्ञानहेत्वतिरिक्तस्य तद्वत्तोपनयस्यापेक्षणात् ।

चतुर्थपञ्चमौ निराह– **तथापीति** । **तत्पदेन** तदादिपदेन । तदादिपदे ज्ञानविषयग्रहापेक्षितायाः शक्तेरेकत्वेन विषयग्रहार्थं ज्ञानग्राह्यत्वातिरिक्त-हेत्वनपेक्षणात् । ज्ञानग्राहकसामग्रीत्वावच्छेदकधर्मावच्छेदेनैव विषय-ग्राहकतापर्याप्त्यधिकरणत्वाच्च । नोक्तपक्षद्वयमपि लक्षीकार्यमिति भावः ।

नन्वसर्वनामत्वेन सामग्रीविशेषणान्नोक्तबाध इति चेन्न । तत्किम-सर्वनामत्वं सर्वनामभिन्नत्वं बहुव्रीहिणा सर्वनामाघटितत्वं वा । नाद्यः ।

अदृष्टादिघटितकारणकलापरूपसामग्र्याः सर्वनामभिन्नत्वेन तत्पदादि-घटितयाऽनया प्रामाण्याग्रहेण बाधात् । नान्त्यः । सर्वनामगोचरप्रत्यय-निष्टप्रामाण्यग्रहसामग्र्याः सर्वनामघटितत्वाभावेन बाधात् ।

ननु वर्णानामाशुतरविनाशितया न सर्वनामतो परप्रत्यक्षसम्भवः । किञ्च सर्वनामगोचरस्य प्रत्यक्षस्य विषयतया तज्जन्यत्वेऽपि तद्गोचरानुव्यवसायस्य तदजन्यतया नानुव्यवसायादिसामग्री तद्घटिता । किञ्च सर्वनामादि-घटितसामग्र्या तद्गोचरप्रत्यक्षप्रामाण्यग्रहेऽपि तदघटितया यावत्या प्रमापदादिरूपया प्रामाण्यग्रहात् अर्थबाध इति चेन्न । सते इत्यादि-वर्णद्वयात्मकसर्वनामगोचरप्रत्यक्षसम्भवात् पूर्वपूर्ववर्णानुभवजन्यसंस्कारसचिवेन चरमवर्णसम्बद्धश्रोत्रेण सर्वनामान्तरप्रत्यक्षस्यापि सम्भवाच्च । अनुव्यव-सायादेः सर्वनामघटितसामग्र्यजन्यत्वेऽपि **गुरुमते** स्वप्रकाशरूपस्य तद्गोचरप्रत्यक्षस्य तन्निष्ठाप्रामाण्यग्राहकस्य सर्वनामघटितसामग्री-जन्यत्वनियमात् । न चैवमपि सर्वनामघटितप्रमापदादिसामग्र्या प्रामाण्या-ग्रहान्न बाध इत्युक्तमिति वाच्यम् । उक्तव्यवसायसामग्र्या **गुरुमते** प्रामाण्यग्राहिकायाः सर्वनामघटितत्वेन तद्घटितायाः प्रमापदादिरूपाया यावत्या अपि नैय्यायिकैः प्रामाण्यग्राहकत्वाभ्युपगमेन सिद्धसाधनात् । निषेधसाधने बाधकाच्च ।

एतेनैव सर्वनामशक्तिज्ञानसहकृतत्वं तदिति निरस्तम् । सर्वनाम-घटितशब्दजन्यज्ञाने प्रामाण्यग्राहकस्वप्रकाशज्ञानसामग्र्याः सर्वनामशक्ति-ज्ञानसहकृतत्वेन प्रागुक्तदोषानिस्तरादिति भावः । उपलक्षणं चैतत् । घटज्ञाने बुद्ध्यादिपदं शक्तमिति भ्राम्यतो बुध्यादिपदात्मिकापि सामग्र्युक्त-रूपैवेति तया प्रामाण्याग्रहणाद्बाधः एवेति द्रष्टव्यम् । ननु भ्रमाद्यघटितत्वेन सामग्रीविशेषणान्न बाधः ।

अत्र **नरहरिः** । तथासत्यप्रामाण्यग्राहकपदवैय्यर्थ्यम् । पक्षीभूत-प्रामाण्याश्रये ज्ञाने ·अप्रामाण्यानुमितेर्वा पक्षधर्मताऽन्यतरभ्रममूलकत्वेन भ्रमाघटितपदेनैतन्निबन्धनबाधनिरासादिति । तन्न । व्यवसायाप्रामाण्या-रोपस्थलेऽन्यत्र गृतीताप्रामाण्यस्मृतिसम्भवे भ्रमादिघटितया तया प्रामाण्यग्रहेण बाधापत्या तद्धारणाय प्रामाण्याग्राहकपदस्यावश्यकत्वादिति चेन्न । इदं रजतमिति भ्रमनिष्ठे इदन्त्ववतीदन्त्वत्वप्रकारकत्वरूपे प्रामाण्ये व्यवसाय-रूपभ्रमघटितसामग्रीग्राह्यत्वेन तद्घटितायाः ज्ञानग्राहकत्वप्रयुक्तविषय-ग्राहकतायाः प्रामादिकशब्दरूपाया एव तत्र विवक्षितसामग्रीत्वेन तद्ग्राह्यत्वस्य च नैय्यायिकसम्मतत्वेन सिद्धसाधनात् निषेधे बाधाच्च । न च व्यवसायस्येदमंशे भ्रमत्वाभावात् तद्विषयकत्वावच्छेदेन भ्रमघटि-तत्वमप्यस्ति सामग्रा इति वाच्यम् । घटज्ञाने ज्ञानपदं शक्तमिति भ्राम्यतः पुरोवर्तिविशेष्यकं ज्ञानमित्यादिशब्दरूपसामग्रामपि पुरोवर्तिन एव घटत्वेन तद्विषयत्वावच्छेदेन भ्रमघटितत्वस्यापि सत्त्वेन बाधानिस्तारात् । न च ज्ञानग्राहकत्वप्रयुक्तविषयग्राहकत्वांशे भ्रमघटितत्वं विवक्षितम् । प्रकृते च ज्ञानमित्यंशे तथाविधे शक्तिभ्रमघटितत्वान्नोक्तदोष इति वाच्यम् । घटत्वप्रकारकत्ववद्विशेष्यकत्वयोरेकांशे प्रामाण्यादेकशक्तिग्रहवत एकांशे च तदग्रहवतः प्रमापदादिसामग्रा अपि उक्तरूपतया प्रामाण्याग्रहेण बाधतादव-स्थ्यात् । न च प्रामाण्यघटकीभूतयावद्विषयग्राहकत्वे सतीति सामग्री-विशेषणान्नोक्तदोष इति वाच्यम् । तथा सत्यप्रामाण्यग्राहकपदवैय्यर्थ्यापत्तेः । ज्ञानग्राहकत्वप्रयुक्तेत्यादिविवक्षाया वैय्यर्थ्यापाताच्च ।

किञ्च भ्रमघटितत्वं भ्रमासहकारिकत्वम् । तच्च स्वकार्यजनकत्वभ्रमकत्वं [१]नान्यदन्निर्वचनात् । तन्न जनकशारीरप्रविष्टानन्यथासिद्धिभागस्य व्यावर्त्या-भावेन व्यर्थतया त्वदुक्तमानसाप्रामाण्यभ्रमे भ्रमप्रयोज्यतानियमेन भ्रमाघटित-

१. "नान्यत् । तदनिर्वचनात् ।" इति स्यात् ।

पदेनैव त्वदुक्तबाधनिरासे प्रामाण्यग्राहकपदवैय्यर्थ्यानिस्तारः । तत्र ह्यप्रामाण्यभ्रमे तदुपनयो हेतुः । तत्र च यद्धर्मावच्छेदेन यद्धर्मनिश्चयः तद्धर्मज्ञानवत्त्वमेव हेतुः । अन्यथाऽननुभूतसौरभेरपि चन्दनखण्डे चन्दनखण्डान्तरगृहीतसौरभस्मृतिमतः ''सुरभिचन्दनम्'' इति प्रतीत्यापत्तेः । न चैवं शुक्ताविदं रजतमिति भ्रमानुपपत्तिः । तत्रापि चाकचक्यादेरुपनेय-रजतत्वाद्यवच्छेदकत्वेन गृहीतस्य भानात् । मानसे चाप्रामाण्यभ्रमे उपनेया-प्रामाण्यावच्छेदकीभूतधर्मस्य पक्षीकृतप्रामाण्याश्रयेऽसत्वेन तद्वृत्तित्वज्ञानस्यैव भ्रमत्वात् । तथा च तत्राप्रामाण्यभ्रमे भ्रमप्रयोज्यत्वं दुर्वारमेवेति भ्रमाघटितपदेनैवोक्तबाधवारणे अप्रामाण्यग्राहकपदवैय्यर्थ्यं वज्रलेपायितमिति दिक् ।

एतेन घटत्ववति घटत्वप्रकारकत्वादौ तदंशावच्छेदेन प्रामाण्यविरोध्य-ग्राहकज्ञानग्राहकफलोपधानप्रयोजकातिरिक्तानपेक्षविषयग्राहकता सर्वनामभ्रम-घटितयावत्स्वाश्रयग्राहकग्राह्यत्वम् । यद्यपि यद्व्यक्तिघटितयत्प्रमिति जातीयसामग्र्यां विषयाविषयकत्वेन ज्ञानविषयकत्वमापादयितुं शक्यते । तादृशसाग्रीग्राह्यत्वं स्वतस्त्वम् । सा चानुव्यवसायादिजनिकैव न घट-ज्ञानादिशब्दरूपा घटज्ञानादिशक्तितत्पददिरूपा वा शुद्धज्ञानोपस्थापनस्थले व्यभिचारादिति । तत्र तदनिष्टा या घटज्ञानशक्तिः तज्ज्ञानव्यक्तिघटित-घटज्ञानप्रमिति जातीयसामग्र्यां सर्वस्यामपि विषयाविषयिकत्वेन ज्ञानविषयत्वापादनसम्भवेन तया घटज्ञानशक्तिज्ञानघटितया घटज्ञानं वृत्त-मित्याद्याकारशाब्दानुभवसामग्र्या प्रामाण्याग्रहेण बाधात् । घटज्ञानत्वावच्छिन्न-निरूपितघटेच्छावत्त्वरूपलिङ्गनिष्टव्याप्तिज्ञानव्यक्तिघटितायां घटज्ञानानुमिति प्रमासाग्र्यां सर्वस्याविषयाविषयकत्वेन ज्ञानाविषयत्वापादनसम्भवात् बाधतादवस्थ्यम् ।

किं बहुना विषयविशिष्टज्ञानग्रहप्रागभावव्यक्तिघटितसामग्राः सर्वस्यापि सविषयकज्ञानग्रहजन्नतानियमेन तथाविधप्रागभावघटितयावत्सामग्री-ग्राह्यत्वाभावेन बाधो दुर्वार एवेत्यलम् ।।

यदप्यप्रामाण्याग्राहकस्ववृत्तिवर्तमानज्ञानग्राहकयावज्ज्ञानग्राहकग्राह्यत्वं स्वतस्त्वमिति । तन्न । ''सुखं गुण'' इति गुणत्वसामान्यप्रत्यासविजन्य-ज्ञानस्य स्वविषयकत्वेन स्ववृत्तिवर्तमानज्ञानगोचरस्य प्रामाण्याग्राहकत्वे बाधात् । ''सर्वं ज्ञानं गुण'' इति शब्दजज्ञानस्य स्वविषयकस्याप्युक्तरूपस्य प्रामाण्याविषयकत्वेन बाधादित्यास्तां विस्तरः ।

यदि **महेश्वरेणोक्तं** विषयनिरपेक्षज्ञानानवगाहिज्ञानग्राहकरूपेण विषयग्रहं प्रति हेतुता यस्याः सा ज्ञानग्राहकसामग्रीशब्देन विवक्षताऽनुव्यवसायादि-सामग्री । तथा यद्धि येन विना न [1]भासः तद्धेतुस्तमपि बोधयति इति नियमात् । घटज्ञानमित्यादिशब्दात्मिका तु यद्यपि निरपेक्षं ज्ञानं न गृह्णाति, तथापि विषयग्रहं प्रति हेतुता न, तेन रूपेण स्ववृत्तिवर्तमानज्ञानग्राहक एव तथा नियमात् । एवं च यद्यपि प्रमापदयोर्यद्यपि न निरुक्तसामग्रीत्वं तथाप्युपनीतप्रामाण्यानुव्यवसायमादाय सिद्धसाधनवारणाय यावत्पदमिति । तत्र न तावद्विषयनिरपेक्षेत्यादिना सामग्र्यां विषयनिरपेक्षज्ञानानवगाहि-ज्ञानग्राहकत्वं विषयग्रहहेतुतावच्छेदकमिति विवक्षितम् । सामग्र्यामेवा-वच्छेदकासम्भवात् ।

नाहि सामग्रीघटकासाधारणकारणे तस्यावच्छेदकत्वं अनुव्यवसाया-दावप्यभावात् । व्यवसायादेः प्रत्यासत्तित्वादिनैव जनकत्वात् । नाहि ज्ञानविषयग्राहकयोरैक्यं विवक्षितम् । अनुव्यवसायादौ तदभावात् । नापि तयोस्साहित्यनियमः । घटज्ञानमिति शब्दादावपि सत्वात् । नापि

---

१. ''भासते'' इति स्यात् ।

तत्प्रयुक्तविषयग्राहकताकत्वम् । प्रयुक्तत्वस्य व्यापकत्वादिरूपत्वे प्रागुक्तदोषानतिवृत्तेः । यदपि तेनैवोक्तं शब्दव्याप्त्यनुपनीतविशेष्यक-प्रकारीभूतधर्मवैशिष्ट्यं गृह्णन्ति, स्वसमानाधिकरणवर्तमानज्ञानं च गृह्णन्ति यावन्ति ज्ञानादीनि तावद्ग्राह्यत्वम् । अत्र च यावत्पदं उपनीतप्रामाण्या-[1]वध्यनुव्यवसायमादाय सिद्धसाधनतावारणाय । ''घटोऽस्तीति ज्ञानवान् देवदत्त'' इति वाक्यजं देवदत्तज्ञानं व्याप्त्यजनितां तादृशानुमितिश्च व्यावर्तनाय स्वप्रकाशत्वेन ज्ञानविषयत्वात् । **भट्टमते** च यो [2]ज्ञानताश्रयः स ज्ञानविषय इति व्याप्तिज्ञानस्य व्यापकतावच्छेदकज्ञानविषयत्वाच्चोक्त-बाधतादवस्थ्यम् । अतस्तदिति । एवं **मिश्रमते** द्वितीयानुव्यवसायस्य ग्राह्यप्रामाण्याश्रयविषयकद्वितीयानुव्यवसायजन्यत्वान्न बाधः ।

भट्टमतेऽपि प्रामाण्यविषयकज्ञाततालिङ्गानुमिति जनकव्याप्तिज्ञानं ज्ञापयितुं शब्देत्यादि विशेषणमिति । तच्चिन्त्यम् । ''घटोस्तीति ज्ञानवान् देवदत्त'' इत्यादिवाक्यजन्यज्ञानपूर्ववर्णानुभवाद्यनेकज्ञानव्यवहितस्य वर्तमानज्ञानविषयकत्वे तत एवावधारणे शब्दानुपनीतेत्यस्य वैय्यर्थ्यात् । वर्तमानज्ञानविषयकत्वे वा तत्रापि प्रामाण्यभानावश्यम्भावेन बाधात् । न चैतादृशशाब्दज्ञानानन्तरमेवोत्पन्नदेवदत्तीयपटज्ञानमादाय वर्तमानज्ञानविषय-केणायत्तदिति वाच्यम् । एवमपि समानाधिकरणेत्यस्य वैय्यर्थ्यात् । व्यधिकरणज्ञानविषयज्ञानस्य शब्दव्याप्त्यन्तरोपनीतवैशिष्ट्यविषयकत्वनियमात् ।

किञ्च **गुरुमते** ज्योतिष्टोमवाक्यार्थज्ञानप्रामाण्यविषयकस्य स्वप्रकाशरूपस्य स्ववृत्तिवर्तमानज्ञानविषयस्य शब्दतदुपजीव्यनुमित्यन्यतरत्वनियमेन शब्द-व्याप्त्यनुपनयनवैशिष्ट्यविषयकत्वे बाधो दुर्वार एवेति ।

---

१. ''अवगाह्यनुव्यवसाय'' इति स्यात् । २. ''ज्ञाततताश्रय'' इति स्यात् ।

न्यायदीपः

पक्षधरोक्तमाशङ्क्य निराह ।। **नन्विति** ।। **तावदेवेति** ।। ज्ञान-ग्राहकत्वप्रयुक्तमेव यस्यां विषयग्राहकत्वं सैवेत्यर्थः । अस्मिन्मते च भ्रम इति पदजन्यज्ञानेन प्रामाण्याग्रहाद् बाधवारणाय अप्रमाण्याग्राहकत्वविशेषण-मर्थवत् । विषयोपरक्तज्ञानग्राहकेण प्रमेति पदजन्यज्ञानेनोक्तरूपेण प्रामाण्य-ग्रहणात्सिद्धसाधनवारणाय **यावदिति** विशेषणम् । बाधः सिद्धसाधनता च नेति क्रमेण व्यनक्ति ।। **अनुव्यवसायसामग्रीति** ।। षष्ठीतत्पुरुषः । आत्ममनःसंयागादिरित्यर्थः । स्वप्रकाशव्यवसायादिसामग्र्यपि ग्राह्या ।। व्यवसायसम्प्रयोगस्य ।। व्यवसायस्य मनसा सह संयुक्तसमवायरूप-सम्बन्धस्यैवेत्यर्थः । बाह्यार्थरूपविषयग्रहे व्यवसायरूपप्रत्यासत्तेरपेक्षाया इवानुव्यवसायजननेऽपि विषयतया व्यवसायापेक्षायास्तुल्यत्त्वादिति भावः । तत्पदेनेत्युपलक्षणम् तत्पदादिनेत्यर्थः ।

यदत्र मणिसारादावुक्तम् ''असर्वनामत्वेन ग्राहकविशेषणान्न दोष'' इति तन्न । तथापि लक्षणया घटज्ञानोपस्थापकेन लाक्षणिकज्ञानपदेन प्रामाण्या-ग्रहाद्बाधात् । अलाक्षणिकत्वेनापि विशेषणे तु घटज्ञाने ज्ञानपदं शक्तमिति भ्रमे सति तादृशेन ज्ञानपदेनापि प्रामाण्याग्रहाद्बाध एव । भ्रमाघटितत्वेनापि विशेषणे तु अप्रामाण्याग्राहकपदवैयर्थ्यम् । प्रमायामप्रामाण्यानुमानस्य व्याप्तिपक्षधर्मतान्यतरभ्रममूलत्वादेव तत्र बाधवारणात् ।

यत्तु इदं ज्ञानमप्रमाणमिति मनसाऽप्रामाण्यारोपस्थलेऽन्यत्र गृहीताप्रामाण्यस्मृतिसम्भवेन तया भ्रमाघटितयापि सामग्र्या प्रामाण्याग्रहाद्बाध-वारणायाप्रामाण्याग्राहकेति विशेषणं सार्थकमिति तन्न । तत्र ज्ञानग्राहकत्व-प्रयुक्तविषयग्राहकत्वरूपसविषयज्ञानग्राहकत्वस्याभावादेव बाधवारणात् । विस्तरस्तु **गुरुटीकायाम्** ।

श्रीलक्ष्मीनाथतीर्थटीका

नचैवं ''घटज्ञानं'' इत्यादिशब्दजन्यस्य ज्ञानस्य तथात्वेन तेन प्रामाण्यग्रहणाद्बाध इति वाच्यम् । ज्ञानग्रहार्थं यावदपेक्षितं तावदपेक्षविषयग्राहकस्य विषयग्राहकपदेन विवक्षितत्वादिति पक्षान्तरमाशङ्कते ।। **नन्विति** ।। उक्तविधसविषयग्राहकत्वमनुव्यवसायग्रहे यावानात्मद्वारकसंयुक्तसमवायलक्षणसम्बन्धः अपेक्षितः व्यवसायविषयघटग्रहेपि तावानेव सम्बन्धोपेऽक्षित इत्याह ।। **तयेति** ।। घटज्ञानमित्यादिज्ञानग्राहकसामग्रास्तु उक्तविधसविषयग्राहकत्वं नास्तीत्याह ।। **घटज्ञानमिति** ।। शब्दस्य तत्तद्गृहे वाक्यार्थग्रहे तत्तपदार्थनिरूपितशक्तिग्रहापेक्षायाः नियतत्वादिति भावः ।। ननु घटज्ञानमिति शब्दजन्यज्ञानमादाय बाधतादवस्थ्यमेव । घटज्ञानमिति शब्दरूपापि सामग्री ज्ञानग्रहे शक्तिमपेक्षते यथा तथा घटग्रहेपि शक्तिमपेक्षते । न च तथापि ज्ञानग्रहे ज्ञानपदशक्तिं घटग्रहे घटपदशक्तिमपेक्षते इति वैषम्यमिति वाच्यम् । शक्तिग्रहसापेक्षत्वरूपसामान्यस्याक्षतेः । अन्यथा व्यवसायग्रहे संयुक्तसमवायः घटग्रहे तु व्यवसायरूपः सम्बन्धः इति वैषम्यस्यापरिहार्यत्वात् विवक्षैवानुपपन्ना स्यादिति दूषणे सत्येव दूषणान्तरमाह ।। **तथापीति** ।। **तदिति** ।। पदस्य विषयग्राहकत्वातेन प्रामाण्याग्रहणाद्बाधः । न च यस्य चाविषयज्ञानग्राहकत्वाभावात्कथं बाधः इति वाच्यम् । घटज्ञानं तावत्प्रकरणेन प्राप्तं तत्परया प्रयुक्तस्य तत्पदस्यैकयैव शक्त्या घटज्ञानग्राहकत्वनियमादित्याह ।। **प्रकरणेति** ।। सामग्रीग्राह्यत्वं प्रामाण्येऽसम्भाविपटज्ञानानुव्यवसायेन घटज्ञानप्रामाण्यस्याग्रहणात् यावज्ज्ञानग्राहकमध्ये तस्यापि प्रवेशात् ।

न च प्रामाण्याश्रयज्ञानग्राहकसामग्रीग्राह्यत्वं विवक्षितमिति वाच्यम् ।

तस्यापि प्रामाण्याश्रयपटज्ञानग्राहकत्वेनोक्तदोषतादवस्थ्यात् । न च ग्राह्यप्रामाण्याश्रयज्ञानग्राहकसामग्रीग्राह्यत्वं विवक्षितमिति वाच्यम् । कदाचित् तत्प्रामाण्यस्यापि ग्राह्यत्वेनोक्तदोषतादवस्थ्यात् ।

यत्तु **रुचिदत्ते** । उभयवादिसम्मतप्रामाण्यग्राहिका या सामग्री तद्भिन्नयावती तज्ज्ञानग्राहिका सामग्री तया तत्प्रामाण्यं गृह्यते इत्युक्तम् । तदुभयसिद्धप्रामाण्याविषयज्ञानभिन्नज्ञानविषयत्वनैय्यत्यमित्यस्मदभिमत-त्रितयसाधारणस्वतस्त्वनिर्वचनमेव चौर्येण लिखितमिति द्रष्टव्यम् ।

तर्कताण्डवम्

नापि तज्ज्ञानविषयकज्ञानाजन्यज्ञानविषयत्वं स्वतस्त्वम् । अस्मिंश्च पक्षे संभवमात्रं साध्यं न तु नियमः ।

स्वतस्त्वपक्षेऽपि प्रामाण्यस्य तज्ज्ञान[1]विषयज्ञानजन्यानुमित्यापि ग्राह्यत्वेन तदजन्यज्ञानस्यैव विषय इति नियमस्य तज्ज्ञानविषयक-ज्ञानाजन्येन घटज्ञानेनाप्यग्राह्यत्वेन गृह्यत एवेति नियमस्य चासम्भव इति वाच्यम् । स्वतस्त्वपक्षे व्यवसायप्रामाण्यग्राहकस्यानुव्यवसायस्य व्यवसायविषयकेश्वरज्ञानजन्यतया तदजन्यज्ञानत्वाभावेन बाधात् । परतस्त्वपक्षेऽपि तदजन्येश्वरज्ञानविषयत्वेन सिद्धसाधनाच्च (२) ।

युक्तिरत्नाकरः

मीमांसकत्रितयसाधारण**मण्युक्तम्** [2]विनियत्यन्तरमनूद्य दूशयति ।। **नापीति** ।। तज्ज्ञानं पक्षीभूतं प्रामाण्याश्रयं ज्ञानं तद्विषयकज्ञानं **गुरु-भट्टमिश्रमतेषु** क्रमेण स्वप्रकाशव्यवसायज्ञातता[3]लिङ्गानुमित्यनुव्यवसायात्मकं

१. 'विषयक' इति पाठान्तरम् । २. "निरुक्त्यन्तरम्" इति स्यात् । ३. "लिङ्गक" इति स्यात् ।

तदजन्यं तत्तदेव तद्विषयत्वं स्वतस्त्वमित्यर्थः । अत्र ज्ञानविषय-मात्रोक्तावनुमिति ग्राह्यत्वेन सिद्धसाधनमतो ।। **ज्ञानजन्येति** ।। तावत्युक्ते **मिश्रमते**ऽनुव्यवसायस्य व्यवसायजन्यत्वेन, **भट्टमते** ज्ञाततालिङ्गकानुमिते-र्व्याप्त्यादिज्ञानजन्त्वेन **गुरुमते**ऽप्यनुमितिप्रामाण्यांशे बाधः स्यादतो ज्ञानविषयत्वमिति ।

एवमपि **मिश्रमते**ऽनुव्यवसायप्रामाण्यांशे बाधः । तस्य व्यवसाय-विषयकानुव्यवसायजन्यद्वितीयानुव्यवसायगोचरत्वात् । **गुरुनये** व्याप्तिज्ञानस्य स्वप्रकाशत्वेन ज्ञानविषयत्वात् **भट्टमते** च यो ज्ञाततात्रयः स ज्ञानविषय इति व्याप्तिज्ञानस्य व्यापकतावच्छेदकज्ञानविषयत्वाच्चोक्तबाधतादवस्थ्यमत-स्तदिति । एवं च **मिश्रमते** द्वितीयानुव्यवसायस्य ग्राह्यप्रामाण्याश्रय-प्रमानुव्यवसायाविषयकद्वितीयानुव्यवसायाजन्यत्वात् न बाधः । **भाट्टमते**ऽपि प्रामाण्यविषयकज्ञाततालिङ्गानुमितिजनकव्याप्तिज्ञानस्य यत्किञ्चिज्ज्ञान-विषयकत्वेपि न पक्षीभूतप्रामाण्याश्रयज्ञाने विषयकत्वम् । सामान्यलक्षण-प्रत्यासत्तेस्तेनानभ्युपगमादिति न बाधः ।

गुरुमतेऽनुमितिप्रामाण्यांशेऽपि न बाधः । प्रामाण्यविषयकानुमितेः स्वप्रकाशव्याप्तिज्ञान[१]जन्येऽपि पक्षीभूतप्रामाण्याश्रयानुमितिविषयकज्ञाना-जन्यत्वात् प्रथमज्ञानपदं तु नैय्यायिकाभिमतानुमिति ग्राह्यत्वेन सिद्ध-साधनवारणाय । न चेदं ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात् इति तदभि-मतानुमितेः पक्षीभूतस्य प्रामाण्यविषयकव्याप्तिज्ञानादिजन्यत्वेन तदजन्य-ज्ञानविषयत्वान्न सिद्धसाधनमिति वाच्यम् । घटत्वप्रकारकमिदं ज्ञानं घटत्ववद्विशेष्यकं घटत्वाभाववदविषेष्यकत्वे सति सविशेष्यकत्वा-दित्यनुमितिग्राह्यत्वेन सिद्धसाधनसम्भवात् । अत्र पक्षव्याप्त्यादिज्ञानस्य प्रामाण्याविषयकत्वेऽपि पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिरूपाया

१. ''जन्यत्वेऽपि'' इति स्यात् ।

अनुमितौ प्रामाण्यभावात् द्वितीयज्ञानपदं तु अप्रसिद्धिवारणाय । व्यापारानुबन्धितया तज्ज्ञानविषयकात्ममनोयोगादिभिरन्यस्यैवाप्रसिद्धेः ।

न च प्रमेतिद्वितीयज्ञानपदे तद्दोषतादवस्थ्यम् । **मिश्रमते**ऽनुव्यवसायजनकव्यवसायस्य व्यापारानुबन्धितया पक्षीभूतप्रामाण्याश्रयस्वविषयकत्वात् स्वव्यापारीभूतानुव्यवसायविषयत्वस्यैव व्यापारानुबन्धितया तज्ज्ञानविषयत्वशब्देनोक्तमिति वाच्यम् । प्रतीत्यनुबन्धितालाभार्थमेव ज्ञानपदोपादानात् । एवञ्च प्रतीत्यनुबन्धितया तज्ज्ञानविषयकत्वेन व्यवसायस्येति नोक्तदोषतादवस्थ्यम् ।

तृतीयज्ञानपदं तु तज्ज्ञानविषयकज्ञानजन्यैरात्ममनोयोगादिभिर्व्यापारानुबन्धितया प्रामाण्यविषयीकरणेन सिद्धसाधनवारणाय मनोयोगादिजन्यानुमित्यादिविषयस्यैव व्यापारानुबन्धितया तद्विषयशब्दार्थत्वात् । ज्ञानपदसन्निधौ तु प्रतीत्य[1]नुबन्धिनैव लभ्यते । तेन तज्ज्ञानविषयकज्ञानजन्यव्याप्तिज्ञानादिना प्रामाण्यस्यानुमितिद्वारा [2]अनुविषयीकरणात् पुनः सिद्धसाधनमिति शङ्कायाः कृते सति सङ्क्षेपः ग्राह्यत्वेन विशयत्वेन अग्राह्यत्वेनाविषयत्वेन गृह्यते इति विषयीकृत एव ।

न्यायदीपः

साधारणं निरुक्त्यन्तरमप्यनूद्य निराह ।। **नापीति** ।। तज्ज्ञानं ग्राह्यप्रामाण्याश्रयज्ञानम् । तद्विषयकं ज्ञानं गुरुमते तदेव । भट्टमते ज्ञाततालिङ्गकतदनुमितिः । मिश्रमते तदनुव्यवसायः । तज्जन्यं यज्ज्ञानं तदेव । तद्विषयत्वमित्यर्थः । अत्र ज्ञानाजन्येत्युक्त्या अनुमितिविषयत्वेन सिद्धसाधनतेति शङ्का, ज्ञानविषयकेत्युक्त्या गुरुमतेऽनुमित्यादिप्रामाण्यांशे भट्टमते मिश्रमते च सर्वत्र प्रामाण्यानुमित्यनुव्यवसाययोः व्याप्तिज्ञानव्यव-

१. "अनुभन्धितैव" इति स्यात् । २. "अविषयीकरणात्" इति स्यात् ।

सायाभ्यां जन्यत्वेन बाध इति शङ्का, तदित्युक्त्या पुनरपि गुरुमते लिङ्ग-ज्ञानस्य स्वप्रकाशत्वेन ज्ञानविषयकज्ञानत्वात्तज्जन्यानुमितिप्रामाण्यांशे बाध इति, भट्टमते ज्ञाततालिङ्गकानुमितेर्ज्ञानविषयव्याप्तिज्ञानजन्यत्वाद्बाध इति मिश्रमतेऽप्यनुव्यवसायस्य व्यवसायविषयकस्य तज्जन्यतया तन्निष्ठप्रामाण्यांशे बाध इति शङ्का निरस्ता । भट्टमते सामान्यप्रत्यासत्तेरभावेन व्याप्तिज्ञानस्य ग्राह्यप्रामाण्याश्रयज्ञानाविषयत्वात् । मतान्तरे तु व्यक्तम् ।

अत्राद्यज्ञानपदं तत्पदस्य तद्ग्रन्थे पूर्वनिर्दिष्टप्रामाण्यपरामर्शितया सिद्धसाधनत्ववारणाय । द्वितीयं तु व्यापारानुबन्धितया तज्ज्ञानविषयकै-रात्मादिभिः प्रामाण्यज्ञानजननादसिद्धिवारणाय प्रतिपत्त्यनुबन्धितया तद्विषयकत्वलाभार्थम् । तृतीयमपि व्यापारानुबन्धितयात्मादिभिरेव सिद्धसाधनतावारणाय प्रतिपत्त्यनुबन्धितया विषयत्वलाभायेत्याहुः ।

ग्रन्थकर्तुः कुतो नियमो नाभिमत इत्यत आह ।। **स्वतस्त्वेति** ।। **तज्ज्ञानविषयकज्ञानजन्येति** ।। पक्षज्ञानजन्यत्वादनुमितेरिति भावः । **ग्राह्यत्वेन** ।। विषयीकार्यत्वेनेत्यर्थः । **अग्राह्यत्वेन** ।। अविषयीकार्यत्वेन । **गृह्यत एव** ।। विषयीक्रियत एवेत्यर्थः ।

किमिदं स्वतस्त्ववादिमात्रसाधारणम् उत निरीश्वरमीमांसकमात्रसाधारणम् निर्वचनम् ? आद्य आह ।। **स्वतस्त्वपक्ष इति** ।। सिद्धान्ते साक्षि-शब्दितानुव्यवसायज्ञानस्य नित्यत्वेऽपि प्रामाण्यविषयकत्वरूपविशिष्टवेषेण जन्यत्वादिति भावः ।

अन्त्य आह ।। **परतस्त्वपक्ष इति** ।। एवं रूपे स्वतस्त्वे त्वां प्रत्युच्यमाने ग्राह्यप्रामाण्याश्रयविषयं यदीश्वरज्ञानं तदजन्यं तदेव । तद्विषय-त्वेन त्वया सिद्धसाधनताया वक्तुं शक्यत्वादिति भावः । अयं च दोषः

प्राचीनपक्षेपि समः । यत्त्वीश्वरनिरासाभिप्रायेणैवं साध्यस्य मीमांसकेनोच्यमानत्वान्न सिद्धसाधनतादोष इति । तन्न । अर्थान्तरानिवारणादिति रुचिदत्तेनैव दूषितत्वात् ।

श्रीलक्ष्मीनाथतीर्थटीका

मण्युक्तं लक्षणान्तरं दूषयितुमनुवदति ।। **नापीति** ।। यद्यपि **मणौ** तज्ज्ञानविषयकज्ञानाजन्यज्ञानग्राह्यमित्युक्तम् । तथापि ग्राह्यमित्यस्य विषयत्वमर्थ इत्येवानूदितम् । **तज्ज्ञानं** पक्षे तु तत्प्रामाण्याश्रयज्ञानं तद्विषयकम् । **गुरुमते** स्वप्रकाशरूपम् । तदेव **भट्टमते** ज्ञाततालिङ्गकानुमितिः । **मिश्रमते** तदनुव्यवसायः । तदजन्यं तदेव ग्राह्यमित्यर्थः । ज्ञानाजन्यज्ञानग्राह्यमित्युक्ते **मिश्रमते भट्टमते** बाधः । अनुव्यवसायस्य ज्ञाततालिङ्गकानुमितेश्च व्यवसायव्याप्तिज्ञानजन्यत्वादतः उक्तम् ।। **ज्ञानविषयकेति** ।। ननु तथापि ज्ञाततालिङ्गकानुमितेः ज्ञानविषयकव्याप्तिज्ञानजन्यत्वाद्बाधः । **मिश्रमते** अनुव्यवसायप्रामाण्यांशे बाधः इत्यतः उक्तम् ।। **तदिति** ।। तथा च **मिश्रमते** ग्राह्यप्रामाण्याश्रयस्यानुव्यवसायस्य व्यवसायजन्यत्वेऽपि ग्राह्यप्रामाण्याश्रयज्ञानविषयकज्ञानत्वाभावात् । भट्टमते ज्ञानत्वसामान्यप्रत्यासत्त्यनभ्युपगमेन प्रामाण्यानुमितिजनकव्याप्तिज्ञानस्य ग्राहकप्रामाण्याश्रयज्ञानविषयकज्ञानत्वाभावान्न बाधः । प्रथमज्ञानपदं केवलतत्पदस्य प्रामाण्यमात्रपरामर्शकतया सिद्धसाधनवारणाय । द्वितीयज्ञानपदं त्वप्रसिद्धिवारणाय । व्यापारानुबन्धितया तज्ज्ञानविषयकनैय्यत्यादात्मादिभिर्ज्ञानस्य जननात् । ज्ञानपदसन्निधौ तु प्रतीत्यनुबन्धिता लभ्यते । तृतीयज्ञानपदमपि ग्राह्यत्वविषयत्वपर्यवसन्नतया व्यापारानुबन्धिविषयताकैरात्मादिभिरेव सिद्धसाधनवारणायेति द्रष्टव्यम् ।

ज्ञानाजन्यज्ञाने विषयत्वं सम्भावितमित्येतावदेव न तु नियम इत्याह ।। **अस्मिंश्चेति** ।। नियम इति वदता वक्तव्यम् । ज्ञानाजन्यज्ञानस्यैव विषय इति नियमः उत ज्ञानाजन्यज्ञाने विषय एवेति ।। नाद्य इत्याह ।। **स्वतस्त्वपक्षेपीति** ।। तज्ज्ञानविषयकेति पक्षे तु तत्प्रामाण्याश्रयज्ञान-विषयकव्याप्तिज्ञानजन्यानुमित्यापि प्रामाण्यस्य ग्राह्यत्वाङ्गीकारादिति भावः । द्वितीयं निराह ।। **तज्ज्ञानविषयकेति** ।। प्रामाण्याश्रयघटादिज्ञान-विषयकानुव्यवसायाजन्येन घटज्ञानेन घटज्ञानप्रामाण्यस्याग्रहणादिति भावः ।

अनूदितं दूषयति ।। **स्वतस्त्वपक्षेऽपीति** ।। **व्यवसायविषयकेति** ।। ईश्वरज्ञानस्य सर्वविषयकत्वेन प्रामाण्याश्रयव्यवसायविषयकत्वात् । अनु-व्यवसायस्येश्वरजन्यत्वाच्च बाधादितीत्यर्थः । न केवलं बाधः नैय्यायिकमते प्रामाण्याश्रयव्यवसायविषयकानुव्यवसायाजन्येश्वरज्ञानग्राह्यत्वेन सिद्ध-साधनमित्याह ।। **परतस्तवपक्षेऽपीति** ।। उपलक्षणमेतत् । व्यतिरेक-साधनेऽप्रसिद्धिश्चेति ।

तर्कताण्डवम्

नापि तज्ज्ञानविषयकजन्यज्ञानाजन्यजन्यज्ञानविषयत्वं वा तज्ज्ञानविषयकसमानाधिकरणज्ञानाजन्यसमानाधिकरणज्ञानविषयत्वं वा स्वतस्त्वम् । परतस्त्वपक्षेऽपि प्रामाण्यस्यैवंविधं सामान्यप्रत्त्या-सत्तिजन्यं प्रमेयमिति यज्ज्ञानं तद्विषयत्वेन सिद्धसाधनात् । विषय-पदेन प्रकारत्वविवक्षायामपि स्वतस्त्वपक्षेपि प्रामाण्यस्य सर्वं ज्ञानं गुण इति शब्दजन्यव्यवसायविषयकानुव्यवसायस्य सर्वज्ञानान्तर्भूत-स्वविषयकव्यवसायजन्यत्वेन तदजन्यत्वाभावेनांशे बाधात् । एतदभावरूपपरतस्त्वसाधनेंऽशे सिद्धसाधनाच्च । नचैवंविधव्यवसाय-

प्रामाण्यस्यापक्षत्वान्न बाध इति वाच्यम् । सामान्ये विप्रतिपत्तौ विशेषे साध्यसाधनेऽर्थान्तरात् (३) ।

युक्तिरत्नाकरः

स्वतस्त्वपक्ष इति ।। निषेधकोटाविति शेषः । एवञ्च स्वतस्त्वपक्षे प्रामाण्यविषयकत्वेनाभिमतास्यानुव्यवसायादेः, न्यायमते तज्ज्ञानविषयकेश्वरज्ञानजन्यत्वात् तदजन्यज्ञानं ईश्वरीयमेवेति तद्विषयत्वाभावस्य, तन्मतेऽप्रसिद्ध्या निषेधकोटौ बाध इत्यर्थः ।

यद्वा स्वतस्त्ववादिना ईश्वरानङ्गीकारात् कथं बाधः । न चैतद्विधिकोटेर्नमीमांसकमतमात्रसाधारण्यं किन्तु सकलस्वतस्त्वसाधारणम् । एवञ्च स्यात्तन्मते ईश्वराभ्युपगमात्स्वतस्त्वसत्वाद्बाध इति वाच्यम् । स्वमते ईश्वराभ्युपगमेऽपि साक्षिणस्तज्ज्ञानजन्यत्वेन तद्ग्राह्यत्वसत्वेन बाधानवकाशात् । सम्भवमात्रस्यैव साध्यत्वेन प्रामाण्यानुमितेरीश्वरज्ञानजन्यत्वेऽपि न बाध इत्यस्वरसादाह– **परतस्त्व पक्ष इति ।। सिद्धसाधनात्** न्यायमतसिद्धस्य साधनात् अर्थान्तरत्वादित्यर्थः । एवञ्चेश्वरनिराकरणाभिप्रायेणैव परेणैवंविधसाध्यकरणात् सिद्धसाधनावकाश इति दूषणमलग्नकं बोध्यम् । नापीति सर्वस्यापि जन्यज्ञानस्य तज्ज्ञानविषयकेश्वरज्ञानजन्यत्वेनाप्रसिद्धिवारणायाद्यं जन्यपदम् । द्वितीयं त्वीश्वरज्ञानमादाय सिद्धसाधनवारणाय । एवमुत्तरविवक्षाया समानाधिकरणपदद्वयं बोध्यम् । सिद्धसाधनादित्युपलक्षणम् । मीमांसकमते व्यावृत्त्यभावेन जन्यपदद्वयं समानाधिकरणपदद्वयं व्यर्थमिति बोध्यम् । न च समानाधिकरणपदव्यावृत्यर्थं व्यधिकरणज्ञानं सिद्धमवेति वाच्यम् । तद्व्यावृत्तेरनुपयुक्तत्वेन तदर्थस्तदुपादानायोगादिति भावः ।। **प्रकारत्वेति ।।** न च तद्व्यावृत्यसामान्यलक्षणप्रत्यासत्तेस्तेनानभ्युपगमात्तद्विवक्षावैफल्यमिति

वाच्यम् । न्यायमतोक्तसंशयानुपपत्तिरूपदूषणानुसारेण प्रामाण्य उक्तज्ञान-प्रकारकत्वपर्यन्तविवक्षाया आवश्यकत्वादिति भावः ।

प्रामाण्यस्य स्वतस्त्वपक्षेऽपि इत्युपक्रमः । यद्वा प्रामाण्यस्य अंश इति सम्बन्धः । एवं च प्रामाण्यांशे पक्षीभूतप्रामाण्ये द्वयंशभूते ''सर्वं ज्ञानं गुण'' इत्येतज्ज्ञानप्रामाण्यांशे बाध इत्यर्थः ।। **सामान्ये इति** ।। नन्वेतदेव विप्रतिपत्तिवाक्यम् । तथा च यदेव विप्रतिपत्तौ धर्मितावच्छेदकमात्रेण उपात्तं तदेवोत्तरत्र साध्यसाधनार्थं पक्षतावच्छेदकत्वेनोपादास्यते । तथा च कथमर्थान्तरमिति चेन्न । प्रामाण्यमात्रे विवादे तद्विशेष्ये साध्ये साधनार्थं विप्रतिपत्तिवाक्ये धर्मितावच्छेदकसङ्कोचस्य सामान्यधर्मावच्छिन्नस्वतस्त्व-परतस्त्वसंशयनिवर्तकनिर्णयानुपयोगेनार्थान्तरत्वादित्यर्थात् । तथा च साध्यसाधन इति च धर्मिणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरान् इति वा निमित्तसप्तमी बोध्या । यद्वा पूर्वविप्रतिपत्तौ ज्ञानप्रामाण्यसामान्य एव प्रस्तुते सति तदपहायेह प्रामाण्यविशेषे साध्यसाधनाय विशेषोपादानस्य प्रकृतानुपयोगादित्यर्थः ।

न्यायदीपः

यज्ञपतिनोक्तविवक्षामनूद्य निराह ।। **नापीति** ।। सर्वस्यापि जन्यज्ञानस्य तज्ज्ञानविषयकेश्वरज्ञानजन्यत्वेनाप्रसिद्धिवारणायाद्यं जन्यपदम् । द्वितीयं त्वीश्वरज्ञानमादाय सिद्धासाधनतानिरासार्थम् । एवमग्रे समानाधि-करणपदद्वयकृत्यं ध्येयम् । युगपदेव विवक्षाद्वयेपि दोषमाह ।। **परत-स्त्वेति** ।। **एवंविधम्** तज्ज्ञानविषयकजन्यज्ञानाजन्यजन्यरूपम् तज्ज्ञान-विषयकसमानाधिकरणज्ञानाजन्यसमानाधिकरणरूपं चेत्यर्थः ।

।। **प्रमेयमिति** ।। प्रमेयत्वप्रकारकं प्रमेयविशेष्यकं यज्ज्ञानं तत्

प्रामाण्यस्यापक्षत्वान्न बाध इति वाच्यम् । सामान्ये विप्रतिपत्तौ विशेषे साध्यसाधनेऽर्थान्तरात् (३) ।

युक्तिरत्नाकरः

स्वतस्त्वपक्ष इति ।। निषेधकोटाविति शेषः । एवञ्च स्वतस्त्वपक्षे प्रामाण्यविषयकत्वेनाभिमतास्यानुव्यवसायादेः, न्यायमते तज्ज्ञानविषयकेश्वरज्ञानजन्यत्वात् तदजन्यज्ञानं ईश्वरीयमेवेति तद्विषयत्वाभावस्य, तन्मतेऽप्रसिद्ध्या निषेधकोटौ बाध इत्यर्थः ।

यद्वा स्वतस्त्ववादिना ईश्वरानङ्गीकारात् कथं बाधः । न चैतद्विधिकोटेर्नमीमांसकमतमात्रसाधारण्यं किन्तु सकलस्वतस्त्वसाधारणम् । एवञ्च स्यात्तन्मते ईश्वराभ्युपगमात्स्वतस्त्वसत्वाद्बाध इति वाच्यम् । स्वमते ईश्वराभ्युपगमेऽपि साक्षिणस्तज्ज्ञानजन्यत्वेन तद्ग्राह्यत्वसत्वेन बाधानवकाशात् । सम्भवमात्रस्यैव साध्यत्वेन प्रामाण्यानुमितेरीश्वरज्ञानजन्यत्वेऽपि न बाध इत्यस्वरसादाह– **परतस्त्व पक्ष इति ।। सिद्धसाधनात्** न्यायमतसिद्धस्य साधनात् अर्थान्तरत्वादित्यर्थः । एवञ्चेश्वरनिराकरणाभिप्रायेणैव परेणैवंविधसाध्यकरणात् सिद्धसाधनावकाश इति दूषणमलग्नकं बोध्यम् । नापीति सर्वस्यापि जन्यज्ञानस्य तज्ज्ञानविषयकेश्वरज्ञानजन्यत्वेनाप्रसिद्धिवारणायाद्यं जन्यपदम् । द्वितीयं त्वीश्वरज्ञानमादाय सिद्धसाधनवारणाय । एवमुत्तरविवक्षाया समानाधिकरणपदद्वयं बोध्यम् । सिद्धसाधनादित्युपलक्षणम् । मीमांसकमते व्यावृत्त्यभावेन जन्यपदद्वयं समानाधिकरणपदद्वयं व्यर्थमिति बोध्यम् । न च समानाधिकरणपदव्यावृत्यर्थं व्यधिकरणज्ञानं सिद्धमवेति वाच्यम् । तद्व्यावृत्तेरनुपयुक्तत्वेन तदर्थस्तदुपादानायोगादिति भावः ।। **प्रकारत्वेति ।।** न च तद्व्यावृत्यसामान्यलक्षणप्रत्यासत्तेस्तेनानभ्युपगमात्तद्विवक्षावैफल्यमिति

वाच्यम् । न्यायमतोक्तसंशयानुपपत्तिरूपदूषणानुसारेण प्रामाण्य उक्तज्ञान-प्रकारकत्वपर्यन्तविवक्षाया आवश्यकत्वादिति भावः ।

प्रामाण्यस्य स्वतस्त्वपक्षेऽपि इत्युपक्रमः । यद्वा प्रामाण्यस्य अंश इति सम्बन्धः । एवं च प्रामाण्यांशे पक्षीभूतप्रामाण्ये द्वयंशभूते "सर्वं ज्ञानं गुण" इत्येतज्ज्ञानप्रामाण्यांशे बाध इत्यर्थः ।। **सामान्ये इति** ।। नन्वेतदेव विप्रतिपत्तिवाक्यम् । तथा च यदेव विप्रतिपत्तौ धर्मितावच्छेदकमात्रेण उपात्तं तदेवोत्तरत्र साध्यसाधनार्थं पक्षतावच्छेदकत्वेनोपादास्यते । तथा च कथमर्थान्तरमिति चेन्न । प्रामाण्यमात्रे विवादे तद्विशेष्ये साध्ये साधनार्थं विप्रतिपत्तिवाक्ये धर्मितावच्छेदकसङ्कोचस्य सामान्यधर्मावच्छिन्नस्वतस्त्व-परतस्त्वसंशयनिवर्तकनिर्णयानुपयोगेनार्थान्तरत्वादित्यर्थात् । तथा च साध्यसाधन इति च धर्मिणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरान् इति वा निमित्तसप्तमी बोध्या । यद्वा पूर्वविप्रतिपत्तौ ज्ञानप्रामाण्यसामान्य एव प्रस्तुते सति तदपहायेह प्रामाण्यविशेषे साध्यसाधनाय विशेषोपादानस्य प्रकृतानुपयोगादित्यर्थः ।

न्यायदीपः

यज्ञपतिनोक्तविवक्षामनूद्य निराह ।। **नापीति** ।। सर्वस्यापि जन्यज्ञानस्य तज्ज्ञानविषयकेश्वरज्ञानजन्यत्वेनाप्रसिद्धिवारणायाद्यं जन्यपदम् । द्वितीयं त्वीश्वरज्ञानमादाय सिद्धासाधनतानिरासार्थम् । एवमग्रे समानाधि-करणपदद्वयकृत्यं ध्येयम् । युगपदेव विवक्षाद्वयेपि दोषमाह ।। **परत-स्त्वेति** ।। **एवंविधम्** तज्ज्ञानविषयकजन्यज्ञानाजन्यजन्यरूपम् तज्ज्ञान-विषयकसमानाधिकरणज्ञानाजन्यसमानाधिकरणरूपं चेत्यर्थः ।

।। **प्रमेयमिति** ।। प्रमेयत्वप्रकारकं प्रमेयविशेष्यकं यज्ज्ञानं तत्

[१]ग्राह्यप्रमाण्याश्रयविषयकं घटादिज्ञानरूपजन्यसमानाधिकरणज्ञानाजन्यं जन्यं समानाधिकरणं प्रमेयत्वप्रकारेण प्रामाण्यविषयकं चेति तद्विषयत्वेन सिद्धसाधनमित्यर्थः । एतच्चोपलक्षणं निरीश्वरमते व्यर्थविशेषणत्वं च बोध्यम् । एतेन समानाधिकरणेति विशेषणीयमिति शिरोमणिपक्षोऽपि प्रत्युक्तः ।

ननु प्रमेयमिति ज्ञाने विशेष्यतया प्रामाण्यस्य विषयत्वेऽपि न प्रकारतया । तथात्वेन विषयत्वं च निरुक्तौ विवक्षितमित्यत आह ।। **विषयेति** ।। प्रामाण्यस्य इत्यस्यानुव्यवसायस्येत्यत्रान्वयः । प्रामाण्यगोचरस्येत्यर्थः । गुणत्वप्रकारकसर्वज्ञानविशेष्यकशाब्दज्ञाननिष्ठप्रामाण्यग्राहकोनुव्यवसायो व्यवसायजन्यः । स च व्यवसायः सर्वज्ञानविषयको ज्ञानत्वेन स्वात्मानमपि विषयीकरोतीति तत्प्रामाण्यस्य तज्ज्ञानविषयकज्ञानजन्यज्ञानप्रकारत्वमेवास्ति । तदजन्यज्ञानप्रकारत्वं नेति सर्वं ज्ञानं गुण इति ज्ञाननिष्ठप्रामाण्यांशे बाध इत्यर्थः । सर्वज्ञानान्तर्भूतं च तत्स्वं चेति विग्रहः । स्वपदेन व्यवसायः ।

केनचिदुक्तसमाधिमाशङ्क्य निराह ।। **नचैवं विधेति** ।। **अर्थान्तरादिति** ।। सामान्यधर्मावच्छिन्नस्वतस्त्वपरतस्त्वसंशयनिवर्तनानुपयोगादर्थान्तरादिति भावः ।

श्रीलक्ष्मीनाथतीर्थटीका

तज्ज्ञानविषयकज्ञानाजन्यज्ञानविषयत्वं वदतो **मणि**कारस्याभिप्रेतं लक्षणद्वयमाशङ्क्य निराकरोति ।। **नापीति** ।। आद्यलक्षणे तज्ज्ञानविषयकजन्यज्ञानजन्येत्युक्त अनुव्यवसायस्येश्वरज्ञानजन्यत्वमादाय बाध इत्येतन्निरस्तम् । जन्यज्ञानविषयत्वमित्युक्त्येश्वरज्ञानविषयत्वमादाय

---

१. अत्र "ग्राह्यप्रामाण्याश्रयघटादिज्ञानविषयकजन्यसमानाधिकरणज्ञानाजन्यं" इति पाठश्चेत् स्वरसः इति भाति ।

सिद्धसाधनं च निरस्तम् । एवं समानाधिकरणेत्युक्तेश्वरज्ञानस्य प्रामाण्याश्रय-ज्ञानसामानाधिकरण्याभावादुक्तदोषद्वयं निरस्य लक्षणद्वयमयुक्तमित्यत्र हेतुमाह ।। **परतस्त्वपक्षेऽपीति** ।। **प्रमेयमिति** ।। [1]**प्रामाण्यप्रत्यासत्येति** ।। जन्यज्ञानं सर्वविषयत्वेन प्रामाण्याश्रयज्ञानविषयं समानाधिकरणं च भवति । तदजन्यं तदेव । तद्विषयत्वेन प्रामाण्यस्य सिद्धसाधनादित्यर्थः ।

सिद्धसाधनपरिहारं शङ्कते ।। **विषयपदेनेति** ।। तदा च प्रमेयमिति सामान्यप्रत्यासत्तिजन्यज्ञाने प्रमेयत्वस्य प्रकारत्वेन प्रामाण्यस्य प्रकारत्वा-भावादिति शङ्कितुर्हृदयम् । अत्रापि बाधमाह ।। **स्वतस्त्वपक्षेऽपीति** ।। सर्वं ज्ञानं गुण इति शब्देन सर्वज्ञानविषयकं ज्ञानं जायत इति सर्वज्ञानमध्ये स्वस्यापि प्रवेशात्स्वविषयं च भवति । तदनुव्यवसायस्य तज्जन्यत्वेन तदजन्यत्वाभावात् । सर्वं ज्ञानं गुण इति शब्दजन्यव्यवसायप्रामाण्यांशे बाधादित्यर्थः । दूषणान्तरं चाह ।। **एतदभावेति** ।। सर्वं ज्ञानं गुण इति शाब्दव्यवसायप्रामाण्यं तज्ज्ञानविषयकजन्यज्ञानप्रकारो नेति सिद्धसाधनात् । ननु सर्वं ज्ञानं गुण इति शाब्दव्यवसायप्रामाण्यस्यापक्षत्वान्न बाधः । घटादिज्ञानप्रामाण्यस्यैव पक्षत्वादिति शङ्कते ।। **न चैवमिति** ।। तत्र हेतुमाह ।। **सामान्य इति** ।। ज्ञानप्रामाण्यं स्वतः परतो वेति सामान्य-विप्रतिपत्तौ धर्मीभूतप्रामाण्यस्य पक्षत्वपरित्यागेन घटादिज्ञानप्रामाण्यं स्वतः परतो वेति सामान्यविप्रतिपत्तौ धर्मीभूतस्य साधनेऽर्थान्तरत्वादिति भावः ।

तर्कताण्डवम्

एतेन तज्ज्ञानविषयकज्ञानाजन्यज्ञानविषयत्वमेव स्वतस्त्वम् । ननु जन्यपदद्वयं वा समानाधिकरणपदद्वयं वा प्रक्षेप्यम् । न चैवं

१. "सामान्यप्रत्यासत्तीति" इति स्यात् ।

पूर्वोक्तेश्वरज्ञानमादाय बाधसिद्धसाधनते स्यातामिति वाच्यम् । तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरूपजन्यत्वस्य अभावरूपमजन्यत्वं हि द्वेधा । तद्व्यतिरेकप्रयुक्तव्यतिरेकाप्रतियोगित्वेन वा तद्व्यतिरेकाप्रयुक्तव्यतिरेकप्रतियोगित्वेन वेति । तत्राद्यस्याजन्यत्वस्येश्वरज्ञाने सत्वेऽपि मया विवक्षितस्य द्वितीयस्याभावात् । न हीश्वरज्ञानं प्रागभावरूपव्यतिरेकप्रतियोगीति निरस्तम् ।

तथापि पूर्वोक्तस्य प्रमेयमिति ज्ञानविषयत्वेन सिद्धसाधनस्य सर्वं ज्ञानं गुण इत्यादिनोक्तस्य बाधस्य चापरिहारादिति दिक् (४) ।

युक्तिरत्नाकरः

[1]विपक्षधरविवक्षायुक्तदूषणातिदेशेन दूषयितुमनुवदति ।। **एतेनेति** ।। सामानाधिकरणपदद्वयं वेति सामान्यप्रत्यासत्त्याद्यजन्यत्वं चेति इत्यपि बोध्यम् ।। **तद्व्यतिरेकेति** ।। यद्यपि नेदं जन्यत्वं आकाशादिजन्ये [2]बाषष्पादौ प्रागभावजन्येश्वरज्ञानादिजन्ये कार्यभावे चाव्याप्तेः । व्यतिरेकशब्दप्रागभावस्याकाशप्रागभावश्वरज्ञानादौ अभावेन तत्प्रयुक्तप्रागभावाप्रतियोगित्वस्य शब्दादावभावात् कुम्भकारकपित्राद्यजन्यघटादावपि व्याप्तेश्च घटादिप्रागभावेऽपि कुम्भकारकपितृप्रागभावप्रयुक्तत्वशब्दितस्य तद्व्यापकस्य वा योगक्षेमसाधारणस्य एवं सति यस्मिन् सतीत्याद्येवंविधजन्यत्वस्य वा सत्वात् । तथाप्येतद्विप्रतिपत्यन्तर्भूतजन्यत्वस्योक्तरूपत्वे न कोऽपि दोष इति भावः । तदिदमाह– **मया विवक्षितस्येति** ।। **तत्रेति** ।। तज्ज्ञानविषयकानुव्यवसायादिप्रागभावजन्यप्रागभाव प्रतियोगित्वाभावरूपाजन्यत्वस्य सर्वथा प्रागभावप्रतियोगिनीश्वराभावे सत्त्वेऽपीत्यर्थः । मयेति तज्ज्ञानविषयकज्ञानप्रागभावप्रतियोगित्वरूपस्येत्यर्थः । अत्र चाद्यव्यतिरेकपदस्य

१. "पक्षधर" इति स्यात् । २. "शब्दादौ" इति स्यात् ।

संसर्गाभावमात्रपरत्वे तज्ज्ञानविषयकज्ञानात्यन्ताभावरूपव्यतिरेकाप्रयुक्तप्रागभावप्रतियोगिनीं इदं प्रमा इत्यनुमितिमादाय सिद्धसाधनम् । अतः प्रागभावपरत्वम् । यद्यपि तज्ज्ञानविषयकज्ञानव्यतिरेकत्वावच्छिन्नेन केनाप्यप्रयुक्तो यः प्रागभावस्तत्प्रतियोगिज्ञानप्रकारत्वविवक्षायां न कोऽपि दोषः । तथापि सामान्यमुखेनापि प्रागभावमादायैवोपपदनीयत्वात्तत्प्रतियोगित्वमेवोक्तमिति बोध्यम् । द्वितीयव्यतिरेकपदस्य संसर्गाभावमात्रपरत्वे ''इदं ज्ञानं प्रमा'' इत्यनुमितिमादायैव सिद्धसाधनम् । ध्वंसरूपतद्व्यतिरेकस्य तज्ज्ञानविषयज्ञानव्यतिरेकेण केनाप्यजन्यत्वात्तदव्यापकत्वाच्च । न हि तत्तदनुमितिध्वंसानधिकरणकालवर्तितज्ज्ञानविषयकज्ञानात्यन्ताभावादि व्यापकताऽस्ति । अतः प्रागभावपरत्वमिति ।

।। **प्रमेयमिति** ।। न चात्र प्रमेयत्वस्य प्रकारत्वेऽपि प्रकारतया प्रकारत्वविवक्षयैव सिद्धसाधनोद्धार इति वाच्यम् । विषयमात्राभिप्रायेणैव तदभिधानात् । प्रमेयमित्यत्रापि प्रमात्वस्य परम्परया प्रकारत्वाच्च । वस्तुतः प्रमा इयमिति प्रमाविभागे इयं प्रमेति प्रमात्वविभागसामान्यप्रत्यासत्तिमादाय उक्तदोषो बोध्यः । नचैवं पूर्वोक्तत्वोक्तिविरोधः । सामान्यप्रत्यासत्तिजन्यज्ञानमादाय सिद्धसाधनस्य पूर्वोक्तत्वमात्रेण तदभिधानसम्भवात् ।

ननु प्रमात्वसामान्यप्रत्यासत्तिज्ञानमादायापि न सिद्धसाधनम् । ज्ञातस्यैव तस्य प्रत्यासत्तित्वेनाज्ञातस्य बहिरर्थगोचरस्य लौकिकप्रत्यक्षस्य भानस्यायोगादलौकिकप्रत्यक्षरूपस्य वक्ष्यमाणरीत्या तज्ज्ञानविषयकोपनयजन्यत्वादनुमितिरूपस्येदं ज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वादित्येवंविधलिङ्गजन्यस्य च प्रामाण्याश्रयपक्षज्ञानजन्यत्वादयं प्रमावानित्यादिरूपस्य तथाविधसाध्यज्ञानजन्यत्वाच्छाब्दज्ञानस्यापि इदं ज्ञानं, ज्ञानं प्रमेत्यादिपदावलीप्रयोज्यस्य तथाविधपदार्थोपस्थितिजन्यत्वात्तादृशज्ञान एव प्रकारत्वेन तदजन्यज्ञानप्रकारत्वाभावात् । न च लाघवात्सामान्यज्ञानमेवासत्तिज्ञानं

न अन्यत् गौरवादिति वाच्यम् । स्वरूपतस्तस्यासत्तित्वे सामान्य-प्रत्यासत्तिजन्यज्ञाने प्रत्यासत्तिभूतसामान्यप्रकारत्वनियमेन धर्मिज्ञान एव प्रमात्वस्य प्रकारीयभानापत्त्या विशेषादर्शनात् इदं ज्ञानं प्रमा न वा इति संशयानापत्तेः । अज्ञातप्रमात्वस्य प्रत्यासत्तित्वे प्रागनुपस्थितत्वेन प्रकारतयोक्तज्ञानप्रकारत्वरूपसाध्ये सिद्धसाधनमिति प्रत्यवस्थानानुपपत्तेश्च ।

किञ्च रसत्वादेश्चक्षुरादावप्रत्यासत्तित्वं सर्वानुभवसिद्धमिति तदिन्द्रिय-जन्यज्ञानविषयसामान्येनासत्तिः तदिन्द्रियजन्यज्ञानविषयतावच्छेदकधर्मवत्व-रूपतदिन्द्रियजन्यज्ञानयोग्यतापेक्षयास्यैव लघुत्वादिति ज्ञातसामान्यासत्तित्वे सिद्धे इन्द्रियसामान्यासत्तिरित्यङ्गीकारेऽपि संयोगसमवायादीनामनेकत्वेन ज्ञातत्वमेवैकं लाघवादासत्तिरिति ज्ञानसामान्यासत्तित्वसिद्धेरिति चेन्न ।

ज्ञानसामान्यासत्तित्वपक्षेपि धर्मिज्ञानात्पूर्वमेव इतरस्याप्रामाण्य-रूपकोट्युपस्थितौ तस्य सामान्यस्य स्वप्रकारनिश्चयजनकत्वनियमेन कथं तत्संशयः । यदि च संशयरूपफलस्य सर्वानुभवसिद्धतया तदनुरोधेन ज्ञातस्यापि तस्य सामान्यस्य तद्धर्मितावच्छेदकसामानाधिकरण्येन न तन्निश्चयकता । तदा स्वरूपतोऽपि तस्य तादृशफलानुरोधेन ज्ञातस्यापि तस्य तादृशफलानुरोधेनैव न तु धर्मिणि स्वप्रकारकनिश्चयजनकता इति समः । यदि च स्वरूपसतः संयुक्तसमवायादीन्द्रियसम्बन्धवतः तस्य सामग्र्यवैकल्यात् स्वप्रकारकनिश्चयजनकतावश्यम्भावः, तदा ज्ञातस्य तस्येन्द्रियसम्बन्धस्य स्वप्रकारकनिश्चयजनकतावश्यम्भाव इति समम् । प्रत्युत ज्ञातसामान्यासत्तिपक्षे तस्य प्राक् ज्ञातत्वेन तत्प्रकारकनिश्चय-स्यावश्यम्भावात् संशयानुपपत्तिः । अज्ञातसामान्यासत्तिपक्षे तु तस्य प्राक् अज्ञाततया तत्प्रकारकनिश्चयाभावेन विरोध्यभावसंशयोपपत्तिरिति वैपरीत्यम् ।

यदप्यज्ञातस्य प्रमात्वस्येत्यादि तन्न । प्राक् ज्ञातस्यापि प्रमात्वस्य

युवाभ्यां प्रकारत्वस्य स्वीकारेण सामान्यप्रत्यासत्तिज्ञानेऽप्यज्ञातस्यैव प्रकारत्वसम्भवे प्रकारत्वपर्यन्तविधिकोटावपि सिद्धसाधनसम्भवात् ।

यदपि किञ्चेत्यादि तन्न । मधुरो गुड इत्यादिचाक्षुषज्ञाने माधुर्यस्य स्वभावेन तदिन्द्रियज्ञानविषयस्यापि तस्य चक्षुषः प्रत्यासत्तित्वेनोक्तस्यातिप्रसक्तत्वात् । न च लौकिकप्रत्यासत्त्या तदिन्द्रियजन्यज्ञानविषयसामान्यं तदिन्द्रियजन्यज्ञाने प्रत्यासत्तिः । माधुर्यादिश्च न लौकिकप्रत्यासत्त्या तदिन्द्रियजन्यज्ञानविषयत्वमिति वाच्यम् । तथा सति यः परमाणुः स नित्यः इत्यादिमानसप्रत्यक्षे परमाणुत्वादिसामान्यस्याप्रत्यासत्तितापत्तेः । किञ्च ज्ञातस्य सामान्यस्य प्रत्यासत्तितापक्षेऽपि त्वया विवक्षितस्य लौकिकप्रत्यासत्त्या तदिन्द्रियजन्यविषयत्वस्य सामान्यसत्वेन न ज्ञातसामान्यासत्तितासाधकत्वम् । प्राक् तदिन्द्रियजन्यज्ञानविषयत्वं तु गौरवग्रस्तमिति ।

यदपि ज्ञातमेव सामान्यं लाघवात् सम्बन्ध इति तन्न । अन्यत्र क्लृप्तसमवायादिभिरेवोपपत्तौ प्रकृते ज्ञानस्य सम्बन्धत्वाकल्पनात् । न च सुरभिचन्दनमित्यादौ ज्ञानस्यापि तत्त्वं क्लृप्तम् । तथापि शब्दत्वादिसामान्यप्रत्यासत्तिस्थले ज्ञानानामवच्छेदकत्वेन समवेतसमवायस्य समवायमात्ररूपतयैकत्वेन लाघवेन तस्यैव सम्बन्धत्वकल्पनात्तद्विषयज्ञानस्य सम्बन्धत्वेन विषयकज्ञानसम्बन्धानामेकत्वाच्च । अस्तु वा ज्ञातसामान्यमासत्तिः । तथापि यत्रेच्छायां गृहीतं तद्वति तत्प्रकारकत्वं भ्रमे आरोप्यते तत्र तदाश्रयं ज्ञानं विनापि प्रमात्वज्ञानसम्भवेनोक्तसाधनानिस्तार एव । न चात्र ज्ञानविषयकेत्यनेन तद्वति तत्प्रकारकत्वाश्रयविषयकेत्येव विवक्षितम् । एवं चेच्छाविषयकज्ञानस्याप्युक्तरूपत्वेन न सिद्धिसाधनमिति वाच्यम् ।

एवं सति वस्तुतो रजते इदं द्रव्यमिति ज्ञानानन्तरं गृहीतस्य रजतत्व-

तद्विशिष्टकस्य रजतत्वप्रकारकत्वेन ज्ञायमाने रजतभ्रमे आरोपसम्भवेन तदाश्रयज्ञानात् तदाश्रयज्ञानं विना प्रमात्वज्ञानसम्भवात् । न च तद्विशेष्यकत्वाश्रयविषयकज्ञानव्यतिरेकाप्रयुक्तेत्येव विवक्षितमिति नोक्तदोषः । इदं रजतमिति भ्रमविशेष्यतया गृह्यमाणशुक्त्यादौ रजतत्ववत्वमारोप्यते तत्र तद्वद्विशेष्यकत्वाश्रयविषयकज्ञानाभावेपि प्रमात्वग्रहसम्भवेनोक्तदोषानिस्तारात् । न चैवंविधप्रामाण्यं न पक्षस्वतस्त्वनिर्वचनासामर्थ्येन पक्षसङ्कोचानौचित्यात् प्रामाण्यान्तरस्यापि । अनादौ संसारे अनन्तेषु पुरुषेषु कस्याप्येवंविधो भ्रमो न भूतो न भावी न वर्तमान इत्यस्य निश्चेतुमशक्यतया पक्षस्यैव दौर्लभ्यापत्तेश्चेति भावः ।।

बाधस्य चेति ।। ननु सर्वं ज्ञानं गुण इत्यत्र सर्वत्ववति सर्वत्वप्रकारकत्वस्य, ज्ञानत्ववति ज्ञानत्वप्रकारकत्वस्य, गुणत्ववति गुणत्वप्रकारकत्वस्य च प्रामाण्यस्य इदं सर्वमपि ज्ञानं रूपं गुण इत्यादिज्ञानगोचरानुव्यवसायग्राह्यतया साध्यसत्वात् कथं बाधः । न हि सर्वं ज्ञानं गुण इत्यत्रानेकेषां धर्माणामुल्लेख इत्येव । तावता सर्वत्ववति तत्प्रकारकत्वादिव्यावृत्तमेतज्ज्ञायमाने वृत्यनुपयुक्तमेकं प्रामाण्यमभ्युपगमार्हं गौरवान्मानाभावाच्चेति चेन्न । विशिष्टस्यातिरिक्तत्ववादिनो मीमांसकस्य मते विशिष्टविषयके सर्वं ज्ञानं गुण इति ज्ञाने विशिष्टज्ञानत्वस्वसमानाधिकरणगुणत्ववति तादृशगुणत्वप्रकारकत्वादिरूपप्रामाण्यस्य पृथक् वाच्यतया बाधानुद्धारात् विशिष्टघटितस्यैव तज्ज्ञानमात्रवृत्तिप्रामाण्यस्यानभ्युपगमे एतज्ज्ञानविषयीकृतस्य विशिष्टस्यालीकत्वोपपत्तेः । न च पक्षीभूतप्रामाण्याश्रयतया तद्भिन्नत्वाभावान्नोक्तबाधः । तथा विशेषणदाने गुरुनये अयं घट इति ज्ञानानन्तरं इदं ज्ञानं प्रमा ज्ञानत्वादिति तद्गौरवत्वानुमिति ग्राह्यत्वे वा अर्थान्तरापत्तेः ।

तत्रायं घटः पक्षीभूतः प्रामाण्याश्रयज्ञानस्य ज्ञानरूपलिङ्गवैशिष्ट्यावगाहित्वेनानुमितेस्तज्ज्ञानविषयज्ञानजन्येऽपि तद्भिन्नतादृशज्ञानाजन्यत्वात् । न च ज्ञानेतरावृत्तित्वे सति ज्ञानवृत्तित्वरूपज्ञानत्वस्य व्याप्यतावच्छेदकस्य स्वप्रकाशेनापि तेन विषयीकरणात्तद्विषयीकरणाय तदन्यतादृशज्ञानापेक्षावश्यम्भावान्नार्थान्तरम् । तथापि ज्ञानत्वगोचरज्ञानानन्तरं तत्पक्षोक्तानुमितिग्राह्यत्वेनार्थान्तरवारणात् व्याप्यतावच्छेदकरूपेणापि ज्ञानत्वस्य तेनावगाहनात् । एवञ्चोक्तविशेषणस्यादाने बाधस्यादाने चार्थान्तरस्यावारणादिति चकारस्यानुक्तसमुच्चयार्थतया ग्रन्थो व्याख्येयः ।

दिक्शब्देन तु अयं प्रमावान् समर्थप्रवृत्तिमत्वादिति नैय्यायिकाभिमतानुमितिग्राह्यत्वेन सिद्धसाधनं मीमांसकैः सामान्यग्राह्यासत्यनङ्गीकारेण व्याप्तिज्ञानस्य ग्राह्यप्रामाण्याश्रयज्ञानगोचरत्वात् साध्यतावच्छेदकज्ञानस्य चान्यविशेष्यकस्यापि सम्भवेन साध्यज्ञानस्य चाहेतुत्वात् । न च प्रमात्वरूपसाध्यतावच्छेदकस्य तदश्रयगोचरज्ञानविषयत्वानियमेनोक्तानिमित्तेस्तज्ज्ञानविषयकज्ञानजन्यत्वमेवेति वाच्यम् । एवमपि अयं समर्थप्रवृत्तिजनकतावच्छेदकावच्छिन्नज्ञानवान् समर्थप्रवृत्तिमत्वादित्यनुमितिपक्षधर्मताबलात् घटत्ववति घटत्वप्रकारकत्वविषयिणीमादाय सिद्धसाधनात् । तत्रोक्तप्रमाण्याश्रयज्ञानविषयकज्ञानाभावेऽपि पटत्ववति पटत्वप्रकारकत्वाश्रयज्ञानगोचरादावेव समर्थप्रवृत्तिजनकतावच्छेदकावच्छिन्नज्ञानत्वरूपसाध्यतावच्छेदकज्ञानलाभात् । न चैवमप्यनुमितेः पटत्ववति तत्प्रकारकत्वरूपग्राह्यप्रामाण्याश्रयज्ञानविषयकज्ञानप्रयोज्यतया सिद्धसाधनानवकाशः । प्रागुक्तदिशेच्छादौ गृहीतस्य रजतत्ववति तत्प्रकारकत्वस्य [१]ज्ञानगृह्यमाणे रजतभ्रमे आरोपसम्भवेन पक्षीभूतप्रामाण्याश्रयज्ञानगोचरज्ञानाभावेऽपि साध्यतावच्छेदकज्ञानसम्भवेन सिद्धसाधनापरिहारात् ।

---

१. ''ज्ञान'' इति न स्यात् ।

किं च योगिज्ञानमादायापि सिद्धसाधनम् । न च तस्य तज्ज्ञान-विषयकनिदिध्यासनजन्यत्वान्नोक्तदोषः । सर्वविशेष्यकस्य सर्वप्रकारकस्य च तादृशनिदिध्यासनजन्यत्वे मानाभावात् । न च जन्यविशिष्टज्ञानमेव मानम् । योगजधर्मप्रत्यासत्यजन्य एव विशिष्टज्ञाने विशेषणज्ञानहेतुत्वाव-धारणात् । अन्यथा काशीमरणादिजन्ययोगिप्रत्यक्षेऽपि विशिष्टज्ञानत्वेनान्य-विशेषणज्ञानस्यासम्भवान्निदिध्यासनरूपविशेषणज्ञानजन्यत्वकल्पनापत्तेः । न च इष्टापत्तिरपसिद्धान्तात् । अत एव तत्कर्मणां तत्तज्ज्ञानविशेषे ज्ञानकर्मत्वमिति सिद्धान्तः । अन्यथावश्यापेक्षणीयनिदिध्यासनस्यैव ज्ञानप्रमात्वासत्तितया योगिप्रत्यक्षजनकत्वसम्भवेनात्मध्यानजन्यसंस्कारो वा योगजधर्मो वा प्रत्यासत्तीभूय निश्चयगोचरं साक्षात्कारं जनयतीति त्वदभ्युपगमानुपपत्तेः ।

अस्तु वा तत्रापि विशेषज्ञानास्य हेतुता तथाप्यभावत्वविशिष्टप्रत्यक्षे तद्विशेषणज्ञानस्याहेतुत्वेऽपि [1]विप्रतियोगिरूपविशेषेण ज्ञानस्येव प्रामाण्यादि-विशिष्टयोगिप्रत्यक्षे तद्विशेषणज्ञानस्याहेतुत्वेऽपि चक्षुःसंयुक्तघटादिगोचर-विशेषज्ञानस्यैव हेतुत्वोपपत्तौ न यावद्विशेषणज्ञानत्वेनापि हेतुता, गौरवात् । किञ्च पटत्वं बुद्धिस्थीकृत्य पटत्ववति तत्प्रकारत्वपरतया प्रयुक्तेन तद्वति तत्प्रकारत्वमिति वाक्येन घटत्वं बुद्धिस्थीकृत्य तमिति ज्ञानवता यत्र श्रोत्रात् घटत्ववति तत्प्रकारकत्वं ज्ञायते तत्र प्रकृतप्रामाण्याश्रयघट-ज्ञानविषयकज्ञानस्यानपेक्षितत्वात्सिद्धसाधनम् । किन्तु पटत्ववति पटत्व-प्रकारकमिदं ज्ञानमिति विसंवादिशुकादिवाक्यजज्ञानतज्जन्यसामान्यप्रत्या-सत्तिज्ञानं चादाय सिद्धसाधनम् । किं प्रकारकत्वं, न तावज्जनकी-भूतज्ञानविषयत्वं, परासम्मतेः । नापि भासमानवैशिष्ट्यप्रतियोगित्वं, अभिधेयवदिति शाब्दज्ञानमादाय सिद्धसाधनात् । तत्र प्रमात्वाश्रयज्ञानस्य

१. "वि" इति नस्यात् ।

प्रागनपेक्षणात् । न च शक्तिग्रहार्थं सकलाभिधेयोपस्थित्यवश्यम्भवान्नैवम् । परमते सामान्यप्रकारकोपस्थितेरेव तत्र तया सकलोपस्थित्यनपेक्षणेनार्थान्तरतया एवमप्यनिवार्यादित्यादीति दूषणान्यभिप्रैति ।

एतेन तज्ज्ञानविषयकज्ञानव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगिशब्दाप्रयोज्यज्ञाने साधारणधर्मावच्छिन्नप्रकारत्वमुक्तविधिकोट्यर्थः । शब्दप्रयोज्येति चरमज्ञानविशेषणात् पटत्वं बद्धीकृत्येत्यादिदोषत्रयोद्धारः । विशिष्टस्य प्रामाण्यप्रकारत्वविवक्षणाच्च प्रामाण्यघटकमित्याद्युक्तचतुर्थदोषोद्धारः ।

साधारणधर्मावच्छिन्नेति प्रकारविशेषणाच्च अभिधेयवानयमिति सामान्यासत्तिज्ञानमादाय सिद्धसाधनम् । तस्याभिधेयत्वसामान्यावच्छिन्नप्रामाण्यप्रकारत्वादित्यादिभेदेनोक्तं निरस्तम् । प्रागुक्तदिशा रजतभ्रमानन्तरं रजतत्वप्रकारकज्ञानविशेष्यमिदं रजतमेवेति भ्रमेण रजतत्ववति रजतत्वप्रकारकत्वरूपप्रामाण्यग्रहस्य तदाश्रयग्रहं विनापि सम्भवेन तद्रूपसामान्यासत्तिजज्ञानमादाय सिद्धसाधनानुद्धारात् । प्रमायामेव विशेष्ये विशेषणत्रयं विशेषणान्तरमिति न्यायेन प्रामाण्यघटकपदार्थगोचरमानसज्ञानानन्तरं तद्रूपसामान्यासत्तिजज्ञानसम्भवाच्च ''सर्वं ज्ञानं गुण'' इति शाब्दज्ञानप्रामाण्यांशे शब्दप्रयोज्यज्ञानप्रकारत्वाभावेन बाधाच्च । साधारणधर्मावच्छिन्नेत्यपि किं केवलान्वयिधर्मानवच्छिन्नत्वं विवक्षितं किं वा प्रामाण्यतदितरावृत्तिधर्मानच्छिन्नत्वम् । नाद्यः अप्रसिद्धेः । न च तद्धर्मपुरस्कारेण प्रकारत्वाभावो विवक्षितः । तथापि घटान्याभिधेयत्वमादायोक्तदोषान्नान्त्यः । समर्थप्रवृत्तिजनकतावच्छेदकावच्छिन्नज्ञानवानयमित्याद्यनुमितिमादायार्थान्तरात् । समर्थप्रवृत्तिजनकतावच्छेदकस्य प्रामाण्यमात्रवृत्तितया प्रामाण्याप्रामाण्यतदितरवृत्तिधर्मानवच्छिन्नत्वात् । न चानुमितौ प्रामाण्यम् न प्रकारः समर्थप्रवृत्तिजनकतावच्छेदकत्वेन तस्यापि तत्प्रकारकत्वादित्यलं विस्तरेण ।

।। इति परोक्तस्वतस्त्वादिनिरुक्तिभङ्गः ।।

न्यायदीपः

पक्षधरोक्तमप्यनूद्य निराह ।। **एतेनेति** ।। **तद्व्यतिरेकेति** ।। अत्रोभयत्र व्यतिरेकशब्दः प्रागभावपरः । अन्यथा आद्यस्य संसर्गाभावमात्रपरत्वे तज्ज्ञानविषयकव्याप्तिज्ञानात्यन्ताभावरूप-व्यतिरेकाप्रयुक्तप्रागभावप्रतियोगिनीं इदं ज्ञानं प्रमेत्यनुमितिमादायैव सिद्धसाधनतापत्तेः । अन्त्यस्यापि तत्परत्वे पूर्वोक्तानुमितिमादायैव सिद्धसाधनतापत्तेः । ध्वंसरूपतद्व्यतिरेकस्य तज्ज्ञानविषयकज्ञानव्यतिरेकेण केनाप्यजन्यत्वादिति ध्येयम् । यद्यपि नैतद्रूपं जन्यत्वम् । आकाशादिजन्य-शब्दादावभावात् । तथापि । व्यतिरेकिपदार्थेषु भवतीदं जन्यत्वमिति भावः ।। **द्वेधेति** ।। उत्तरदलेन नञोऽन्वयेन पूर्वभागेन नञोऽन्वयेन वा द्वेधेत्यर्थः ।। **प्रयुक्तेति** ।। तदन्वयाद्यनुविधाय्युत्तरकालसम्बन्धित्वं प्रयुक्तत्वम् । तद्भिन्नत्वमप्रयुक्तत्वमित्यर्थः ।। **सत्वेपीति** ।। तस्य व्यतिरेकमात्रा-प्रतियोगित्वादिति भावः ।। **मयेति** ।। स्वतस्त्वनिर्वचनकर्त्रेत्यर्थः । अभावादित्येतद् व्यनक्ति ।। **नहीति** ।। तथा च न प्रागुक्तदोषाविति भावः । एतेनेत्युक्तं व्यनक्ति ।। **तथापीति** ।। एवं विवक्षायामपीत्यर्थः । विषयपदेन प्रकारत्वविवक्षामुपेत्याह ।। **सर्वं ज्ञानमिति** ।। **बाधस्येति** ।। एतदभावरूपपरतस्त्वसाधने सिद्धसाधनाच्च । तस्यापक्षत्वे चार्थान्तरता । इदं ज्ञानं प्रमेति सामान्यप्रत्यासत्तिजन्यज्ञाने प्रामाण्यस्य प्रकारत्वेन सिद्धसाधनापरिहाराच्च ।

नच सामान्यस्याज्ञातस्य प्रत्यासत्तित्वेऽतिप्रसङ्गेन ज्ञातस्यैव प्रत्यासत्तित्वात् प्रमात्वज्ञानस्य चानुमित्यादिरूपस्य प्रमात्वाश्रयरूप-पक्षादिज्ञानजन्यतया तज्ज्ञानविषयकज्ञानजन्यत्वमेवेत्युक्तस्थले तज्ज्ञान-विषयकज्ञानाजन्यज्ञानप्रकारत्वं नेति न दोष इति वाच्यम् । इच्छायां गृहीतं

तद्वति तत्प्रकारकत्वं स्मृतं सज्ज्ञानत्वेन गृह्यमाणे रूप्यभ्रमे यत्रारोप्यते यत्र वा रूप्यत्ववति रूप्यत्वप्रकारवत्त्वेन गृह्यमाणायामिच्छायां ज्ञानत्वमारोप्यते तत्रोभयत्र प्रमात्वाश्रयज्ञानविषयकज्ञानं विनापि रूप्यत्ववति रूप्यत्वप्रकारकज्ञानत्वरूपं जनितं ज्ञानमादाय सिद्धसाधनत्वस्य दुर्वारत्वात् । किं च त्वन्मते गङ्गास्नानादिसत्कर्मजन्यं योगिज्ञानं तज्ज्ञानविषयकज्ञानाजन्यमेवेति तादृशज्ञानप्रकारत्वमादाय सिद्धसाधनमेव । न हि तदपि निदिध्यासनजन्यम् । मानाभावात् । येन योगिज्ञानं तज्ज्ञानविषयकज्ञानजन्यं स्यात् । तत्तत्कर्मणां तज्ज्ञानविशेष एव जनकत्वमित्यनुमानखण्डे त्वयैवोक्तेः । प्रमात्वस्य प्रकारत्वार्थं पूर्वोपस्थितेरावश्यकत्वेऽपि उक्तदिशा प्रमात्वाश्रयज्ञानं विनापि प्रमात्वज्ञानसम्भवात् ।

यत्तु अनागताविषयकेति द्वितीयतृतीयज्ञानयोर्विशेषणमतो न कोऽपि दोष इति तन्न । वर्तमानघटप्रमात्वप्रत्यासत्त्या दोषतादवस्थ्यात् । अनागतवृष्ट्यादिज्ञानप्रामाण्यांशे बाधात् । तदन्यस्य पक्षत्वे चार्थान्तरत्वात् । यद्यपि तज्ज्ञानविषयकज्ञानव्यतिरेकाप्रयुक्तव्यतिरेक-प्रतियोगितदेकज्ञानमात्राविषयकज्ञानग्राह्यमिति तदर्थ इति । तदपि न । एवं हि पूर्वदलेन प्रामाण्यानुमितिमादाय तदेकज्ञानमात्रविशेषणेन सामान्यप्रत्यासत्तिजन्यज्ञानयोगिज्ञानेश्वरज्ञानान्यादाय सिद्धसाधनत्वाभावेऽपि ज्ञानं गुण इत्यादिज्ञानज्ञानप्रामाण्यानुव्यवसायस्य ग्राह्यप्रामाण्याश्रयज्ञानभिन्नप्रथमज्ञानविषयकतया तदेकविषयकत्वाभावेन तदंशे बाधात् । तदन्यस्य पक्षत्वे चार्थान्तरता । किञ्च प्रमावानयं समर्थप्रवृत्तिमत्त्वात् इत्याद्यनुमितिग्राह्यत्वेनार्थान्तरता । मीमांसकमते सामान्यप्रत्त्यासत्त्यभावेन ग्राह्यप्रमाव्यक्तेः अनुमितिजनकज्ञानागोचरत्वात् । तदन्यप्रामाण्यस्य पक्षत्वं तु सामान्यविप्रतिपत्त्यननुगुणमित्याद्यभिप्रेत्याह ।। **इति दिगिति** ।। यद्वा एवं

न्यायदीपः

पक्षधरोक्तमप्यनूद्य निराह ।। **एतेनेति** ।। **तद्व्यतिरेकेति** ।। अत्रोभयत्र व्यतिरेकशब्दः प्रागभावपरः । अन्यथा आद्यस्य संसर्गाभावमात्रपरत्वे तज्ज्ञानविषयकव्याप्तिज्ञानात्यन्ताभावरूप-व्यतिरेकाप्रयुक्तप्रागभावप्रतियोगिनीं इदं ज्ञानं प्रमेत्यनुमितिमादायैव सिद्धसाधनतापत्तेः । अन्त्यस्यापि तत्परत्वे पूर्वोक्तानुमितिमादायैव सिद्धसाधनतापत्तेः । ध्वंसरूपतद्व्यतिरेकस्य तज्ज्ञानविषयकज्ञानव्यतिरेकेण केनाप्यजन्यत्वादिति ध्येयम् । यद्यपि नैतद्रूपं जन्यत्वम् । आकाशादिजन्य-शब्दादावभावात् । तथापि । व्यतिरेकिपदार्थेषु भवतीदं जन्यत्वमिति भावः ।। **द्वेधेति** ।। उत्तरदलेन नञोऽन्वयेन पूर्वभागेन नञोऽन्वयेन वा द्वेधेत्यर्थः ।। **प्रयुक्तेति** ।। तदन्वयाद्यनुविधाय्युत्तरकालसम्बन्धित्वं प्रयुक्तत्वम् । तद्भिन्नत्वमप्रयुक्तत्वमित्यर्थः ।। **सत्वेपीति** ।। तस्य व्यतिरेकमात्रा-प्रतियोगित्वादिति भावः ।। **मयेति** ।। स्वतस्त्वनिर्वचनकर्त्रेत्यर्थः । अभावादित्येतद् व्यनक्ति ।। **नहीति** ।। तथा च न प्रागुक्तदोषाविति भावः । एतेनेत्युक्तं व्यनक्ति ।। **तथापीति** ।। एवं विवक्षायामपीत्यर्थः । विषयपदेन प्रकारत्वविवक्षामुपेत्याह ।। **सर्वं ज्ञानमिति** ।। **बाधस्येति** ।। एतदभावरूपपरतस्त्वसाधने सिद्धसाधनाच्च । तस्यापक्षत्वे चार्थान्तरता । इदं ज्ञानं प्रमेति सामान्यप्रत्यासत्तिजन्यज्ञाने प्रामाण्यस्य प्रकारत्वेन सिद्धसाधनापरिहाराच्च ।

नच सामान्यस्याज्ञातस्य प्रत्यासत्तित्वेऽतिप्रसङ्गेन ज्ञातस्यैव प्रत्यासत्तित्वात् प्रमात्वज्ञानस्य चानुमित्यादिरूपस्य प्रमात्वाश्रयरूप-पक्षादिज्ञानजन्यतया तज्ज्ञानविषयकज्ञानजन्यत्वमेवेत्युक्तस्थले तज्ज्ञान-विषयकज्ञानाजन्यज्ञानप्रकारत्वं नेति न दोष इति वाच्यम् । इच्छायां गृहीतं

तद्वति तत्प्रकारकत्वं स्मृतं सज्ज्ञानत्वेन गृह्यमाणे रूप्यभ्रमे यत्रारोप्यते यत्र वा रूप्यत्ववति रूप्यत्वप्रकारवत्वेन गृह्यमाणायामिच्छायां ज्ञानत्वमारोप्यते तत्रोभयत्र प्रमात्वाश्रयज्ञानविषयकज्ञानं विनापि रूप्यत्ववति रूप्यत्वप्रकारकज्ञानत्वरूपं जनितं ज्ञानमादाय सिद्धसाधनत्वस्य दुर्वारत्वात् । किं च त्वन्मते गङ्गास्नानादिसत्कर्मजन्यं योगिज्ञानं तज्ज्ञानविषयकज्ञानाजन्यमेवेति तादृशज्ञानप्रकारत्वमादाय सिद्धसाधनमेव । न हि तदपि निदिध्यासनजन्यम् । मानाभावात् । येन योगिज्ञानं तज्ज्ञानविषयकज्ञानजन्यं स्यात् । तत्तत्कर्मणां तज्ज्ञानविशेष एव जनकत्वमित्यनुमानखण्डे त्वयैवोक्तेः । प्रमात्वस्य प्रकारत्वार्थं पूर्वोपस्थितेरावश्यकत्वेऽपि उक्तदिशा प्रमात्वाश्रयज्ञानं विनापि प्रमात्वज्ञानसम्भवात् ।

यत्तु अनागताविषयकेति द्वितीयतृतीयज्ञानयोर्विशेषणमतो न कोऽपि दोष इति तन्न । वर्तमानघटप्रमात्वप्रत्यासत्त्या दोषतादवस्थ्यात् । अनागतवृष्ट्यादिज्ञानप्रामाण्यांशे बाधात् । तदन्यस्य पक्षत्वे चार्थान्तरत्वात् । यद्यपि तज्ज्ञानविषयकज्ञानव्यतिरेकाप्रयुक्तव्यतिरेक-प्रतियोगितदेकज्ञानमात्राविषयकज्ञानग्राह्यमिति तदर्थ इति । तदपि न । एवं हि पूर्वदलेन प्रामाण्यानुमितिमादाय तदेकज्ञानमात्रविशेषणेन सामान्यप्रत्यासत्तिजन्यज्ञानयोगिज्ञानेश्वरज्ञानान्यादाय सिद्धसाधनत्वाभावेऽपि ज्ञानं गुण इत्यादिज्ञानज्ञानप्रामाण्यानुव्यवसायस्य ग्राह्यप्रामाण्याश्रयज्ञानभिन्नप्रथमज्ञानविषयकतया तदेकविषयकत्वाभावेन तदंशे बाधात् । तदन्यस्य पक्षत्वे चार्थान्तरता । किञ्च प्रमावानयं समर्थप्रवृत्तिमत्त्वात् इत्याद्यनुमितिग्राह्यत्वेनार्थान्तरता । मीमांसकमते सामान्यप्रत्त्यासत्त्यभावेन ग्राह्यप्रमाव्यक्तेः अनुमितिजनकज्ञानागोचरत्वात् । तदन्यप्रामाण्यस्य पक्षत्वं तु सामान्यविप्रतिपत्त्यननुगुणमित्याद्यभिप्रेत्याह ।। **इति दिगिति** ।। यद्वा एवं

विप्रतिपत्त्यन्तराण्यपि तत्तद्बुध्युत्प्रोक्षितानि निरस्यानीति भावेनाह ।। **इति दिगिति** ।। तन्निरासश्च गुरुटीकायां व्यक्तः ।।

।। इति परोक्तस्वतस्त्वनिरुक्तिभङ्गः ।। २ ।।

श्रीलक्ष्मीनाथतीर्थटीका

पक्षान्तरं निराकर्तुमनुवदति ।। **एतेनेति** ।। यथाश्रुतं **मण्युक्तं** साध्विति तत्राह ।। **तज्ज्ञानेति** ।। एवकारव्यावर्त्यमाह ।। **नत्विति** ।। नन्विदं पूर्वमेव दूषितमित्यत आह ।। **नचैवमिति** ।। **बाधसिद्धसाधने इति** ।। प्रामाण्यग्राहकानुव्यवसायस्येश्वरज्ञानजन्यत्वेन बाधः । ईश्वरज्ञानजन्य-विषयकानुव्यवसायाजन्यत्वेन प्रामाण्यग्रहस्येष्टत्वात् सिद्धसाधनमिति भावः ।। **तद्व्यतिरेकेति** ।। तज्ज्ञानविषयकज्ञानाजन्येत्यत्राजन्यत्वं जन्यत्वा-भावः । जन्यत्वं तज्ज्ञानव्यतिरेकप्रयुक्तो योयं व्यतिरेकस्तत्प्रतियोगित्व-मित्यर्थः । किमजन्यत्वं द्वेधा पर्यवस्यतीत्यत आह ।। **तदभावरूपमिति** ।। द्वैविध्यमेव दर्शयति ।। **तद्व्यतिरेकेति** ।। एवमपि कथं बाधादिपरिहार इत्यत आह ।। **तत्रेति** ।। उक्तद्वैविध्यमध्ये इत्यर्थः ।। **आद्यस्येति** ।। तज्ज्ञानव्यतिरेकप्रयुक्तव्यतिरेकाप्रतियोगित्वरूपस्येश्वरज्ञाने सत्यपीत्यर्थः । ईश्वरज्ञानमादाय बाधादिप्रसक्तेरित्यपेरर्थः ।। **मयेति** ।। स्वतस्त्वनिर्वचन-कर्त्रेत्यर्थः ।। **द्वितीयस्येति** ।। [१]तज्ज्ञानव्यतिरेक प्रयुक्तव्यतिरेका-प्रतियोगित्वेत्यर्थः ।। **अभावादिति** ।। ईश्वरज्ञानस्य नित्यत्वेन व्यतिरेक-प्रतियोगित्वाभावः । ननु नित्यस्य गगनादेः अत्यन्ताभावलक्षणव्यतिरेक-प्रतियोगित्ववदीश्वरज्ञानस्य नित्यभूतस्यापि व्यतिरेकप्रतियोगित्वं किं न स्यादित्यत आह ।। **नहीति** ।।

१. तज्ज्ञानव्यतिरेकाप्रयुक्तव्यतिरेकप्रतियोगित्वेति स्यात् ।

एतेनेति शब्दार्थमाह ।। **तथापीति** ।। ज्ञानं प्रमेयमिति प्रमेयत्व-सामान्यप्रत्यासत्तिजन्यज्ञानमादाय सिद्धसाधनस्य तथा सर्वं ज्ञानं गुण इति शाब्दव्यवसायप्रामाण्यांशे बाधस्यापरिहारादित्यर्थः ।।

ननु ज्ञानं प्रमेयमिति सामान्यप्रत्यासत्तिजन्यज्ञानमादाय न सिद्धसाधनं तादृशज्ञानप्रकारत्वस्य विवक्षितत्वात् । उक्तज्ञाने प्रमेयत्वस्य प्रकारत्वेन प्रामाण्यस्याप्रकारत्वात् । न च प्रामाण्यस्य प्रमेति सामान्यलक्षण-जन्यज्ञानप्रकारत्वात् न सिद्धसाधनमिति वाच्यम् । ज्ञानस्य प्रमात्वस्य प्रत्यासत्तित्वं प्रमात्वज्ञानस्य तु प्रमात्वाश्रयज्ञानं विनाऽसम्भव इति चेन्न । प्रामाण्यस्य व्यवसायेऽनुपस्थितस्यानुव्यवसाये प्रकारत्वायोगात् । न च ज्ञानवित्तिवेद्यतयाऽनुपस्थितस्य प्रामाण्यस्याभावादिति वेद्ययोरभावत्व-प्रतियोगित्वयोरिव प्रकारत्वं सम्भवतीति वाच्यम् । तर्हि प्रमेति सामान्य-प्रत्यासत्तिजन्यज्ञानमादाय सिद्धसाधनापरिहारात् । अभावत्वादिवदज्ञातस्यैव प्रमात्वस्य प्रत्यासत्तित्वसम्भवात् । यद्वा प्रमात्वं तद्वति तत्प्रकारकज्ञानत्वं इच्छायां तद्वति तत्प्रकारकत्वं गृहीतं ज्ञाने ज्ञानत्वं च गृहीतं यत्र ज्ञाने दैववशात् विशिष्टं स्मृतं तत्र प्रमात्वस्य प्रत्यासत्तित्वसम्भवात् । अतःएव **रुचिदत्तः** वक्ष्यति । विशकलितं व्यभिचाराभावं सहचारं च स्मृतवतः धूमे तदुभयवैशिष्ट्यस्य ज्ञानादिति ।

अथवा ज्ञानत्वेन गृह्यमाणे रजतभ्रमे इच्छायां गृहीतं रजतत्ववति रजतत्वप्रकारकत्वं यदारोप्यते तत्र भ्रमे रजतत्ववति रजतत्वप्रकारक-ज्ञानत्वरूपं प्रमात्वं ज्ञातमेवेति तस्य प्रत्यासत्तित्वं दुर्वारमित्यभिप्रेत्याह ।। **दिगिति** ।।

।। इति परोक्तस्वतस्त्वनिरुक्तिभङ्गः ।। २ ।।

प्रामाण्यस्वतस्त्वेऽनुमानानि

स्वतस्त्वे प्रमाणं तु, ज्ञानप्रामाण्यं स्वतो ग्राह्यम्, परतः अगृह्यमाणत्वे सति गृह्यमाणत्वात्; यद्यदन्येनागृह्यमाणत्वे सति ग्राह्यं तत् तेन ग्राह्यम् । यथा चक्षुरन्येनागृह्यमाणं रूपं चक्षुर्ग्राह्यम् ।। १ ।।

युक्तिरत्नाकरः

स्वतस्त्वं निरुच्य तत्साधनाय [1]प्रामाण्यं प्रतिजानीते ।। **स्वतस्त्व इति** ।। [2]प्रामाण्यं तु अनुमानं इत्युत्तरेण सम्बन्धः । तत्र तावद्यदुक्तं तत्त्वनिर्णयटीकायां ज्ञानगतं याथार्थ्यं तद्ग्राहकेणैव ग्राह्यं ग्राहकान्तारानुपपत्तौ सत्यां गृह्यमाणत्वात् । यद्यतोऽन्येनानुपपद्यमानग्रहणं गृह्यते तत्तेनैव गृह्यते यथा चाक्षुषोऽन्येनानुपपद्यमानसाक्षात्कारं साक्षात्क्रियमाणं रूपं चक्षुषैव साक्षात्क्रियत इत्युक्तौ विशेषणवैय्यर्थ्यम् । तद्वति तत्प्रकारकत्वमात्रोक्तावपि तदेव । न च करणप्रामाण्ये बाधवारणाय तत्, तद्गतस्य याथार्थ्यस्य यथार्थज्ञानसाधनतारूपस्य ज्ञानकारणग्राहकेणाग्रहेण बाधात् ।

अत एव सुधायाम्– अथवा ज्ञानजनकत्वं येन गृह्यते तत एव यथार्थज्ञानजनकत्वस्य तदीयग्राह्यत्वं स्वतस्त्वमित्युक्तम् । अस्तु वा कथञ्चिद्बाधः, कथं तेन तद्धारणम् । करणगतप्रामाण्यस्यापि परामर्शादिज्ञानगतत्वान्नेच्छादिप्रामाण्ये बाधवारणाय तत्, इच्छाया अपि सविषयकत्वेन साक्षिवेद्यत्वेन तद्ग्राहकेण तद्गतयाथार्थ्यग्रहे बाधकाभावात् ।

किञ्च तद्ग्राहकेणैव ग्राह्यमित्यत्र ग्राहकपदेन ज्ञापकमात्रोक्तौ न्यायमतेऽप्यनुमितिग्राह्यत्वे[3] सिद्धसाधनम् । एवकारवैय्यर्थ्यं च । प्रत्यक्षोक्तावनुमिति-[4]

१,२. "प्रमाणं" इति स्यात् । ३. "ग्राह्यत्वेन" इति स्यात् । ४. "प्रामाण्यस्य अनुमितिशब्दादिनापि ग्राह्यत्वेन इति स्यात् ।

प्रामाण्यपदादिशब्दग्राह्यत्वेन बाधात् । एवकाराभाव एव सामञ्जस्याच्च । एवकारस्य भिन्नक्रमत्वेन वा तदर्थत्वैकत्वेऽपि प्रागुक्तपक्षद्वयेऽपि पटज्ञानमित्यनेन शब्देन प्रतिबद्धसाक्षिणा च प्रामाण्याग्रहाद्बाध एव ।

नापि संशयविरोध्यलौकिकप्रत्यासत्त्यजन्यप्रत्यक्षवेद्यत्वं साध्यार्थः । अत्र चेशज्ञानानुमितिमादाय सिद्धसाधनवारणाय क्रमेण संशयविरोध्यलौकिकप्रत्यासत्त्यजन्यजन्यप्रत्यक्षेति विशेषणत्रयमिति वाच्यम् । संशयविरोधिपदेन तन्निवर्तकोक्तावीशज्ञानस्यापि तथात्वात् सिद्धसाधनम् । संशयस्यापि धारावाहिकस्थले पूर्वसंशयं प्रति उत्तरात्मविशेषगुणत्वेन स्वात्मानञ्च [१]प्रतियोगितया निवर्तकत्वेन तमादाद्यार्थान्तराच्च । संशयविषयविरोधिविषयत्वस्य तदसमानाधिकरणत्वस्य चोक्तावीशज्ञानस्यापि तथात्वात् संशयानुत्पादव्याप्यत्वोक्तावव्याप्त्यादि । साक्षिणि तदभावाच्च । हेतौ च ग्रहणपदेन ज्ञापकमात्रोक्तौ प्रामाण्यस्य क्वचिदनुमितिग्राह्यत्वेन विशेषणासिध्यापत्तेः ।

न च तत्प्रकारक एव संवाद्यनुमानेन प्रामाण्यग्रहणेऽनवस्थापत्तेर्न विशेषणासिद्धिरिति उक्तमेवेति वाच्यम् । तत्राप्रामाण्यस्य सर्वत्र नियमेनानुमितिग्राह्यत्वे एव प्रामाण्यविशेष्यस्यानुमितिग्राह्यत्वेनानुमित्योक्त्या क्वचित्प्रामाण्यस्यानुमितिग्राह्यत्वेऽपि तदभावात् । अत एव दूरे जलज्ञानानन्तरं प्रामाण्यसंशयसामग्रीप्रतिबद्धेन साक्षिणा प्रामाण्याग्रहे प्रवृत्युत्तरकालं जलोपलम्भे प्राचीनपक्षे प्रामाण्यग्रहः समर्थप्रवृत्तिजनकत्वरूपलिङ्गेन भवत्येवेति राद्धान्तः ।

किञ्च घटज्ञानप्रामाण्यं घटत्ववति घटत्वप्रकारकज्ञानत्वमित्यादिशब्देन प्रामाण्यग्रहणात्कथं न सिद्धिः । विशेष्यं च व्यर्थम् । न ह्यज्ञायमानं किञ्चि-

१. "प्रति प्रतियोगितया" इति स्यात् ।

दस्ति येन तत्र व्यभिचारकारणार्थं तत्स्यात् । न च हेतौ साध्ये च ग्राहकपदं प्रत्यक्षपरम् । एवञ्चेदानीमिन्द्रियधर्माधर्मौ व्यभिचारवारणाय गृह्यमाणत्वादिति । तदर्थश्च प्रत्यक्षादीनीति वाच्यम् । तत्र साध्यं स्वाश्रय-प्रत्यक्षविषयत्वमात्रं वा स्वाश्रयप्रत्यक्षमात्रविषयत्वं वा यत्स्वाश्रयप्रत्यक्ष-विषयत्वं वा । नाद्यः न्यायमतेऽप्यनुव्यवसायविशेषविषयत्वाभ्युपगमेन सिद्धसाधनापत्तेः । न द्वितीयः बाधाद्धेतोस्तत्राप्रयोजकत्वाच्च । नान्त्यः प्रतिबद्धसाक्षिणा तदग्रहेण बाधात् । यत्किञ्चित्स्वाश्रयप्रत्यक्षविषयत्व-मात्रेणाप्युपपत्त्या हेतोरुक्तसाध्यसाधकत्वात् । एतेनैवकारस्य कार्त्स्न्य-व्यवच्छेदोभयार्थकत्वे प्रतिबद्धयावदनुव्यवसायवेद्यत्वं, तदर्थः पर्यवस्यतीति न कोऽपि साध्यदोष इति निरस्तम् ।

उक्तसाध्यहेतोरप्रयोजकत्वादित्यादिदोषनिरासाय तदनुमानतात्पर्यमाह **ज्ञानप्रामाण्यमिति** ।। ज्ञानान्यावृत्तिप्रामाण्यपदप्रवृत्तिनिमित्तमित्यर्थः । तच्च लाघवाद्घटत्ववद्विशेष्यकत्वे सति घटत्वप्रकारकज्ञानत्वं न विशेष्या-वृत्यप्रकारकत्वमिति न बाध इति भावः ।। **स्वत इति** ।। ग्राह्यप्रामाण्य-विरेध्युपस्थिति तत्सामग्र्यसमवहितग्राह्यप्रामाण्याश्रयतत्तज्ज्ञान[1]विषयसकल-साक्षिविषय इत्यर्थः । तदर्थविशेषणकृत्यं च प्रागुक्तम् ।

।। **परत इति** ।। ननु परतोऽग्राह्यत्वं परग्राह्यत्वाभावः । तत्र किं परतो ग्राह्यत्वम् । न तावत् स्वतो ग्राह्यत्वाभावः । हेतोः साध्या-विशेष्यात् । नञ्द्वयवैय्यर्थ्यात् । व्यर्थविशेष्यकत्वाच्च । नाप्यप्रतिबद्ध-साक्ष्यतिरिक्तं परशब्दार्थः । अनुमितिग्राह्यत्वेन हेतोरसिद्धेः । न चोक्त एव परशब्दार्थः । तदग्राह्यत्वं हि तन्मात्रग्राह्यत्वाभावः । तन्मात्रग्राह्यत्वं च तदितराग्राह्यत्वे सति तद्ग्राह्यत्वम् । तदितरशब्दार्थश्च प्रतिबद्धानु-व्यवसायग्राह्यत्वम् । विशिष्टानुमित्यादिग्राह्यत्वस्याभावो हेत्वर्थः । तस्य

१. "विषयकसाक्षि" इति स्यात् ।

च सिद्धान्त उक्तानुव्यवसायग्राह्यत्वेन तदग्राह्यत्वरूपविशेषणाभावायत्त-विशिष्टाभावस्य सम्भवेऽपि न्यायमते विशेषणविशेष्ययोरभयोरपि सत्त्वे-नान्यतरासिद्धेरपरिहारात् । न च न्यायमते परेतरयत्किञ्चिदुक्तसाक्षिग्राह्यत्वेन परेतरग्राह्यत्वासामान्याभावविवक्षायत्तविशेषणाभावायत्तविशिष्टाभावसत्वान्नासिद्धिरिति वाच्यम् । तथाप्युक्तानुव्यवसायाग्राह्यत्वे सत्यनुमित्यादिग्राह्यत्वाभावस्यैव हेतुत्वसम्भवे इतरपदवैय्यर्थ्याच्च । विशेष्यवैय्यर्थापरिहाराच्च ।

ननु परतोऽग्राह्यपदेनाप्रामाण्यमुच्यते तदन्यत्वं च परमतेऽग्राह्यत्वम् । तच्च विशेष्यवृत्त्यप्रकारकत्वात् अतीन्द्रिये व्यभिचारि । अतो ग्राह्यत्वादिति विशेष्यम् । तदर्थश्च ज्ञानांशलौकिकप्रत्यक्षविषयत्वादिति । अतो न दोष इति चेत् यदन्येनाग्राह्यत्वे सतीत्यादिव्याप्त्यभिधानविरोधात् । न हि परतोऽग्राह्यत्वे सतीत्यत्रेवोक्तार्थोऽत्र सम्भवतीति चेदुच्यते । परतोऽग्राह्यत्वं परमात्राग्राह्यत्वम् । परत्वञ्च ग्राह्यप्रामाण्याश्रयगोचरज्ञानांशलौकिकप्रत्यक्षा-पेक्षया । तन्मात्रग्राह्यत्वं च तदितराग्राह्यत्वे सति यत्किञ्चित्तद्ग्राह्यत्वाभावः ।

ततश्चायमर्थः । ग्राह्यत्वप्रमाश्रयगोचरज्ञानांशलौकिकप्रत्यक्षातिरिक्तेतरा-ग्राह्यत्वविशिष्टतादृशप्रत्यक्षातिरिक्तयत्किञ्चिद्ग्राह्यत्वस्याभावे सतीति प्रत्यक्षातिरिक्तं यत्किञ्चित्प्रामाण्यग्राहकमेव विवक्षितम् । एवञ्च ग्राह्य-प्रामाण्याश्रयालौकिकप्रत्यक्षाग्राह्यत्वं विशिष्टस्य प्रामाण्यज्ञापकविषयत्वस्या-भावः सत्यन्तार्थः पर्यवसितः । न्यायमतसिद्धस्तु प्रसाध्याङ्गत्वाददोषः । अत्र विशेष्याभावमात्रोपादाने प्रामाण्ये असिद्धिरतो विशिष्टाभावोपादानम् । विरोध्यभावायत्तविशिष्टाभावश्चाप्रामाण्ये विशेष्यावृत्यप्रकारकत्वादौ चास्तीति व्यभिचारः । तद्वारणाय ग्राह्यत्वादिति । तदर्थश्च प्रत्यक्षयोग्यता-वच्छेदकधर्मावच्छिन्नत्वादिति योग्यतावच्छेदकश्चानुगतत्वाद्बहिर्द्रव्यप्रत्यक्षे महत्वसमानाधिकरणोद्भूतरूपवत्वमेव । रूपप्रत्यक्षे उद्भूतत्वे सति

महत्व[1]समानाधिकरणमिव जातिप्रत्यक्षे योग्यव्यक्तिवृत्तित्वमिव प्रामाण्यप्रत्यक्षे तद्वति तत्प्रकारकज्ञानत्वादिकमेव । स्वरूपप्रकारविषयमात्रघटितत्वेन तस्य योग्यत्वान्न तु विशेष्यावृत्त्यप्रकारकत्वादि । तस्यातथात्वादिति न तत्र व्यभिचारः । न तावन्मात्रश्च, शब्दगन्धादौ व्यभिचार इति विशिष्टोपादानम् । यद्यदन्येनागृह्यमाणत्वे सतीत्यत्र यच्छब्देन यदाश्रयगोचरलौकिकप्रत्यक्षमुच्यते तदन्येनाग्राह्यत्वञ्च तदन्यमात्रग्राह्यत्वम् । तदर्थश्च स्वाश्रयगोचर-लौकिकप्रत्यक्षग्राह्यत्वे सति यत्किञ्चित्तदितरातिरिक्तग्राह्यत्वाभावः । यत्किञ्चित्तदतिरिक्तस्वगोचरज्ञानमेव विवक्षितम् । न च हेतोरन्यतरासिद्धिः, न्यायमतेऽपि पारतन्त्र्येणोक्तानुव्यवसायप्राप्तत्वस्यैव सत्वेनोक्तप्रत्यक्ष-वेद्यत्वसामान्याभावस्याभावात् ।

न च नियमघटितस्य साध्यस्य यावत्याश्रयग्राहकग्राह्यपर्यवसिति कथं अनेन सिद्धिनियमानुपादाने वा कथं नासिद्धसाधनं इति वाच्यम् । नियमानु-पादानेन स्वाश्रयांशलौकिकप्रत्यक्षविषयत्वमात्रसाधनेऽपि प्रथमानुव्यवसाय-विषयत्वमादायैव साध्यपर्वसानसम्भवेन सिद्धसाधनानवकाशात् ।

यद्वा द्वितीयसाध्याभिप्रायेणैतत्प्रणयनमिति न कश्चिद्दोषः । यद्यदन्येनानु-पपद्यमानग्रहणमित्यत्रापि यदन्येनेति स्वाश्रयगोचरलौकिकप्रत्यक्षमात्रे-णेत्यर्थः । तथा च यद्यदाश्रयगोचरलौकिकप्रत्यक्षत्वाभावविशिष्टयज्ज्ञापक-विषयत्वाभावे सति प्रत्यक्षविषयः तदाश्रयांशेलौकिकप्रत्यक्षविषय इति सामान्यव्याप्त्यर्थः पर्यवस्यति । न च रूपे स्वाश्रयग्राहकस्य स्पार्शन-प्रत्यक्षाविषये विशेषणविशेष्ययोरुभयोरपि सत्वेन विशिष्टाभावाभावात् साधनवैकल्यम् । स्वाश्रयगोचरचाक्षुषप्रत्यक्षविषये तस्मिन् स्वाश्रय-गोचरप्रत्यक्षग्राह्य(त्व)तत्सामान्याभावस्य विवक्षितस्याभावेन विशिष्टा-भावापत्तेः । गुरुत्वांशे व्यभिचारवारणाय– **ग्राह्यत्वादिति** ।। सामान्यव्याप्तौ

१. "समानाधिकरणत्वम्" इति स्यात् ।

विशिष्टं प्राग्वत् । अत्र यद्यपि ज्ञानत्वादिदृष्टान्तसम्भवेन विशेष-व्याप्तिप्रदर्शनमेव कर्तुमुचितम् । तथापि विशेषव्याप्तेरिव सामान्यव्याप्तेरपि [१]गमकत्वविशिष्टे स्वतन्त्रेच्छतया तत्प्रदर्शनं कृतमिति । न च सामान्यव्याप्तिप्रदर्शनेऽपि हेतुविशिष्टव्याप्त्यप्रदर्शनान्न सानुमित्यङ्गमिति वाच्यम् । विशिष्टहेतुनिष्टव्याप्तिप्रदर्शनेऽपि यत्तत्वपुरस्कारेण सामान्यमुखेन हेतुनिष्टव्याप्तेरपि प्रदर्शनात्, कथमन्यथा तवापि ''देवदत्तो बहिरस्ति विद्यमानत्वे सति गृहे असत्वात्'' इत्यत्र विद्यमानत्वे सति यत्र नास्ति स ततोऽन्यत्रास्ति इत्यादिषु सामान्यव्याप्युद्भावनं विशिष्टप्रस्तावे द्रष्टव्यम् ।

वस्तुतस्तु ज्ञानप्रामाण्यप्रतिबद्धस्वाश्रयगोचरस्वाश्रयांशलौकिकप्रत्यक्षविषय इति सामान्यमुखेनैव साध्यं विवक्षितमिति न किञ्चिदेतत् । न च शब्द-स्याप्यनुगतत्वात् कथं पक्षीयहेतौ साध्यनिरूपितव्याप्तिप्रदर्शनमति वाच्यम् । एवंविधाननुगमदोषस्य सकलतार्किकाभिमतत्वात् । कथमन्यथेश्वरानुमानं तवापि । परमार्थस्तु परतोऽग्राह्यत्वे सति ग्राह्यत्वात् स्वाश्रयगोचर-प्रत्यक्षातिरिक्तप्रत्यक्षाविषयत्वे सति प्रत्यक्षविषयत्वादित्यर्थः । अस्य गोः परेण भाव्यमित्यादौ परशब्देन तद्गोसदृशगवां तस्य प्रतिपाद्यत्वदर्शनात् । अत एव चक्षुरन्येनानुपपद्यमानसाक्षात्कारं साक्षात्क्रियमाणं रूपादि चक्षुषा साक्षात्क्रियत इति टीकोक्तिः । यद्यपि नेदं परोक्तपरतस्त्वाभावरूपं तथाप्युक्त एव तत्स्वरूपसाध्यव्याप्यमिति हेतुतयोपन्यासो युक्तः । न हि परतस्त्वाभावसाधनेनैव स्वतस्त्वं साधनीयमित्यस्ति निर्बन्धः । न च स्वाश्रयप्रत्यक्षातिरिक्तप्रत्यक्षावेद्यस्य हेतुत्वे टीकायामसिद्धिमाशङ्क्य संवादलिङ्गत्वानुमानवेद्यत्वेऽनवस्थापत्तेरिति तत्साधनमसङ्गतमिति वाच्यम् । तत्र साक्ष्यतिरिक्तेन प्रत्यक्षादिना येन केनापि प्रामाण्यग्रहणे अनवस्थेत्युच्यते नत्वनुमानवेद्यत्व एव । तत्रैव न च ज्ञानग्राहकातिरिक्तेन ग्रहणं सम्भवतीति

१. ''गमकत्वाविशेषे'' इति स्यात् ।

ग्राहकान्तरस्यानवस्थाप्रसङ्गेन निरस्तत्वादिति च सामान्यमुखेनैव तदुक्तिः । अत्र विशेष्यमात्रस्य शब्दगन्धादौ व्यभिचारः । अतः पूर्वदलम् । अप्रत्यक्षत्वे सति प्रत्यक्षत्वं च व्याहतमतः स्वाश्रयप्रत्यक्षातिरिक्तेति ।-सत्यन्तस्य गुरुत्वादौ व्यभिचारात् विशेष्यम् । न च स्वाश्रयज्ञापकातिरिक्त-[1]दलमिति वाच्यम् प्रत्यक्षपदेनाखण्डसाक्षात्वरूप[2]जन्यत्युक्त्या वैय्यर्थ्यात् । द्वितीयप्रत्यक्षपदादानेन च सिद्धिः । अखण्डाभावे वैय्यर्थ्याभावात् । तृतीयस्य चोक्तमेव प्रयोजनम् । न च विशेषणासिद्धिः । तदयोग्यधर्मा-घटितत्वेन तत्साधनान्तरेणापि तदभ्युपगमाच्चेति सङ्क्षेपः ।

न्यायदीपः

तत्र किं प्रमाणमित्यत आह ।। **स्वतस्त्वे प्रमाणं त्विति** ।। अनुमानमिति वक्ष्यमाणेनान्वयः । यद्यपि–

"पृष्टेनागम एवादौ वक्तव्यः साध्यसिद्धये"

इति कथालक्षणोक्तेः ग्रन्थस्य च वादकथारूपेण प्रवृत्तेः

"ऋग्यजुःसामाथर्वाख्या मूलरामायणं तथा ।
भारतं पञ्चरात्रं च वेदा इत्येव शब्दिताः ।।

पुराणानि च यानीह वैष्णवानि विदो विदुः
स्वतः प्रामाण्यमेतेषां नात्र किञ्चिद् विचार्यते"

इत्यादिरागम एव वाच्यः । तथाऽपि हैतुकस्य तार्किकस्यागमेऽत्यादरा-भावात् तं प्रत्यागमानुकूला न्याया एवात्रोच्यन्त इत्यदोषः ।

"ज्ञानगतं याथार्थ्यं तद्ग्राहकेणैव ग्राह्यम्, ग्राहकान्तरानुपपत्तौ सत्यां

---

१. तृटितमस्ति । २. "जात्युक्त्या" इति स्यात् ।

गृह्यमाणत्वात् यद्यतोऽन्येनानुपपद्यमानग्रहणं गृह्यते तत्तेनैव गृह्यते, यथा चक्षुषोऽन्येनानुपपद्यमानसाक्षात्कारं साक्षात्क्रियमाणं रूपादि चक्षुषा साक्षात्क्रियते'' इति तत्त्वनिर्णयटीकोक्तमनुमानं तात्पर्यतोऽनुवदति ।। **ज्ञानप्रामाण्यमिति** ।। याथार्थ्यरूपमित्यर्थः । तत्स्वरूपमुक्तं प्रागस्माभिः । चक्षुरादिरूपानुप्रमाणव्यावृत्तस्य साक्षाज्ज्ञेयविषयीकारित्वस्य लाभाय ज्ञानेति विशेषणं तत्तज्ज्ञानपरम् । घटत्ववति घटत्वप्रकारकज्ञानत्वादिरूपं प्रामाण्यमित्यर्थः । यदा तु प्रामाण्यपदेन केवलप्रामाण्यग्रहः तदा ज्ञानपदं स्पष्टार्थम् । अत एव सुधायां ''प्रामाण्यम्'' इत्येव पक्षोक्तिः ।। **स्वत इति** ।। ग्राह्यप्रामाण्यविरोध्युपस्थापकसामग्र्यसमविहिततत्तज्ज्ञानविषयकसाक्षिविषय एवेत्यर्थः । विशेषणकृत्यं प्राग्वत् । साक्षी च लौकिकप्रत्यक्षादिरूपानुव्यवसाय एव ।। **परत इति** ।। प्रामाण्यं परतो ग्राह्यं सांशयिकत्वात् इत्यादौ यत् पराभिमतं साध्यं उक्तविशिषेणकसाक्षिज्ञानादन्येनैव ग्राह्यत्वादिरूपं तदभावे सति ग्राह्यत्वादित्यर्थः । तेनानुमित्यादिग्राह्यत्वेऽपि नासिद्धिः ''परस्य स्वत्वात् स्वस्य च परत्वात्'' इत्यादि **मण्युक्त**खण्डनस्याप्यनवकाशः ।

केचित्तु परतो ग्राह्यत्वं नाम उक्तविशेषणकोक्तरूपसाक्षिज्ञानादन्योत्पाद्यप्राथमिकप्रतीतिकत्वम्, तच्छून्यत्वे सतीत्यर्थः । तेन स्वतस्त्ववादे प्रामाण्यस्यानुमित्यादिग्राह्यत्वेऽपि न विशेषणासिद्धिरित्याहुः । अत्र सत्यन्तमात्रस्याप्रयोजकत्वाद् ग्राह्यत्वादित्युक्तिः । घटादिगतगन्धादौ सत्यपि ग्राह्यत्वे स्वाश्रयग्राहकोक्तरूपप्रत्यक्षाग्राह्यत्वं नेति व्यभिचारनिरासाय सत्यन्तम् ।

श्रीलक्ष्मीनाथतीर्थटीका

स्वतस्त्वेऽनुमानप्रमाणमाह ।। **स्वतस्त्व इति ।। प्रमाणमिति ।।** अस्य पदस्यानुमानमिति वक्ष्यमाणेन सम्बन्धः । ज्ञानप्रामाण्यमित्यत्र प्रामाण्यपदस्य [१]तद्वति तत्प्रकारकत्व याथार्थ्यरूपमित्यर्थः । तेन प्रामाण्यपदेनैव तद्वति तत्प्रकारकत्वज्ञानत्वलाभात् तस्य चानुप्रमाणे एव गतत्वाभावात् तद्व्यावर्तनाय पक्षे ज्ञानपदमनादेयमिति शङ्का निरस्ता [२]स्रयमाह **।। स्वतो ग्राह्यमिति ।।** ग्राह्यप्रामाण्याश्रयविरोध्युपस्थापकसामग्र्यसमवहितग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयक साक्षिज्ञानविषय एवेति वा ग्राह्यप्रामाण्याश्रयतत्तज्ज्ञानविषयकसाक्षिज्ञानयोग्य इति वा उभयसिद्धप्रामाण्याविषयकज्ञानभिन्नज्ञानविषय एवेति वार्थः । तेन ज्ञानं गुण [३]इत्याशब्दजन्यज्ञानस्यापि ज्ञानग्राहकतया तद्ग्राह्यत्वाभावेन प्रामाण्यस्य यावज्ज्ञानग्राहकग्राह्यत्वरूपस्वतस्त्वे साध्ये बाधः स्यादिति शङ्का परास्ता । निरुक्तसाध्ये यावत्पदस्याप्रवेशात् । हेतुकी पदत इति[४] ।

तर्कताण्डवम्

सुखमनुभवामीति प्रत्ययः (प.१) दोषशङ्काद्यकलङ्कितज्ञानस्य अनुव्यवसायो वा (प.२), निष्कम्पप्रवृत्तिहेतुभूतज्ञानस्यानुव्यवसायो वा (प.३), प्रामाण्यविरोध्युपस्थापकसामग्र्यसमवहितोऽनुव्यवसायो वा (प.४), स्वग्राह्यज्ञानप्रामाण्यविषयकः(सा.१) तत्प्रकारको

---

१. ''तद्वतितत्प्रकारकत्वं नाशं'' इति मातृकायां लिखितम् । तस्यार्थो न ज्ञायते इति उपरि न मुद्रितम् । २. ''निरस्ता । साध्यस्वरूपमाह'' इति स्यात् । ३. 'इत्यादि' इति स्यात् । ४. अत्रैव ग्रन्थपातः ।

वा(सा.२) तद्विरुद्धाविषयकत्वे सति तद्व्याप्यत्वाविषयकत्वे सति तत्संशयविरोधिप्रत्ययत्वात्(हे.१), तद्व्याप्यत्वाविषयकत्वे सति तदभावनिश्चयविरोधिनिश्चयत्वात्(हे.२), तद्विषयकव्यवहारहेतुप्रत्ययत्वात् (हे.३), तज्ज्ञानप्रकारप्रकारकतया तत्प्रकारवद्विशेष्यकतया च तद्विषयत्वाच्च (हे.४) प्रामाण्यानुमितिवत् इत्याद्यनुमानम् ।

युक्तिरत्नाकरः

एवं विप्रतिपत्त्यनुसारेण प्रामाण्यमात्रे स्वतस्त्वं प्रसाध्येदानीं ज्ञानविशेषनिष्टप्रामाण्ये स्वतस्त्वं साधयति ।। **सुखमनुभवामीति** ।। न च सर्वप्रामाण्ये स्वतस्त्वविप्रतिपत्तौ तदेकदेशे तत्साधनमर्थान्तरग्रस्तम् । क्वचित्साधने तदृष्टान्तेन अन्यत्रापि तत्साधनसम्भवात् । वस्तुतः सामान्यधर्मावच्छेदेन संशये क्वचित्तद्विशेषे तन्निश्चयेऽपि तन्निवर्तको भवत्येवेति कथमर्थान्तरम् । अत एवानभ्यासदशापन्नज्ञानप्रामाण्यं न स्वतो ग्राह्यमिति परेषामपि साध्यनिर्देशः । यद्वा प्रामाण्यविरोध्युपस्थापकत्वस्य साध्ये विशेषणत्वे गौरवं मन्वानः आह– ।। **सुखमनुभवामीति** ।। सुखमिति सुखसाक्षात्कारगोचरतदंशलौकिकसाक्षात्कार इत्यर्थः । तेन शाब्दसुखज्ञानसाक्षात्कारे सुखसाक्षात्कार इति शब्दजन्यसुखसाक्षात्कारज्ञाने परकीयसुखसाक्षात्कारस्य अयं साक्षात्कारवानित्यनुमित्युपनीतस्य साक्षात्कारे साक्षात्कारांश लौकिके च प्रामाण्यस्याविषयेऽपि बाधः । यद्वा स्ववृत्तिवर्तमानसुखस्य यः साक्षात्कारस्तद्गोचरसाक्षात्कारव्यक्तिविशेष एवानेनोच्यत इति न दोषः । एवं सुखसाक्षात्कारनिष्टप्रामाण्ये संशयाभावस्य उभयवादिसिद्धत्वेन तत्र स्वतस्त्वसाधने संशयानुपपत्तिबाध इति भावः ।

तथाविधमेव पक्षान्तरमाह ।। **दोषेति** ।। दोषशङ्का दोषजत्वशङ्का । आदिपदेन तन्निश्चयः । अनुव्यवसायो ज्ञानांशलौकिकः । पूर्वस्मिन्पक्षे

सुखसाक्षात्कारानुव्यवसायमात्रं पक्षः । उत्तरपक्षत्रयेषु करतलामलकादि-ज्ञानानुव्यवसायेनापि पक्षो द्रष्टव्यः । इह पक्षत्रये बाधवारणाय क्रमेण विशेषणत्रयम् । [1]दोषशङ्काद्यकलङ्कितस्याप्रामाण्यशङ्कास्कन्दितस्य ज्ञानस्यानुव्यवसायो न [2]प्रामाण्यग्रह इति तदंशे बाधः । न चादिपदेना-प्रामाण्यशङ्कादेरपि परिग्रहः । तथात्वेऽन्त्यपक्षाभेदप्रसङ्गात् । तत्र ग्राह्यप्रामाण्यांशशङ्कातत्सामग्र्याद्यसमवहितत्वं व्यवसायविशेषणमावश्यकम् । तत्सामग्री च दोषशङ्कादिरूपैवेति चेन्न । दोषशङ्का तन्निश्चयतत्कार्य-कलङ्कितत्वेन तत्र प्रामाण्यविरोध्युपस्थिते सति तत्सामग्र्यसमवहितत्वेन च ज्ञानस्य विशेषणात्तयोर्भेदात् ।। **स्वग्राह्येति** ।।

ननु प्रामाण्यविषयक इत्यलम् । न चान्यप्रामाण्यमादायार्थान्तरवारणाय पूर्वदलम् । बाधादेव तदादाया[3]साध्यपर्यवसानात् अन्यथा धूमाद्यनुमानेऽपि । महानसीयवह्न्यादिकमादायार्थान्तरवारणार्थं विशेषणप्रक्षेपापत्तेः । प्रामाण्यस्य सुखत्ववति सुखत्वप्रकारकज्ञानत्वादिविशेषपरत्वावश्यम्भावेन तच्छङ्कान-वकाशाच्चेति चेन्न । स्वाश्रयग्राहक[4]ग्राह्यरूपस्वतस्त्वसिध्यर्थं ईश्वरानु-मानादाविव तदुपादानात् ।

ननु सुखानुभवगोचरानुव्यवसायस्यऽभ्रमत्वासम्भवेपीतरानुव्यवसायस्य भ्रमगोचरत्वस्यापि सम्भवेन तत्र स्वग्राह्यज्ञाननिष्टप्रामाण्यप्रसिद्ध्या बाधः । न च दोषशङ्काद्यकलङ्कितेत्यादिनाभ्यासदशापन्नत्वं विवक्षितम् । तथा सति पक्षत्रयोपन्यासायोगात् । अभ्यासस्य ग्राह्यप्रामाण्यसजातीयत्वात् । अन्यस्य निर्वक्तुमशक्यत्वेन न्यायमतेऽपि तत्र प्रामाण्यग्रहेण सिद्धसाधनापत्तेः । रजतादिभ्रमेऽपि क्वचित्प्रामाण्यानन्तरं तद्गतभ्रमसम्भवेन बाधानिस्ताराच्चेति चेन्न । स्वाग्राह्यज्ञाने प्रामाण्यविषयक इत्यर्थात् । तच्च तत्राप्यक्षतमत

१. "दोषशङ्कादिकलङ्कितस्य" इति स्यात् । २. "प्रामाण्यग्राहकः" इति स्यात् ।
३. "साध्यापर्यवसानात्" इति स्यात् । ४. "ग्राह्यत्व" इति स्यात् ।

एवाप्रमापि प्रमेत्येव गृह्यते ।[1] न साक्षिणः प्रमात्वनियमेन भ्रमे प्रामाण्य-विषयकत्वानुपपत्तिः । तत्र [2]मानसस्येव प्रामाण्यग्रहस्याङ्गीकारात् । उक्तञ्च भगवत्पादैः ''यत्कचिद्व्यभिचारी''त्यादि ।

यद्वा दोषशङ्कादीत्यादौ प्रमागोचरानुव्यवसायस्यैव पक्षत्वमिति नोक्त-दोषः । तत्प्रकारक इति स्वग्राह्यज्ञानप्रामाण्ययोर्वैशिष्ट्यविषय इत्यर्थः । तेन प्रामाण्यविशेष्यकज्ञाने न व्यभिचारः । शिष्टं प्राग्वत् । तद्विरुधेत्यनेन प्रामाण्यानधिकरणज्ञानावृत्तिविषयकान्यत्वमखण्डमिह विवक्षितम् । तेन प्रामाण्यघटकघटत्वादिविषयकतया नासिद्धिर्न वा तद्वारकज्ञानवृत्तित्व-विशेषणवैय्यर्थ्यम् ।

ननु तत्संशयविरोधित्वं तत्संशयनिवर्तकत्वप्रामाण्यसिद्धिः । ननु प्रामाण्य-निश्चयोत्तरभाव्यर्थनिश्चये प्रामाण्यविषयके व्यभिचारात् तत्संशयानुत्पाद-व्याप्यत्वस्य तत्राप्यक्षतेः । भाविन्यर्थनिश्चये उपनायकनैय्यत्येन निश्चित-प्रामाण्यविषयकज्ञानविषयोऽयं घट इत्येवमाकारकतयाऽवश्यवाच्यत्वेन प्रामाण्यविषयकत्वरूपसाध्यस्यापि सत्वात् नोक्तदोषः । तथापि करतला-मलकाद्यर्थनिश्चये व्यभिचारात् । तत्र स्वनिष्ठगोचरानुव्यवसायात्पूर्व-मप्यसंशयात् । न च तज्जातीये प्राक्प्रामाण्ये निश्चयादेव संशयः । एवमप्युक्तार्थनिश्चये प्रामाण्यसंशयानुत्पादव्याप्यरूपे तद्विरोधित्वाक्षतेः । न च तत्संशयविरोधीत्यनेन तत्संशयानुत्पादव्याप्यतावच्छेदकधर्मवत्वं विवक्षितम् । उक्तार्थनिश्चये चार्थनिश्चयत्वं प्रामाण्यसंशयपूर्वभाव्यर्थ-निश्चयेऽपि सत्वान्न तद्व्याप्यतावच्छेदकम् । प्रामाण्यनिश्चयोत्तरार्थ-निश्चयत्वन्तु स्वघटकेन लघुना प्रामाण्यनिश्चयत्वेनैव धूमत्वेन व्याप्यता-वच्छेदकसम्भवे नीलधूमत्ववत् तावद्व्याप्यतावच्छेदकमिति वाच्यम् ।

---

१. ''न च'' इति स्यात् । २. ''मानसस्यैव'' इति स्यात् ।

धूमनिष्टव्याप्तेर्धूमत्वेनैवावच्छेदसम्भवेन तद्घटितनीलधूमत्वस्यानवच्छेदकत्वेऽपि प्रामाण्यनिश्चयोत्तरार्थनिश्चयनिष्टव्याप्तेः तदवृत्तिप्रामाण्यनिश्चयत्वेनावच्छेदात्तद्घटितस्यापि गुरोरुक्तधर्मस्यावच्छेदकत्वावश्यम्भावात् । यन्निष्ठा यन्निरूपिता व्याप्तिरिति न्यायादिति चेन्न ।

प्रामाण्यसंशयानुत्पादप्रयोजकत्वमेव तत्संशयविरोधीत्यनेन विवक्षितम् । उक्तार्थनिश्चयस्तदनुत्पादे घटादिसाक्षात्कारे चक्षुःकर्मैव न प्रयोजकः आवश्यकप्रामाण्यानिश्चयादेवान्यथासिद्धत्वात् । यद्वा प्रामाण्यसंशयनिवृत्तिजननयोग्यत्वं तद्विरोधित्वम् । तच्च प्रामाण्यनिश्चयादावेव नत्वर्थनिश्चये प्रामाण्यनिश्चयाभावेऽर्थनिश्चयमात्रेण क्वापि तत्संशयानिवृत्तेः । तत्सत्वे तत एव तन्निवृत्तेः । तदुत्तरभाव्यर्थनिश्चयस्य तदनिवर्तकत्वादिति ।

[1]**तदभावनियमेति** ।। ननु किं तदभावनिश्चयविरोधित्वम् । न तावदनुत्पादप्रयोजकत्वं तन्निवृत्तिजननयोग्यत्वं वा । तदभावसंशयस्य ग्राह्यसंशयतया तदभावनिश्चयप्रतिबन्धकत्वेन तदनुत्पादप्रयोजकत्वात् । निश्चिते संशयायोगेन तदभावनिश्चयनिवृत्तिजननयोग्यत्वाच्च । तत्र व्यभिचारा[2]प्रसिध्यासत्त्या तद्वारकान्त्यनिश्चयपदवैय्यर्थापत्तेः । द्वितीयन्तु [3]तदभावनिश्चयनिश्चयविरोधिनि तदभावसंशये व्यभिचारकमित्युत्तरग्रन्थविरोधाच्च । [4]न तदभावनिश्चयप्रयोज्यानुत्पादप्रतियोगित्वं वा तदभावनिवृत्तित्वं वा तत्वम् । आद्यनिश्चयपदवैय्यर्थ्यापत्तेरन्यस्य चासम्भवादिति चेन्न । तदभावनिश्चयप्रतिबन्धकसामग्रीजन्यत्वमिह विरोधित्वम् । एवं च तदभावसंशयस्य तन्निश्चयप्रतिबन्धकत्वेऽपि तत्सामग्र्याः प्रतिबन्धकतयान्त्यनिश्चयपदाभावे तदभावसंशये आद्यनिश्चयपदाभावे तदभावसंशयप्रतिबन्धकसामग्रीजन्यतदभावनिश्चये व्यभिचारापत्त्या निश्चयपदसार्थक्यात् ।

१. "तदभावनिश्चयेति" इति स्यात् । २. "अप्रसक्त्या" इति स्यात् ।
३. "तदभावनिश्चयविरोधिनि" इति स्यात् । ४. "न च" इति स्यात् ।

अग्रिमग्रन्थविरोधाच्च । यज्ज्ञानं यत्र प्रतिबन्धकं तत्सामग्र्यपि तत्र प्रतिबन्धिकेति न्यायेन निश्चयसामग्र्या अपि संशयप्रतिबन्धकत्वात् । न च निश्चयसामग्र्याः संशयप्रतिबन्धकत्वे कदापि संशयो न स्यात् । संशयसामग्र्यां तदनुप्रवेशावश्यम्भावादिति वाच्यम् । स्थाणुत्वादिनिश्चयसामग्र्याः कोट्यन्तरनिश्चयसामग्रीप्रतिबन्धकत्वेनाप्रतिबद्धनिश्चयसामग्र्याः संशयस्थलेऽभावात् ।

न चैवमपि संशये साध्यसत्वेनाव्यभिचारादन्त्यनिश्चयपदानर्थक्यम् । इदं प्रामाण्याभाववत् अप्रामाण्यभाववद्वेति प्रकारकस्यापि तस्य सम्भवात् । न च भावाभावयोः भावकोटित्वमेव संशयस्य स्थाणुः पुरुषो वा पनसोऽन्यो वा पीतः श्वेतो वेत्यादि तदभावव्याप्यकोटिकस्यापि तस्य सम्भवात् । सकललोकसिद्धत्वात् । नचैषां तु चतुष्कोटिकत्वं अननुभूयमानाभावाकोटिकत्वकल्पने मानाभावात् । वस्तुतस्तु सत्तानिश्चयरूपेण तद्विषयत्वमिह साध्यम् । प्रामाण्यविषयकत्वमात्रस्योक्तावननुव्यवसाये न्यायमतेऽपि सिद्धत्वात् सिद्धसाधनापत्तेः । एवञ्चोक्तसंशये साध्याभावात् व्यभिचारः स्फुट एवेति द्वितीयनिश्चयपदमर्थवत् ।। **तद्विषयकेति** ।। अदृष्टद्वारकत्वं विशेषणमतो हविरादिगोचरे ज्ञाने न व्यभिचारः ।। **तज्ज्ञानप्रकारेति** ।। न च वस्तुतः तत्प्रकारकविशेष्योक्तौ घटत्वप्रकारककिञ्चिद्विशेष्यकमिति शाब्दज्ञाने व्यभिचारः । तत्प्रकारविशिष्टतया तद्विशेष्यकत्वोक्तौ चासिद्धिः । वैशिष्ट्यस्याप्रकारकत्वादिति वाच्यम् । पुरोवर्तिनि तत्प्रकारनिरूपितवैशिष्ट्यविषयकत्वस्य विवक्षितत्वात् । तस्य च पारतन्त्र्येण परेणाभ्युपगमात् । न च व्यापारानुबन्धिताया तद्विषयके मनःसंयोगादौ व्यभिचारः । तेन रूपेण साध्यस्यापि तत्र सत्वादिति भावः ।। **प्रामाण्यानुमितिवदिति** ।। प्रामाण्यप्रकारकानुमितिवदित्यर्थः । तेन प्रामाण्यज्ञानवृत्तीत्यादितद्धशेष्यकानुमितौ तत्प्रकारकत्वरूपसाध्यवैकल्यम् । वस्तुतस्तु यथा न तद्विशेष्यकानुमितावपि न साध्यवैकल्यं तथोक्तमधस्तात् ।

न्यायदीपः

प्रामाण्यस्य स्वतो ग्राह्यत्वे क्वचित् संशयाद्युपपादनक्लेशनिरासाय विशिष्याप्याह ।। **सुखमिति** ।। स्ववृत्तिवर्तमानसुखसाक्षात्कारगोचरः साक्षिरूपः प्रत्यय इत्यर्थः । ज्ञानांशे लौकिकप्रत्यक्षादिरूपानुव्यवसायः प्रामाण्यविषयको न वेति विप्रतिपत्त्यनुरोधेनैतत्पक्षाणामवतार इति सामान्यविप्रतिपत्त्यनानुगुण्यादर्थान्तरत्वमिति न शङ्क्यम् ।

बाह्याभ्यन्तरसाधारणपक्षान्तराण्याह ।। **दोषेति** ।। दुष्टकरणजन्यत्व-शङ्कातन्निश्चयाप्रामाण्यादिशङ्कातन्निश्चयाद्यनास्कन्दितघटादिज्ञानस्य इत्यर्थः । न चैवं अन्त्यपक्षाभेद इति शङ्क्यम् । तत्रानुव्यवसायविशेषणत्वेन इह व्यवसायविशेषणत्वेन तत्र प्रामाण्यविरोध्युपस्थापकसमग्रीत्वेन अत्र तु तत्कार्यदोषशङ्कादित्वेन च प्रवेशेनात्यन्तभेदात् ।

।। **उपस्थापकसामग्रीति** ।। उपस्थितितत्सामग्रीत्यर्थः । अत्र सर्वत्रापि ज्ञानस्येत्यनेन दोषाजन्यप्रमारूपज्ञानस्याभिमतत्वादिदं रूप्यमित्यादि-भ्रमगोचरानुव्यवसायस्यापक्षतया तस्य तत्र प्रामाण्याग्राहकत्वेऽपि न बाध इति बोध्यम् । तत्र प्रामाण्यग्रहणस्य मानसत्वेन सिद्धान्तेऽपि भ्रमगोचरानु-व्यवसायेन प्रामाण्याग्रहात् । यद्वा वक्ष्यमाणदिशाऽत्राभिमतानुव्यवसायत्वस्य भ्रमानुव्यवसाये अभावेन तस्यापक्षत्वान्न बाधः । अत एव ज्ञानांशे लौकिक-प्रत्यक्षादिरूपस्येह अनुव्यवसायस्य अभिमततया स्मृत्युपनीतप्रामाण्य-विषयकानुव्यवसायमादाय न न्यायमते सिद्धसाधनं शङ्क्यम् ।

।। **स्वग्राह्येति** ।। स्वेन अनुव्यवसायेन ग्राह्यं यज्ज्ञानं आद्ये सिद्धान्ते सुखविषयकं स्वप्रकाशरूपं साक्षिज्ञानमेव । परमते मानसं सुखव्यवसाय-रूपम् । तदन्यपक्षत्रये च घटादिगोचरं मनोवृत्तिरूपं व्यवसायाख्यं साक्षि-

ज्ञानादन्यत् । तन्निष्ठं यत्प्रामाण्यं सुखत्ववति सुखत्वप्रकारकत्वादिरूपं घटत्ववति घटत्वप्रकारकत्वादिरूपं वा तद्विषयक इत्यर्थः । घटज्ञानानुव्यवसायस्य पटज्ञानप्रामाण्याविषयकत्वाद् बाधनिरासाय स्वग्राह्यज्ञानेत्युक्तम् । यद्वा प्रामाण्यविषयक इत्येवोक्तौ स्वनिष्ठप्रामाण्यविषयकत्वमादाय सिद्धान्ते अर्थान्तरत्वनिरासाय ।। **स्वग्राह्यज्ञानेति** ।। एवं च नार्थान्तरता । न चैवं साक्ष्यंशे स्वग्राह्यव्यवसायप्रामाण्यविषयकत्वाभावाद् व्यभिचारः शङ्क्यः । स्वग्राह्यं यावत्स्वयमन्यच्च तावति प्रामाण्यग्राहकत्वलाभेन साक्ष्यंशे हेतूनामव्यभिचारात् ।

यद्वा सुखत्ववद्विशेष्यकज्ञानत्वादिरूपप्रामाण्यलाभाय स्वग्राह्यज्ञानप्रामाण्येत्युक्तिः । प्रामाण्यविषयकत्वं च साध्यं यन्मते वैशिष्ट्यमनुव्यवसायवेद्यमेव न तन्मतेन बोध्यम् । तद्वेद्यमपि स्वातन्त्र्येण न तद्वेद्यमिति मते तु सत्वेन प्रामाण्यविषयकत्वमभिमतम् । तेन तत्पक्षे सिद्धसाधनतेति शङ्कानवकाशः । अत एव वक्ष्यति ''सत्तया तदुल्लेखस्य साध्यत्वात्'' इति । न च वादिनः सत्वेनेति विशेषणं व्यर्थं, व्यावर्त्याप्रसिद्धेरिति शङ्क्यम् । शुक्तिरूप्यज्ञाने प्रामाण्यविषयकस्यापि मानसदर्शनस्य स्वविषयसत्वानिर्णायकस्यापि सिद्धान्ते सत्वात् । परप्रसिद्धत्वमात्रेण व्यावर्त्यत्वोपपत्तेश्च । परार्थानुमाने परं प्रति सिद्धासाधनोद्धारस्यापि वादिप्रयोजनत्वाच्च । जन्यकृत्यजन्यानीत्यत्र मीमांसकं प्रति जन्यत्वस्येवेहापि वादिनं प्रति प्रमेयत्वादिवदुपरञ्जकत्वेन विशेषणत्वोपपत्तेश्च । उक्तं च उत्पत्तिप्रामाण्यवादे **मणा**वपि ''उभयसिद्धव्यावर्तकत्वं तन्त्रम् । न तु व्यावर्त्यस्योभयसिद्धिः । गौरवात्'' इति ।

प्रामाण्यमनुव्यवसायविषयोऽपि प्रागनुपस्थितत्वान्न प्रकारतयेति वदन्तं प्रत्याह ।। **तत्प्रकारको वेति** ।। स्वग्राह्यज्ञानप्रामाण्यप्रकारको वेत्यर्थः । विशेषणज्ञानहेतुताया निर्विकल्पकभङ्गे निरसिष्यमाणत्वादिति भावः ।।

तद्विरुद्धेति ।। ग्राह्यप्रामाण्यविरुद्धं यत्प्रामाण्याभावतद्व्याप्याप्रामाण्यादि तदविषयकत्वे सतीत्यर्थः । विरुद्धत्वं च तज्ज्ञानप्रतिबन्धकज्ञान-विषयत्वम् ।। **तद्व्याप्यत्वेति** ।। सुखानुभवादिनिष्ठसुखत्ववद्विशेष्यक-त्वादिरूपप्रामाण्यव्याप्यत्वेत्यर्थः ।। **तत्संशयविरोधीति** ।। प्रामाण्य-संशयविरोधित्वं नाम तदनुत्पत्तिव्याप्यत्वादिरूपं ज्ञेयम् । विशेषणकृत्यान्यग्रे व्यक्तानि ।। **तद्विषयकेति** ।। प्रामाण्यविषयकेत्यर्थः ।। **तज्ज्ञानेति** ।। ग्राह्यप्रामाण्याश्रयज्ञानेत्यर्थः । साध्यावैशिष्ट्यनिरासोऽग्रे स्फुटः ।। **तद्विषय-कत्वात्** ।। व्यवसायविषयकत्वादित्यर्थः ।। **प्रामाण्यानुमितिवदिति** ।। इदं ज्ञानं प्रमाणं समर्थप्रवृत्तिहेतुत्वात् इति प्रामाण्यानुमितावुक्तस्य हेतु-चतुष्टयस्य साध्यद्वयस्य च सत्वादिति भावः । आदिपदेन "प्रामाण्यं ज्ञानग्राहकमात्रग्राह्यं अप्रामाण्येतरज्ञानसमवेतधर्मत्वात् ज्ञानत्ववत्" इत्यादिसुधोक्तानुमानग्रहः ।

तर्कताण्डवम्

अत्राद्ये हेतौ तद्विरुद्धाविषयकेत्युक्तत्वात्प्रामाण्यविरुद्धाप्रमाण्य-निश्चये, तद्व्याप्यत्वाविषयकेत्युक्तत्वाद् वह्निमत्वाविषयके तत्संशय-विरोधिनि तद्व्याप्यतया धूमनिश्चये, तत्संशयविरोधीत्युक्तत्वाद्घटादि-ज्ञाने, प्रत्ययेत्युक्तत्वाद् धर्म्यज्ञाने कोट्यस्मरणे च न व्यभिचारः । न चोल्बणविषयान्तरज्ञाने व्यभिचारः । विषयान्तरे मनःसञ्चारादि-रूपतज्ज्ञानसामग्र्या एव तद्विरोधित्वात् ।

ननु तथाऽपि व्यञ्जकस्य करचरणादेः स्वरूपेणैव ज्ञानं व्यङ्ग्य-पुरुषत्वादिजातिसंशयविरोधि । न तु व्याप्यतया । करादिज्ञानस्या-लोकवत्स्वरूपेणैव व्यङ्ग्यधीहेतुत्वात् । तच्च न व्यङ्ग्यविषयकमिति तत्र व्यभिचार इति चेन्मैवम् ।

व्यङ्ग्यसंशयो हि द्वेधा । व्यञ्जकभूतं यज्ज्ञानकारणं तदभावेन सामग्र्यभावाद्वा यथान्धकारस्थितघटसंशयः । दूरादिदोषाद्वा । यथा स्थाणौ [1]पुरुषसंशयः । तत्राद्ये व्यङ्ग्यनिश्चयसामग्र्येव संशयविरोधिनी । तस्यां च प्रत्ययत्वं नेति न व्यभिचारः । द्वितीये तद्व्याप्यत्वेन करादिज्ञानमेव दोषजन्यसंशयविरोधीति तद्व्याप्यत्वाविषयकत्वं नेति न व्यभिचारः । न च तद्व्याप्यत्वाविषयकत्वमसिद्धम् । सुखसाक्षात्कारत्वादेः प्रामाण्यव्याप्यत्वाग्रहणेऽसंशयदर्शनात् । न च धर्मिज्ञानाद्यभावादेव असंशयात्संशयविरोधित्वमसिद्धमिति वाच्यम् । सुखादिज्ञानरूपधर्मिज्ञाने ज्ञानत्वरूपसाधारणधर्मदर्शने दैवात् कोटिस्मरणे विषयान्तरासञ्चारे च सत्यप्यसंशयदर्शनात् ।

न चाद्यो हेतुरप्रयोजकः ज्ञानस्य तत्संशयविरोधित्वं हि तन्निश्चयत्वेन वा तदभावनिश्चयत्वेन वा तदभावव्याप्यनिश्चयत्वेन वा तद्व्याप्यनिश्चयत्वेन वेति चतुर्धा । तत्र द्वितीयतृतीययोस्तद्विरुद्धाविषयकत्वविशेषणेन चतुर्थस्य तद्व्याप्यत्वाविषयकत्वविशेषणेन निरस्ततया हेतोराद्यं प्रामाण्यनिश्चयत्वरूपं साध्यं विनानुपपत्तेः ।

युक्तिरत्नाकरः

अप्रामाण्यादीति प्रामाण्याभावभावरूपप्रामाण्यतद्व्याप्तेत्यर्थः ।। **वह्निमत्वाविषयकेति** ।। इदञ्च सामान्यव्याप्त्यभिप्रायेण । वस्तुतो घटत्ववति घटत्वप्रकारकत्वरूपप्रामाण्यव्याप्यतया कम्बुग्रीवादिमति घटत्वप्रकारकज्ञाने व्यभिचार इति द्रष्टव्यम् । न च तत्प्रामाण्यविषयकत्वस्यापि सत्वान्न व्यभिचारः । व्याप्तौ प्रामाण्यप्रकारकत्वेन स्वग्राह्यज्ञानानु-

---

१. पुरुषत्वेति पाठान्तरम् ।

योगिकप्रामाण्यप्रतियोगिकवैशिष्ट्यविषयसाध्याभावे व्यभिचारात् । यद्वा वह्निमत्वाविषयके वह्निमत्वरूपतद्वत्वाविषयके तद्घटितवह्निमति वह्नि-प्रकारकत्वरूपप्रामाण्यविषयक इति यावत् । तत्संशयविरोधिनि उक्त-प्रामाण्यसंशयविरोधिनि तद्व्याप्यतया धूमनिश्चये धूमवद्विशेष्यकत्वनिश्चये धूमवद्विषेष्यकवह्निप्रकारकनिश्चय इति यावत् । एवं वह्निमति वह्नित्व-प्रकारकत्वरूपप्रामाण्यविषयके तत्संशयविरोधिनि तद्व्याप्यतया धूमवह्नि-प्रकारकत्वरूपोक्त्य प्रामाण्यव्याप्यनिश्चयव्यभिचारवाराणाय तद्वाप्यत्वा-विषयकेत्युक्तमित्यर्थः । कोट्यस्मरण इत्युक्तमुपलक्षणम् । तैलसंयोग-व्यङ्ग्यकुङ्कुमगन्धसन्देहविरोधिनि तैलसंयोग इत्यपि द्रष्टव्यम् ।। **तज्ज्ञानसामग्र्या एवेति** ।। उत्कटविषयान्तरं ज्ञानजनकस्य मनःसञ्चारादे-स्तत्राभावे कामुककामिनीस्मरणादिरूपज्ञानस्यैवानुपपत्त्या तत्सामग्र्या-वश्यम्भायवे तस्याश्च प्रामाण्यसंशयसामग्रीतः प्राबल्याभावे वृश्चिकवेधादि-जनितवेदनादिज्ञानकामुककामिनीस्मरणादेरेवानुत्पत्त्या तस्याः विरोधित्वेऽ-वश्यम्भावेन एतत्संशयप्रतिबन्धोपपत्तौ तादृशविषयान्तरज्ञानस्यापि विरोधित्वकल्पने मानाभावादिति भावः । न च तज्ज्ञानोत्तरमेवोक्त-संशयापत्त्या तस्यापि प्रतिबन्धकमावश्यकमिति वाच्यम् । आवश्यक-तत्सामाग्रीत एव प्रतिबन्धोपपत्तेः । असत्यां चोक्तसंशयसामग्रीसत्वे तदनुत्पत्तिरित्यत्र मानाभावात् । विषयान्तरसञ्चारे च तस्यैव प्रतिबन्धकत्वात् ।

न च यद्धी सा यत्र प्रतिबन्धिका निर्विशेषदर्शने सति तद्धीरपि तत्र प्रतिबन्धिकेति **पक्षधरोक्ते**स्तज्ज्ञानस्यापि तत्र प्रतिबन्धकत्वमावश्यकमिति । अत एव विरोधिनिश्चयसामग्र्या इव विरोधिनिश्चयस्यापि प्रतिबन्धकत्वमिति वाच्यम् । विरोधिनिश्चयस्य ग्राह्याभावावगाहित्वेनैव प्रतिबन्धकत्वेन तत्सामग्रीप्रतिबन्धकत्वस्य प्रयुक्तत्वाभावात् भिन्नविषये अनुमितिसामग्र्या

प्रत्यक्षप्रतिबन्धेऽपि अनुमितिस्तदा प्रतिबन्धकत्वाच्च । समाने विषये प्रत्यक्षसामग्र्या अनुमितिप्रतिबन्धेऽपि सिषाधयिषाप्रतिबन्धकयुक्त-पक्षताघटकसामग्र्यां सत्यां प्रत्यक्षेणानुमित्यप्रतिबन्धकत्वाच्च । तत्प्रतिपक्ष-स्थले प्रकृतसाध्यहेत्वोः किं तत्त्वमिति जिज्ञासाघटितहेतुद्वयगोचर-तत्त्वज्ञानसामग्र्या अनुमितिप्रतिबन्धकेऽपि तत्सामग्रीजनितस्यानयोः हेत्वोरन्यतरस्मिन् व्याप्तिपक्षधर्मतान्यतरवैकल्यमन्यतरस्मिंश्च तदुभय-सत्त्वमिति तत्त्वज्ञानस्य परामर्शरूपस्यानुमितिजनकत्वाच्चेति । तदिदमाह– **तज्ज्ञानसामग्र्या एव तद्विरोधित्वादिति ।। करादिज्ञानस्येति ।।** अन्धकारे पुरुषादिसंशयोत्तरं करादिसन्दर्शनमात्रेणैव तत्संशयनिवृत्तिदर्शनात् न व्याप्ततया तज्ज्ञानं तद्विरोधीति भावः ।। **स्वरूपेणैवेति ।।** करादि-ज्ञानत्वेन तु व्याप्यत्वगोचरत्वेनेत्यर्थः ।। **यथान्धकारेति ।।** विषया-लोकसंयोगस्य चाक्षुषधी[1]करणत्वेन तत्रालोकाभावे सामग्र्यभाव आवश्यकः । न च निश्चयसामग्र्या एव विरोधभानादिकालीनायाः संशयसामग्रीत्वेन तदभावे संशयोऽपि न स्यादिति वाच्यम् । चाक्षुषसंशयाभावेऽपि मानसस्य तस्य सम्भवात् । तथा चान्धकारस्थघटसंशयस्य चाक्षुषतन्निश्चयसामान्या-कारणालोकसंयोगाभावेनैवोपपन्नतया तत्संयोगस्यैव तत्संशविरोधित्वं न तु व्याप्यतया तद्दर्शनस्यापि । अत एव तत्र निश्चयसामग्रीमात्रादेव [2]निश्चेतु-पुरुषादिसंशयोत्तरप्रत्यक्ष इव विशेषदर्शनापेक्षापीति भावः । तदेतदाह– **व्यङ्ग्यनिश्चयसामग्र्येति ।।** न तु विशेषदर्शनमपि तत्रापेक्षितमित्यर्थः **।। दूरादीति ।।** न च दूरादिदोषेऽपि सामग्र्यभाव एव दोषाभावकारणा-भावात् । तथा च कथं द्वैधीकरणमिति वाच्यम् । सिद्धान्ते दोषाभावस्य हेतुत्वात् । यद्यपि दोषेण सामग्रीमध्यनिष्टस्य यस्य कस्यापि विघटनमावश्यकं तच्च तेन शक्तेरेव विघटनं तस्याश्चावच्छेदकत्वमेव न कारणत्वमिति

१. "कारणत्वेन" इति स्यात् । २. "निश्चेतुं" इति स्यात् ।

वाच्यम् । एवमपि तत्र तदवच्छिन्नकारणाभावस्यावश्यकत्वात् । अन्यथा पुष्कलसामग्र्यां सत्यां कार्यानुदयायोगात् । तथापि सामग्र्यभावस्यापि स्वतः सिद्धत्वदोषसमवधानप्रयुक्तत्वाभ्यां द्वैधीकरणं युक्तमेव ।। **यथा स्थाणाविति** ।। तत्र विषयालोकसंयोगादेरपि निश्चयहेतोः सत्वेन संशयस्य तदविघटनीयतया तद्दर्शनविघटनीयत्वमिति तदेव तत्र विरोधि न तु निश्चयसामान्यकारणमात्रमिति भावः । तदिदमाह– **तद्व्याप्यत्वेन करादिज्ञानमेवेति** ।। न तु निश्चयसामान्यसामग्र्येवालमित्यर्थः । एवञ्च व्याप्यस्य करादेर्ज्ञानमाद्यपक्षे व्यापकप्रत्यक्षेण सहैवोत्पद्यत इति साध्यस्यापि सत्त्वात् द्वितीये तद्व्याप्यत्वगोचरमेवेति हेतोरेवागमनात् नोभयथापि तत्र व्यभिचार इति भावः । न तु सुखसाधात्कारत्वादिग्राहकसामग्र्या प्रामाण्यव्याप्यत्वग्राहकसामग्रीनैय्यत्याभावेन तदग्रहदशायां प्रामाण्यस्याप्यविषयकत्वे कदाचित्संशयः स्यादेवेति भावः । तद्व्याप्यत्वाविषयकत्वांशे असिद्धिं परिहृत्य तत्संशयविरोधित्वांशे तां परिहरति ।। **न चेति** ।। **सुखादीति** ।। तथा चानादौ संसारे धर्मिज्ञानादिसम्भवेन सुखसाक्षात्कारानुव्यवसायस्य प्रामाण्याविषयकत्वे कादाचित्कस्यापि तत्संशयः स्यादेवेत्यर्थः । ननु धर्मिज्ञानकोट्यस्मरणादौ प्रामाण्यविषयत्वेऽप्युक्तसंशयविरोधित्ववत् पक्षीभूतप्रत्ययेऽपि सामान्याभावेऽप्युक्तसाधनमस्त्वित्याह ।। **न चेति** ।। **ज्ञानस्येति** ।। ज्ञानयोः स्वतो विरोधाभावात् विषयकृत एव स वाच्यः । तत्र परस्परपरिहाररूपत्वेन तदुभयव्याप्यत्वेन चेति चातुर्विध्यमेवेति भावः ।

न्यायदीपः

आद्यविशेषणस्य यथाश्रुतव्याख्या कृत्यसम्भवेऽपि द्वितीयविशेषणे तदसम्भवात् यद्यद्विरुद्धाविषयकत्वे सति यद्व्याप्यत्वाविषयकत्वे सति यत्संशयविरोधिज्ञानं तत्तद्विषयकमित्यादिसामान्यव्याप्तिमुपेत्य कृत्यमाह ।।

वह्निमत्वाविषयक इति ।। अयं वह्निमान् धूमवत्वादित्यत्र वह्निव्याप्य-धूमवानयमिति निश्चये सति अयं वह्निमान्नवेति संशयानुदयेनोक्तरूपहेतु-भावेपि वह्निमत्वविषयत्वाभावेन तत्र साध्याभावाद्व्यभिचार इति शङ्का तद्व्याप्यत्वाविषयकत्वविशेषणान्निरस्तेत्यर्थः । विशिष्य व्याप्तौ तु घटत्व-वद्विशेष्यकत्वरूपप्रामाण्याविषयकेपि तत्संशयविरोधिनि तद्व्याप्यतया कम्बुग्रीवादिमद्विशेष्यकत्वनिश्चये व्यभिचारो नेति ज्ञेयम् ।। **धर्म्यज्ञाने** ।। व्यवसायरूपधर्मिणो ज्ञानाभाव इत्यर्थः । धर्मिज्ञानस्य संशयहेतुतया तद-भावस्य कार्यानुत्पादव्याप्यत्वेन तत्र हेतुसत्वादिति भावः । धर्मिज्ञानं न संशयहेतुरिति मतेनाह ।। **कोटीति** ।। कोटिस्मरणाभाव इत्यर्थः । एतच्चोप-लक्षणम् । कुङ्कुमगन्धादिसंशयविरोधिनि तदभिव्यञ्जकगोघृतसंयोगादौ च न व्यभिचारः इत्यपि ध्येयम् ।

विशिष्टस्यापि हेतोर्व्यभिचारमाशङ्क्य निराह ।। **न चेति** ।। **सामग्र्या एवेति** ।। तथाच तत्र प्रत्ययत्वाभावेन हेतोरेवाभावादिति भावः । न च सामग्र्या विरोधित्वे तज्जन्यज्ञानस्यापि सामग्रीविरोधित्वप्रयुक्तं संशयविरोधित्वं स्यादेव । विरोधिनिश्चयप्रतिबन्धकत्वस्य विरोधिनिश्चयसामग्रीप्रतिबन्धकत्व-प्रयुक्तत्वदर्शनात् । ''यद्धीसामग्री यत्र प्रतिबन्धिका तद्धीरपि तत्र प्रति-बन्धिका'' इति **पक्षधरोक्ते**रिति वाच्यम् । विरोधिनिश्चयस्य ग्राह्याभावा-वगाहित्वेनैव प्रतिबन्धकत्वेनान्यप्रयुक्तत्वाभावात् । भिन्ने विषये अनुमिति-सामग्र्याः प्रत्यक्षप्रतिबन्धकत्वेपि अनुमितेस्तददर्शनादिति भावः ।

स्थळान्तरेपि व्यभिचारमाशङ्कते ।। **नन्विति** ।। **स्वरूपेणैव** ।। करचरणादित्वेनैवेत्यर्थः ।। **व्याप्यतया** ।। पुरुषत्वादिव्याप्यतयेत्यर्थः । हेतुसत्वमुक्त्वा साध्यं नेत्याह ।। **तच्चेति** ।। एतदपि व्यभिचारचोदनं सामान्यव्याप्तिमुपेत्यैवेति ध्येयम् ।

विवेकेन समाधिं वक्तुमाह ।। **व्यङ्ग्येति** ।। निश्चयसामग्र्यभावप्रयुक्तो वा सत्यां तस्यां तत्प्रतिबन्धकदोषप्रयुक्तो वेति भावेन तद्वैविध्यं व्यनक्ति ।। **व्यञ्जकेति** ।। **ज्ञानेति** ।। निश्चयेत्यर्थः ।। **सामग्रीति** ।। निश्चय-सामग्र्यभावादित्यर्थः ।। **यथेति** ।। तत्रालोकरूपव्यञ्जकाभावादिति भावः ।। **दूरादीति** ।। सत्यां निश्चयसामग्र्यामिति भावः ।। [१]**तद्व्याप्यत्व-ज्ञानमेवेति** ।। अन्वयव्यतिरेकाभ्यां तथावगमादिति भावः । अत एवोक्तं ज्ञप्तिप्रामाण्यवादान्ते **रुचिदत्तेन** ''अनुव्यवसायत्वस्य प्रामाण्यनियतस्यापि तन्नियतत्वेनाग्रहात्कथं संशयनिवृत्तिः । न हि व्याप्तिज्ञानमात्रात्संशय-निवृत्तिः । अन्यथा तैलं पृथवी न वेति संशयो न स्यात्'' इति ।

ननु घटत्वादिप्रकारकानुभवत्वस्य वल्मीकादौ घटत्ववद्विशेष्यकत्वादि-रूपप्रामाण्यव्यभिचारेपि अत्र विवक्षितसुखानुभवत्वादिरूपव्यवसायधर्मस्य सुखत्ववद्विशेष्यकत्वादिरूपप्रामाण्याव्यभिचारेण तद्व्याप्यत्वविषयकत्वं तदनुव्यवसायस्यास्त्येवेति भावेन शङ्कते ।। **नचेति** ।। व्याप्यत्वे सत्यपि तद्विषयकत्वं नावश्यकमिति भावेन परिहरति ।। **सुखेति** ।। **दर्शनादिति** ।। व्याप्त्यनुसन्धानहीनबालमुग्धादाविति भावः । व्याप्यत्वाविषयकत्वांशे असिद्धिं निरस्य तद्विरुद्धाविषयकत्वांशे विवादाभावात्संशयविरोधित्वांशे तां निराह ।। **न च धर्मीति** ।। कोट्यस्मरणविषयान्तरसञ्चारादिरादिपदार्थः ।। **धर्मिज्ञान इति** ।। धर्मिणो ज्ञाने सतीत्यनेनान्वयः । धर्म्याख्यज्ञान इति व्याख्याने तु न सतिपदेनान्वयः । अपि तु साधारणधर्मदर्शनपदेन । न चास्मिन्पक्षे धर्मिभूतज्ञानानुक्तिः । धर्मिज्ञानस्य साधारणधर्मदर्शनत्वेनैव हेतुत्वात्तेनैव तदुक्तेरिति ।। **असंशयेति** ।। तस्य प्रामाण्यनिश्चयनिबन्ध-नत्वाभावे कदाचित्कस्यचित्तत्र धर्मिज्ञानाद्युदयसम्भवेन रूप्यज्ञानं प्रमा न

---

१. 'तद्व्याप्यत्वेन' इति स्यात् ।

वेतिवत्सुखज्ञानं प्रमा न वेति संशयः स्यात् । कदापि तददर्शनात्प्रामाण्य-निश्चयनिमित्त एव तदभाव इति तद्विरोधित्वं तस्य नासिद्धमिति भावः ।

एवं व्यभिचारासिद्धी निरस्य विपक्षे बाधकाभावदोषं च निराह ।। **नचाद्य इति** ।। विपक्षे हेतूच्छित्तिं सम्भावितपक्षानुक्त्वा इतरव्यवच्छेद-पूर्वकमाह ।। **ज्ञानस्येति** ।। स्वतो विरोधाभावात् स्वविषयकृतस्यैव विरोधस्य वाच्यत्वादिति हि शब्दः ।

तर्कताण्डवम्

एतेन द्वितीयहेतावप्यप्रयोजकतोद्धृता । पक्षीकृतज्ञाने प्रामाण्य-विषयकत्वं प्रामाण्यव्याप्यविषयकत्वं प्रामाण्याभावविषयकत्वं प्रामाण्याभावव्याप्यविषयकत्वं उभयोदासीनविषयकत्वं चेति सम्भावित प्रकारपञ्चके द्वितीयस्य तद्व्याप्यत्वाविषयकत्वविशेषणेन तृतीयादीनां च त्रयाणां तदभावनिश्चयविरोधिनिश्चयत्वेन निरासाद्धेतो-राद्यं प्रामाण्यविषयकत्वरूपसाध्यं विनाऽनुपपत्तेः ।

तत्राद्यं निश्चयपदं तदभावसंशयविरोधिनि तदभावनिश्चये, द्वितीयं तु तदभावनिश्चयविरोधिनि तदभावसंशये व्यभिचारवारकम् ।

सुखसाक्षात्कारस्य तत्प्रामाण्याभिलापस्य च मध्ये प्रामाण्यानु-मित्यङ्गीकारे चानुभवविरुद्धं व्याप्तिस्मरणादि बहु कल्प्यं स्यात् । सुखसाक्षात्कारस्य तत्साक्षात्काराभिलापस्य च मध्येपि तत्कल्प्यं स्यात् । प्रामाण्यानुमितिप्रामाण्याभिलापर्योर्मध्येऽपि ज्ञानान्तरं कल्प्यं स्यादिति न तृतीयहेतुरसिद्धः । नाप्यप्रयोजकः व्यवहर्तव्यज्ञानस्य व्यवहारहेतुत्वात् ।

न च घटविशेष्यकत्वे सति घटत्वप्रकारकत्वस्यैव प्रामाण्यरूपत्वाच्चतुर्थहेतौ साध्यावैशिष्ट्यम् । त्वयाप्यङ्गीकृतस्य प्रामाण्योल्लेखमात्रस्य हेतुत्वात् । त्वदनङ्गीकृतस्य सत्तया तदुल्लेखस्य च साध्यत्वात् । मन्मते केवलानुप्रमाणसाधारणस्य याथार्थ्यरूपप्रामाण्यविषयकत्वस्य साध्यत्वात् केवलप्रमाणासाधारणस्योल्लेखस्य हेतुत्वाच्च । केचित्तु तथाङ्गीकर्तव्यत्वं साध्यमिति न साध्यावैशिष्ट्यमित्याहुः ।

नाप्यसिद्धिः सुखमेव सुखत्वेनानुभवामि स्तम्भमेव स्तम्भत्वेन जानामीत्यनुभवात् । एतेनोक्तवक्ष्यमाणानुमानेषु बाधो निरस्तः । सुखमेव सुखत्वेनानुभवामीत्यादिज्ञाने प्रामाण्यशब्दानुल्लेखेपि तदर्थस्य सुखत्ववति सुखत्वप्रकारकत्वरूपस्य प्रामाण्यस्योल्लेखात् ।

युक्तिरत्नाकरः

द्वितीयहेतावन्तरङ्गतया विशेषकृत्ये वक्तव्येऽप्यप्रयोजनोद्धारप्रस्तावाद्विशेषकृत्यं पश्चाद्विवक्षुस्तामुद्धरति ।। **एतेनेति** ।। हेतोरप्रामाण्यविषयकत्वं विनाप्युपपद्यमानत्वेनेत्यर्थः ।। **पक्षीकृतेति** ।। जगतः सर्वस्यापि प्रामाण्यतदभावतदुभयव्याप्यतदन्यभेदेन क्रोडीकृतत्वात्सविषयकस्य सतो ज्ञानस्योक्तान्यतमविषयत्वमावश्यकमिति पाञ्चविध्यमेव सम्भावितमित्यर्थः । प्रामाण्यतद्व्याप्ययोस्तदभावतद्व्याप्ययोश्चैकराश्यादुभयोदासीनेत्युभयशः ।। **तत्राद्यमिति** ।। यथा चैतत्तथोक्तम् ।

ननु सुखमनुभवामीत्यनुव्यवसायात् न प्रामाण्याभिलापादिरूपो व्यवहारः । किं तद्रूपपक्षज्ञानान्तरं सुखसाक्षात्कारत्वादौ व्याप्तिस्मृतिपक्षधर्मताज्ञानपरामर्शेषु जातेषु प्रामाण्यानुमितिरिति । तृतीयहेत्वसिद्धिरित्याह ।। **सुखसाक्षात्कारस्येति** ।। सुखसाक्षात्कारस्यैव स्वप्रकाशसाक्षिरूपतया सुखसाक्षात्कारानुव्यवसायरूपत्वं तत्प्रामाण्यगोचरत्वं चेति भावः ।

व्याप्तिस्मरणादीत्यादिपदेन परामर्शानुमितिसुखसाक्षात्कारातिरिक्तानुव्यवसायोक्तिः । ननु भोजनादिकं कुर्वतः प्रतिकबलमिष्टसाधनताऽनुमितितज्जनकव्याप्तिव्याप्तिस्मृत्यादेरिव प्रामाण्यानुमित्यादेरपि कल्पनं युक्तमिति तत्राह– **सुखसाक्षाकारस्येति** ।। अपि चाभिलापस्याभिलपनीयधीमात्रेणैवोपपत्त्याऽत्रोभयानुभवविरुद्धानुमित्यन्तराद्यकल्पनात्तदा प्रकृतेऽपि स्वप्रकाशसुखसाक्षात्काररूपसाक्षिण एव प्रामाण्याभिलापहेत्वभिलापनीयधीरूपत्वसम्भवान्नानुभवविरुद्धानुमित्यादिकल्पन मिति समम् । भोजनादौतु प्रवृत्तीष्टसाधनज्ञानयोः साध्यसाधनभावस्य प्रमिततया प्रतिकबलं प्रवृत्त्यन्यथानुपपत्त्यैव इष्टसाधनतानुमित्यादिकल्पनं आद्यस्तन्यपानप्रवृत्ताविवेति भावः । अनुव्यवसाये तादृशप्रामाण्यनिश्चयत्वस्य त्वयाभ्युपगमादिति भावः । **प्रामाण्योल्लेखमात्रस्य** प्रामाण्यविषयीकारित्वमात्रस्य ।

ननु प्रामाण्यसंशयेऽप्रामाण्यशङ्कास्कन्दितप्रामाण्यनिश्चये च व्यभिचारः । किञ्च स्वमते निश्चयस्यैव साध्यस्य तादृशहेतुना परं प्रति साधनादुक्तदोषाप्रसक्त्या मन्मते इत्यादिव्यर्थम् । अपि च प्रतिबद्धसाक्षिविषयत्वस्यैव प्रामाण्ये स्वतस्त्वरूपतया साक्षिणश्च केवलप्रमाणतया केवलानुप्रमाणसाधारणस्य प्रामाण्यविषयकत्वस्य साधने स्वमतेऽप्यर्थान्तरत्वं, उभयसाधारणविषयत्वनिर्वचनासम्भवः, स्वपरमतसाधारण्येकसाध्यसाधनश्चेति चेन्न । प्रामाण्यविरोध्युपस्थितितत्सामग्र्यसमवहितत्वेनापि हेतुविशेषणान्न व्यभिचारः । परं प्रति स्वमते चासिद्धस्यैव साधनेऽपि ग्रन्थस्य वादरूपतया गुरुशिष्यकथात्मकवादे स्वसिद्धान्तानुसारेणैव पृष्टवन्तं शिष्यं प्रति निश्चितेन हेतुना सन्दिग्धस्यैव साध्यस्य साधनीयतया साध्यावैशिष्ट्यपरिहाराय स्वमते पतनीयत्वाच्च । साक्षिण एव केवलानुप्रमाणोभयरूपतया अप्रतिबद्धसाक्षिविषयत्वेन तादृशकेवलप्रमाणसाधारणविषयत्वस्यापि प्रामाण्ये स्वतस्त्वरूपतयार्थान्तरत्वानवकाशाच्च । न च साक्षिणः नित्यत्वेन फलत्वायोगः ।

एकस्यैव फलसाधनोभयरूपत्वे विरोधश्चेति वाच्यम् । न्यायमतेऽत्यन्ताभाव-स्वरूपस्यापि प्रतीयोगिदेशान्यदेशत्वादेरागन्तुकप्रतियोगिसमवधानाद्या-गन्तुकत्वतत्प्रतीतिप्रमात्वयोरिव साक्ष्यनुभवस्याप्यागन्तुकविषय-समवधानादागन्तुकत्वतत्प्रतीतिप्रमात्वयोरुपपत्तेः । मन्मते त्विति च भिन्नक्रमः । केवलानुप्रमाणोभयवृत्तेः प्रतीतिव्यापारसाधारणविषयीकारित्व-मात्रस्य साध्यत्वात्तद्विशेषप्रतीतिमात्रवृत्तिविषयोल्लेखित्वहेतुत्वात् न साध्याविशेष इत्यर्थः । न च स्वमते तत्साधनानुपयोगः । प्रमायां प्रामाण्य-विषयकानुव्यवसायस्य सिद्धान्ते साक्षिरूपत्वनियमेन तस्य केवलप्रमाण-तावदनुप्रमाणताया अप्यङ्गीकारेण तदुपयुक्तव्यापारानुबन्धिविषयीकारित्व-सिध्यर्थत्वात् । न च प्रतीत्यनुबन्धिविषयोल्लेखित्वेन व्यापारानुबन्धि-विषयीकारित्वसिद्धेरेव कथमप्रयोजकत्वमिति ।।

इष्टसाध्यव्याप्यत्वस्य हेतोः पक्षधर्मताबलादेव विशिष्टसाध्यसिद्धौ प्रथमप्रतीत्यनुबन्धिविषयोल्लेखित्वमादाय पर्यवसानयोगेन सिद्धव्यापारानुबन्धि-विषयीकारित्वमादायैव पर्यवसाननियमात् । न चैकस्यैव साक्षिण एकस्मिन्नेव विषये कथं केवलानुप्रमाणतेति वाच्यम् । आत्मनो आत्मानं जानाति देवदत्त इत्यत्रापि प्रत्ययादित्य[1]पगच्छ । न चात्र व्यवहारे आत्मनेतिपदं मनोविषयकं स्वेनैव स्वात्मानं विजानीयादित्यादौ प्रयोग उभयत्र प्रतीतौ च तदयोगाच्च । न चैवमप्यनादेः साक्षिज्ञानस्य कथमनुप्रमाणत्वम् । (प्रागभावस्य प्रायश्चित्तसाध्यत्ववत्) अद्वैतमते अविद्यानिवृत्तेरात्म-याथात्म्यज्ञानसाध्यत्ववच्च । प्रागसतः सत्वरूपकार्यत्वाभावेऽपि यस्मिन् सतीत्यादिरूपस्यात्रापि सत्त्वात् । न च प्रागभावस्यानित्यत्वेन साध्यत्वोपपत्तावपि नानित्ये साक्षिणि तदुपपद्यत इति वाच्यम् । साध्यत्वे सादित्वस्येव नित्यत्वस्यानुपयोगात् । न च नित्ये यदभावे असत्व इत्यस्यासम्भव इति वाच्यम् । विषयस्य कादाचित्कतया तद्विषयीकारित्व-

स्यापि तथात्वेन तद्विशिष्टत्वाकारेण यदभावेऽसत्वमित्यस्यापि सम्भवात् । न चैवमपि कथमेकस्यैव साध्यसाधनत्वेऽविशेषादिति वाच्यम् । मीमांसकमते यागाभिन्नस्यापूर्वस्य यागसाध्यत्ववत् [२]सत्कार्यादेव मृदभिन्नस्य घटस्य मृत्साध्यत्ववच्च । स्वरूपेन्द्रियाभिन्नस्यापि साक्षिप्रत्ययस्य कार्यभेदेन कदाचित्स्वविषयोपरक्तत्वादाह– **साध्यत्वोपपत्तेः इति ।।** न च तत्र भेदाभेदसद्भावेन साध्यत्वोपपत्तावपि प्रकृते अत्यन्ताभेदात् न तदुपपत्तिः । साध्यत्वाविरोधिनोऽभेदस्य सत्वे स्वस्य स्वसाध्यत्वासम्भवात् । प्रकृतेऽपि भेदप्रतिनिधेः विरोधशामकस्य विशेषस्य सत्वाच्च । न चैवं कल्पने प्रमाणाभावः । सकलेन्द्रियरहितमुक्त्यवस्थायां ''जक्षन् क्रीडन् रममाणः स यद्यत्कामयते सङ्कल्पादेवास्य'' इत्यादिश्रुत्या वेदितेन्द्रियकार्यानुत्पत्या तत्प्रस्तावे वक्ष्यमाणेन ''स वा एष एतस्माद्विमुक्तश्चिन्मात्री भवति चिन्मात्र एवावतिष्ठते । अथ तेनैव रूपेणाभिपश्यत्यभिश्रुणोति' इत्यादिश्रुत्या मर्त्यदेहं परित्यज्य चितिमात्रात्मदेहिनः चितिमात्रेन्द्रियश्चैवेत्यादिस्मृत्या चितिमात्रेणेत्यादिसूत्रेण च साक्षिणो ज्ञानस्यापि ज्ञानरूपस्यापि इन्द्रियत्वसिद्धेः । न हि प्रागनिन्द्रियात्मकस्य सतो जीवमुक्तौ तदात्मकत्वमुपपद्यत इति प्रागपि तत्वसिद्धिरित्यलम् ।

वस्तुतस्तु साक्षिणः द्विविधप्रामाण्ये विषयकत्वमस्ति । तत्र यत्प्रतीतिव्यापारसाधारणं सामान्यरूपं प्रतीतिमात्रवृत्यसामान्यरूपत्वादिति । तदेव साध्यम् । न चाविकासकत्वात् न सामान्यरूपताप्रामाण्यविषयकविकारित्वं तदेव स्वतस्त्वोपयुक्तसामान्यरूपत्वात् । न तु प्रमाणोल्लेखित्वरूपम् । प्रामाण्ये स्वरूपेन्द्रियविषयत्वस्यापि सत्वात् । प्रतीत्यनुबन्धिप्रामाण्योल्लेखित्वं हेतुरिति यथाश्रुत एव वाक्यार्थः ।

नन्वेवं रजतत्वेन जानामीत्येवानुव्यवसायः । नत्विदं रजतं रजतत्वेन

१. ''अवगच्छ'' इति स्यात् । २. ''सत्कार्यवादे'' इति स्यात् ।

जानामिति तथानुव्यवसायस्य रजतत्ववैशिष्ट्यविषयकत्वं सिद्धमित्यत्राह ।। **नापीति** ।। **सुखमेवेति** ।। अनभ्यासदशायां संशयदर्शनेन बहिरर्थत्वेन च न्यायनये अनुव्यवसायस्य इदं रजतं न जानामीत्याकारकत्वेऽपि सुखादौ कदापि संशयादर्शनेन बहिरर्थत्वाभावेन च मनसैव संयुक्तसमवेतसमवायादि-प्रत्यासत्त्या स्वातन्त्र्येणैव सुखवैशिष्ट्यस्य भानसम्भवात् । सुखमेवानुभवा-मीत्यनुव्यवसायासम्भवात् । तथैवानुभवाच्चेति भावः ।। **सुखमेवेति** ।। अत्रापि बह्वभ्यासदशापन्नतया संशयादर्शनेन सामग्र्या उपपादयिष्यमाणत्वेन च स्वातन्त्र्येण स्तम्भवैशिष्ट्यभानसम्भवादिति भावः ।

नन्वनुव्यवसायस्य प्रामाण्यप्रकारकत्वे इयं प्रमेत्येवमाकारतैव स्यात् । आत्मज्ञानादिविशेष्यत्वेनानुभवावचनप्रमाण्यविशेष्यकतासंसर्गमर्यादया प्रामाण्यसंशयविरोधितत्समानप्रकारकत्वेनैव संशयविरोधितावारणात् । न ह्येतत्त्रितयातिरिक्तप्रकारेण ज्ञानमर्थविषयकम् । तथा चासिद्धिस्तदवस्था सर्वानुमानेषु बाधश्चेति । तत्राह– **एतेनेति** ।। प्रागुक्तासिद्धिश्चेति बोध्यम् । सुखमेव सुखत्वेनानुभवामीत्यनुभवं प्रति सुखत्वविशिष्टसुखस्य ज्ञान-विशेष्यतया भानेन समानसंवित्संवेद्यतया ज्ञाने सुखविशेष्यकत्वस्य प्रकारवाचितृतीयार्थोल्लेखिबलेन सुखत्वप्रकारकत्वस्य चानुभवे साक्षिणा विषयीकरणात् प्रामाण्यतयैव भासत इति भावः ।

न्यायदीपः

एतेनेत्युक्तं व्यनक्ति ।। **पक्षीकृतज्ञान इत्यादिना** ।। **उभयेति** ।। प्रामाण्यतद्व्याप्यप्रामाण्याभावतद्व्याप्यरूपोभयोदासीनेत्यर्थः । सङ्गततया प्रसक्तमप्रयोजकत्वं पूर्वं निरस्य विशेषणकृत्यमाह ।। **तत्राद्यमिति** ।। तत्र द्वितीयहेताविति्यर्थः । तदभावज्ञानविरोधिज्ञानत्वादित्युक्ते व्यभिचारादुभयत्र निश्चयपदेन तद्धारणमित्यर्थः ।

तद्विषयव्यवहारहेतुप्रत्ययत्वादिति तृतीयहेतौ । [1]कुङ्कुमगन्धव्यङ्ग्य-व्यवहारहेतौ घृतादिसंयोगरूपव्यञ्जके व्यङ्ग्याविषयके व्यभिचारवारकं प्रत्ययपदम् । प्रामाण्याविषयके घटादिज्ञाने व्यभिचारवारकं तद्विषयक-व्यवहारहेत्वितिपदं इति स्पष्टमिति विशेषणकृत्यमनुक्त्वा असिध्यप्रयोजकत्वे क्रमेण निराह ।। **सुखेति** ।। सुखमनुभवामीति प्रत्ययस्य न सुखानुभव-प्रामाण्यव्यवहारहेतुत्वमस्ति किन्तु सुखसाक्षात्कारानन्तरं अयं सुखानुभवः प्रमा सुखसाक्षात्कारत्वात् पूर्वसुखसाक्षात्कारवदित्यादिलिङ्गजन्यप्रामाण्यानु-मितेरेव इति अभ्यासदशापन्नस्थले झडिति प्रामाण्यानुमितिसामग्रीसमवधानं स्वकारणाधीनमिति ज्ञप्तिप्रामाण्यान्ते **मणि**कृदुक्तदिशा प्रमाण्यानुमित्यङ्गीकार इत्यर्थः ।। **व्याप्तिस्मरणादीति** ।। परामर्शानुमिती आदिपदार्थः । अतिप्रसङ्गं चाह ।। **सुखेति** ।। **तत्कल्प्यमिति** ।। जातिव्यक्त्योरेक-वित्तिवेद्यत्वनियममनुपेत्य साक्षात्कारस्वरूपज्ञानानन्तरं सुखज्ञानमिदं साक्षात्कारः स्ववृत्तिवर्तमानविषयकत्वादिति सुखसाक्षात्कारत्वानुमितिमुपेत्य तद्धेतुव्याप्तिस्मरणादिकं कल्प्यं स्यादित्यर्थः । ज्ञानान्तरं शाब्दादि-रूपमित्यर्थः । अत्रापि हेतूच्छित्तिरेव विपक्षे बाधिकेत्याह ।। **व्यवहर्तव्येति** ।।

तज्ज्ञानप्रकारेत्यादिचतुर्थहेतौ दलद्वयकृत्यं परोक्तनिरुक्तिभङ्गे व्यक्तमिति व्यभिचारशङ्कानवकाशात्सन्दिग्धासिद्धिस्वरूपासिद्धी क्रमेण निराह ।। **नचेत्यादिना** ।। सुखं मे भूयादितीच्छायामुक्तरूपप्रकारकत्वे सत्यपि न प्रामाण्यमिति तदेव तदित्यसिद्धमिति कश्चित् । तन्न । सुखत्ववद्विशेष्य-कत्वादिरूपप्रामाण्यस्येच्छायामपि सत्वात् । सुखत्ववद्विशेष्यकज्ञानत्वादिकं तदित्यशक्यशङ्कम् । मन्मत इत्यादिवक्ष्यमाणविरोधात् ।। **उल्लेखमात्रस्य** ।। विषयत्वमात्रस्येत्यर्थः । मात्रपदेन सत्वव्यावृत्तिः । एतेन यन्मते

---

१. कुङ्कुमगन्धरूपव्यङ्ग्येत्यर्थः ।

तद्वत्वमनुव्यवसायस्य सर्वथैवाविषयो न तन्मतेनायं हेतुर्वक्ष्यमाणदिशा प्रसाध्याङ्गको वेति सूचितम् । ननु सिद्धान्ते सत्वासत्वौदासीन्येन तद्विषयकत्वाभावात्साध्यावैशिष्ट्यं स्यादित्यत आह ।। **मन्मत इति** ।। वादजल्पकथयोः प्रयोगदशायामित्यर्थः । वह्निमात्रसाधने पर्वतीयवह्निना पर्यवसानमिव ज्ञानमात्रनिष्ठप्रामाण्येन पक्षधर्मताबलात्पर्यवसानमिति भावः ।। **एतेनेति** ।। तद्वद्विशेष्यकत्वोल्लेखादेरनुभवसिद्धत्वेनेत्यर्थः । तदेव व्यनक्ति ।। **सुखमेवेति** ।। **अनुल्लेखेपीति** ।। इदं ज्ञानं प्रमाणमित्यनाकारेपीत्यर्थः ।। **उल्लेखात्** ।। विषयीकरणादित्यर्थः ।

तर्कताण्डवम्

(५) यद्वा विमतः प्रामाण्यविरोध्युपस्थापकसामग्र्यसमवहितोऽनुव्यवसायः स्वविषयव्यवसायप्रामाण्यविषयकः निष्कम्पप्रवृत्तिहेतुव्यवसायविषयकानुव्यवसायत्वात्, उक्तरूपव्यवसायांशे लौकिकप्रत्यक्षत्वाद्वा, गृहीतप्रामाण्येन ज्ञानेन समानविषयकस्योत्तरस्य ज्ञानान्तरस्यानुव्यवसायवत् ।

अत्र द्वितीयहेतौ लौकिकपदं सामान्यप्रत्यासत्त्यादिजन्ये व्यवसायविषयके ज्ञाने व्यभिचारवारणाय । ज्ञानांश इति विशेषणं तु स्मृत्युपनीतेऽतीतघटज्ञाने तद्विषयकमहं घटज्ञानवानासमिति यज्ज्ञानमात्मांशे लौकिकप्रत्यक्षं तत्र व्यभिचारवारणार्थम् । न च तव घटज्ञानमस्तीति शब्दजन्यं यद्घटज्ञानविषयकं ज्ञानं तदनुव्यवसाये व्यभिचारः शङ्क्यः । घटज्ञानांशे घटत्ववति घटत्वप्रकारकत्वरूपस्य तदीयस्य प्रामाण्यस्याग्रहणेन साध्याभावेऽपि लौकिकप्रत्यक्षत्वाभावेन हेत्वभावात् । घटज्ञानविषयकज्ञानांशे तु हेतोः सत्वेऽपि घटज्ञानत्ववति घटज्ञानत्वप्रकारकत्वरूपप्रामाण्यग्रहणेन साध्यसद्भावात् ।

न च दृष्टान्तः साध्यविकलः । उत्तरस्य ज्ञानान्तरस्य पूर्वेण प्रामाण्यग्रहणेनाव्यवहितत्वे तस्यैव, व्यवहितत्वे तु प्रामाण्यस्मरणस्यैव, विशेषणज्ञानतया त्वदभिप्रेतायाः विशेषणोपस्थितिविशेष्येन्द्रियसन्निकर्षतदसंसर्गाग्रहरूपविशिष्टज्ञानसामग्र्याः सत्वेन ज्ञानान्तरानुव्यवसायस्य प्रामाण्यविशिष्टव्यवसायविषयकत्वात् ।

युक्तिरत्नाकरः

न च प्रागनुपस्थिततया कथं प्रामाण्यं प्रकारतया भासेत । भासत इति सिद्धान्ते विशेषणधियो विशिष्टधीहेतुत्वाभावेन न्यायमतेऽपि प्रतियोगित्वानुयोगित्वयोरिव तद्विशेष्यकत्वतत्प्रकारकत्वयोः प्रागनुपस्थितयोरेव प्रकारतया भानाभ्युपगमेन तदतिरिक्तस्य प्रामाण्यघटकस्य व्यवसायभानतया प्रामाण्यप्रकारकत्वसम्भवादुक्तपक्षतावच्छेदकात् एकं पक्षतावच्छेदकीकृत्यापरं हेतूकरोति ।। **यद्वेति** ।। अत्र विमतिरेव पक्षतावच्छेदिका । विमतिरेव किं धर्मावच्छेदेन ग्राह्येत्यत्राह– **प्रामाण्येति** ।। यद्वा विमत इत्यस्यैव विवरणं **प्रामाण्येति** । तच्चाप्रामाण्यादिग्राहकानुव्यवसायेन तद्विषयव्यवसायप्रामाण्यग्रहात् बाधवारणाय । घटज्ञानमित्यादिशाब्दज्ञाने बाधवारणाय **अनुव्यवसाय** इति ।। तच्च व्यवसायांशलौकिकप्रत्यक्षत्वम् । व्यवसाये बाधवारणाय स्मृत्युपनीतानीति तज्ज्ञानांशालौकिकप्रत्यक्षे आत्मांशे लौकिके बाधवारणाय **ज्ञानांश** इति ।।

न चैवमग्रिमहेत्वोरभेदः । आद्यहेतौ अनुव्यवसायपदेन प्रत्यक्षमात्रस्य विवक्षितत्वात् । न चैवमतीतव्यवसायविषयकालौकिकप्रत्यक्षे व्यभिचारः । ज्ञानांशलौकिकस्यैव पक्षतया हेतोः पक्षधर्मताबलेन निष्कम्पप्रवृत्तिहेतुर्वर्तमानव्यवसायविषयप्रत्यक्षहेतुलाभेन तत्र व्यभिचाराप्रसक्तेः । अन्यथा व्यवसायस्यावर्तमानत्वेन तद्विषयकप्रत्यक्षज्ञानांशलौकिकत्वासम्भवात् ।

नचैवमपि परकीयवर्तमानगोचरज्ञानत्वसामान्यप्रत्यासत्त्यादिजन्यज्ञानेषु व्यभिचारः । षक्षीकृतज्ञानगोचरप्रत्यक्षलौकिकत्वविशेषणवशादेव हेतोः पक्षधर्मताबलात् स्वसमानाधिकरणत्वस्यापि व्यवसायविशेषणत्वलाभात्तस्य चानुव्यवसायापेक्षया व्यधिकरणत्वेन तत एव व्यभिचारवारणात् । न चैवमग्रिमहेतावुक्तविशेषणादानेनैवोक्तव्यभिचारवारणे व्यवसायांशलौकिकपदयोर्व्यर्थता, अन्यथोक्तरूपविशेषणवैय्यर्थ्यमिति वाच्यम् । उक्तरूपपदेन निष्कम्पप्रवृत्तिहेतुत्वपरामर्शेन प्रामाण्याविषयकसकम्पप्रवृत्तिहेतुव्यवसायहेतुविषये व्यभिचारवारकत्वादिति ।

केचित्तु निष्कम्पप्रवृत्तिहेतुव्यवसायगोचरनित्यज्ञानत्वमाद्यहेत्वर्थः । नित्यज्ञानत्वमात्रस्य सकम्पप्रवृत्तिजनकव्यवसायगोचरे प्रामाण्याविषयके साक्षिण्यन्वयव्यभिचारितया निष्कंपप्रवृत्तिहेतुव्यवसायागोचरत्वविशेषणम् । तावन्मात्रस्य घटज्ञानमित्यादि शाब्दज्ञाने वस्तुतस्तादृग्व्यवसायगोचरे व्यभिचारवारणाय विशेष्यञ्चोपात्तम् । न च न्यायमते हेत्वसिद्धिः स्वमतानुसारित्वात् । न च दृष्टान्ते साधनवैकल्यं द्वितीयहेत्वभिप्रायेणैवास्य दृष्टान्तत्वात् । ईश्वरज्ञानस्यैवात्र दृष्टान्तत्वादित्याहुः ।। **गृहीतेति** ।। गृहीतं प्रामाण्यं यस्य तदाश्रयेणेत्यर्थः । उत्तरस्य समानाधिकरणस्येत्यत्र द्रष्टव्यम् ।। **अत्र द्वितीयेति** ।। यद्यप्ययं घट इति व्यवसायसमानविषयस्य घटत्वादिसामान्यप्रत्यासत्यादिजन्यस्य व्यवसायविषयत्वमेव नास्तीति न तत्र व्यभिचारः । तथापि लौकिकपदानुपादाने तद्विशेषणस्य व्यवसायांश इत्यस्याप्यनुपादेयतया निष्कम्पप्रवृत्तिहेतुत्वस्योपादाने तद्विशेषणस्य अनुपादाने च तद्विशेषणस्य प्रत्यक्षत्वमात्रस्योक्तस्थले व्यभिचारवारणाय लौकिकपदमिति भावः ।। **स्मृत्युपनीत इति** ।। न च घटज्ञानगोचरस्मृतेस्तद्गोचरानुव्यवसायजन्यत्वे तस्य च तद्विशेष्यकत्वादिगोचरत्वेन स्मृतेरपि तथात्वेन तदुपनीतप्रामाण्यमपि तदुत्तरानुव्यवसाये भासत इति साध्यत्वात्

न व्यभिचार इति वाच्यम् । तदित्यादिपदजन्यस्मृत्युपनीते घटज्ञाने घटत्वविशेषकत्वाद्यभावेन प्रामाण्यविषयकत्वात् ।। **न च तवेति** ।।

ननु तव घटज्ञानमस्तीति शब्दाद्घटज्ञाने वृत्ते घटज्ञानविषयक-शाब्दज्ञानवानहमितिवदनुव्यवसाये च जाते तत्र घटज्ञानरूपव्यवसायांशे लौकिकप्रत्यक्षत्वप्रसक्तिरेव नास्तीति व्यभिचारशङ्कैव कथञ्चन शाब्द-ज्ञानानुव्यवसायस्य स्ववृत्तिवर्तमानव्यवसायविषयकत्वेन तद्गोचरलौकिक-प्रत्यक्षत्वसत्वात् व्यभिचारशङ्कात एव तव घटज्ञानमस्तीत्येतावदूरधावनम् । अन्यथा घटज्ञानमिति शब्दादित्येवावक्ष्यदिति वाच्यम् । तथा सति प्रामाण्यविषयकत्वरूपसाध्यस्यापि सत्वेन व्यभिचारशङ्कानुदयात्तत्र हेतुसाधन-योरभावमुपेत्य परिहारासम्भवाच्चेति । सत्यं, शाब्दज्ञानरूपव्यवसाय-हेतुसद्भावमात्रेण व्यभिचारशङ्कनात् । न हि स्वविषयकशाब्दज्ञान-प्रामाण्यविषयक इति साध्यं किन्तु स्वविषयव्यवसायनिष्टप्रामाण्यविषयक इत्येव । तथा च शब्दज्ञानस्यै[1]व तत्विषयव्यवसायस्यापि अनुव्यवसाय-विषयतया तत्प्रामाण्यविषयकत्वाभावेन साध्याभावात् । न च स्वविषयया-वद्व्यवसायनिष्टप्रामाण्यविषयकत्ववति कथं तदभाव इति वाच्यम् । स्वविषय-व्यवसायत्वावच्छिन्नवृत्तिप्रामाण्यविषयकत्वस्यावश्यवाच्यत्वात् । अन्यथा स्वविषयव्यवसायवृत्तीदन्त्वप्रकारत्वरूपप्रामाण्यविषयकत्वमात्रेणापि साध्य-पर्यवसानात् अर्थान्तरापत्तेः ।

न चैवं स्वविषयव्यवसायत्वाच्छिन्नवृत्तिप्रामाण्यविषयकत्वस्योक्तानुव्यवसाये अभावाद्बाधो व्यभिचारो वक्ष्यमाणउक्तशाब्दज्ञानांशे साध्यसद्भाववर्णनञ्चा-सङ्गतमिति वाच्यम् । लौकिकप्रत्यासत्त्या स्वविषयव्यवसायत्वावच्छिन्नवृत्ति-प्रामाण्यविषयकत्वस्यैव उक्तसाध्यार्थकत्वात् । स्ववृत्तिकामनाज्ञान-प्रामाण्यस्यैव स्वतस्त्ववादिभिरनुव्यवसायाभ्युपगमेन ज्ञानविषयत्वादयं घट

१. "इव" इति स्यात् ।

इति ज्ञानगोचरानुव्यवसायेन घटत्वविशेषणीभूतज्ञाने प्रामाण्यग्रहेण यथाश्रुते बाधापत्त्या च लौकिकप्रत्यासत्त्या स्वविषयस्य व्यवसायविशेषणत्वावश्यम्भावात् । एवञ्च घटज्ञानप्रामाण्यस्य लौकिकप्रत्यासत्त्या स्वविषयव्यवसायत्वावच्छिन्नवृत्तित्वाभावेन साध्याभावेऽपि हेत्वभावात् व्यभिचारः शब्दज्ञानवृत्तिप्रामाण्यस्य तु लौकिकप्रत्यासत्त्या स्वविषयव्यवसायत्वावच्छिन्नवृत्तित्वेन साध्यस्यापि सत्वे वा व्यभिचार इति घटज्ञानांश इति परिहारफक्किकार्थ इति न किञ्चिदनुपपन्नम् ।

ननूक्तानुव्यवसायस्य प्रामाण्याश्रयज्ञानविषयकज्ञानजन्यज्ञानग्राह्यत्वरूपमेव स्वतस्त्वमेव न स्यात् । न च प्रामाण्यस्य स्वरूपप्रकाररूपविषयमात्रघटितमूर्तितया प्रतिज्ञाभिन्नत्वनियमे उक्तानुमितेर्न तज्ज्ञानविषयकज्ञानत्वं स्वरूपस्याज्ञानत्वेन प्रवेशेऽपि तव्यक्तित्वेनाप्रवेशात् । न हि तद्वति तत्प्रकारकैतज्ज्ञानत्वमपि प्रामाण्यम् । किन्तु तद्वति तत्प्रकारकज्ञानत्वमात्रम् । तथा च तदाश्रयत्वादुक्तानुमितिविषयस्यास्त्येवेति तत्सापेक्ष्यज्ञानग्राह्यतया प्रामाण्यदृष्टान्तः साध्यविकल इति गूढाभिसन्धेश्चोद्यं विशिष्टप्रत्यक्षसामग्रीवेति चेन्न प्रामाण्यानुमितेरेव घटत्वादिविशेषणज्ञानतया अव्यवधानेन व्यवसायसम्भवेऽपि विनश्यदवस्थप्रामाण्यानुमितिरूपविशेषणज्ञानसत्वेन सामग्र्यवैकल्यादिति भावः ।। **विशिष्टज्ञानेति** ।। विशिष्टप्रत्यक्षेत्यर्थः । तत्सामग्र्या एव प्रकृते उपपादनीयत्वादत एव विषयेन्द्रियसन्निकर्षेत्यपि बोध्यम् । न च भ्रमे व्यवहारात्तदहेतुता । ज्ञानलक्षणस्य तस्य तत्राप्यक्षतेः । प्रमायां तद्धेतुतावश्यम्भावाच्च ।

न्यायदीपः

पूर्वोक्तहेतुविशेषणेषु प्रतिवादिविप्रतिपत्तेः प्रसाध्याङ्गकत्वं मन्वानः प्रागुक्तपक्षतावच्छेदकेषु एकं पक्षतावच्छेदकं कृत्वाऽन्यं हेतूकृत्याह ।।

यद्वेति ।। यद्वा पूर्वं प्रामाण्यं क्वापि नानुव्यवसायवेद्यमिति मतमुपेत्य प्रामाण्यानुमितिदृष्टान्तेन प्रयोगा उक्ताः इदानीं तु क्वचित्तद्वेद्यमिति मतमुपेत्य तद्दृष्टान्तेनाह ।। **यद्वेति** ।। **विमत इति** ।। प्रामाण्यविषयकत्वाविषयकत्वाभ्यां विप्रतिपत्तिविषय इत्यर्थः । विमतेरपि नियतविषयत्वायावच्छेदकमावश्यकमेव तत्किमित्यत आह ।। **प्रामाण्येति** ।। **उपस्थापकेति** ।। उपस्थितितत्सामग्रीत्यर्थः । नन्वेवमुक्तरूपानुव्यवसायत्वस्यैव पक्षतावच्छेदकत्वसम्भवे किं विमत्येति चेन्न । ''यद्यपि विमतिरपि नियतविषयत्वायावच्छेदकसापेक्षा । तथापि सावयवत्वसाधितेन कार्यत्वेन पृथिव्याः सकर्तृकत्वसाधनमिव स्वनियामकनियतया लध्व्या विमत्या पक्षतावच्छेदो न विरुद्धः'' इति न्यायामृतोक्तदिशोपपत्तेरिति तात्पर्यात् । अत्र प्रामाण्येत्यादिविशेषणोक्त्या प्रतिबद्धानुव्यवसाये बाधशङ्का, अनुव्यवसाय इत्युक्त्या घटज्ञानमितिशाब्दज्ञाने बाधशङ्का निरस्तेति ध्येयम् । अतीताद्यविषयकप्रत्यक्षत्वादिरूपत्वादनुव्यवसायत्वस्य । प्रथमज्ञानगोचरानुव्यवसायोऽत्र पक्षत्वेन पर्यवसितो ज्ञेयः । उत्तरज्ञानगोचरस्य दृष्टान्तत्वेनोपादानात् ।

स्वविषयेति साध्यांशः पूर्ववद्व्याख्येयः । प्रामाण्यप्रकारको वेत्यपि ध्येयम् । प्रागुपस्थितेरप्रयोजकताया निर्विकल्पकभङ्गे व्यक्तत्वात् । निष्कम्पप्रवृत्तिहेत्विति व्यवसायविशेषणेन संशयादिगोचरानुव्यवसाये, अनुव्यवसायेत्युक्त्या तादृशज्ञानगोचरशाब्दज्ञाने च न व्यभिचारः । अनुव्यवसायत्वं चातीतानागताविषयकप्रत्यक्षत्वं न तु तत्प्रकारप्रकारकतया तत्प्रकारवद्विशेष्यकतया तज्ज्ञानत्वरूपमिति युक्तम् । निष्कम्पेत्यादिविशेषणवैयर्थ्यात् । पूर्वोक्तहेतुसाङ्कर्याच्च । नापि ज्ञानांशे लौकिकप्रत्यक्षत्वम् उत्तरहेतुसाङ्कर्यात् । अत एव सामान्येत्यादिना वक्ष्यमाणज्ञानद्वयेपि न व्यभिचारः तस्या-

तीतादिविषयकत्वात् । अत्र निष्कम्पप्रवृत्तीत्यस्य संवादिप्रवृत्तीत्यर्थः । तेन शुक्तिरूप्यंज्ञानगोचरानुव्यवसाये साक्षिरूपे तत्र प्रामाण्यग्रहस्य मानसत्वेन तन्निष्ठप्रामाण्याविषयके न व्यभिचारः ।

।। **उक्तरूपेति** ।। निष्कम्पप्रवृत्तिहेतुव्यवसायांश इत्यर्थः । लौकिकत्वं चालौकिकप्रत्यासत्यजन्यत्वम् । संशयादिगोचरानुव्यवसाये व्यभिचार-निरासायोक्तरूपव्यवसायांश इत्युक्तिः । गृहीतप्रामाण्येनेति बहुव्रीहिः । घटादिज्ञाने प्रवृत्तिसामर्थ्यादिना प्रामाण्यानुमित्यन्तरं तत्रैवायं घट इत्या-द्युत्पन्नसमानाधिकरणज्ञाने प्रामाण्यं तदनुव्यवसायवेद्यमिति प्राचीनन्याय-मतेऽभ्युपगमादिति भावः । उपपादयिष्यते चाग्रे ग्रन्थ एव ।

।। **सामान्यप्रत्यासत्त्यादीति** ।। ज्ञानत्वसामान्येत्यर्थः । आदिपदेन योगजप्रत्यासत्तिज्ञानप्रत्यासत्त्योर्ग्रहः ।। **ज्ञानांश इति** ।। उक्तरूपव्यवसायांश इत्युक्तैकदेशानुवादः । विशिष्टस्य हेतोर्व्यभचारमाशङ्क्य विवेकेन समाधिमाह ।। **नचेत्यादिना** ।।

''स्वर्गसाधनं याग इति ज्ञानस्य प्रामाण्ये निश्चिते तत्समानविषयक-ज्ञानान्तरे अप्रामाण्यशङ्का भवतीति ज्ञानान्तरमगृहीतप्रमाण्यमपि'' इत्यादि-**मणि**कृदुक्तेरुत्तरज्ञानानुव्यवसाये प्रामाण्यविषयकत्वं विप्रतिपन्नमिति वदन्तं प्रति साध्यसत्वं दृष्टान्ते व्यनक्ति ।। **न च दृष्टान्त इत्यादिना** ।। **उत्तर-स्येति** ।। अनुमित्यादिना गृहीतप्रामाण्यकात् पूर्वज्ञानादुत्तरस्येत्यर्थः ।। **तस्यैवेति** ।। विशेषणज्ञानतयेत्यन्वयः । प्रामाण्यानुमितेरेव प्रामाण्यघटक-घटत्वादिविशेषणज्ञानत्वेन प्रामाण्यानुमित्यनन्तरमेव घटघटत्वनिर्विकल्पकं विनैव घटत्वादिविशिष्टव्यवसायोत्पत्तौ तदुत्तरकाले विनश्यत्प्रामाण्य-ज्ञानसत्वादिति भावः । न च वक्ष्यमाणदिशा पूर्वोत्तरज्ञानयोः प्रामाण्य-स्यैकत्वेप्युत्तरज्ञानगतत्वेन पूर्वमभानान्न तत्रोपनय इति शङ्क्यम् ।

यदवच्छेदेन यत्र यद्गृहीतं तदवच्छेदेन तत्र तद्गृहत्वस्यैवोपनयसामग्रीत्वात् । चन्दनखण्ड इत्यादिप्रत्यक्षे तथा दर्शनात् । तथाच तद्विषयकत्वावच्छेदेन पूर्वज्ञाने प्रामाण्यग्रहात्तद्विषयकत्वेन ज्ञाते द्वितीयज्ञाने तदुपनयो भवत्येवेति भावः ।। **सन्निकर्षेति** ।। संयुक्तसमवायरूपेत्यर्थः ।। **तदिति** ।। विशेषणविशेष्ययोः प्रामाण्यतदाश्रयज्ञानयोरसंसर्गेत्यर्थः ।

तर्कताण्डवम्

ननु तज्ज्ञानविषयकेत्यादिस्वतस्त्वनिरुक्तौ तच्छब्देन व्यक्तिविशेषो न विवक्ष्यते । किन्तु ग्राह्यप्रामाण्याश्रयीभूतज्ञानमात्रम् । समानविशेष्यकत्वे सति समानप्रकारकयोश्च ज्ञानयोर्विशेष्यप्रकारघटितं प्रामाण्यमेकमेव । एवञ्चोक्तानुव्यवसायस्य ग्राह्यप्रामाण्याश्रयद्वितीयज्ञानविषयकज्ञानानपेक्षत्वेऽपि प्रथमज्ञानविषयकज्ञानसापेक्षत्वान्न स्वतस्त्वमिति साध्यवैकल्यमिति चेन्न ।

व्यवसायप्रामाण्यमनुव्यवसायस्य विषयो न वेति विप्रतिपत्तावनुव्यवसायविषयत्वमात्रसाधनात् । तस्य च दृष्टान्ते सत्वात् । तज्ज्ञानविषयकेत्यादिनोक्तस्वतस्त्वस्यापि पक्षधर्मताबलात्सिद्धेश्च ।

यद्वा अनुमित्यनुव्यवसायो दृष्टान्तः । नच नवीनन्यायमते तत्रापि स्वतः प्रामाण्याभावात्साध्यवैकल्यम् । तथात्वे तत्प्रामाण्ये कदाचित्संशयविपर्ययव्यतिरेकप्रमान्यतरापातात् ।

युक्तिरत्नाकरः

इदानीं शङ्कितस्वाशयमुद्घाटयति ।। **नन्विति** ।। उक्तार्थमेतत् ।। **व्यवसायेति** ।। यद्यप्यस्य प्रामाण्यग्रहकानुव्यवसायेन प्रामाण्यस्याग्रहणात्

तीतादिविषयकत्वात् । अत्र निष्कम्पप्रवृत्तीत्यस्य संवादिप्रवृत्तीत्यर्थः । तेन शुक्तिरूप्यांज्ञानगोचरानुव्यवसाये साक्षिरूपे तत्र प्रामाण्यग्रहस्य मानसत्वेन तन्निष्ठप्रामाण्याविषयके न व्यभिचारः ।

।। **उक्तरूपेति** ।। निष्कम्पप्रवृत्तिहेतुव्यवसायांश इत्यर्थः । लौकिकत्वं चालौकिकप्रत्यासत्यजन्यत्वम् । संशयादिगोचरानुव्यवसाये व्यभिचार-निरासायोक्तरूपव्यवसायांश इत्युक्तिः । गृहीतप्रामाण्येनेति बहुव्रीहिः । घटादिज्ञाने प्रवृत्तिसामर्थ्यादिना प्रामाण्यानुमित्यन्तरं तत्रैवायं घट इत्या-द्युत्पन्नसमानाधिकरणज्ञाने प्रामाण्यं तदनुव्यवसायवेद्यमिति प्राचीनन्याय-मतेऽभ्युपगमादिति भावः । उपपादयिष्यते चाग्रे ग्रन्थ एव ।

।। **सामान्यप्रत्यासत्त्यादीति** ।। ज्ञानत्वसामान्येत्यर्थः । आदिपदेन योगजप्रत्यासत्तिज्ञानप्रत्यासत्त्योर्ग्रहः ।। **ज्ञानांश इति** ।। उक्तरूपव्यवसायांश इत्युक्तैकदेशानुवादः । विशिष्टस्य हेतोर्व्यभचारमाशङ्क्य विवेकेन समाधिमाह ।। **नचेत्यादिना** ।।

''स्वर्गसाधनं याग इति ज्ञानस्य प्रामाण्ये निश्चिते तत्समानविषयक-ज्ञानान्तरे अप्रामाण्यशङ्का भवतीति ज्ञानान्तरमगृहीतप्रमाण्यमपि'' इत्यादि-**मणि**कृदुक्तेरुत्तरज्ञानानुव्यवसाये प्रामाण्यविषयकत्वं विप्रतिपन्नमिति वदन्तं प्रति साध्यसत्वं दृष्टान्ते व्यनक्ति ।। **न च दृष्टान्त इत्यादिना** ।। **उत्तर-स्येति** ।। अनुमित्यादिना गृहीतप्रामाण्यकात् पूर्वज्ञानादुत्तरस्येत्यर्थः ।। **तस्यैवेति** ।। विशेषणज्ञानतयेत्यन्वयः । प्रामाण्यानुमितेरेव प्रामाण्यघटक-घटत्वादिविशेषणज्ञानत्वेन प्रामाण्यानुमित्यनन्तरमेव घटघटत्वनिर्विकल्पकं विनैव घटत्वादिविशिष्टव्यवसायोत्पत्तौ तदुत्तरकाले विनश्यत्प्रामाण्य-ज्ञानसत्वादिति भावः । न च वक्ष्यमाणदिशा पूर्वोत्तरज्ञानयोः प्रामाण्य-स्यैकत्वेप्युत्तरज्ञानगतत्वेन पूर्वमभानान्न तत्रोपनय इति शङ्क्यम् ।

यदवच्छेदेन यत्र यद्गृहीतं तदवच्छेदेन तत्र तद्गृहत्वस्यैवोपनयसामग्रीत्वात् । चन्दनखण्ड इत्यादिप्रत्यक्षे तथा दर्शनात् । तथाच तद्विषयकत्वावच्छेदेन पूर्वज्ञाने प्रामाण्यग्रहात्तद्विषयकत्वेन ज्ञाते द्वितीयज्ञाने तदुपनयो भवत्येवेति भावः ।। **सन्निकर्षेति** ।। संयुक्तसमवायरूपेत्यर्थः ।। **तदिति** ।। विशेषणविशेष्ययोः प्रामाण्यतदाश्रयज्ञानयोरसंसर्गेत्यर्थः ।

तर्कताण्डवम्

ननु तज्ज्ञानविषयकेत्यादिस्वतस्त्वनिरुक्तौ तच्छब्देन व्यक्तिविशेषो न विवक्ष्यते । किन्तु ग्राह्यप्रामाण्याश्रयीभूतज्ञानमात्रम् । समानविशेष्यकत्वे सति समानप्रकारकयोश्च ज्ञानयोर्विशेष्यप्रकारघटितं प्रामाण्यमेकमेव । एवञ्चोक्तानुव्यवसायस्य ग्राह्यप्रामाण्याश्रयद्वितीयज्ञानविषयकज्ञानानपेक्षत्वेऽपि प्रथमज्ञानविषयकज्ञानसापेक्षत्वान्न स्वतस्त्वमिति साध्यवैकल्यमिति चेन्न ।

व्यवसायप्रामाण्यमनुव्यवसायस्य विषयो न वेति विप्रतिपत्तावनुव्यवसायविषयत्वमात्रसाधनात् । तस्य च दृष्टान्ते सत्वात् । तज्ज्ञानविषयकेत्यादिनोक्तस्वतस्त्वस्यापि पक्षधर्मताबलात्सिद्धेश्च ।

यद्वा अनुमित्यनुव्यवसायो दृष्टान्तः । नच नवीनन्यायमते तत्रापि स्वतः प्रामाण्याभावात्साध्यवैकल्यम् । तथात्वे तत्प्रामाण्ये कदाचित्संशयविपर्ययव्यतिरेकप्रमान्यतरापातात् ।

युक्तिरत्नाकरः

इदानीं शङ्कितस्वाशयमुद्घाटयति ।। **नन्विति** ।। उक्तार्थमेतत् ।। **व्यवसायेति** ।। यद्यप्यस्य प्रामाण्यग्रहकानुव्यवसायेन प्रामाण्यस्याग्रहणात्

क्वचिदनुव्यवसायेन ग्रहणाच्च बाधसिद्धसाधनयोरापातान्नैवं विप्रतिपत्तिस्तथापि तदप्रामाण्यग्राहकेत्यादि विप्रतिपत्तौ वा एतज्ज्ञानप्रामाण्यमेतदनुव्यवसायग्राह्यं न वेति विप्रतिपत्तौ वा तात्पर्यमित्यदोषः । वस्तुगतिमवरुध्येदम् । तज्ज्ञानविषयकेत्यादिविप्रतिपत्तावपि न दोषः । तथा हि तज्ज्ञान-विषयकज्ञानजन्यज्ञानग्राह्यत्वं न परतस्त्वम् । मीमांसकादिभिरप्युक्तानुमान-विषयत्वस्य स्वीकारात् । किन्तु तज्ज्ञानविषयकज्ञानजन्यज्ञानग्राह्यत्वाभावः । तच्च पक्षीकृतानुव्यवसाये उक्तसाध्यपरास्तमिति मत्वाह ।। **तज्ज्ञान-विषयकेति** ।। प्राचीननैयायिकमते नवीनमतं दूषयितुं दृष्टान्तमुपादत्ते ।। **यद्वेति** ।।

ननु प्रत्यक्षानुव्यवसायवदनुमित्यनुव्यवसायेऽपि न प्रामाण्यग्राहकः बहिरर्थस्य तद्वत्तादेरुपनायकाभावादनुमितेरेवोपनायकत्वे प्रत्यक्षानुव्यवसायेऽपि तथात्वापत्तेः । न चैवमनुमानस्य निरस्तसमस्तविभ्रमांशकस्य स्वतः एव प्रामाण्यग्रह इति टीकाविरोधः । उक्तयुक्त्युपेतस्य उपचरितार्थत्वस्यैव क्लृप्तत्वात् । अतः साध्यवैकल्यमेवेत्यत्राह ।। **न चेति** ।। **तथात्व इति** ।। संशयश्च विपर्ययश्च संशयविपर्ययमिति एकवद्भावः । संशयेन युक्तो विपर्यय इति मध्यमपदलोपो वा । ततः पुरः व्यतिरेकपदेन द्वन्द्वे तयोरन्यतरा-पातादिति विग्रहः । केनान्यतरेति निर्देशोपपत्तिः । अनुमितेः प्रमात्वे तदनुव्यवसायेन तदग्रहे संशयविपर्ययोरापत्तेरप्रमात्वे व्यतिरेकप्रमापत्तेः विरोधिनः प्रामाण्यनिश्चयस्याभावादिति पक्षद्वये दूषणद्वयाभिधानार्थं चैवमुक्तम् ।

नन्वत्रोमित्येवोत्तरमस्ति । क्वचिदनुमितावप्रामाण्यसंशयादिरनुभवसिद्धः । अत एव यत्र प्रामाण्यानुमितावप्रामाण्यसंशयः तत्र प्रामाण्यानुसरणमिति **मणिः** । अन्यथा प्रामाण्यस्यानुमितिग्राह्यत्वे वक्ष्यमाणानवस्थाप्यसङ्गता स्यादिति चेन्न । तथा सति टीकानुमानस्य निरस्तसमस्तविभ्रमांश-त्वोक्त्ययोगादिति अभिप्रायात् । तथाचान्यतरापातादित्यस्यान्यतराभ्युप-

गमापातादित्यर्थः । तदनन्तरं च न तथाभ्युपगमः प्रत्युतानिरस्तेत्यादिना तदभावस्यैवाभ्युपगमादिति तदर्थश्च पर्यवसितो द्रष्टव्यः ।

न्यायदीपः

यत्तु **मणा**वुक्तं "तज्ज्ञानविषयकजन्यज्ञानाजन्यजन्यज्ञानविषयत्वं स्वतस्त्वम् । तदन्यग्राह्यत्वं हि परतस्त्वम् । मनसा चैवं प्रामाण्यग्रहस्य तज्ज्ञानविषयकजन्यज्ञानजन्यत्वान्न परतस्त्वहानिः" इति तद्धृदि कृत्वा प्रकारान्तरेण साध्यवैकल्यमाशङ्कते ।। **नन्विति** ।। ग्राह्यप्रामाण्याश्रय-ज्ञानविषयकज्ञानाजन्यत्वे सति स्वग्राह्यज्ञानप्रामाण्यविषयकत्वं साध्यार्थं मन्वानस्येयं साध्यवैकल्यशङ्केति ध्येयम् । तज्ज्ञानविषयकज्ञानसापेक्षत्वोप-पादनायाह ।। **तच्छब्देनेति** ।। **मात्रमिति** ।। ग्राह्यप्रामाण्याश्रययत्किञ्चि-ज्ज्ञानमित्यर्थः । पूर्वज्ञानस्य ग्राह्यप्रामाण्याश्रयत्वलाभाय सापेक्षत्वोपपादनाय चाह ।। **समानेति** ।। प्रामाण्यस्य भिन्नत्वे तज्ज्ञानसापेक्षत्वायोगात् । ततश्च किमित्यत आह ।। **एवञ्चेति** ।। तत्पदेनोक्तरूपज्ञानमात्रेऽभिमते सति प्रामाण्यस्यैकत्वे च सतीत्यर्थः ।। **सापेक्षत्वादिति** ।। प्रामाण्य-रूपविशेषणोपनायकत्वेनेति भावः ।। **साध्यवैकल्यमिति** ।। ज्ञानप्रामाण्यं तज्ज्ञानविषयकज्ञानाजन्यज्ञानग्राह्यं न वेति विप्रतिपत्तौ तादृशज्ञानग्राह्य-त्वस्यैव स्वतस्त्ववादिना साध्यत्वात् । तस्य च द्वितीयज्ञानप्रामाण्येऽभावेन तदनुव्यवसाये तज्ज्ञानविषयकज्ञानाजन्यत्त्वे सति स्वग्राह्यज्ञानप्रामाण्य-विषकत्वरूपसाध्यस्य अभावादिति भावः । परोक्तस्वतस्त्वेपि न दोष इत्याह ।। **तज्ज्ञानेति** ।। दृष्टान्ते साध्यानुगमार्थं स्वग्राह्यज्ञानप्रामाण्यविषयक इत्येव साध्यकरणेपि त्वदभिमतविशिष्टसाध्यसिद्धिः हेतोः पक्षधर्मतया स्यादेव । निष्कम्पप्रवृत्तिहेतुव्यवसायविषयकानुव्यवसायत्वादिरूपहेतुना प्रथमज्ञान-गोचरानुव्यवसायरूपपक्षनिष्ठेन प्रामाण्यविषयकत्वं सिध्यत् अनुव्यवसायस्य तज्ज्ञानविषयकज्ञानानपेक्षत्त्वादुक्तरूपमेव सिध्यतीति भावः ।

अनुमित्यादिप्रामाण्यं स्वत इति प्राचीनमतानुरोधेनाह ।। **यद्वेति** ।। एतेन भिन्नभिन्नदृष्टान्तकथनेन मन्मते सर्वत्र स्वतस्त्वमिव त्वन्मते न सर्वत्र प्रामाण्यस्य परतस्त्वम् । क्वचित्स्वतस्त्वस्य अभ्युपगमात् । तथाच किमर्धजरतीयेन सर्वत्रापि स्वतस्त्वमेवोपेयमिति सूचितम् ।

ननु **मणौ** ''यत्त्वनुमानस्य निरस्तसमस्तभ्रमाशङ्कस्य स्वत एव प्रामाण्यग्रह इत्युक्तमाचार्यैः तद्धूमवति वह्निज्ञानत्वमनुमितेः प्रामाण्य-नियतमनुव्यवसाये चोपनीतम् ततो विशेषदर्शनान्न तत्राप्रमाण्यशङ्केति । प्रामाण्यनिश्चयादिवाप्रामाण्यशङ्काविरहादर्थं निश्चित्य निष्कम्पव्यवहार इत्यभिप्रायम्'' इति प्राचीनमतस्यान्यथातात्पर्यस्योक्तत्वात्कथं तन्मतेऽयं दृष्टान्त इति भावेनाशङ्क्य तेनाप्यङ्गीकारयति ।। **नचेत्यादिना** ।। **संशयेति** ।। अनुमितिः प्रमा न वेति संशयः अप्रमैवेति विपर्ययः प्रमा न भवतीति प्रामाण्यव्यतिरेकविषयप्रमा वा स्यात् । तद्विरोधिनः प्रामाण्यनिश्चयस्यानुदयादित्यर्थः । न चेष्टापत्तिः । निरस्तसमस्त-विभ्रमेत्युक्तिविरोधात् । व्यतिरेकप्रमापत्तेरनिष्टत्वाच्चेति भावः । अत एव न धर्म्यज्ञानादिनोपपत्तिः । कदापि विभ्रमाभावोपगमात् । अत्र संशय-विपर्ययययोरेकराशीकरणात् अन्यतरेति साधु ।

तर्कताण्डवम्

ननु वह्निज्ञानप्रामाण्यनियतस्य धूमवद्विशेष्यकत्वे सति वह्निप्रकारकत्वस्यानुमित्यनुव्यवसायेन ग्रहणात्तत्रासंशय इति चेन्न । अनुमितेर्वह्निमत्वमात्रविषयकत्वेन बहिरर्थस्य धूमवत्वस्योपनायका-भावेनानुव्यवसायाविषयत्वात् ।

न च लिङ्गपरामर्शस्तदुपनायकः । यत्रानुमितिद्वयेच्छा तत्र

परामर्शानन्तरं प्रथमानुमितिरूपसाध्यसिद्धेः सत्वेप्यनुमित्साधीन-पक्षतायाः सत्वेनानुमित्यनन्तरं तदनुव्यवसायकाले उपनायकपरामर्श-नाशात् । ज्ञानान्तरोपनीतस्य ज्ञानान्तरानुव्यवसायेन ग्रहणेऽति-प्रसङ्गाच्च । वह्निमनुमिनोमीत्यनुव्यवसायेन धूमवत्वस्यानुल्लेखनात् ।

एतेनैव धूमवत्वे परामर्शोपनीतेऽनन्तरं वह्निमत्वविषयत्वेन जायमानाऽनुमितिः सुरभि चन्दनमिति ज्ञानवद्विशिष्टवैशिष्ट्यज्ञान-सामग्रीमहिम्ना लिङ्गोपहितलैङ्गिकविषयेति सैवोपनायकेति निरस्तम् । अनुमितेः वह्निमत्वमात्रविषयत्वानुभवबलेन प्रत्यक्षज्ञान एव सामग्री-महिम्नः सङ्कोचात् । असङ्कोचे वा धूमवति धूमप्रकारकत्वरूपस्य प्रामाण्यस्यानुमित्यनुव्यवसायेन ग्रहणात् धूमवत्त्वांशे अनुमितेः स्वतः प्रामाण्याद् दृष्टान्तसिद्धिः । किञ्चैवं वह्निमत्वांशस्य साक्षादनुमित्युप-नीतत्वाद्वह्निमद्विशेष्यकत्वे सति वह्निप्रकारकत्वरूपं प्रामाण्यमेवानु-मित्यनुव्यवसायस्य विषयोऽस्त्विति न साध्यवैकल्यम् ।

युक्तिरत्नाकरः

नचैवमपि **मणिकृता** संशयाभ्युपगमात्तद्विरोधः । अनुमितावुपनीत-भानानङ्गीकर्तृमते प्रामाण्यव्याप्यस्याभावेन तदुपपत्तेः । अत एवानुमिता-वुपनीतभानमभ्युपेत्य शङ्कते ।। **नन्विति** ।। धूमवद्विशेष्यकत्वं किमनु-मित्युपनीतमुत परमर्शोपनीतम् । नाद्य इत्याह ।। **अनुमितेरिति** ।। वस्तुतः प्रामाण्यनियतस्यापि नत्वेतेन भाने संशयः स्यादेव । न हि व्याप्यस्य स्वरूपेणाभावं संशयविरोधितैवालं पृथिवी न वेत्यादिसंशयाना-पत्तेः । किन्तु व्याप्यत्वेन न वानुमित्यनुव्यवसाये प्रामाण्यत्वोपनायकं कथमपि सम्भवति । तथा च स्वतःप्रामाण्याभ्युपगमे टीकावचनमुन्मत्त-प्रलपितमेवापद्यत इति च दूषणं बोध्यम् । न च धूमवद्विशेष्यकत्वे सति

वह्निप्रकारकस्यानुमितिप्रामाण्यव्याप्यत्वं प्राग्गृहीतमिति तत्संस्कारसाधनस्यानन्यगत्या व्याप्यग्रहस्यैव तत्संशयविरोधित्वं कल्प्यत इति वाच्यम् । तथा सति करचरणादेरपि पुरुषत्वव्याप्तेः प्राग्ग्रहेण तत्संस्कारः तथा करचरणादिज्ञानस्यापि तत्संशयविरोधित्वे व्याप्यत्वज्ञानगौरवेण तद्विरोधित्वकल्पनानुपपत्तेः । अन्वयव्यतिरेकाभ्यां च तत्कल्पने प्रकृतेऽपि तथात्वापत्तेः । न ह्यत्र द्वैरूप्यकल्पने प्रमाणमस्ति । प्रामाण्यसंशयाभावस्तु स्वतःप्रामाण्यग्रहादुपपन्नः । न च यत्र धूमवद्विशेष्यकत्वादेः प्रामाण्यव्याप्यत्वोपनायकमस्ति तत्रैव टीकोक्तस्वतःप्रामाण्यग्रहशब्दितसंशयादिः । अत एव तत्र निरस्तसमस्तविभ्रमाशङ्कत्वेनानुमानं विशेषितम् । निरस्तविभ्रमाशङ्कायाः तत्प्रामाण्यव्याप्यत्वेन तद्व्याप्याप्यभाव एवं सम्भवादिति वाच्यम् । तथा सति प्रत्यक्षादिप्रामाण्यव्याप्यस्यापि तत्वेन भावे प्रामाण्यसंशयाभावेन टीकायामनुमानस्येति व्यर्थतापत्तेरित्यलम् ।। न द्वितीय इति आह ।। **न चेति ।। यत्रानुमितीति ।।**

ननु न तावत्परामर्शानुमितिद्वयेच्छा । तस्य चरमकारणत्वात् । परामर्शजनकानुमितिद्वयगोचरज्ञानमिच्छानुमितिरिति प्रथमानुमितेरेव परामर्शरूपकारणाभावादनुमितिरिति प्रथमानुमितेरेव परामर्शरूपकारणाभावादनुमित्यादेः कुतो द्वितीयानुमिति । इच्छाजनकज्ञानस्य परामर्शेन कथञ्चित्समूहालम्बनरूपत्वेऽपि द्वितीयानुमितिपरामर्शाभाव एव । न च लिङ्गोपहितलैङ्गिकभानात् प्रथमानुमितेरेव परामर्शलिङ्गोपहितलैङ्गिकभानानभ्युपगन्तृमतेनैतद्ग्रन्थप्रवृत्तेरत एव अनुमिते वह्निमत्वमात्रविषयकत्वेनेत्यधस्तादुक्तम् । न च परामर्शात्पूर्वमनुमितिद्वयेच्छा । तथा सति द्वितीयानुमित्युत्पत्तिक्षणे सिसाधयिषाया अभावेन सिसाधयिषाविरहरूपविशेषणस्याभावात् । सिसाधयिषाविरहसहकृतसिध्यभावरूपपक्षतोपपादन परतद्ग्रन्थासङ्गतेरिति चेन्न । सिसाधयिषापदेन सिसाधयिषाविषयसिध्यनुगुणान्तरिता सिसाधयिषाया

एव विवक्षितत्वादिति पक्षतालक्षणप्रस्ताव एवोक्तत्वेन द्वितीयपक्षाश्रयणेन दोषाभावात् । अनुमित्यन्तरमुत्पद्यत इति शेषः । ससम्बन्धिक-पदार्थप्रत्यक्षस्य सम्बन्धितावच्छेदकप्रकारकत्वनियमादनुव्यवसायस्य व्यवसायविषयकत्वम् । स चानुमित्यनुव्यवसाये परामर्शविषयभानं प्रयोजयतीत्याह ।। **ज्ञानान्तरेति** ।।

ननु सम्बन्धितावच्छेदकत्वेन विषयभाननियमाभावेऽपि सुरभिचन्दनमिति ज्ञान एव पूर्वज्ञानोपनीतस्य धूमत्वादेरनुमित्यनुव्यवसाये भानमविरुद्धमित्यत्राह ।। **वह्निमिति** ।। ननु विशिष्टवैशिष्ट्यज्ञानस्य सामग्रीमहिम्नाऽनुमितो धूमवत्वभावे ससम्बन्धिप्रत्यक्षत्वादेव तदनुव्यवसाये दृश्यत्वभानं स्यादित्यत्राह ।। **एतेन चेति** ।। **प्रत्यक्षेति** ।। न तावद्विशिष्टज्ञानत्वा-वच्छेदेन पूर्वज्ञानोपनीतभानं शाब्दज्ञाने तदभावात् नाप्यशाब्दज्ञानत्वावच्छेदेन ततः प्रत्यक्षत्वस्य जातिरूपत्वेन लघुत्वात् ।।

न च सामान्यरूपतान्यत्वं विशेषरूपेऽपि घटत्वादावीश्वरजन्यतावच्छेद-कत्वस्य त्वयाऽभ्युपगमात् । विशिष्टज्ञानत्वस्य ततोऽपि सामान्यरूपत्वात् । यदि च शाब्दज्ञाने पदवाक्यार्थातिरिक्तभाने मानाभाव इति प्रसङ्गाच्च । तत्सङ्कोचस्तदानुमितेर्व्यापकतावच्छेदकत्वमात्रप्रकारकत्वनियमात् तदनु-व्यवसायबलादतिरिक्तभानेऽतिप्रसङ्गाच्च तत्सङ्कोच इति सम्म् । ज्ञान-नित्यत्वकर्त्रैक्यादेरभावेऽपि न कदाचिदस्माकं क्षतिरिति भावः । वस्तुगतिमभिप्रेत्य चेदमुक्तम् । अनुमितावुपनीतभानेऽपि ततः क्षतिरित्याह ।। **असङ्कोचेति** ।। धूमवद्विशेष्यकत्वादेरनुमित्युपनीतस्य तदनुव्यवसाय-विषयत्वे किमपराद्धं वह्निमद्विशेष्यकत्वादिना बहिरर्थाविशेषादुपनायका-विशेषाच्च । तथा तत्प्रामाण्यस्वतस्त्वे निर्निमित्तस्तव प्रद्वेष इत्याह ।। **किञ्चैवमिति** ।। परामर्शोपनीतयानुमित्या सत्तया वा विषयीकृतस्य संशयार्हस्यापि धूमवत्वस्य तदनुव्यवसायविषयत्वमिति साक्षाच्छब्दत्वाभि-

प्रायात्तदनुव्यवसायविषयसत्तायामतो सिद्धसाधनम् । अनुव्यवसायत्वं चोत्तरत्र निर्वक्ष्यमाणमिति न सुखज्ञानमित्यादिशाब्दज्ञानविषयतया बाधः । एवमुत्तरत्रापि ।।

न्यायदीपः

मण्युक्तमेव संशयादिनिवृत्युपायमाशङ्कते ।। **नन्विति** ।। **नियतस्येति** ।। यत्र धूमवद्विशेष्यकत्वे सति वह्निप्रकारकत्वं तत्र वह्निमद्विशेष्यकत्वे सति वह्निप्राकारकत्वमिति व्याप्तेरिति भावः । किं धूमवद्विशेष्यकत्वमनुमित्युपनीतमेव तदनुव्यवसायेन गृह्यत इत्युच्यते अथ परामर्शोपनीतमिति हृदि विकल्प्याद्यं निराह ।। **अनुमितेरिति** ।। **उपनायकेति** ।। अनुव्यवसाये भासकाभावेनेत्यर्थः । उपलक्षणं चैतत् । प्रामाण्यनियतस्यापि तत्त्वेनाभाने [1]संशयानिरासात् । धूमवद्विशेष्यकत्वादेः वह्निमद्विशेष्यकत्वव्याप्यत्वस्य बहिरर्थस्यानुमितौ सर्वथा भानाभावेन तदनुव्यवसाये तस्योपनायकाभावेनानुव्यवसायाविषयकत्वादित्यपि ध्येयम् । यत्तु प्रामाण्यव्याप्यस्य स्वरूपेणैव ज्ञानं संशयादिविरोधीत्येतदिहैव अनन्यगत्या कल्प्यत इति तन्न । स्वतस्त्वेनाप्युपपत्या अनन्यगतेरभावात् ।

द्वितीयं निराह ।। **न चेति** ।। **अनुमितिद्वयेच्छेति** ।। ननु पूर्वं ममानुमितिद्वयं स्यादितीच्छा पश्चाल्लिङ्गपरामर्शः पश्चादनुमितिः । अनन्तरं द्वितीयानुमित्युत्पत्तिवेलायां धूमवत्त्वोपनायकस्य परामर्शस्यानाशेऽपि द्वितीयोत्पत्तिसमये पूर्वोत्पन्नेच्छाया अभावादनुमित्साया अभावेन द्वितीयानुमित्युत्पाद एवायुक्त इति चेन्न । अनुमित्सापदेनानुमित्साविषयसिध्यननुगुणानन्तरितत्वस्य विवक्षितत्वात् । तथैव पक्षतालक्षणेऽभिधानादिति भावः । पक्षताया इत्युपलक्षणम् । विनश्यदवस्थपरामर्शभावादित्यपि ध्येयम् ।

।। **अनुमित्यनन्तरमिति** ।। द्वितीयानुमित्युत्पत्त्यनन्तरमित्यर्थः । अनुमित्यन्तरमिति पाठे जायत इति शेषः । ननु तदा परामर्शनाशेपि तज्जन्यसंस्कारसहितानुव्यवसायस्यास्तु तद्ग्रहणमित्यत आह ।। **ज्ञानान्तरेति** ।। घटज्ञानानुव्यवसाये पटज्ञानोपनीतस्य भानापत्तेरित्यर्थः । ननु तदुपनीतस्य तज्जन्यज्ञानान्तरानुव्यवसायेन ग्रहणमित्युक्तौ न दोष इत्यत आह ।। **वह्निमिति** ।। एतेन परामर्शनिष्ठप्रामाण्यानुमित्युपनीतं धूमवद्विशेष्यकत्वमिति प्रत्युक्तम् ।। **सैवेति** ।। अनुमितिरेवेत्यर्थः ।

एतेनैवेत्युक्तं व्यनक्ति ।। **अनुमितेरित्यादिना** ।। **स्वत इति** ।। ज्ञानानुव्यवसायवेद्यप्रामाण्यकत्वरूपस्वतः प्रामाण्यादित्यर्थः ।। **दृष्टान्तेति** ।। धूमवत्वांशे अनुमित्यनुव्यवसायवदिति दृष्टान्तेत्यर्थः ।

नन्वेवं तत्रेव क्वापि विप्रतिपन्नप्रामाण्यमनुव्यवसायवेद्यं न स्यात् । संशयाद्यभावस्य ज्ञानानुव्यवसाये प्रामाण्यव्याप्यविषयकत्वादेवोपपत्तेः । तत एव निष्कम्पप्रवृत्युपपत्तेश्चेत्यत आह ।। **किञ्चैवमिति** ।। धूमवत्वांशे स्वतः प्रामाण्ये सतीत्यर्थः ।। **साक्षादिति** ।। धूमवत्वांश इव ज्ञानान्तरनैरपेक्ष्येणेत्यर्थः । प्रामाण्यमेवेत्येवकारेण प्रामाण्यांश एव संशयाद्यभावस्योपगमेन तत्रैव तन्निश्चयस्वीकारो युक्तो न तु व्याप्यांशे तन्निश्चयस्वीकारः प्रामाण्यव्याप्यत्वेनापि तन्निश्चयावश्यम्भावश्चेत्याचष्टे ।

तर्कताण्डवम्

(६) यद्वा अहं सुखीति ज्ञानप्रामाण्यं तदनुव्यवसायविषयः तस्मिन् सत्यप्रकाशमानत्वरहितत्वात् व्यवसायवत् । न चासिद्धिः । तथात्वे तत्प्रामाण्ये कदाचित्संशयाद्यापातात् ।

वस्तुतस्तु तद्वति तत्प्रकारकज्ञानत्वरूपं याथार्थ्यमेव प्रामाण्यं तज्ज्ञानस्यैव प्रवर्तकत्वात् । तत्रानुव्यवसायस्य व्यवसायगतं यत्किञ्चिद्विशेष्यकत्वं रजतत्वप्रकारकत्वं ज्ञानत्वं च विषय इत्यत्र न विवादः । किन्तु विशेष्यस्य यद्रजतत्ववैशिष्ट्यं तद्विषयकत्व एवेति तदेव साध्यते ।

(७) निष्कम्पप्रवृत्तिहेतुव्यवसायविषयभूतं धर्मधर्मिवैशिष्ट्यं सत्तयाऽनुव्यवसायविषयः निष्कम्पप्रवृत्तिहेतुव्यवसायविषयत्वात् विशेष्यवत् । नचाप्रयोजकता । वैशिष्ट्यप्रतीतिसामग्र्या वक्ष्यमाणत्वात् ।

युक्तिरत्नाकरः

तस्मिन् सतीति ।। तदनुव्यवसाये सतीत्यर्थः । धर्मवानहं आत्मानं सुखिनमनुभवामीत्यनुत्पाद्योपनीततयोक्तानुव्यवसाये सति प्रकाश्यमाने धर्मादौ व्यभिचारवारणाय नञ्द्वयम् । न च साध्यस्यापि सत्त्वान्न तत्र व्यभिचारः । यत्किञ्चित्तद्गोचरानुव्यवसायविषयत्वस्य न्यायमते सत्त्वेन सिद्धसाधनम् । प्रत्युत यावत्तदनुव्यवसायविषयत्वस्य विवक्षणीयस्य तत्राभावेन व्यभिचारात् । यद्वा साध्याभेदवारणाय नञ्द्वयम् । अखण्डाभावे वा वैय्यर्थ्यम् ।

धर्मधर्मिवैशिष्ट्यमात्रकरणे लाघवं मन्वान आह ।। **वस्तुतस्त्विति ।।** यद्वा विमत इति सामान्येन स्वतस्त्वं साध्यमित्युत्तरेण सम्बन्धः । ननु विशेष्यावृत्यप्रकारकत्वादेरपि सम्भवे किन्नियमेनेत्यत्राह ।। **तज्ज्ञानस्यैवेति ।।** विशेष्यावृत्यप्रकारकत्वस्याभावद्वयघटितत्वेन [१]गुरुत्ववदप्रवर्तकवृत्तित्वाविशेष्यकावृत्याकाशप्रकारके आकाशे शब्द इति ज्ञानेऽव्याप्तेश्च न प्रामाण्यरूपता । [२]नापि तद्वति तत्प्रकारकानुभवत्वस्य अभावद्वयघटितत्वेन

१. "गुरुत्वात् । विशेष्यावृत्त्याकाशप्रकारके" इति स्यात् ।
२. "नापि" इत्यादि पङ्क्त्यर्थो न ज्ञायते ।

गुरुत्वाप्रवर्तकवृत्तित्वात् द्विशेष्यावृत्याकाशप्रकारके आकाशे शब्द इति ज्ञाने प्राप्ते अन्यादृशस्यावायोः प्रामाण्यत्वेन सम्प्रतिपत्तेरेवेति भावः । यत्किञ्चि-द्विशेष्यकत्वं रजतत्ववैशिष्ट्योदासीनधर्मिविशेष्यकत्वम् ।। **रजतत्व-वैशिष्ट्यमिति** ।। प्रामाण्यसंशयस्य तन्मात्रसंशयपर्यवसानादिति भावः ।। **निष्कम्पेति** ।। निष्कम्पत्वं च प्रवृत्तेरप्रामाण्यशङ्कासमानकालीनत्वं सकम्पप्रवृत्तिहेतुज्ञानविषयवैशिष्ट्ये बाधवारणाय विशेषणम् । धर्म्यादौ सिद्धसाधनतावारणाय विशेष्यम् । साध्येऽपि तद्वारणाय सत्तया इति । अनुव्यवसायस्तदनुव्यवसायविषयः अतो न बाधः । न तावद्विशेषमादाय न्यायमतेन सिद्धसाधनम् । प्रागुक्तवैशिष्ट्ये व्यभिचारवारणाय निष्कम्प-प्रवृत्तिहेत्विति । व्यवसायपदं च ज्ञानमात्रपरं नत्वनुव्यवसायान्यत्व-ज्ञानविषयकत्वादिपरं व्यर्थत्वात् । व्यवसायपदं च तदनुव्यवसायविषय-व्यक्तिविशेषलाभार्थम् । अतो न तदनुव्यवसायविषयवैशिष्ट्यादौ व्यभिचारः । विशेष्यवत् तज्ज्ञानविशेष्यवत् ।

ननु दृष्टान्ते सत्वमात्रेण साध्यसाधनेऽतिप्रसङ्गः । न ह्युक्तसाध्यं विनोक्तहेतुर्नोपपद्यत इत्यत्र कार्यकारणादिनियमोऽस्ति । अन्यथानुव्यवसाय-विषये त्वमपि तद्गोचरानुव्यवसायविषयत्वं अनुपपन्नमित्यापातेनानवस्था स्यादित्यत्राह ।। **नचेति** ।।

न्यायदीपः

एवं प्राचीनमतेऽविप्रतिपन्नं नवीनमते प्रसाध्याङ्गकं दृष्टान्तमुक्त्वा प्रयोग उक्तः । अधुना नवीनमतेप्यविप्रतिपन्नदृष्टान्तकं प्रयोगमाह ।। **यद्वेति** ।। यद्वा पूर्वमनुव्यवसायपक्षकान् प्रयोगानुक्त्वा इदानीं तद्विषयपक्षकप्रयोगावाह ।। **यद्वेति** ।। **वस्तुतस्त्विति च** ।।

यद्वा तद्वत्वादेर्बाह्यार्थस्य नानुव्यवसायविषयतेत्यतस्तर्हि सुखत्व-वत्त्वादेरबाह्यत्वा़त्तत्रास्तु स्वतो वेद्यतेति भावेनाह ।। **यद्वेति** ।। **विषय इति** ।। सत्तयेत्यपि ध्येयम् । तस्मिन्नित्यनेन तदनुव्यवसायपरामर्शः । साध्याविशेषनिरासाय नञ्द्वयम् ।। **तथात्व इति** ।। ज्ञानानुव्यवसाये सति तत्प्रमाण्याप्रकाश इत्यर्थः । धर्म्यज्ञानाभावात्कोटिस्मृतेरपि कदाचि-त्सम्भवादिति भावः ।

ननु ''आन्तरप्रामाण्यमपि न स्वतः । तस्य स्वतस्त्वे वा न सर्वस्य तथात्वम् । विशेष्यनिष्ठात्यन्ताभावप्रतियोगिप्रकारानवच्छिन्नत्वादिकं प्रामाण्यम् स्वतो गृहीतुमशक्यमिति परत एव गृह्यत'' इति **मणि**कृदुक्तेः-कथमनुव्यवसायवेद्यतासाधनमित्यतस्तत्स्वरूपं निर्धारयन्नेव विशिष्याप्याह ।। **वस्तुतस्त्विति** ।। **तद्वतीति** ।। विशेष्यत्वं सप्तम्यर्थः । तद्वद्विशेष्यकत्वे सति तत्प्रकारकज्ञानत्वरूपेत्यर्थः । तद्वद्विशेष्यकत्वमात्रस्य भ्रमेऽपि सत्वात् ।

।। **निष्कम्पेति** ।। सशङ्कप्रवृत्तिहेतुव्यवसायविषये बाधनिरासाय हेत्वन्तं व्यवसायविशेषणम् । हेतौ च व्यभिचारनिरासाय । वैशिष्ट्यं च परमते समवायादिभिः सिद्धान्ते स्वरूपसम्बन्धादिभिः । यन्मते वैशिष्ट्यमनुव्यवसाय-विषयोपि, न स्वातन्त्र्येण तद्विषय इत्यभ्युपगमस्तन्मते सिद्धसाधनता-निरासाय सत्तयेति विशेषणम् । वादिनं प्रति तत्सार्थक्यमाद्यसाध्यविवृता-वस्माभिरुक्तं [1]ध्येयम् ।। **वैशिष्ट्येति** ।। सत्तयेत्यपि योज्यम् ।। **वक्ष्यमाणत्वादिति** ।। [2]उत्तरभङ्गबाधोद्धारे नन्वेवमित्यादिग्रन्थेनेत्यर्थः । तथाच तादृशव्यवसायविषयत्वस्यैवोक्तसाध्ये सामग्रीत्वेन सामग्रीमुपेत्य कार्यानभ्युपगमे व्याघातप्रसङ्गान्नाप्रयोजकत्वमित्यर्थः ।

---

१. ११३ तमे पुटे परप्रसिद्धत्वमात्रेण इत्यादिना । २. १६७ तमे पुटे ।

तर्कताण्डवम्

(८) यद्वा विमतोऽनुव्यवसायः स्वग्राह्यज्ञानप्रामाण्यविषयीकरणयोग्यः । अनुव्यवसायत्वात् । गृहीतप्रामाण्यज्ञानसमानविषयकज्ञानान्तरानुव्यवसायवत् । अनुमित्यनुव्यवसायवद्वा ।

(९) व्यवसायविषयभूतं धर्मधर्मिवैशिष्ट्यं वा स्वविषयव्यवसायविषयकानुव्यवसायं प्रति सत्तया विषयत्वयोग्यं व्यवसायविषयत्वात् विशेष्यवत्;

(१०) तत्तज्ज्ञानप्रामाण्यं वा स्वाश्रयज्ञानविषयकानुव्यवसायविषयत्वयोग्यं तद्विषयत्वायोग्योपाध्यघटितज्ञानधर्मत्वात् तत्तज्ज्ञानत्ववदिति सामान्यतः स्वतस्त्वं साध्यम् ।

नचान्त्यहेतोरसिद्धिः । प्रामाण्योपाधेर्विषयसत्वस्य व्यवसायविषयत्वेनानुव्यवसायविषयत्वयोग्यत्वात् । योग्यायोग्योपाधिघटिते प्रमाप्रमान्यतरत्वादौ व्यभिचारनिरासाय नञ्द्वयम् ।

युक्तिरत्नाकरः

एवं फलोपधानानुसारिप्रथमस्वतस्त्वनिर्वचनानुरोधेनानुमानान्युपन्यस्य स्वरूपयोग्यतानुसारि[1]द्वितीयं तन्निर्वचनानुरोधेन त्रीण्याह ।। **यद्वेति** ।। सामान्येन स्वतस्त्वं साध्यमित्युत्तरेणान्वयः । अत्र यद्यप्यनुव्यवसायत्वावच्छिन्नस्यैव प्रामाण्यविषयीकरणयोग्यत्वाद्विमत इति व्यर्थम् । न च दृष्टान्तस्य प्रतिज्ञाविषयताव्युदासाय तन्निश्चयसाध्यवत्त्वेन भेदानुमान इव प्रतिज्ञाविषयत्वेऽपि साधनसम्भवात्पक्षतावच्छेदकैक्यान्नांशतः सिद्धसाधनतापि । अप्रमानुव्यवसायस्यापि इदन्त्ववतीत्यादिप्रामाण्यविषयीकरणं

१. द्वितीयतन्निर्वचनानुरोधेन इति स्यात् ।

योग्यतया अव्युदासीना(र्थत्वात्) यत्वाद्रजतत्ववतीत्यादेरपि मानसानुव्यवसायेन विषयीकरणत्वाज्ज्ञात एवानुव्यवसायत्वादित्येव हेतूकृतम् । न चानुव्यवसायपदेन साक्ष्येव विवक्षितः स च प्रमैवेति नोक्तप्रामाण्यग्राहक इति वाच्यम् । ज्ञानगोचरनित्यसाक्षात्कारत्वादिरूपस्य तस्य परं प्रति सिद्धेः । न चैवमनुव्यवसायत्वं तत्र व्यभिचारीति वाच्यम् । रजतत्ववतीत्यादेः स्वग्राह्यज्ञानावृत्तितयेदन्त्ववतीत्यादिप्रामाण्यमादाय साध्यसत्वात् । न चैवं तदादायैव साध्यपर्यवसानापत्तिः रजतत्ववतीत्यादि साध्यसाधनेपि बाधकाभावादुभयोरपि स्वग्राह्यज्ञानवृत्तितया तदुभयसङ्ग्राहकत्वात् साध्यस्येति । तथाप्यनुव्यवसायत्वस्य ज्ञानांशलौकिकसाक्षात्कारत्वादेर्गुरुतया लघ्वी विमतिरेव पक्षतावच्छेदिकेति भावेन विमत इत्युक्तम् । अप्रमानुव्यवसायव्युदासाय वा विमत इति । एवञ्च प्रमागोचरानुव्यवसायत्वं हेतुप्रति(ज्ञा)ज्ञातान्यत्वं दृष्टान्तत्वप्रयोजकमिति मतेनवेति । साध्ये सत्तयेति शेषः ।। **अत्र गृहीतेति** ।। अत्र व्यधिकरणज्ञानमादाय सर्वस्यापि गृहीतप्रामाण्यतया तद्विशेषणोपादानमहिम्ना समानाधिकरणत्वं क्तप्रत्ययमहिम्ना च तदुत्तरकालीनत्वं च ज्ञानान्तरविशेषणं लभ्यत इति साध्यवैकल्यं प्राचीनन्यायमतमनुसृत्याह ।। **अनुमितीति** ।।

।। **स्वविषयकेति** ।। स्वविषयकज्ञानानुव्यवसायप्रत्यययोग्यधर्मधर्मिवैशिष्ट्ये धर्मबाधवारणाय ।। **स्वविषयकेति** ।। विशिष्टं सिद्धसाधनवारकम् । व्यवसायपदञ्च ज्ञानमात्रपरं न तु ज्ञानविषयकत्वानुव्यवसायान्यत्वादिगर्भपरम् । व्यर्थत्वात् ।। **व्यवसायेति** ।। तद्व्यवसायविषयत्वादित्यर्थः । अतो न व्यभिचारः । एवं द्वितीयस्वतस्त्वनिर्वचनानुसारेणानुव्यवसायवैशिष्ट्यपक्षकानुमाने उक्ताप्रामाण्यपक्षकमप्याह ।। **तत्तज्ज्ञानेति** ।। **सामान्यत इति** ।। यद्यपीहापि साध्ये स्वपदतत्पदादिघटिततयाऽननुगतत्वेन सामान्यतः स्वतस्त्वसिद्धिः नह्यनुव्यवसायत्वावच्छिन्नसकलज्ञानत्वं

सकलव्यवसायविषयभूतमेकं धर्मधर्मिवैशिष्ट्यादिकं सम्भवति तथापि पूर्वं निष्कम्पप्रवृत्तिहेतुव्यवसायप्रामाण्यादेव स्वतस्त्वं साधितं इहत्वनुमानत्वे सकम्पप्रवृत्तिहेतुज्ञानादिवृत्तिप्रामाण्ये सर्वत्र स्वतस्त्वं साध्यत इत्यर्थः ।

यद्वा पूर्वमप्रतिबद्धसाधारणानुव्यवसाययोग्यं साध्यमिति तदर्थः । विषयसत्वस्य विशेष्यविशेषणवैशिष्ट्यस्याप्रमात्वादिरादिशब्दार्थः ।

न्यायदीपः

द्वितीयनिरुक्त्यनुरोधेन प्रयोगत्रयमाह ।। **यद्वेति** ।। इति सामान्यतः स्वतस्त्वं साध्यमित्यन्वयः । तत्राद्यमनुव्यवसायपक्षकम् । उत्तरं तु द्वयं तद्विषयपक्षकम् । तत्राप्याद्यं व्यवसायविषयपक्षकम् । अन्त्यं तन्निष्ठ-प्रामाण्यपक्षकमिति व्यक्तम् ।। **विमत इति** ।। प्रामाण्यविषयीकरणयोग्यत्व-तदयोग्यत्वाभ्यां विमतिविषयः । विमतेरपि नियतविषयत्वायावच्छेदकस्या-पेक्षितत्वात्तदाह ।। **अनुव्यवसाय इति** ।। वक्ष्यमाणदिशा तत्प्रकारप्रकार-कत्वादिरूपानुव्यवसायत्वेन नियता लघ्वी विमतिरेव पक्षतावच्छेदि-केत्यर्थः । अत एव [१]प्रमानुव्यवसाये न बाधादिः । वक्ष्यमाणरूपानु-व्यवसायत्वस्य तत्राभावात् । बाधनिरासाय स्वग्राह्यज्ञानेति साध्यविशेषणम् । योग्यत्वं च स्वविषयज्ञानद्वारा प्रामाण्यावच्छिन्नसहजशक्तिकत्वं ध्येयम् । वक्ष्यमाणरूपानुव्यवसायत्वादिति हेत्वर्थो ध्येयः । तेनाप्रमागोचरानुव्यवसाये न व्यभिचारः ।। **गृहीतेति** ।। अयं च दृष्टान्तो ''न च दृष्टान्तः साध्यविकलः'' इत्यादिना प्रागेव साधित इति भावः । प्राचीनमतरीत्याह ।। **अनुमितीति** ।। अयमपि दृष्टान्तो नवीनमतेऽपि प्राक्साधितः ।। **व्यवसायेति** ।। प्रमारूपो व्यवसायोऽत्राभिमतः ।। **विशेष्यवदिति** ।। तद्विशेष्यवदित्यर्थः ।

१. 'अप्रमानुव्यवसाये' इति स्यात् ।

''प्रामाण्यं ज्ञानग्राहकमात्रग्राह्यं अप्रामाण्येतरज्ञानवृत्तिधर्मत्वात् ज्ञानत्ववत्'' इति । ''प्रत्यक्षवच्च प्रामाण्यं स्वत एव'' इत्येतद्व्याख्यान-सुधायामुक्तमनुमानं परिष्कृत्याह ।। **तत्तज्ज्ञानेति** ।। **योग्यमिति** ।। ''योग्यत्वं च साक्षिनिष्ठां सहजां ग्रहणशक्तिं प्रति स्वविषयज्ञानद्वारा अवच्छेदकत्व''मिति पूर्वोक्तं ध्येयम् । तद्विषयत्वायोग्योपाध्यघटितेत्युक्त्या सुधास्थाप्रामाण्येतरपदार्थो विवृतः । तेन विशेष्यावृत्यप्रकारकत्वरूपप्रामाण्ये व्यभिचारो निरस्तः ।। **सामान्यतः** ।। प्रतिबद्धाप्रतिबद्धसाधारण्येनेति वा प्रामाण्यमात्रसाधारण्येनेति वा नत्वहं सुखीति ज्ञानप्रामाण्यमिति-वद्विशिष्येत्यर्थः ।

वैशिष्ट्यसत्वविषयकत्व एव विवादादाह ।। **विषयसत्वस्येति** ।। **अन्यतरत्वादाविति** ।। तद्विषयत्वयोग्योपाधिघटितज्ञानधर्मत्त्वादित्युक्ता-वुक्तस्थले हेतुसत्वेपि साध्याभावाद् व्यभिचारः प्राप्नोतीति तन्निरासाय तद्विषयत्वायोग्योपाध्यघटितेत्युक्तिरित्यर्थः । [१]विशेष्यनिष्ठात्यन्ताभाव-प्रतियोगिप्रकारानवच्छिन्नत्वतद्वति [२]तत्प्रकारकत्वादिरादिपदार्थः । ज्ञानधर्मत्वादित्येवोक्तावप्रमात्वादौ व्यभिचार इति भावः ।

तर्कताण्डवम्

अनुव्यवसायत्वं च व्यवसायप्रकारप्रकारकतया तत्प्रकार-वद्विशेष्यकतया च तद्विषयकप्रत्यक्षत्वं वा ज्ञानांशे लौकिकप्रत्यक्षत्वं वेति न कश्चिद्दोषः । अप्रामाण्यं तु विसंवादाद्यनुसन्धाने सत्येव गृह्यत इति न स्वतस्तद्ग्रहः । प्रामाण्यधीस्तु संवादाद्यनुसन्धानं विनाऽपि दृष्टेति विशेषः ।

---

१. पाठान्तरे इयं पङ्क्तिः न दृश्यते । २. 'तत्प्रकारकत्वान्यतरत्वादिः' इति पाठान्तरम् ।

युक्तिरत्नाकरः

नन्वनुव्यवसायत्वं यदि ज्ञानगोचरज्ञानत्वं [1]विषयं, किं तज्ज्ञानगोचर-ज्ञानत्वं वा तदा ज्ञानमित्यादिशब्दज्ञानमादायानुव्यवसायपक्षसाध्यकानुमानेषु बाधः । तद्धेतुके तु व्यभिचारः । यदि ज्ञानविषयकप्रत्यक्षत्वं तदाप्यनु-मित्याद्युपनीतज्ञानगोचरमहं प्राग्ज्ञानवानासमित्यादिप्रत्यक्षमादायोक्तदोष एवेत्यत्राह ।। **अनुव्यवसायत्वं चेति** ।।

नन्वेवं दोषशङ्काकलङ्कितज्ञानस्यानुव्यवसाय इत्यादौ प्रत्यक्षपदं व्यर्थम् । तत्प्रकारप्रकारकत्वेत्यादिविवक्षितज्ञानस्यैव पक्षत्वेऽपि घटज्ञानमित्यादि-शाब्दज्ञानमादाय बाधवारणात् । न च ज्ञानत्ववत्प्रत्यक्षत्वस्य ज्ञानित्वेना-खण्डत्वान्न व्यर्थता तदुभयाप्रवेशेऽप्यदोषादित्यस्वरसादाह ।। **ज्ञानांश इति** ।।

नन्वेवमप्यप्रामाण्यं स्वतो ग्राह्यं परतोग्राह्यत्वे सति ग्राह्यत्वादित्या-द्यनुमानैरप्रामाण्यमपि स्वतः स्यादत्राह ।। **अप्रामाण्यं तु इति** ।। विसंवादगतं व्याप्त्यादिरादिशब्दार्थः । तथा शुक्तिकाशकलादौ दोषवशादिदं रजतमित्यादिप्रयोगोत्पत्तौ प्रमात्वाभिमानादेव निष्कम्पप्रवृत्तेरानुभाविकत्वे च प्रवृत्युत्तरकालं विसंवादेऽवधारिते विसंवादे प्रवृत्तावप्रवृत्ताव्याप्यत्वाव-धारणवत एवाप्रमात्वनिश्चयादिदं ज्ञानं प्रमा विसंवादिप्रवृत्यजनकत्वादित्या-द्यनुमानेनैव ग्राह्यतया हेतुविशेषणासिद्ध इति भावः ।

नन्वेवं प्रामाण्यस्वतस्त्वसाधकहेतावपि परतो ग्राह्यत्वविशेषणमसिद्धम् । अनभ्यासदशायां प्रामाण्यसंशयादपि प्रवृत्या प्रवृत्युत्तरकालं तत्संवादावधारणे संवादिप्रवृत्तौ प्रामाण्यव्याप्त्यवधारणवत् एव प्रामाण्यनिश्चयेन इदं ज्ञानं प्रमा संवादिप्रवृत्तिजनकत्वादित्याद्यनुमानेनैव ग्राहत्वादित्यत्राह ।। **प्रामाण्यधीरिति** ।। तथा च क्वचित्संवादापेक्षायामपि सुखदुःखकरतला-

१. "विषयं" इति न स्यात् ।

मलकादिज्ञानप्रामाण्यं अनन्यापेक्षमेव गृह्यते । अत एव प्रमायां प्रमात्व-निश्चयो निःशङ्कप्रवृत्तिश्चाखिलानुभवसिद्धो युज्यते इति भावः । यत्तु क्वचित्संवादापेक्षा तदपि विशेषणं तत्र प्रामाण्यग्रहाद्युक्तमिति भावः ।।

न्यायदीपः

नन्वत्र सर्वानुमानेष्वभिमतमनुव्यवसायत्वं यदि ज्ञानगोचरज्ञानत्वं तदा ज्ञानमिति शब्दजज्ञाने बाधादिर्दोषः । सविषयकज्ञानगोचरज्ञानत्वे तु घटज्ञानमिति शाब्दज्ञाने दोषः । ज्ञानगोचरप्रत्यक्षत्वे त्वप्रमागोचरानुव्यवसाये सामान्यप्रत्यासत्तिजन्यज्ञानगोचरप्रत्यक्षे च बाधादिरेव । ज्ञानगोचरनित्य-ज्ञानत्वे ईश्वरज्ञानमादाय सिद्धसाधनतेत्यत आह ।। **अनुव्यवसायत्वं चेति** ।। एतेन ''तार्किकाभिमतानुव्यवसाय एवास्माकं साक्षीति'' प्रागुक्तं विवृतं ध्येयम् । अत्र दलद्वयकृत्यं प्रागेव व्यक्तम् ।

ननु यदि व्यवसायप्रकारप्रकारकतयेत्यादिरूपमनुव्यवसायत्वं तर्हीदमेव प्रामाण्यविषयकत्वमिति सिद्धसाधनतादोष इति चेन्न । सत्तया प्रमाण्यो-ल्लेखस्यास्मिन्पक्षे साध्यस्याभिमतत्वात् । यदा तु प्रामाण्यविषयकत्वमात्रमेव साध्यमिति मतं तत्पक्षे प्रकारान्तरेणाह ।। **ज्ञानांश इति** ।। लौकिकत्वं तु सामान्यप्रत्यासत्याद्यजन्यत्वम् । ज्ञानांश इति विशेषणं तु स्मृत्युपनीते अतीतघटज्ञाने तद्विषयकमहं घटज्ञानवानिति यज्ज्ञानमात्मांशे लौकिकप्रत्यक्षं तत्र बाधादिनिरासायेति भावः । नन्वेवं ज्ञानधर्मत्वबाह्यार्थत्वयोर-विशेषाद्विसंवादसंवादापेक्षत्वस्योभयत्र साम्यादप्यप्रामाण्यमपि स्वतो गृह्येतेति ततः कः प्रामाण्यस्य विशेष इत्यत आह ।। **अप्रामाण्यं त्विति** ।। विवरिष्यते चैतत्प्रामाण्यानुमित्यसम्भववादे ।। **दृष्टेति** ।। अभ्यासदशापन्न-स्थल इति भावः ।

तर्कताण्डवम्

ननु गृहीताप्रामाण्यज्ञानसमानविषयकज्ञानान्तराप्रामाण्ये संशयादर्शनेन तत्रानुव्यवसायवेद्यत्वे सिद्धेऽन्यत्रापि तथेत्यप्रामाण्यधीरपि स्वतः स्यादिति चेन्न । अप्रामाण्योपाधेः व्यवसायविषयाभावस्य तदनुपनीतत्वेनानुव्यवसायायोग्यत्वात् । तदुक्तं भगवत्पादैः "प्रामाण्यं च स्वत एव अन्यथानवस्थानात्" इति । ज्ञायत इति शेषः । उक्तानुमानसाध्यानि विनोक्तहेतूनां पक्षेऽवस्थित्ययोगादित्यर्थः ।

युक्तिरत्नाकरः

ननु यदि गृहीतप्रामाण्यज्ञानसजातीयकरतलामलकादिज्ञाने संशयदर्शनमात्रेण प्रामाण्यस्वतस्त्वं तदा प्रामाण्येऽपि स्वतस्त्वं दुर्वारमिति शङ्कते ।। **नन्विति** ।। यद्यप्यप्रामाण्यग्रहानन्तरं न सर्वथा पुनरस्योत्पत्तिस्तदभावनिश्चये तद्वत्त्वग्रहायोगादिति क्व तत्राप्रमात्वसंशयः । कतरामनुव्यवसायेनाप्रामाण्यनिश्चयः । कतमाश्च तद्दृष्टान्तेनान्यत्र तथात्वसाधनम् । तथापि यत्राप्रामाण्यनिश्चयेऽपि प्रबलदोषवशात् पीतः शङ्ख इति भ्रमः तत्र पुनरनुव्यवसायेन प्रामाण्यग्रहसम्भवादियमुक्तिः । अनुमितिवदप्रामाण्यं प्रत्यक्षस्यापि तदभाववत्त्वांशेऽपि अलौकिकचाक्षुषपीतत्ववैशिष्ट्यप्रत्यक्षप्रतिबन्धकत्वेन भ्रमानुत्पत्या विरोधाच्चेति भावः । न च यत्किञ्चित्संशयदर्शनमात्रेण प्रामाण्यग्रमाचक्ष्महे । येनाप्रामाण्यस्यापि स स्यात् किन्तु सामग्रीसद्भावात् । न च सा प्रामाण्यग्रहे अस्तीति । न तत्प्रतिबन्दीत्याह ।। **अप्रामाण्योपाधेरिति** ।।

स्वतस्त्वेऽनुमानं मानमुपन्यस्य तदाचार्यवचनं सम्मत्या द्रढयति ।। **तदुक्तमिति** ।। स्वतस्त्वस्यानुमानप्रमाणकत्वं भगवत्पादीयसूक्तेः पूर्वोक्तर-

तद्ग्रन्थपरिशीलनविधुरस्योत्पत्तिज्ञप्तिस्वतस्त्वसाधारणप्रतीतेः शेषपूरणेन वा मुक्तार्थपरतया व्याचष्टे ।। **ज्ञायते इति** ।। **उक्तेति** ।।

यद्यप्यन्यशब्दस्य सर्वनामतया प्रकृतपरामर्शित्वनियमेनान्यथा स्वतो ज्ञेयत्वाभाव इत्येवार्थो युक्तः । तथापि प्रामाण्यञ्च स्वत एव ज्ञायत इति प्रतिज्ञाय हेतुमुपन्यस्यान्यथेत्याद्युक्तावप्राप्तकालत्वापत्या परतो अज्ञेयत्वे सति ज्ञायमानत्वादित्यादि शेषपूरणस्यावश्यकत्वे हेतुसाध्ययोरपि प्रकृतत्वेन्यथेत्यस्योक्तं साध्यं विनेत्यर्थे युक्ते अवस्थानशब्दस्य सम्बन्धिकारणसापेक्ष्यवाचितया कस्य कुत्रावस्थानायोग इत्याकाङ्क्षायां योग्यतया हेतोः पक्ष इत्यध्याहारस्यावश्यकत्वे उक्त एवार्थः युक्त इति भावः ।। **स्वतस्त्वानुमानेति** ।।

।। इति स्वतस्त्वेऽनुमानानि ।। ३ ।।

न्यायदीपः

ननु अनुव्यवसायः स्वग्राह्यज्ञानाप्रामाण्यविषयीकरणयोग्यः अनुव्यवसायत्वात् गृहीताप्रामाण्यकज्ञानसमानविषयकज्ञानान्तरानुव्यवसायवदित्याभाससाम्यमाशङ्क्य निराह ।। **नन्वित्यादिना** ।। **व्यवसायेति** ।। व्यवसाये इदं रूप्यमित्यादिभ्रमे अविषयो योऽभावो रजतत्वाभावः तस्येत्यर्थः । तदभाववति तत्प्रकारकत्वरूपत्वादप्रामाण्यस्य तद्घटकोपाधिरूपस्याभावस्येदं रूप्यमिति ज्ञानेऽनुल्लेखेन नेदं रूप्यमिति ज्ञान एवोल्लेखेन कथं तस्यानुव्यवसाययोग्यत्वम् । तथा च तत्र बाध एव दोष इति भावः ।। **तदुक्तमिति** ।। स्वतस्त्वे एतान्यनुमानान्यनवद्यानीत्येतद् विष्णुतत्वनिर्णय उक्तमित्यर्थः । तत्पठित्वा प्रकृतानुगुणमर्थमाह ।। **प्रामाण्यं चेति** ।।

।। इति स्वतस्त्वेऽनुमानानि ।। ३ ।।

स्वतस्त्वानुमानेषु बाधोद्धारः ।

ननूक्तरूपं याथार्थ्यं न साक्षिणो अनुव्यवसायस्य वा विषयः । रजतत्वप्रकारकत्वे सन्देहादर्शनेन तस्य तद्विषयकत्वेऽपि रजतत्ववद्विशेष्यकत्वे सन्देहदर्शनेन रजतत्ववत्वरूपे बहिरर्थे तस्य असामर्थ्यात् । तथाच स्वतस्त्वानुमानानि बाधितविषयाणीति चेन्न । सुखत्ववत्वादेर्बहिरर्थत्वाभावेन साक्षिवेद्यसुखादिज्ञाने स्वतः प्रामाण्याप्रतिहतेः ।

किञ्च किं रजतत्वादिवैशिष्ट्यमनुव्यवसायाविषय एव किं वा व्यवसायविषयतया तद्विषयोपि स्वातन्त्र्येण तदविषयः । नाद्यः । अनुव्यवसायस्य ससम्बन्धिकव्यवसायविषयकसाक्षात्कारत्वेन सम्बन्धितावच्छेदकरजतत्वादिवैशिष्ट्यविषयकत्वनियमात् । धर्मधर्म्यंशयोरिव तद्वैशिष्ट्यांशेपि व्यवसायप्रत्यासत्तेः सत्वेन तदप्रतीतौ हेत्वभावाच्च । रजतं जानामीत्यनुव्यवसायेपि रजतरजतत्वयोः स्वरूपेणैव भाने तस्य पुरोवर्तिरजतत्वे जानामीति समूहालम्बनरूपानुव्यवसायाद् विषयभेदाभावापाताच्च । व्यवसायगतस्य रजतत्ववैशिष्ट्यविषयकत्वस्य असिद्ध्यापाताच्च । नह्यनुव्यवसायात् अन्येन तत्सिद्धिः । न च वैशिष्ट्यमगृह्णन्नुव्यवसायः तद्विषयकत्वग्रहणे शक्तः ।

युक्तिरत्नाकरः

उक्तरूपमिति ।। बहिरर्थघटितत्वज्ञापनाय साक्षिणो न्यायमते सिद्धेराह ।। **अनुव्यवसायस्येति** ।। सन्देहदर्शनेनेत्युपलक्षणम् । बहिरर्थत्वाभावेनेति बोध्यम् । सन्देहेति तस्य रजतत्ववत्वसंशयपर्यवसन्नत्वादिति भावः ।। **तथाचेति** ।। यद्यपि सुखानुभवसाक्षात्कारनिष्कम्पप्रवृत्तिहेतुत्व-

व्यवसायादेरेव च पक्षत्वेन तत्र प्रामाण्यस्य संशयाभावेन बाधः । तथापि प्रामाण्यं स्वतोग्राह्यमित्याद्यनुमानाभिप्रायेण वा यत्र बहिरर्थै संशयस्तत्रापि स्वतस्त्वस्य साधनीयतया तदभिप्रायेण वा योग्यत्वसाधकाद्यनुमित्यभिप्रायेण चेयमुक्तिः । अत एव पक्षीकृतसुखादिज्ञानप्रामाण्ये करतलामलकादेर्बहिरर्थत्वेऽपि सन्देहाभावेनेति शेषः । साक्षिवेद्यं च तत् सुखं इति विग्रहः । आदिपदेन करतलामलकादेः ग्रहणम् । स्वतः प्रामाण्यग्रहः साधनाप्रतिहतेः । ससम्बन्धिकसंयोगसविकल्पकप्रत्यक्षे सम्बन्धितावच्छेदेकघटत्वादिविशिष्टस्य घटादौ ससम्बन्धिनि भाननियमेन संयोगप्रत्यक्षापेक्षया ससम्बन्धिकपदार्थप्रत्यक्षत्वस्य विभागघटाभावादिवृत्तितया सामान्यरूपत्वेन ससम्बन्धितावच्छेदकवैशिष्ट्यविषयकत्वं व्यवसायतावच्छेदकत्वकल्पनादिति भावः । न घटस्यापि स्वभावसम्बन्धितया प्रत्यक्षे व्यभिचारः । ससम्बन्धिकपदेनान्यनिरूप्यत्वस्य विवक्षितत्वात् । तस्य च घटत्वेन रूपेणान्यानिरूप्यत्वात् । एवञ्च इदं रजतत्वेन जानामीत्यनुव्यवसायः स्वविषयनिरूपकैतदवच्छेदकवैशिष्ट्यविषयकः निरूपप्रत्यक्षत्वात् घटे पटसंयोग इति प्रत्यक्षवदिति भानमिह सूचितम् । हेतुसाध्ययोर्व्यवसाये रजतत्वपदे प्रकृताभिप्राये ।

ननु व्याप्तिशरीरान्तर्गतोऽन्यानिरूप्यघटादिप्रत्यक्षे संयोगो गुण इत्यादिशाब्दज्ञानेन व्यभिचारवारणाय हेतावुभयोपादानम् । ननु संयोगनिर्विकल्पके व्यभिचारः । सविकल्पकत्वविशेषणे च सिद्धान्तव्यर्थता । न चानुव्यवसायस्य ज्ञानांशे निर्विकल्पकत्वेऽपि विषयांशे सविकल्पकत्वदर्शनात् संयोगप्रत्यक्षस्यापि संयोग्यंशे सविकल्पकत्वेन व्यभिचार इति वाच्यम् । घटादिनिर्विकल्पकदशायामेव रूपादिनिर्विकल्पवत् संयुक्तसमवायादिना संयोगनिर्विकल्पकस्यापि सम्भवेन व्यभिचारस्य वज्रलेपत्वात् । न च लाघवेन ससम्बन्धिकप्रत्यक्षत्वावच्छेदेनैव सम्बन्धितावच्छेदकप्रकार-

ज्ञानजन्यत्वकल्पनात् । न तदा संयोगनिर्विकल्पकसामग्रीति वाच्यम् । अपसिद्धान्तात् । अन्वयव्यतिरेकाभ्यां संयोगत्वविशिष्टप्रत्यक्ष एव ससम्बन्धितावच्छेदकज्ञानहेतुत्वस्य तदभ्युपगमात् । गुणत्वादिसामान्य-प्रत्यक्षासत्तिजन्यसंयोगप्रत्यक्षे व्यभिचारेण सम्बन्धिनिष्ठासाधारणधर्मप्रकारक-प्रत्यक्षत्वस्यैतज्जन्यतावच्छेदकसत्वेनोपेयत्वाच्चेति । न च तद्वारणाय लौकिकत्वमेवावच्छेदकमिति वाच्यम् । संयोगाद्यन्यतममात्रजन्यत्वस्या-लौकिकप्रत्यासत्तिजन्यत्वादेः वा तस्यापि गुरुत्वाद्वस्तुतः संयोगे एव गुणत्वसत्वात्तत्प्रकारक एव लौकिकप्रत्यक्षे सम्बन्धितावच्छेदकप्रकारकज्ञाने तस्य हेतुत्वाच्चेति चेन्न सामान्यप्रत्यासत्तिजन्यसंयोगप्रत्यक्षे व्यभिचारवारणाय प्रत्यक्षपदेन तदसाधारणधर्मप्रकारकप्रत्यक्षत्वस्यावश्यविवक्षणीयत्वेन तत एव तन्निर्विकल्पके व्यभिचारवारणादिति ।

किञ्च बहिरर्थत्वेनानुव्यवसायविषयत्वं किं रजतत्ववैशिष्ट्यमात्रे साध्यते किं वा पुरोवर्तिरजतत्वयोरपि । नान्त्यः । तत्रापि संशयापातात् । नाद्यः । तयोरपि तत एव तदविषयत्वसाधनप्रसङ्गात् । संशयाभावेन तयो-स्तद्विषयत्वसाधने तु बहिरर्थहेतोस्तत्रैव हेतुत्वात् पुरोवर्तिरजतत्वयोश्च व्यवसायरूपोपनायकसहकृतत्वाद्धेत्वागमनात् न व्यभिचारस्तदा तद्वैशिष्टेऽपि हेत्वसत्वाभावात् अनुव्यवसायविषयकत्वसिद्धिरित्याह ।। **धर्मेति** ।। तदप्रतीतौ तन्मात्राप्रतीतौ संशयगतिस्तु वक्ष्यते इति भावः । एवं सामग्र्युप-पादनेन वैशिष्ट्यानुव्यवसायविषयत्वं प्रसाध्य तदङ्गीकारे अनुभवबाधं व्यवसायस्य वैशिष्ट्यविषयत्वासिद्धिं च क्रमादाह ।। **रजतमिति** ।। केचित्तु रजतं जानामि इत्यनुव्यवसायः रजतरजतत्ववैशिष्ट्यविषयकः तदविषयक-विलक्षणत्वात् व्यवसायवदित्यनुमानबाधितं च बहिरर्थत्वेन वैशिष्ट्य-स्यानुव्यवसायविषयत्वसाधनमनुकूलतर्कसध्रीचीनत्वेनास्य प्राबल्यादित्यभिप्रेत्य तर्कमाह रजतमिति इति । अपिर्विरोधे । इदं रजतमिति व्यवसायवदिदं

रजतं जानामि इत्यत्रापि रजतत्ववैशिष्ट्यविषयकानुव्यवसायविषयः स्यात् पुरोवर्तिरजतत्वे रजतं जानामि इत्यत्रैवेहापि समुच्चयार्थो वा स्वरूपेणैव भानवैशिष्ट्यं प्रति अनुयोगित्वप्रतियोगित्वाभ्यां अभाने रजतं जानामि इति प्रतीतिर्यदि रजतरजतत्वविषयके सति तद्वैशिष्ट्यविषयकानुव्यवसायविषयः स्यात् पुरोवर्तिरजत्वे जानामीति समूहालम्बनानुव्यवसायसमानाकारः स्यादिति तर्कार्थः । घटाद्यनुव्यवसाये रजतत्वं विशिष्टतया जानामीत्यनुव्यवसाये इदं रजतमिति व्यवसाये च व्यभिचारवारणाय क्रमाद्विशेषणद्वयम् ।

ननु पुरोवर्तिरजतत्वे जानामीत्यनुव्यवसाये रजतत्वविशेष्यकत्व-स्याधिकस्य भानात्कथं तत्समानाकारतापादनमिति चेन्न । रजतांशे तत्समानविषया स्यादित्यत्र तात्पर्यात् । एतदस्वरसात् आह– **व्यवसायेति** ।। तथा च तद्बाधितं तत्साधनमिति भावः । यद्वा एतदन्यथानुपपत्तिरप्युक्तवैशिष्ट्यविषयकत्वे मानमिति । ननु वैशिष्ट्यस्य बहिरर्थत्वेनानुव्यवसायाविषयत्वेऽपि तद्विषयकत्वस्य व्यवसायनिष्ठस्य तद्विषयकत्वे दोषस्तत्राह ।। **न चेति** ।। अननुसंहितोपा धेरुपहित-प्रत्ययायोगादिति भावः । व्यवहारोऽभिलापः । आदिपदावृत्तिः । तथाचेदं रजतमिति प्रवृत्यभिलापौ रजतत्ववैशिष्ट्यविषयकज्ञानासाध्यौ तादृश-प्रवृत्यादिमत्वात् पूर्वं तादृशप्रवृत्यादिवदित्यनुमित्यर्थे ।।

न्यायदीपः

ननु अप्रामाण्यघटकोपाधेरभावस्य व्यवसायाविषयतया तदनुव्यवसाय-वेद्यत्वमप्रामाण्यस्य बाधितमिति यथोच्यते तथैव प्रामाण्यघटकोपाधेर्धर्मधर्मि-वैशिष्ट्यस्य व्यवसायविषयत्वेपि न तदनुव्यवसायविषयता । तस्य बहिरर्थ-त्वात् । अन्यथा धर्मधर्म्यंश इव वैशिष्ट्ये अस्ति न वेति कदापि सन्देहो न स्यादिति भावेन ''अस्तु तावदिदं प्रामाण्यं तथाप्यनुव्यवसायानन्तरं

व्यवसायस्य प्रामाण्ये अर्थस्य तद्वत्वे च संशयस्यानुभवसिद्धत्वान्नार्थतद्वत्त्वं तस्य विषयः'' इति **मणि**कृदुक्तं हृदि कृत्वा शङ्कते ।। **नन्विति** ।। **उक्तेति** ।। तद्वति तत्प्रकारकज्ञानत्वरूपमित्यर्थः । वक्ष्यमाणोपपादन-सौकर्याय एतदुक्तिः । स्वरूपज्ञानं साक्षीति सिद्धान्तावष्टम्भेनाह ।। **साक्षिण इति** ।। मानसज्ञानानुभवो अनुव्यवसाय इति मतावष्टम्भेनाह ।। **अनु-व्यवसायस्य वेति** ।। तद्वद्विशेष्यकत्वसन्देहस्य तद्वत्वसन्देहपर्यव-सानाद्रजतत्ववत्त्वरूपेत्युक्तम् ।। **तस्येति** ।। अनुव्यवसायस्येत्यर्थः ।

सर्वप्रामाण्यस्य स्वतस्त्वानापत्तेराह ।। **किञ्चेति** ।। ''नार्थतद्वत्वं तस्य विषयः'' इति **मण्यु**क्तेरुभयथा सम्भवात् स्वातन्त्र्येणेति कैश्चिद्व्याख्यानाच्च द्वेधा विकल्पः ।। **सम्बन्धितेति** ।। व्यवसायसम्बन्धिनि रजते या सम्बन्धिता तदवच्छेदकेत्यर्थः ।। **नियमादिति** ।। संयोगप्रत्यक्षादौ तथा दर्शनादिति भावः । न च संयोगनिर्विकल्पके व्यभिचारः । तदभावस्य वक्ष्यमाणत्वात् । तस्यापि संयोग्यंशे सविकल्पकत्वाच्च । साक्षात्कार-पदेनासाधारणधर्मप्रकारेण ससम्बन्धिकसाक्षात्कारस्य अभिप्रेतत्वाच्च । अत एव गुणत्वप्रमेयत्त्वादिसामान्यप्रत्यासत्तिजन्ये ससम्बन्धिकसंयोगादिसाक्षात्कारे न व्यभिचारः । न चैवमपि संयोगत्वसामान्यप्रत्यासत्तिजन्ये संयोगसाक्षात्कारे व्यभिचारः । एवं हि लौकिकेत्यपि साक्षात्कारो विशेषणीयः ।। **धर्मेति** ।। बाह्यार्थत्वेपि रजतस्थं रजतत्वं तदाधारभूतं विशेष्यं च यथानुव्यवसायस्य विषयः तथा रजते रजतत्ववैशिष्ट्यमपि विषयोऽस्तु, तयोर्व्यवसायोपनीतत्वे तद्वत्वस्यापि व्यवसायोपनीतत्वमस्तु, न हि व्यवसायः स्वविषयमध्ये धर्मधर्मिणोरेवोपनायको न वैशिष्ट्यस्येत्यत्र हेतुरस्तीत्यर्थः । प्रत्यासत्तेरिति पररीत्योक्तम् । व्यवसायविषयत्वस्य नियामकस्य सत्वेनेति वार्थः । ननु धर्मधर्म्यंशयोः संशयो न कदाचित्, तद्वत्वांशे तु सोऽस्तीति संशय एव तदप्रतीतौ हेतुकल्पक इति चेन्न । तस्यान्यथोपपत्तेर्वक्ष्यमाणत्वादिति भावः ।

ननु वैशिष्ट्यस्यापि भाने भासमानवैशिष्ट्यप्रतियोगित्वरूपस्य रजतत्वादिगतस्य प्रकारत्वंस्यापि भानप्रसङ्गेनेदं रजतत्वेन जानामीत्येवानुव्यवसायो भवेन्नत्विदं रजतं जानामीत्यत आह ।। **रजतमिति** ।। अपीत्यभ्युपगमवादः । रजतत्वेनेत्येवाकारो नत्वेवं तथापीत्यर्थः । यद्वा वैशिष्ट्यस्यानुव्यवसायाविषयत्वे दोषान्तरमाह ।। **रजतमिति** ।। न केवलं समूहालम्बन इत्यपेरर्थः । इदं रजतमिति व्यवसायसमानाकारतयोत्पद्यमानेपीति वार्थः ।। **स्वरूपेणैव** ।। असम्बद्धतयैवेत्यर्थः ।। **असिद्धीति** ।। रजतरजतत्वयोः स्वरूपेणैव भान इत्यनुकर्षः ।। **तद्विषयकत्वेति** ।। वैशिष्ट्यविषयकत्वेत्यर्थः ।

तर्कताण्डवम्

ननु वैशिष्ट्यविषयकव्यवहारादिलिङ्गकानुमित्या व्यवसायप्रामाण्यानुमित्या वा तत्सिद्धिः । न त्वनुव्यवसायेन । इदं रजतत्वेन जानामीति हि तदाकारो नत्विदं रजतमिति । तृतीयार्थश्च न वैशिष्ट्यम् । व्यवसायेऽपि तदर्थोल्लेखापत्तेः । किं तु व्यवसायगतं रजतत्वप्रकारकत्वम् । तस्माद्वैशिष्ट्यं नानुव्यवसायविषय इति चेन्मैवम् । वैशिष्ट्यविषयकत्वस्य अनुमेयत्वेऽनुमितितः प्राक्तत्र कदाचित्संशयाद्यापातात् । भासमानवैशिष्ट्यप्रतियोगित्वादन्यस्य प्रकारत्वस्याभावेनेदं रजतत्वेन जानामीत्याकारेणैवानुव्यवसाये[1] धर्मधर्म्यंशविषयकत्वस्येव वैशिष्ट्यविषयकत्वस्यापि भानेऽनुभवसिद्धे तत्त्यागेनान्यतस्तत्सिद्धिकल्पने धर्मधर्म्यंशविषयकत्वस्यापि अन्यतः सिद्धिकल्पनापाताच्च । न च व्यवसायस्य वैशिष्ट्यविषयकत्वमगृह्णन् धर्म्यंशादिविषयकत्वमात्रं गृह्णन्नन्योऽनुव्यवसायोऽनुभूयते ।

---

१. 'अनुव्यवसायेन' इति पाठान्तरम् ।

न च व्यावर्तकत्वं वा तज्ज्ञानजनकज्ञानविषयत्वं वा विशेष्यानिष्ठो, रजतत्वादिनिष्ठो ज्ञानेन सह स्वरूपसम्बन्धविशेषो वा प्रकारत्वमिति वाच्यम् । बहिरर्थानां तेषां वैशिष्ट्यवद्व्यवसाय-विषयत्वाभावेनानुव्यवसाये भानायोगात् । क्लृप्तस्य भासमानवैशिष्ट्य-प्रतियोगित्वस्य त्यागेन स्वरूपसम्बन्धविशेषकल्पनायोगाच्च । इदं रजतत्वविशिष्टतया जानामीत्यनुव्यवसायाच्च । व्यवसायस्य त्वदुक्तरजतत्वप्रकारकत्वेनैवेदं रजतमित्याकारस्येदं रजतमित्यभिलपनं रजतार्थिप्रवृत्तिं च प्रति हेतुत्वस्य च सम्भवे तस्य वैशिष्ट्यविषय-कत्वाभावापाताच्च ।

अनुव्यवसाय एव तृतीयार्थोल्लेखस्तु तत्र वैशिष्ट्यभानेऽपि अधिकस्य रजतत्वे व्यवसायं प्रति प्रकारत्वस्यापि भानात् । अत एवानुव्यवसायस्येदं रजतमित्याकारत्वाभावोऽपि । वैशिष्ट्यस्य स्वातन्त्र्येणाभानात् ।

युक्तिरत्नाकरः

नन्विति ।। तथा च न द्वितीयं बाधकम् । न तावदनुपपत्तिरिति भावः ।। **नन्वभिलापादेरिति** ।। इदं रजतमित्याकारकत्वादेव बहिर्वैशिष्ट्य-विषयकत्वम् । तथा चेदं रजतं जानामीत्यनुव्यवसायस्यापि तत एव वैशिष्ट्यविषयकत्वसिद्धिः तत्राह ।। **इदं रजतत्वेनेति** ।। इदं रजतमिति जानामीत्यनुकर्षः । बहिरस्वातन्त्र्यादिति भावः । एवं च इदं रजतं जानामि इत्यनुव्यवसायस्यैव असिध्या समूहालम्बनानुव्यवसायसमानविषयापादन-मप्यसङ्गतमिति भावः ।। **अनुमितितः प्रागिति** ।। इदमुपलक्षणम् । बालमूकादेरुदासीनस्य वाभिलापप्रवृत्तेरभावेन प्रामाण्यानुमितेरपि प्रवृत्युत्तरकालतत्सामर्थ्यावधारणसाध्यत्वेन तदसार्वत्रिके व्यवसायस्य

वैशिष्ट्यविषयत्वासिद्धेः । किं च वैशिष्ट्यविषयकत्वग्रहे सत्येव स्यादित्यनुव्यवसायत एव तद्ग्रहो वाच्यः । प्राथमिकस्य तद्ग्रहस्यानुमित्यादिरूपस्यासम्भवात् । प्राथमिकप्रामाण्योपस्थिते प्राग्भवीयसंस्कारव्यतिरेक्यनुमानादिनोत्पत्तिरित्यस्य निरसिष्यमाणतया तन्न्यायानवताराच्च । एवं प्रवृत्त्यादावपि वैशिष्ट्यविषयकत्वमनुव्यवसायादन्यतो न सिध्यतीति हेत्वसिद्धिरित्याद्यपि बोध्यम् । तदिदमुक्तम् ।। **तद्यनुव्यवसायादन्यतरासिद्धिरिति** ।। किञ्चेदं रजतं जानामि इति नानुव्यवसायाकारः । किन्त्विदं रजतत्वेनेत्यभ्युपगमोनुभवापलापे दोषलिप्सैव नत्विष्टसिद्धये तत्र कारकत्वोल्लेखेनैव तद्घटकवैशिष्ट्यविषयकत्वाभावासिद्धेः । बहिरर्थघटिततया तदभावे धर्मधर्मिविषयकस्यापि तथात्वापत्तेः । यदि चेदं रजतत्वेनेत्यनुभवसिद्धतदुल्लेख्याद्धर्मधर्मिसिद्धिः तदेहापीत्युक्तम् । न च धर्मधर्मिविषयत्वमपि न भासत इति वाच्यम् । इदं रजतत्वेनेति तदाकारविरोधादनुव्यवसाये व्यवसायमात्राभावेन सर्वानुभवविरोधाच्च । तथा च वैशिष्ट्यविषयकभ्रमे वानुमानादिसिद्धमिति वैषम्यं निर्मूलमित्याह ।। **भासमानेति** ।। ननु वैशिष्ट्यघटितमेव तत्प्रकारकत्वं अतो न तृतीयार्थोल्लेखबलाद्वैशिष्ट्यविषयकत्वसिद्धिस्तत्राह ।। **न चेति तज्ज्ञानजनकेति** ।। विशिष्टज्ञानकज्ञाने विषयतयाऽवच्छेदकमित्यर्थः । अतो न विशेष्यादौ प्रसङ्गः । विशेषणाविषयत्वेनैव तस्य विशिष्टज्ञानजनकत्वात् । तत्राद्येऽतीतानागतातीन्द्रियेषु प्रकारत्वं न स्यात् । व्यावृत्तिधीजनकत्वरूपव्यावर्तकत्वस्य तत्राभावात् । द्वितीये विशेषणज्ञानहेतुत्वपक्षे प्रकारत्वमात्रेऽसम्भवः । तृतीयेऽप्यतीतादै प्रकारत्वं न स्यात् । तन्निष्टस्य तदात्मकस्य तदभावाभावान्न च तत्र, ज्ञानमेव सम्बन्धः । रजतादिविशिष्टत्वोक्त्ययोगात् । कथञ्चिद्योगे विशेष्यवृत्तित्वस्यापि तत एव भाने तदवृत्तित्वोक्त्ययोगाच्चेत्यादि दोषे सत्येव दोषान्तरमाह[१] ।।

१. अत्र ग्रन्थपातः ।

यत्र निरन्तरव्यवसायद्वयं तत्र पूर्वव्यवसायविषयस्य वैशिष्ट्यं द्वितीयः द्वितीयव्यवसाये प्रकारत्वोपपत्तिः । न च तयोरिदं रजतं इदं रजतत्व-विशिष्टमित्याकारभेदापत्तिः । इष्टापत्तेः । अत एव दण्डी देवदत्त इत्यत्रा-दण्डसंयोगवान् देवदत्तः दण्डसंयोगसमवायवान् देवदत इत्यादयोपि प्रत्यया अनुभवसिद्धा इति भावः । नन्वेवमिदं रजतत्वविशिष्टतया जानामीत्यत्र तद्विषयत्वासिद्धिरेवेत्यत्राह ।। **व्यवसायस्येति** ।। **त्वदुक्तेति** ।। स्वरूपसम्बन्धविशेषरूपेत्यर्थः । तथा चेदं रजतत्वविशिष्टमिति व्यवसाय-वैशिष्ट्यं विषयो न त्विदं रजतमिति व्यवसाय इति तस्याविशिष्टधीत्वमेव सकललोकसिद्धं न स्यात् । वैशिष्ट्यगोचरत्वसत्वादिदं रजतमिति व्यवसायानन्तरं प्रामाण्यसंशयाद्यभावदशायामपि इदं रजतं न वेति कदाचित्कस्यचित्संशयादि स्यात् । तत्र पुरोवर्तिरजतत्वे वैशिष्ट्यस्य सद्भावे व्यवसायानुव्यवसायमानत्वेन तदलीकत्वापत्तिश्च स्यादिति भावः । एवमप्यनुव्यवसायस्य ससम्बन्धिकप्रत्यक्षत्वादिप्रागुक्तयुक्त्यापि वैशिष्ट्य-विषयकत्वस्यावश्यकत्वे किमतिरिक्तस्वरूपसम्बन्धविशेषविषयकल्पनेनेत्यपि बोध्यम् । तदिदमुक्तं कृष्णस्येत्यादि ।। **प्रकारत्वस्येति** ।। भासमान-वैशिष्ट्यप्रतियोगित्वरूपस्येत्यर्थः । व्यवसायं प्रति प्रकारत्वस्य च व्यवसायघटितमूर्तितया न व्यवसायविषयत्वमिति भावः । नन्विमे रङ्गरजते इत्यत्रेवाधिकभानेऽपि इदं रजतमित्याकरता वैशिष्ट्यांशे स्यादेवेत्याह ।। **अत एवेति** ।। अतः शब्दार्थमाह ।। **स्वातन्त्र्येणेति** ।। साक्षादित्यर्थः । व्यवसायद्वारैव पुरोवर्तिनि रजतत्ववैशिष्ट्यविषयकत्वेनेति यावत् ।

न्यायदीपः

।। **व्यवहारादीति** ।। प्रवृत्तिरादिपदार्थः । व्यवसायो वैशिष्ट्यविषयकः तद्विषयव्यवहारप्रवृत्तिहेतुत्वात् सम्मतवदित्यनुमित्या इदं ज्ञानं प्रमाणं समर्थप्रवृत्तिहेतुत्वादित्यादिप्रामाण्यानुमित्या वेत्यर्थः । तद्वद्विशेष्यकत्वस्य

प्रामाण्यरूपत्वादिति भावः ।। **तत्सिद्धिः** ।। व्यवसाये वैशिष्ट्यविषयकत्व-सिद्धिरित्यर्थः । ''इदं रजतं जानामीति नानुव्यवसायाकारः । बहिर्विशेष्यके मनसोऽसामर्थ्यात् । किं त्विदं रजतत्वेन जानामीति'' इत्यादि**मण्युक्तमाह** ।। **इदं रजतत्वेनेति** ।। **वैशिष्ट्यविषयकत्वस्य इति** ।। व्यवसायगत-स्येत्यनुषङ्गः ।। **धर्म्यंशेति** ।। इदन्त्वविशिष्टेदमंशविषयकत्वस्येवेत्यर्थः । विशेष्यांशेति वार्थः ।। **अन्यत इति** ।। अनुव्यवसायादन्यतो व्यवहारादि-लिङ्गतो व्यवसायप्रामाण्यानुमितितो वेत्यर्थः । संशयाभावतद्भावौ त्वन्यथोपपन्नाविति भावः । ननु तदंशेऽनुव्यवसायान्तरतः सिद्धिरनुभव-सिद्धेत्यतो निराह ।। **न चेति** ।।

अन्यस्य प्रकारत्वस्याभावेनेत्येतस्यासिद्धिमाशङ्क्य च निराह– **न च व्यावर्तकत्वमित्यादिना** । विशेष्यनिष्ठव्यावृत्तिबुद्धिजनकत्वं व्यावर्तकत्वं ।। **तज्ज्ञानेति** ।। वैशिष्ट्यज्ञानेत्यर्थः । विशेषणज्ञानस्य विशिष्ट-ज्ञानजनकत्वादिति भावः ।। **वैशिष्ट्यवदिति** ।। वैशिष्ट्यस्य यथा व्यवसाय-विषयत्वं तथाऽभावेनेत्यर्थः । वैशिष्ट्यस्य बाह्यार्थत्वेऽपि व्यवसाय-विषयत्वात् तत्प्रतियोगित्वरूपप्रकारत्वस्यानुव्यवसाये भानं युक्तमिति भावः । ज्ञानेन सह स्वरूपसम्बन्धविशेषो न बहिरर्थ इत्यत आह ।। **क्लृप्तस्येति** ।। अतीतादिस्थले व्यावृत्तिबुद्धिजनकत्वरूपव्यावर्तकत्वायोगात् । विशेषण-ज्ञानाहेतुत्वपक्षे च द्वितीयस्यायोगेन तत्र भासमानेत्यादिरूपस्यैव प्रकारत्वस्य क्लृप्तत्वादिति भावः । ''वैशिष्ट्यविषयकत्वस्यापि भानेऽनुभवसिद्धे'' इति प्रागुक्तमसिद्धमित्यत आह ।। **इदं रजतत्वेति** ।।

ननु इदंविशेष्यकरजतत्ववैशिष्ट्यप्रकारकज्ञानवानहमित्यनुव्यवसायादिति ह्यस्यार्थः । न च वैशिष्ट्यं व्यवसाये प्रकारः । प्रागनुपस्थितत्वेन संसर्ग-मर्यादयैव भानादिति चेन्न । विशेषणज्ञानहेतुताया निर्विकल्पकभङ्गे निरसिष्य-माणत्वेन प्रागनुपस्थितस्यापि वैशिष्ट्यस्य व्यवसाये रजतत्वस्येव प्रकारतया

भाने बाधकाभावादिति भावः । एवंरूपानुव्यवसाये विप्रतिपत्तिरिति चेत्तर्हीदं[1] रजतत्वेन जानामीत्याकारोऽपि वैशेष्ट्याभानेप्युपपद्यतामित्यतिप्रसङ्ग इत्याह ।। **व्यवसायस्येति** ।। इत्याकारस्य हेतुत्वस्य च सम्भव इत्यन्वयः ।

वैशिष्ट्यस्य तृतीयार्थत्वे व्यवसायेपि तृतीयार्थोल्लेखापत्तेरिति प्रागुक्तदोषं निराह **अनुव्यवसाय एवेति** ।। **प्रकारत्वस्येति** ।। भासमानवैशिष्ट्य-प्रतियोगित्वरूपस्येत्यर्थः । व्यवसाये त्वात्माश्रयापत्तेः नोक्तरूपप्रकारत्वस्य भानमिति भावः । वैशिष्ट्यस्यापि भाने व्यवसायसमानाकारता स्यादित्यत आह ।। **अत एवेति** ।। अत एवेत्युक्तं व्यनक्ति ।। **वैशिष्ट्यस्येति** ।। **स्वातन्त्र्येणेति** ।। व्यवसाय इव ज्ञानाविशेषणतयेत्यर्थः ।

तर्कताण्डवम्

नन्वनुव्यवसाये वैशिष्ट्यस्य व्यवसायगतस्य रजतत्ववद्विषयकत्वस्य च भानेऽपि प्रामाण्यान्तर्गतं व्यवसायनिष्ठं रजतत्ववद्विशेष्यकत्वं न भासते । न च रजतत्ववद्विषयकत्वे सति रजतत्वप्रकारकत्वमेव प्रामाण्यम् । मन्मते भ्रमसाधारण्यादिति चेन्न । रजतत्वे तृतीयार्थोल्लेखबलेन प्रकारकत्वस्येव रजतेऽपि द्वितीयार्थोल्लेखबलेन विशेष्यकत्वस्यानुव्यवसायेन गृहीततया समानसंवित्संवेद्यतया च व्यवसाये [2]तद्विशेष्यकत्वस्यापि ग्रहणात् ।

अस्ति हि दोषशङ्काद्यवतारदशायामिदं रजतत्वेन जानामीत्यनुव्यवसायेऽपि तदनवतारदशायां रजतं रजतत्वेन जानामीत्यनुव्यवसायः । तस्मान्नाद्यः ।

---

१. ''चेत्तर्हि अतिप्रसङ्गः'' इति एव वाक्यं स्यात् । ''इदं रजतत्वेन' इत्यारभ्य ''उपपद्यतां'' इति पर्यन्तं वाक्यं न स्यादिति भाति ।

२. ''तद्वद्विशेष्यकत्वस्यापि'' इति पाठान्तरम् ।

युक्तिरत्नाकरः

।। **नन्विति** ।। यद्यपि तत्प्रकारकत्वादिभाने समानसंवित्संवेद्यत्वादिना तद्विशेष्यकत्वभानमित्यावश्यकमिति नैतच्छङ्का । अत एवाह ।। **समानसंवित्संवेद्यतया चेति** ।। तथापि विशेषयुक्तिं वक्तुमित्यमाशङ्कते ।। **मन्मत इति** ।। गुरमत इति शेषः । भ्रमसाधारण्यात्तादात्म्यारोप-साधारण्यात् ।। **द्वितीयार्थेति** ।।

ननु कथं द्वितीयार्थेति द्वितीयार्थोल्लेखेऽपि विशेष्यत्वभानम् । न हि प्रकारत्वे तृतीयाया इव विशेष्यत्वे द्वितीयाया अनुशासनमस्तीति चेत् ''विशेष्यत्वत्वापरपर्यायस्ये''ति तत्वरूपतया द्वितीयार्थत्वात् । अत एव ऐन्द्रया ग्राहपत्यमुपतिष्ठत इत्यत्र तृतीयायाः विशेष्यत्वमिह गार्हपत्यमिति द्वितीयाशेषित्वप्रतीतिरिति पूर्वतन्त्रे व्यवस्थिम् ।

नन्वेवमपि द्वितीयार्थोल्लेखबलेन इदंत्ववद्विशेष्यकत्वे सति रजतत्व-प्रकारत्वमेव प्रामाण्यं भ्रमसाधारण्यादित्यत्राह ।। **अस्ति हीति** ।। **रजतत्वेनेति** ।। इदमिति शेषः । मनसो बहिरस्वातन्त्र्यात् कथमिदं रजतमिति ज्ञानविशेषत्वेन तदुल्लेखः इति वाच्यम् । उपनये सत्यविरोधात् । नचैवमप्युपनीतविशेषणत्वेनैव भानमिति वाच्यम् । बहिरिन्द्रियज्ञाने तथा नियमेऽपि [1]मानस उपनीतस्य विशेष्यत्वेन भानाभ्युपगमादन्यथा कविवत्युन्मू[2] संसर्गादिज्ञानं बहिरर्थविशेष्यकं सर्वानुभवसिद्धमसङ्गतमेव स्यादिति भावः ।। **सिद्धमिति** ।। न हि तद्वत्वे स्वातन्त्र्यमपि स्वतस्त्वान्तर्गतम् । यावज्ज्ञानग्रहग्राह्यत्वमात्रस्यैव तत्त्वादिति भावः । सत्यं, स्वातन्त्र्यं न स्वतस्त्वान्तर्गतम् । तथाप्यनुव्यवसायेन ज्ञानविषयतया तद्वत्वग्रहेऽपि क्वचित्संशयानिवृत्तेरानुभाविकत्वेन तन्निवृत्तिप्रत्यक्षमसतां निश्चयवतो न तद्घटितप्रामाण्यग्रहरूपतोक्तानुव्यवसायस्येति ।

---

१. मनसा इति स्यात् । २. तृटितम् ।

न्यायदीपः

''बहिर्विशेष्यके मनसोऽसामर्थ्या''दिति **मणौ** विशेष्यपदप्रयोगसूचितं ''न च तन्मात्रं प्रामाण्यम् । भ्रमसाधारणत्वात् । किं नाम रजतत्व-वद्विशेष्यकं रजतत्वप्रकारकमिदं ज्ञानं'' इत्यादि**पक्षधरोक्तं** हृदि कृत्वाशङ्कते ।। **नन्विति** ।। **न भासत इति** ।। मनसो बहिरसामर्थ्यादिति भावः । तद्विषयकत्वमेवास्तु प्रामाण्यम् । किं रजतत्ववद्विशेष्यकत्वेनेत्यत आह ।। **नचेति** ।। **मन्मते** ।। तार्किकमत इत्यर्थः । तन्मते शुक्तौ रजतत्वा-द्यारोपे सति तदाश्रयस्य सत्यरजतस्यापि विषयत्वादिति भावः । द्वितीया विषयत्वरूपकर्मत्व एव शक्ता । न तु विशेष्यत्व इति वादिनं प्रत्याह ।। **समानेति** ।। प्रकारत्वविशेष्यत्वयोरिति वा प्रकारत्वतद्विशेष्यकत्वयोरिति वार्थः ।

नन्वेवं भ्रमेऽपि प्रामाण्यापत्तिरिति चेत्कस्य दोषः । मन्मत इवासत एवारोपः स्वीक्रियताम् । तदनधिकरणाविशेष्यत्वादिकमधिकं वा निवेश्यता-मिति भावः । रजते द्वितीयार्थोल्लेखोऽसिद्ध इत्यत उपपादयति ।। **अस्तीति** ।। न च बाह्यार्थेषु अनुव्यवसायस्यासामर्थ्यम् । उपनायके सति सामर्थ्यसम्भवात् । न चोपनीतं विशेषणत्वेन भातीति नियमः । परमाणुमहं जानामीत्यादौ व्यभिचारादिति भावः ।

तर्कताण्डवम्

द्वितीये सिद्धं प्रामाण्यस्य स्वतस्त्वम् । वैशिष्ट्यरूपस्य तद्वत्व-स्याप्यनुव्यवसायेन ग्रहणात् । नन्वेवमप्यनुव्यवसायस्य श्रुतसाक्षि-वाक्यवदन्यविषयतया वैशिष्ट्यग्राहकत्वेपि तत्संशयविरोधित्वरूपं सत्तानिश्चयरूपत्वं नास्तीति न तद्घटितप्रामाण्ये निश्चयरूपता । न

ह्यन्यविषयतयाप्यर्थग्राहकेणार्थसत्वसिद्धिः । गेहे घटमिच्छामि गेहे घटसंशयः गेहे घटज्ञानमित्यादिवाक्यजन्यज्ञानेन अपि घटसत्व-सिद्ध्यापातादिति चेन्न । यत्र ज्ञानस्यान्यद्वारेण अर्थविषयता तत्र द्वारिणा ''द्वारं सत्वेन अर्थविषयकम्'' इति ग्रहणे द्वारिणोऽपि सत्वेनार्थविषयतेति दृष्टानुसारेण कल्पनेऽनतिप्रसङ्गात् । न हि द्वारमिच्छादिकं सत्वेनार्थविषयतया द्वारिणा ज्ञानेन गृहीतम् । दोष-शङ्कादिना अनास्कन्दितो व्यवसायस्त्वनुव्यवसायेन तथा गृहीतः । गेहे घटज्ञानं, साक्षिणा श्रुतवाक्यं च यदि सत्वेनार्थविषयतया, द्वारिणा ज्ञानेन गृहीतं तदा तेनापि घटसत्वं सिद्ध्यत्येव । यदि च सव्यवधानत्वमात्रेण सत्वानिश्चायकत्वं तर्हि गेहे मम घटप्रमेत्याप्त-वाक्यजन्यज्ञानेनापि घटसत्वं न सिध्येत् ।

युक्तिरत्नाकरः

तद्व्यावृत्तैव प्रामाण्यनिश्चयसामग्री वाच्येति शङ्कते ।। **नन्विति** ।। श्रुते यः साक्षी तेन दृष्टे तद्वाक्यं देवदत्तेनोक्तं मया श्रुतं न दृष्टमित्येवंरूपस्य यथा नार्थनिश्चायकता तथानुव्यवसायस्यापि पुरोवर्तिनि रजतत्वमस्तीति व्यवसायेनोक्तं न मया दृष्टमित्याकारकस्येत्यर्थः । एवं चानुव्यवसायेन सत्तया रजतत्ववैशिष्ट्यविषयकोऽन्यद्वारा तद्गोचरत्वात्तथाविधसाक्षिवाक्यादित्यनुमानं सूचयता अत्राप्रयोजकत्वमाशङ्क्येत्यादिग्राहके सर्वत्र तथा दृष्टे नियम-सिद्धिरित्याह ।। **नहीति** ।। अन्यविषयतया यद्गृह्यते तत्र सर्वत्र किं ग्राहकस्यार्थसत्तानिश्चयरूपत्वाभावः । किं वा क्वचिदेव । अन्त्ये नियामकं वाच्यम् । तच्च ग्राहकमनुव्यवसायादियद्व्यवसायादिविषययुक्त्या रजतत्वादि-वैशिष्ट्यं विषयीकरोति तद्व्यवसायादेस्तद्वैशिष्ट्ये सत्तानिश्चयरूपतां विषयी-करोति चेत् स्वयमपि तद्वैशिष्ट्यसत्तानिश्चयरूपं इत्येव वाच्यम् । अन्यस्य

वक्तुमशक्यत्वादित्याह ।। तथाचोक्तानुव्यवसायः सत्तयार्थनिश्चायकः अर्थसत्तानिश्चायकत्वेन तद्गोचरव्यवसायविषयत्वात् तथाविधसाक्षिविषयवत् इति ।। **तथाविधानुमानबाध इति** ।। व्यभिचारमाशङ्क्य निरस्यति ।। **नहीति** ।। इच्छाया असिद्धविषयकत्वनियमादृष्टेः सर्वत्र भविष्यत्वस्यानियमादिच्छाया अनुपनायकत्वाच्च नेच्छया निश्चायकत्वेन स्वज्ञानवेद्येत्यर्थः । आदिपदात्संशयः स तु संशयत्वादेवार्थसत्तानिश्चयत्वेन स्वानुव्यवसायवेद्य इति भावः ।

ननु व्यवसायस्यापि सदसदुभयविषयविषयकत्वदर्शनेन कथं तदनुव्यवसायेनापि सदसद्वैशिष्ट्यविषयकत्वेन गृह्यताम् । तथाचासिद्धिरित्यत्राह ।। **दोषशङ्केति** ।। व्यवसायत्वावच्छेदेन तथाग्रहणासम्भवेऽपि दोषजन्यत्वादिशङ्कानास्कन्दितसुखानुभवकरतलामलकादिज्ञानादौ सत्तयैव वैशिष्ट्यविषयकत्वमनुव्यवसायेन गृह्यत इत्यनुभवसिद्धम् । तथा च तस्यैव पक्षत्वात्तत्सिद्धिरिति भावः ।। **तेनापीति** ।। अभ्यासदशायां तथैवानुभवात् । साध्यसत्वात् न व्यभिचार इति भावः । यदि चेच्छाया अप्युपनायकत्वे सत्तया वैशिष्ट्यविषयकत्वेन तद्भानभास्यता तदा तदनुव्यवसाये सत्तया वैशिष्ट्यविषयकत्वमप्यस्तीति न व्यभिचार इत्यपि बोध्यम् । नाद्य इत्याह ।। **यदि चेति** ।। सव्यवधानत्वमात्रेण स्वविषयज्ञानविषयतया वैशिष्ट्यविषयकत्वमात्रेण सत्त्वनिश्चायकत्वं संशयविरोधिसंशयानात्मत्वं तथा च तथैव तद्धेतोर्व्यभिचार इति भावः ।

न्यायदीपः

।। **सिद्धमिति** ।। स्वातन्त्र्येण ज्ञानग्राहकग्राह्यत्वस्य स्वतस्त्वनिरुक्तावप्रवेशात् । सत्वेन तथात्वस्य सत्वाच्चेति भावः । नन्वर्थसत्वघटितस्यैव प्रामाण्यरूपत्वात्तस्यानुव्यवसायवेद्यता न प्राप्तेति भावेन शङ्कते

।। **नन्विति** ।। **श्रुतेति** ।। साक्षिणा श्रुतं तेनोच्चरितं वाक्यं साक्षिवाक्यं तस्येवेत्यर्थः .। गृहे घटोऽस्तीति श्रुणोमीत्यादिसाक्षिवाक्यस्येवेति यावत् । अन्यविषयतया व्यवसायविषयतयेत्यर्थः । व्यवसायो रजते रजतत्व-मस्तीत्याह नाहं तज्जानाम्यस्ति न वेत्येवं रूपतयेति भावः ।। **तद्घटि-तेति** ।। वैशिष्ट्यसत्वघटितेत्यर्थः । अनुव्यवसायो नार्थसत्वावधारणरूपः अन्यविषयतया तद्ग्राहकत्वात् श्रुतसाक्षिवाक्यवदित्युक्तं भवति । हेतोरप्रयोजकत्वं निराह ।। **नहीति** ।। अन्यविषयतया वैशिष्ट्यग्रहणेपि तत्सत्वावधारणरूपत्वमनुव्यवसायस्याविरुद्धमिति वक्तुं सामान्यन्यायं च वदन्नतिप्रसङ्गं निराह ।। **यत्रेति** ।। पक्षे तद्दर्शयति ।। **दोषेति** ।। दुष्टकरण-जन्यत्वशङ्का भ्रमत्वादिशङ्कादिनेत्यर्थः ।। **तथेति** ।। सत्वेनार्थविषयक-तयेत्यर्थः । तर्हि पूर्वोक्तस्थलेप्येवं स्यादित्यत आह ।। **गेह इति** ।। इच्छासंशयग्राहिणोऽसत्वेनार्थविषयकतया द्वारग्रहणबाधाद्गेहे घटज्ञानमित्ये-वोक्तम् । एतेनानुव्यवसायः सत्तयार्थविषयकः सत्वेनार्थविषयकतया व्यवसायविषयकत्वात् तादृशं यद्गेहे घटज्ञानमिति ज्ञानं श्रुतं साक्षिवाक्यं च तद्वत् । गेहे घटसंशय इत्यादिज्ञाने तु हेतोरेवाभावान्न व्यभिचार इत्युक्तं भवति । पूर्वपक्ष्युक्तो हेतुरप्रयोजक इत्याह ।। **यदि चेति** ।।

तर्कताण्डवम्

ननु तत्रार्थतथात्वघटितं प्रमात्वं गृह्णज्ज्ञानं घटसत्वं स्वातन्त्र्ये-णापि गृह्णातीति चेन्न । मम मतेऽनुव्यवसायस्यापि प्रामाण्य-ग्राहकत्वेनात्रापि स्वातन्त्र्यस्य सुवचत्वात् ।

अर्थसत्वनिश्चयत्वमात्रेण तद्घटितप्रामाण्यनिश्चयत्वोपपत्तौ स्वातन्त्र्यस्यानपेक्षितत्वाच्च । स्वतन्त्रादप्यनाशङ्कितदोषान्यद्वारा ग्राहकस्य

''ऋषिभिर्बहुधा गीतं छन्दोभिः विविधैः पृथक्''

''तदेतदृचाभ्युक्तम्''

इत्यादिवत् संवादेन आधिक्याच्च । एवं सत्यनुव्यवसायस्य धर्म्यंशेपि प्रामाण्यनिश्चयरूपत्वाभावापातेन तत्रापि कदाचित् सन्देहापाताच्च ।

युक्तिरत्नाकरः

।। **नन्विति** ।। प्रमापदजन्यत्वावच्छेदेनैवेत्यर्थः । तथा निश्चायकत्वेन साध्याभाववद्भेत्वभावसत्वान्न व्यभिचार इति भावः ।। **ममेति** ।। व्यवसायनिष्टस्य तद्वत्वघटितप्रामाण्यस्य ज्ञानवत्साक्षादेवानुव्यवसायविषयता न तु व्यवसायद्वारा परन्तु तद्वत्वस्य तदिन्द्रियायोग्यतया चाक्षुषज्ञान-सौरभ्यस्येवोपनीतस्य भानमात्रम् । इयांस्तु विशेषः । यदत्रोपनायकस्यापि सामग्रीसद्भावात्फलीभूतज्ञानविषयत्वात् । तत्र तु सामान्याभावात्तदविषय-तेति । तथा चासिद्धिरिति भावः ।

यद्वा ननु प्रमात्वग्राहकत्वस्य तत्रोभयसिद्धत्वादत एव हेतोः स्वातन्त्रेण तद्वत्त्वविषयकत्वं साध्य इत्याह ।। **नन्विति** ।। तर्हि प्रमाप्यनुव्यवसाये प्रामाण्यग्राहकत्वाभ्युपगमात्तत एव तत्साधनं सुशकमित्याह ।। **ममेति** ।। ननु मन्मते अनुव्यवसायस्य तथात्वेनान्यतः सिद्धहेतुना कथमुक्तसाध्य-सिद्धिस्तवेत्याशङ्क्य तर्हि गेहे घटप्रमेत्यत्रापि न तेन साध्यसिद्धिः । अर्थसत्वनिश्चयत्वमात्रप्रयोज्यतयोक्तहेतोः स्वातन्त्र्यसाधकत्वायोगात् इत्याह ।। **अर्थेति** ।। केचित्तु नन्वस्तूक्तरीत्या अनुव्यवसायस्यार्थसत्तानिश्चय-रूपत्वम् । तथापि न तस्य प्रामाण्यग्राहकता । तत्र स्वातन्त्र्यविशेषितार्थ-सत्त्वनिश्चयत्वस्यैव प्रयोजकत्वात् अनुव्यवसायस्य च तथात्वात् इत्याशङ्कागौरवान्न तत्र स्वातन्त्र्यविशेषणमित्याह ।। **अर्थेति** ।। एवमनु-व्यवसायस्य व्यवसायद्वारा तद्वत्त्वगोचरत्वमात्रेण तत्सत्तानिश्चायकत्वाभावो ।

न्यायदीपः

वैषम्यमाशङ्क्य प्रकृतेपि सममित्याह ।। **नन्वित्यादिना** ।। **स्वातन्त्र्येणापीति** ।। व्यवसायवदिति भावः ।। **सुवचत्वादिति** ।। व्यवसायनिष्ठस्य तद्वत्वघटितप्रामाण्यस्य ज्ञानत्ववत् साक्षादेव अनुव्यवसायविषयता । न तु व्यवसायद्वारा । परन्तु तद्वत्वस्य तदयोग्यतया चाक्षुषज्ञाने सौरभस्येवोपनीतस्य भानम् । इयांस्तु विशेषः । यदत्रोपनायकस्यापि सामग्रीसद्भावाज्ज्ञानविषयता । तत्र तु सामग्र्यभावात्तदविषयतेति भावः ।

एतेन यत्कैश्चिदुक्तं ''घटज्ञानवानहं'' ''अयं घट'' इत्यत्र वैलक्षण्यस्य सर्वसम्मतया तन्नियामकस्य उपनायकभानसामग्रीसमवधानतदसमवधानादेरवश्यकल्पनात् । यत्रोपनायकमपि भासते तत्रोपनेयांशे अस्वातन्त्र्यम् । अत एव सुरभि चन्दनमित्यत्र स्वातन्त्र्यम् । स्वातन्त्र्यञ्च ज्ञाननिष्ठं संशयादिविरोधितावच्छेदकमेव किञ्चित्फलबलकल्प्यम् । स्वरूपसम्बन्धविशेषविषयत्वात्'' इति । तन्निरस्तम् । स्वातन्त्र्येणोपनायकत्वेऽज्ञायमानत्वस्य प्रयोजकत्वे गौरवात् । गेहे घटप्रमेत्यादिशब्दस्थले प्रमात्वेन ज्ञायमानस्यापि स्वातन्त्र्येणोपनायकत्वाङ्गीकारेण व्यभिचाराच्च । गृहीतप्रामाण्यकज्ञानसमानविषयकज्ञानानुव्यवसायस्थले प्रमात्वेन ज्ञायमानस्यापि ज्ञानस्य स्वातन्त्र्येणोपनायकत्वाच्च ।

ननु विषयसत्तानियतसत्ताकज्ञानवृत्तिधर्माविशेषणत्वे सति ज्ञानविशेषणतया भानमेवास्वातन्त्र्यम् । तदभाव एव स्वातन्त्र्यमिति घटप्रमावानहमित्यादौ तथा भानेऽपि घटज्ञानवानहमित्यादौ न स्वातन्त्र्येण भानम् । तत्र शुद्धज्ञानविशेषणतयैव भानात् । अनुव्यवसायमात्रस्य प्रामाण्यविषयकत्वाविवादादित्यत आह ।। **अर्थसत्वेति** ।। ननु स्वातन्त्र्येणाभाने

कथमनुव्यवसायस्य प्रामाण्यसंशयादिविरोधिता । कथं वा निष्कम्पप्रवृत्ति-हेतुतेत्यत आह ।। **स्वतन्त्रादपीति** ।। अनाशङ्कितदोषेति बहुव्रीहिः । तद्रूपान्यद्वारेणेत्यर्थः । त्रयोदशे गीतायां क्षेत्रक्षेत्रज्ञस्वरूपं ''ऋषिभिर्बहुधा गीतम्'' इत्यनाशङ्कितदोषऋषिगानच्छन्दोरूपद्वारेण अर्थग्राहकस्य कृष्ण-वाक्यस्याधिक्यं तथा निर्दोषऋग्द्वारेणार्थग्राहकस्य च्छान्दोग्याद्युपनिषद्वाक्यस्य यथाधिक्यं तथेत्यर्थः ।

स्वातन्त्र्यस्य अनपेक्षितत्वादित्यत्र विपक्षे बाधकं चाह ।। **एवंसतीति** ।। अर्थसत्वनिश्चयमात्रेणैव संशयादिविरोधितारूपप्रामाण्यनिश्चयत्वोपपत्तावपि स्वातन्त्र्याभावेन तदभाव इत्यर्थः ।

यद्वा स्वातन्त्र्याभावेऽर्थसत्वनिश्चयरूपतैव न युक्तेत्यत आह ।। **एवंसतीति** ।। सव्यवधानत्वमात्रेण सत्वानिश्चायकत्व इत्यर्थः । धर्म्यंशे रजतादिरूपेदमंश इत्यर्थः ।

तर्कताण्डवम्

ननु धर्मिणस्सदेकरूपत्वात्तत्रासंशय इति चेत् । कोर्थः? किं साधारणधर्मज्ञानं नास्तीति किं वा विशेषदर्शनमस्तीति? नाद्यः । प्रतीतिविषयत्वस्य सदसत्साधारण्यात् । अन्त्ये धर्मित्वस्य सदेक-निष्ठत्वेन विशेषत्वेऽपि तस्य सत्वानिश्चये कथं संशयविरोधिता । न हि सन्दिग्धसत्ताकः करादिः पुरुषत्वसंशयविरोधी ।

अपिचैवं त्वदीये अयं वह्नयनुभवः प्रमा, नाप्रमा वा दाहसमर्थ-विशेष्यकत्वे सति वह्नित्वप्रकारकनिश्चयत्वात् व्यतिरेकेणाप्रमावादिति प्रामाण्यानुमाने दाहसामर्थ्यवद्विशेष्यकत्वे सतीति विशेषणस्य केन सिद्धिः । तद्धि न तावद्दाहसमर्थोऽयमिति व्यवसायेन सिद्धम् ।

[1]व्यवसायविषयतया विशेष्यस्य विशेष्यत्वस्य तदविषयत्वात् । नाप्यनुव्यवसायेन । बहिरर्थे दाहसामर्थ्ये मनसोऽसामर्थ्यात् ।

युक्तिरत्नाकरः

।। **सदेकरूपत्वादिति** ।। सदिति भावप्रधानः । एकशब्दः कैवल्यवाची । सत्तामात्रकस्वस्वभावत्वादित्यर्थः । ज्ञानधर्मित्वस्य सत्वव्याप्यत्वादिति यावत् । तथा च ज्ञानधर्मिकस्य सत्वासत्वकोटिद्वयसाधारण्याभावात् सत्वकोटित्वव्याप्यत्वाच्च विकल्पावकाशः प्रतीतिर्न हि ज्ञानधर्मित्वमेव साधारणधर्मासाध्यसंशयेन भाव्यमिति निर्बन्धहेतुरस्तीति भावः । विशेषत्वेऽपि व्याप्यत्वेऽपि । सन्धिग्धसत्ताकः अनिश्चयसत्ताकः सत्त्वनिश्चयेन धर्मिणि सत्त्वानिश्चयेन विज्ञानधर्म्यनुव्यवसायावसेयव्यवसायोपनीते तस्य सत्वानिश्चयरूपत्वस्यैव त्वयोररीकारात् । तदन्यस्य ज्ञानधर्मिनिश्चायकस्य तत्राप्रसरादिति भावः । इदमुपलक्षणम् । ज्ञानधर्मित्वे सत्वव्याप्यत्वावगमनियमाच्च इत्यपि बोध्यम् । यद्यपि प्रकारांश इव धर्म्यंशेऽपि प्रामाण्यसंशयापादनमेव युक्तम् । न तु धर्मिणि सत्वासत्वकोटिकसंशयापादनं तथापि तदापादने नैय्यत्यादिष्टापत्तिमपि कश्चित् ब्रूयात् अतस्तदा हि तद्धर्मिसत्तासंशयोऽपि स्यादिति न तावत्पर्यन्तं धावनम् । व्यवसायविषयरजतत्वविशिष्टस्यानुव्यवसायाविषयत्वे दोषान्तरमाह ।। **अपि चेति** ।। स एव चैवं शब्दार्थः । वह्निनिर्विकल्पके तद्भ्रमे च बाधादाह ।। **अयमिति** ।। वस्तुतो वह्नित्वप्रकारकप्रमाव्यक्तिविशेष्य इत्यर्थः । प्रमा वह्नित्ववति वह्नित्वप्रकारकव्यतिरेकि एव भावरूपसाध्यके साध्याप्रसिद्धिर्न दूषणं साध्याभावस्य भावतया तत्र साधनाभावनिरूपितव्याप्तेः साध्यानुपस्थितावप्यवगमसम्भवात् । साध्यविशेष्यकायाः अप्यनुमितेः सम्भवनविशेषणज्ञानस्यापि तदुपस्थित्य-

---

१. "व्यवसायविषयताविशेषस्य विशेष्यत्वस्य" इति पाठान्तरम् ।

नपेक्षणात् । भावसाध्यके तु साध्याभावे व्याप्तिग्रहार्थं प्रतियोगितया साध्योपस्थितेरवश्यवाच्यतया प्रमात्वाप्रसिद्धेर्व्यतिरेकनिरूपणासम्भवात् ।। [1]**न प्रमेति** ।। अप्रमात्वं वह्नित्वाभाववद्विशेष्यकत्वे सति वह्नित्व-प्रकारकत्वम् । तत्र विशेषणाभावमात्रम् ।

ननु विशेषणाभावेऽपि व्यतिरेकं व्यतिरेकव्याप्तौ साध्याभावस्य व्याप्यतया नीलधूमत्वादित्यत्रैव व्यर्थविशेष्यत्वापातात् । अप्रामाण्यस्य भावरूपतया-खण्डाभावे वैय्यर्थ्यमित्यस्याप्यभावात् । न चैवमप्रामाण्याभावसिद्धिः । वह्नित्वाभाववद्विशेष्यकत्वाभावस्य वह्नित्वप्रकारकानुभवे साधनेनैवाप्रामाण्या-भावसिद्धिः । ननु वह्निप्रत्यक्षस्य रूपादिविशेष्यकत्वात् विशेषणाभावमात्र-साधने बाधः शाब्दादितदनुभवपक्षीकारे तूदाहृते वह्न्यनुभवे व्यभिचारः । वह्न्यवह्निसमूहालम्बने व्यभिचारात् न विशेष्यापादनेऽपि तद्दोषतादवस्थ्यम् । तदुपादाने वह्नित्वप्रकारत्वादौ तदभाववद्विशेष्यकत्वाभावलाभेनोक्त-व्यभिचारवारणादिति च । वह्न्यनुभवेऽपि यदंशे हेतुसत्वं तदंशे साध्यस्यापि सत्वे बाध्यस्यापि व्यभिचारयोरप्रसङ्गात् । वह्निगुञ्जापुञ्जयोरिमौ वह्नीति समूहालम्बने गुञ्जापुञ्जविषयकत्वावच्छेदेन वह्नित्वाभाववद्विशेष्यकत्वे व्यभिचारवारणायोक्तविवक्षाया आवश्यकत्वादिति इत्यत आह ।। **स्वार्थेति** ।। सत्यन्तम् गुञ्जापुञ्जयोर्वह्निभ्रमे व्यभिचारवारणाय । वह्नावियं गुञ्जेति भ्रमेना-वह्निवृत्तिप्रकारक इति साध्याभावेन व्यभिचारवारणाय वह्नित्वप्रकारक इति । न चैवमपि वह्नावियं गुञ्जा वह्निर्वेति संशये व्यभिचारः । निश्चयत्वस्यापि हेतौ प्रवेशनीयत्वादिति भावः । वह्निभाववद्विशेष्यकत्वाभावादिसाध्ये तु तदाह ।। **समर्थविशेष्यकत्वे सति वह्निप्रकारकनिश्यत्वाद्वेति** ।। हेतुद्वये तात्पर्यम् । निश्चयत्वं च विरुद्धाप्रकारकत्वम् । तेन गुञ्जापुञ्जायामयं वह्निरिति भ्रमानन्तरं गुञ्जावृत्तीदंत्वविरुद्धवह्नित्वप्रकारके भ्रमे न द्वितीयहेतौ

---

१. ''नाप्रमेति'' इति स्यात् ।

व्यभिचारः । न चैवमपि गुञ्जामयं वह्निरिति भ्रमानन्तरं तद्भ्रमताकगुञ्जा-विशेष्यकवह्नित्वप्रकारकस्मरणे व्यभिचारः । निश्चयपदेन तादृक्प्रत्यक्षत्वस्य विवक्षितत्वात् । प्रत्यक्षे च गुञ्जापुञ्जवृत्तीदंत्वभाननियमेन निश्चयपदेन तद्वारणात् ।

यद्वा दाहसमर्थविशेष्यकत्वदाहसमर्थविशिष्टविषयत्वं, तच्च वह्नित्वाभाव-वद्गुञ्जाविशेष्यके वह्नित्वप्रकारकनिश्चये व्यवसाये वह्नावत्र वह्निवृत्तिनिश्चयेत्र वह्नित्वं तदभावो वेति संशये व्यवसाये वह्नित्वप्रकारकनिश्चयपदमित्येकम् । हेतुत्वपक्षेऽपि नानुपपत्तिः । इह वह्नित्वसमावाय इति ज्ञानादौ व्यभिचारनिरासस्तु दाहसमर्थविषयप्रयत्नजनकत्वे सतीत्येतद्धेतुव्याख्यानावसरे वक्ष्यत इति संक्षेपः ।। **तद्धीति** ।। यस्य व्यवसायस्य दाहसामर्थ्य-परिच्छेदसामर्थ्यं न तस्य व्यसायनिष्ठतद्विशेष्यकत्वपरिच्छेदे सामर्थ्यम् । यस्य चानुव्यवसायस्य तद्विशेष्यकत्वपरिच्छेदसामर्थ्यं न तस्य दाहसामर्थ्यपरिच्छेदेनेत्युपपादयितुमयं विकल्प इति बोध्यम् ।। [1]**न व्यवसा-येति** ।। व्यवसायनिरूपितविषयताविशेष्यस्येत्यर्थः । नह्यावयोर्व्यवसायस्य स्वप्रकाशकता येन व्यवसायेऽपि तद्ग्रहः स्यादिति भावः ।

न्यायदीपः

धर्म्यंशेपि संशयानुत्पादो नार्थसत्वघटितप्रामाण्यनिश्चयरूपत्वेन ''इदन्त्वरजतत्ववैशिष्ट्यम् पुरोवर्तिनो नानुव्यवसायवेद्य''मिति **मण्युक्तेः** । ''स्वातन्त्र्येण इति शेष'' इति **पक्षधरोक्तेः** । किन्त्वन्यथैवेति शङ्कते ।। **नन्विति** ।। **सदेकेति** ।। पुरतः सन्नेव धर्मी नत्वसन्निति धर्मिणः सत्वा-व्यभिचारान्न तत्र सन्देहो न तु तदंशे प्रामाण्यनिश्चयत्वसत्वेनेत्यर्थः ।। **सदसदिति** ।। पुरतो सदित्यर्थः । मन्मते त्वसन्मात्रेत्यर्थः ।। **विशेषत्वे-**

१. ''व्यवसायेति'' इति स्यात् ।

पीति ।। तथा च तद्दर्शनमात्रं न विशेषदर्शनं किन्तु तद्वैशिष्ट्यसत्व-दर्शनमेवेति तस्य च तत्राभावे कथं तत्र न संशयः स्यादिति भावः ।। **तस्येति** ।। धर्मित्ववैशिष्ट्यस्येत्यर्थः । तथा च धर्मित्वरूपेदन्त्व-वैशिष्ट्यांशेऽनुव्यवसायस्य तत्सत्तानिश्चयत्वरूपप्रामाण्यनिश्चयत्वाभावे धर्म्यंशेपि संशयः स्यादेवेति भावः । सत्वानिश्चयेपि संशयनिवृत्तिरस्त्वित्यत आह ।। **न हीति** ।। **सन्दिग्धसत्ताकः** ।। अनिश्चितसत्ताक इत्यर्थः । यद्वा तत्सत्वानिर्णये तत्सत्वेऽपि सन्देहः स्यात् । ततश्च धर्मिसन्देह इति भावेनायं ग्रन्थो योज्यः ।

एवमिदन्त्ववैशिष्ट्यांशे तत्सत्तानिश्चयत्वरूपं प्रामाण्यनिश्चयत्वमनु-व्यवसायस्य धर्म्यंशे स्वतः प्रामाण्यमुपपाद्य ''ननु व्यवसायस्येदन्त्वरजतत्व-विशिष्टेदंविषयकत्वेऽनुव्यवसाय एव मानम्'' इत्यादिना धर्म्यंशदृष्टान्तेन शङ्कितस्वतःप्रामाण्यस्य ''मैवम्'' इत्यादिना ''न स्वतः प्रामाण्यग्रहः'' इत्यन्तेन **मण्युक्त**खण्डनं निरस्येदानीं ''ननु वह्निज्ञानस्य दाहसमर्थविषयकत्त्वं न दाहसमर्थोऽयमिति व्यवसायग्राह्य''मित्यादिना शङ्कितस्य ''उच्यत'' इत्यादिना यत्समाधानमुक्तं तत्समानन्यायेन अन्यत्राप्यनुव्यवसायस्य स्वतः प्रामाण्यं व्यनक्ति ।। **अपि चैवमिति** ।। सव्यवधानत्वमात्रेणार्थसत्त्व-निश्चयरूपत्वाभाव इत्यर्थः ।

।। **त्वदीय इति** ।। प्रामाण्यानुमान इत्यन्वयः । मणिकृदुक्त इत्यर्थः । प्राचीनरीत्याह ।। **प्रमेति** ।। ''प्रथममप्रामाण्याभाव एव प्रामाण्यं व्यतिरेकिणा साध्यम्'' इति **मणि**कृदुक्तेराह ।। **नाप्रमा इति** ।।

।। **व्यवसायेति** ।। विशेष्यस्य व्यवसायविषयत्वाद्धेतोः विशेष्यत्वस्य व्यवसायाविषयत्वादित्यर्थः । क्वचिद्व्यवसायविषयताविशेषस्य विशेष्य-त्वस्येति पाठः । तदा तु न क्लेशः । धर्मधर्मिवैशिष्ट्यानां व्यवसायविषयत्वेन

धर्मे वैशिष्ट्ये चाविद्यमानो धर्मिमात्रनिष्ठो विषयत्वविशेष इत्यर्थः । ''व्यवसायतद्विषयतयोस्तदविषयत्वात्'' इति **मणि**वाक्यनिष्कृष्टार्थस्यायमनुवादः ।। **बहिरर्थ इति** ।। दाहसामर्थ्यवैशिष्ट्यरूप इत्यर्थः ।। **असामर्थ्यादिति** ।। पूर्वोक्तदिशा सामर्थ्यवैशिष्ट्यग्रहण एव वा वैशिष्ट्यग्रहणशक्तावपि स्वातन्त्र्येण तद्ग्रहणे वाऽसामर्थ्यादिति भावः ।

तर्कताण्डवम्

ननु स्मृत्युपनीते व्यवसाये स्मृत्युपनीतं यद्दाहसामर्थ्यं तद्वद्विशेष्यकत्वं मनसा परिच्छिद्यते । नचैवं स्मृत्युपनीते व्यवसाये स्मृत्युपनीतं यद्रजतत्वं तद्वद्विशेष्यकत्वमपि मनसा परिच्छद्यताम्, तथा च प्रामाण्यस्य स्वतस्त्वं स्यादिति वाच्यम् । मनसैवं प्रामाण्यग्रहेऽपि प्रथमानुव्यवसायेनागृहीततया यावज्ज्ञानग्राहकसामग्रीग्राह्यत्वस्य तज्ज्ञानविषयकज्ञानानपेक्षज्ञानग्राह्यत्वस्य चाभावेन परतस्त्वाहानेरिति चेत् हन्तैवं पाश्चात्यस्मृत्युपनीते दाहसामर्थ्ये मानसज्ञानमिव प्राथमिकव्यवसायोपनीते रजतत्ववैशिष्ट्येऽनुव्यवसाय एव सत्तानिश्चयरूपः अस्तु । अविशेषात् । त्वत्पक्षे व्यवसायस्य यथार्थत्वेन स्मृतितोऽविशेषाच्च । अनुमितौ प्रामाण्यनियतस्य धूमवति वह्निमत्वज्ञानत्वस्यानुव्यवसायेन गृहीतत्वान्न तत्राप्रामाण्यशङ्केति वदता त्वया लिङ्गोपहितलैङ्गिकविषयानुमितिरूपव्यवसायोपनीते धूमवत्वेऽनुव्यवसायस्य सत्तानिश्चयरूपत्वाङ्गीकाराच्च ।

युक्तिरत्नाकरः

।। **स्मृत्युपनीत इति** ।। अयं वह्निरिति व्यवसायगोचरानुव्यवसाय [1]इत्यस्मृत्युपनीते तस्मिन् व्यवसाये दाहसमर्थोऽयमिति व्यवसायनिरूपित-

विषयताविशेष्यकत्वं वह्निरित्यनुभवो दाहसमर्थविशेष्यको ममवृत्त इति मनसा परिच्छिद्यत इत्यर्थः । यथाकथञ्चित् अनुव्यवसायवेद्यत्वमेव स्वतस्त्वमिति भ्रान्तशङ्कां निषेधति ।। **न चेति** ।। प्रकृतव्यवसायस्य तदर्थतया तदुपनीतमेव तद्वत्त्वं मनसा परिच्छेत्तुं युक्तं न तु स्मृत्युपनीतं तस्या अयाथार्थ्यादित्याह ।। **त्वत्पक्षे इति** ।। इदं च प्राचीनमतानुसारेण । अन्यथा तद्वति तत्प्रकारकानुभवः प्रमेति प्रमालक्षणेऽनुभवपदवैय्यर्थ्यापातात् । निरस्तसमस्तविभ्रमांशकस्यानुमानस्य प्रामाण्यं स्वत एवेति वैशम्यापत्तेः । किन्तु वह्निमति वह्नित्वप्रकारकत्वाद्यनुमितिप्रामाण्ये कदापि न संशयः । तद्व्याप्यस्य धूमवद्विशेष्यकत्वे सति वह्निप्रकारकत्वरूपस्य तदनुव्यवसायेन परिच्छेदाभ्युपगमात्तद्विरोधश्च स्यादित्याह ।। **अनुमितावि ति** ।। ननु अनुमित्यविषयस्य धूमवत्वस्य कथं तया तदनुव्यवसाये उपनय इत्यत उक्तम् ।। **लिङ्गोपहितेति** ।। परामर्शोपनीतस्यानुमितौ भानात्तदुपनयो युक्त एवेति भावः ।

न्यायदीपः

।। **स्मृतीति** ।। अयं वह्निरिति व्यवसायविषयकानुव्यसायजन्य-**स्मृत्युपनीते** अयं वह्निरिति **व्यवसाये,** दाहसमर्थोऽयमिति व्यवसायजन्य-**स्मृत्युपनीतं यद्दाहसामर्थ्यवत्वं, तद्वद्विशेष्यकत्वं** वह्निरित्यनुभवो दाहसामर्थ्यवद्विशेष्यको मम वृत्त इति **मनसा परिच्छिद्यत** इत्यर्थः । तुल्य-न्यायत्वात् प्रामाण्यांशेऽप्याशङ्क्चेष्टापत्या निराह ।। **न चैवमिति** ।। दाहसामर्थ्यवद्विशेष्यकत्वग्रह इत्यर्थः । इदं रजतमिति व्यवसायविषयकानु-व्यवसायजन्यस्मृत्युपनीते तस्मिन्व्यवसाये इत्यादिरूपेण पूर्ववद् व्याख्येयम् ।

।। **एवमिति** ।। पञ्चमानुव्यवसायेनेत्यर्थः ।। **ज्ञानानपेक्षेति** ।।

१. ''जन्यस्मृत्युपनीते'' इति स्यात् ।

पश्चमानुव्यवसायस्य च तादृशज्ञानसापेक्षत्वादिति भावः । हन्तेति हर्षे । पाश्चात्या या स्मृतिः तदुपनीत इत्यर्थः ।। **पाश्चात्येति** ।। प्राथमिकेति हेतुगर्भम् ।। **दाहसामर्थ्ये** ।। दाहसामर्थ्यवत्व इत्यर्थः ।। **मानसज्ञानमिवेति** ।। अनुव्यवसाय इवेत्यर्थः । पारतन्त्र्येण तद्विषयतोपगमादिष्टापत्तिनिरासायाह ।। **सत्तानिश्चयेति** ।।

नन्विन्द्रियस्यायं स्वभावो यदुपनीतमुपनीतान्तरवृत्तित्वेनैव गृह्णातीति चेन्न । सुरभि चन्दनमिति चाक्षुषज्ञानानुपपत्तेः । मनसस्तथास्वभाव इत्यस्यापि मानाभावेनायुक्तत्वात् । संशयानुपपत्तिरेव मनसस्तादृशस्वभावकल्पिकेति चेन्न । [१]तस्या अन्यथोपपादयिष्यमाणत्वात् । निमीलितनेत्रस्यापि ''अहं गौर'' इत्यादिप्रत्ययानापत्तेश्चेति भावेनाह ।। **अविशेषादिति** ।। वैपरीत्यमेवोचितमित्याह ।। **त्वत्पक्ष इति** ।। **व्यवसायस्येति** ।। अनाशङ्कितदोषत्वात् ग्राह्यप्रामाण्याश्रयव्यवसायस्येति भावः ।

ननूपनीतं तद्वत्वं उपनीतवृत्तित्वेन गृह्यत इति कल्प्यत इत्यतोऽयमपि नियमो नेत्याह ।। **अनुमिताविति** ।। अनुमितौ कदापि प्रामाण्यसन्देहाभावेन तत्र प्रामाण्यं स्वत इति प्राचीनमतं दूषयता सर्वत्र परतस्त्ववादिना **मणि**कृताऽनुमितौ प्रामाण्यशङ्काभावो न प्रामाण्यनिश्चयनिबन्धनोऽपितु तत्प्रामाण्यव्याप्यस्य धूमवद्विशेष्यकत्वे सति वह्निप्रकारकज्ञानत्वस्य यज्ज्ञानं तन्निमित्तक एवेति वदता त्वयेत्यर्थः । तदभियुक्तव्याख्यानानुरोधेनाह ।। **लिङ्गोपहितेत्यादि** ।। परामर्शोपनीतव्याप्ययुक्तव्यापकविषयकधूमवत्पर्वतोऽग्निमानित्येवंरूपेत्यर्थः ।

---

१. 'तस्य' इति पाठान्तरम् ।

तर्कताण्डवम्

न च दाहसामर्थ्ये संस्कार एव प्रत्यासत्तिः । स च निर्विषयक इति न तद्विषयतया भानम् । इह तु प्रत्यासत्तीभूतो व्यवसायः सविषयक इति वैषम्यमिति वाच्यम् । संस्कारे सत्यप्यस्मृति-दशायामुक्तमानसज्ञानाभावात् ।

ननु मानसज्ञानस्य दाहसमर्थ एव मम वह्नित्वप्रकारकं ज्ञानं वृत्तमित्याकारत्वेन तत्र दाहसामर्थ्यं वह्निनिष्ठमेव भाति । न तु स्मृतिविषयतया । स्मृतिस्तु प्रत्यासत्तिमात्रम् । अनुव्यवसायस्य तु पुरोवृत्तिविशेष्यकं रजतत्ववैशिष्ट्यावगाहिज्ञानं वृत्तमित्याकारत्वेन ज्ञानविषयत्वेनैव वैशिष्ट्यं विषयः । न तु पुरोवृत्तिनिष्ठत्वेनेति वैषम्यमिति चेन्न । तत्रापि दाहसमर्थ एवेति विषयसप्तम्याऽतीत-व्यवसायविषयत्वेनैव दाहसामर्थ्यस्य भानात् । अत्रापि सुखज्ञानस्य दोषशङ्कादिरहितस्तम्भादिज्ञानस्य च प्राथमिक एवानुव्यवसाये मम सुख एव सुखत्वेन ज्ञानं वृत्तं स्तम्भ एव स्तम्भत्वेन ज्ञानं वृत्तमित्याकारदर्शनाच्च ।

युक्तिरत्नाकरः

ननु दाहसामर्थ्यवद्विशेष्यकत्वरूपहेतोर्मनसा परिच्छेदो युक्तः । दाहसामर्थ्यस्य निर्विषयकसंस्कारोपयुक्तनीततया स्वातन्त्रेण तद्भानाद्रज-तत्वविशेष्यकत्वस्यानुव्यवसायेन परिच्छेदो युक्तः । रजतत्वस्य व्यवसायविषयतयैव भानेन स्वातन्त्र्येण भानाभावादिति वैशम्यमाशङ्क्य निषेधति ।। **न चेति** ।। न च निर्विषयकस्य कथमुपनायकत्वं प्रत्यासत्तित्वेनैतस्य हेतुत्वान्निर्विषयकस्यापि चक्षुषा संयोगादि-

वत्प्रत्यासत्तित्वसम्भवादिति भावः । अन्वयव्यतिरेकाभ्यां स्मृतेरेव प्रत्यासत्तित्योक्तदोषसाम्यमित्याह ।। **संस्कार इति** ।।

ननु दाहसामर्थ्यस्य स्मृत्युपनीतत्वेऽपि स्मृतेस्तटस्थतयैवोपनायकत्वात्तस्य स्वातन्त्र्येण भानं युक्तम् । रजतत्ववत्त्वस्य तु स्वविषयव्यवसायविषयतयैवानुव्यवसाये भानात्पुरोवर्तिनिष्ठरजतत्ववैशिष्ट्यमिव स्वातन्त्र्येण भानमिति वैषम्यं शङ्कते ।। **नन्विति** ।। **तत्रापीति** ।। दाहसमर्थस्य विषयत्वं तावद्विषयीकरोति । सप्तम्यर्थोल्लेखाद्विषयत्वातिरिक्तस्य तत्रासम्भवात् । तच्च विषयत्वं अयं वह्निरिति व्यवसायनिरूपितं चेद्दाहसामर्थ्योल्लेखासम्भवाद्दाहसमर्थोऽयमिति व्यवसायोपनीतमेवाङ्गीकार्यम् । एवं च ज्ञानविषयतया पारतन्त्र्येणैव विषयीकरणात्तस्यापि सत्तानिश्चयरूपत्वं न स्यादित्यर्थः । न चोक्तानुव्यवसाये वह्नित्वप्रकारकज्ञानविषयत्वसत्वेन भासमानपुरोवर्तिनिष्ठत्वेनैव स्मृत्युपनीतं दाहसामर्थ्यं भाति न तु दाहसामर्थ्येऽपि विषयत्वभानम् । येनातीतज्ञानविषयतया भानादिति वाच्यम् । [१]दाहसमर्थविषयवह्नित्वप्रकारमिति दाहसामर्थ्यविशिष्ट एव विषयत्वानुभवादिति भावः । यदि च दाहसमर्थ एवेत्याकारकप्रदर्शनमात्रेण ज्ञानविषयत्वेनाभ्युपगमः तदा प्राथमिकानुव्यवसायेऽपि तादृगाकारदर्शनेन तद्वत्वस्यापि तथाभाने स्वतस्त्वमक्षतमेवेत्याह ।। **अत्रापीति** ।। **स्तम्भ एवेति** ।। न च पूर्वस्तम्भादिज्ञाने प्रामाण्यानुमितौ सत्यां तदुपनीतमेव अनुव्यवसायेन तद्वत्वं भाति नत्वेतद्व्यवसायोपनीयतमेव स्वतन्त्र्येण भातीति वाच्यम् । प्रत्यग्रोत्पन्नकरतलामलकादौ प्राक्प्रामाण्यनिश्चयेऽपीदमामलकमेवामलकत्वेन जानामीत्यनुव्यवसायानुभवादिति भावः ।

---

१. "दाहसमर्थे विषये वह्नित्वं प्रकारः" इति स्यात् ।

न्यायदीपः

ननु पञ्चमानुव्यवसाये प्रत्यासत्तीभूतान्याविषयतयार्थस्य भानेन तस्यार्थसत्तानिश्चयरूपत्वेपि प्रथमानुव्यवसाये तादृशान्यविषयतया तद्वत्व-रूपार्थस्य भानान्न तत्सत्तानिश्चयरूपत्वमतः अविशेषादित्युक्तहेतुरसिद्ध इत्याशङ्क्य निराह ।। **नचेति** ।। दाहसामर्थ्ये दाहसामर्थ्यत्वत्त्व इत्यर्थः ।। **संस्कार एवेति** ।। दाहसमर्थोयमिति प्राचीनव्यवसायजन्यसंस्कार एव न तु तज्जन्यस्मृतिरित्यर्थः ।

यद्यपि स्मृतेः प्रत्यासत्तित्वेऽपि तस्याः सुरभिचन्दनमित्यादौ सौरभादि-ज्ञानस्येव ताटस्थ्येनैव तथात्वान्नैतच्चोद्यावकाशः । तथाऽपि सविषयकत्वा-त्सम्भावितत्वाभिप्रायेणैतच्चोद्यमपि शङ्कोत्थानदाढ्यर्थं कृतमिति ध्येयम् ।

।। **भानमिति** ।। पञ्चमानुव्यवसाये दाहसामर्थ्यवत्वस्य संस्कार-विषयतया न भानमित्यर्थः ।। **इहत्विति** ।। प्रथमानुव्यवसाय इत्यर्थः ।। **अस्मृतिदशायमिति** ।। अत एव त्वयापि ''प्राग्भवीयसंस्कारात्स्मृतं प्रामाण्यं वह्निज्ञानादौ साध्यमानम्'' इत्याद्युक्तम् । एतच्चोपलक्षणं यदसाधारणं कारणमासाद्य मनो बहिर्गोचरां प्रमां जनयति तन्मानान्तरमिति व्याप्तेः संस्कारस्य मानान्तरत्वापत्तेश्चेत्यपि ध्येयम् ।

स्मृतेः प्रत्यासत्तित्त्वेप्यविशेषादिति हेतुरसिद्ध इति भावेन शङ्कते ।। **नन्विति** ।। **तत्रापीति** ।। पञ्चमानुव्यवसायेपीत्यर्थः ।। **दाहसामर्थ्यस्य** ।। दाहसामर्थ्यवत्वस्येत्यर्थः । अत्रापीत्यस्यैव विवरणं ।। **प्राथमिक एवानुव्यवसाय इति** ।।

तर्कताण्डवम्

ननु तथापि तत्र यस्य व्यवसायस्य विषयतया दाहसामर्थ्यं भाति स न प्रत्यासत्तिः । या तु स्मृतिः प्रत्यासत्तिर्न तद्विषयतया तद्भाति इह तु वैशिष्ट्यं प्रत्यासत्तीभूतव्यवसायविषयतया भातीति चेन्न । अन्यविषयतया ग्रहणे श्रुतसाक्षिवाक्यसाम्येऽविशिष्टेऽस्य वैधर्म्य-मात्रत्त्वात् । तस्मात्प्रामाण्यग्रहणे साक्षी समर्थ इति । एतदप्युक्तं "अन्यथा" इत्यादिना । साक्षी धर्म्यंश इव वैशिष्ट्यांशेपि सत्ता-निश्चयरूपो न चेदस्य व्यवसायस्येदं वैशिष्ट्यं विषय इत्यादिलोक-सिद्धव्यवस्थित्ययोगादित्यर्थः ।।

युक्तिरत्नाकरः

।। **वैयत्येति (वैशिष्ट्येति)** ।। प्रत्यासत्तिभूते ज्ञानविषयत्वभानं तदभावश्चेत्येतयोर्व्यक्त्योर्व्यावर्तकमेव न तु सत्तानिश्चयरूपत्वस्य तदभावयोः प्रयोजकमित्यर्थः ।। **तस्मादिति** ।। अनुव्यवसायस्य वैशिष्ट्यांशेऽपि सत्तानिश्चयरूपत्वस्य समर्थितत्वात् तद्घटितप्रामाण्यबाधने अनुव्यवसाययोग्य इत्यर्थः ।। **एतदपीति** ।। प्रामाण्यं च स्वत एव साक्षिणाऽवधार्यत एव । नेति पदं द्रष्टव्यम् । किं साक्षी प्रामाण्यघटकं तद्वत्वं गृह्णन्नपि सत्तानिश्चयरूपो भवति उत तद्वत्वमेव न गृह्णातीति । नाद्य इत्याह ।। **अन्यथेति** ।। धर्म्यंशवद्वैशिष्ट्यांशेऽपि सत्तानिश्चयरूपदाह-सामर्थ्यवद्विशेष्यकत्वरूपाद्धेतोरवस्थानसिद्धिर्न स्यादित्यर्थः ।

द्वितीयेऽप्याह अन्यथावस्थानादिति तत्वतद्वत्वस्य साक्ष्यविषयत्वे व्यवसायस्य तद्वत्वविषयकत्वसिद्धिरूपा व्यवस्था न स्यात् । अनुव्यवसायातिरिक्तस्य ममत्वस्य तत्रासम्भवादिति भगवत्पादीयवाक्य-स्यार्थद्वयं हृदि निधायाद्यपक्षे अन्यथाशब्दार्थमाह ।। **धर्म्यंश इति** ।। अत्र

च दाहसमर्थेत्यादिहेतुसिद्धिर्न स्यादिति अध्याहृत्य योजनीयम् । द्वितीये त्वनवस्थानादित्यस्यार्थमाह ।। **व्यवसायस्येति** ।। अत्र चानुव्यवसायस्य वैशिष्ट्यविषयकत्वे इत्यापादनमध्याहृत्य योजनीयम् ।।

।। इति स्वतस्त्वानुमानेषु बाधोद्धारः ।। ४ ।।

न्यायदीपः

प्रकारान्तरेण वैषम्यमाशङ्क्य निराकरोति ।। **ननु तथापीत्यादिना** ।। **तत्रेति** ।। पञ्चमानुव्यवसाय इत्यर्थः ।। **इह त्विति** ।। प्राथमिकानुव्यवसाय इत्यर्थः । अविशिष्ट इति विभागः ।

।। इति स्वतस्त्वानुमानेषु बाधोद्धारः ।। ४ ।।

स्वतस्त्वे संशयोपपादनम्

ननु तथापि स्वतस्त्वेऽनभ्यासदशायां संशयो न स्यात् । ज्ञानग्रहे प्रामाण्यग्रहात् । अग्रहे च धर्मिज्ञानाभावादिति चेन्न । असति प्रतिबन्धे साक्षिवेद्यत्वनियमो वा साक्षिवेद्यत्वयोग्यता वा स्वतस्त्वमित्युक्तम् । अप्रामाण्यसंशयस्थले च प्रामाण्यग्रहणशक्तिप्रतिबन्धिकाऽप्रामाण्यग्रहणसामग्रीसमवहितैव । अन्यथाऽप्रामाण्यसंशयायोगात् । एवं च ज्ञानं गृह्णता साक्षिणा शक्तिप्रतिबन्धात् प्रामाण्याग्रहणेऽप्यस्मदुक्तस्वतस्त्वाहान्या स्वतस्त्वपक्षेऽपि धर्मिज्ञानस्य प्रामाण्यानिश्चयस्य च सम्भवेन संशयो युक्त एव । न हि ज्ञानत्वप्रमात्वग्रहणशक्त्योरेकप्रतिबन्धकप्रतिबध्यत्वमपि स्वतस्त्वान्तर्गतम् ।

युक्तिरत्नाकरः

उक्तानुमाने प्रतिकूलतर्कपराहतिं शङ्कते ।। **नन्विति** ।। **तथापि** उक्तरीत्या बाधोद्धारेपि । अनभ्यासदशायां सजातीयविजातीयसंवादाभाव-दशायामेतच्चापाद्यस्यानिष्टत्वस्य ज्ञापनाय । तथा च प्रामाण्यं यदि स्वाश्रयग्राहकेण नियमेन ग्राह्यं स्यात् न तदा सन्दिग्धेत । न चेष्टापत्तिः । अनभ्यासदशायां तस्यानुभवसिद्धत्वादित्यर्थो लभ्यते । तदुपपादयति ।। **ज्ञानग्रहे इति** ।।

ज्ञानग्रहेऽपि प्रामाण्यग्रहे च न स्वतस्त्वमिति भावः । **अग्रहे** ज्ञानस्य ।। **असतीति** ।। आद्यस्वतस्त्वनिरुक्तौ ग्राह्येत्यादि प्रथमविशेषणेन प्रतिबन्धकासमवहितस्यैव विवक्षितत्वादिति भावः । साक्षीति उभयत्रापि ग्राह्यप्रामाण्याश्रयज्ञानविषयकसाक्षीत्यर्थः । यद्यप्युभयसिद्धेत्यादि तृतीय-स्वतस्त्वनिर्णयाय नैय्यायिकाभिमतग्राह्यत्वसाधारणादेव साक्षिघटितेन सङ्गृह्यते तथापि तस्याः परमतसाधारणस्य तत्रैवोक्त्या स्वमतसाधारणत्वेनोक्त-स्वतस्त्वनिरुक्तिद्वयमेवेह सङ्गृहीतमिति बोध्यम् ।। **ग्रहणेति** ।। निश्चये-त्यर्थः ।। **ग्राहकेति** ।। ज्ञापकेत्यर्थः । अत एव संशयनिश्चय-सामग्र्येत्युभयोरपि प्रतिबन्धकत्वात्प्रामाण्यविरोध्युपस्थापकसामग्र्योभयं वा एतेत्युभयसाधारण्येनैव प्राक् निरुक्तम् । एवं संशयस्थले प्रतिबन्धक-सद्भावमुपपाद्य द्विविधेऽपि स्वतस्त्वे संशयानुपपत्तिमुद्धरति ।। **एवं चेति** ।। साक्षिणा शक्तिप्रतिबन्धात् प्रामाण्यग्रहण इत्यनेनाप्रतिबद्धसाक्षिवेद्यत्वनैयत्यं प्रतिबन्धदशायामाग्रहेति साक्षिवेद्यत्वयोग्यत्वं चाक्षतमिति दर्शितम् । अस्मदुक्तस्वतस्त्वान्येत्यनेन च **मण्युक्ते**ऽप्रामाण्यग्राहकेत्यत्र प्रामाण्यविरोधिग्राहकसमवहितेति पर्यवसिम् । ग्राहकपदेन निश्चायकत्वं वा विवक्षितम् उपस्थापकमात्रं वा । नाद्यः लोके विपरीतनिश्चये सामग्र्या इव तत्संशयसामग्र्या अपि निश्चयप्रतिबन्धकत्वदर्शनेन अप्रामाण्यनिश्चय-

सामग्रीस्थल इव तत्संशयसामग्रीस्थलेपि प्रतिबन्धादेव प्रामाण्यनिश्चयस्य स्वतस्त्ववादिना वाच्यतया तद्ग्रहस्यावश्यकत्वेन निश्चायकविवक्षायोगात् । नान्त्यः उक्तस्वतस्त्वे संशयानुपपत्तेरभावेन राद्धान्तस्त्वित्यादिना संशयानुपपत्तेर्दोषत्वोक्त्ययोगादिति दर्शितम् ।। **संशयो युक्त एवेति ।।**

ननु धर्मिज्ञानात्पूर्वकालीनाप्रामाण्यादिकोटिस्मृतेः कथं संशयहेतुता तत्पूर्वमप्रामाण्यादिकोटिस्मृत्यभावे च धर्मिज्ञानस्य प्रामाण्यविरोध्युपस्थापकसामग्र्यसमवहितसाक्षिरूपतया प्रामाण्यनिश्चायकत्वावश्यम्भावे कथं संशयः । न च धर्मिज्ञानान्तरभाविकोटिस्मृतेरेव संशयहेतुतेत्यत्र मानाभावः । स्थाणुत्वपुरुषत्वकोटिद्वयसाधारणोर्ध्वतादिविषयकस्य धर्मिज्ञानस्य कोटिस्मारकत्वेनैव संशयं प्रति हेतुत्वावधारणात् । कथमन्यथा साधारणासाधारणधर्मदर्शनविप्रतिपत्तीनां संशयोपयोगः । न हि नित्यानित्यव्यावृत्तिगन्धवत्वदर्शनस्य विप्रतिपत्तेर्वा कोटिद्वयोपस्थापकत्वमन्तरेण संशयोपयोगः । न च साधारणधर्मदर्शनादिनेवादृष्टादिनापि जानाति कोटिस्मृतिसंशयहेतुः त्रैविध्योक्त्ययोगात् सिद्धान्तेऽप्यसाधारणधर्मदर्शनविप्रतिपत्योः साधारणधर्मदर्शन एवान्तर्भावेनैकविध्यस्यैवोक्तेरिति चेन्न । दैवात्कोटिस्मृतिमतामूर्ध्वत्वादिविशिष्टपुरोवर्तिधर्मिदर्शनेनापि संशयस्यानुभवसिद्धत्वात् । साधारणधर्मदर्शनस्योक्तरीया कोटिस्मारकत्वेन संशयहेतुत्वसिद्धावपि धर्मिज्ञानात्पूर्वकालीनादृष्टादिजन्यकोटिस्मृतेः संशयाहेतुत्वमित्यस्यालाभाच्च । तेनैवासाधारणधर्मदर्शनरूपधर्मिज्ञानस्य संशयेऽनुपयोगप्रसङ्गः । दैवात् स्थाणुत्वपुरुषत्वकोटिस्मृतिमतो नयनोन्मीलनानन्तरमनेकवस्तुदर्शनेऽपि यत्रैवोर्ध्वतादिसाधारणधर्मदर्शनं तत्रैव संशयो नान्यत्रैवेत्येवंविधधर्मिनियमार्थत्वात् । न चैवं संशयत्रैविध्योक्तिविरोधः । अदृष्टादिजन्यकोटिस्मृतिस्थले धर्मिज्ञानजन्यकोटिस्मृतिस्थले चोक्तरीत्या साधारणधर्मदर्शनस्य संशयोपयोगिमात्रेण तदुपपत्तिः साधारणधर्मदर्शन-

विप्रतिपत्योस्तु प्रकारान्तरेणोपयोगासम्भवे कोटिस्मारकत्वेनैवोपयोग इत्यन्यदेतत्.। अस्तु वा धर्मिज्ञानस्य साधारणधर्मदर्शनयोः कोटिस्मृतिद्वारैव संशयहेतुता । तथापि न स्वतस्त्वेन संशयानुपपत्तिः । न च धर्मिज्ञानात्पूर्वमप्रामाण्यकोटिस्मृत्यभावे प्रामाण्यविरोध्युपस्थापकसामग्र्यसमहित एव धर्मिज्ञानरूपसाक्षीति प्रामाण्यनिश्चय एव स्यात् न संशय इति वाच्यम् । अप्रामाण्यसंशयहेतुदोषस्यैव तत्र सत्वात् । सामग्रीपदेनापि तस्यैवा-प्रामाण्यसंशयाद्येसाधारणकारणतया विवक्षितत्वादत एव स्वतस्त्वनिरुक्त्यवसरे दोषशङ्कादिरूपे प्रामाण्यविरोधिग्राहकसामग्रीसमवधानात्मके प्रतिबन्धे सतीत्युक्तम् ।

न च तत्र दोषशङ्केति दोषजन्यत्वे शङ्केति व्याख्यातत्वात् कथमेतदिति वाच्यम् । दोषश्च शङ्का चेति दोषशङ्केति विग्रहे दोषस्य तज्जन्यत्वशङ्कायाश्च लाभात् । अत एवात्राप्यसति प्रतिबन्धे साक्षिवेद्यत्वनियम इति प्रामाण्य-विरोधीत्यादेः प्रतिबन्धकत्वमात्रार्थकत्वमभिहितम् । एवं प्रामाण्यसंशयस्थले आवश्यकतज्जन्यदोषेणैव प्रतिबन्धात् धर्मिज्ञाने प्रामाण्यनिश्चायके सति ततः कोटिद्वयस्मृतौ प्रामाण्याप्रामाण्यसंशयो युक्त एवेति भावः ।

न्यायदीपः

उक्तानुमानेषु प्रतिकूलतर्कपराहतिं **मण्याद्युक्तमाशङ्कते ।। नन्विति ।। तथाऽपीति ।।** प्रबलबाधरूपदोषाभावेऽपीत्यर्थः ।। **प्रामाण्यग्रहादिति ।।** अन्यथा स्वतस्त्वभङ्गापत्तेरिति भावः ।। **अग्रहे चेति ।।** ज्ञानस्येत्यनुषङ्गः । यथा हि त्वन्मते जातिव्यक्त्योरेकवित्तिवेद्यत्वनियमेपि दोषवशादिदं रूप्य-मिति भ्रमस्थले शुक्तिग्रहेपि न शुक्तित्वग्रहः तथा मन्मतेपि ज्ञानप्रामाण्ययोः एकवित्तिवेद्यत्वनियमेपि संशयस्थले ज्ञानग्रहे सत्यपि तेन तत्प्रामाण्याग्रहेपि न स्वतस्त्वभङ्गः ।

अस्माभिरुक्तस्वतस्त्वस्य तत्रापि सत्वादिति भावेन "धर्म्युपलब्धावपि व्याघातादिदर्शनेन साक्षिणि प्रतिबद्धे प्रामाण्यविषये मनसि संशयोपपत्तेः" इति **तत्वनिर्णयटीकां** विवृण्वानः समाधत्ते ।। **असति प्रतिबन्ध इति** ।। प्रामाण्यविरोध्युपस्थापकसामग्र्यसमवधाने सतीत्यर्थः । अत्र सर्वत्र साक्षी प्रागुक्तरूप एव ज्ञेयः ।। **ग्रहणेति** ।। निश्चयेत्यर्थः ।। **अन्यथेति** ।। उक्तरूपसामग्र्यभाव इत्यर्थः ।

अस्तु सामग्री ततः किमित्यत आह ।। **एवं चेति** ।। प्रामाण्यविरोध्युपस्थापकसामग्री-समवधाने सतीत्यर्थः ।। **धर्मिज्ञानस्येति** ।। व्यवसायरूपस्य संशये धर्मिणो यज्ज्ञानं तस्येत्यर्थः ।। **संशयो युक्त एवेति** ।। मानसोऽयं बोध्यः । न तु साक्षिरूपः तस्य सुदृढनिर्णयरूपत्वात् ।

अस्मदुक्तस्वतस्त्वाहान्येत्युक्तं व्यनक्ति ।। **न हीति** ।। असति प्रतिबन्धे ज्ञानगोचरसाक्षिवेद्यत्वनैयत्यमित्यस्य प्रतिबन्धे सति साक्षिणा ज्ञानं प्रामाण्यं चोभयं न गृह्यत इति यद्यर्थस्तदा परं स्वतस्त्वहानिः । नह्येवं विवक्ष्यत इति भावः ।

तर्कताण्डवम्

तद्ग्रहणशक्त्योर्भिन्नत्त्वेपि ज्ञानत्वग्रहणशक्तिवत् प्रामाण्यग्रहणशक्तिः सहजा । नत्वप्रामाण्यग्रहणशक्तिरिव आहितेत्येतावतैव प्रामाण्यस्य स्वतस्त्वात् । दृश्यते च वह्नौ दाहप्रकाशनशक्त्योः सहजत्वेपि प्रतिबन्धकभेदः ।

अस्तु वा तयोरेकैव ग्रहणशक्तिस्तथापि तस्या एनं मा दहेत्यादौ दाहशक्तेरिव विषयभेदेन प्रतिबन्धाप्रतिबन्धौ युक्तौ ।

नचैवं प्रतिबन्धकाभावरूपस्याधिकस्य हेतोरनुप्रवेशात् सिद्ध-साधनम् । न्यायमतेऽप्रतिबद्धेनाप्यनुव्यवसायेन प्रामाण्याग्रहणात् ।

नाप्यपसिद्धान्तः । ''अप्रामाण्यग्रहणकारणाभावस्यापि प्रामाण्य-ग्रहणोपयोगाङ्गीकारेपि न कदाचिदस्माकं हानिः'' इति टीकोक्तेः । ''प्रतिबन्धकाभावो न हेतुः'' इत्युत्पत्तिस्वतस्त्ववादे वक्ष्यमाणत्वाच्च ।

यत्र पूर्वं दोषशङ्कादेरभावेपि कारणान्तरोपनिपातात् पश्चात् तत्संशयस्तत्र पूर्वं प्रामाण्यं निश्चीयत एव । तदा प्रतिबन्धकाभावात् ।

युक्तिरत्नाकरः

ननु ज्ञानत्वग्रहेऽपि प्रतिबन्धात्प्रमात्वग्रहात्संशयोपपत्तिरित्युक्तं स्वतस्त्ववादिना । ज्ञानत्वप्रमात्वग्रहणशक्त्योरैक्यस्यैव वाच्यतयैक-प्रतिबन्धकप्रतिबध्यत्वावश्यम्भावेन प्रामाण्यग्रहप्रतिबन्धे ज्ञानत्वग्रहासम्भवात् प्रामाण्यग्रहशक्तेर्ज्ञानत्वग्रहशक्त्यन्यत्वे भिन्नशक्तिग्राह्यत्वाविशेषादप्रामाण्य-वत्परतस्त्वापत्तेः । अन्यथा प्रामाण्यस्यापि तत्त्वापातादत्राह ।। **न हीति** ।। ज्ञानत्वप्रमात्वग्रहशक्त्योर्भेदादेवेति भावः ।

तयोर्भेदे प्रामाण्यस्यापादितं परतस्त्वमुद्धरति ।। **तद्ग्रहणेति** ।। **नत्विति** ।। अप्रामाण्यग्रहणशक्तिस्तु न सहजा किन्तु प्रवृत्तसंवादाहिता अतो न स्वतस्त्वापत्तिरिति भावः । ननु ज्ञानत्वग्रहशक्तिवत्प्रामाण्यग्रहशक्तेः सहजत्वे एकनिष्ठसहजानेकशक्त्योरकप्रतिबन्धकप्रतिबद्धत्वस्य वह्निनिष्ठ-सहजानेकशक्त्योरकप्रतिबन्धकप्रतिबद्धत्वस्य वह्निनिष्ठदाहपाकशक्तौ दर्शनेन प्रामाण्यग्रहप्रतिबन्धकत्वेन ज्ञानत्वग्राहकप्रतिबन्धः स्यादेवेत्यत्राह ।। **दृश्यते चेति** ।। मणिमन्त्रादिना दाहशक्तेः प्रतिबन्धे प्रकाशनशक्तेरपि प्रतिबन्धा-पातादिति भावः । ननु चन्द्रालोकादौ प्रकाशकरशक्तिसद्भावेऽपि दाहशक्तेर-

भावेन तयोर्भेदेऽपि साक्षिनिष्ठज्ञाने त्वप्रामाण्यग्रहशक्त्योर्भेदे मानाभावात् प्रत्युत लाघवादैक्यमेव युक्तम् । एवं च ज्ञानत्वप्रामाण्ययोः ग्रहाग्रहावित्युक्तमित्यत आह [1]।। **यद्वेति ।। एकैवेति ।।** न च ज्ञानपदादौ ज्ञानत्वग्रहशक्तौ सत्यामपि प्रामाण्यग्रहणशक्तेरभावान्न तयोरैक्यम् । तत्र ज्ञानत्वग्रहशक्तेर्भिन्नत्वेऽपि साक्षिनिष्टयोस्तयोर्भेदे मानाभावात् । न चैवं वह्निनिष्टयोरभेदेऽपि दाहप्रकाशनशक्त्योर्न भेदः स्यादिति वाच्यम् । तयोर्विजातीयकार्यानुकूलयोरैकजात्यमेव दुर्लभं किमुतैक्यं साक्षिनिष्ठयोस्तु तयोरेकेन्द्रियग्राह्यवृत्तितदिन्द्रियग्राह्यज्ञानत्वप्रमात्वगोचरैकज्ञानानुकूलयोरेकजातीयमैक्यं च युक्तमेव । न हि चक्षुर्ग्राह्यघटवृत्तितदिन्द्रिय योग्यघटत्वरूपमहत्परिमाणैकत्वादीनां ग्रहशक्तिश्चक्षुर्वृत्तिर्न विजातीयात् भिद्यते वा प्रमाणाभावादिति भावः । एनं मा दहेति मन्त्रप्रयोक्तृपुरुषाभिप्रेतं तदितरं च प्रति प्रत्येकस्या अपि दाहशक्तेरिव प्रामाण्यज्ञानत्वे प्रत्येकस्या अपि ग्रहशक्तेः प्रतिबन्धाप्रतिबन्धौ युक्तावेवेत्यर्थः । नन्वेवं संशयसमर्थनार्थं प्रामाण्यनिश्चये प्रतिबन्धकाभावस्याप्युपयोगाभ्युपगमे परतस्त्वमेवापन्नम् । ज्ञानग्रहहेत्वतिरिक्तहेतुसापेक्ष्यग्रहविषयत्वस्यैव परतस्त्वादित्यत आह ।। [2]**नन्विति ।। अप्रतिबद्धत्वेनेति ।।** फलीभूतज्ञानविषयकज्ञानोपनीतत्वाभावेन रूपत्वादेः स्वातन्त्र्येणानुव्यवसायविषयत्वाभावेन रूपत्वादेः स्वातन्त्र्येणानुव्यवसायविषयत्वाभ्युपगमादित्यर्थः । तथा च ज्ञानग्रहहेत्वतिरिक्तसापेक्ष एव परतस्त्वं न तु तादृक्प्रतिबन्धकाभावसापेक्षत्वेऽपीति न सिद्धसाधनमित्यर्थापत्तिरिति भावः ।

नन्वेवं प्रतिबन्धकाभावहेतुत्वाभ्युपगमेऽपसिद्धान्त इत्याह ।। **नापीति ।।** प्रतिबन्धकाभावस्योपयोगमात्रं न हेतुत्वमिति नापसिद्धान्त इति भावः । ननु अन्वयव्यतिरेकाभ्यां प्रतिबन्धकाभावस्य हेतुत्वमेव सिध्यतीति

---

१. "अस्तु वा" इति मूले दृश्यते । २. "न चैवं इति" इति स्यात् ।

पूर्वोक्तदोषानुवृत्तिस्तत्राह ।। **प्रतिबन्धकाभाव इति** ।। दण्डस्य कारणत्वेन दार्ढ्यस्येवाप्रतिबद्धसाक्षिणः प्रामाण्यग्रहहेतुत्वेनापि प्रतिबन्धकाभावस्य अन्वयव्यतिरेकौ तदवच्छेदकत्वमात्रेणोपपन्नौ न तद्धेतुतां गमयत इति भावः । एवं ज्ञानत्वग्रहे तत्कालीनदोषशङ्कादिना प्रतिबन्धात्प्रामाण्यग्रहे तत्संशयमुपपाद्य यत्र तादृक्प्रतिबन्धकाभावः तत्रापि तमुपपादयितुम् ।। **यत्रेति** ।। **निश्चीयत इति** ।। ननु प्रामाण्यनिश्चये कथं संशयः । न च तन्नाशानन्तरं भविष्यतीति वाच्यम् । निश्चिते तत्र समयान्तरेऽपि संशयायोगात् । अनभ्यासदशापन्नघटादौ कदाचित्संशयापातात् । न च ज्ञाने संशयानिश्चितत्वेप्यर्थे संशयवदनभ्यासदशायामत्रापि निश्चायकज्ञाने प्रामाण्यसंशयादिना प्रबलदोषेण संशयः स्यादिति वाच्यम् । प्रामाण्यनिश्चयस्य साक्षिरूपतया तस्य च स्वप्रकाशतया तन्निष्टप्रामाण्यरूपत्वे तत्रापि संशयायोगात् । उक्तं च सुधायां **नापि तत्सिद्धेर्थे संशय** इति । न च व्यवसायनिष्टज्ञानत्वग्रहेऽपि प्रबलदोषवशात्स्वनिष्टतत्प्रामाण्यनिश्चयवत्साक्षिणः स्वप्रकाशत्वेन स्वनिष्ठव्यवसायगोचरत्वग्रहेऽपि प्रबलदोषवशात्स्वनिष्ठप्रामाण्यविषय इति वाच्यम् । निर्दोषतयाऽवधारितस्वरूपे साक्षिणि सुखादिविषये प्रामाण्यस्येव स्वप्रामाण्यस्यापि स्वेन यदवधारणात्स्वप्रामाण्यसदासाक्षीत्युक्तेः ।

यत्तु सुखादिघटिततत्तत्प्रामाण्ये निश्चयावश्यम्भावेऽप्यनभ्यासदशापन्नबहिरर्थघटितप्रामाण्ये न तदवश्यम्भाव इति तन्न । पश्यत्येव सुनिश्चयादित्युक्तिविरोधात् । अत एव न ग्राहकानवस्थापीति चेत् । सत्यं द्विधा हि संशयः । कश्चित्स्वरसो यथा पुरोवर्तिन्यूर्ध्वतादिविशिष्टे दृष्टे विशेषादर्शनात् स्थाणुर्वा पुरुषो वेति । अन्यस्तु सत्यपि निश्चये तत्र दोषजन्यत्वशङ्क्या तत्रैव यथा स्थाणुत्वेन प्रतीयते स्थाणुर्भवति वा न वेति । एवं च प्रकृतेऽपि प्राचीनप्रामाण्यनिश्चयदोषजत्वसंशयान्यनिश्चयसंशयो-

पपत्तेः । न च साक्षिरूपेत्यत्र दोषजत्वशङ्कायोगस्तत्र तस्य मानसत्वात् । न च तत्र साक्षिप्रवृत्तिरेव कुतो न स्यात् । क्वचित्प्रामाण्ये परीक्षा-नैरपेक्ष्येऽप्यनभ्यासदशापन्ने परीक्षासहकृतस्यैव साक्षिणः प्रवृत्तेः । तदुक्तं सुधायाम् ''तस्मात्साक्षिप्रामाण्यं परीक्षानपेक्षेणैव साक्षिणा गृह्यते वृत्तिज्ञानानां तु तत्सापेक्षेण'' इति ।

न चैवं परीक्षासहकृतसाक्षिवेद्यत्वे परतस्त्वापत्तिः । परीक्षाया अनुमानविशेषतया [1]भावभूतत्वादिति वाच्यम् । यत्र [2]दोषशङ्कात्रय-प्रतिबन्धकनिरासार्थत्वेन तदपेक्षामपि सर्वत्र तदनपेक्षणेन तत्त्वानापत्तेः । अवयवादनिच्छाज्ञायमानपरीक्षावश्यम्भवतीति सुधोक्तेः । सर्वथा परीक्षापेक्षत इति तु न क्षम्यत इति च । न च पश्चाद्दोषजत्वसंशयेऽपि तदा दोषाभावात् साक्षिणैव तद्ग्रहः किन्नस्यादिति वाच्यम् । दोषजत्वशङ्कादेः पश्चादपि यत्रानवतारस्तत्रैव साक्षिप्रवृत्तेः स्वीकारेण साक्षिसिद्धेः उत्तरत्रापि संशया-योगात् । ''सुदृढो निर्णयो यत्र'' इत्युक्तेः । न चोत्तरत्र संशये पूर्वं प्रमाण्यनिश्चयो न वेति वाच्यम् । दूरे जलज्ञानान्तरं क्वचिन्निश्शङ्कमेव किञ्चिदनन्तरं गतस्य पश्चान्मरुमरीचिकत्वादिसंशयदर्शनेन निष्कम्पप्रवृत्ति-हेतुतया प्रामाण्यनिश्चयस्य तत्रावश्यवाच्यतया तस्य मानसत्वावश्यम्भावा-दिति संक्षेपः ।

केचित्तु । ननु अप्रतिबद्धसाक्षिवेद्यमपि न स्वतस्त्वं यत्रानभ्यास-दशायामपि पूर्वं दोषाद्यभावः तत्रापि प्रामाण्यनिश्चयापत्या दोषान्तरोप-नियतेऽपि संशयाभावापातादित्यत आह ।। **यत्र पूर्वमिति** ।। निश्चीयते एवेत्यस्यासति दोषप्रमाणमिदमिति साक्षिणा निश्चीयत इत्यर्थः । अतो नोत्तरसंशयानुपपत्तिरित्याहुः ।

---

१. ''बहिर्भूतत्वात्'' इति स्यात् । २. ''यत्र दोषशङ्का तत्र प्रतिबन्ध-निरासार्थत्वेन तदपेक्षायामपि'' इति स्यात् ।

न्यायदीपः

ननु ज्ञानत्वप्रमात्वग्रहणशक्त्योरैक्योपगमेऽन्यतराग्रहणे द्वयोरप्यग्रहणमवर्जनीयम् । भेदे तु स्वतस्त्वहानिरेव । ज्ञानग्रहणशक्त्यतिरिक्तशक्तिग्राह्यत्वात् । अन्यथाऽप्रामाण्यस्यापि स्वतस्त्वापात्तिरित्यतो ''मानस्यादोषशङ्कया प्रमाण्यग्रहणशक्तिः प्रतिबद्धा'' इति प्रकृतिनय**सुधा**वाक्येन भेदपक्षस्य ''करणानां ज्ञानजननशक्त्यैव तद्याथार्थ्यजनकत्वं स्वतस्त्वम्'' इत्यादिजिज्ञासानय**सुधा** वाक्येनाभेदस्य च प्रतीतेर्भेदाभेदरूपपक्षद्वयेपि समाधिमाह ।। **तद्ग्रहणेति** ।। **न त्वप्रामाण्यग्रहणशक्तिरिति** ।। सहजेत्यनुकर्षः । किं तु दोषाहितेत्यर्थः ।। **मा दहेतीति** ।। ''अमानोना प्रतिषेध'' इति निषेधार्थकमाशब्दोऽयम् । न माङ् । तेन ''माङि लुङ्'' इत्युक्तलुङभावः साधुः ।। **टीकोक्तेरिति** ।। तत्वनिर्णयटीकोक्तेरर्थतोऽनुवादोयम् ।

ननु तत्र ''न प्रकृते काचिदस्माकं हानिः'' इति हि पाठः । तथा च प्रकृते वेदापौरुषेयत्वे काचिद्धानिर्नेत्यभ्युपगमवादेनाप्युपपन्ना सा टीकोक्तिः । एवं च ज्ञानग्रहहेत्वतिरिक्तहेतुसापेक्षग्राह्यत्वे कथं न प्रामाण्यस्य स्वतस्त्वहानिरित्यतस्तत्वनिर्णयटीकास्थं ''न हि दाहाभाव एव वेत्रबीजं वेत्राङ्कुरं जनयतीत्येतावता दाहाभावो वेत्राङ्कुरस्य कारणं भवति । किं तु ततो विपरीतकार्यानुत्पादे सति वेत्रबीजं स्वमहिम्नैवाङ्कुरं करोति । अन्यथोत्सर्गापवादौ कापि न स्यातां'' इति पूर्ववाक्यं हृदि कृत्वाह ।। **प्रतिबन्धकेति** ।।

एवं प्रतिबन्धकेन प्रामाण्यानिश्चयमुपेत्य संशयमुपपाद्य क्वचित् प्रामाण्यनिश्चयमुपेत्यापि संशयमुपपादयति ।। **यत्रेति** ।। यद्वा अस्त्वेवं प्रामाण्यविरोध्युपस्थापकसामग्रीसमवधानस्थले प्रामाण्यानिश्चयेपि

विवक्षितस्वतस्त्वाहान्या संशयोपपत्तिः । तत्सामग्रीसमवधानात्प्राक्काले तु कथम् । तत्र प्रामाण्यानिश्चये स्वतस्त्वहानेः । यज्ज्ञानं यत्र प्रतिबन्धकं तत्सामग्र्यपि तत्र प्रतिबन्धिकेत्यस्य अभावात् । प्रामाण्यनिश्चये [1]वोदीरित-सन्देहो न स्यादित्यत आह ।। **यत्रेति ।। निश्चीयत एवेति ।।** मनसेति भावः । न तु साक्षिणा । तस्य दृढनिर्णयत्वात् ।

''सुदृढो निर्णयो यत्र ज्ञेयं तत्साक्षिदर्शनम्'' इति ।

''मानसे दर्शने दोषा नैव स्युः साक्षिदर्शने ।
यत्कचिद्व्यभिचारि स्याद्दर्शनं मानसं हि तत्'' ।।

इति च ज्ञानपादी**यानुव्याख्या**नोक्तेरिति ज्ञेयम् । एतेन यदुक्तं **मणौ** ''निश्चितेपि प्रामाण्ये दोषान्तरात्तत्र संशय इति चेन्न । प्रवृत्तिप्रसङ्गात्'' इति तन्निरस्तम् । प्रामाण्यनिश्चयकालेऽप्रतिबन्धादिष्टापत्तेः । पश्चात्तु तस्य नाशात्प्रतिबन्धाच्च अप्रवृत्युपपत्तेः ।

तर्कताण्डवम्

केचित्तु धर्मिज्ञानस्य संशयाहेतुत्वात्संशयरूप एवानुव्यवसाय उत्पद्यते । धर्मिज्ञानस्याहेतुत्वेपि संशये धर्मिनियमो धर्मिज्ञान-जनकनियमादेव युक्तः । कोट्युत्कटत्वे तु कोटेर्धर्म्यसंस्पृष्टत्वेना-ज्ञातोर्ध्वत्वादिसाधारणधर्मेण भूयस्साहचर्यदर्शनमेव हेतुः । न तु संशयधर्मिनिष्ठत्वेन ज्ञातसाधारणधर्मेण भूयस्साहचर्यदर्शनम् । गौरवात् । ऊर्ध्वतादिसाधारणधर्मज्ञानं त्वनियतादृष्टादिहेतुजन्यस्मृति-रूपमित्याहुः ।

---

१. ''च उदीचीनसन्देहः'' इति पाठान्तरम् ।

युक्तिरत्नाकरः

धर्मिज्ञानस्येति ।। विशेष्येन्द्रियसन्निकर्षकोटिस्मृतिरूपविशेषणज्ञान-तदुभयसंसर्गग्रहादिविशिष्टज्ञानसामान्यसामग्रीत एव तदुपपत्तौ न तदतिरिक्त-संशये विशेषणसामग्री कल्पनीया मानाभावात् । अन्यथा विशिष्टज्ञानमात्रे तत्कारणता कल्प्येत । अविशेषात् ।

ननु भूतले पटाभाव इत्यभावत्वविशिष्टज्ञानविद्धसाध्यकपक्षविशेषण-कानुमित्यादौ च व्यभिचारात् न विशिष्टज्ञानमात्रे धर्मिज्ञानहेतुता । न ह्यभावस्य निर्विकल्पकविषयताऽस्ति । येनाभावविषयकं तदादाय न व्यभिचार इति चेन्न । तत्रैव व्यभिचारात् न विशेषणज्ञानहेतुतापि स्यात् । यदि चाभावत्वे विशेषणज्ञानाभावेऽपि प्रतियोगिघटादिविशेषणज्ञानसत्वात् न व्यभिचारः । तदभावरूपविशेष्यज्ञानाभावेऽपि घटत्वाद्यपेक्षया घटादेर्विशेष्य-तया विशेष्यज्ञानस्यापि व्यभिचाराभावादिति साम्यम् । यदि च तद्विशेष्यक-ज्ञानत्वेन तद्विशिष्टज्ञानत्वेन तव [१]विशेष्यहेतुता अभावरूपविशेष्यज्ञाना-भावेऽपि तद्विशिष्टताया तस्य सत्वादिति मन्यसे तदा ततः विशेषणज्ञानत्वेन तद्विशिष्टज्ञानत्वेनापि विशिष्य हेतुताभावादेवमप्रसिद्धसाध्यव्यतिरेकिण्यपि साध्यविशेष्यकोनुमितौ तद्विशेष्यज्ञानस्य हेतुत्वाभावेऽपि विशिष्टानुमितौ पक्षतावच्छेदकापेक्षया पक्षस्यैव विशेष्यतया तज्ज्ञानहेतुत्वाक्षतेरिति ।

यत्तु बाष्पे धूमभ्रमानन्तरं धूमत्वसामान्यप्रत्यासत्तिजज्ञानेन पुरोवर्ति-विशेष्यकता तस्य धूमत्वानाश्रयत्वादिति धूमस्यैव विशेष्यत्वात् । तज्ज्ञाने तत्र हेतुत्वाद्धर्मिज्ञानस्य तत्रैव विशिष्टज्ञाने व्यभिचार इति । तन्न । प्रत्यासत्तिभूतसामान्यस्य सविकल्पविषयत्वेन धूमरूपविशेष्यविषयत्वनियमेन व्यभिचाराभावात् । तस्माद्विशिष्टवैशिष्ट्यावगाहिज्ञानत्वे विशेषणतावच्छेदक-

१. "विशिष्य हेतुता" इति स्यात् ।

प्रकारज्ञानस्यावश्य[1]वाच्यहेतुभावतया तत्र च विशिष्टवैशिष्ट्यादिज्ञानत्वे विशेषणतावच्छेदकज्ञानत्वापेक्षया विशिष्टज्ञानत्वविशेषणज्ञानत्वयोरेव लघुतया कार्यकारणतावच्छेदकत्वौचित्याद्विशिष्टज्ञानमात्रे विशेषणज्ञानत्वेनैव [2]हेतुना ततोऽतिरिक्तज्ञानत्वेनापीति न धर्मिज्ञानस्य विशिष्टज्ञानमात्रहेतुतेत्येव परिहारो वाच्यः । तेन न्यायेन संशयेऽपि धर्मिज्ञानस्य हेतुता कोटिस्मृत्यादि-रूपविशेषणज्ञानादिनैवान्यथासिद्धेः । [3]न तु विशिष्टज्ञानत्वावच्छिन्ने [4]विशेषणज्ञानस्यैव संशयत्वावच्छिन्ने धर्मिज्ञानस्य कुतो न हेतुतेति चेत् चाक्षुषत्वादिना संकरापत्त्या संशयत्वस्याजातित्वात् । कार्याभाववृत्तिजातेरेव कार्यतावच्छेदकत्वात् । तद्विधनानाकोटिविशिष्टज्ञानरूपस्य च तस्य तत्कोटिरूपविशेषणज्ञानादेव दण्डीकुण्डलीत्यादिविशिष्टज्ञानवदर्थसमाज-महिम्नैवोपपत्त्या तदसाधारणान्तराकल्पकत्वादिति भावः ।

ननु तुरगादौ वेगेन गच्छतः पुरुषस्यानेकवृक्षेन्द्रियसन्निकर्षेऽपि क्वचिदेव पनसो [5]नेत्यादिसंशयो न सर्वत्र । एवंविधो धर्मिनियम एव संशये धर्मिज्ञान-हेतुतां व्यवस्थापयति । न चैवमनेकेषु वृक्षेषु ज्ञातेष्वपि क्वचिदेव संशय इति कथं नियम इति वाच्यम् । विशेषदर्शनादिसंशयकारणान्तराभावात् । तद्भावे च इष्टापत्तेरत्राह ।। **धर्मिज्ञानस्येति** ।। तद्धेतोरेवेति न्यायेन धर्मिज्ञानहेतुपरिमाणविशेषावयवसंस्थानादिरूपविषयमाहात्म्यादेव धर्मिविशेषे संशयनियामकत्वसम्भवेन मध्ये धर्मिज्ञानकल्पनमित्यर्थः । न च तेषामननु-गततया अनुगतधर्मिज्ञानहेतुता । धर्मिधीसामग्रीत्वेनैवानुगमसम्भवादिति भावः । न चैवं परमाणुः रूपवान्न वेति संशये धर्मिज्ञानस्यानुमितिरूपतया तत्सामग्र्या संशयजनने अनुमितत्वापत्त्या साक्षात्त्वानुमितित्वसंकरापत्तिः । धर्मिज्ञानजनकेत्यनेन धर्मिप्रत्यक्षजनकेति विशेषणात् । तत्र च

१. "वाच्यतया" इति स्यात् । २. "हेतुता" इति स्यात् । ३. "ननु" इति स्यात् । ४. "विशेषणज्ञानस्येव" इति स्यात् । ५. "नवा इत्यादि" इति स्यात् ।

परमाण्वनुमितेरेव परमाणूपनायकायाः प्रत्यक्षसामग्रीत्वेन संकरशङ्कानवकाशादिति बोध्यम् ।

ननु धर्मिज्ञानस्य संशयाहेतुत्वे कोट्युत्कटत्वं संशये न स्यात् । तथा हि– उत्कटत्वं यद्धर्मसहचरितानेकधर्मोपलम्भो यत्र धर्मिणि यद्धर्मवर्तितया गृह्यमाणे वा धर्मे यत्कोट्या सह भूयःसहचारोपलम्भः तत्कोटावुत्कटत्वं तद्वयमपि धर्मिज्ञानस्य [1]हेतुं गमयतीति । न चोत्कटत्वं जातिः । अव्यावृत्तित्वात् विषयनिरूप्यत्वेन [2]स्वप्रतियोगित्वाच्च । अस्तु चोत्कटत्वस्य संशयवृत्तिजातिता । तथापि तस्य कार्यमात्रवृत्तिजातित्वेन कार्यतावच्छेदकतया तदवच्छिन्नं प्रति तत्कोटिसहचरितरूपोपलब्धावेकधर्मवद्धर्मिज्ञानत्वादिकमेव कारणतावच्छेदकमिति धर्मिज्ञानस्य संशयहेतुत्वसिद्धिः ।

न चैतावुत्कटकोटिकसंशय एव तद्धेतुत्वात् तत्वज्ञानसंशयमात्र इति वाच्यम् । यद्विशेषयोरिति न्यायेन तादृशधर्मवद्धर्मिज्ञानत्वेनोत्कटकोटिकसंशयत्वेन हेतुत्वे धर्मिज्ञानवत्वेन संशयत्वेनापि सिद्धेः । एवमुत्कटकोटिकप्रामाण्यसंशयस्याप्यनुभवसिद्धस्याप्यनुपपत्तेरित्यत आह ।। **कोट्युत्कटत्वेत्विति** ।। तथा च तद्धेतोरेवेति न्यायेनैतत्कोट्या सह बहुधोपलब्धसहचारधर्मधर्मिसंशयज्ञानहेतोस्तदसंसर्गाग्रहस्यैव हेतुत्वेनोत्कटकोटिसंशयोपपत्तेः । न तदर्थतयापि धर्मिज्ञानहेतुतासिद्धिरिति भावः । भूयः साहचर्यदशनमित्युपलक्षणम् । तत्कोटिसहचरितानेकधर्माणां संसर्गाग्रह इति बोध्यम् ।। **गौरवादिति** ।। कल्पनीयत्वगौरवादित्यर्थः ।

ननु तद्धर्मिणीव तादृशधर्मासंसर्गाग्रहो धर्म्यन्तरेऽप्यस्तीति धर्मिकोट्युत्कटकोटिकसंशयः स्यात् । उपस्थिते धर्मिणीति विशेषणे च तादृशधर्म्यन्तरेऽति-

---

१. ''हेतुत्वं'' इति स्यात् । २. ''सप्रतियोकत्वाच्च'' इति स्यात् ।

प्रसङ्गो धर्मिज्ञानस्याहेतुतापत्तिश्चेत् तद्धर्मसंसृष्टत्वेनाज्ञायमानेत्यादिना तद्धर्मिणि तादृशकोटिसहचरितत्वेन तद्बहुधोपलब्धोर्ध्वतादिधर्मसंसर्गग्रहसामग्रा एव विवक्षितत्वात् । सत्यम् । न तस्यां तादृशसंसर्गग्रहनियमेन तत्रेव धर्म्यन्तरेऽपि तादृशसंशयावश्यम्भावात् । तदभावे च तत एव संशयानापत्तेरिति बोध्यम् ।

ननु साधारणधर्मदर्शनस्य संशयहेतुत्वादश्रयधर्मिधियोऽपि तत्सिध्यतीत्यत्राह ।। **ऊर्ध्वतादीति** ।। यद्यपि साधारणधर्मिज्ञानस्य कोटिस्मृतावेवोपयोगात् तस्या एवादृष्टादिहेतुकत्ववर्णनमुचितम् । तथापि साधारणधर्मदर्शनादिजनितकोटिस्मृतेरेव संशयहेतुता । नादृष्टादिजनितायाः । अन्यथानैवविधसंशयानुपपत्तेरिति साधारणधर्म एवादृष्टादिहेतुकस्मृतिरूपतोक्तेरिति ध्येयम् ।

केचिदित्यस्वरसोद्भावनं तद्बीजम् । अतस्तमसादौ दूरे तत एव दोषात् स्थाणुत्वतद्व्याप्यवक्रकोटरादिमत्वपुरुषत्वतद्व्याप्यकरचरणादिमत्तया वा गृह्यमाणेन तदुभयसाधारणेनोर्ध्वत्वमात्रेण गृह्यमाण एव पुरोवर्तिनि तत एव साधारणधर्मदर्शनात् स्थाणुत्वपुरुषत्वकोटिद्वयस्मृतौ, तयोश्च विरोधाभावे सत्येव स्थाणुर्वा पुरुषो वेति संशयो नान्यथेति सकललौकिकतान्त्रिकानुभवाभ्युपगमबलेनान्वयव्यतेरेकाभ्यामेव धर्मिज्ञानस्य संशयहेतुतेति किं प्रकारान्तरगवेषणायासेन । न चैवमपि कोटिस्मृतिहेतुतयान्यथासिद्धिः । उक्तविधया संशयस्थले विनिगमकाभावेन द्वारद्वारिभावापन्नतयैव तयोर्जनकत्वकल्पनात् । अन्यथा सन्निकर्षेणान्यथासिद्धेन्द्रियस्याप्यहेतुत्वापत्तेः । अत एवादृष्टादिहेतुककोटिस्मृतेर्न संशय इति प्रश्नत्रयेण तत्वोद्बोधे दृष्टस्मारितकोटिश्च संशयो नास्त्येव । सर्वत्र समानधर्मदर्शनादेरन्वयादिदर्शनादिति व्युत्पादितम् ।

परमाण्वनुमितेरेव परमाणूपनायकायाः प्रत्यक्षसामग्रीत्वेन संकरशङ्कानवकाशादिति बोध्यम् ।

ननु धर्मिज्ञानस्य संशयाहेतुत्वे कोट्युत्कटत्वं संशये न स्यात् । तथा हि– उत्कटत्वं यद्धर्मसहचरितानेकधर्मोपलम्भो यत्र धर्मिणि यद्धर्मवर्तितया गृह्यमाणे वा धर्मे यत्कोट्या सह भूयःसहचारोपलम्भः तत्कोटावुत्कटत्वं तद्वयमपि धर्मिज्ञानस्य [1]हेतुं गमयतीति । न चोत्कटत्वं जातिः । अव्यावृत्तित्वात् विषयनिरूप्यत्वेन [2]स्वप्रतियोगित्वाच्च । अस्तु चोत्कटत्वस्य संशयवृत्तिजातिता । तथापि तस्य कार्यमात्रवृत्तिजातित्वेन कार्यतावच्छेदकतया तदवच्छिन्नं प्रति तत्कोटिसहचरितरूपोपलब्धावेकधर्मवद्धर्मिज्ञानत्वादिकमेव कारणतावच्छेदकमिति धर्मिज्ञानस्य संशयहेतुत्वसिद्धिः ।

न चैतावुत्कटकोटिकसंशय एव तद्धेतुत्वात् तत्वज्ञानसंशयमात्र इति वाच्यम् । यद्विशेषयोरिति न्यायेन तादृशधर्मवद्धर्मिज्ञानत्वेनोत्कटकोटिकसंशयत्वेन हेतुत्वे धर्मिज्ञानवत्वेन संशयत्वेनापि सिद्धेः । एवमुत्कटकोटिकप्रामाण्यसंशयस्याप्यनुभवसिद्धस्याप्यनुपपत्तेरित्यत आह ।। **कोट्युत्कटत्वेत्विति** ।। तथा च तद्धेतोरेवेति न्यायेनैतत्कोट्या सह बहुधोपलब्धसहचारधर्मधर्मिसंशयज्ञानहेतोस्तदसंसर्गाग्रहस्यैव हेतुत्वेनोत्कटकोटिसंशयोपपत्तेः । न तदर्थतयापि धर्मिज्ञानहेतुतासिद्धिरिति भावः । भूयः साहचर्यदशनमित्युपलक्षणम् । तत्कोटिसहचरितानेकधर्माणां संसर्गाग्रह इति बोध्यम् ।। **गौरवादिति** ।। कल्पनीयत्वगौरवादित्यर्थः ।

ननु तद्धर्मिणीव तादृशधर्मासंसर्गाग्रहो धर्म्यन्तरेऽप्यस्तीति धर्मिकोट्युत्कटकोटिकसंशयः स्यात् । उपस्थिते धर्मिणीति विशेषणे च तादृशधर्म्यन्तरेऽति-

---

१. "हेतुत्वं" इति स्यात् । २. "सप्रतियोकत्वाच्च" इति स्यात् ।

प्रसङ्गो धर्मिज्ञानस्याहेतुतापत्तिश्चेत् तद्धर्मसंसृष्टत्वेनाज्ञायमानेत्यादिना तद्धर्मिणि तादृशकोटिसहचरितत्वेन तद्बहुधोपलब्धोर्ध्वतादिधर्मसंसर्गग्रहसामग्र्या एव विवक्षितत्वात् । सत्यम् । न तस्यां तादृशसंसर्गग्रहनियमेन तत्रैव धर्म्यन्तरेऽपि तादृशसंशयावश्यम्भावात् । तदभावे च तत एव संशयानापत्तेरिति बोध्यम् ।

ननु साधारणधर्मदर्शनस्य संशयहेतुत्वादश्रयधर्मिधियोऽपि तत्सिध्यतीत्यत्राह ।। **ऊर्ध्वतादीति** ।। यद्यपि साधारणधर्मिज्ञानस्य कोटिस्मृतावेवोपयोगात् तस्या एवादृष्टादिहेतुकत्ववर्णनमुचितम् । तथापि साधारणधर्मदर्शनादिजनितकोटिस्मृतेरेव संशयहेतुता । नादृष्टादिजनितायाः । अन्यथानैवविधसंशयानुपपत्तेरिति साधारणधर्म एवादृष्टादिहेतुकस्मृतिरूपतोक्तेरिति ध्येयम् ।

केचिदित्यस्वरसोद्भावनं तद्बीजम् । अतस्तमसादौ दूरे तत एव दोषात् स्थाणुत्वतद्व्याप्यवक्रकोटरादिमत्वपुरुषत्वतद्व्याप्यकरचरणादिमत्तया वा गृह्यमाणेन तदुभयसाधारणेनोर्ध्वत्वमात्रेण गृह्यमाण एव पुरोवर्तिनि तत एव साधारणधर्मदर्शनात् स्थाणुत्वपुरुषत्वकोटिद्वयस्मृतौ, तयोश्च विरोधाभावे सत्येव स्थाणुर्वा पुरुषो वेति संशयो नान्यथेति सकललौकिकतान्त्रिकानुभवाभ्युपगमबलेनान्वयव्यतेरेकाभ्यामेव धर्मिज्ञानस्य संशयहेतुतेति किं प्रकारान्तरगवेषणायासेन । न चैवमपि कोटिस्मृतिहेतुतयान्यथासिद्धिः । उक्तविधया संशयस्थले विनिगमकाभावेन द्वारद्वारिभावापन्नतयैव तयोर्जनकत्वकल्पनात् । अन्यथा सन्निकर्षेणान्यथासिद्धेन्द्रियस्याप्यहेतुत्वापत्तेः । अत एवादृष्टादिहेतुककोटिस्मृतेर्न संशय इति प्रश्नत्रयेण तत्वोद्बोधे दृष्टस्मारितकोटिश्च संशयो नास्त्येव । सर्वत्र समानधर्मदर्शनादेरन्वयादिदर्शनादिति व्युत्पादितम् ।

किञ्चैकस्मिन्धर्मिणि विरुद्धनानाकोटिकज्ञानत्वरूपसंशयत्वस्य जातित्वेऽपि जन्यविशिष्टज्ञानत्वस्यैव कार्यमात्रवृत्तिधर्मतया बाधकाभावेन कार्यतावच्छेदकत्वमेषितव्यम् । अन्यथा विशेषणविशेष्यतत्संसर्गभानसामग्रीसमाजादेवोपपन्नमति विशिष्टं ज्ञानत्वमपि संशयत्वावच्छिन्नं प्रति धर्मित्वज्ञानत्वमेव कारणतावच्छेदकं, न तु तत्सामग्रीत्वं गौरवात् अतीन्द्रियत्वाच्च । न च धर्मिज्ञानमधिकं मध्ये कल्प्यमिति धर्मिकल्पनातो वरं धर्मकल्पनमिति न्यायेन तत्सामग्र्यां नियतपूर्ववृत्तिन्यां संशयजनकत्वमात्रमेव कल्प्यत इति वाच्यम् । संशयत्वावच्छिन्नं प्रत्यनुगतकारणान्वेषणे शीघ्रोपस्थितिकं लघुभूतधर्मिज्ञानत्वेनैव तत्कारणतावच्छेदकल्पने फलमुखगौरवस्यादोषत्वात् । अन्यप्रवृत्यादेरिष्टतावच्छेदकासंसर्गग्रहादेवोपपत्तौ मध्ये विशिष्टज्ञानकल्पनानुपपत्तेः । न च संवादिप्रवृत्तौ विशिष्टज्ञानसंसर्गग्रहयोरुपस्थितौ गौरवलाघवांतरसम्भवेऽपि प्रकृते तदभावः । इहाप्यतीतादिधर्मिकसंशये धर्मिज्ञानवत्सामग्र्योः युगपदुपस्थितौ तदवतारादेवं कोट्युत्कटत्वमिति नियामकमेवेति धर्मिज्ञानस्य संशयहेतुत्वात्प्रामाण्यसंशयायोग इति संक्षेपः ।

केचित्तु । विरुद्धनानाकोटिकत्वमात्रं न संशयत्वम् । ''पीतः शङ्ख'' इत्यादिनिश्चयस्यापि पीतत्वशङ्खत्ववत् तादृशधर्मविषयकत्वात् । किन्तु भावाभावकोटिकत्वम् । अभावज्ञाने चाधिकरणज्ञानहेतुत्वात् संशये धर्मिज्ञानहेतुतेति । तन्न । लौकिकभावप्रत्यक्ष एव तथात्वेन बहिरर्थघटितप्रामाण्याभावस्यालौकिकमानसप्रत्यक्षवेद्यतया तत्र धर्मिज्ञानस्य हेतुत्वात् । घटाभावसामान्यप्रत्यासत्तिजन्ये मानसघटाभावज्ञानेऽधिकरणज्ञानस्य व्यभिचारवारणाय लौकिकत्वेनावश्यविशेषणात् । न च साधिकरणाभावप्रत्ययत्वं कार्यतावच्छेदकम् । घटाभावादिशब्दजन्यनिरधिकरणाभावज्ञानानन्तरं घटाभाववदिति सामान्यप्रत्यासत्तिजन्यकज्ञाने चाक्षुषे गुडस्तिक्तो

न भवतीति उपनीताभावविशेषणकगुडविशेष्यकज्ञाने च व्यभिचारादधिकरणज्ञानस्याभावधीहेतुत्वे एव मानाभावाच्च ।

यदप्युपनीतादिधर्मिकसंशये धर्म्युपनयार्थं धर्मिज्ञानहेतुत्वमिति संशयमात्रेऽपि तथेति तन्न । सन्निकर्षत्वेन तदपेक्षणात् । न च सन्निकर्षस्य संयोगादिरूपतयाऽननुगमेन धर्मिधीत्वेन अननुगतेनैव हेतुत्वेन तत्तत्सम्बन्धानां विशिष्य हेतुत्वेऽपीन्द्रियार्थसम्बन्धत्वेन सामान्यहेतुतायाः अवश्यकत्वात् । अन्यथा कार्यबलेनाक्लृप्तसामान्यादिसन्निकर्षकल्पनानुपपत्तेः । किं च तादृशनिश्चयेऽपि तदपेक्षणेन संशयत्वस्याप्रयोजकतया विद्यमानविषयकप्रत्यक्षत्वादेरेव तज्ज्ञानजन्यतावच्छेदकत्वेन वर्तमानधर्मिके संशये न तद्धेतुतेति ।

केचित्तु अभवप्रत्यक्षेऽधिकरणे प्रतियोग्यारोपस्य हेतुतया संशयेऽपि कोटितया विरोधघटकतया भावाभावभानाश्यकत्वेन तत्र धर्मिज्ञानं हेतुः । न च लौकिकाभावप्रत्यक्षस्य तद्धेतुत्वेऽपि स्थाणौ तदभावावगाहिनः संशयस्य तदंशेऽलौकिकतया न तदपेक्षा । घटवति तदभावभ्रमस्याभावांशे लौकिकत्वेऽपि प्रतियोग्यधिकरणसंशयसंसर्गज्ञानसापेक्षत्वदर्शनेनालौकिकेऽप्यभावभ्रमे तद्वत्वसिद्धेः । प्रागुक्तसामान्यप्रत्यासत्तिजन्याभावप्रत्यक्षे प्रतियोग्याधिकरणसंसर्गज्ञानाभावेऽपि तदन्यत्वविशेषणात् नाव्यभिचारः । नचैवं [1]योगिज्ञानमाहार्यभ्रमस्याप्यभावात्तेषामभावबुध्यभावापातः । प्रतियोग्यधिकरणसंसर्गज्ञानाभावादिति वाच्यम् । योगिनामनाहार्यभ्रमाभावेऽप्याहार्यभ्रमसम्भवेन व्यभिचाराभावात् । तेषां तदभावाभ्युपगमेऽपि योगजधर्माजन्यत्वेन कार्यतावच्छेदकविशेषणाच्च । वस्तुतो [2]भावप्रत्यक्ष-

---

१. "योगिनां आहार्यभ्रमस्य ....." इति स्यात् । २. "अभावप्रत्यक्षस्य ससम्बन्धिकप्रत्यक्षत्वात्" इति स्यात् ।

ससम्बन्धिकप्रत्यक्षत्वादधिकरणज्ञानस्य प्रतियोगिज्ञानतदवश्यहेतुत्वे साधिकरणाभावप्रत्यक्षत्वस्य वा लाघवेनाधिकरणज्ञानजन्यतावच्छेदकत्वे प्रागुक्तसामान्यप्रत्यासत्तिजन्ये घटाभावादित्यभावप्रत्यक्षेऽपि कस्यचिद्घटादेरन्ततो भावस्यैवाभावाधिकरणस्य ज्ञानमावश्यकमिति सामान्येन हेतुना हेतुतायामव्यभिचारात्संशये धर्मिज्ञानहेतुतासिद्धिरित्याहुः ।।

न्यायदीपः

एतेन प्रामाण्यनिश्चये जाग्रति कथं सन्देह इति निरस्तम् । उत्तरकाले तस्य नाशात् । प्रामाण्यनिश्चये प्रामाण्यसन्देहात्संशयोपपत्तेश्च । यत्तु ''न च प्रामाण्यसंशयाद्विषयसंशयवत्प्रामाण्य-ज्ञाने प्रामाण्यसंशयात् प्रामाण्यसंशय इति वाच्यम् । प्रामाण्यज्ञानेपि स्वतः प्रामाण्यग्रहे संशयानुपपत्तेः'' इति **मणि**वचनं तदप्येतेनैव निरस्तं बोध्यम् । दोषोपनिपातस्थले मानसप्रामाण्यनिश्चये दोषवशेन प्रामाण्यानिश्चये तत्संशयोपपत्तेरिति । एवं वास्तवं मूलग्रन्थाद्युक्तं संशयोपपादनं प्रदर्श्याधुना यदुक्तं **मणौ** ''धर्मिज्ञानं च संशयहेतुः । अन्यथा धर्मिनियमः कोट्युत्कटत्वं च न स्यात्'' इति ग्रन्थेन धर्मिज्ञानाभावेन संशयाभावोपपादनदूषणं तदपि नेति भावेन प्रौढ्या समाधिद्वयमन्यापदेशेनाह ।। **केचित्वित्यादिना** ।। **अहेतुत्वादिति** ।। विशेष्येन्द्रियसन्निकर्षकोटिस्मृतिरूपविशेषणज्ञानतदुभयासंसर्गाग्रहादिविशिष्टज्ञानसामान्यसामग्रीत एव तदुत्पत्तौ तदतिरिक्ता संशये धर्मिज्ञानरूपा विशेषसामग्री न कल्प्या । तथाच संशयस्थले धर्मिणो व्यवसायस्यैवाज्ञानेन प्रामाण्यानिश्चयोपपत्या स्वतस्त्वाहानिः प्रामाण्यादिसंशयश्च युक्त इति भावः ।

ननु तुरगादौ वेगेन गच्छतः पुंसोऽनेकवृक्षेन्द्रियसन्निकर्षेपि क्वचिदेव पनसत्वादिसन्देहो न सर्वत्रेति एवंविधो धर्मिनियम एव संशये धर्मिज्ञानहेतुतां व्यवस्थापयतीत्यत आह ।। **धर्मिज्ञानस्य अहेतुत्वेपीति** ।। **धर्मिज्ञान-**

जनकेति ।। त्वयापि हि सर्वत्र सन्निकर्षेऽविशिष्टेपि क्वचिदेव धर्मिज्ञानं नान्यत्रेत्यत्र विषयमाहात्म्यादिकं नियामकं वाच्यम् । तदेव संशये नियामकमस्तु । तद्धेतोरेवास्तु हेतुत्वं मध्ये किं तेनेति न्यायात् । तेषामननुगतत्वेपि धर्मिज्ञानहेतुत्वेनानुगमसम्भवादिति भावः । यत्तु ''धर्मिज्ञानसामग्रीत्वेन हेतुत्वे लाघवाद्धर्मिज्ञानत्वेनैव हेतुत्वमस्तु'' इति **शिरोमणि**वचनम् । तन्न । क्लृप्तसामग्र्यैवोपपत्तावपूर्वधर्मिज्ञानहेतुताकल्पनस्य गुरुत्वात् ।।

ननु धर्मिज्ञानस्याहेतुत्वे संशये कोट्युत्कटत्वं न स्यात् । तस्याव्याप्यवृत्तितया जातित्वायोगेन संशयधर्मिणि संशयकोटिसहचरितानेकधर्मोपलम्भरूपस्य वा संशयधर्मिवृत्तितया गृह्यमाणधर्मेण सह कोटेर्भूयस्सहचारोपलम्भरूपस्य वा कोट्युत्कटत्वस्य वाच्यतया तादृशस्य धर्मिज्ञानाहेतुत्वे अनुपपत्तेरित्यत आह ।। **कोट्युत्कटत्वे त्विति** ।। दर्शनमेव हेतुरित्यन्वयः ।। **धर्म्यसंस्पृष्टत्वेन** ।। धर्म्यसम्बद्धत्वेनेत्यर्थः । ननु साधारणधर्मदर्शनस्य संशयहेतुत्वाद्धर्मज्ञानार्थं धर्मिज्ञानमावश्यकमित्यत आह ।। **ऊर्ध्वतादिसाधारणेति** ।।

केचिदित्युक्तास्वारस्यबीजं तु व्यवसायरूपसंशयधर्मिणः सुखादिवत् ज्ञातैकसत्वेन कोटिस्मृतेः पूर्वं तस्य साक्षिणा ग्रहणे प्रतिबन्धाभावाद्धर्मिज्ञानमावश्यकमित्यस्मदुक्तदिशैव संशयोपपादानं साधु । न तु धर्मिज्ञानानभ्युपगमेनेति ज्ञेयम् । अत एव ''ज्ञानमवश्यवेद्यम्'' इति वक्ष्यति । अन्यत्तु **गुरुटीकायाम्** ।

तर्कताण्डवम्

इतरे तु अन्यत्र विपर्यये धर्मिज्ञानस्य हेतुत्वेपि वर्तमानव्यवसायधर्मिकेऽनुव्यवसायरूपेऽप्रमायां प्रमात्वविपर्यये तस्याहेतुत्ववदन्यत्र

संशये धर्मिज्ञानस्य हेतुत्वेपि प्रामाण्यसंशये तस्याहेतुत्वं युक्तम् । नच प्रागारोप्यस्य प्रामाण्यस्य अनुपस्थितेर्न तदारोप इति वाच्यम् । स्वतस्त्वपक्षे प्रमायां प्रामाण्यप्रमितेरिव भ्रमे प्रामाण्यारोपस्यापि तदनपेक्षत्वादित्याहुः ।

अन्ये तु संशयस्थलेप्युक्तरीत्या सामग्रीसत्वेन आदावेव अनुव्यवसायेन प्रामाण्यनिश्चयेप्यनुव्यवसायनाशानन्तरं स्मृत्युपनीते व्यवसाये तत्संशयो युक्त एव । नह्यनुव्यवसायकाल एव संशयो न तु तदव्यवहितोत्तरकाल इति योगादिसम्पत्तिं विना ज्ञातुं शक्यम् । परमतेऽपि न प्रामाण्यसंशयकाले व्यवसायोस्ति । धर्मिज्ञानानन्तरभाविकोटिस्मरणकाल एव व्यवसायनाशादित्याहुः । एतदप्युक्तं ''अन्यथा'' इत्यादिना । प्रतिबन्धदशायां कार्याजननमात्रेण शक्तेः सहजत्वाभावे वह्न्यादौ दाहादिशक्तेः सहजत्वमिति व्यवस्थित्यनुपपत्तेरित्यर्थः ।।

युक्तिरत्नाकरः

अन्यत्र विपर्यय इति ।। शुक्त्यादावेव रजतत्वाद्यारोपो नान्यत्रेत्येतन्नियामकतया रजतादिनिष्टचाकचक्यादिमत्तया शुक्त्यादिज्ञानस्य तदारोपहेतुता त एव सा तत्वग्रहाविह निबन्धनमिति वदन्तीति भावः ।। **वर्तमानेत्यादि ।।** यथाहि घटादिप्रमानन्तरं तदनुव्यवसायेनान्यव्यवसायोपनीततद्वत्त्वादिघटितं प्रामाण्यं परिच्छिद्यते, तथा शुक्त्यादौ इदं रजतमिति भ्रमानन्तरं तदनुव्यवसायेनापि तदुपनीततद्वत्वादिघटितं प्रामाण्यं धर्मिज्ञानमन्तरेणैव तदुत्तरक्षण एव परिच्छिद्यते । न हि प्रमाप्रमानुव्यवसाययोः बाधानवतारदशायां मात्रयापि विशेषोऽनुभूयेत । स्ववृत्तिवर्तमानव्यवसायमात्रस्यैव स्वविषयोऽयं बाधकत्वात् । तत्प्रकारकत्वादेश्च व्यवसायावृत्तेरनुप-

स्थितस्यैव भानाभ्युपगमेन तद्विपर्यये तथात्वात् । तथा च धर्मिज्ञानस्यारोप्य-सादृश्यविषयकतया तज्ज्ञानजनकतया आरोप्यस्मारकस्य प्रागनुपस्थित-प्रामाण्यस्मारकत्वायोगेनापेक्षितेति भावः ।

नन्वेवमारोपहेतोरारोप्यज्ञानस्य [1]भावात् न तदारोप इत्याशङ्क्य निषेधति ।। **न चेति** ।। यद्विशिष्टप्रमायां यस्याखण्डस्य प्रथममुपस्थितिरपेक्ष्यते तस्यैवोपस्थितिस्तदारोपेऽपेक्ष्यत इति नियमात् । प्रामाण्यप्रमितौ प्रमात्वोप-स्थितेरनपेक्षणात् न तद्भ्रमेऽपि तदपेक्ष्यत इति भावः । आरोप्योपस्थिति-हेतोर्धर्मिज्ञानस्य प्रामाण्यारोपे तदभावेनानपेक्षणेऽपि कोटिस्मृतिद्वारा संशयहेतोस्तस्य संशयेऽवश्यमपेक्ष्यैव प्रमात्वाप्रमात्वकोटिस्मृत्यभावे तत्संशयायोगात् । तस्याश्च साधारणधर्मधर्मिज्ञानसाध्यतया धर्मिज्ञानोप-योगादित्यस्वरसमाहुरित्यनेन सूचयति । **अन्येत्विति** ।। निश्चये संशया-योगात् प्रामाण्यसंशयानुपरोधेन प्राक् प्रामाण्यनिश्चयो नेति ।

न स्वतस्त्वमिति कोऽर्थः । निश्चयकाले संशयो न युक्त इति उत तदुत्तकाले कदापीति । नाद्यः । इष्टापत्तेः । अनुव्यवसायनाशानन्तरमेव संशयाभ्युपगमात् । न च तदा व्यवसायरूपधर्मिण्यनाशात्संशयायोगः । स्मृत्युपनीते तत्र तदुपपत्तेः । परेणापि तथैव वाच्यत्वात् । अनुव्यवसाय-काल एव संशय इत्यस्य स्वतस्त्वनिरासोत्तरं कल्प्यत्वेनान्योन्याश्रयात् । नान्त्यः । विरोधिनिश्चयावसेयश्चासंशयोदये बाधकाभावादित्यखण्डार्थः । अत्र निश्चिते अर्थे देशान्तरे कालान्तरे च संस्कारप्रमोषादिना कथञ्चि-त्संशयोऽप्यवहितपूर्वक्षण एव निश्चितेऽति प्रामाण्ये संशये तदाश्रये व्यवसायेऽपि साम्यात् । न च व्यवसाये कदापि कस्याप्यसंशया-दनभ्यासदशायां प्रमाण्यसंशयस्य त्वनुभवसिद्धत्वात् तदनुरोधेन तदनुव्यवसायजन्यसंस्कारस्यैव प्रमेयाप्रमेयौ । अत एव तत्संस्कारज-

१. "अभावात्" इति स्यात् ।

स्मृत्युपनीते व्यवसाये प्रामाण्याप्रामाण्यसंशय इति वाच्यम् । तत्संशयस्य प्राकृतननिश्चयेनाप्युपपत्तौ तदुत्तरक्षण एवैकांश एव संस्कारप्रमोषकल्पनानुपपत्तेः । अन्यथा पुरोवर्तिनि चक्षुषा घटत्वं निश्चितवतेऽक्षिनिमीलने निश्चयनाशानन्तरं तत्रैव पुरोवर्तिनि स्मृत्युपनीतमनसा संशयापातात् । कथमन्यथा तत्तुल्यपरिमाणवत्तया स्मर्यमाणत्वे सति तद्वत्तया अस्मर्यमाणत्वहेतुना प्रातर्गजाद्यभावानुमानम् । तत्रापि संस्कारप्रमोषसम्भवादित्यस्वरसमन्येत्वित्यनेन दर्शयति ।। **अन्यथेत्यादिनेति** ।। प्रामाण्यं च स्वत एवेत्यत्र चोप्यर्थः । तथा च प्रतिबन्धकदशायां प्रामाण्यग्रहेऽपीत्यर्थः । स्वत एव ज्ञानग्राहकादेव तन्निष्टसहजशक्तिविषय एव न त्वप्रामाण्यवत्तदविषयत्वमित्येवकारार्थः । एवं प्रकृतत्वादन्यथेत्यस्योक्तार्थो युक्त एवेति ध्येयम् ।

।। **इति स्वतस्त्वे संशयोपपादनम्** ।। ५ ।।

न्यायदीपः

।। **अन्यत्रेति** ।। शुक्तिरूप्यादिविषयक इत्यर्थः । शुक्त्यादावेव रजतत्वाद्यारोपो नान्यत्रेत्येतन्नियामकतया रूप्यादिनिष्ठचाकचक्यादिमत्तया शुक्त्यादिज्ञानस्य तदारोपहेतुत्वमावश्यकमिति भावः ।। **वर्तमानेत्यादि** ।। यथा हि घटादिप्रमायां तदनुव्यवसायेन व्यवसायोपनीततद्धत्वादिघटितप्रामाण्यग्रहः, तथा शुक्तिरूप्याद्यप्रमायामपि तदनुव्यवसायेन तदुपनीततद्धत्वादिघटितप्रामाण्यं धर्मिज्ञानं विनैव तदुत्तरक्षण एव परिच्छिद्यत इत्युपेतं तद्धदित्यर्थः । प्रामाण्यानुपस्थितेः कथं तदारोप इत्याशङ्क्य निराह ।। **न चेत्यादिना** ।। अत एव पूर्वपक्षे **मणि**कृताप्युक्तम् ''अप्रमापि प्रमेत्येव गृह्यते'' इत्यादीति भावः ।

अत्रारुचिबीजं तु ज्ञानग्रहस्य साक्षित्वात्प्रामाण्यसन्देहस्य मानसत्वात्

ज्ञानग्रहेण च प्रामाण्याग्रहेण स्वतस्त्वभङ्गापत्तिनिरासाय प्रागुक्तरीतेरे-वानुसर्तव्यत्वादिति ज्ञेयम् ।

धर्मिज्ञानहेतुत्वं तेन प्रामाण्यनिश्चयं चोपेत्य संशयोपपादनं प्रकारान्तरेण दर्शयति ।। **अन्ये त्विति** ।। **उक्तेति** ।। बाधोद्धारग्रन्थोक्तरीत्येत्यर्थः । तदा व्यवसायस्यापि धर्मिणो नाशान्न संशय इत्यत आह ।। **स्मृतीति** ।। अनुव्यवसायाहितसंस्कारजन्यस्मृत्युपनीत इत्यर्थः । ननूपनीतस्य कथं संशये विशेष्यतया भानमित्यत आह ।। **परमतेऽपीति** ।।

अत्रापि कल्पे संशयादिस्थले ज्ञानग्रहस्य साक्षित्वात्प्रामाण्यग्रहस्य च मानसत्वान्मानसप्रामाण्यनिश्चयस्य नाशेऽपि ज्ञानग्राहकसाक्षिणा औत्तरिकानु-स्मृतिसिद्धसौषुप्तिकात्मस्वरूपानुभवरूपस्य सदा सत्वेन तेन प्रामाण्याग्रहेण ज्ञानग्रहेण प्रामाण्यग्रहणमुपेत्य तन्नाशेन संशयोपपादनस्याशक्यतया तदुपपादनस्य प्रागुक्तदिशैव कार्यत्वात्किमनेन प्रकारेण । न च ज्ञानज्ञानं मानसम् । तथात्वे कदाचित् तज्ज्ञानत्वे संशयाद्यापातात् । उक्तं हि ज्ञानपादे ।

''इच्छा ज्ञानं सुखं दुःखं भयाभयकृपादयः ।
साक्षिसिद्धा न कश्चिद्धि तत्र संशयवान्क्वचित्'' ।।

इत्यरुचिबीजं ध्येयम् । सिद्धान्तानुगुणस्याप्येतत्पक्षत्रयस्य तार्किकं प्रति दूषणतया वक्तुं शक्यमिति भावेनात्रोपन्यास इति भावः ।। **एतदपीति** ।। उक्तरीत्या संशयस्थले स्वतस्त्वोपपादनमपीत्यर्थः ।

।। **इति स्वतस्त्वे संशयोपपादनम्** ।। ५ ।।

प्रामाण्यनिश्चयस्य प्रवर्तकत्वम्

न चाप्रयोजकाः स्वतस्त्वहेतवः । परतस्त्वे प्रामाण्यज्ञानस्यापि प्रामाण्यं संवादादिलिङ्गजन्यानुमितिरूपेणान्येन ज्ञानेन ग्राह्यम्, एवं तत्प्रामाण्यमप्यन्येनेति फलमुख्येका अनवस्था । एवं प्रामाण्यस्यानुमेयत्वे लिङ्गव्याप्त्यादिज्ञानप्रामाण्यानिश्चयेऽसिद्ध्यादिप्रसङ्गेन तन्निश्चयार्थं लिङ्गाद्यन्तरं, तज्ज्ञानप्रामाण्यनिश्चयश्च स्वीकार्यः, एवं तत्र तत्रापीति कारणमुख्यान्यपीत्यनवस्थाद्वयापत्तेः ।

न च यत्र दोषशङ्कादिरूपाकाङ्क्षा तत्रैव संवादापेक्षेति नानवस्थेति वाच्यम् । तथात्वे प्रतिबन्धनिरासार्थमेव संवादापेक्षा न तु प्रामाण्यग्रहार्थमिति मन्मतप्रवेशापत्तेः । उक्तं हि भगवत्पादैः "आकाङ्क्षाया एव बुद्धिदोषात्मकत्वात्" इति ।

युक्तिरत्नाकरः

।। **न चाप्रयोजका इति** ।। यद्यपि प्राचीनानुमानेषु न चाद्यो हेतुरप्रयोजकः नोक्तहेतुत्वप्रयोजकत्वमाशङ्क्य निराकृतम् । तथापि प्रयुक्ताप्रयुक्तसाधारणसकलस्वतस्त्वानुमानेष्वप्रयोजकतामाशङ्क्य निराक्रियते । अत एव स्वतस्त्वहेतुत इत्येवोक्तं न तु प्राक् प्रसक्त इति । परतस्त्वे जलादिज्ञानप्रामाण्यस्य समर्थप्रवृत्तिजनकत्वादिलिङ्गानुमितिविषयत्वे प्रामाण्यज्ञानस्य तदनुमितिरूपप्रामाण्यज्ञानस्य संवादः समर्थप्रवृत्यादिरूपः समर्थप्रवृत्तिजनकजातीयत्वं अन्येन तज्जलादिज्ञानप्रामाण्यानुमिते ग्राह्यविषयीकार्यं फलमुखिफलप्रामाण्यानुमितेर्मुखं उपस्थितिर्यस्या सा जलादिज्ञाने प्रागनुमेयः । तत्रापि प्रामाण्यानुमितो प्रामाण्यानुमेयमिति प्रामाण्यानुमितिरूपफलनिष्टप्रमानिश्चयपरेति पर्यवसितोऽर्थः ।। **प्रामाण्यनिश्चय इति** ।। निश्चित-

प्रामाण्यकस्यैव सत्तानिश्चयरूपत्वादिति भावः । कारणं प्रामाण्यानुमिति-हेतुः । लिङ्गव्याप्तिज्ञानादिमुखमुपस्थितिहेतुर्यस्याः सा तन्निष्टप्रामाण्यनिश्चये सत्येव जलनादिज्ञानप्रामाण्यानुमितिः । तत्प्रामाण्यानुमितिश्च तल्लिङ्गादि-ज्ञानप्रामाण्यनिश्चये सत्येवेत्येवं परंपरेत्यर्थः ।

ननु मुखशब्दस्य स्वाङ्गवाचित्वाभावात् स्वाङ्गाच्चोपसर्जनाद-संयोगोपधादित्यतो नङाविति चेत् तेन चेत् तत्तथायुतमित्यनेन प्रामाण्याङ्ग-सदृशस्यापि स्वाङ्गशब्देन ग्रहणोक्त्या सुस्तनी प्रतिमेतिवत्सादृश्यविवक्षया फलमुखीति प्रयोगोपपत्तेः । सुमुखशालेत्यत्र तु सुमुखशब्दद्वारवाचितया सादृश्यविवक्षणात् ङीभावः । ननु न सर्वत्र प्रामाण्यनिश्चया[1]पेक्षया येनानवस्था । न हि करतलामलकादौ प्रामाण्यनिश्चयाभावापराधेन प्रवृत्तिविलम्बः । किन्तु यत्रैव ज्ञानदोषत्वशङ्का तत्रैव । सा च न सार्वत्रकीत्याह ।। **न चेति** ।। उदाहरिष्यमाणभगवत्पादीयवाक्यगताकाङ्क्षा-शब्दार्थं विवृण्वन्नाह ।। **दोषशङ्कादिरूपेति** ।। संवादापेक्षया संवादादि-लिङ्गप्रामाण्यानुमित्यपेक्षा यत्र दोषशङ्का तत्र संवादापेक्षेति वदता तन्निवर्त-नार्थं संवादस्याङ्गीकृतम् । अन्यथा दोषशङ्काभावेऽपि प्रामाण्यनिश्चयार्थं संवादापेक्षायामनवस्था तादवस्था । तथा चास्मन्मतप्रवेशापत्तिरित्याह ।। **तथात्व इति** ।। प्रतिबन्धनिरासार्थमिति स्वमतानुवादः ।। **आकाङ्क्षाया इति** ।। दोषजन्यत्वशङ्क्या हि प्रामाण्यनिर्णयाकाङ्क्षोदेतीत्याकाङ्क्षाशब्देन तज्जनितदोषशङ्का लक्ष्यते । लाक्षणिकपदोपादानप्रयोजनं च यावद्दोषशङ्कमेव प्रामाण्यनिश्चयापेक्षा, अतो नानवस्थेति ज्ञापनम् । तथा च परोक्तदोषज-त्वादिशङ्काया एव बुद्धिदोषशब्देनास्माभिरुक्तत्वात् तन्निरासार्थं संवादापेक्षेत्यस्मन्मतप्रवेशः इत्यर्थः ।

---

१. ''अपेक्षा'' इति स्यात् ।

न्यायदीपः

।। **अप्रयोजका इति** ।। हेतवः सन्तु स्वतो ग्राह्यत्वरूपसाध्यं मास्त्वित्यत्र विपक्षे बाधकस्य साध्यसाधनेऽनुकूलतर्कस्याभावादिति न चेत्यर्थः । पूर्वं क्वचिद्धेतावप्रयोजकत्वोद्धारस्य प्रातिस्विकरूपेण कृतत्वेऽपि सामान्यतोयमुद्धार इत्यदोषः । अत एव हेतव इत्युक्तिः । ''तत्प्रामाण्यस्याप्यन्येन ग्रहणाङ्गीकारेऽनवस्थानात्'' इति टीकां विवृण्वानो मण्याद्युक्तदिशैव अनवस्थाद्वयमाह ।। **परतस्त्व इति** ।। ज्ञानग्राहकसाक्षिव्यतिरिक्तेन येन केनापि ग्राह्यत्व इत्यर्थः ।

।। **फलमुखीति** ।। फलं प्रामाण्यज्ञानं मुखमुपस्थितिहेतुर्यस्याः सा फलमुखीत्यर्थः । कारणान्तरानवस्थोपलक्षणतयैकत्रानवस्थानिर्धारणाय वा पराभ्युपगमानुरोधेन वानुमेयत्व इत्यापादकनिर्धारणोक्तिः । पूर्वं तु सामान्यमुपेत्य परतस्त्व इत्याद्येवोक्तम् । न तु विशिष्येति ध्येयम् ।। **कारणमुखीति** ।। पूर्ववद्व्याख्येयम् । ज्ञानानां प्रामाण्यमनुमितिग्राह्यं अनुमितिप्रामाण्यं तु स्वत इति प्राचीनमते फलमुखानवस्थाभावात्कारणमुख्या अप्युक्तिरित्येके ।

अन्ये तु तन्मते क्वापि स्वप्रकाशत्वाभावात्तत्राप्यनवस्थाऽस्त्येव । अत एव परतस्त्व इति सामान्योक्तिः । न त्वनुमेयत्व इति विशिष्येत्याहुः ।

यत्र तु प्रामाण्यज्ञानेऽप्रामाण्यशङ्कया प्रामाण्यसंशयस्तत्र प्रामाण्यज्ञानप्रामाण्यनिश्चयादेव प्रामाण्यनिश्चय इत्यादि**मण्युक्त**माशङ्कते ।। **न च यत्रेति** ।। **दोषेति** ।। दुष्टकरणजन्यत्वादिशङ्कारूपेत्यर्थः । ''न चाकाङ्क्षायामेव प्रमाणान्तरापेक्षत्वादनवस्थाभाव'' इति तत्वनिर्णयानुकरणादाकाङ्क्षेत्युक्तिः ।। **उक्तं हीति** ।। तत्वनिर्णये । आकाङ्क्षेति बुद्धिदोष इत्यप्रामाण्यशङ्केति चानर्थान्तरम् ।

तर्कताण्डवम्

न चावश्यवेद्यत्वाभावान्नानवस्था । ज्ञानमवश्यवेद्यमिति वक्ष्यमाणत्वात् । कृष्यादौ सन्देहात्प्रवृत्तावपि बहुवित्तव्ययायाससाध्ये पारत्रिकफलगे यागादौ निष्कम्पप्रवृत्यर्थं प्रामाण्यस्याप्यवश्यवेद्यत्वात् ।

ननु तत्राप्यर्थनिश्चय एव हेतुः । समानविषयत्वात् । आवश्यकत्वाच्च । न तु प्रामाण्यनिश्चय इति चेन्न । पीतः शङ्ख इत्यादावाकारान्तरार्थोल्लेखाभावेन, शङ्खः पीतत्वेनैव भातीत्यनुभवेन चैकाकारनियते संशयान्यज्ञानरूपे निश्चये सत्यपि पीतार्थिनोऽप्रवृत्तिदर्शनात् ।

न चाप्रामाण्याज्ञानरूपसहकारिविरहादप्रवृत्तिरिति वाच्यम् । एवं तर्ह्यप्रामाण्यस्याप्यनुमेयत्वेन तदननुमितिदशायां पीतार्थिनः प्रवृत्तिः स्यात् । किञ्चाप्रामाण्याज्ञानात्प्रवृत्तौ प्रामाण्याज्ञानान्निवृत्तिः स्यात् ।

किञ्च तदभाववति तत्प्रकारकत्वरूपाप्रामाण्यशङ्काद्यभावः अनेकाभावघटितत्वाद् गुरुः । प्रामाण्यनिश्चयस्तु न तथेति लघुः । एवमप्रामाण्यशङ्काद्यभाववत्तद्वति तत्प्रकारकज्ञानत्वरूपप्रामाण्यात्यन्ताभावशङ्काद्यभावः एवं तद्व्याप्यदोषजन्यत्वादिशङ्काद्यभावोपि हेतुरित्यभावा अनेके । प्रामाण्यनिश्चयस्त्वेकः । अभावानां प्रामाण्यनिश्चयविरोध्यभावत्वेनैकत्वे त्वावश्यकत्वाल्लाघवाच्च प्रामाण्यनिश्चय एव सहकारी ।

युक्तिरत्नाकरः

प्रकारान्तरेणानवस्थापरिहारमाशङ्क्य निषेधति ।। न चेति ।। ज्ञानस्यावश्यवेद्यत्वात् तद्वर्तिप्रामाण्यनिश्चय संशयापत्यार्थसन्देहे प्रवृत्यापत्या

१. 'द्व्याकारार्थोल्लेखाभावेन, अनेकाकारार्थोल्लेखाभावेन' इति च पाठान्तरम् ।

तत्प्रामाण्यस्यापि निश्चयतया तन्निश्चयस्याप्यवश्यवेद्यत्वे तत्प्रामाण्यस्याप्येवमित्यनवस्थेत्याह ।। **ज्ञानमिति** ।।

ननु प्रामाण्यसंशयेऽपि कृष्यादौ फलसाधनत्वज्ञाने प्रामाण्यसन्देहात् । यद्यपि कृष्यादौ फलसाधनत्वनिश्चयस्यास्त्येव तथापि स्वरूपयोग्यतानिश्चय एवासौ वचनात् । न च तावन्मात्रेण निष्कम्पप्रवृत्तिः । अनेनावश्यं फलं भविष्यतीत्येवंरूपस्तु निष्कम्पप्रवृत्तिः । फलोपधाननिश्चयो निश्चयप्रामाण्यको नास्त्येव । किन्तु तत्सन्देह एवेत्यर्थः । बहुत्वव्यवसाययोर्विशेषणं अवश्यवेद्यत्वादिति । तथा च तद्भेदनेऽवश्यं वेद्यत्वात ज्ञायमाने प्रामाण्यज्ञाने निष्कम्पप्रवृत्त्ययोगात् । तज्ज्ञाने च पुनरनवस्थेति भावः ।

ननु पारत्रिकफलकयागादावपि निष्कम्पप्रवृत्तौ न प्रामाण्यनिश्चयो हेतुर्येनानवस्था । किन्त्वर्थनिश्चय एव तस्य प्रवृत्तिसाधनविषयकत्वात् न चार्थनिश्चयस्तत्प्रामाण्यनिश्चयेत्येवेत्यनवस्थेति द्वावपि प्रवर्तकौ गौरवादावश्यकार्थनिश्चयादेव प्रवृत्त्युपपत्तेः । न च तादृगर्थनिश्चयेऽपि प्रामाण्यनिश्चये सत्येवेत्यनवस्थातादवस्थ्यम् । न । गृहीतप्रामाण्यसजातीयस्यागृहीतप्रामाण्यस्यैव प्रवर्तकत्वदर्शनेन स्वतःशङ्काविरहेऽत्यर्थनिश्चयादेव प्रवृत्युपपत्तेः । क्वचिच्छङ्कायामपि तन्निवृत्यर्थं प्रामाण्यनिश्चयापेक्षायामपि धर्मिज्ञानकोटिस्मरणाद्यभावादिना शङ्काभावे तदनुपेक्षणादिति शङ्कते ।। **नन्विति** ।।

अन्वयव्यतिरेकाभ्यां प्रामाण्यनिश्चयस्यैव प्रवर्तकत्वात् अर्थनिश्चयमात्रस्य तस्मिन् सत्यपि प्रामाण्यनिश्चयेऽप्रवृत्तेरिति ।। **नेति** ।। आकारार्थोल्लेखाभावे स्थाणुश्चेन्न पुरुषः पुरुषश्चेन्न स्थाणुरिति परस्परप्रतिक्षेपाकारार्थोल्लेखाभावेन । क्वचिद्व्याकारेति पाठः । तत्र व्याकारत्वमर्थोल्लेखविशेषणं परस्परप्रतिक्षेपिव्याकारतयार्थोल्लेखेत्यर्थः । आकारान्तोल्लेखेति पाठेप्येष एवार्थः ।

अप्रवृत्तिदर्शनात्प्रवृत्यदर्शनात् । न तु तत्र पीतार्थिप्रवृत्यभावेन प्रामाण्य-निश्चयाभावात् । किंत्वप्रामाण्यस्य तत्र निश्चितत्वेन प्रवृत्तिहेतोर-प्रामाण्यज्ञानस्याभावादेवेत्याशङ्क्य निषेधति ।। **नचेति** ।। **एवं हीति** ।। ननु यत्र शङ्खे पूर्वं पीतत्वाभावो स्मृतो वा तत्र प्रवृत्यापादाने इष्टापत्तिः । यत्र तु गृहीतो न विस्मृतश्च तत्र नयनगतपित्तिदोषाज्जायमानं पीतः शङ्ख इति ज्ञानं सवितृसुषिरज्ञानवत् प्रामाण्यधीकलङ्कितमेव जायत इति न तत्र प्रवृत्यापादनं युक्तमिति चेन्न । न ह्यनुत्पन्नज्ञाने प्रामाण्यशङ्कातन्निश्चयोवा भवतीति धर्मिज्ञानोत्तरकालमेव तदनुमितेः । प्राक् प्रवृत्यापादनसम्भवा-द्धर्मिज्ञानमात्रस्य च संशयानुमित्योरसामग्रीत्वेन यज्ज्ञानं यत्र प्रतिबन्धकं तत्सामग्र्यपि तत्र प्रतिबन्धिकेति न्यायानवताराच्च । अप्रामाण्यधीकलङ्कित-मेवेत्युक्तिस्तु नियमेन तदुत्तरकाले तदवताराभिप्राया ।

वस्तुतस्तु व्यवसाये पीतत्वस्येव प्राचीनानुभवजन्यसंस्कारेण पीतत्वा-भावस्याप्युपनये साक्षिणा पीतत्वाभाववत्येव पीतत्वप्रकारकं ज्ञानं मम वृत्तिमित्युत्तरक्षण एवाप्रामाण्यपरिच्छेदः । परमताभिप्रायेण चैतदुक्तमिति बोध्यम् । लोके रजतार्थिनो रजतज्ञाने प्रामाण्यनिश्चये सति प्रवृत्तिः, अप्रामाण्यनिश्चये च निवृत्तिरिति सर्वानुभवसिद्धमपि अपहायाप्रामाण्य-ज्ञानस्यापि प्रवर्तकत्वाभ्युपगमे निवर्तकत्वमपि प्रामाण्यज्ञानस्यैव स्यात् । न चेष्टापत्तिः । गृहीतप्रामाण्यज्ञानसजातीये त्वयापि निवृत्यनभ्युपगमादिति भावेनाह ।। **किञ्चेति** ।।

ननु प्रामाण्यज्ञानमभावरूपत्वाद्गुरु अप्रामाण्यज्ञानं तु भावरूपत्वात् लघ्विति तदेव निवृत्तौ हेतुरिति चेत् तर्ह्यप्रामाण्यज्ञानमेव हेतुः स्यादित्याह ।। **किञ्च तदभावेति** ।। शङ्कादीत्यादिपदेन निश्चयपरिग्रहः । एवमुत्तर-त्रापि । एवं शरीरगौरवादप्रामाण्यज्ञानस्य प्रवृत्तावहेतुत्वमभिधाय अनेक-कारणताकल्पनापाताच्च न तथात्वमित्याह ।। **एवमिति** ।। दोषजन्यत्वा-

दित्यादिपदेन विसंवादिप्रवृत्तिजनकत्वादिपरिग्रहः । नन्वप्रामाण्यशङ्काद्यभावानामेकत्वेप्येकावच्छेदकक्रोडीकारान्न गौरवम् । अन्यथा प्रामाण्यनिश्चयव्यक्तीनामनेकत्वात् न हेतुता स्यात्तत्राह ।। **अभावानामिति** ।। प्रामाण्यनिश्चयं प्रति विरोधिनां प्रतिबन्धकानामप्रामाण्यशङ्कादीनामभावस्तत्त्वेनानुगता हेतव इत्यर्थः । आवश्यकत्वमिहावश्योपस्थितिकत्वम् ।

ननु यत्रैकस्मिन्धर्मिणि धर्मद्वयं तत्र कारणतावच्छेदकत्वकल्पने लाघवगौरवावतारो, यथा दण्डज्ञाने विशेषणज्ञानत्वविशेषणतावच्छेदकत्वप्रकारकत्वयोः । न चेह प्रामाण्यनिश्चयत्वप्रामाण्यनिश्चयविरोध्यभावत्वयोः तथात्वमिति कथमिति चेत् । यत्र लघुगुरुधर्मावच्छिन्नयोरन्यत्रैव कारणताकल्पनाप्रसक्तिस्तत्र लघुधर्मावच्छिन्नस्यैव कारणत्वं न गुरुधर्मावच्छिन्नस्येत्यत्रापि तदवतारसम्भवात् । इदमुपलक्षणम् । कारणतावच्छेदकावच्छिन्नयत्किञ्चित्कारणसत्व एव कार्यावश्यम्भावेनोक्तावाच्छेदकावच्छिन्नाप्रामाण्यशङ्काविरहस्थले प्रामाण्याभावशङ्कायामपि प्रवृत्तिप्रसङ्गदोषात् नेदमवच्छेदकमित्यपि बोध्यम् । न च प्रामाण्यनिश्चयविरोध्यसमानकालीनोक्ताभावत्वेन नानुगम इति न दोष इति वाच्यम् । एवमप्रामाण्याद्यभावानामप्युक्तप्रकारेणानुगमसम्भवेन प्रतिबन्धकाभावकूटस्य हेतुत्वमिति तत्सिद्धान्तक्षतेः । शिष्टं स्वप्रस्तावे ।

न्यायदीपः

तत्वनिर्णयटीकोक्तरीत्या प्रकारान्तरेणानवस्थाभावमाशङ्क्य निराह ।। **न चेति** ।। ज्ञानस्येति शेषः ।। **अवश्यवेद्यमिति** ।। एतेन चरमप्रामाण्यज्ञानस्य ज्ञानाभावेन, कोटिस्मरणाभावेन, विषयान्तरसञ्चारेण, वा प्रामाण्यसंशयानवश्यम्भावान्नानवस्थेति **मण्या**द्युक्तं निरस्तं ध्येयम् । नन्वस्तु

ज्ञानस्यावश्यवेद्यतया ज्ञातत्वेन तत्प्रामाण्यानिश्चये तत्संशयोऽवर्जनीयः । तथापि कृष्यादाविव प्रवृत्तिरस्त्वित्यत आह ।। **कृष्यादाविति** ।।

''यत्राप्रामाण्यशङ्का नास्ति करतलादिज्ञाने तत्र व्यवसाय एवार्थनिश्चयः तत एव निष्कम्पप्रवृत्तिः'' इत्यादि**मण्याद्युक्तमाशङ्कते** ।। **ननु तत्रापीति** ।। पारलौकिकयागादावपीत्यर्थः ।। **आवश्यकत्वाच्चेति** ।। प्रामाण्यनिश्चयप्रवर्तकत्ववादिनाप्यर्थनिश्चयस्याभ्युपेयत्वादिति भावः ।

(१) किमर्थनिश्चय एव प्रवर्तकः उत (२) प्रामाण्यविरोधिज्ञानविरहसहकारिसहितः, अथ (३) प्रामाण्यविरोधिज्ञानविरहः न सहकारी किन्तु प्रवर्तकतावच्छेदकः, (४) यद्वाऽर्थनिश्चय एव प्रवर्तकः अप्रामाण्यादिज्ञानं प्रतिबन्धकं प्रतिबन्धकान्तरसम्पादकं वा, इति विकल्पान् हृदि कृत्वाऽद्यो व्यभिचारीत्याह ।। **पीत इति** ।। शुक्लो वेत्याकारान्तरेत्यर्थः ।। **द्व्याकारार्थेति** ।। अकारान्तरेति क्वचित्पाठः ।

द्वितीयं शङ्कते ।। **न चाप्रामाण्येति** ।। प्रामाण्यविरोधिनो निश्चयसंशयसाधारणज्ञानाभावरूपसहकारीत्यर्थः । इष्टापत्तिमाशङ्क्याह ।। **किञ्चेति** ।। नन्वप्रामाण्यज्ञानस्य प्रतिबन्धकत्वं सर्वसिद्धमित्यस्तु तद्विरहात्तत्र प्रवृत्तिः । प्रामाण्यज्ञानप्रवर्तकत्वमद्यापि न सिद्धमिति कथं तदभावान्निवृत्तिरापाद्यत इत्यतस्तत्साधयति ।। **किञ्चेति** ।। शङ्कादीत्यादिपदेन निश्चयग्रहः ।। **विरोध्यभावत्वेनेति** ।। [१]विरोधिनिश्चयविषयाभावत्वेनेत्यर्थः ।

तर्कताण्डवम्

नचाप्रामाण्याज्ञानमप्यावश्यकम् । प्रामाण्यनिश्चयस्याप्यप्रमात्वेन ज्ञातस्याप्रवर्तकत्वादिति वाच्यम् । मन्मते तस्यापि निश्चितप्रामाण्यकस्यैव प्रवर्तकत्वात् ।

१. ''विरोधिनिश्चयाभावत्वेन'' इति स्यात् ।

न चाप्रामाण्यशङ्काभावः क्लृप्तः प्रामाण्यनिश्चयस्तु कल्प्य इति वाच्यम् । गृहीतप्रामाण्यज्ञानसमानविषयकज्ञानान्तरे निष्कम्प-प्रवृत्तिजनक[1]ज्ञानत्वमात्रेण सामग्रीसत्वेन तत्क्लृप्तेरुक्तत्वात् । फल-मुखगौरवस्य चादोषत्वात् । अन्यथा अनुमितौ व्याप्तिज्ञानं न हेतुः । किं तु सहचारदर्शनवतो व्यभिचाराज्ञानम् । एवं पक्षे लिङ्गज्ञानं न हेतुः । किं तु पक्षज्ञानवतः पक्षे लिङ्गासंसर्गाग्रहः । एवं प्रवृत्तौ विशिष्टज्ञानं न हेतुः । किं तु भेदाग्रहः । एवमर्थेन्द्रियादि-सबन्धेऽर्थाभावाज्ञानं प्रवर्तकम् न त्वर्थनिश्चय इत्याद्यतिप्रसङ्गः ।

एतेन उक्तरूपोर्थनिश्चय एव प्रवृत्तिहेतुः । अप्रमात्वेन अज्ञात-त्वादिकं दण्डगतदार्ढ्यवत् कारणतावच्छेदकम् । तदभावात्पीतः शङ्ख इति ज्ञानान्न प्रवृत्तिरिति निरस्तम् । लाघवेन प्रमात्वेन ज्ञातत्वस्यैव तदवच्छेदकत्वौचित्यात् । अन्यथा अनुमित्यादौ सहचारादिज्ञानमेव हेतुः व्यभिचरितत्वादिनाऽज्ञातत्वं कारणतावच्छेदकमिति स्यात् ।

युक्तिरत्नाकरः

ननु प्रामाण्यनिश्चये [2]प्रामाण्यशङ्कायामप्रवृत्त्या प्रामाण्यनिश्चयहेतुत्ववादि-नाप्यप्रामाण्यशङ्काद्यभावस्यावश्यहेतुता वाच्येत्युक्तप्रकारेण गुरुत्वेऽप्या-वश्यकत्वात् तस्यैव हेतुता न प्रामाण्यनिश्चयस्येत्याशङ्क्य निषेधति ।। **न चेति** ।। प्रामाण्यनिश्चयस्यापि प्रामाण्यनिश्चय एव प्रवृत्तिहेतुः लाघवात् । नाप्रामाण्यशङ्काद्यभावो गौरवात् । अनवस्थायाश्च परिहरिष्यमाणत्वादिति । न कापि तस्य प्रवृत्तिहेतुतेति [3]नावश्यकहेतुतेति परिहरति ।। **मन्मत इति** ।।

---

१. 'ज्ञानमात्रे च' इति पाठान्तरम् । २. ''अप्रामाण्यशङ्कायां'' इति स्यात् । ३. ''नावश्यहेतुता'' इति स्यात् ।

ननु यथा यत्र प्रामाण्यनिश्चयस्तत्राप्रामाण्यशङ्काद्यभावनियमस्तथा न प्रामाण्यनिश्चयनियमः । स्वतस्सिद्धशङ्काविरहस्थले प्रामाण्यनिश्चयाभावात् । तथा च नियतपूर्ववर्तिनि तदभावेऽन्यथासिद्धत्वमात्रं कल्पते । न तु प्रामाण्यनिश्चयस्य हेतुता । तस्य तद्धेतुतायाश्च कल्पनापातादित्याशङ्क्य निषेधति ।। **नचेति** ।। **सामग्रीसत्वेनेति** ।। प्रामाण्यानुमित्यनन्तरमेवोत्पन्नव्यवसायपदस्थले च विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयासंसर्गाग्रहविशेषणसन्निकर्षादिरूपसामग्र्याः सत्वेन प्रामाण्यनिश्चयस्यापि क्लृप्ततया तत्रैवान्यथासिद्धत्वं कल्प्यते नान्यत्र । उक्तगौरवादित्यर्थः । अस्तु वा कल्प्यत्वं एवमपि न दोष इत्याह ।। **फलमुखेति** ।। **अदोषत्वाच्चेति** ।। चकारो भिन्नक्रमः । करणत्वकल्पनावसरे अवच्छेदकगौरवादेरिव प्रामाण्यनिश्चयकल्पनस्यानुपस्थितत्वात् । पश्चात्तदुपस्थितावाप्युपजीव्यविरोधेन गृहीतकारणत्वाबाधकत्वादिति भावः । **अन्यथा** फलमुखगौरवस्यागृहीतत्वेनाबाधकत्वे । यदि च व्यभिचाराज्ञानादेरभावरूपतया गौरवात् व्याप्तिज्ञानादेरिव हेतुता तदा प्रकृतेऽपि तथास्त्विति भावः ।

न्यायदीपः

तौल्यमाशङ्क्य निराह ।। **न चाप्रामाण्याज्ञानमपीति** ।। **मन्मत इति** ।। अनवस्था तु निरसिष्यत इति भावः ।। **क्लृप्त इति** ।। सर्वत्र सत्वादिति भावः ।। **ज्ञानान्तर इति** ।। क्लृप्तेरुक्तत्वादित्यन्वयः । बाधोद्धारग्रन्थ इत्यर्थः ।। **सामग्रीसत्वेनेति** ।। प्रामाण्यनिश्चयसामग्रीसत्वेनेत्यर्थः । कल्प्यत्वमुपेत्यापि आह ।। **फलमुखेति** ।। कारणताकल्पनावसरेऽवच्छेदकगौरवादेरिव प्रामाण्यनिश्चयकल्पनस्य अनुपस्थितत्वात् पश्चात्तदुपस्थितावुपजीव्यविरोधेन गृहीतकारणत्वाबाधकत्वादिति भावः । विपक्षे बाधकं चाह ।। **अन्यथेति** ।। एवं क्लृप्तत्वे गौरवस्यादोषत्वे च

प्रामाण्यनिश्चयस्य अप्रवर्तकत्वमुपेत्य अप्रामाण्याज्ञानसहितार्थनिश्चयस्यैव प्रवर्तकत्व इत्यर्थः ।

तृतीयकल्पं निराह ।। **एतेनेति** ।। **उक्तेति** ।। अप्रामाण्यज्ञान-शून्यार्थनिश्चय एवेत्यर्थः । एतेनेत्युक्तं व्यनक्ति ।। **लाघवेनेत्यादिना** ।।

तर्कताण्डवम्

एतेनैवार्थनिश्चय एव प्रवर्तकः । पीतः शङ्ख इत्यादौ त्वप्रामाण्य-ज्ञानं प्रवृत्तिप्रतिबन्धकमिति निरस्तम् । निर्विषयस्य जातिविशेषेणैव प्रतिबन्धकस्य मण्यादेस्त्वन्मते स्वाभावरूपकारणविघटनरूपतया प्रतिबन्धकत्वेपि मन्मते शक्तिविघटकत्वेन प्रतिबन्धकत्वेपि यथा जातिविशेषरहितस्य व्यभिचारादिज्ञानस्य मतद्वयेप्यनुमित्यादिजनकी-भूतव्याप्त्यादिज्ञानविघटकत्वेनैव तत्प्रतिबन्धकता तथैव अप्रामाण्य-ज्ञानस्यापि प्रवृत्तिहेतुभूतज्ञानविघटकत्वेनैव प्रतिबन्धकतेति वक्तव्ये अर्थनिश्चयस्य पीतः शङ्ख इत्यादौ सत्वेन तद्विघटनासम्भवात्तेन विघटनीयस्य प्रामाण्यज्ञानस्य हेतुत्वसिद्धेः । ज्ञानं हि ज्ञानान्तरस्य विषयद्वारैव विरोधीति स्वविषयविरुद्धविषयकमेव ज्ञानं विघटयति । अन्यथा व्यभिचारादिज्ञानमपि स्वाभावरूपहेतुविघटनतया अनु-मित्यादिप्रतिबन्धकं वा सहचारादिज्ञानगतशक्तिविघटकत्वेन प्रतिबन्धकं वा स्यात् । न तु व्याप्त्यादिज्ञानविघटकम् । बाधादिस्तु ग्राह्याभावविषयकत्वेन साक्षाद्विरोधित्वात्स्वत एवानुमिति-प्रतिबन्धकः । ज्ञाननिष्ठाप्रामाण्यविषयकज्ञानं तु घटिविषयकप्रवृत्तेर्न साक्षाद्विरोधि ।

युक्तिरत्नाकरः

[1]प्रवृत्तावर्थनिश्चयो प्रामाण्यशङ्काद्यभावस्य हेतुतावच्छेदकत्वकल्पनम् । अन्यथा सिद्धत्वांशस्याकल्पनीयत्वात् । न चार्थनिश्चयस्यैवावच्छेदकत्वं किन्नोच्यते विनिगमकाभावादिति वाच्यम् । प्रवृत्तिसमानविषयतया चार्थनिश्चयस्यैव हेतुत्वकल्पनस्यौचित्यादिति यन्मतं तदप्युक्तयुक्त्यतिदेशेन निरस्यति ।। **एतेनैवेति** ।। पूर्वप्रामाण्यशङ्काद्यभावस्य हेतुतैवोक्तौ हेतुत्वप्रामाण्यशङ्कादेः प्रतिबन्धकत्वमनभिप्रेतमिति ततो भेदः ।। **जाति-विशेषेणेति** ।। ननूत्तेजकाभावविशिष्टमणित्वेनैव मणेः प्रतिबन्धकत्वम् । तच्च न जातिः । तथाप्युत्तेजकविशिष्टमन्त्रादौ विशेष्यतावच्छेदक-मन्त्रत्वादेरजातित्वात् अपूर्वविशेषविशिष्टवर्णसमूहवत् तत्तज्ज्ञानादौ वर्णेषु च व्यासज्यवृत्तितायां गत्वादिना साङ्कर्येण च तदनुपपत्तेरिति चेन्न ।। **ज्ञानातिरिक्तप्रतिबन्धकस्येति** ।। एवं च साक्षादविरोधिनो ज्ञानस्य प्रतिबन्धकता सा जनकज्ञानविघटकतयेति विवक्षितव्याप्तौ मण्यादौ व्यचिारवारणाय ज्ञानपदमिति तद्व्यावर्त्यमुक्तं भवति । जातिविशेषरहितस्य ज्ञानरूपस्य यथा जातिविशेषेत्यादिना तथैवेत्यवक्तितेन दृष्टान्ते व्याप्तिदर्शनं कृतं तथैवेत्यानिा हेतुत्वसिद्धरित्यन्तन । अप्रामाण्यादिज्ञानं प्रवृत्तिजनकविघटकं तत्साक्षादविरोधित्वे सति तत्प्रतिबन्धकज्ञानत्वा-दित्यनुमानेन परिशेषात् प्रामाण्यनिश्चयप्रतिबन्धकत्वसिद्धिरित्युक्तं भवति । अर्थनिश्चयस्येति भावप्रधानो निर्देशः । यद्वा इत्यादौ स्थले प्रबलनयनगत-पित्तदोषात्पुनरपि तदुत्पत्तिरिति भावः ।

---

१. अत्र वाक्यमेव स्यात् । ''ननु प्रवृत्तौ अर्थनिश्चयः हेतुः । अप्रामाण्य-शङ्काद्यभावस्य तु हेतुतावच्छेदकत्वमात्रं कल्प्यते । अन्यथासिद्धांशस्या-कल्पनीयत्वात्..'' इति । परमियमवतरणिका ''एतेनोक्तरूप'' इत्यस्य स्यात् ।

ननु प्रवृत्यादिकं प्रति ग्राह्याभावानवगाहित्वेऽपि [१]प्रामाण्यादिज्ञानस्य साक्षाद्विघटकमेव किन्न स्यात् । तथा च जनकज्ञानविघटकतयैव इत्येवं मास्तु इत्यप्रयोजको हेतुरित्यत्राह– **ज्ञानं हीति** ।। तथा च प्रवृत्तिं प्रत्ययथाभ्रमस्यास्य तज्जनकं, तथाविधप्रामाण्यनिश्चयप्रतिबन्धकत्वाभावे प्रतिबन्धकत्वमेव न स्यादित्यनुकूलतर्कसाचिव्यान्नोक्त दोष इति भावः । [२]अन्यथा [३]साक्षादविरोधिनो भानस्य मण्यादेरिव जनकज्ञानविघटकत्वेनैव प्रतिबन्धकत्वेऽप्यनुसाध्याननुसाध्याभावप्रमारूपत्वात् बाधसाध्याभावव्याप्य-परामर्शरूपसत्प्रतिपक्षयोरपि जनकज्ञानविघटकतयैव प्रतिबन्धकत्वमस्तु किं ज्ञानद्वैविध्यकल्पनेनेत्यत्राह– **बाधादिस्त्विति** ।। तदभावव्याप्यनिश्चये च तन्निश्चयानुपपत्तेरन्वयव्यतिरेकाभ्यां प्रत्यक्षादौ दर्शनेन साक्षाद्विघटकत्व-स्यैवावधारिततया तदसम्भव एव जनकज्ञानविघटकत्वाश्रयणादिति भावः । एवं च बाधादौ [४]व्यवसायसाक्षादविरोधिन इति पदमित्युक्तं भवति ।

नन्वप्रामाण्यज्ञानस्य तदभावावगाहित्वनियमेन [५]तत्प्रवृत्तिसाक्षादेव बाधवद्विरोधितया [६]जनकज्ञानविघटकत्वम् । न चाप्रामाण्यज्ञानस्य प्रवृत्तिविषयविशेष्यकत्वाभावेन[७] भिन्नविशेष्यकत्वस्याप्रयोजकत्वादित्यत्राह

१. ''अप्रामाण्यादिज्ञानस्य'' इति स्यात् ।

२. ।। अन्यथेति ।। इति प्रतीकग्रहणं स्यात् ।

३. अत्र वाक्यविन्यासः एवं स्यात् । ''ननु साक्षादविरोधिनः ज्ञानस्य जनकज्ञानविघटकत्वेनैव प्रतिबन्धकत्वे साध्याभावप्रमारूपबाध साध्याभाव-व्याप्यपरामर्शरूपप्रतिपक्षयोरपि जनकज्ञानविघटकतयैव प्रतिबन्धकत्वमस्तु किं द्वैविध्यकल्पनेन.....'' इति ।।

४. ''एवं च बाधादौ साक्षादविरोधिनः इति तदयुक्तमित्युक्तं भवति'' इति स्यात् ।

५. ''तत्प्रवृत्ति'' इति न स्यात् ।

६. ''किं जनकज्ञानविघटकत्वकल्पनया'' इति स्यात् ।

७. ''कथं साक्षाद्विरोधित्वं'' इत्यधिकं स्यात् ।

।। **ज्ञाननिष्ठेति** ।। अप्रामाण्यज्ञानस्य प्रवृत्तिविषये तदभावावगाहित्वेऽपि तद्धर्मितावच्छेदकपुरोवृत्तित्वाद्यवच्छेदेन तदभावानवगाहनेन तादृशस्यैव घटत्वसामान्यलक्षणप्रत्यासत्तिजन्यज्ञानानन्तरं अयं घटो न वेति संशयानुरोधेन प्रतिबन्धकत्वेनाभ्युपगन्तव्यतया तस्य साक्षात्कारप्रतिबन्धकत्वादन्यथा व्यवसाये पुरोवर्तिनि घटत्वनिष्ठत्वनिश्चयेन तदनन्तरं तदभाववत्वगर्भाप्रामाण्यसंशय एव क्वापि न स्यादिति भावः ।

न्यायदीपः

चतुर्थकल्पं निराह ।। **एतेनैवेति** ।। अप्रामाण्यज्ञानं प्रामाण्यविरोधिज्ञानमित्यर्थः । एतेनेत्युक्तं दुर्गमात्वाद्व्यनक्ति ।। **निर्विषयस्येत्यादिना** ।। जातिविशेषहीनस्य साक्षादविरोधिनो ज्ञानस्य प्रतिबन्धकत्वं तज्जनकज्ञानविघटकत्वेनैवेति व्याप्तेर्यथेत्यादिना विवक्षितत्वान्मण्यादौ निर्विषये व्यभिचारो नेति भावेन निर्विषयस्येत्याद्युक्तिः ।

ननु ज्ञानमपि मण्यादिवद् बाधप्रतिपक्षवच्च कारणीभूतस्वाभावविघटनरूपतयैवास्तु प्रतिबन्धकं किं कारणीभूतज्ञानविघटकतयेत्यत आह ।। **ज्ञानं हीति** ।। स्वमतावष्टम्भेनाह ।। **शक्तिविघटकत्वेन इति** ।। बाधवैषम्यामाह ।। **बाधादिस्त्विति** ।। अस्तु ज्ञानं हीत्यादिनोक्तं, अप्रामाण्यज्ञानं तु बाधादिवत्स्यादित्यत आह ।। **ज्ञाननिष्ठेति** ।। **अप्रामाण्येति** ।। प्रामाण्यविरोधीत्यर्थः । किं तु प्रामाण्यनिश्चयस्यैवेति तद्विघटकतयैव प्रतिबन्धकमिति प्रामाण्यज्ञानस्य हेतुत्वसिद्धिः । तद्वत्त्वाभावस्य प्रवृत्तिविषयाभावत्वेपि न तन्मात्रमप्रामाण्यमिति भावः ।

तर्कताण्डवम्

किञ्चोक्तप्रकारेणाप्रामाण्यज्ञानवत् प्रामाण्यात्यन्ताभावादि-

ज्ञानानामपि प्रतिबन्धकत्वादभावकूटस्य कारणता कल्प्या इत्यति-गौरवम् । तत्तो वरमेकः प्रामाण्यनिश्चयो हेतुः, अप्रामाण्यादिज्ञानं तु तद्विघटकमिति । मण्यादौ तु त्वन्मते तद्विघटनीयस्यैकस्या-भावादभावकूटस्य हेतुतास्तु ।

एतेनैव उपाधिज्ञानस्याधेयव्यभिचारज्ञानरूपानुमितिप्रतिबन्ध-कान्तरसम्पादनेनानुमितिप्रतिबन्धकत्वमिवाप्रामाण्यसन्देहस्यापि मानसार्थसन्देहरूपप्रवृत्तिप्रतिबन्धकान्तरसम्पादनेन प्रवृत्तिप्रतिबन्ध-कत्वम् । उक्तं हि''अप्रामाण्यसंशयेनार्थनिश्चयं परिभूयार्थसंशय'' इतीति निरस्तम् । मानसार्थसन्देहस्यापि पीतः शङ्ख इत्यादावुक्त-रीत्यार्थनिश्चयसद्भावेन तद्विघटकत्वायोगेन सदर्थत्वरूपप्रामाण्यनिश्चय-विघटनेनैव प्रतिबन्धकत्वस्यैव उचितत्वात् । तस्मादसंसर्गग्रह-व्यभिचारज्ञानादेः प्रवृत्त्यनुमित्यादिप्रतिबन्धकत्वान्यथानुपपत्त्यैव तद्विघटनीयस्य संसर्गग्रहव्याप्तिज्ञानादेः प्रवृत्त्यनुमित्यादिहेतुत्ववत् अप्रामाण्यज्ञानस्य प्रवृत्तिप्रतिबन्धकत्वान्यथानुपपत्त्यैव तद्विघटनीयस्य प्रामाण्यज्ञानस्य तद्धेतुत्वसिद्धिः ।

युक्तिरत्नाकरः

ननु तर्हि मण्याद्यभावकूटस्यापि दाहहेतुता न स्यात् । गौरवाविशेषात्तमाह ।। [१]**मण्यादिरिति** ।। शक्तेरनङ्गीकारादन्यस्य चानुगतस्य [२]घटनीयस्य हेतोरभवात् मणिमन्त्राद्यभावेषु चा[३]नुगतैव हेतुतावच्छेदकासम्भवाभावकूटस्य हेतुतेति भावः ।

---

१. ''।। मण्यादाविति ।।'' इति स्यात् । २. ''घटनीयस्य'' इति न स्यात् ।
३. ''अनुगतैकहेतुतावच्छेदक'' इति स्यात् ।

ननु साक्षादविरोधिन इति व्याप्तौ व्याप्यशरीरे प्रतिबन्धकस्येत्यनुक्तौ व्याप्तिज्ञानादौ व्यभिचारात् तथाविशेषणीयम् । एवं च यथोपाधिज्ञानस्यानुमितिप्रतिबन्धकव्यभिचारज्ञानसंपादकस्यापि संशयप्रतिबन्धकत्वात् न जनकज्ञानविघटकता तथा प्रामाण्यसंशयस्यापि प्रवृत्तिप्रतिबन्धकार्थह्यापादकत्वमेव प्रतिबन्धकतेति । नैतद्व्याप्त्यनुरोधेन प्रमानिश्चयस्याहेतुत्वात्सिध्यतीत्यत्राह ।। **एतेनेति** ।। अनुमितिप्रतिबन्धकत्वं तत्प्रतिबन्धकत्वोपचारः । साक्षादनुमित्यनुकूलव्याप्तिज्ञानविघटकत्वाभावादिति भावः ।। **अप्रामाण्यसन्देहस्यापीति** ।। सन्देहपदमप्रामाण्यादिनिश्चयस्याप्युपलक्षकम् । अत एव दृष्टमुपाधिज्ञानस्येत्येवोक्तम् । एवं च परिहारेऽपि मानस्यार्थसन्देहेऽपि तदभावनिश्चयोऽपि लभ्यते । तेन पीतः शङ्ख इत्यत्रोक्तसन्देहात् न दोषः । अत एव मानसपदमपि सार्थकम् । न हि पीतः शङ्ख इत्येतदभावनिश्चयश्चाक्षुषः सम्भवतीति भावः ।। **अर्थनिश्चयं परिभूयेति** ।। तच्चार्थनिश्चये सति प्रामाण्यसन्देहादपि कथमर्थसन्देहः, विरोधिनिश्चयस्य प्रतिबन्धस्य सत्वात् । स्वारसिकसंशयत्वस्य प्रतिबध्यतावच्छेदकत्वकल्पने मानाभावाद्गौरवाच्च ।

न चाप्रामाण्यशङ्कानास्कन्दितार्थनिश्चयत्वेन प्रतिबन्धकत्वगौरवात् पुरुषत्वनिश्चयदशायां तद्व्याप्यकरादिनिश्चयस्यापि सम्भवेन विशेषदर्शने सति कथमर्थसंशयः, तत्राप्यप्रामाण्यसंशयकरादिमति पुरुषज्ञानरूपप्रामाण्यव्याप्यनिश्चयभावेन प्रामाण्यानुमित्यभावापातादिति चेदत्राहुः ।

अप्रामाण्यसंशयस्यार्थनिश्चयोत्तरसंशयत्वावच्छेदेन विशेषसामग्रीकल्पने तदनुत्तरसंशयत्वरूपविशेषान्तरस्याकस्मिकतानिवृत्तये तत्रापि विशेषसामग्रीकल्पनस्यावश्यकत्वे अन्वयव्यतिरेकाभ्यामनुगतत्वाच्च विरोधिनिश्चयाभावस्यैव तत्र सामग्रीकल्पनात् । स्वारसिकसंशयत्वावच्छेदेन विरोधि-

निश्चयस्य प्रतिबन्धकत्वकल्पनेऽपि तदुत्तरार्धसंशयेऽर्थनिश्चयस्या-प्रतिबन्धकत्वकल्पने मानाभावाद्युक्त एव प्रामाण्यसंशयानिश्चितेऽप्यर्थसंशय इति ।

अन्ये तु स्वारसिकसंशयत्वेनानाहार्याप्रामाण्यशङ्कानास्कन्दितस्वविरोधि-निश्चयत्वेन प्रतिबद्धचप्रतिबन्धकभावस्यानुभवबलादेव कल्पनाद-प्रामाण्यसंशयाहितार्थसंशये तादृशार्थनिश्चयस्याप्रतिबन्धकत्वमेवेत्याहुः ।

उपाधिज्ञानस्यानुमित्यप्रतिबन्धकत्वेऽप्यप्रामाण्यादिज्ञानाहितार्थसंशयस्य पीतःशङ्ख इत्यादावर्थनिश्चयविघटकत्वेनाप्रतिबन्धकतया प्रामाण्यनिश्चय-विघटकतया साक्षादेव तदप्रामाण्यज्ञानस्य प्रवृत्तिप्रतिबन्धकत्वात्प्रामाण्य-निश्चयस्य प्रवृत्तिहेतुता सिध्यतीति परिहरति ।। **मानसेति** ।। तत्रार्थ-संशयस्य विघटनीयत्वेऽर्थसंशयस्य प्रतिबन्धकतया तत्सम्पादकत्वेना-प्रामाण्यनिश्चयस्याप्रतिबन्धकता स्यात् । तदसम्भवात् प्रामाण्यनिश्चयस्यैव विघटकता सिध्यति । यत्र च प्रामाण्यज्ञानस्य साक्षाद्विघटकत्वमेवेति तत्प्रतिबन्धकत्वसिद्धेरुक्तव्याप्तिबलादेव प्रामाण्यनिश्चयहेतुतासिद्धिरिति भावः ।

केचित्तु भवत्पदार्थसन्देहस्यैव वृत्तिप्रतिबन्धकता तथापि तस्यार्थनिश्चय-विघटकत्वायोगेनार्थसत्वघटितप्रामाण्यनिश्चयविघटकत्वमेव वाच्यम् । एवं चार्थसंशयस्य प्रतिबन्धकतान्यथानुपपत्तिरेव प्रामाण्यनिश्चयहेतुतायां मानमित्याह– **मानसेति** ।। इत्याहुः ।

तन्न अर्थसन्देहस्य प्रवृत्तिप्रतिबन्धकत्वे ग्राह्याभावावगाहिनोऽस्य साक्षादेव सम्भवेन विघटनीयान्तरानपेक्षतार्थनिश्चयविघटनासम्भवात्प्रामाण्यनिश्चय-विघटकत्वमेषितव्यमित्युक्त्ययोगात् । तदप्रतिबन्धकत्वेऽपि प्रतिबन्धकस्यैव सतो जनकज्ञानविघटकत्वेनार्थनिश्चयेत्याद्ययोगात् । उक्तयोजनायां त्वसंशयस्य

साक्षात्प्रतिबन्धकत्वं तावत् अनाशङ्क्यमेव । अर्थसंशये तदभावनिश्चयेन प्रवृत्तिहेतुभूतार्थनिश्चयाभावादेव प्रवृत्त्येतत्प्रतिबन्धकत्वे एव मानाभाव इति साक्षात्प्रतिबन्धकत्वं बहिरेव निरस्यानेन परम्परया प्रतिबन्धकत्वं निरस्यत इति तत्सङ्गतेः । न चैवमसङ्गतग्रहस्याप्रवृत्तिप्रतिबन्धकत्वं प्रतिपादकोपसंहारविरोधः । पराभ्युपगमानुरोधेन तत्सम्भवात् । अत एव व्यभिचारज्ञानादिरिति दृष्टान्तात्तदुपन्यासः । तथाचोभयथाप्यर्थसंशयस्य प्रतिबन्धकतया न तत्सम्पादकत्वेनान्यथासिद्धिः प्रामाण्यसंशयोदेरिति पर्यवसानादित्येके ।

अपरे त्वप्रामाण्यज्ञानस्य प्रतिबन्धकत्वसम्पादकत्वमेव, न तु प्रतिबन्धकत्वम् । अतो न जनकज्ञानविघटकत्वमिति शङ्क्यन्ते । एवमपि ज्ञानस्य प्रतिबन्धकता न क्वापि साक्षात् । तथादर्शनात् । किन्तु जनकज्ञानविघटकतयैव । संसर्गग्रहप्रतिबन्धकद्वारैव प्रवृत्तिप्रतिबन्धकत्वदर्शनादिति परिहरति ।। **मानसेति** ।। इत्याहुः ।

वस्तुतः साक्षादविरोधिन इत्यादिना यज्ज्ञानं स्वविषयतया तद्व्यापकोभयविरोधिविषयकज्ञानान्यस्येति सत्प्रतिपक्षे तद्वारणाय स्वविषयव्यापकविरोधिज्ञानस्येति तयोः साक्षादेव प्रतिबन्धकतया जनकज्ञानविघटकत्वाभावात् । न च लाघवात् स्वविरोध्यन्यस्येत्येवालम् । न तु ज्ञानान्यस्येति । गौरवादिति वाच्यम् । ज्ञानपदोपादाने हि तादृक्प्रवृत्तिप्रतिबन्धकस्यापि व्याप्यकोटौ सङ्ग्रहो भवतीति विकासकविशेषणतया तत्सार्थक्यात् । अन्यथा ह्यसंसर्गग्रहस्य प्रवृत्तिप्रतिबन्धकत्वेऽपि तदाहितार्थसंशयादेरुक्तव्याप्तिबलात्परिशेषाच्च प्रवृत्तिहेतुप्रामाण्यनिश्चय[1]विघटकमेव सिध्यतीति भावः ।

ननु यच्चोक्तं विरोधिनिश्चयसमानकालीनार्थसंशयत्वाविशेषे अप्रामाण्यसंशयत्वं हेतुतावच्छेदकमिति तन्न । विरोधिनिश्चयस्यान्वयव्यतिरेकाभ्यां

१. "विघटकत्वं" इति स्यात् ।

अनुभवे प्रतिबन्धकत्वावगमेन तद्विरोधिकार्यतावच्छेदकत्वकल्पना मणेरपि मणिः भवति. । तदा हि रूपविशेषे कार्यतावच्छेदकत्वेन तदवच्छिन्ने उत्तेजकत्वेन विशेषसामग्रीत्वकल्पनानुपपत्त्या प्रतिबन्धकाभावहेतुत्वस्य हान्यापाताच्च । अर्थनिश्चयोत्तरसंशयत्वस्य कार्यतावच्छेदकत्वं विरोधि-निश्चयाभावहेतुतावच्छेदकत्वं कल्पनीयमित्यनेककल्पनापत्तेश्च । परप्रामाण्य-संशयाभावविशिष्टार्थनिश्चयस्य तत्संशयप्रतिबन्धकत्वमिति तन्न । भावरूप-प्रामाण्यसंशयाभावेऽपि प्रामाण्याभावसंशयदशायां अर्थसंशयदर्शनेन तदा [1]वस्याप्तिसङ्ग्रहार्थे अप्रामाण्यपदस्य प्रामाण्यविरोधितावच्छेदकपरत्वं तदुभय-संशयाभावविशिष्टार्थनिश्चयत्वापेक्षया निश्चयप्रामाण्यार्थ[2]निश्चयस्य वा अर्थ-निश्चये प्रामाण्यनिश्चयत्वस्य वार्थसंशयप्रतिबन्धकत्वकल्पनैव लघुत्वा-दित्यास्तां तावत् ।

एवमुपपादितमन्यथानुपपत्तिप्रमाणकं प्रामाण्यनिश्चयस्य प्रवृत्तिहेतुत्व-मुपसंहरति ।। **तस्मादिति** ।।

न्यायदीपः

जनकज्ञानविघटकत्वमनुपेत्य बाधवत्प्रवृत्तौ स्वकारणीभूताभावविघटन-रूपत्वेनैव प्रतिबन्धकत्वे दोषान्तरमाह ।। **किञ्चेति** ।। **उक्तेति** ।। ''एवमप्रामाण्यशङ्काद्यभाववत्'' इत्यादिनोक्तप्रकारेणेत्यर्थः ।। **अतिगौरव-मिति** ।। अप्रामाण्यज्ञानाभावः कारणमित्येतदेव प्रामाण्यज्ञानाद्गुरु । तत्राप्यभावकूटः कारणमित्युक्तावतिगौरवमित्यर्थः । शक्तेरनङ्गीकारादन्यस्य प्रतिबन्धस्याभावात् अप्रामाण्यज्ञानाभावादिषु चानुगतैकहेतुतावच्छेदकस्या-सम्भवादभावकूटस्यैव हेतुतायास्त्वया वाच्यत्वादिति भावः । नन्वेवं मण्याद्यभावकस्थले मणिमन्त्राद्यभावकूटस्य कारणता क्लृप्तेत्यत्रापि तथा

---

१. ''व्याप्ति'' इति स्यात् । २. ''निश्चयत्वस्य'' इति स्यात् ।

स्यादित्यत आह ।। **मण्यादौ त्विति** ।। इह त्वस्ति विघटनीयं प्रामाण्य-ज्ञानमिति किमर्थमतिगौरवाश्रयणमिति भावः ।

पञ्चमं पक्षं प्रत्याचष्टे ।। **एतेनैवेति** ।। उपाधेर्व्यभिचारोन्नायकत्वपक्ष-मुपेत्योक्तम् ।। **आधेयव्यभिचारज्ञानेति** ।। सन्देहनिश्चयसाधारणज्ञानमात्रस्य प्रतिबन्धकत्वाज्ज्ञानपदप्रयोगः ।। **उक्तं हीति** ।। मणावित्यर्थः ।

एतेनैवेत्युक्तं व्यनक्ति ।। **मानसार्थसन्देहस्यापीति** ।। तद्विघटकत्वा-योगेनेत्यादिनान्वयः । ज्ञानं हीत्यादिनोक्तरीत्या प्रामाण्यनिश्चयविघटनेनैव प्रतिबन्धकत्वस्य उचितत्वादित्यर्थः । अर्थसन्देहस्य प्रामाण्यनिश्चय-विरोधित्वघटनाय सदर्थत्वरूपेत्युक्तम् ।। **तस्मादिति** ।। अन्यस्य विघट-नीयस्याभावाज्ज्ञानस्य ज्ञानान्तरविघटकत्वाच्चेत्यर्थः । अनुमित्यादीत्यादि-पदेन लिङ्गपरामर्शादिग्रहः । अप्रामाण्याज्ञानस्य इत्युपलक्षणम् । अर्थ-सन्देहस्य चेत्यपि ध्येयम् ।। **तद्धेतुत्वेति** ।। प्रवृत्तिहेतुत्वेत्यर्थः ।

तर्कताण्डवम्

यद्यपि परप्रक्रियया न निश्चितप्रामाण्यज्ञानं प्रवर्तकम् । प्रामाण्यलिङ्गज्ञानादिनार्थज्ञानस्य नाशात् । किन्तु तत्समानविषयक-मप्रामाण्यशङ्कारहितमुत्तरं ज्ञानान्तरमेव । तथापि मन्मतेपि साक्षि-रूपस्य सुखादिज्ञानस्य स्वप्रकाशत्वेन स्वस्यैव स्वप्रामाण्यनिश्चय-रूपत्वात्, घटादिज्ञानस्य तु परग्राह्यत्वेपि तद्ग्राहकेण नित्येन साक्षिणा प्रमाणत्वेनैव ग्रहणात्तस्य च स्वप्रकाशत्वेनानवस्थाभावात् निश्चित-प्रामाण्यमेव ज्ञानं प्रवर्तकम् । किञ्चाद्ये ज्ञाने प्रामाण्यनिश्चयेन कथं द्वितीये तच्छङ्काभावः ।

युक्तिरत्नाकरः

प्रामाण्यनिश्चयस्य प्रागुक्तप्रवर्तकतावच्छेदकत्वपक्षे चार्थनिश्चयस्य प्रवर्तकत्वासम्भवमाशङ्क्य प्रमाणस्यानुमेयत्वपक्ष एवानुमितिदशायामर्थ-निश्चयस्य तद्दशायामनुमितेश्च सम्भवादयं दोषो नास्मत्पक्ष इति परिहरति ।। **यद्यपीत्यादि** ।। **किन्त्विति** ।। यद्यपि प्रामाण्यानुत्पत्यनन्तरं ज्ञानेनार्थनिश्चयेऽपि क्षणेऽनुव्यवसाये अनुमित्युपनीतप्रामाण्यभानसम्भवा-न्निश्चितप्रामाण्यव्यवसायस्येव तन्मतेऽपि तत्स्वतः प्रवर्तकत्वसम्भव इति । तथापि तद्व्यक्तौ प्रामाण्यानुमितौ व्यक्त्यन्तरेऽपि तदुपनीतप्रामाण्यभावेऽति-प्रसङ्गेन तत्रोपनयसामग्रीविरहादप्रामाण्यसंशयशून्यमेव तत्प्रवर्तकमिति तदुभयागमानुरोधेनेयमुक्तिः । मुखादिज्ञानस्याप्रामाण्यनिश्चयोपपादकतया स्वप्रकाशता स्यादविशेषादतः ।। **साक्षिरूपस्येति** ।। मनोवृत्तेरचेतनत्वेन स्वप्रकाशत्वासम्भवेऽपि चेतनात्मकस्य साक्षिणः तत्सम्भवतीति भावः ।

नन्वेवमपि घटादिबहिरर्थगोचरव्यवसायानन्तरं तन्निर्विकल्पके तत्प्रामाण्यानुव्यवसाये च सति ततः प्रवृत्तौ न तद्व्यवहितपूर्वक्षणेऽपि व्यवसायाभावात्तस्य प्रवृत्तिहेतुत्वायोग इत्यत्राह ।। **घटादीति** ।। ननु निश्चितप्रामाण्यत्वेन व्यवसायस्य प्रवर्तकत्वे प्रामाण्यनिश्चयेऽपि प्रामाण्यनिश्चयानन्तरापेक्षायां तत्रापि तथेत्यनवस्थेत्यत्राह ।। **तस्य चेति** ।। निश्चितप्रामाण्यकमित्युपलक्षणम् । प्रामाण्यनिश्चयस्य हेतुत्वपक्षेऽपि नानुपपत्तिरित्यपि बोध्यम् । उक्तज्ञाने अप्रामाण्यशङ्कानिवृत्तेरपि प्रामाण्य-निश्चयमन्तरेणासम्भवं परमुखेनाङ्गीकारयितुं पृच्छति ।। **किञ्चेति** ।।

न्यायदीपः

आशुविनाशिनो ज्ञानस्य प्रवृत्तिकालेऽभावात्कथं प्रमात्वेन ज्ञातस्य प्रवर्तकत्वम् । उक्तं च **मणौ** ''ज्ञानं गृहीतप्रामाण्यं न प्रवर्तकम् ।

प्रामाण्यानुमितेः पूर्वमेव तस्य नाशात् । किं तु तज्ज्ञानसमानविषयक-मप्रामाण्यशङ्काशून्यज्ञानान्तरमेवेत्यादी'' इत्येतच्चोद्यमनूद्य समाधिमाह ।। **यद्यपीति ।। स्वप्रकाशत्वेनेति ।।**

''यदि साक्षी स्वयं भातो न मानं केन गम्यते ।
अक्षजादेश्च मानत्वमनवस्थान्यथा भवेत्'' ।।

इति वैशेषिकनयानुव्याख्याने, तथा

''नियमेन सुखाद्येषु प्रामाण्यं साक्षिगोचरम् ।
स्वप्रामाण्यं सदा साक्षी पश्यत्येव सुनिश्चयात्'' ।।

इति ज्ञानपादीयानुव्याख्याने चोक्तेरिति भावः ।। **घटादिज्ञानस्य त्विति ।।** मनोवृत्तिरूपज्ञानस्येत्यर्थः ।

''इच्छा ज्ञानं सुखं दुःखं भयाभयकृपादयः ।
साक्षिसिद्धा''

इत्युक्तेरिति भावः ।। **नित्येनेति ।।** औत्तरिकानुस्मृतिसिद्धात्म-स्वरूपभूतसौषुप्तिकानुभवरूपस्य तस्य नित्यत्वादिति भावः ।। **अनव-स्थेति ।।** पूर्वोक्तद्विविधानवस्थाभावादित्यर्थः । तथा च **मणा**वुक्तो दोषः परेषामेव । नास्माकम् । ''अन्यथा भट्टमते प्रामाण्यस्यानुमितिग्राह्यत्वे अनवस्था स्यात् । गुरुमते प्रामाण्यस्य स्वग्राह्यत्वं न स्वग्राह्यम् । स्वरूप-प्रामाण्यबहिर्भूतत्वात् । किन्तु परग्राह्यत्वे अनवस्थानात्'' इत्यपि **मणि**-कृदुक्तो दोषो नास्मत्पक्षे । स्वग्राह्यत्वस्यापि साक्षिवेद्यत्वादिति भावः ।

तर्कताण्डवम्

ननु यदीदं रजतं न स्यात्तदा रजतत्वप्रकारकप्रमाविषयो न

स्यादिति तर्कप्रभावाद् द्वितीये शङ्काभावः । तर्केणार्थ[1]सत्त्वशङ्का-निवर्तनेन तद्घटिताप्रामाण्यशङ्कानिवर्तनात् इति चेन्न । कृत्स्नसामग्रीकस्य लघोश्चानुव्यवसायरूपप्रामाण्यनिश्चयस्य त्यागेनान्यस्य विपरीतस्योक्त-रूपतर्कानुसन्धाननियमस्य च कल्पनेऽनुभवविरोधात् ।।

किञ्चाप्रामाण्यशङ्कानन्तरं प्रवृत्तौ प्रामाण्यनिश्चयो हेतुरिति तावदविवादम् । तत्र निश्शङ्कप्रवृत्तित्वमेव कार्यतावच्छेदकं लाघवात् । न तु शङ्कानन्तरनिश्शङ्कप्रवृत्तित्वं गौरवात् । तत्र प्रामाण्यनिश्चयोऽ-प्रामाण्यशङ्कानिरासोपक्षीण इति तु गौरवादिना निरस्तम् । अन्यथा व्याप्त्यादिनिश्चयोपि व्यभिचारादिशङ्कानिरासोपक्षीणः स्यात् ।

किञ्च प्रामाण्यनिश्चयस्याप्रामाण्यशङ्कानिवर्तकत्वेन उपक्षये त्वत्पक्षे प्रामाण्यस्यानुमेयत्वेनावश्यकेन प्रामाण्यव्याप्यतया लिङ्गज्ञानेनैवा-प्रामाण्यशङ्कानिवृत्तिसम्भवात्प्रामाण्यज्ञानस्य प्रवृत्तावनुपयोगात्तद्ग्रहण-चिन्ता व्यर्था । यद्यपि व्यवसायः शङ्कानिवर्तकपरीक्षाकाले नास्ति । तथापि स्मृत्युपनीतस्य व्यवसायस्य प्रामाण्यनिश्चय एव प्रवर्तकः ।

यद्वा त्वन्मते गृहीतप्रामाण्येन ज्ञानेन समानशीलत्वाद-प्रामाण्यशङ्कारहितं ज्ञानान्तरमिव मन्मते निरस्तप्रतिबन्धेन साक्षिणा गृहीतप्रामाण्यं ज्ञानान्तरमेव प्रवर्तकम् । एतदप्युक्तम् ''अन्यथा'' इत्यादिना । प्रामाण्यनिश्चयस्याप्रवर्तकत्वे व्याप्त्यादिनिश्चयोऽनु-मित्यादिहेतुरिति व्यवस्थायोगादित्यर्थः ।

युक्तिरत्नाकरः

शङ्कानिवर्तनात् शङ्कानुत्पादात् ।। कृत्स्नसामग्रीकस्येति ।। ननु

१. ''अर्थासत्व'' इति पाठान्तरम् ।

पूर्वज्ञानविषयत्वमात्रेणोत्तरज्ञानेनोपनीतभानेऽतिप्रसङ्गेन यद्धर्मावच्छेदेन यद्धर्म[१]भानवृत्तं तद्धर्मदर्शनमुपनायकमङ्गीकार्यम् । तथा च पूर्वज्ञातव्यशक्तौ प्रामाण्यानुमितावपि कथमुत्तरज्ञानानुव्यवसाये प्रामाण्योपनयः । न च पुरोवर्तिविशेष्यकरजतत्वप्रकारकज्ञानत्वावच्छेदेन प्रामाण्यज्ञानादुत्तरव्यवसाये तद्धर्मदर्शनेन तदनुव्यवसाये प्रामाण्योपनयसम्भव इति ।

वस्तुतो रजतविशेष्यज्ञानस्यैवेदं ज्ञानमित्येव पक्षीकारेण न प्रमात्वानुमितिसम्भवे तत्रोक्तधर्मभाननियमाभावात् । न हि स्ववृत्तिवर्तमान-ज्ञानस्यैव पक्षीकरणं येनोक्तधर्मभानं स्यात् । त्रिचतुरक्षणव्यवहितस्य पक्षीकरणसम्भवात् । किञ्च कथञ्चिद्धर्मभानेऽपि न तत्प्रामाण्यावच्छेदकत्वं नियमेनानुमितिविषयः पक्षतावच्छेदकसामानाधिकरण्यमात्रेणापि साध्यसिद्धे-रनुमितिफलत्वसम्भवात् ।

किञ्चावच्छेदकत्वस्य कथञ्चिद्ग्रहेऽपि प्रामाण्यानुमित्यनन्तरं व्यवसाये तद्धर्मग्रहे उपनेयप्रामाण्यस्मृतौ ततस्तद्विशिष्टज्ञानमिति न तदा व्यवसाय-सत्वमिति पुनः प्रवृत्यसम्भव एवेति चेत् न । स्ववृत्तिवर्तमानज्ञानस्य सत्तापक्षीकरणेऽपि पुरोवर्तिविशेष्यकरजतत्वप्रकारकत्वादिनानुव्यवसिततया तज्जन्यस्मृत्युपनीतस्य तेनाकारेणैव पक्षीकरणे तद्धर्मभानसम्भवेन तस्य चातिप्रसक्तत्वाग्रहणावच्छेदकत्वस्यापि ग्रहसम्भवात् । तद्धर्मिणि यद्धर्मोपनयस्तद्धर्मावच्छेदे प्रागुपनेयद्धर्मिग्रह एवापेक्षितो न तु पुरोवर्तिनि तद्धर्मज्ञानानन्तरमेव तदुपनयोऽन्यथा धूमो व्याप्य इति धूमत्वावच्छेदेन व्याप्तिग्रहानन्तरमेव दैवात्स्मृतव्याप्तिकस्य पक्षवृत्तिधूमेन्द्रियसन्निकर्षे सत्ययं धूमो वह्निव्याप्य इति विशिष्टपरामर्शानुदयप्रसङ्गात् । एवं च प्रामाण्यानु-मित्यनन्तरमेव व्यवसायोत्पत्तौ तदुपनीतस्यैव व्यवधानेन तदुत्पत्तावपि अनुमितिजन्यस्मृत्युपनीतस्य प्रामाण्यव्यवसायोत्तरक्षण एवानुव्यवसाये

१. "भानं वृत्तं" इति स्यात् ।

भानसम्भवेन व्यवसायत्वेन प्रवृत्तेरविकल्पात् ।। **अविषयमिति** ।। तत्र नियतपूर्ववर्तिनस्तस्य लाघवेन प्रवृत्तिहेतुत्वस्य समर्थितत्वादिति भावः । नन्वेवमपि शङ्कोत्तरप्रवृत्तित्वमेव तत्र कार्यतावच्छेदकमस्तु तत्रैव तदन्वयव्यतिरेकानुविधानात्तत्राह ।। **तथाचेति** ।। लाघवान्निष्कम्प-प्रवृत्तिमात्रतद्धेतुत्वसिद्धावन्यत्रापि निश्चयकल्पनमिति भावः । यदि प्रामाण्यनिश्चयः प्रवृत्तिहेतुताभानेऽपि त्वत्प्रामाण्यशङ्कानिवृत्तिमात्रोपक्षीणतया तदा तस्याः प्रामाण्यव्याप्यदर्शनेनापि सम्भवाद्गृहस्यानुपयोगेन स्वतस्त्वादि-चिन्तैवायुक्तेत्याह ।। **किञ्चिति** ।। ननु यत्राप्रामाण्यशङ्का तत्र परीक्षया तन्निवृत्तौ पश्चात्साक्षिणा प्रामाण्यनिश्चयकाल इव व्यवसायाभानात् न सिद्धान्तेऽपि निश्चितप्रामाण्यस्य व्यवसायस्य प्रवर्तकत्वमित्यत्राह ।। **यद्यपीति** ।। **प्रामाण्यनिश्चय एवेति** ।।

ननु समानविशेष्यकत्वे सति समान[1]प्रकारके अत्र रजतत्वमिति ज्ञानादपि प्रवृत्तिदर्शनेनोक्तरूपेण न हेतुता । अस्य च रजतत्वाविशेष्यकस्य पूर्वं रजतविशेष्यकज्ञानाभावेऽनुदयेनावश्यकस्य तस्यैव प्रवर्तकत्वेनास्य तथात्वे मानाभावादत्र रजतत्वमिति ज्ञानस्याप्यत्रेत्यंशे पूर्वज्ञानविषय-रजतत्ववैशिष्ट्यविषयकत्वनियमेन समानविषयकत्वादसत्वाच्चेति चेत् । लाघवेन प्रवृत्तिविषये इष्टतावच्छेदकवैशिष्ट्यावगाहिज्ञानत्वेनैव प्रवर्तकत्वे प्रामाण्यनिश्चयस्यापि तथात्वेन तत एव प्रवृत्युपपत्तौ पृथगर्थनिश्चय-त्वेनाहेतुत्वादित्याशयात् । पृथगर्थानिश्चयस्यावश्यकत्वेऽपि नानुपपत्ति-रित्याह ।। **एतदिति** ।। प्रामाण्यं च स्वत एवेत्यत्र चशब्दस्यानुक्त-समुच्चयार्थकत्वे प्रामाण्यं स्वतो ज्ञायते, प्रवर्तकं च तदित्यर्थलाभेन वा स्वशब्दस्य स्वीयवाचितानुवृत्या प्रामाण्यं स्वाश्रयग्राहकेण ज्ञायत इतिवत् स्वज्ञानेन प्रवर्तयतीत्यध्याहारेणार्थलाभेन वा प्रामाण्यज्ञानस्य प्रवर्तकत्व-

१. "प्रकारकात्" इति स्यात् ।

पर्यवसानादन्यथेत्यस्य प्रामाण्यनिश्चयस्याप्रवर्तकत्वेऽतिप्रसङ्ग इत्यर्थो लभ्यत इति भावः ।

।। इति प्रामाण्यनिश्चयस्य प्रवर्तकत्वम् ।। ६ ।।

न्यायदीपः

ननु समानविषयकज्ञानान्तर [1]इवाप्रामाण्यशङ्कानिवृत्तावेव प्रामाण्यज्ञप्तेरुपक्षयान्न प्रवृत्तिहेतुता कल्प्या । ''अप्रामाण्यशङ्काप्रतिबन्धद्वारा निष्कम्पप्रवृत्तावुपयुज्यते प्रामाण्यज्ञानं'' इति मण्युक्तेरित्यतो द्वितीयज्ञानेपि प्रामाण्यनिश्चय एव प्रवर्तक इति भावेनाह ।। **किञ्चेति द्वितीय इति** ।। गृहीतप्रामाण्यज्ञानसमानविषयके ज्ञानान्तर इत्यर्थः ।। **क्लृप्तेति** ।। ''न च दृष्टान्तः साध्यविकलः उत्तरस्य ज्ञानस्य'' इत्यादिना स्वतस्त्वानुमानावसरोक्तरीत्या क्लृप्तसामग्रीकस्येत्यर्थः । अन्यत्र क्लृप्तत्वाच्च द्वितीयज्ञानादावपि प्रामाण्यनिश्चय एव प्रवर्तक इति भावेनाह ।। **किञ्चाप्रामाण्येति** ।। **अविवादमिति** ।। ''परतः पक्षे प्रामाण्यग्रहो न क्वचित्प्रवर्तकः'' इति मण्युक्तेरस्ति विवादः । तथापि ''यत्रचानभ्यासदशायामप्रामाण्यशङ्क्यार्थनिश्चयं परिभूयार्थसंशयस्तत्र प्रामाण्यनिश्चयाधीनज्ञानादर्थं निश्चित्य निष्कम्पं प्रवर्तते'' इत्युक्त्या तत्र स्थले प्रामाण्यनिश्चयस्य नियतपूर्ववृत्तित्त्वाल्लघुत्वाद् हेतुत्वमवश्यं वाच्यमिति भावेनैवमुक्तिः । अन्यत्रोपक्षयात्कथं हेतुतेत्यत आह ।। **तत्र प्रामाण्येति** ।। **गौरवादिनेति** ।। गौरवातिगौरवादिना पूर्वमेव निरस्तमित्यर्थः । अतिप्रसङ्गं किञ्चिद्व्यनक्ति ।। **अन्यथेति** ।।

यदपि मणौ ''नन्वेवं बहुवित्तव्ययायाससाध्ये'' इत्यादिना प्रामाण्यज्ञानस्यानुपयोगमाशङ्क्य अप्रामाण्यशङ्कानिवर्तकत्वेनोपयोगकथनं तदप्य-

---

१. 'इव' इति न स्यात् ।

युक्तमित्याह ।। **किञ्च प्रामाण्येति** ।। अप्रामाण्यशङ्कानिवृत्तिस्थले व्यवसायस्य नाशेन प्रवृत्तिकालेऽभावात्कथं प्रमात्वेन ज्ञातं ज्ञानं प्रवृत्तिहेतु-रित्याशङ्क्य द्वेधा समाधिमाह ।। **यद्यपीत्यादिना** ।। **स्मृतीति** ।। पररीत्येदम् । यद्वा सिद्धान्ते साक्षिरूपनित्यज्ञानविषयस्यापि स्मृत्युपनीतत्व-प्रकारो जिज्ञासानयभाष्यटीकाभावदीपेऽस्माभिरुक्तो ध्येयः ।। **एतदपीति** ।। प्रामाण्यनिश्चयस्याप्रवर्तकत्वेऽतिप्रसङ्ग इत्येतदपीत्यर्थः ।

।। इति प्रामाण्यनिश्चयस्य प्रवर्तकत्वम् ।। ६ ।।

परतस्त्वेऽनवस्थोक्तिः

किञ्चाप्रामाण्यशङ्काभावस्य प्रवर्तकत्वेपि तदर्थमेव प्रामाण्यनिश्चयो वाच्यः । ननु धर्म्यज्ञानादिनापि शङ्काभावो युक्तः । न हि ज्ञानं ज्ञातं सदेव प्रवर्तकम् । सत्यप्यर्थज्ञाने तदज्ञानेनाप्रवृत्यदर्शनादिति चेन्न[1] । न तावद्धर्म्यज्ञानं युक्तम् । योग्यस्य धर्मिणो ज्ञानस्य मनस्संयुक्तात्म-समवायरूपसम्प्रयोगवत्त्वेनैवोत्पत्या ज्ञानत्वेन ज्ञानज्ञानसाम्ग्र्याः सत्वात् ।

युक्तिरत्नाकरः

एवं बह्वायाससाध्ययागादिप्रवृत्तौ प्रामाण्यनिश्चयस्यैव प्रवर्तकत्वा-त्तत्परतस्त्वेऽनावस्थाद्वयापत्तिरित्यभिधाय प्रामाण्यशङ्काशून्यार्थनिश्चयस्य तच्छङ्काभावस्य वा प्रवर्तकत्वाङ्गीकारेप्युक्तानवस्थाद्वयापत्तिरित्याह ।। **किञ्चेति** ।। अस्य परेणेति शेषः । एवं स्वमते परीक्षया अप्रामाण्य-शङ्कानिरासेपि [2]नाप्युपपत्तिरिति द्रष्टव्यम् । ननु न कार्याभावसत्व-

---

१. 'चेत्' इति स्यात् । २. "नानुपपत्तिः" इति स्यात् ।

प्रतिबन्धकसत्वप्रयुक्त एव कारणाभावादपि तत्सम्भवादित्याशङ्कते ।। **नन्विति** ।। कोट्यस्मरणादिरादिशब्दार्थः । ननु धर्म्यज्ञानात्संशयाभाव इत्युक्तं, ज्ञातस्यैव ज्ञानप्रवर्तकत्वात् प्रवृत्त्यनुरोधेन तत्र धर्मिज्ञानस्य वाच्यत्वादित्यत्राह ।। **न हीति** ।। ज्ञानज्ञाने स्वतन्त्रान्वयव्यतिरेकयोरभावसूचनार्थोऽपिशब्दः । धर्मिणो ज्ञानस्याभावो हि योग्यत्वाभावाद्वा सन्निकर्षाभावाद्वा । स्वात्मकृतेन तद्वयमपीति दर्शयितुं योग्यस्येति सम्प्रयोगवत्वेनैवोत्पत्येति चोक्तम् । न च ज्ञाननिरासाभिप्रायेण वा तदभ्युपगमेऽपि प्रतियोगिरूपविशेषणज्ञानमात्रेणाभावत्वविशिष्टाभावज्ञानवद्विषयरूपविशेषणज्ञानमात्रेणैव ज्ञानत्वविशिष्टज्ञानस्यानुभवानुसारेणैवाभ्युपगन्तव्यत्वाभिप्रायेण वा तदुक्तिः । न हि ज्ञानत्वनिर्विकल्पकाभावापराधेन घटविषयकवानहमिति अनुव्यवसायः क्वापि दृश्यते । किन्तु घटविषयकज्ञानवानित्येवेति । एवं च सामग्रीनैयत्येनैव सुखादिवज्ज्ञानस्यापि ज्ञातैकसत्वमुपेयम् । सुखदुःखयोरपि सोत्पत्तिक्षणे सामग्रीसत्वादेव हि ज्ञातैकसत्वं सुखादाविव ज्ञानादावपि कदापि कस्यापि संशयविपर्ययादर्शनेन योग्यताविशेषगुणत्वावच्छेदेनैव ज्ञातैकसत्वावधारणादिति भावः ।

न्यायदीपः

एवं प्रामाण्यनिश्चयस्य प्रवर्तकत्वसाधनेन तन्निश्चयस्य परतोज्ञायमानत्वे[1]ऽनवस्थाद्वयमुक्त्वा अप्रामाण्याशङ्काशून्यस्यार्थनिश्चयस्य प्रवर्तकत्वेपि तदर्थमेव प्रामाण्यनिश्चयस्यावश्यकत्वादनवस्थाद्वयं दुर्वारमेव परतस्त्वपक्षे इत्याह ।। **किञ्चेति** ।। यद्वा प्रामाण्यनिश्चयस्य प्रवर्तकत्वपक्षे तस्यावश्यवेद्यत्वेप्यप्रामाण्यशङ्काशून्यार्थनिश्चयस्य प्रवर्तकत्वपक्षे तदनावश्यकत्वान्ना-

---

१. 'जायमानत्वे' इति पाठान्तरम् ।

नवस्थेत्यत आह ।। **किञ्चेति** ।। **प्रवर्तकत्वेपीति** ।। प्रवर्तकार्थनिश्चय-सहकारित्वेपीत्यर्थः । यद्यपि सिद्धान्ते परीक्षयाऽप्रामाण्यशङ्कानिवृत्तावेव साक्षिणा प्रामाण्यनिश्चयेन प्रामाण्यनिश्चयस्याप्रामाण्यशङ्काभावार्थत्वं नास्ति । ''सा च बुद्धिदोषमात्रं निरस्यति । तस्मिन्निरस्ते साक्षी स्वमहिम्नैव प्रामाण्यं गोचरयति'' इति तत्वनिर्णयटीकाद्युक्तेः । तथापि ''यत्र तु प्रामाण्य-ज्ञानेऽप्रामाण्यशङ्क्या प्रामाण्यसंशयः तत्र प्रामाण्यज्ञाने प्रामाण्यनिश्चयादेव प्रामाण्यनिश्चयः'' इति **मण्युक्तेस्तं** प्रत्येतदापादनमित्यदोषः ।

ननु तच्छङ्काभावः प्रामाण्यनिश्चयरूपप्रतिबन्धादिव स्वहेत्वभावादपि सम्भवतीति भावेन ''प्रामाण्यज्ञानस्य ज्ञानाभावेन कोटिस्मरणाभावेन विषयान्तरसञ्चारेण वा प्रामाण्यनिश्चयानवश्यम्भावात्'' इति **मण्याद्युक्त-**माशङ्कते ।। **नन्विति** ।। तथात्वे प्रवृत्तिर्न स्यादित्यत आह ।। **न हीति** ।। ''ज्ञानं ह्यबुभुत्सितग्राह्यतया तीव्रसंवेदनं'' इत्यादिप्रथमपादीयसुधावाक्यं विवृण्वन्नाह ।। **न तावदिति** ।। कोट्यस्मरणं चायुक्तमिति कल्पापेक्षया तावच्छब्दः । अज्ञानं हि तदर्थयोग्यत्वाभावेन वा सन्निकर्षादिसामग्र्यभावेन वा सहकारिविरहप्रयुक्तसामग्र्यभावेन वा प्रतिबन्धेन वेति चतुर्धा । आद्यद्वयं न प्रकृत इत्याह ।। **योग्यस्येत्यादिना** ।। मनस्संयुक्तेत्याद्युक्तिः पररीत्या । सिद्धान्ते त्वात्मसंयुक्तमनस्समवायेत्यर्थः । समवायस्तादात्म्यं ज्ञेयम् । सुखाद्यनुभवरूपसाक्ष्याशयेन वायं ग्रन्थः सिद्धान्ते योज्यः । सत्यपि धर्मिज्ञाने साधारणधर्मादर्शनादसन्देह इति शङ्कापनोदायोक्तं ।। **ज्ञानत्वेन ज्ञानज्ञानेति** ।।

न च ज्ञानत्वनिर्विकल्पकविलम्बात्तदभावः । निर्विकल्पकस्याप्यनुत्पत्तौ बीजाभावान्निरसिष्यमाणत्वाद्वेति भावः । एतेन ''सुखादिवत्सत्यां सामग्र्यां वेद्यत्वापरिहारात्'' इति तत्वनिर्णयटीका विवृता ।

तर्कताण्डवम्

नच ज्ञानज्ञाने बुभुत्सा हेतुः सा चासार्वत्रिकीति वाच्यम् । ज्ञानस्य सुखादिवद्योग्यात्मविशेषगुणत्वेनाबुभुत्सितग्राह्यत्वात् । बुभुत्साया ज्ञानरूपधर्मिज्ञानसाध्यत्वेनानवस्थानाच्च । वर्तमानस्वीय-ज्ञाने बुभुत्साया अदर्शनाच्च ।।

न च धर्म्यज्ञानरूपफलात्सुखादिसामग्री तज्ज्ञानसामग्री वा [१]ज्ञानप्रतिबन्धिका कल्प्यत इति वाच्यम् । धर्म्यज्ञानस्य अद्याप्य-सिद्ध्यान्योन्याश्रयात् । ज्ञानस्याज्ञाने तत्र कदाचित् संशयाद्यापाताच्च ।

कोट्यस्मरणं चायुक्तम् । ज्ञानत्वरूपसाधारणधर्मदर्शनस्य यागादौ निष्कम्पप्रवृत्यर्थं प्रामाण्यादिरूपविशेषबुभुत्सायाश्च सत्वेन तत्स्मरण-सामग्र्याः सत्वात् । न च विषयान्तरसञ्चारादसन्देह इति युक्तम् । यागादौ निष्कम्पप्रवृत्तिहेत्वसन्देहप्रयोजकविशेषावधारणाय विषयान्तर-सञ्चारस्यैव निरोद्धव्यत्वात् । न हि प्रेक्षावन्तो बहुवित्तव्ययायाससाध्ये साधनत्वानिश्चयेपि विषयान्तरसञ्चारसम्पादितासन्देहमात्रेण चैत्यवन्द-नादौ प्रवर्तन्ते ।

किञ्चोक्तरीत्या सम्पन्नसामग्रीकेण क्लृप्तेन प्रामाण्यनिश्चयेनैवा-सन्देहसम्भवे कथं विषयान्तरसञ्चारादिकल्पनम् ।

अपि च विषयान्तरासञ्चारेपि सुखादिज्ञानप्रामाण्ये नियमेनासन्देहो दृश्यत इति नासावसन्देहहेतुः । अन्यथा सुखादिकमपि सुखत्वादिना नावश्यवेद्यम् । तत्रासन्देहस्तु धर्म्यज्ञानादिनेति स्यात् । तत्र सामग्रीसत्वादवश्यवेद्यतेति चेत्समं प्रामाण्येपि ।

---

१. 'ज्ञानज्ञानप्रतिबन्धिका' इति पाठान्तरम् ।

युक्तिरत्नाकरः

ननु बुभुत्सांया अपि ज्ञानग्रहहेतुतया तदभावादेव न ज्ञानग्रहस्तत्राह ।। [1]**नवेति** ।। भविष्यादौ स्वज्ञानपरज्ञाने च संशयादिदर्शनेन बुभुत्सायाः सत्वेऽपि स्ववृत्तिवर्तमानज्ञाने बुभुत्साननुभवपराहतेत्याह ।। **वर्तमानेति** ।। नन्विष्टानिष्टविपर्ययदर्शनादिसमनन्तरमेव सुखदुःखयोरुत्पत्त्या तदव्यवहितोत्तरक्षणे च तयोः साक्षात्कारस्यैव दर्शने तत्सामग्र्योरेव प्रतिबन्धकत्वस्य वाच्यतया तदभावघटितसामग्रीविरहादेव ज्ञानग्रहस्तत्राह ।। **नचेति** ।। विषयदर्शनानुव्यवसायस्योक्तरीत्या सम्भृतसामग्रीकतया तदनन्तरमपि सुखाद्युत्पत्तिसम्भवेन तत्र धर्मिज्ञाननिश्चयादन्योन्याश्रय इति परिहरति ।। **धर्मीति** ।। ननु सुखतत्साक्षात्कारादिसामग्रा अनुव्यवसायसामग्रीतः प्रबलात्तत्र सुखादिकमेव ज्ञायते न त्वनुव्यवसायस्तत्राह ।। **ज्ञानज्ञान इति** ।। सुखादिहेतुविषयदर्शनादौ सर्वत्र सुखादिसामग्रीनियमेन प्रतिबन्धकतया तदनुव्यवसायसम्भवे संशयाद्यापातेन सुखादिसामग्रीतोऽनुव्यवसायसामग्रा एव प्राबल्यमागतमिति भावः । अभ्युपेत्य चेदमुक्तम् । वस्तुतः नित्यव्यवसायादिगोचरनित्यसाक्ष्यनभ्युपगमे सुखसाक्षात्काराविशिष्टदर्शनेन सुखादेर्हेतुताग्रह एव न स्यात् । तेषां युगपदुपस्थित्यभावात्सुखादिसामग्रीबलवत्त्वेन सुखादिजननेन तावदिष्टादर्शनास्थितिः ज्ञानत्वसुखत्वगोचरनिर्विकल्पकोत्पत्तिदशायामेव तज्ज्ञानानवस्थानादेवं ज्ञानेच्छाप्रयत्नादिष्वपि कार्यकारणभावग्रहानुपपत्तिः ।

ननु यत्रेष्टतावच्छेदकप्रकारकज्ञानानन्तरं कस्मादपि हेतोस्तदिच्छाभावेनाप्रवृत्तिस्तत्र तदनुव्यवसायसम्भवादिव यत्रेच्छायामपि तदाकृत्यसाध्यत्वाज्ज्ञानात्प्रवृत्त्यनुत्पत्त्याविच्छाज्ञानासम्भवादिव सामान्यलक्षणेष्टतावच्छेदकज्ञानत्वावच्छिन्नस्य तादृगुपस्थितेच्छात्वावच्छिन्नस्य च भानतया तज्जन्य-

१. "न च" इति स्यात् ।

स्मृत्युपनीतयोस्तयोः कार्यकारणग्रहानुपपत्तिः । यत्रेष्टतावच्छेदकप्रकारक-ज्ञानानन्तरं कस्मादपि हेतोस्तदिच्छाभावेन प्रवृत्यसम्भवत्येव, एवमिच्छा-प्रयत्नयोरपि तद्ग्रहः सम्भवत्येवेति चेन्न । एवमिच्छापूर्ववृत्तित्वस्य ज्ञाने ज्ञानानन्तर्यस्य चेच्छायां सामान्यलक्षणयापि तदनुव्यवसायेनाविषयीकृतया पूर्वापराभावस्य तन्नियमस्य चाग्रहे कार्यकारणभावस्य साक्षिरूपनित्यज्ञान-मन्तरेण सर्वथा ग्रहासम्भवात् । एवं नाधारानुसन्धानानुपपत्तिरपि तत्र मानम् । मध्येऽनुव्यवसायकल्पने चाधारत्वानुपपत्तेः । एवं चोत्पन्नस्य साक्षिणा विषीकरणनियमेन धर्म्यज्ञानसम्भव एवेति ध्येयम् ।

।। **यागादाविति** ।। ननु ज्योतिष्टोमादिवाक्याद्यागादेः स्वर्गसाधनत्वादि-रूपवाक्यार्थज्ञानानन्तरं तत्र प्रामाण्यज्ञाने सति ज्ञायमानाया बुभुत्सायाः कथं तद्धेतुकोटिस्मरणहेतुतेति चेन्न । साधारणधर्मदर्शनस्य सत्वेनेति तारकहेतोर्बुभुत्सायाः सत्त्वेनेति ज्ञापकहेतोश्चोक्त्या सामग्र्याः सामग्याः सत्त्वादवगमाच्चेत्यर्थात् ।

यद्वा यागादाविष्टसाधनत्वज्ञानानन्तरस्य सामान्यतो ज्ञाते संशयं विनापि प्रामाण्यादिरूपविशेषण बुभुत्सायाः सत्वेन तदवधारणार्थं प्रवृत्तस्य कोट्यन्तरव्यवच्छेदेन प्रामाण्यावधारणस्य कर्तव्यताबुभुत्सानन्तरं कोटिद्वय-स्मरणस्यौचित्यावर्जिततया तथोक्तिः । साधारणधर्मदर्शनान्तरं कोटिस्मरण-प्रतिबन्धकविषयान्तरसञ्चाराभावप्रदर्शनार्थं तदुक्तिरित्याहुः । प्रामाण्याप्रामाण्य-रूपकोटिद्वयसहचरितत्वेनाग्रहे साधारणधर्मदर्शनेऽपि कोटिस्मृत्या कारणा-भावादेव संशयानुभवो नसामग्रीनैय्यत्यस्योपपादितत्वेन तन्नियमप्रयुक्त एव संशयाभाव इत्यत्र तात्पर्यम् ।। **विषयान्तरेति** ।। प्रामाण्यावधारणाय विषयान्तरसञ्चारनिरोधे उक्तरीत्या धर्मिज्ञानकोटिस्मृत्योः सत्योर्निर्णायकाव-तारादौचित्यावर्जितसंशय इति भावः । विषयान्तरसञ्चारसम्पादितासन्देह-स्यान्वयव्यभिचाराच्च न प्रवर्तकत्वमित्याह ।। **न हीति** ।। सुखादिज्ञाने

प्रामाण्यसन्देहस्य नियतस्य नियतप्रामाण्यनिश्चयत्वं प्रयोज्यत्वमेव युक्तम् । तत्त्वमिति नियतविषयान्तरस्य सञ्चारप्रयोज्यत्वमित्याह ।। **अपि चेति** ।। एवं प्रामाण्यसन्देहस्य न धर्मिज्ञानादितत्सामग्रीविरहप्रयोज्यता अपि तु प्रामाण्यनिश्चयप्रतिपाद्यतेत्युपपाद्य प्रामाण्यस्यावश्यवेद्यत्वं तदनङ्गीकारे बाधकमाह ।। **अन्यथेति** ।।

न्यायदीपः

सहकार्यन्तरविरहान्न ज्ञानज्ञानमिति तृतीयमाशङ्क्य च निराह ।। **न चेति** ।। **अनवस्थानाच्चेति** ।। बुभुत्सा हीच्छाविशेषः । तस्याः स्वविषय-ज्ञानसाध्यत्वाद् बुभुत्साहेतुज्ञानस्य धर्मिज्ञानविषयकस्य तद्विषयबुभुत्सा-साध्यत्वात् सा च तद्विषयज्ञानसाध्येति पूर्वपूर्वज्ञानव्यक्तिबुभुत्साव्यक्ति-परम्परयाऽनवस्थानाच्चेत्यर्थः । भविष्यदादिज्ञानज्ञाने कथञ्चिद् बुभुत्सासम्भवेपि न वर्तमाने । तथाच तत्र व्यभिचारान्न क्वापि सा ज्ञानज्ञानहेतुरित्याह ।। **वर्तमानेति** ।। **स्वीयेति** ।। यद्यपि स्वस्येदमित्यर्थेऽणि कृते स्वशब्दस्य द्वारादिषु पाठेन ''द्वारादीनाञ्च'' इतिसूत्रेण वकारात्पूर्वमैजागमेनौकारे सति सौवेति भाव्यम् । तथापि स्वस्मै हितमित्यर्थे ''प्राक् क्रीताच्छ'' इति छप्रत्यये स्वीयेति साध्विति ज्ञेयम् ।

चतुर्थं निराह ।। **न च धर्म्यज्ञानेति** ।। व्यवसायरूपधर्मिणोऽ-ज्ञानेत्यर्थः ।। **ज्ञानस्याज्ञान इति** ।। अननुव्यवसाय इत्यर्थः ।। **संशयेति** ।। ज्ञानं वृत्तं न वेत्येवं संशयेत्यर्थः । एतेन ''न च जिज्ञासाया-मेव अनुभवोऽनुभूयते'' इत्यादिभाष्यटीका विवृता ध्येया ।

कोट्यस्मरणेननेत्येतन्निराह ।। **कोट्यस्मरणं चेति** ।। ''ज्ञाने हि ज्ञाते तत्प्रामाण्यानुपलब्धौ कथं संशयो न स्यात्'' इति तत्वनिर्णयटीकां

विवृण्वान आह ।। **ज्ञानत्वेति** ।। **मण्युक्तमन्यदपि** निराह ।। **न चेति** ।। परकीयप्रवृत्तिहेतुभूतः शङ्काभावः प्रामाण्यनिश्चयहेतुक एव । न तु विषयान्तरसञ्चारहेतुक इति तु दुर्ज्ञानमित्यत आह ।। **किञ्चोक्तरीत्येति** ।। बाधोद्धारग्रन्थोक्तरीत्या सम्पन्नसामग्रीकेण प्रामाण्यनिश्चयप्रवर्तकत्ववादोक्त-रीत्या क्लृप्तेनेत्यर्थः । व्यभिचाराच्च असन्देहहेतुरेवायं न भवतीत्याह ।। **अपि-चेति** ।। **अन्यथेति** ।। क्लृप्तासन्देहहेतुत्यागेनाक्लृप्तहेतुकल्पन इत्यर्थः ।। **सममिति** ।। अत्रापि सामग्र्याः बाधोद्धारग्रन्थ उपपादितत्वादिति भावः ।

तर्कताण्डवम्

एतेन शङ्काविश्रान्तिभूमौ सुखादिज्ञाने प्रामाण्यव्याप्यस्य सुखज्ञानत्वादेर्विशेषस्य दर्शनादेवासंशय इति निरस्तम् । प्रामाण्य-व्याप्यतया सुखज्ञानत्वदुःखज्ञानत्वादिज्ञानादपि प्रामाण्यज्ञानस्य लघुत्वात् । सुखज्ञानत्वादेः प्रामाण्यव्याप्यत्वाग्रहेप्यसंशयदर्शनाच्च । जन्मान्तरीयव्याप्तिग्रहकल्पनस्य चातिप्रसङ्गित्वात् ।

तस्मात्प्रामाण्यस्यावश्यवेद्यत्वादनवस्थाद्वयं दुष्परिहरम् । एतदप्युक्तं "अन्यथा" इत्यादिना । परतस्त्वे उक्तानवस्थाद्वया-पत्तेरित्यर्थः ।

ननु त्वन्मते यद्यपि प्रामाण्यग्रहणार्थं संवादविसंवादभावाभाव-रूपपरीक्षा नापेक्षिता । तथापि दोषशङ्कादिरूपप्रतिबन्धनिरासार्थं साऽपेक्षितैव । तथा च तत्रापि दोषशङ्कायां तन्निरासाय परीक्षान्तर-मित्यनवस्था तुल्यैवेति चेन्न । साक्षिवेद्यसुखदुःखादिज्ञाने दोषशङ्काया अभावेन परीक्षानवस्थाभावात् । उक्तं हि भगवत्पादैः

"न परीक्षानवस्था स्यात्साक्षिसिद्धे त्वसंशयात्" इति ।

युक्तिरत्नाकरः

ननु सुखादिकृते प्रामाण्यसन्देहस्य न प्रामाण्यनिश्चयप्रयोज्यतायामेव प्रामाण्यमावश्यवेद्यं किन्तु तद्व्याप्यदर्शनप्रयुक्तमेवेत्यत्राह ।। **एतेनेति** ।। लघुत्वादित्युपलक्षणम् । प्रामाण्यस्य निश्चयस्य क्लृप्तसामग्रीकत्वादन्यस्य चातथात्वादित्यपि द्रष्टव्यम् । ननु फलबलाज्जन्मान्तरीयतत्कल्पनमत्राह ।। **जन्मान्तरीयेति** ।। फलं चान्यार्थसिद्धमिति भावः । प्रामाण्यं च स्वत एवेत्यत्र एवकारेण परत इत्यस्य लाभात् तदन्यथाशब्देन परामृश्यत इत्याह ।। **परतस्त्व इति** ।। प्रमात्वेनावधारितज्ञानान्तरेण गृहीतार्थकत्वरूप-सजातीयसंवादप्रवृत्या विषयलाभरूपे विजातीयसंवादाभावश्च विसंवादाभाव-शब्दार्थतद्रूपा तदनुसन्धानसंरूपा परीक्षायामपि साक्षीति अनभ्यासदशायां जलादिज्ञाने दोषजन्यत्वशङ्कया प्रामाण्यसंशयात्प्रवृत्तजलपानेनोत्पन्नसुखे साक्षिणा विषयीकृते तत्राप्रामाण्यशङ्कायाः कदाप्यभावेन यावदप्रामाण्यशङ्कयेव परीक्षणान्नानवस्थेति भावः ।।

।। इति परतस्त्वे अनवस्थोक्तिः ।। ७ ।।

न्यायदीपः

यदपि "विशेषदर्शनान्न तत्राप्रामाण्यशङ्का" इति मणिवचनं तद्विवरणपूर्वं तदपि नेत्याह ।। **एतेनेति** ।। **व्याप्यतयेति** ।। स्वरूपज्ञानमात्रस्या-प्रयोजकत्वादिति भावः । प्रामाणिकं गौरवं न दोषावहमित्याह ।। **सुखज्ञान-त्वादेरिति** ।। यद्वा व्यभिचारान्नायमसंशयहेतुरित्याह ।। **सुखेति** ।। व्यभिचारासिद्धिमाशङ्क्य च निराह ।। **जन्मेति अतिप्रसङ्गित्वादिति** ।। ज्ञानहेतुकत्वव्यभिचारस्थले सर्वत्रैवं परिहारसम्भवादिति भावः । यद्वा नारिकेलद्वीपवासिनो वह्न्यनुमानापत्तेरिति भावः ।

एवमियता ग्रन्थेन ''अवश्यवेद्यत्वाभावान्नानवस्थेत्यभिप्राय इति चेन्न । निश्शङ्कं प्रवृत्तावश्यवेद्यत्वात्'' इति तत्वनिर्णयटीकावाक्योक्तं निःशङ्क-प्रवृत्यर्थं तद्धेत्वप्रामाण्यशङ्काभावार्थं चावश्यवेद्यमित्यतीतवादत्रये चोपपाद्योप-संहरति ।। **तस्मादिति** ।। अतीतवादोक्तदिशा निश्शङ्कप्रवृत्यर्थं अत्र वादे उक्तदिशा धर्म्यज्ञानादिना शङ्काभावायोगेनाप्रामाण्यशङ्काभावार्थं च प्रामाण्य-निश्चयस्यापेक्षितत्वादित्यर्थः ।। **एतदपीति** ।। परतस्त्वे प्रामाण्य-ज्ञानस्यापीत्यादिनोक्तमित्यर्थः ।

''अवश्यं तत् स्वतःप्रामाण्यग्रहणवादिनाप्यङ्गीकर्तव्यं'' इत्यादिटीकार्थं निष्कृष्य वक्तुं स्वमतेऽनवस्थादोषं शङ्कापूर्वमुद्धरति ।। **नन्वित्यादिना** ।। **उक्तं हीति** ।। ज्ञानपादीयानुव्याख्यान इत्यर्थः ।

।। इति परतस्त्वे अनवस्थोक्तिः ।। ७ ।।

परतस्त्वे प्रथमप्रामाण्यानुमित्यसम्भवः

किञ्च प्रामाण्यमनुमेयं चेत्कथं प्राथमिकं तज्ज्ञानम् । अप्रसिद्ध-विशेषणत्वेनानुमानाप्रवृत्तेः । प्रवृत्तिगतसंवादरूपवैचित्र्येण तद्धेतुज्ञाने वैचित्र्यानुमानेपि वह्न्यर्थिप्रवृत्तिहेतोः वह्नित्ववति वह्नित्वप्रकार-कत्वादिरूपप्रामाण्यस्य विशिष्यासिद्धेः ।

न च प्रामाण्यमात्रनिषेधे व्याघातदण्डभयेन विशेष्यवृत्तिप्रकार-कत्वरूपं प्रामाण्यं सामान्यत एव प्रसिद्धं वह्निज्ञाने साध्यमानं पक्षधर्मताबलाद्वह्नित्ववति वह्नित्वप्रकारकत्वादौ पर्यवस्यति । एवं च नाप्रसिद्धविशेषणत्वं नाप्यसाधारण्यमिति वाच्यम् । प्रथमे स्वार्थानुमाने परकीयस्य प्रामाण्यनिषेधस्य अभावेन व्याघातानुप-स्थितेः । स्वयं निषेधस्य च तद्धीपूर्वकत्वात् ।

न च तत्र प्राग्भवीयसंस्कारजन्या स्मृतिरूपा तत्प्रसिद्धिः । प्रथम-प्रामाण्यज्ञानस्य प्रामाण्यस्वतस्त्वेनैवोपपत्तौ तत्कल्पकाभावात् ।

युक्तिरत्नाकरः

।। **अप्रसिद्धविशेषणत्वेनेति** ।। यद्यपि प्रामाण्य[1]विशेषकानुमिति रेवमपि सम्भवत्येव । तथापि तस्याप्रसिद्धौ तन्नेत्यत्र तात्पर्यम् । ननु संवादिप्रवृत्तिहतुविलक्षणहेतुसाध्या तद्विलक्षणकार्यत्वादित्यनुमानेन सिद्धलक्षण्यं प्रामाण्यरूपमेव पर्यवस्यतीत्यत्राह ।। **प्रवृत्तीति** ।। आदिपदेन वह्न्यवृत्ति-प्रकारादावनवच्छिन्नत्वादेः परिग्रहः । न च तस्य नाम प्रवृत्तित्वमिति वाच्यम् । तन्मते प्रामाण्यनिश्चयस्य साक्षादप्रवर्तकत्वेनाप्रामाण्य-शङ्कानिरासार्थकतया तस्य च ततोऽपि लाभादिति भावः । प्रामाण्यमात्रनिषेधे विशेष्यवृत्तिप्रकारकं ज्ञानं नास्तीति प्रमात्वसामान्यनिषेधे व्याघातः । प्रमा नास्तीति निषेधबोधके वाक्ये स एव दण्डः भयशब्दश्च तस्य वाक्यशब्दस्य निषेधप्रतियोगिज्ञानं विनाऽसम्भवलक्षणविपक्षबाधकतर्कसूचनार्थः । तथा चेदं वाक्यं प्रतियोगिज्ञानपूर्वकं निषेधज्ञानपूर्वकवाक्यत्वात्सम्मतवदित्यनुमान-सिद्धस्य ज्ञानस्य विषयं विनानुपपत्त्या प्रमासामान्यप्रसिद्धावयं वह्नित्वेनानुभवो विशेष्यवृत्तिप्रकारकः समर्थप्रवृत्तिजनकत्वात् यन्नैवं तन्नैवमिति व्यतिरेकिणा पक्षधर्मताबलाद् वह्नित्ववतीत्यादिविशेषसिद्धिरित्यर्थः ।

।। **नाप्यसाधारणमिति** ।। साध्यस्य सामान्यत एव सिध्या व्यक्ति-विशेषवृत्तित्वेनानिश्चयात् साध्यवद्व्यावृत्तत्वेन हेतो[2]रनिश्चयात् नासाधारण्य-मित्यर्थः । इदं चोपलक्षणम् । हेतोर्निश्चयसाध्यवद्वृत्तित्वेनानिश्चयात् नान्वयित्वमित्यपि द्रष्टव्यम् । यद्व्याघातो विरोध एव । तथा च प्रमामज्ञात्वा तन्निषेधे विरोधात् प्रमासामान्यप्रसिद्धिरित्यर्थः । यद्यपि परैर्विशेष्यावृत्य-

---

१. "विशेष्यक" इति स्यात् । २. "निश्चित" इति स्यात् ।

प्रकारकत्व एव सामान्यप्रसिद्धिरुक्तेति तदनुवाद एवोचितः । तथापि स्वतस्त्वपरतस्त्वविचारपरविषयः प्रामाण्यप्रसिद्धेरेव वाच्यतया परोक्तायाश्च प्रकृतानुपयोगादनौचित्यज्ञापनायेदमनूदितम् । वक्ष्यते च तत् । यद्यपि परैर्व्याघातेन प्रमातद्विषयसिद्धौ वह्निर्विशेष्या[1]प्रवृत्तिप्रकारानवच्छिन्नज्ञानविषयो ज्ञेयत्वादित्यन्वयिना पक्षधर्मताबलादयं वह्न्यनुभवः प्रमेति ज्ञानविशेष-वृत्तित्वरूपप्रकारौदासीन्येन वह्निमात्रे सामान्यत वह्न्यवृत्ति[2]प्रकारका-नवच्छिन्नज्ञानत्वप्रसिद्धावयं वह्निरित्यनुभवविशेष उक्तः । साध्यसिध्यर्थमयं वह्नित्वेनानुभवः प्रमेत्यादिव्यतिरेकप्रवृत्तिरिति मध्येऽन्वयानुमानमप्याश्रितम् । तथापि तस्या[3]नुयोगमभिप्रेत्य वह्निरित्येवानूदितम् । न च व्यतिरेकिणि साध्यप्रसिध्यर्थत्वात्तदादरः । व्यघातदण्डभयेन विशेष्य[4]वृत्यप्रकारकत्व-मात्रस्य प्रसिद्धावपि वह्निवृत्यप्रकारानवच्छिन्नरूपविशेष्याप्रसिद्धेरिति वाच्यम् । अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वेनास्य विशेषस्याधुनाप्यसिद्धेः पक्षधर्मताबलादपि साध्यस्य पक्षीयतामात्रमेव सिद्ध्येन्नत्वधिकमतिप्रसङ्गात् । न च वह्निं पक्षीकृत्य विशेष्यावृत्तीत्यादिना साध्यमानवह्नेरेव विशेष्यतया वह्न्यवृत्यप्रकारकत्वमादायेव पर्यवस्यति प्रकारान्तरासम्भवादिति वाच्यम् । वस्तुतो वह्नेरेव विशेष्यत्वेऽपि व्यापकतावच्छेदकविशेष्यत्वाकारेणैव तद्भानं न तु व्यवसायककोटावनुपात्तवह्नित्वाकारेणापि । तेन रूपेण तज्ज्ञान-सामग्र्यभावात् । न चानुमितावुपनीतभानपक्षे उपनीतं वह्नित्वं विशेष्यांशे प्रकारतया भासिष्यत इति वाच्यम् । तथा सति व्याघातसिद्धसाध्य-प्रसिद्धिमादायोपनीतविशेष्यस्य व्यतिरेकिण्येव भानसम्भवेन मध्येऽन्वयानुप-योगादिनिषेधस्य निषेधबोधकस्य वाक्यस्य व्याघातस्य निषेधवाक्यस्य विरोधस्येति वा ।

---

१. ''अवृत्ति'' इति स्यात् । २. ''प्रकारानवच्छिन्न'' इति स्यात् ।
३. ''अनुपयोग'' इति स्यात् । ४. ''अवृत्ति'' इति स्यात् ।

ननु स्वार्थानुमाने परकीयव्याघातस्यानवतारेऽपि स्वकीयप्रामाण्य-निषेधानुपपत्त्येव तत्प्रसिद्धिः स्यादित्यत्राह ।। **स्वयमिति** ।। प्रामाण्य-स्येत्यतः पूर्वमुपस्थितया स्वकीयनिषेधो कल्पित एवेति भावः । उपलक्षणं चैतत् । परार्थानुमानेऽपि तस्य सार्वत्रिकमेव । न हि प्रमा नास्तीति निषेधेन सर्वत्र भवितव्यमित्यस्ति निर्बन्धः । किं चेदं वाक्यं प्रतियोगिज्ञान-पूर्वकमित्यनुमाने प्रतियोगिभूता प्रमा प्रमात्वेन वा साध्यकूटकोटिनिष्ट-प्रतियोगित्वमात्रेण वा । नाद्यः तदप्रसिद्धेः । नान्त्यः प्रमात्वेन तदप्यनुपस्थित्या वक्ष्यमाणानुमितौ साध्यप्रसिध्य सम्पादनादित्यपि बोध्यम् ।। **स्वतस्त्वेनैवेति** ।। प्राग्भवीयसंस्कारोद्बोधस्य जीवनान्यथानुपपत्ति-मात्रकल्प्यत्वात् । तस्य च प्रकारान्तरेणोपपत्त्या तदकल्पकत्वादिति भावः । इदं चोपलक्षणम् । प्रत्ययोत्पन्नदेवदत्तादिज्ञानवृत्तेः देवदत्तत्व-वतीत्यादि प्रामाण्यस्य प्रागनुभवेन तत्संस्कारासम्भवेऽपि बोध्यः ।

न्यायदीपः

एवं परतस्त्वे अनवस्थाद्वयोक्त्या स्वतस्त्वहेतूनामप्रयोजकत्वं निरस्य विपक्षेऽनुमित्यसम्भवरूपबाधकान्तरादपि नाप्रयोजकाः स्वतस्त्वहेतव इति भावेनाह ।। **किञ्चेति** ।। ननूक्तमत्र **मणौ** ''प्रथमं च प्रामाण्यज्ञानं व्यतिरेकिणा'' इति तत्राह ।। **अप्रसिद्धेति** ।। साध्याप्रसिद्धौ तन्निरूपित-व्याप्त्यज्ञानादिति भावः । ननु संवादिप्रवृत्तिर्विसंवादिप्रवृत्तिहेतुविलक्षण-हेतुसाध्या तद्विलक्षणकार्यत्वादित्यनुमानेन सिद्ध्यद्वैलक्षण्यं प्रामाण्यरूपमेव सेत्स्यतीत्यत आह ।। **प्रवृत्तीति** ।। [१]दाहसमर्थविशेष्यवृत्तिप्रकारकत्वादि-रादिपदार्थः ।

---

१. दाहसमर्थविशेष्यकत्वविशेष्यवृत्तिप्रकारकत्वादिः इति वा, विशेष्यावृत्य-प्रकारकत्वादिः इति वा पाठः भवेत् ।

प्रकारान्तरेण प्रसिद्धिमाशङ्क्य निराह ।। **न चेति** ।। विशेष्यवृत्ति-प्रकारकज्ञानं नास्ति, प्रमा नास्तीत्यादिनिषेधस्य क्वचित्प्रमाप्रसिद्धिं विनानुपपत्तेस्तदर्थं तत्प्रसिद्ध्यभ्युपगमे व्याघातरूपदण्डप्रसङ्गात्तद्भयेन क्वचित्प्रसिद्धेरवश्यवाच्यत्वात् ।। **सामान्यतः सिद्धमित्युक्तम्** ।। **साध्यमानमिति** ।। वह्निज्ञानं विशेष्यवृत्तिप्रकारकं समर्थप्रवृत्तिहेतुत्वादिति व्यतिरेकिणा साध्यमानमित्यर्थः ।। **नाप्यसाधारण्यमिति** ।। व्यक्तिविशेषे साध्यस्यानिश्चयेन सपक्षानिर्णयादिति भावः । ननु स्वर्थानुमाने परकीयव्याघातानवतारेपि स्वकीयप्रामाण्यनिषेधानुपपत्यैव तत्सिद्धिः स्यादित्यत आह ।। **स्वयमिति** ।। तथा च सा धीरेव कथं स्यादिति मृग्यत इति भावः ।

''प्रागभवीयसंस्काराद्विशेष्यावृत्यप्रकारकत्वं तद्वति तत्प्रकारकज्ञानत्वं वा तत्प्रामाण्यं तन्मात्रं स्मृतं वह्निज्ञानादौ साध्यमानं'' इत्यादिना मणिकृदुक्तं तत्सम्प्रदायविदां मतमनूद्य निराह ।। **न च तत्रेति** ।। प्रथमप्रामाण्यानुमितिस्थल इत्यर्थः ।। **उपपत्ताविति** ।। तदुपपत्तिप्रकारश्च बाधोद्धारग्रन्थे संशयोपपादनग्रन्थादौ चोक्त इति भावः ।

तर्कताण्डवम्

अथ प्रथमं अयं वह्नित्वेनानुभवो वह्नित्वप्रकारकत्वे सति वह्नित्वाभाववद्विशेष्यको न समर्थप्रवृत्तिजनकत्वात् व्यतिरेकेणाप्रमावदित्यनुमानेनाप्रामाण्याभाव एवानुमेयः । तत एव निष्कम्पप्रवृत्तेः । न च तत्रापि साध्याप्रसिद्धिर्दोषः । अभावसाध्यके व्यतिरेकिणि साध्यप्रसिद्धिं विनैव साध्याभावरूपस्य भावस्य हेत्वभावव्याप्यत्वग्रहात् ।

यद्वा वह्नित्वाभाववद्विशेष्यको नेत्येव साध्यम् । पक्षधर्मताबलाद-

प्रामाण्याभावसिद्धिः । नच घटादिरूपात् सपक्षाद् व्यावृत्त्याऽसाधारण्यम् । तस्यानित्यदोषत्वादिति चेन्मैवम् । प्रथमस्य प्रामाण्यग्रहणस्योपाये पृष्टेऽप्रामाण्याभावग्रहणोपायकथनस्य व्यधिकरणत्वात् ।

न चोक्तव्यतिरेक्येव पक्षधर्मताबलाद्वह्नित्ववद्विशेष्यकत्वरूपं प्रामाण्यं गृह्णातीति वाच्यम् । व्याप्त्या व्यापकतावच्छेदकावच्छिन्नत्वेनोपस्थापितस्यापूर्वस्य व्यक्तिविशेषस्यैव पक्षधर्मतया पक्षसम्बन्धसिध्या तथानुपस्थपितस्योक्तरूपप्रामाण्यस्य पक्षसम्बन्धबोधने तस्या असामर्थ्यात् ।

युक्तिरत्नाकरः

मणिकृतः अभिमतं पक्षमाशङ्कते ।। **अथ इति** ।। वह्नित्वप्रकारकानुभवमात्रपक्षीकरणे गुञ्जाविशेष्यकस्यापि तस्य पक्षतापत्त्या बाधासिद्ध्योः प्रसङ्गेन तद्वारणायायमिति व्यक्तिविशेषनिर्देशः ।। **वह्नित्वप्रकारकत्वे सतीति** ।। यद्यपि **पक्षधरादिभिः** वह्नित्वाभाववदविशेष्यकत्वमात्रमेव साध्यं निष्कृष्टं तथापि विशेष्यवृत्तिविशिष्टाभावस्य विशेषणाभावपर्यवसायितानियमादित्युत्तरग्रन्थानुरोधाद्विशिष्टाभावस्यैव साध्यतोचितेति **यज्ञपतिना** तथैव व्याख्यातत्वात् तथैवानुवदति ।। **समर्थेति** ।। समर्थप्रवृत्तिजनकत्वमेवानुगतं नास्तीत्ययं वह्निरित्यनुभवजन्यप्रवृत्तिसमर्थत्वे दाहसमर्थविशेष्यकत्व एवेति दाहसमर्थविषयकप्रयत्नजनकत्वादित्यर्थः । अत्र विशिष्टाभावस्य साध्यत्वादेवात्र वह्नित्वमिति ज्ञाने व्यभिचारः । वह्नित्वाभाववति वह्नित्वविशेष्यकतया वह्न्यंशे वह्नित्वप्रकारकतया विशेष्यसत्वेऽपि वह्नित्वप्रकारकत्वरूपविशेषणाभावेन विशिष्टाभावसत्वात् ।। न च वह्निमानयमिति ज्ञाने व्यभिचारः । तत्र [१]वह्निभाववत्पर्वतविशेष्यकतया

१. "वह्न्यभाव" इति स्यात् ।

वह्न्यंशे वह्नित्वप्रकारकतया च साध्याभावसत्वात् । वह्नौ प्रवर्तकतया हेतुसत्त्वाच्चेति वाच्यम् । यदंशे हेतुसत्वं तदंशे साध्यस्यापि सत्वादत एव वह्निगुञ्जापुञ्जयोरिमौ वह्नीति ज्ञाने व्यभिचारः ।। **तत एवेति** ।। न हि प्रामाण्यनिश्चयोऽपि स्वतः प्रवर्तकः । किन्त्वप्रामाण्यशङ्कानिरासद्वारा । तन्निरासश्चाप्रामाण्याभावनिश्चयेनापि सम्भवतीति भावः ।

।। **अभावसाध्यक इति** ।। व्यतिरेकिणि साध्यस्याप्रसिद्धौ तदभावस्याज्ञानात्तत्र साधनाभावनिरूपितव्याप्तिग्रहासम्भव इत्येव हि साध्याप्रसिद्धेर्दोषत्वम् । तच्चाभावसाध्यके न सम्भवति । तत्र साध्याभावस्य भावरूपतया साध्यानुपस्थितावपि साधनाभावनिरूपितव्याप्तेः ग्रहसम्भवात् । न च साध्याभावत्वेन तदग्रहे गमकतया प्रयोजकेन साध्याभावव्यापकाभावप्रतियोगित्वेन हेत्वग्रहात्कथं तेन हेतुना साध्यसिद्धिरिति वाच्यम् । यद्व्यापकतया हेत्वभावो गृहीतस्तदभावस्तेन हेतुना सिध्यतीत्येव नियमात् । एवं चाप्रामाण्याभावाप्रसिद्धावप्यप्रामाण्यव्यापकतया समर्थप्रवृत्तिजनकत्वाभावस्य गृहीततया तेन हेतुना प्रामाण्याभावरूपसाध्यं प्रसिद्धमेव सेत्स्यति ।

न चैवं सुखदुःखाभावात्मकत्वभ्रमे सुखव्यापकतया मुखग्लान्यभावादेव ग्रहे तेन मुखग्लान्यादिना सुखाभावानुमितेरेव स्यात् न दुःखानुमितिरिति वाच्यम् । यद्व्यापकतयेत्यस्य [1]पदात्मकतया गृह्यमाणस्य व्यापकतयेत्यर्थात् । एवं च सुखस्यापि दुःखाभावात्मकतयेति गृह्यमाणस्य व्यापकतया हेत्वभावो गृह्यत इति तेन हेतुना तदभावरूपदुःखानुमितिरविकलेति ।

नन्वेवं द्रव्यत्वव्यापकतयापि कपिसंयोगाद्यभावग्रहे तदभावस्य कपिसंयोगादिना वृक्षादौ द्रव्यत्वाभावानुमानापत्तिरिति चेन्न । तद्व्यापकतया हेत्वभावो गृहीत इत्यत्र हेत्वभाव इत्यस्य हेतुसत्वविरोधीत्यर्थात् ।

---

१. ''यदात्मकतया'' इति स्यात् ।

नन्वेवं पृथिवी इतरभिन्ना पृथिवीत्वादित्यत्र इतरत्वव्यापकतया पृथिवीत्वाभावग्रहे तदभावेन पृथिवीत्वेनेतरत्वात्यन्ताभाव एव सिध्येत् नत्वितरान्योन्याभावस्तस्य तदत्यन्ताभावरूपत्वाभावरूपत्वमावश्यकम् । यस्य यद्विरहरूपत्वं तस्यापि तद्विरहरूपत्वनियमादिति । तन्न । अन्येन्याभावस्य पृथिवीतरभिन्नेति [1]समानाधिकरणनिबन्धधीगम्यत्वेन इतरत्वावच्छिन्नेतरज्ञानाधीनज्ञानत्वे प्रतियोगियोग्यताधीनसाक्षात्कारत्वेन तस्य घटविरहरूपत्वेऽपि घटस्य तद्विरहरूपत्वाभवेनोक्तयिमासिद्धेश्च । तत्रापि तद्विरहरूपत्वे तत्र भूतले [2]समवायसम्बन्धारोप्यघटकाभावो नास्तीति प्रतीत्यापत्तेः । विपक्षबाधकं विना सहचारदर्शनमात्रेण न त्वेतरात्यन्ताभावरूपत्वावच्छेदकभेदेनोक्तविरुद्धधर्माणामुपपत्तिः । एकघटप्रतीयोगिकानां प्रागभावादीनामारोप्यसम्बन्धभेदेन सामान्यविशेषाभावयोश्चावच्छेदकभेदेन च भेदाभ्युपगमेनाभावभेदकप्रयोजकयोस्तयोरिहापि सत्वेन भेदस्यावश्यकत्वात् । पृथिवीतरत्वस्य पृथिव्यन्योन्याभावरूपतया तदभावस्य भावरूपतानियमेन पृथिवीतरस्य जलादेर्भावरूपतया तदन्योन्याभावस्याभावैकस्वभावत्वनियमेन कथं तयोरैक्यम् । अन्यथैकस्य वस्तुनः भावाभावरूपत्वात् । तथा च कथं पृथिवीत्वेन इतरात्यन्ताभावसिद्धिरिति ।

अत्राहुः । यदभावव्यापकतया यदभावो गृहीतः स तेन सिध्यतीत्येव नियमः । एवं चेतरान्योन्याभावस्येतरतादात्म्यरूपेतरत्वविरहरूपत्वाभावेऽपि इतरतादात्म्यस्यान्योन्याभवविरहरूपतया तद्व्यापकतया पृथिवीत्वाभावस्य ग्रहणे तेन पृथिवीत्वेन तदन्योन्याभावसिद्धिरविकलैवेति । न चैवं यत्रेतरतादात्म्यं तत्र पृथिव्यन्योन्याभाव इत्यन्योन्याभावे व्यापकत्वाग्रहे

१. "सामानाधिकरण्य" इति स्यात् । २. "समवायसम्बन्धेन घटाभावः" इति स्यात् ।

[1]अन्योन्याभावपृथिवीत्वविरहरूपत्वाभावेन यदभावो गृहीतः इत्युक्त-नियामकाभावेन पृथिवीत्वेनेतरभेदानुमितिर्न स्यात् । न स्याच्च । यत्र पृथिव्यन्योन्याभावः तत्र गन्धविरह इति व्याप्तिग्रहेण यदभावव्यापकाभावतया इतरभावेन गन्धेन पृथिवीत्वानुमितिरिति वाच्यम् । यदभावव्यापकतये-त्यत्रोभयत्रापि योऽभावो यस्येति बहुव्रीहिणा प्रतियोग्यनुयोगिभावलाभेन यत्प्रतियोग्यनुयोगिभावलक्षणसम्बन्धवतो विरोधिनो व्यापकतया प्रतियोग्यनुयोगिभावसम्बन्धवान्विरोधी गृहीत इत्यर्थपर्यवसानात् । एवं च पृथिव्यन्योन्याभावस्य पृथिवीत्वात्यन्ताभावरूपत्वाभावेऽपि पृथिवीत्वस्य तदन्योन्याभावात्यन्ताभावरूपत्वेन सह प्रतियोग्यनुयोगिभावसम्बन्धवा-नन्योन्याभावो व्यापकतया गृहीत इति (पृथिवीत्वेनेतरभेदात्यन्ताभावः) पृथिवीत्वेन सह प्रतियोग्यनुयोगिभावसम्बन्धत्वेन यत्प्रतियोग्यनुयोगि-भावलक्षणसम्बन्धवतो विरोधिन इति पूर्वदलस्यापि सत्वेनानुपपत्तिरिति तन्न ।

यत्प्रतियोग्यनुयोगिभावसम्बन्धवत इत्यत्र तादृशसम्बन्धवत्वं स्वरूपसद्विवक्षितमुत ज्ञायमानम् । नाद्यः । यत्र प्रमेयत्वाभाव-स्तश्चत्राभिधेयत्वाभाव इति व्याप्तिनिश्चये अभिधेयत्वेन प्रमेयत्वाननु-मित्यापातात् । तत्र प्रमेयत्वाद्यभावाप्रसिद्ध्या अभावत्वेन गृह्यमाणघटाभावे प्रमेयत्वादिप्रतियोगिकत्वारोपेण स्वरूपसतः प्रतियोग्यनुयोगिभावस्याभावात् । नान्त्यः । प्रकृताप्रामाण्याभावादि[2]साधके अप्रामाण्याभावादेरप्रसिद्ध्या प्रतियोग्यनुयोगिभावसम्बन्धेनाप्रामाण्यादेः गृहीतुमशक्यतया तदनुमानापातात् ।

तस्मादिदमत्र तत्त्वम् । यत्सम्बन्धावच्छिन्नस्य यस्य व्यापकतया यत्सम्बन्धावच्छिन्नो यो गृहीतः तत्सम्बन्धावच्छिन्नतदव्यापकतावच्छेद-कत्वाभिमतावच्छेदकावच्छिन्नाभावत्वप्रकारक पक्षधर्मताज्ञानेन तत्सम्बन्धा-वच्छिन्नतद्व्याप्यतावच्छेदकत्वाभिमतावच्छेदकावच्छिन्नाभावत्वप्रकारकानुमिति-

१. ''अन्योन्याभावस्य'' इति स्यात् । २. ''साध्यक'' इति स्यात् ।

र्जायत इति । एवं च पृथिवीतरभिन्ना गन्धवत्त्वादित्यत्र तादात्म्य-रूपसम्बन्धवच्छिन्नं यदितरवद्व्यापकतावच्छेदकत्वावच्छेदकत्वाभिमतं यद्गन्धवत्त्वाभावत्वं तदवच्छिन्नगन्धवत्त्वरूपहेत्वभावः स्वूपसम्बन्धावच्छिन्नो गृहीत इति स्वरूपसम्बन्धावच्छिन्नस्य तस्याभावरूपेणागन्धवत्त्वेन तादात्म्यरूपसम्बन्धावच्छिन्नेतरप्रतियोगिकोभावोऽन्योन्याभाव एवेति स एव सिद्ध्यति । एवं च यत्सम्बन्धावच्छिन्ना प्रामाण्यव्यापकतया यत्सम्बन्धा-वच्छिन्नं समर्थप्रवृत्तिजनकत्वाभावो गृहीतः तदभावेन समर्थप्रवृत्तिजनकत्वेना-प्रसिद्ध एव तत्सम्बन्धावच्छिन्नस्याप्रामाण्यस्याभावो सिद्ध्यति । तथा प्रमेयत्वप्रतियोगितया गृह्यमाणे घटाभावस्य व्याप्यतावच्छेदकत्वेनाभिमतं यदभिधेयत्वं तदवच्छिन्नाभावज्ञानेन तेनाभिधेयत्वेन व्यापकतावच्छेद-कत्वाभिमतप्रमेयत्वप्रतियोगित्वावच्छिन्नप्रतियोगिकाभावत्वेन प्रकारेण प्रमेयत्वानुमितिरविकला । यत्सम्बन्धावच्छिन्नयोः व्याप्यव्यापकभावो गृहीतः तत्सम्बन्धावच्छिन्नतदभावयोर्गम्यगमकभाव इत्युक्त्या सम्बन्धान्तरेण व्याप्तिग्रहे तदसम्बन्धान्तरेण तदभावानुमितिरिति संक्षेपः ।

ननु साध्ये वह्नित्वप्रकारकत्वे सतीति विशेषणं व्यर्थम् । न चाप्रामाण्या-भावरूपोद्देशसिध्यर्थं तदुपपादनम् । वह्नित्वप्रकारकज्ञानस्याप्रामाण्यं वह्नित्वाभाववद्विशेष्यकत्वमेवेति पक्षीकृते वह्नित्वप्रकारकानुभवे वह्नित्वाभाव-वद्विशेष्यकत्वाभावसाधनेऽपि तत्सिद्धेरित्यत आह ।। **यद्वेति** ।। अत्र वनदाहकसमर्थविषयकप्रत्ययत्वादिति पूर्वोक्तो हेतुः । अत्र वह्नित्वमिति ज्ञाने वह्नित्वाभाववद्विशेष्यके वह्नित्व[1]प्रवर्तके व्यभिचारात् । किन्तु दाहसमर्थविषयकप्रयत्नजनकत्वे सति वह्नित्वप्रकारकनिश्चयत्वादिति **मण्युक्त** एव । एवं च वह्नित्वप्रकारकत्वाभावादेव न व्यभिचारः ।

---

१. "प्रकारके" इति स्यात् ।

गुञ्जायामयं वह्निरिति ज्ञाने तद्वारणाय सत्यन्तम् । [1]वह्नाविव वह्नित्वं न वेति संशयेदाहसमर्थविषयकप्रयत्नजनके तद्वारणाय निश्चयपदम् । न च तस्य वह्नित्वप्रकारकत्वाभावादेव न व्यभिचारः । वह्नित्वं न वेति निषेधकोटौ [2]प्रतियोगिता वह्नित्वस्य [3]प्रकारकत्वात् । न चेह वह्नित्वं न वेत्यस्य वह्नित्वविशेष्यकत्वादिदं वृत्तित्वं वृत्तित्वतदभावकोटिकत्वाच्च न वह्नित्वप्रकारकत्वमिति वाच्यम् । इह वह्नित्वतदभावो वेति वह्नित्वतदभावविशेष्यकस्य पुरोवर्तिविशेषणकस्याधाराधेयभावसंसर्गस्यानुभवसिद्धस्य प्रकारान्तरेणानुभवसम्भवात् । एकत्र विरुद्धनानाकोटिवैशिष्ट्यविषयकत्वमात्रेणापि संशयत्वस्य सम्भवे कोटिविशेषणकत्वस्य गौरवेण तन्त्रत्वात् ।। **वह्नित्वाभाव इति** ।। इदं वृत्तिर्नवेति संशये तद्वारकत्वसम्भवाच्च ।

यदत्रोक्तं **यज्ञपतिना** । वह्नित्वाभाववद्विशेष्यके इत्येतावन्मात्रं न साध्यं तस्य वह्नावयं वह्निर्गुञ्जापुञ्जो नेति साधारणतया निष्कम्पप्रवृत्तावनुपयोगात् । स्वसमानाधिकरणनिश्चयप्रकारीभवद्वह्नित्वाभाववद्विशेष्यकत्वे सति वह्नित्वप्रकारवानित्येव विवक्षितम् । तच्च संशयाव्यावृत्तम् । तच्च तस्य वह्नित्ववद्विशेष्यकत्वेऽपि संशयसमानाधिकरणनिश्चयं प्रति वह्नित्वस्य शतृप्रत्ययवाच्यवर्तमानप्रकारतया अभावेन तादृशनिश्चयप्रकारीभवद्वह्नित्वाभाववद्विशेष्यकत्वात् । एवं च वह्नावियं गुञ्जेति भ्रमे व्यभिचारवारणाय हेतौ वह्नित्वप्रकारकपदम् । उक्तभ्रमे वह्नित्ववद्विशेष्यकत्वे सति स्वपदस्य समभिव्याहृतपरतया वह्नित्वस्योक्तपदभ्रमसामानाधिकरणवत्कालीननिश्चयकारकत्वाभावेन तद्घटितविशिष्टसाध्याभावात् । निश्चयपदं नोक्तसंशये व्यभिचारवारणायेति ।

तन्न । उक्तसंशये तत्पुरुषीयतत्कालीननिश्चयाभावेन तादृङ्निश्चय-

१. ''वन्हावेव'' इति स्यात् । २. ''प्रतियोगितया'' इति स्यात् । ३. ''प्रकारत्वात्'' इति स्यात् ।

प्रकारीभूतवह्नित्वस्य प्रसिद्ध्या तद्घटितसाध्याभावसत्वनिबन्धनव्यभिचारः । नाप्रसक्तेः । उक्तरीत्या वह्नावियं गुञ्जेति भ्रमेऽपि व्यभिचाराप्रसक्त्या वह्नित्वप्रकारकपदवैय्यर्थ्याच्च । न चोक्तसंशये तत्पुरुषीयतत्कालीनकोटि-स्मृतिमादायोक्तनिश्चयप्रकारता वह्नित्वे प्रसिद्धेति वाच्यम् । तथा सति तमादायैव तत्र साध्यसत्वेन व्यभिचारप्रसक्त्या तद्विशेष्यविशेष्यकत्वस्यापि प्रवेश्यतया कोटिस्मृतेश्चान्यविशेष्यकत्वनियमेनाप्रसिद्ध्यनुद्धारात् ।

यदत्रोक्तं **नरहरिणा** । उक्तसंशये साध्याभावसत्वात् । निश्चये तन्निबन्धनव्यभिचारधीविरहेपि विशेषणाप्रसिद्ध्या तद्घटितसाध्यस्यापि तत्रासत्वेन सकलसाधनाश्रयाश्रितसाध्यसामानाधिकरण्यरूपव्याप्तिविरहः प्रकृतहेतौ वज्रकल्पः । न च साध्यासत्वज्ञानाधीनव्यभिचार-बुध्यभावादनुमित्युत्पत्तौ स्वरूपसद्व्याप्तिविरहोऽकिञ्चित्कर इति वाच्यम् । स्वरूपसद्व्याप्तिविरहेऽसत्य एव परामर्शस्य दोषत्वापत्तेरिति ।

तन्न । उक्तरीत्याऽन्वयव्याप्त्यसम्भवेऽपि यत्र स्वसमानाधिकरणनिश्चय-प्रकारी[1]भाववद्वह्नित्वाभाववद्विशेष्यकत्वं तत्र दाहसमर्थविषयकप्रयत्नजनकत्वे सति वह्नित्वप्रकारकत्वाभाव इति प्रकृतोपयुक्तव्यतिरेकव्याप्तेरप्रमायां सत्वेन तद्धेहे परामर्शस्यापि तत एव सत्यत्वेन व्यतिरेक्यनुमानप्रवृत्तेरविकलत्वेन निश्चयपदवैय्यर्थ्यस्य दुष्परिहरत्वात् । **मधुसूदनाद्युक्त**दिशा संशये निश्चयवत्वं विना कृतहेतुसत्वेऽपि साध्यतावच्छेदकहेतुसमानाधिकरणा-भावविशेषप्रतियोगितानवच्छेदकत्वस्य हेतौ तदवच्छिन्नसाध्यसामानाधि-करण्यसत्वेनान्वयव्याप्तिसम्भवाच्च । सकलसाधनाश्रयाश्रितसाध्यसामानाधि-करण्यरूपव्याप्ते**र्मणि**कृताऽनभ्युपगमाच्च ।

यदपि तेनैव [2]निश्चायकप्रकारताविशिष्टवह्नित्वाभाववद्विशेष्यकत्वे सति

---

१. "भवद्वह्नि" इति स्यात् । २. "निश्चय" इति स्यात् ।

वह्नित्वप्रकारको नेत्येव साध्यम् । कालान्तरे निश्चयप्रकारतावैशिष्ट्यस्य वह्नित्वेऽपि सिध्या नाप्रसिद्धिः । संशयकाले च तद्वैशिष्ट्यस्य तत्राभावेन संशये विशिष्टसाध्याभावेन व्यर्थं निश्चयपदमिति पक्षान्तरमुक्तम् ।

तन्न । यदाकदाचिन्निश्चयप्रकारतावैशिष्ट्यविवक्षायां संशयेऽपि साध्यसत्वेन व्यभिचाराप्रसक्तेः । तत्कालीनवैशिष्ट्यविवक्षायां तु संशये प्रसिद्धेरेवेत्यलम् ।

यद्यपि समानाधिकरणानिश्चयकारीभवद्वह्नित्वाभाववद्विशेष्यको नेत्यत्र स्वपदस्य स्वोपादानगोचर[1]जन्यकृतिजन्यान्यानीत्यत्रेव प्रतियोगिपरत्वेनाप्रमायामेव प्रतियोगिप्रसिद्धेर्नाप्रसिद्धिशङ्का तथापि तदा संशयेऽपि तदभावरूपसाध्यसत्वेन व्यभिचाराप्रसक्त्या निश्चयपदानर्थक्यमेवेति यज्ञपत्युक्तमयुक्तम् ।

यदपि साध्येऽपि निश्चयपदान्तर्भावस्य विवक्षितत्वात् । संशये व्यभिचारवारणाय हेतौ निश्चयपदसार्थक्यमिति ।

तन्न । वह्नित्वाभाववति वह्नित्वप्रकारकनिश्चयो नेति प्रतियोगिविशेषणत्वे उक्तसंशयो, विशिष्टाभावरूपसाध्यसत्वेन व्यभिचाराप्रसक्त्या निश्चयपदानर्थक्यात् । निश्चयत्वसमानाधिकृतो प्रामाण्याभावः साध्य इति स्वातन्त्र्येण विशेषणत्वे तस्य भावरूपतया केवलभावसाध्यकत्वसमानाश्रयसाध्याप्रसिद्ध्या दूषणत्वोक्त्ययोगादिति ।

ननु विशिष्टहेतोरपि वह्नावेव वह्नित्वाभाव इदं वृत्तिरिति ज्ञानेऽवह्न्यर्थप्रवर्तको वह्नित्वप्रकारकनिश्चये व्यभिचार इति चेन्न । निश्चयपदेनैव तद्वारणात् । निश्चयत्वं हि संशयान्यज्ञानत्वम् । संशयत्वं च न

---

१. "जन्यकृतिजन्यानि जन्यानि" इति स्यात् ।

भासमान[1]विरोधनानाकोटिज्ञानत्वमात्रम् । पीतः शङ्ख इत्यादेरपि तत्वापत्तेः । किन्तु धर्मिपरस्याभावविषयकत्वम् । स च एकधर्मिकत्वान्तर्भावे गौरवात् । तदन्यज्ञानत्वरूपनिश्चयत्वस्य च परस्पराभावविषयकज्ञानत्वरूपतया वह्नित्वाभावाविषयकत्वस्यैव पर्यवसन्नत्वात् ।

नन्वेवमपि वह्नावेवात्र वह्नित्वसमवाय इति ज्ञाने व्यभिचारः । न च वह्नित्वप्रकारकत्वावच्छेदेन दाहसमर्थविषयप्रयत्नभञ्जकत्वं विवक्षितम् । अत्र समवायांश इव वह्नित्वप्रकारकत्वेन तदंशे दाहसमर्थविषयकप्रयत्नजनकत्वाभाव इति वाच्यम् । तथा विवक्षायां निश्चयपदवैय्यर्थ्याभावात् । उक्तसंशयस्याप्यभावांश एव वह्नित्वप्रकारकत्वेन तदंशे दाहसमर्थविषयप्रयत्नजनकत्वाभावात् ।

अत्रोक्तम् **मधुसूदनेन** । वह्नित्वप्रकारकेत्यत्र वह्नित्वे वैशिष्ट्यविशेषणत्वम् । विशेषणमिह वह्नित्वसमवाय इत्यत्र तु वह्नित्ववैशिष्ट्यविशेषणमेवेति नोक्तदोषः । न चाभावप्रतियोगिनोः स्वरूपमेव वैशिष्ट्यमित्यभावं प्रति विशेषणीभूतस्य वह्नित्वस्य वैशिष्ट्यविशेषणतया वैशिष्ट्यविशेषणीभूतवह्नित्वप्रकारकत्वाभावादेवोक्तसंशये वह्नित्वाभाव इदं वृत्तिरिति निश्चयेन व्यभिचारवारणात् निश्चयपदानर्थक्यमिति वाच्यम् । वह्न्यर्थप्रवृत्त्यनुकूलत्वेन वैशिष्ट्यस्य विशेषणात् । उक्तस्थले वह्नित्वस्याभावरूपवैशिष्ट्यविशेषणतया ज्ञानेऽपि तस्य वह्न्यर्थिप्रवृत्त्यनुकूलत्वाभावेन तादृशवैशिष्ट्याविशेषणवह्नित्वप्रकारकत्वसत्वेन निश्चयपदस्य तत्र व्यभिचारवारकत्वादिति ।

तन्न । निश्चयपदार्थसार्थक्याय विशेषणान्तरप्रक्षेपणस्यानुचितत्वात् । किं चेह वह्नौ द्रव्यमिति प्रमायां व्यभिचारः । तस्यां वह्नित्वस्य वह्निं प्रत्येव विशेषणतयावह्न्यर्थिप्रवृत्त्यनुकूलवैशिष्ट्यविशेषणवह्नित्वप्रकारकनिश्चयसत्वात् ।

१. "विरुद्ध" इति स्यात् ।

यदपि वक्तुरेवोक्तं वह्नित्वसाक्षात्विशेषणकतया दाहसमर्थाश्रयाविषयकान्यत्वं निश्चयत्वम् । एवं चात्र वह्नित्वसमवाय इतीत्यत्र वह्नित्वसाक्षाद्विशेष्यकतया दाहसमर्थाश्रयस्य समवायस्य विषयीकरणेन तद्विषयकान्यत्वस्य विशेषस्य तत्राभावात् न व्यभिचारः । न चैवं गुञ्जायामयं वह्निरिति भ्रमे वह्नित्वसाक्षाद्विशेषणकतया दाहसमर्थभिन्नगुञ्जाविषयकतया तदन्यत्वरूपनिश्चयत्वाभावादेव तत्र व्यभिचारसंवारणे सत्यं तद्वैय्यर्थ्यमिति वाच्यम् । एवमपि तत्तादात्म्यारोपवह्नित्वस्य वह्निं प्रत्येव साक्षाद्विशेषणतया तद्भिन्नगुञ्जायां साक्षादविशेषणत्वेनोक्तनिश्चयत्वसद्भावेन तद्व्यभिचारवारकत्वादिति ।

तन्न । ''वह्निमानयं पर्वत'' इत्यत्र वह्नित्वस्य वह्निं प्रत्येव साक्षाद्विशेषणतया वह्नित्वसाक्षाद्विशेषणकतया दाहसमर्थभिन्नविषयकान्यस्य सत्वेन वह्नित्वाभाववत्पर्वतविशेष्यकतया साध्याभावेन व्यभिचारात् । ''इह वह्नौ द्रव्यत्वम्'' इह वह्नौ रूपमि''त्यादिप्रत्यक्षे व्यभिचाराच्च ।

किञ्च प्रयत्नसाध्यतया वह्न्यादानमिव व्यापार्यतया वह्निरपि विषय इति वह्न्यादानमिष्टसाधनमित्यनुमितौ दाहसमर्थविषयकप्रयत्नजनकत्वे सतीत्यादिविशिष्टहेतुसत्वेन तत्र व्यभिचारः । अयं वह्नित्वसमवायवानित्यत्र दाहसमर्थभिन्नसमवायं प्रति वह्नित्वस्य साक्षाद्विशेषणतया विशिष्टहेत्वभावेनासिध्यापत्तेश्च न तस्यापक्षत्वमिति वाच्यम् । तत्साधारणनिश्चयत्वनिर्वचनसामर्थ्ये तस्यापक्षत्वोक्त्ययोगात् ।

यदपि तेनैवोक्तं वस्तुतस्त्वित्यादिना वह्नित्वप्रकारकेत्यनेन विशेषणगततयेदंत्वप्रकारकत्वाप्रकारकत्वं (विशेषणगततयेदं त्वप्रकारकत्वं) विवक्षितम् । तेनेह वह्नौ द्रव्यत्वमिह वह्नौ रूपमित्यत्र विशेषणगततयेदंत्वप्रकारकत्वे व्यभिचारः । एवं चेह वह्नित्वं तदभावो वेति संशये वह्नित्वादिदं वृत्तिरिति भ्रमे इह वह्नित्वाभावः इह वह्नित्वसमवाय इत्यादिषु

विशेषणगततयेदंत्वप्रकारकेषु व्यभिचारस्यानेनैव वारणादुर्वरितं निश्चयपदं प्रत्यक्षपरम्.। तच्च वह्न्युपादानमिष्टसाधानमित्यनुमितौ व्ययः । न चैवमप्युपनीतेष्टसाधनावगाहिप्रत्यक्षके व्यभिचारः । लौकिकत्वेनापि तद्विशेषणादिति ।

तन्न । वह्निवदिदं गेहमिति प्रत्यक्षे तथापि व्यभिचारात् । प्रत्यक्षतया तत्रापि विशेषणे इदंत्वभानाभ्युपगमे चायं वह्निरित्यादौ वह्नित्वांशेऽपीदंत्ववैशिष्ट्यभानापत्त्या तदंशे निर्विकल्पकत्वाभ्युपगमविरोधः । गुञ्जावह्न्योरिमौ वह्नी इति भ्रमे व्यभिचाराच्च ।

किं च त्वदुक्तरीत्या कालादिगोचरप्रत्यक्षसाध्यतया वह्निगोचरव्यपार्यतया काष्टादिगोचरं प्रयत्नं प्रति जनकत्वेन दाहसमर्थविषयकप्रत्यक्षजनकत्वेतिविशेषणतयेदंत्वाप्रकारकलौकिकप्रत्ययत्वस्य हेतोस्तत्र व्यभिचारः । न हि साध्यतया वह्निगोचरप्रयत्नजनकमुपादानप्रत्यक्षमेव न तु निमित्तगोचरप्रत्यक्षमित्यस्ति नियमः । येन काष्टादिगोचरप्रत्यक्षं वह्न्यर्थिप्रयत्नजनकं न स्यात् । किन्तु निमित्तादिसाधारणप्रवृत्तिविषयप्रत्यक्षमात्रमेव । अन्यथा घटध्वंसादिजनको प्रयत्नो मुद्गरादिप्रत्यक्षजन्यो न स्यादिति ।

यदपि निश्चये [१]यदाभिप्रेतं वह्नित्वाभावाविषयकत्वं वह्नित्वप्रतियोगिकपदार्थविशेषणतया वह्नित्वाविषयत्वमेव, तेनेह वह्नित्वसमवायः इह वह्नित्वाभाव'' इत्यादिबुद्धौ वह्नित्वप्रतियोगिकं समवायादिपदार्थं प्रत्येव विशेषणतया वह्निभानात् तत्र व्यभिचारः । यदंशे वह्नित्वप्रकारकत्वं तदंशे साध्यमिति विवक्षितत्वाच्च । ''इह वह्नौ रूपमिह वह्नौ द्रव्यमि''त्यादौ न व्यभिचारः । तत्र वह्न्यंश एव वह्नित्वप्रकारकत्वसत्वेन तदंशे साध्यव्यापिरूपत्वादिति वदद्भिः गुञ्जापुञ्जयोरिमौ वह्नी इति भ्रमे

१. ''यदभिप्रेतं'' इति स्यात् ।

व्यभिचारात् । तत्र गुञ्जांशे वह्नित्वप्रकारकत्वेऽपि साध्यासत्वात् । अयं वह्नित्वसमवायवानित्यादिज्ञाने भागासिद्धेश्च । न वा अस्तु वह्नित्वप्रकारनिश्यत्वादित्यत्र स्वार्थे कप्रत्ययः । विरुद्धप्रकारकत्वमेव निश्चयत्वम् । तथा च वह्नित्वप्रकारकत्वविरुद्धाप्रकारकज्ञानत्वादिति तदर्थः । तथा च इह वह्नित्वं तदभावो वा वह्नित्वाभाव इदं वृत्तिः इह वह्नित्वसमवाय इत्यादिषु वह्नित्ववह्नित्वाभावत्ववृत्तित्वसमवायत्वादीनां वह्नित्वविरुद्धानां प्रकारत्वात् व्यभिचारः ।

न च वह्निगुञ्जापुञ्जयोरिमौ वह्नी इति यत्र दोषवशात् वह्निगतमेवेदंत्वं त्वयाराप्यते तत्र साधारणधर्म एवेदंत्वरूपेण भासमानेन हीदन्त्वं तद्व्यक्तिमात्रवृत्तीत्यस्ति नियमः । तथापि तत्र व्यभिचारः इति वाच्यम् । ज्ञानपदस्य प्रत्यक्षपरत्वात् । [1]प्रत्यक्षेव सामग्रीमहिम्ना तन्मात्रवृत्तीदंत्वस्यापि भाननियमादिति । तदपि न गुञ्जायामयं वह्निरिति भ्रमे व्यभिचारस्योक्तदलेनैव वारणे तद्वारणार्थमुपात्तस्य सत्यंतस्य वैय्यर्थ्यापत्तेः । अयं वह्निरित्यादि-पक्षीकृतप्रत्यक्षज्ञानस्यापि वह्नित्वविरुद्धरूपत्वादिप्रकारकत्वेनासिद्ध्यापत्तेश्च । अनुमानादिकज्ञाने हेत्वलाभाच्च ।

यत्तु [2]नाव्ययपक्षे **मधुसूदनो**क्तं नोक्तदूषणम् । यत्र चक्षुषा किं शुककुसुमनिचये वह्नित्वेन गृह्यमाणोभिवान्नरूपम् । अवध्यग्रहणान्न-पृथक्त्वादिदोषान्नसाधारणजातिः । अविद्यमानात्वात् कर्मादि न गृह्यते । तत्र तद्व्यक्तिमात्रवृत्तिगुणकर्मजात्यादिरूपे इदंत्वस्य प्रत्यक्षेणाप्यग्रहादुक्तस्थले व्यभिचार एवेति ।

तन्न । माषराशिस्थमयीरूपस्येव किंशुककुसुमरूपस्यापि ग्रहणा-वश्यम्भावात् । न हि महाराजनावयवैर्पटस्येव वह्न्यवयवैः किंशुककुसुमा-

---

१. "प्रत्यक्षे इव" इति स्यात् । २. "नव्य" इति स्यात् ।

नामभिसम्बन्धोऽस्ति प्रदेशविशेषवृत्तित्वादिरूपस्य तदसाधारणधर्मेदन्त्वस्य प्रत्यक्षे भाननियमाच्चेति दिक् ।

यदपि **गोपीनाथोक्तम्** । स्वाभावाश्रयविशेषणतया वह्नित्वाविषयकत्वं निश्चयपदेनोक्तम् । एवञ्च अत्र वह्नौ वह्नित्वसमवाय इत्यादौ न व्यभिचारः । तत्र वह्नित्वाभावाश्रये समवायादौ वह्नित्वस्य विशेषणत्वात् । न चैवं गुञ्जायां वह्नित्वभ्रमे उक्तविशेषणेनैव व्यभिचारवारणे सत्यंतस्य वैय्यर्थ्यम् । इह वह्नौ द्रव्यत्वमित्यादिज्ञाने व्यभिचारवारकत्वात् । न च तद्दानेऽप्यप्रतीकारः । वह्नित्वेतरविशेषणत्वस्य दाहसमर्थविशेषणत्वात् वह्निरुक्तस्थले द्रव्यत्वादिकं प्रत्येव विशेषणत्वादिति ।

तन्न । अयं वह्नित्वसमवायवान् इत्यस्यापक्षत्वापत्तेः । स्वाभावाश्रयविशेषणतया वह्नित्वाविषयकत्वस्य वह्नित्वाभाववद्विशेष्यकत्वाभावरूपसाध्यसिद्धिं विना दुर्ग्रहत्वेनाज्ञानासिद्ध्यापाताच्च । इह वह्नित्वाभाव इति भ्रमे व्यभिचाराच्च । वह्नित्वाभावस्यात्माश्रयापत्त्या स्वानधिकरणत्वेन वह्न्यभावाश्रयविशेषणतया वह्नित्वाविशेषणकत्वस्य सत्वात् ।

न चैवम् उक्तन्यायेनैव साध्यस्यापि सत्वात् न व्यभिचारः । वह्नित्वाभावः इदं वृत्तिरित्यत्र व्यभिचारः इत्यादि **पक्षधर**विरोधश्चेति वाच्यम् । साध्ये वह्नित्वाभाववदित्यस्य वह्नित्वानधिकरणपरत्वान्नोक्तभ्रमे वह्नित्वेतराभावविशेषणतया सत्यन्ताभावादेव न व्यभिचारः । तथा सत्यत्र वह्नित्वसमवाय इत्यत्रापि सत्यन्तेनैव व्यभिचारवारणे स्वावेत्यस्य वैय्यर्थ्यात् । इह वह्नौ वह्नित्वमिति ज्ञाने स्वाभावाश्रयविशेषणतया वह्नित्वाविषयके व्यभिचाराच्च । वह्निगुञ्जयोरिमौ वह्नी इति गुञ्जायां तादात्म्यारोपे व्यभिचाराच्चेति ।

यदपि विशेष्यत्वेन वह्नित्वप्रतियोगिकाविषयत्वनिश्चयत्वं इह

वह्नित्वसमवाय इत्यत्र विशेषतया वह्नित्वप्रतियोगिकभावादिविषयकत्वात् न व्यभिचारः । वह्निर्वह्नित्वसमवायवानित्यस्य विशेषतया तत्प्रतियोगिक-विषयत्वेऽपि विशेष्यतया तत्प्रतियोगिकाविषयकत्वान्नासिद्धिः । वह्नि-त्वेतराविशेषणत्वेन दाहसमर्थस्य विशेषितत्वाद्वा यदंशे वह्नित्वप्रकारकत्वं तदंशे साध्यस्य विवक्षितत्वाद्वा इह वह्नौ द्रव्यत्वमित्यादौ व्यभिचार इति ।

तन्न । वह्नित्वाभाव इदं वृत्तिः इदं वह्नित्वं तदभावो वा इह वह्नित्वाभावः इह वह्नित्वसमवाय इत्यादिषु दाहसमर्थस्य वह्नित्वेतरविशेष-त्वेन सत्यन्तत्वं तेनैव तद्वारणे निश्चयपदवैय्यर्थ्यम् । अयं वह्नित्व-समवायवानित्यत्र समवायांशे वह्नित्वप्रकारकत्वेऽपि तदंशे साध्याभावेनांश-भेदविवक्षया अप्ययोगाच्चेति । तस्मात्कथं हेतुरिति चेन्न ।

दाहसमर्थविषयकप्रयत्नजनकत्वे सति वह्नित्वेतरविशेषणतया वह्नि-विषयकत्वाभावादिति हेत्वर्थः । एवं चेह समवायः, इह वह्नित्वं, तदभावो वा, इह वह्नौ रूपं, इत्यादिषु वह्न्यादानमिष्टसाधनमित्यनुमितौ च वह्नेर्वह्नित्वेतरसमवायादिविशेषणवह्नित्वेतरेत्यादि विशेषणात्तद्व्यभिचारनिरासः । वह्नित्वप्रकाकत्वे सतीत्यनेनेह वह्नित्वमित्यत्र तन्निरासः ।।

दाहसमर्थेत्यादिना च गुञ्जायामयं वह्निरिति भ्रमे तन्निरासः । तादात्म्यारोपे वह्नेर्वह्नित्वेतरपुरोवर्तिविशेषतया भानाद्विशेष्यभावादेव न व्यभिचारः । तथापि संसर्गारोपे वह्नित्वेतरपुरोवर्तिविशेषणतया वह्निविषय-कत्वाभावेन व्यभिचारः । न च वह्निगुञ्जयोरिमौ वह्नी इति संसर्गारोपे व्यभिचारः । अयं वह्निरित्यादिप्रत्यक्षस्य रूपरूपत्वादिगोचरतया वह्नित्वाभाववृत्तौ रूपस्य रूपत्वाभावापेक्षया विशेष्यत्वेन भानाद्वह्नित्वाभाव-वद्विशेष्यको नेत्येतावन्मात्रसाधने बाधापत्त्या तद्वारणाय वह्न्यभाववन्मात्र-विशेष्यको नेति साध्यावश्यकविशेषणीयतया तादृशसाध्यस्योक्तभ्रमेऽपि सत्वेन

व्यभिचाराप्रसक्तिः । इह वह्नौ वह्नित्वमित्यत्रापि वह्नित्वापेक्षया वह्नेरपि विशेष्यतया विवक्षितसाध्यसत्वादेव न व्यभिचारः ।

वस्तुतः वह्नित्वाभाववद्विशेष्यकत्वाभाव एव साध्यः । अयं वह्निरिति प्रत्यक्षस्य रूपादिविशेष्यकत्वेऽपि पक्षतावच्छेदकवह्नित्वप्रकारकत्वावच्छेदेनोक्तसाध्यस्य तत्रापि सत्वेन बाधाप्रसक्तेः । न चैवमिमौ वह्नी इत्युक्तभ्रमे व्यभिचारः । दाहसमर्थमात्रविषयकप्रयत्नजनकत्वे सतीति सत्यन्तार्थात् । न चैवमपीमौ वह्निवह्निसमवायाविति समूहालम्बने वह्नित्वेतरसमवायविशेषणतयापि वह्निविषयके हेत्वसिद्धिरिति वाच्यम् । तस्यापक्षत्वेऽप्यक्षतेः । न च सातत्साधारणहेतूकरणसामर्थ्यं दोषः । सिसाधयिषितसाध्यस्य तत्रासत्त्वेन तद्व्यावृत्तेरेवोचितत्वात् ।

परमार्थतस्तु दाहसमर्थविषयकप्रयत्नजनकत्वं यदंशे तदंशे साध्यसत्वं विवक्षितम् । एवं चोक्तसमूहालम्बने न व्यभिचारः । अत एवेह वह्नौ वह्नित्वमित्यत्रापि न व्यभिचारः । इह वह्नावित्यंश एव दाहसमर्थविषयकप्रयत्नजनकत्वे तदंशे साध्यस्यापि सत्वात् । इह वह्नित्वसमवाय इत्यादिशाब्दज्ञाने व्यभिचारः । निश्चयपदं च सार्थकमिति संक्षेपः ।

यद्वाऽत्रापि साध्ये दाहसमर्थविषयकप्रयत्नजनकत्वादिनिर्वाहोक्त एव हेतुः । अत एवेह हेत्वन्तरं नोपात्तम् । न चैवमत्र वह्नित्वमिति ज्ञाने व्यभिचारः । अयं वह्निर्मे भूयादितीष्टतावच्छेदकप्रकारिकाया एवेच्छादर्शनेन इह वह्नित्वं मे भूयादितीच्छायाः काप्यदर्शनेन चेच्छासमानप्रकारकज्ञानस्यैवेच्छाद्वारा प्रवर्तकत्वेनात्र वह्नित्वस्य चातथात्वेनाप्रवर्तकत्वात् । जनकीभूतज्ञानेष्टतावच्छेदकप्रकारकत्वाभावे तज्जन्येच्छायां तत्प्रकारकस्याकस्मिकत्वापातात् । इच्छास्वाभाव्यादेव तथाभ्युपगमस्य, सति गत्यन्तरे अयोगात् ।

न चैवमपि वह्न्यादानमिष्टसाधनमित्यनुमितौ व्यापार्यतया वह्निगोचर-प्रयत्नजनिकायां व्यभिचारः । लौकिकप्रत्यक्षत्वेनापि विशेषणात् । काष्ठादिगोचरप्रत्यक्षस्योद्देश्यतया दाहसमर्थविषयकप्रयत्नजनकत्वस्य विवक्षितस्य तत्राभावात् न व्यभिचारः । न च वह्निगुञ्जयोरिमौ वह्नी इत्यत्र व्यभिचारः । यदंशे हेतुसत्वं तदंशे साध्यस्यापि सत्वात् । अत एव वह्निमद्रेहमित्यत्रापि न व्यभिचारः इत्यलं विस्तरेण ।।

।। **न च घटादीति** ।। न चैवं घटादावेव साध्यप्रसिद्धेरप्रसिद्ध-साध्यकत्वोक्त्ययोगः । अप्रामाण्यस्य अयोग्यत्वेन तत्प्रतियोगिकाभावस्यापि घटादावनुमेयतया तत्रापि [१]साध्याप्रसिद्धोक्तिरीत्यैव तत्राप्यनुमानप्रवृत्ते-र्वाच्यतया प्रथममेव वह्न्यादिज्ञानेन तदनुमानात् । न चैवं घटादेर्निश्चित-साध्यवत्वाभावात् व्यावृत्तरूपासाधारणोक्तिरयुक्ता । लक्षणातिरिक्त-साध्यवह्न्यावृत्तित्वमात्राभिप्रायेण तदुक्तिसम्भवादिति घटादौ साध्यत्वेऽपि तत्वज्ञानाभावात् । आवृत्तत्वरूपासाधारण्यज्ञानाभावो नानुमानप्रवृत्तिर-विकलेति दोषे सत्यपि प्रकृतेऽसाधारण्यस्य दोषत्वमभ्युपेत्याह ।। **तस्येति** ।। अनुकूलतर्कादिना पक्ष एव व्याप्तिग्रहदशायां तस्य दोषत्वादिति भावः ।

यद्वा घटादौ निर्विषयकत्वादिना प्रथममेव वह्नित्वाभाववद्विशेष्यकत्वा-भावरूपसाध्याव्यतिरिक्त सूत्रासाधारण्यमाशङ्क्य तन्निराकरणमेतदिति । अप्रसिद्धसाध्यकत्वोक्तिस्तु प्रकृतहेतावन्वयव्याप्तिग्रहासम्भवाभिप्रायेणेति ध्येयम् ।

ननु न व्यधिकरणता । वह्नित्वप्रकारकज्ञानस्य वह्नित्ववद्विशेष्यक-योरन्यतरनियमेन वह्नित्वाभाववद्विशेष्यकत्वाभावः सिध्यन् पक्षधर्मताबला-द्वह्निमद्विशेष्यकत्वमादायैव पर्यवस्येदित्याशङ्क्य निषेधति ।। **न चेति** ।।

---

१. ''साध्याप्रसिद्ध्या उक्तरीत्यैव'' इति स्यात् ।

व्याप्येति ।। यद्यपि व्यतिरेकिणि व्यापकतावच्छेदकावच्छिन्नत्वेनोपस्थापितं [१]तन्नागमकत्वात्तथाप्यन्वेति व्यापकत्वावच्छेदकावच्छिन्नविषयत्वनैय्यत्य-वह्न्यतिरेकेण हेत्वभावविषययोस्सम्भवयेवान्वयापत्त्या व्याप्याभावप्रतियोगि-विषयकत्वदृष्टान्ततया तदुपादाननैय्यत्यस्य सत्वेन पक्षधर्मताबलादपि तस्यैव पक्षीयत्वरूपविशेषः सिध्येत् । न तथाभूतं वह्नित्ववद्विशेष्य-कत्वमिति दृष्टान्ततया तदुपादानम् । तस्याः पक्षधर्मतायाः । न चेश्वरानुमाने लाघवोपनीतकर्त्रैक्यमिवातथाभूतं प्रामाण्यं भविष्यतीति वाच्यम् । प्रामाण्यस्याप्रसिद्धत्वेन तद्वदिहोपनयासम्भवात् । प्रसिद्धौ तु तस्यैव साधनसम्भवादिति भवः ।

न्यायदीपः

''वयं तु ब्रूमः प्रथममप्रामाण्याभाव एव प्रामाण्यं व्यतिरेकिणा साध्यं'' इत्यादिनोक्तं **मणि**कृदभिमतं पक्षमाशङ्कते ।। **अथेति** ।। भ्रमव्यावृत्यर्थमय-मित्युक्तिः । द्रव्यत्वादिना वह्न्यनुभवेऽबाधाय वह्नित्वेनेत्युक्तिः । ''वह्नित्वाभाववति वह्नित्वप्रकारको न'' इति **मण्युक्त**साध्यस्य **यज्ञपति**-टीकानुरोधेनार्थोक्तिर्वह्नित्वप्रकारकत्वे सतीत्यादि सत्यन्तं न नञर्थभूता-भावविशेषणम् । एवं च अत्र वह्नित्वमिति ज्ञाने वह्नित्वाभाववद्वह्नित्व-विशेष्यकत्वसत्वेपि विशेषणाभावप्रयुक्तविशिष्टाभावरूपसाध्यसत्वान्न व्यभिचारः । अत एव **मणौ** ''दाहसमर्थविषयकप्रयत्नजनकत्वे सति वह्नित्वप्रकारकनिश्चयत्वात्'' इत्यादिहेतूक्तावपि ''वह्नित्वाभाववति वह्नित्वप्रकारकत्वादिसमर्थप्रवृत्तिजनकत्वाभावयोः'' इत्यग्रे तदीयग्रन्थानु-रोधात्समर्थेत्यादिहेतूक्तिः । [२]अन्यथा साध्ये विशेष्यवैयर्थ्यात् ।

---

१. ''तत्र गमकत्वात्'' इति स्यात् । २. पाठान्तरेषु ''अन्यथा साध्ये विशेष्यवैयर्थ्यात् ।'' इति पङ्क्तिः न दृश्यते ।

वह्निविषयकेति समर्थप्रवृत्तिर्विशेषणीया । तेन न घटादिज्ञाने व्यभिचारः । एवमप्यत्र वह्नित्वमिति ज्ञाने व्यभिचार इति चेत् । एवं तर्हि वह्नित्व-प्रकारकत्वे सतीति विशेषणीयम् ।

ननु प्रामाण्यनिश्चयाभावे कथं प्रवृत्तिरित्यत आह ।। **तत एवेति** ।। अप्रामाण्याभावज्ञानत इत्यर्थः । प्रामाण्यनिश्चयस्यापि तन्मते तत्रैवोपयोगा-दिति भावः ।। **अभावसाध्यक इति** ।। व्याप्तिज्ञानार्था हि साध्यप्रसिद्धिः । व्याप्तिश्च साध्याभावहेत्वभावयोरेव । तथाच तयोरेव ज्ञानमावश्यकम् । तत्र च साध्याभावोऽप्रामाण्यमेव । तच्च भावरूपं साध्यभूतस्वाभावरूपप्रतियोगि-ज्ञानं नापेक्षते इति तदप्रसिद्धावपि यत्राप्रामाण्यं तत्र समर्थप्रवृत्तिजनकत्वा-भाव इति हेत्वभावेन व्याप्यत्वग्रहसम्भवादिति भावः ।

वह्नित्वप्रकारकत्वे सतीति विशेषणवैयर्थ्यं मन्वानः पक्षधराद्युक्त-साध्यनिष्कर्षमाह ।। **यद्वेति** ।। कथं तर्हि तदभाववति तत्प्रकारकत्वरूपा-प्रामाण्यस्याभावः सिद्ध्येदित्यत आह ।। **पक्षेति** ।। उक्तहेतोर्वह्नित्व-प्रकारकानुभवरूपपक्षे वह्नित्वप्रकारकत्वविशिष्टवह्नित्वाभाववद्विशेष्यकत्व-रूपाप्रामाण्यनिषेधो विशेषणाभावे बाधाद्विशेष्याभावमादायैव विशिष्टनिषेधे पर्यवस्यतीति तन्मात्राभावसाधने विशिष्टाभावः सिद्ध्यतीत्यर्थः । अत्रापि पूर्ववद्धेतुविशेषणं ध्येयम् । तेन न प्रागुक्तव्यभिचारः ।। **घटादिरूपात्स-पक्षादिति** ।। तस्य निर्विषयकत्वेन तत्र साध्यसत्वनिश्चयादिति भावः ।। **अनित्येति** ।। अनुकूलतर्काभाववेलायामेव दोषत्वादिह च हेतूच्छित्तिरूप-विपक्षबाधकस्य अनुकूलतर्कस्य सत्वेनादोषत्वादित्यर्थः ।। **व्यधिकरण-त्वादिति** ।। अर्थान्तरत्वरूपनिग्रहस्थानापत्तेरिति भावः । इदं प्रमेयमित्यादौ प्रमेयत्वाभावाप्रसिद्ध्या तद्घटिताप्रामाण्याभावानुमानासम्भवाच्चेत्यपि ध्येयम् ।

व्याप्येति ।। यद्यपि व्यतिरेकिणि व्यापकतावच्छेदकावच्छिन्नत्वेनोपस्थापितं [१]तन्नागमकत्वात्तथाप्यन्वेति व्यापकत्वावच्छेदकावच्छिन्नविषयत्वनैय्यत्य-वह्न्यतिरेकेण हेत्वभावविषययोस्सम्भवयेवान्वयापत्त्या व्याप्याभावप्रतियोगि-विषयकत्वदृष्टान्ततया तदुपादाननैय्यत्यस्य सत्वेन पक्षधर्मताबलादपि तस्यैव पक्षीयत्वरूपविशेषः सिध्येत् । न तथाभूतं वह्नित्ववद्विशेष्य-कत्वमिति दृष्टान्ततया तदुपादानम् । तस्याः पक्षधर्मतायाः । न चेश्वरानुमाने लाघवोपनीतकर्त्रैक्यमिवातथाभूतं प्रामाण्यं भविष्यतीति वाच्यम् । प्रामाण्यस्याप्रसिद्धत्वेन तद्वदिहोपनयासम्भवात् । प्रसिद्धौ तु तस्यैव साधनसम्भवादिति भवः ।

न्यायदीपः

''वयं तु ब्रूमः प्रथममप्रामाण्याभाव एव प्रामाण्यं व्यतिरेकिणा साध्यं'' इत्यादिनोक्तं **मणि**कृदभिमतं पक्षमाशङ्कते ।। **अथेति** ।। भ्रमव्यावृत्यर्थमय-मित्युक्तिः । द्रव्यत्वादिना वह्न्यनुभवेऽबाधाय वह्नित्वेनेत्युक्तिः । ''वह्नित्वाभाववति वह्नित्वप्रकारको न'' इति **मण्युक्त**साध्यस्य **यज्ञपति**-टीकानुरोधेनार्थोक्तिर्वह्नित्वप्रकारकत्वे सतीत्यादि सत्यन्तं न नञर्थभूता-भावविशेषणम् । एवं च अत्र वह्नित्वमिति ज्ञाने वह्नित्वाभाववद्वह्नित्व-विशेष्यकत्वसत्वेपि विशेषणाभावप्रयुक्तविशिष्टाभावरूपसाध्यसत्वान्न व्यभिचारः । अत एव **मणौ** ''दाहसमर्थविषयकप्रयत्नजनकत्वे सति वह्नित्वप्रकारकनिश्चयत्वात्'' इत्यादिहेतूक्तावपि ''वह्नित्वाभाववति वह्नित्वप्रकारकत्वादिसमर्थप्रवृत्तिजनकत्वाभावयोः'' इत्यग्रे तदीयग्रन्थानु-रोधात्समर्थेत्यादिहेतूक्तिः । [२]अन्यथा साध्ये विशेष्यवैयर्थ्यात् ।

---

१. ''तत्र गमकत्वात्'' इति स्यात् । २. पाठान्तरेषु ''अन्यथा साध्ये विशेष्यवैयर्थ्यात् ।'' इति पङ्क्तिः न दृश्यते ।

वह्निविषयकेति समर्थप्रवृत्तिर्विशेषणीया । तेन न घटादिज्ञाने व्यभिचारः । एवमप्यत्र वह्नित्वमिति ज्ञाने व्यभिचार इति चेत् । एवं तर्हि वह्नित्व-प्रकारकत्वे सतीति विशेषणीयम् ।

ननु प्रामाण्यनिश्चयाभावे कथं प्रवृत्तिरित्यत आह ।। **तत एवेति** ।। अप्रामाण्याभावज्ञानत इत्यर्थः । प्रामाण्यनिश्चयस्यापि तन्मते तत्रैवोपयोगा-दिति भावः ।। **अभावसाध्यक इति** ।। व्याप्तिज्ञानार्था हि साध्यप्रसिद्धिः । व्याप्तिश्च साध्याभावहेत्वभावयोरेव । तथाच तयोरेव ज्ञानमावश्यकम् । तत्र च साध्याभावोऽप्रामाण्यमेव । तच्च भावरूपं साध्यभूतस्वाभावरूपप्रतियोगि-ज्ञानं नापेक्षते इति तदप्रसिद्धावपि यत्राप्रामाण्यं तत्र समर्थप्रवृत्तिजनकत्वा-भाव इति हेत्वभावेन व्याप्यत्वग्रहसम्भवादिति भावः ।

वह्नित्वप्रकारकत्वे सतीति विशेषणवैयर्थ्यं मन्वानः पक्षधराद्युक्त-साध्यनिष्कर्षमाह ।। **यद्धेति** ।। कथं तर्हि तदभाववति तत्प्रकारकत्वरूपा-प्रामाण्यस्याभावः सिद्ध्येदित्यत आह ।। **पक्षेति** ।। उक्तहेतोर्वह्नित्व-प्रकारकानुभवरूपपक्षे वह्नित्वप्रकारकत्वविशिष्टवह्नित्वाभाववद्विशेष्यकत्व-रूपाप्रामाण्यनिषेधो विशेषणाभावे बाधाद्विशेष्याभावमादायैव विशिष्टनिषेधे पर्यवस्यतीति तन्मात्राभावसाधने विशिष्टाभावः सिद्ध्यतीत्यर्थः । अत्रापि पूर्ववद्धेतुविशेषणं ध्येयम् । तेन न प्रागुक्तव्यभिचारः ।। **घटादिरूपात्स-पक्षादिति** ।। तस्य निर्विषयकत्वेन तत्र साध्यसत्वनिश्चयादिति भावः ।। **अनित्येति** ।। अनुकूलतर्काभाववेलायामेव दोषत्वादिह च हेतूच्छित्तिरूप-विपक्षबाधकस्य अनुकूलतर्कस्य सत्वेनादोषत्वादित्यर्थः ।। **व्यधिकरण-त्वादिति** ।। अर्थान्तरत्वरूपनिग्रहस्थानापत्तेरिति भावः । इदं प्रमेयमित्यादौ प्रमेयत्वाभावाप्रसिद्ध्या तद्घटिताप्रामाण्याभावानुमानासम्भवाच्चेत्यपि ध्येयम् ।

ननु विरुद्धप्रकारद्वये तदभाववद्विशेष्यकत्वाभावे तद्वद्विशेष्यकत्वमादायैव पर्यवसानम् ! अन्यथा हेतोः पक्षसम्बन्धो न घटत इत्याशयेन ''तद-भाववति तत्प्रकारकत्वव्यतिरेकः सिद्ध्यंस्तद्वति तत्प्रकारकत्वमादाय सिद्ध्यति । तृतीयप्रकाराभावात्'' इति **मण्युक्त**माशङ्क्य निषेधति ।। **नचेति** ।। **व्याप्येति** ।। यद्धर्मावच्छिन्ननिरूपितव्याप्तिर्यद्धर्मावच्छिन्नस्य गृहीता तद्धर्मावच्छिन्नस्य पक्षधर्मतया तद्धर्मावच्छिन्नस्यैव सिद्धिः स्यात् । न तु प्रामाण्यस्येत्यर्थः ।

न चायं नियमोऽन्वयिनि हेतौ न व्यतिरेकिणीति शङ्क्यम् । व्यतिरेक-सहचारेणान्वयव्याप्तिर्गृह्यत इति मताभिप्रायेण वा व्यतिरेकिण्यपि हेत्वभावव्याप्याभावविषयत्वनैयत्याभिप्रायेणवैवमुक्तिः ।। **तस्या इति** ।।

तर्कताण्डवम्

एतेन अप्रामाण्याभावानुमित्यनन्तरं अयं वह्नित्वेन अनुभवो वह्नित्ववद्विशेष्यकः अवह्न्यविशेष्यकत्वे सति सविशेष्यकत्वादिति व्यतिरेक्यन्तरेण तत्सिद्धिरिति निरस्तम् । वैशिष्ट्यमनुव्यवसाया-वेद्यमिति परपक्षे साध्याप्रसिद्धेः ।

किञ्चाप्रामाण्यमपि यद्यनुमेयं तर्हि कथं तत्प्रसिद्धिः । येना-प्रामाण्याभावसाधकहेतौ साध्याभावरूपाप्रामाण्यव्यापकाभाव-प्रतियोगित्वज्ञानम् ।

यदि तु बाधानन्तरं स्मृत्युपनीते भ्रमे वह्नित्वाभाववति वह्नित्वेन ज्ञानं मम वृत्तमित्यप्रामाण्यं मनसा परिच्छिद्यते तर्हि प्रवृत्ति-सामर्थ्यानन्तरं स्मृत्युपनीते व्यवसाये स्मृत्युपनीतं वह्नित्ववैशिष्ट्य-विषयकत्वमेव मनसा परिच्छिद्यताम् । आदावेव वा व्यवसायगतं

तदुपनीतवह्नित्ववैशिष्ट्यविषयकत्वमनुव्यवसायेनैव परिच्छिद्यताम् किमनया कुसृष्ट्या ।

एतेन वह्नित्ववद्विशेष्यकत्वमिच्छादौ मनसा प्रसिद्धमिति निरस्तम् । तथात्वे उक्तरीत्या प्रामाण्यस्यैव मनसा परिच्छेदसम्भवात् ।

किञ्च प्रमासमर्थप्रवृत्त्योः कार्यकारणभावो नियमगर्भः । नियमश्चानन्त्यव्यभिचाराभ्यां न व्यक्त्योरेव । किन्तु प्रमात्वावच्छेदेनेति प्रमात्वे ज्ञाते प्रवृत्तिकारणत्वज्ञानं तेनैव च प्रमात्वज्ञानमित्यन्योन्याश्रयः ।

युक्तिरत्नाकरः

ननु सिसाधयिषितं प्रामाण्ये हेतुसिध्यर्थं प्रामाण्याभावसाधनमिति न तत्साधानानुपयोग इति पक्षान्तरं प्रतिक्षिपति । इदमपि पक्षतावच्छेदकसामानाधिकरण्ये साध्यसिद्धेः प्रमात्वसिद्धिः । सत्यन्तं भ्रमे व्यभिचारः यो निर्विषयघटादौ । तद्वारणाय विशेष्यम् । वैशिष्ट्यस्यानुव्यवसायविषयपक्षे उक्तरीत्या स्वतस्त्वापत्त्या तदवेद्यताया एवाभ्युपेयतया साध्याप्रसिद्धिर्दुर्वारित्याह ।। **वैशिष्ट्यमिति** ।। इदमुपलक्षणम् । दाहसमर्थेत्यादिनैव साक्षात्प्रामाण्यानुमानसम्भवे मध्ये प्रामाण्यानुमानं च व्यर्थम् । साध्याप्रसिद्धेर्व्याप्यज्ञानस्यापि अत्रापि तुल्यत्वात् । इदं प्रमेयमित्यादौ प्रमेयत्वाभावाप्रसिध्या तद्घटिताप्रामाण्याभावसाधनाभावश्चेत्यपि बोध्यम् ।

नन्विदं सविशेष्यकं सप्रकारत्वादित्यनेन सामान्यतो दृष्टानुमानेन वह्निविशेष्यकत्वे बाधसहकृतेन सिध्यत्सविशेष्यकत्वं वह्नित्ववद्विशेष्यकत्वमादायैव पर्यवस्यति । एवंचाप्रामाण्याभावामानमपि सामान्यतो दृष्टानुमाने वह्नित्वाभाववद्विशेष्यकत्वे बाधसम्पादकतयोपयुज्यत इति तदपि सार्थकम् ।

न च सविशेष्यकत्वमप्रसिद्धम् [1]प्रागभावीयसंस्कारवशेन पुरोवर्तिनं जानामीत्यनुव्यवसायविशेषे तद्ग्रहसम्भवात् ।

यद्वा उक्तरीत्या सविशेष्यकत्वप्रसिद्धौ एतज्ज्ञानविशेष्यकत्वं वह्नित्ववद्वृति अवह्न्यावृत्तित्वे सति वृत्तिमत्वादित्यनेनैतज्ज्ञाने विशेष्यत्ववह्निवृत्तित्वसिद्धौ समानवित्तिवेद्यतया ज्ञानमेव वह्नित्ववद्विशेष्यकत्वसिद्धिः । अवह्नि-वृत्तित्वसिध्यत्वाच्च नाप्रामाण्यानुमाने वैय्यर्थ्यमतः कथं साध्याप्रसिद्धिरिति चेत् । न अनुमितेर्व्यापकत्वावच्छेदकावच्छिन्नविषयनियमेनेदं सविशेष्यक-मित्यनुमितावतथाभूतवह्नित्ववद्विशेष्यकत्वस्य भानासम्भवात् । तदभाव-वद्विशेष्यकत्वबाधसहकारेण तद्विशेष्यकत्वं सविशेष्यकत्वरूपेणैव भानात् । ननु तद्विशेष्यकत्वरूपसामग्र्यभावात् । न च तावता साध्यप्रसिद्धिः सम्पादिता [2]साध्यावच्छेदकावच्छिन्नसाध्यप्रसिद्धेरेवानुमानाङ्गत्वात् । न च लाघवोपनीतं तद्भासिष्यते इति वाच्यम् । सकर्तृकत्वानुमाने एवानेक-कर्तृकाणां कार्याणां लोके बहूनामुपलम्भेन कोटिद्वयोपस्थित्या लाघवोपनीत-कर्त्रैक्यभानसम्भवेऽपि प्रकृते वह्नित्ववद्विशेष्यकत्वस्याप्रसिध्या लाघवे-नोपनेयायोगात् ।

यदपि यद्वेत्यादि तन्न । तज्ज्ञानविशेष्यकत्वं वह्नित्ववद्वृत्तीत्यनेनैव समनवित्तिवेद्यतया वह्नित्ववद्विशेष्यकत्वसिध्या फलीभूतानुमानवैय्यर्थ्यात् । न च ज्ञानविशेष्यकप्रामाण्यप्रकारकज्ञानार्थं तत्प्रामाण्यस्य ज्ञानमात्र-स्यैवापेक्षितत्वेन तस्यैवानुपयुक्तत्वादिति ।

एवं प्रामाण्यानुमाने साध्याप्रसिद्धिमुक्त्वा तद्धेतुसाध्यकाप्रामाण्यस्या-भानानुमानस्य प्रामाण्यानुमेयत्वे सिसाधयिषिताभावप्रतियोग्यप्रसिद्धिमाह ।। **किञ्चेति** ।। स्वार्थानुमाने व्याघातदण्डभयस्य प्रत्यग्रोत्पन्नव्यक्ति-

---

१. "प्राग्भवीय" इति स्यात् । २. "साध्यता" इति स्यात् ।

घटिताप्रामाण्ये प्राग्भवीयसंस्कारस्याप्रामाण्यस्य भावरूपतया तव प्रसिद्धौ तदभावो व्यतिरेकव्याप्तिग्रहस्य चासम्भवादिति भावः । ननु यदि नियमेनाप्रामाण्यमनुमेयं तदायं दोषः । नत्वेवं किन्तु गुञ्जायामयं वह्निरिति भ्रमानान्तरं प्रवृत्तस्य वायं वह्निरिति बाधकान्तरे तदुपनीततदभावत्व-घटिताप्रामाण्यं मनसा परिच्छिद्यतामित्यत्राह ।। **यदित्वति** ।। दूरजलज्ञाना-नन्तरं तदनुव्यवसाये सत्यपि सन्देहात्प्रवर्तमानस्य मध्येऽनुव्यवसायजन्य-स्मृत्युपनीतानुव्यवसाये व्यवसायजन्यस्मृत्युपनीतमपि तद्वत्वं न परिच्छिद्यत इत्यत उक्तं **प्रवृत्तिसामर्थ्यानन्तरमिति** ।

ननु तटस्थज्ञानोपनीततद्घटितप्रामाण्यग्रहो मानसोस्माभिरप्यभ्युपगम्यत एव यावज्ज्ञानग्राहकाग्राह्यत्वेन स्वतस्त्वानात्तेरित्यत आह ।। **आदावेवेति** ।। तद्वत्वस्य तटस्थज्ञानोपनीतत्वस्य मात्रेण मनसा प्रामाण्यग्रहहेतुरुक्तरीत्या सन्देहाप्रवृत्तिस्थलेऽपि प्रामाण्याग्रहापत्त्या प्रामाण्यशङ्काद्यभावदशायामेव मनसा तद्ग्रहो वाच्य इत्यावश्यकाप्रामाण्यशङ्काद्यभावे व्यवसायोपनीतस्यापि मनसाग्रहे नकिञ्चिद्बाधकमित्यनुक्तसृष्टिरयुक्तैवेति भावः । इच्छागोचरानुव्यवसाये इच्छोपनीततद्वत्वभानासम्भवेऽपि तज्जनकतटस्थज्ञानोपनीततद्वत्वभान-सम्भवेनेच्छानुव्यवसायेन तत्प्रामाण्यग्रहसम्भवात् । तत्र प्रसिद्धं प्रामाण्यव्यवसायशङ्काकलङ्कितत्वे तदुपनीतस्य यस्य प्रामाण्यमिह साध्यते इति न साध्याप्रसिद्धिरित्येतन्निरस्यति ।। **एतेनेति** ।। **उक्तरीत्येति** ।। तदुपनीतेच्छायामपि ग्रहासम्भवात्तदकलङ्कितत्वे तु व्यवसायोपनीततद्वत्वस्य मनसैव ग्रहसम्भवे अनुमानादरायोग इति भावः । इच्छोपनीतं तदनुव्यवसाये भासत इति पक्षे तु स्पष्टो ग्रन्थः । व्यक्तेरेवेति गृहीतुं शक्यत इति शेषः ।

।। **अन्योन्याश्रय इति** ।। [1]यदपि क्वचिन्मनसापि प्रामाण्यग्रहा-भ्युपगमात्समर्थप्रवृत्तिहेतुत्वेन प्रामाण्यानुमानान्नान्योन्याश्रयः । तथापि

१. ''यद्यपि'' इति स्यात् ।

न च सविशेष्यकत्वमप्रसिद्धम् [1]प्रागभावीयसंस्कारवशेन पुरोवर्तिनं जानामीत्यनुव्यवसायविशेषे तद्ग्रहसम्भवात् ।

यद्वा उक्तरीत्या सविशेष्यकत्वप्रसिद्धौ एतज्ज्ञानविशेष्यकत्वं वह्नित्ववद्वृति अवह्न्यावृत्तित्वे सति वृत्तिमत्वादित्यनेनैतज्ज्ञाने विशेष्यत्ववह्निवृत्तित्वसिद्धौ समानवित्तिवेद्यतया ज्ञानमेव वह्नित्ववद्विशेष्यकत्वसिद्धिः । अवह्निवृत्तित्वसिध्यत्वाच्च नाप्रामाण्यानुमाने वैय्यर्थ्यमतः कथं साध्याप्रसिद्धिरिति चेत् । न अनुमितेर्व्यापकत्वावच्छेदकावच्छिन्नविषयनियमेनेदं सविशेष्यकमित्यनुमितावतथाभूतवह्नित्ववद्विशेष्यकत्वस्य भानासम्भवात् । तदभाववद्विशेष्यकत्वबाधसहकारेण तद्विशेष्यकत्वं सविशेष्यकत्वरूपेणैव भानात् । ननु तद्विशेष्यकत्वरूपसामग्र्यभावात् । न च तावता साध्यप्रसिद्धिः सम्पादिता [2]साध्यावच्छेदकावच्छिन्नसाध्यप्रसिद्धेरेवानुमानाङ्गत्वात् । न च लाघवोपनीतं तद्भासिष्यते इति वाच्यम् । सकर्तृकत्वानुमाने एवानेककर्तृकाणां कार्याणां लोके बहूनामुपलम्भेन कोटिद्वयोपस्थित्या लाघवोपनीतकर्त्रैक्यभानसम्भवेऽपि प्रकृते वह्नित्ववद्विशेष्यकत्वस्याप्रसिध्या लाघवेनोपनेयायोगात् ।

यदपि यद्वेत्यादि तन्न । तज्ज्ञानविशेष्यकत्वं वह्नित्ववद्वृत्तीत्यनेनैव समनवित्तिवेद्यतया वह्नित्ववद्विशेष्यकत्वसिध्या फलीभूतानुमानवैय्यर्थ्यात् । न च ज्ञानविशेष्यकप्रामाण्यप्रकारकज्ञानार्थं तत्प्रामाण्यस्य ज्ञानमात्रस्यैवापेक्षितत्वेन तस्यैवानुपयुक्तत्वादिति ।

एवं प्रामाण्यानुमाने साध्याप्रसिद्धिमुक्त्वा तद्धेतुसाध्यकाप्रामाण्यस्याभानानुमानस्य प्रामाण्यानुमेयत्वे सिसाधयिषिताभावप्रतियोग्यप्रसिद्धिमाह ।। **किञ्चेति** ।। स्वार्थानुमाने व्याघातदण्डभयस्य प्रत्यग्रोत्पन्नव्यक्ति-

---

१. "प्राग्भवीय" इति स्यात् । २. "साध्यता" इति स्यात् ।

घटिताप्रामाण्ये प्राग्भवीयसंस्कारस्याप्रामाण्यस्य भावरूपतया तव प्रसिद्धौ तदभावो व्यतिरेकव्याप्तिग्रहस्य चासम्भवादिति भावः । ननु यदि नियमेनाप्रामाण्यमनुमेयं तदायं दोषः । नत्वेवं किन्तु गुञ्जायामयं वह्निरिति भ्रमानान्तरं प्रवृत्तस्य वायं वह्निरिति बाधकान्तरे तदुपनीततदभावत्व-घटिताप्रामाण्यं मनसा परिच्छिद्यतामित्यत्राह ।। **यदित्वति** ।। दूरजलज्ञाना-नन्तरं तदनुव्यवसाये सत्यपि सन्देहात्प्रवर्तमानस्य मध्येऽनुव्यवसायजन्य-स्मृत्युपनीतानुव्यवसाये व्यवसायजन्यस्मृत्युपनीतमपि तद्वत्वं न परिच्छिद्यत इत्यत उक्तं **प्रवृत्तिसामर्थ्यानन्तरमिति** ।

ननु तटस्थज्ञानोपनीततद्घटितप्रामाण्यग्रहो मानसोस्माभिरप्यभ्युपगम्यत एव यावज्ज्ञानग्राहकाग्राह्यत्वेन स्वतस्त्वानात्तेरित्यत आह ।। **आदावेवेति** ।। तद्वत्वस्य तटस्थज्ञानोपनीतत्वस्य मात्रेण मनसा प्रामाण्यग्रहहेतुरुक्तरीत्या सन्देहाप्रवृत्तिस्थलेऽपि प्रामाण्याग्रहापत्त्या प्रामाण्यशङ्काद्यभावदशायामेव मनसा तद्ग्रहो वाच्य इत्यावश्यकाप्रामाण्यशङ्काद्यभावे व्यवसायोपनीतस्यापि मनसाग्रहे नकिञ्चिद्बाधकमित्यनुक्तसृष्टिरयुक्तैवेति भावः । इच्छागोचरानुव्यवसाये इच्छोपनीततद्वत्वभानासम्भवेऽपि तज्जनकतटस्थज्ञानोपनीततद्वत्वभान-सम्भवेनेच्छानुव्यवसायेन तत्प्रामाण्यग्रहसम्भवात् । तत्र प्रसिद्धं प्रामाण्यव्यवसायशङ्काकलङ्कितत्वे तदुपनीतस्य यस्य प्रामाण्यमिह साध्यते इति न साध्याप्रसिद्धिरित्येतन्निरस्यति ।। **एतेनेति** ।। **उक्तरीत्येति** ।। तदुपनीतेच्छायामपि ग्रहासम्भवात्तदकलङ्कितत्वे तु व्यवसायोपनीततद्वत्वस्य मनसैव ग्रहसम्भवे अनुमानादरायोग इति भावः । इच्छोपनीतं तदनुव्यवसाये भासत इति पक्षे तु स्पष्टो ग्रन्थः । व्यक्तेरेवेति गृहीतुं शक्यत इति शेषः ।

।। **अन्योन्याश्रय इति** ।। [1]यदपि क्वचिन्मनसापि प्रामाण्यग्रहा-भ्युपगमात्समर्थप्रवृत्तिहेतुत्वेन प्रामाण्यानुमानान्नान्योन्याश्रयः । तथापि

१. ''यद्यपि'' इति स्यात् ।

क्वचिन्मनसाग्रहे उक्तरीत्या प्रथमानुव्यवसायेपि तत्स्यादिति स्वतस्त्वापत्तिभयेनानुमानेनैव तद्ग्रहस्य वाच्यतयान्योन्याश्रयापादनमिदं वाच्यम् । नचैवमपि समर्थप्रवृत्त्या प्रामाण्याभावानुमानं तेन हेतुसिध्या प्रामाण्यानुमितिः । ततस्तदवच्छेदेन समर्थप्रवृत्तिहेतुत्वग्रह इति चक्रकाश्रयवन्नान्योन्याश्रय इति वाच्यम् । तथापि परम्परया परस्यापरोक्षत्वापत्तेः ।

न्यायदीपः

''इदं वह्नित्वप्रकारकं ज्ञानं वह्नित्ववद्विषयकं'' इत्यादिना **मण्युक्तं** पक्षान्तरं निराह ।। **एतेनेति** ।। विषयपदं विशेष्यपरमिति तदीयव्याख्यानोक्तेर्विशेष्यक इत्युक्तम् ।

।। **साध्याप्रसिद्धेरिति** ।। न च प्राग्भवीयसंस्कारानुसरणाददोष इति शङ्क्यम् । निरस्तत्त्वात् । आदावेवैवमनुमानसम्भवे प्रथममप्रामाण्याभावानुमानस्य व्यर्थत्वाच्चेत्यपि ध्येयम् । अप्रामाण्याभावानुमानेपि व्यतिरेके व्याप्याप्रसिध्या व्याप्यसिद्धिरिति भावेनाह ।। **किञ्चेति** ।। द्वितीयानुव्यवसायेनाप्रामाण्यं प्रसिद्धमित्याशङ्कते ।। **यदि त्विति** ।। नायं वह्निरितिबाधानन्तरमित्यर्थः ।। **स्मृतीति** ।। वह्निभ्रमानुव्यवसायजन्यस्मृतीत्यर्थः ।। **अप्रामाण्यमिति** ।। बाधरूपानुभवजन्यस्मृत्युपनीतमित्यर्थः । प्रामाण्यस्यापि पञ्चमानुव्यवसायवेद्यत्वमस्त्वित्याह ।। **तर्हीति** ।। तथा च पञ्चमानुव्यवसायमादाय साध्यप्रसिद्ध्या प्रामाण्यानुमानस्यैव प्राथमिकत्वसम्भवे किं अप्रामाण्याभावानुमानेनेति भावः ।

अभ्युपेत्य चेदमुक्तम् । वस्तुतस्तु प्रामाण्यानुमानमेवायुक्तम् । पञ्चमानुव्यवसायवेद्यत्वोपगमे च प्रथमानुव्यवसायवेद्यत्वस्य सुतरामुपेयत्वस्योपपादितत्वादिति भावेनाह ।। **आदावेव वेति** ।। **कुसृष्ट्येति** ।। पूर्व-

मप्रामाण्याभावानुमानं पश्चात्प्रामाण्यानुमानं अप्रामाण्यप्रसिद्ध्यर्थं पञ्चमानुव्यवसायानुसरणमित्यादिरूपकुसृष्ट्येत्यर्थः ।

ननु वह्नित्ववति वह्नित्वेनेच्छावानहमित्यनुव्यवसायेनेच्छोपनीतं तद्वत्वमिच्छायां गृह्यते । एवं द्वेषादाविति तत्र प्रसिद्धं वह्निज्ञाने साध्यताम् । एवं च नाप्रसिद्धिरित्यत आह ।। **एतेनेति** ।। **उक्तरीत्येति** ।। बाधोद्धारग्रन्थोक्तरीत्या व्यवसायोपनीतस्येत्यर्थः ।

एवमनुमेयत्वपक्षे प्रामाण्यस्याप्रामाण्यस्य चाप्रसिद्ध्युक्त्या तन्निरूपितव्याप्यसिद्धिमुक्त्वा हेतोः प्रमित्यसिद्धिमाह ।। **किञ्चेति** ।। **नियमेति** ।। या प्रमा सा समर्थप्रवृत्तिपूर्वभाविनीत्येवंरूपनियमेत्यर्थः ।। **व्यभिचाराभ्यामिति** ।। एतत्प्रमाव्यक्त्यभावेपि व्यक्त्यन्तरेण प्रवृत्तिदर्शनादित्यर्थः । ''नियमश्च न व्यक्त्योरेव व्यभिचारादतिप्रसङ्गाच्च'' इत्युत्पत्तिप्रामाण्ये त्वयैवोक्तेरिति भावः ।। **अन्योन्याश्रय इति** ।। यदि कचिन्मनसा प्रामाण्यग्रहोपगमेन तत्र प्रवृत्तिकारणत्वग्रहान्नान्योन्याश्रयस्तर्हि प्रथममेव प्रामाण्यं मनसा गृह्यताम् । किमनुमानेनेति भावः । एतच्च प्रामाण्यज्ञानं प्रवृत्तिकारणमित्युपेत्योक्तम् । अप्रामाण्याभावज्ञानमेव प्रवृत्तिकारणमिति पक्षे प्रमात्वपदमप्रमात्वाभावपरं ज्ञेयम् ।

यद्वा ''तदभाववति तत्प्रकारकत्वव्यतिरेकः सिध्यंस्तद्वति तत्प्रकारकतामादाय सिध्यति । तृतीयप्रकाराभावेन तेन विना साध्यस्योपसंहर्तुमशक्यत्वात्'' इति ग्रन्थेनाप्रामाण्याभावानुमानमेव प्रामाण्यानुमानमित्युक्तत्वात्प्रमात्वपदप्रयोगः ।

एतेन दाहसमर्थविषयकप्रयत्नजनकत्वे सति वह्नित्वप्रकारकनिश्चयत्वादित्यपि हेतुः परास्तः । प्रथमं जनकत्वस्य दुर्ज्ञानत्वात् ।

दाहसमर्थविशेष्यकवह्नित्वप्रकारकनिश्चयत्वादित्यादिरपि दाहसमर्थविशेष्यकत्वस्यादौ दुर्ज्ञानत्वस्य प्रागेवोक्तत्वान्निरस्तप्रायः । दाहसमर्थेत्येवमादिरूपहेतूनां प्रमात्वसामान्याननुमापकत्वाच्च ।

तर्कताण्डवम्

नच गुणजन्यत्वाद्यवच्छेदेन नियमः । जन्यतावच्छेदकस्य प्रमात्वस्याज्ञाने गुणजन्यत्वस्यैव दुर्ज्ञानत्वात् । किञ्च न प्रवृत्तिसामर्थ्येन प्रामाण्यानुमानम् । चन्द्रतारादिज्ञाने तदभावात् । प्रवृत्तेः प्रामाण्यज्ञानाधीनत्वेन अन्योन्याश्रयाच्च । मणिप्रभायां मणिभ्रमे व्यभिचाराच्च । नापि संवादेन । ज्ञानान्तरसंवादस्य व्यभिचारात् । प्रमासंवादस्याद्याप्यसिद्धेः । विसंवादाभावस्य चानुपसञ्जातबाधभ्रमेपि सत्वात् । विसंवादयोग्यत्वाभावस्य च प्रमात्वाज्ञाने दुर्ज्ञानत्वात् । गुणजन्यत्वस्य दोषाभावजन्यत्वस्य दोषाजन्यत्वस्य च प्रमारूपकार्यकल्प्यत्वेन जन्यतावच्छेदकप्रमात्वाज्ञाने गुणजन्यत्वादेर्दुर्ज्ञानत्वेन चान्योन्याश्रयात् ।

मन्मते तु उत्सर्गतः प्रामाण्यं गृह्णन्नपि साक्षी बाधानन्तरमुक्तरीत्या विसंवादलक्षणादपवादात् अप्रामाण्यमपि गृह्णति । उक्तं हि सुधायाम् । ''साक्षी अपवादकसद्भावे अप्रामाण्यमपि गृह्णाति'' इति ।

या तु विष्णुतत्वनिर्णयटीकायां ''अनुमेयमेवाप्रामाण्यं'' इत्युक्तिः सा साक्षिणोऽप्रामाण्यग्रहणे विसंवादापेक्षानियतेत्यभिप्रेत्य । अत एव तत्रैव ''न पुनर्ज्ञानग्राहकमात्रग्राह्यत्वं'' इत्युक्तम् । वादावल्यां च ''अप्रामाण्यस्य अनुमेयत्वावसायात्'' इत्युक्त्वा ''न चाप्रामाण्यं क्वचिदपि निरपेक्षेण साक्षिणा निश्चितचरं'' इत्युक्तम् । अप्रामाण्यशङ्कादिकं तु मानसमेव । उक्तं हि भगवत्पादैः–

''यत्कचिद्व्यभिचारि स्याद्दर्शनं मानसं हि तत्'' इति ।
''सुदृढो निर्णयो यत्र ज्ञेयं तत्साक्षिदर्शनम्'' इति च ।

तस्मात्प्रामाण्यस्य परतस्त्वे प्राथमिकं तज्ज्ञानमेव न सम्भवतीति । एतदप्युक्तं ''अन्यथा'' इत्यादिना । परतस्त्वे प्राथमिकप्रामाण्यानुमितेरेवासम्भवेन ''इयं प्रमा'' ''इयं त्वप्रमा'' इति व्यवस्थित्यसम्भवादित्यर्थः ।

युक्तिरत्नाकरः

गुणजन्यत्वादीत्यादिपदेन दोषाभावजन्यत्वं गृह्यते ।। **जन्यतावच्छेदकेति** ।। यद्यपि प्रमात्वस्येश्वरज्ञानेपि सत्वेनानित्यप्रमात्वस्याप्यनुगतगुणाभावानवच्छेदकता । तथापि प्रमात्वापन्नधर्मान्तरस्यावच्छेदककोटिनिविशिष्टतया तदुक्तिर्युक्ता । किञ्च समर्थप्रवृत्तिजनकत्वं सर्वत्र प्रामाण्यानुमापकं उत कचिदेवेति विकल्प्य नाद्य इत्याह ।। **किञ्चेति** ।। न द्वितीय इत्याह ।। **प्रवृत्तेरिति** ।। न च [१]प्रामाण्यसन्देहात्प्रवृत्तितया तदनुमानसम्भवान्नान्योन्याश्रयः । प्राथमिकप्रामाण्यज्ञानोपायस्योच्यमानत्वेन प्रवृत्तेः पूर्वं प्रामाण्यरूपकोट्यप्रसिध्या तदयोगादप्रामाण्यशङ्का शून्यज्ञानस्य प्रवर्तकत्वमिति प्रामाण्यनिश्चयप्रवर्तकसमर्थत्वेन निरस्तमिति भावः ।

।। **मणिप्रभायामिति** ।। न च तत्र समर्थप्रवृत्तिर्न भ्रमजन्या किन्तु भ्रमात्प्रवृत्तस्य मणीन्द्रियसन्निकर्षजन्ये प्रत्यक्षतैवेति वाच्यम् । तथा सति यादृच्छिकसंवादिलिङ्गभ्रमजानुमितिस्थले विसंवादिप्रवृत्तिर्न तदनुमितिजन्या साक्षाल्लिङ्गतया परामर्शजन्यत्वेन तस्याभ्रमत्वनियमात् । ततः प्रवर्तितस्य पर्वतोपरिदेशवह्निद्रियसन्निकर्षजाक्षतेत्यापातात् । इयानेव विशेषो । मणि-

---

१. ''प्रामाण्यसन्देहात् प्रवृत्तिः तया'' इति स्यात् ।

प्रभायामपि मणिव्याप्त्या तत्र मणिसत्वनियमनमणिभ्रमस्य संवादिप्रवृत्ति-जनकत्वनियमाद्धूलीपटलादेर्वह्निप्राप्त्या तत्र वह्निसत्वानियमात् तदनुमिते संवादिप्रवृत्तिहेतुता अनियमादित्याशयादित्येके । जनग्राहसम्भवेन समर्थ-प्रवृत्तिजनकत्वस्य हेतूकर्तुमाशङ्क्य तया फललाभप्रवृत्तिस्थलीयत्वमेव प्रवृत्तिरिति वाच्यम् । तच्च मणिभ्रमे व्यभिचारितयेत्याशय इत्यन्योन्यसंवादेहि समानविषयकत्वं तत्किं ज्ञानमात्रेण उत प्रमयेति विकल्प्य नाद्यः भ्रमान्तरसंवादिभ्रमे व्यभिचारादित्याह ।। **ज्ञानान्तरेति** ।। **विसंवादा-भावस्येति** ।। ग्राह्याभावप्रमाणलक्षणभावस्येत्यर्थः । प्रमायाः परतस्त्वं गुणजन्यत्वेपि दोषाभावमात्रजन्यत्वमात्रेणोपपन्नमिति गुणजन्यत्वस्यासिद्धेराह ।। **दोषाभावेति** ।। तस्यापि स्वतस्त्वपक्षे असिद्धिराह ।। **दोषजन्य-त्वस्येति** ।। **प्रमारूपेति** ।। प्रमासत्वरूपप्रयोज्यकल्पत्वेत्यर्थः ।

यद्यपि फलबलकत्वप्रयुक्तो जन्यतावच्छेदग्रहाधीनत्वप्रयुक्तश्चेति द्विविधोप्यन्योन्याश्रयो न दोषजन्यत्वस्य हेतुत्वपक्षे सम्भवति तथापि तस्यापि प्राप्तत्वमात्रानुमेयतया अन्योन्याश्रय इति भावः । नन्वेवं प्रामाण्यपरतस्त्वस्य प्राथमिकप्रामाण्यग्रहानुपपत्त्या दूषणे अप्रामाण्यग्रहस्तव न स्यात् । तत्परतस्त्वस्यावयोस्तुल्यत्वात् । तथा च तत्र या गतिस्तव सैव ममोभयत्रापीत्याशङ्क्यैषाप्यनुपपत्तिस्तवैव न ममेत्याह ।। **मन्मते-त्विति** ।। उत्सर्गतः सहजशक्त्या विसंवादलक्षणबाधकशङ्काहितशक्त्या साक्षिवेद्यत्वविशेषेपि प्रामाण्यसहजशक्तिविषयत्वात्स्वतसत्वमप्रामाण्यस्या-हितशक्तिविषयत्वात्परतस्त्वमित्युक्तमिति भावः ।

नन्वेवं तत्वनिर्णयटीकाविरोध इत्याशङ्क्याह ।। **इत्युक्तिः सेति** ।। तथा च सुधानुरोधात्तदन्यथायोज्यमिति भावः । अन्ययोजनमेवतद्वाक्यमुपादाय दर्शयति ।। **ग्राह्येति** ।। एवं चानुमेयमेवाप्रामाण्यमित्यत्रैवकारो भिन्नक्रमः । तथा च विसंवादलक्षणबाधनान्तरमेव साक्षिणा मेयमप्रामाण्यमिति तदर्थ

इत्युक्तं भवति । नन्वेतदनुरोधेन सुधावाक्यमेव किं न अन्यथानीयत इत्यत्राह ।। **अत एवेति** ।। यदीदं वाक्यं अप्रामाण्यं अनुमिति विषय एवेत्यर्थपरस्यात् तदा उत्तरवाक्ये न पुनः साक्षिवेद्यत्वमित्येव विन्यासः स्यादिति भावः । अप्रामाण्ये अनुमेयत्वोक्तेरुक्तार्थपरत्वे ग्रन्थान्तरसम्मतिमाह ।। **वादावल्यां चेति** ।। तत्वप्रामाण्यमपि यदि साक्षिवेद्यं तदा तत्संशयविपर्ययायोगः साक्षिणो संशयरूपत्वात् प्रमात्वनियमाच्चेत्यत्राह ।। **प्रामाण्येति** ।। ननु तर्हि प्रमादौ प्रामाण्यादिनिश्चयेऽपि मानस एव स्यादित्यत्राह ।। **उक्तं हीति** ।। व्यभिचारि संदर्शनस्योक्त संशयादेर्मान-सत्वेप्यतथाभूतस्य साक्षित्वमेवेति भावः । नन्वेवमेव मानसाभ्यासदशायामपि प्रमायां साक्षिण एव प्रवृत्त्या उत्तरत्र संशयो न स्यादित्यत्राह ।। **सुदृढ इति** ।। उपपादितं चैतदधस्तात् ।

।। **इति परतस्त्वे प्रथमप्रामाण्यानुमित्यसम्भवः** ।। ८ ।।

न्यायदीपः

प्रमात्वसमनियतधर्मावच्छेदेनास्तु तद्ग्रह इत्याशङ्क्य निराह ।। **न चेति** ।। आदिपदेन दोषाभावजन्यत्वादुष्टकरणजन्यत्वादिग्रहः ।। **प्रमा-त्वस्येति** ।। अनित्यज्ञाननिष्ठस्येत्यर्थः । युक्तिपादीयसुधोक्तदिशा वादावल्युक्तदिशा च प्रामाण्यानुमापकसप्तहेतूनपाकरोति ।। **किञ्चेति** ।। **सामर्थ्येन** ।। विषयलाभरूपेणेत्यर्थः । तदन्यस्यास्तु पक्षतेति वादिनं प्रत्याह ।। **प्रवृत्तेरिति** ।। **प्रामाण्यज्ञानाधीनत्वेनेति** ।। साधितत्वात्परमतेप्य-प्रामाण्याभावज्ञानार्थमप्यपेक्षितत्वादिति भावः । मन्मते प्रवृत्तिमात्रं न प्रामाण्यज्ञानाधीनमिति वदन्तं प्रत्याह ।। **मणीति** ।। **व्यभिचारादिति** ।। भ्रमान्तरसंवादिभ्रम इति भावः ।

ननु भवन्मतेप्यप्रामाण्यस्य परतस्त्वात्साध्याप्रसिद्धिस्तदनुमाने स्यात् ।

प्रभायामपि मणिव्याप्त्या तत्र मणिसत्वनियमनमणिभ्रमस्य संवादिप्रवृत्ति-जनकत्वनियमाद्धूलीपटलादेर्वह्निप्राप्त्या तत्र वह्निसत्वानियमात् तदनुमिते संवादिप्रवृत्तिहेतुता अनियमादित्याशयादित्येके । जनग्राहसम्भवेन समर्थ-प्रवृत्तिजनकत्वस्य हेतूकर्तुमाशङ्क्य तया फललाभप्रवृत्तिस्थलीयत्वमेव प्रवृत्तिरिति वाच्यम् । तच्च मणिभ्रमे व्यभिचारितयेत्याशय इत्यन्योन्यसंवादेहि समानविषयकत्वं तत्किं ज्ञानमात्रेण उत प्रमयेति विकल्प्य नाद्यः भ्रमान्तरसंवादिभ्रमे व्यभिचारादित्याह ।। **ज्ञानान्तरेति** ।। **विसंवादा-भावस्येति** ।। ग्राह्याभावप्रमाणलक्षणभावस्येत्यर्थः । प्रमायाः परतस्त्वं गुणजन्यत्वेपि दोषाभावमात्रजन्यत्वमात्रेणोपपन्नमिति गुणजन्यत्वस्यासिद्धेराह ।। **दोषाभावेति** ।। तस्यापि स्वतस्त्वपक्षे असिद्धिराह ।। **दोषजन्य-त्वस्येति** ।। **प्रमारूपेति** ।। प्रमासत्वरूपप्रयोज्यकल्पत्वेत्यर्थः ।

यद्यपि फलबलकत्वप्रयुक्तो जन्यतावच्छेदग्रहाधीनत्वप्रयुक्तश्चेति द्विविधोप्यन्योन्याश्रयो न दोषजन्यत्वस्य हेतुत्वपक्षे सम्भवति तथापि तस्यापि प्राप्तत्वमात्रानुमेयतया अन्योन्याश्रय इति भावः । नन्वेवं प्रामाण्यपरतस्त्वस्य प्राथमिकप्रामाण्यग्रहानुपपत्त्या दूषणे अप्रामाण्यग्रहस्तव न स्यात् । तत्परतस्त्वस्यावयोस्तुल्यत्वात् । तथा च तत्र या गतिस्तव सैव ममोभयत्रापीत्याशङ्क्यैषाप्यनुपपत्तिस्तवैव न ममेत्याह ।। **मन्मते-त्विति** ।। उत्सर्गतः सहजशक्त्या विसंवादलक्षणबाधकशङ्काहितशक्त्या साक्षिवेद्यत्वविशेषेपि प्रामाण्यसहजशक्तिविषयत्वात्स्वतसत्वमप्रामाण्यस्या-हितशक्तिविषयत्वात्परतस्त्वमित्युक्तमिति भावः ।

नन्वेवं तत्वनिर्णयटीकाविरोध इत्यात्राह ।। **इत्युक्तिः सेति** ।। तथा च सुधानुरोधात्तदन्यथायोज्यमिति भावः । अन्ययोजनमेवतद्वाक्यमुपादाय दर्शयति ।। **ग्राह्येति** ।। एवं चानुमेयमेवाप्रामाण्यमित्यत्रैवकारो भिन्नक्रमः । तथा च विसंवादलक्षणबाधनान्तरमेव साक्षिणा मेयमप्रामाण्यमिति तदर्थ

इत्युक्तं भवति । नन्वेतदनुरोधेन सुधावाक्यमेव किं न अन्यथानीयत इत्यत्राह ।। **अत एवेति** ।। यदीदं वाक्यं अप्रामाण्यं अनुमिति विषय एवेत्यर्थपरस्यात् तदा उत्तरवाक्ये न पुनः साक्षिवेद्यत्वमित्येव विन्यासः स्यादिति भावः । अप्रामाण्ये अनुमेयत्वोक्तेरुक्तार्थपरत्वे ग्रन्थान्तरसम्मतिमाह ।। **वादावल्यां चेति** ।। तत्वप्रामाण्यमपि यदि साक्षिवेद्यं तदा तत्संशयविपर्ययायोगः साक्षिणो संशयरूपत्वात् प्रमात्वनियमाच्चेत्यत्राह ।। **प्रामाण्येति** ।। ननु तर्हि प्रमादौ प्रामाण्यादिनिश्चयेऽपि मानस एव स्यादित्यत्राह ।। **उक्तं हीति** ।। व्यभिचारि संदर्शनस्योक्त संशयादेर्मान-सत्वेप्यतथाभूतस्य साक्षित्वमेवेति भावः । नन्वेवमेव मानसाभ्यासदशायामपि प्रमायां साक्षिण एव प्रवृत्त्या उत्तरत्र संशयो न स्यादित्यत्राह ।। **सुदृढ इति** ।। उपपादितं चैतदधस्तात् ।

।। **इति परतस्त्वे प्रथमप्रामाण्यानुमित्यसम्भवः** ।। ८ ।।

न्यायदीपः

प्रमात्वसमनियतधर्मावच्छेदेनास्तु तद्ग्रह इत्याशङ्क्य निराह ।। **न चेति** ।। आदिपदेन दोषाभावजन्यत्वादुष्टकरणजन्यत्वादिग्रहः ।। **प्रमा-त्वस्येति** ।। अनित्यज्ञाननिष्ठस्येत्यर्थः । युक्तिपादीयसुधोक्तदिशा वादावल्युक्तदिशा च प्रामाण्यानुमापकसप्तहेतूनपाकरोति ।। **किञ्चेति** ।। **सामर्थ्येन** ।। विषयलाभरूपेणेत्यर्थः । तदन्यस्यास्तु पक्षतेति वादिनं प्रत्याह ।। **प्रवृत्तेरिति** ।। **प्रामाण्यज्ञानाधीनत्वेनेति** ।। साधितत्वात्परमतेप्य-प्रामाण्याभावज्ञानार्थमप्यपेक्षितत्वादिति भावः । मन्मते प्रवृत्तिमात्रं न प्रामाण्यज्ञानाधीनमिति वदन्तं प्रत्याह ।। **मणीति** ।। **व्यभिचारादिति** ।। भ्रमान्तरसंवादिभ्रम इति भावः ।

ननु भवन्मतेप्यप्रामाण्यस्य परतस्त्वात्साध्याप्रसिद्धिस्तदनुमाने स्यात् ।

तत्र जन्मान्तरीयसंस्कारानुसरणस्य वा प्रथमं प्रामाण्याभावानुमानद्वारानुसरणस्य वा पश्चमानुव्यवसायप्रसिद्धत्वानुसरणादेर्वा कार्यत्वे ममापि साम्यादित्यत आह ।। **मन्मते त्विति** ।। **उत्सर्गतः** ।। स्वस्वभावसामर्थ्यत इत्यर्थः । स्वत एवास्तु किं विंसवादेनेत्यत आह ।। **उक्तरीत्येति** ।। ''अप्रामाण्यं तु विसंवादाद्यनुसन्धाने सत्येव गृह्यते'' इत्यादिना स्वतोऽप्रामाण्यग्रहे असामर्थ्यात् इत्यादेः स्वतस्त्वानुमानवादे उक्तत्वात्तत्रोक्तरीत्येत्यर्थः ।। **उक्तं हीति** ।। आद्यपादे

''प्रत्यक्षवच्च प्रामाण्यं स्वत एवागमस्य हि ।
अनवस्थान्यथा हि स्यादप्रमाण्यं तथान्यतः''

इत्येतद्व्याख्यावसर इत्यर्थः । सुधावाक्यस्यार्थतोनुवादः ।। **साक्षीत्यादि** ।। **उक्तिरिति** ।। ''दुष्टबुद्धीनामेवाप्रामाण्यशङ्का'' इत्येतद्व्याख्यावसर इत्यर्थः । नन्वेवमिदमप्रमाणं न वेति सन्देहादिरपि साक्षी किं नेत्याह ।। **अप्रामाण्येति** ।। **उक्तं हीति** ।। ज्ञानपादे ।

।। इति परतस्त्वे प्रथमप्रामाण्यानुमित्यसम्भवः ।। ८ ।।

ज्ञप्तौ परतस्त्वानुमानभङ्गः

यच्चोक्तं स्वाश्रयविषयकनिश्चयावधिकतृतीयक्षणवृत्तिसमानाधिकरणसंशयविषयीभूतं ज्ञानप्रामाण्यम् । (सा.१) ग्राह्यज्ञानप्रकारप्रकारकतया तद्विशेष्यविशेष्यकतया च स्वाश्रयग्राहकयावज्ज्ञानाग्राह्यम् । (सा.२) तज्ज्ञानविषयकसमानाधिकरणज्ञानाजन्यसमानाधिकरणज्ञानाप्रकारो वा । (हे.१) स्वाश्रयविषयकनिश्चयावधिकतृतीयक्षणवृत्तिसमानाधिकरणसंशयकोटित्वात् । (हे.२) स्वाश्रयविषयकनिश्चयसमानकालीनसामग्रीजन्यसंशयविषयत्वात् ।

(हे.३) स्वाश्रयविषयककिञ्चिन्निश्चयधर्मिकप्रामाण्यसंशयजन्यसंशयाविषयत्वाच्च । अप्रामाण्यवत् ।

युक्तिरत्नाकरः

स्वतस्त्वानुमानेषु तत्प्रतिपक्षतां प्रतिक्षेप्तुं परोक्तपरतस्त्वानुमानान्येवानुवदति ।। **यच्चोक्तमिति** ।। यद्यपि **मणौ** विवादपदमित्येव पक्षनिर्देशः कृतः तथा विवादविषयतावच्छेदकाज्ञाने विवादपदस्यैव दुर्ग्रहतया तदभिप्रेतं तदवच्छेदकमादायैव पक्षनिर्देशः कृतः ।। **स्वाश्रयेति** ।। स्वस्य स्वप्रमाण्यस्याश्रयो यो व्यवसायः तद्विषयकनिश्चयोऽनुव्यवसायः तदधिकरणावधिकोयस्तृतीयक्षणस्तद्वर्ती स्वाश्रयनिश्चयसमानाधिकरणश्चय संशयस्तद्विषयो ज्ञानप्रामाण्यमित्यर्थः । अत्र ज्ञानप्रामाण्यमात्रपरत्वे संशयविषये तत्र हेतेरसिद्धिः । तथा निश्चितव्यधिकरणसंशयविषये चतुर्थाधिकरणवृत्तिविषये यत्किञ्चिदवधिकतृतीयक्षणवृत्तिसंशयविषये चासिद्धिरित्यतः सकलविशेषणोपादानम् । नचैवं हेतोरेव पक्षतावच्छेदकतया व्याप्तिग्रहावसर एव पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेस्सिद्धसाधनम् । ज्ञानप्रामाण्यस्याधिकस्योपादात् । न च तद्व्यर्थं ईश्वरानुमाने प्रकृतविशेषणजन्यत्वस्येव पक्षे उपरञ्जकस्यापि दानात् । युक्तसंशयविषयत्वस्येव पक्षतावच्छेदकत्वेऽप्रामाण्यस्यापि पक्षतापत्त्या तवोक्तसाध्यसिद्धतयांशतः सिद्धसाधनवारकत्वाच्च । प्राचीनमते पक्षतावच्छेदकैक्येप्यंशतः सिद्धसाधनवारणस्यैव प्रयोजनत्वाच्च ।। **ग्राह्येति** ।। अप्रामाण्याग्राहकत्वस्य अस्यां विवक्षायां व्यर्थत्वात्तद्विहायैव साध्यं कृतम् । स्वाश्रयग्राहकत्वमग्राह्यत्वमविषयत्वम् । इदमुपलक्षणं तदप्रामाण्यविषयकसविषयकज्ञानविषयकयावज्ज्ञानग्राह्यत्वमित्यपि बोध्यम् । तदर्थश्च तदीयस्वतस्त्वनिरुक्तिव्याख्यानावसर एवोक्तः ।

।। **तज्ज्ञानविषयकेति** ।। मतद्वयेपीश्वरज्ञानसद्भावात्समानाधिकरण-पदद्वयमप्रसिद्धिबाधवारकंतया सार्थकमेवेति भावः ।। **स्वाश्रयेति** ।। स्वाश्रयनिश्चयोत्तरक्षणावधिकेत्यर्थः । अन्यथा निश्चयस्थाने पक्षेपि निश्चयस्य सत्वेन तदधिकतृतीयक्षणवर्तित्वस्य तदधिकरणक्षणावधिक-तृतीयक्षणवर्तित्वस्य चाहार्यसंशयेपि सत्त्वनार्थे व्यभिचारापत्तेः । उक्तं संशयविषयत्वमात्रं स्वाश्रयग्राहकग्राह्ये तद्धर्मिणि व्यभिचारीति तत्कोटित्वा-दित्युक्तम् । न च कोटित्वप्रकारत्वरूपतया धर्मितावच्छेदके पुनर्व्यभिचारः । यत्कारणत्वावच्छेदेन संशयत्वं तादृशप्रकारस्यैव कोटिपदेन विवक्षणात् । धर्मितावच्छेदकप्रकारत्वावच्छेदेन तस्य निश्चयत्वमेवेति नोक्तदोषः । कोटित्वं व्यधिकरणं अतो न संशयहेतुप्रामाण्यके व्यभिचारः । रूपं गुण इति ज्ञानानन्तरं रूपगुणे जानीयामित्यनुव्यवसाये तदुत्तरद्वितीयक्षणे गुणत्वेतदभावकोटिस्मृतौ तृतीयपक्षे रूपं गुणविज्ञानगुणो न वेति संशयो यत्र तत्र तत्कोटिभूतगुणत्वे व्यभिचारः । तस्य स्वाश्रयप्रकारकतयेत्या-द्यनुव्यवसायग्राहकग्राह्यत्वेन साध्यभावात् । न च साध्ये स्वपदस्योक्त-तृतीयक्षणवर्तिसंशयविषयप्रामाण्यपरतयोक्ततृतीयक्षणे गुणत्वसंशयेपि प्रामाण्यसंशयाभावेन विशिष्ट[1]भावरूपसाध्यकत्वेन सत्वान्नव्यभिचारः । रूपं गुण इति ज्ञानं गुणो न वा प्रमाणं न वेति चतुष्कोटिकसंशयस्याप्युक्तलक्षणे सम्भवेनोक्तगुणत्वे व्यभिचारपरिहारात् । नचोक्तसंशयविशेष्ये स्वाश्रय-ग्राहकग्राह्यत्वाभावो साध्यः । एवं च रूपे गुणत्वनिश्चयेप्युक्तसंशयविशेष्ये ज्ञाने गुणत्वाग्रहात्साध्यसत्वान्न दोषः । हेतोर्व्यभिचारवारणाय साध्ये विशेषणोपदानायोगात् । विवक्षितसाध्यस्यार्थेपि सत्वेन तत्र व्यभिचारः । हेतौ विशेषणोपादानायोगाच्च ।

यदत्रोक्तं स्वाश्रयग्राहकानिवर्तनीयसंशयविशेष्येन स्वाश्रयग्राहक-

१. "अभाव" इति स्यात् ।

ग्राह्यत्वमिति साध्यं एवं च स्वाश्रयग्राहकेणानुव्यवसायेनानुवर्तनीयं ज्ञानं गुणो न वेति संशयं प्रति विशेष्ये उक्तानुव्यवसायेन गुणत्वाग्रहात्साध्यसत्वान्नव्यभिचारः । प्रामाण्यसंशयाहितार्थसंशयस्य स्वाश्रयग्राहकानिवर्तनीयतया तद्विशेष्ये घटादौ स्वाश्रयग्राहकेण घटत्वादेर्ग्रहणार्थं साध्याभावेन व्यभिचारात् तद्वारणायहेतुविशेषणसार्थकतेति । तत्र उक्तचतुष्कोटिकसंशयानन्तरं प्रामाण्यसंशयाहितस्य रूपं गुणो न वेति संशयस्यापि सम्भवेन तद्विशेष्ये रूपगुणत्वग्रहणोक्तव्यभिचारतादवस्थ्यमिति । न च स्वाश्रयनिश्चयाधिकरणक्षणावधिकतृतीयक्षणवर्तिस्वाश्रय ग्राहकानिवर्तनीयसंशयविशेष्यस्वाश्रयग्राहकग्राह्यत्वं विवक्षितम् । ज्ञानं गुण इति ज्ञानान्तरं तज्ज्ञानरूपोभयकोटिगुणत्वे व्यभिचारात् । समूहालम्बने सति कोटिचतुष्टयस्मृतौ न रूपं गुणो न वा इदं ज्ञानं प्रमा न वेति समूहालम्बनसंशयकोटिगुणत्वे व्यभिचारात् । तृतीयक्षणवर्तिसंशयग्राहकानिवर्तनीयोक्तं चतुष्कोटिसंशयविशेष्ये ज्ञानं गुणज्ञानस्वाश्रयग्राहकेण गुणत्वस्य ग्रहणात् । स्वाश्रयनिश्चयाधिकरणलक्षणावधिकतृतीयक्षणवर्तिव्यधिकरणसंशयविशेष्यत्वरूपेपि सत्त्वेन साध्येपि समानाधिकरणत्वलक्षणसंशयस्य विशेषणीयतयोक्तसाध्यस्यार्थेपि सत्वेन तत्रानेकोत्यवारकविशेषणवैय्यर्थ्याच्च ।

यदपि नवीनोक्तं हेतौ द्वित्वमात्रकोटिकात् संशयविशेषणोक्तसंशयविशेषगुणत्वेनानैकान्त्यम् । साध्यपदस्य तृतीयक्षणविषयप्रामाण्यपरतया द्विमात्रकोटिके ज्ञानधर्मिकसंशये विषयगुणत्वे तृतीयक्षणवृत्तिसंशयवृत्तित्वस्य तत्प्रामाण्ये सम्भवे विशेषणादावप्रयुक्तविशेषणाभावसत्वेन साध्यसत्वादेव नानैकान्तम् । यदा साध्य एव द्विमात्रकोटिकत्वं संशयविशेषणं इत्युक्तचतुष्कोटिकसंशयविषयगुणत्वं साध्ये सत्वान्नोक्तदोष इति तन्न ।

रूपं न ममेति ज्ञानानन्तरं ज्ञानधर्मिकस्य प्रमात्वाप्रमात्वकोटिकस्य संशयस्य तृतीयक्षणेपि सम्भवेन तत्कामात्वे हेतुसत्वेनोक्तसंशयविषय-

प्रामाण्याश्रयतज्ज्ञानग्राहकग्राह्यत्वेन साध्याभावेनानैकान्त्यस्य तथापि वज्रलेपत्वात्·। न च रूपे यत्प्रमात्वात्यन्ताभावो विषयः ततोन्यस्यैव तज्ज्ञाननिवृत्तित्वनियमेन तज्ज्ञानधर्मिकसंशये विरोधाभावेन न तस्याभावस्य कोटितेति वाच्यम् । रूपेन तज्ज्ञाननिवृत्तिप्रमात्वमिति तत्प्रमात्वाभावस्य विषयत्वसम्भवेन तत्कोटिकस्य विषयत्वतस्यैव कोटित्वसम्भवात् तज्ज्ञान-निवृत्तिप्रमात्वभावयोर्विरोधभ्रमसम्भवेन तत्कोटिकस्य सौलभ्याच्च । रूपं न यावत्यः प्रमा इति सकलप्रमान्योन्यभावानां विषयत्वेन तज्ज्ञाननिष्ट-प्रमात्वस्यापि तज्ज्ञानविषयान्योन्याभावात्यन्ताभावत्वेन विरोधितया कोटित्वसम्भवेनेदं ज्ञानं प्रमा न वेति सन्देहविषयान्योन्याभावे नेत्याकांक्षस्य दुरुद्धरत्वाच्च । रूपे यावत्प्रमात्ववानिति यावत्प्रमात्वात्यन्ताभावविषयक-ज्ञानस्यापि सम्भवेन तन्निष्टप्रमात्वात्यन्ताभावस्यापि विषयत्वेन तदन्योन्या-भावेप्यनैकान्त्याच्च । गुणप्रमात्वयोर्विरोधभ्रमदशायां रूपं गुण इति ज्ञानानन्तरमुक्तभ्रमरूपं गुणः प्रमा वेति संशयविषयविशेषगुणत्वा-नैकान्त्याच्च । ज्ञानं गुणो न वा प्रामा न वेति ज्ञानं प्रमा न वा अप्रमान-वेत्यादि चतुष्कोटिकसंशयमात्रविषयप्रामाण्यविशेषे असिद्धेश्च । संशय-सिसाधयिषयोः पक्षताप्रयोजकयोः सत्वेपि स्वसामर्थेन तादृक्प्रामाण्यस्य पक्षबहिर्भावायोगाच्चेत्यलम् । तस्मादयुक्तोयं हेतुरिति ।

अत्र ब्रूमः । उक्तप्रामाण्यं नोक्तसंशयधर्मितावच्छेदकावच्छेदेनोक्त-स्वाश्रयग्राहकग्राह्यं तद्धर्मितावच्छेदकावच्छेदेनोक्तसंशयकोटित्वादिति विवक्षितम् । एवं च रूपं गुण इति ज्ञानं गुणो न वेति संशयविषयगुणत्वेन साध्यसत्वान्नानैकान्त्यं स्वाश्रयग्राहकेण रूपगुणत्वग्रहे युक्तसंशयधर्मिता-वच्छेदतज्ज्ञानत्वावच्छेदेन गुणत्वाग्रहात् । न च हेतावनैकान्त्यवारणाय साध्ये विशेषणदानयोगः उद्देश्यसिध्यर्थं तदुपादानात् । न च तावत्पर्यन्त-

मुद्देश्यत्वे मानाभावः । इदं ज्ञानं प्रमेति धर्मितावच्छेदकावच्छेदेन प्रमात्व-ग्रहस्यैव प्रवर्तकतया प्रवर्तकप्रामाण्यग्रह एव विवादादिति संक्षेपः ।

स्वेति स्वाश्रयनिश्चयसमानकालीनाया सामग्री तज्जन्यसंशयकोटिता-पर्यास्यधिकरणत्वादित्यर्थः । ननु प्रामाण्यसंशयस्यापि स्वाश्रयांशे निश्चयत्वेन तत्समानकालीनसामग्रीजन्यत्वादित्यर्थः । ननु प्रामाण्यसंशयस्यापि तदाहितार्थसंशयार्थेनैकान्त्यम् । न च सर्वांशनिश्चयत्वं तदर्थः । परमतेऽनु-व्यवसायस्यातद्वत्वांशे निश्चयत्वाभावेन हेतोरन्यतरासिध्यापत्तेरिति चेत् निश्चयत्वस्य संशयान्यज्ञानत्वरूपतयान्योन्याभावस्य तन्मते व्याप्यवृत्तितया प्रामाण्यसंशयस्य तदन्यत्वाभावात् ।

न चैवमपि कोटिस्मृत्यन्तरस्मृतिरूपधर्मिज्ञानात्प्रामाण्यसंशयतद्घटित-सामग्र्याः स्वाश्रयनिश्चयसमानकालतया तज्जन्यसंशयविषयेऽर्थेनैकान्त्यम् । धर्मिज्ञानस्य साधारणधर्मदर्शनतया कोटिस्मृतिहेतुत्वेन तदजन्याया धर्मिज्ञानपूर्वकालीनकोटिस्मृतेः संशयहेतुत्वेन स्वाश्रयनिश्चयद्वितीयक्षणे प्रामाण्यसंशयासम्भवेनार्थसंशयसामग्र्याः स्वाश्रयनिश्चयसमानकालीनत्वा-भावेनानैकान्त्यायोगात् । अत्र स्वाश्रयनिश्चयसमानाधिकरणत्वं च विशेषणम् । तेन पुरुषान्तरीयस्वाश्रयनिश्चयसमानकालीनपुरुषान्तरीयसंशयविषयेर्थे नानैकान्त्यम् ।

रूपं गुण इति ज्ञानानन्तरं संशयविषयविगुणत्वेनैकान्त्यनिरासस्तु पूर्ववद्बोध्यः ।। **स्वाश्रयेति** ।। स्वाश्रविषयको यः कश्चिन्निश्चयोऽनु-व्यवसायस्तद्धर्मिको यः प्रामाण्यसंशयस्तज्जन्यसंशयाविषयत्वादित्यर्थः । यद्यपि स्वाश्रयनिश्चये प्रामाण्यसंशयं विना वा सन्दिह्यमानत्वादिति **मणेः** स्वाश्रयनिश्चयविशेष्यप्रामाण्यसंशयजन्यसंशायायोग्यत्वादित्येवार्थो व्याख्यात्रोक्तस्तथापि तत्र स्वाश्रयनिश्चयत्वावच्छिन्नविवक्षायां

प्रामाण्यानुमितेरपि स्वाश्रयनिश्चयतया तत्प्रमाण्यसंशयजन्यसंशययोग्यत्वा-ध्यवसायप्रामाण्यस्यासिद्ध्यापत्या स्वाश्रयनिश्चयोऽनुव्यवसायत्वे विवक्षणीय इत्याशयेन किञ्चिदित्यनूदितम् ।

न च यत्रानुव्यवसायो प्रामाण्यसंशयोन जानतः तत्रानुव्यवसाय-धर्मिकप्रामाण्यशंशयजन्यसंशयविषयत्वमनुव्यवसायग्राह्ये घटत्वं प्रकार-कत्वेनैकान्तिकमिति वाच्यम् । संशयविषयत्वादित्यनेन नायोग्यत्वादित्यस्य विवक्षितत्वात् तत्प्रकारकत्वादेश्चानुव्यवसायग्राह्यतया तत्र प्रामाण्य-संशयजन्यसंशययोग्यत्वात् । न च चाप्रामाण्यसंशयशून्यार्थनिश्चय-त्वेनार्थसंशयं प्रतिबन्धकत्वादप्रामाण्यसंशयस्योत्तेजकत्वमेव नार्थसंशय-हेतुत्वमित्यर्थेनानैकान्त्यमेवेति वाच्यम् । निश्चयोत्तरार्थसंशये प्रामाण्यसंशयस्य विशेषहेतुतेतिमतेनैतदभिधानात् । न चानुव्यवसाये प्रामाण्यसंशयानन्तरं यत्रानुव्यवसायविषये संशयस्तत्रोपनीतप्रामाण्यस्यापि भानसम्भवेन तज्जन्यसंशययोग्यत्वमसिद्धमिति वाच्यम् । प्रामाण्यसंशयजन्यतायां यद्धि यत्सत्यन्तावच्छेदकं तस्यैव विवक्षितत्वात् ।

न्यायदीपः

एवं स्वतस्त्वानुमानानां बाधं विपक्षेऽनवस्थाद्वयस्यानुमित्यसम्भवस्य चोक्त्याऽप्रयोजकत्वं चोद्धृत्य परोक्तानुमानविरोधनिरासाय तानि दूषयितु-मनुवदति ।। **यच्चेति** ।। परोक्तस्वतस्त्वनिरुक्तिभङ्गेन संशयस्यान्यथोप-पादनेन च परोक्तहेतूनामप्रयोजकत्वाद्युक्तावपि प्रबलदोषोक्त्यर्थं पुनरारम्भः ।

''विवादपदं न यावत्स्वाश्रयग्राहकग्राह्यं स्वाश्रयनिश्चये सत्यपि तदुत्तरतृतीयक्षणे अप्रामाण्यसंशयं विना सन्दिह्यमानत्वादप्रामाण्यवत्'' इति **मण्यु**क्तावपि ''विप्रतिपत्तौ यथा साध्यमुक्तं तदभाव इह साध्यं ज्ञेयं'' इति

पक्षधरादितट्टीकोक्तरीत्या परिष्कारपूर्वकं तदीयप्रयोगानुवादं करोति ।। **स्वाश्रयेति** ।। किमवच्छेदेन विवादविषय इत्यज्ञानात्तदभिमतं विवाद-नियामकं पक्षतावच्छेदकं टीकाद्यनुक्तमपि स्वयं व्यक्तीकृतवानिति ज्ञेयम् । स्वस्य प्रामाण्यस्याश्रयो व्यवसायः । तद्विषयकनिश्चयोऽनुव्यवसायः । तदुत्पत्तिक्षणावधिको यस्तृतीयः क्षणः तद्वर्ती स्वाश्रयनिश्चयसमानाधिकरणो यः संशयः तद्विषयीभूतं ज्ञानप्रामाण्यमित्यर्थः । संशयाविषये प्रामाण्ये तथा निश्चिते व्यधिकरणसंशयविषये तथा चतुर्थक्षणवर्तिसंशयविषये यत्किञ्चि-दवधिकतृतीयक्षणवर्तिसंशयविषये चासिद्धिरित्यतो विशेषणानि । ज्ञान-प्रामाण्यांशस्याधिकस्यात्र प्रवेशान्न पक्षतावच्छेदकैक्यनिमित्तं सिद्धसाधनं शङ्क्यम् । अप्रामाण्येन सिद्धसाधनतानिरासाय ज्ञानप्रामाण्यमित्युक्तिः । तादृशानुमित्यादिग्राह्यत्वेन बाधनिरासाय साध्ये यावदित्युक्तिः । ज्ञानं घटज्ञानमित्यादिशब्दजन्यज्ञानाग्राह्यत्वस्य स्वतस्त्वेपि सत्वाद्ग्राह्यज्ञानप्रकार इत्युक्तिः । दलद्वयकृत्यमपि प्रागेव व्यक्तम् ।

अत्र **मण्यु**क्तमेकं साध्यं विप्रतिपत्तावुक्तसाध्यान्तरस्याप्युपलक्षणं मत्वा दूषणसौकर्याय स्वयमाह ।। **तज्ज्ञानेति** ।। तदर्थो विशेषणकृत्यं च परोक्तस्वतस्त्वनिरुक्तिभङ्गे व्यक्तम् । मतद्वयेपीश्वरज्ञानसत्वात्क्रमेणाप्रसिद्धि-बाधवारणाय समानाधिकरणपदद्वयम् ।। **निश्चयावधिकेति** ।। निश्चयोत्पत्ति-क्षणावधिकेत्येर्थः । तेन स्वाश्रयविषयकनिश्चयस्थितिक्षणावधिकतृतीयक्षण-वृत्त्यर्थसंशयकोटावर्थे व्यभिचारो न शङ्क्यः ।

''स्वाश्रयनिश्चये सत्यपि तदुत्तरतृतीयक्षणे सन्दिह्यमानत्वात्'' इति **मण्यु**क्तहेतोः सतिसप्तमीबलेन सामानाधिकरण्यलाभरूपं तट्टीकोक्त-मेकमर्थमुपेत्यैको हेतुरुक्तः । समानकालीनतारूपमर्थान्तरं चोपेत्य हेत्वन्तर-माह ।। **स्वाश्रयविषयकेत्यादि** ।। संशयविषयत्वादित्यस्य पूर्ववत्संशय-कोटित्वादित्यर्थः । तेनात्र पूर्वत्र च न व्यवसाये व्यभिचारः ।

स्वाश्रयनिश्चयेऽप्रामाण्यसंशयं विना सन्दिह्यमानत्वात् इति **मण्युक्त्यभिमतं** हेतुं व्यनक्ति ।। **स्वाश्रयविषयककिञ्चिदित्यादि** ।। स्वाश्रयविषयकनिश्चयशब्देन यावन्निश्चयो **मणि**कृतो नाभिमतः । प्रामाण्यानुमितेरपि प्रमाण्याश्रयविषयकनिश्चयत्वेन तद्धर्मिकप्रामाण्यसंशयजन्यसंशयविषयत्वेनासिद्ध्यापत्तेः । किन्तु यत्किञ्चिदनुव्यवसायरूपनिश्चय एवाभिमत इति भावेन किञ्चिन्निश्चयधर्मिकेत्युक्तम् ।। **अप्रामाण्यवदिति** ।। पक्षीभूतप्रामाण्यसंशयकोटीभूताप्रामाण्यवदित्यर्थः । मतद्वयेपि तस्य परतस्त्वेन साध्यहेतू सम्मताविति भावः ।

तर्कताण्डवम्

यद्वा उक्तहेतुत्रयमध्ये एकं पक्षतावच्छेदकं कृत्वाऽन्यौ हेतू कर्तव्यौ । यद्वा एतज्ज्ञानप्रामाण्यमेतज्ज्ञानप्रामाण्यसंशयपूर्वकालीनैतन्निश्चयाविषयः । एतज्ज्ञानविषयकनिश्चयावधिकेत्याद्युक्तहेतुत्रयात् । अप्रामाण्यवत् ।

विमतं व्यवसायप्रामाण्यं न तदनुव्यवसायवेद्यम् । तदवधिकतृतीयेत्याद्युक्तहेतुत्रयात् अप्रामाण्यवदिति विशिष्य प्रयोक्तव्यम् । तस्मादनुमानविरुद्धानि स्वतस्त्वानुमानानि ।

अत्र साध्यविशेषणप्रयोजनं स्वतस्त्वनिरुक्तावुक्तप्रायम् । आद्यहेतौ रजतत्वादिरूपेऽर्थेपि किञ्चिदवधिकतृतीयक्षणवृत्तिसंशयविषयत्वस्य, तथा स्वाश्रयनिश्चयावधिकचतुर्थक्षणवृत्तिसंशयविषयत्वस्य, तथा चैत्रीयस्वाश्रयनिश्चयावधिकतृतीयक्षणवृत्तिमैत्रीयसंशयविषयत्वस्य च सत्वात्तत्र व्यभिचारः । तद्वारणाय क्रमेण स्वाश्रयनिश्चयावधिकत्वेन तृतीयक्षणवृत्तित्वेन समानाधिकरणत्वेन च संशयो विशेषितः ।

युक्तिरत्नाकरः

।। **यद्वेति** ।। एवं च हेतुपक्षतावच्छेदकनिबन्धनसिद्धसाधनशङ्कापीति भावः । नन्वाद्यद्वितीययोरन्यतरस्य पक्षीकरणेनोत्तरस्य हेतूकरणसम्भवेपि तृतीयस्य प्रामाण्यमात्रसाधारणतया तस्य पक्षतावच्छेदकत्वेन पूर्वयोर्हेतूकरणे प्रामाण्यमात्रे उक्तसंशयघटितहेतुद्वयाभावेन भागासिद्ध्यापत्तिः । तृतीय-हेतावाद्यद्वितीययोः पक्षतावच्छेदकत्वे व्यर्थविशेषणया चेति चेन्न । त्रयमध्ये एवमाद्यं द्वितीयं वा पक्षतावच्छेदकीकृत्य द्वितीयतृतीयौ वाद्यतृतीयौ हेतूकार्यावित्यर्थनात् । तृतीयस्य हेतुत्वे पक्षतावच्छेदकविशेषणस्योपरञ्ज-कत्वेनाप्युपपत्तेः सकलप्रामाण्यपक्षीकरणसम्भवात्तौल्येन पूर्वत्रनेकविशेष-णोपादानगौरवं मन्वानो विशिष्यानुमानद्वयमाह ।। **यद्वेति** ।।

वस्तुतो यदनुव्यवसायात्तृतीयप्रामाण्यसंशयः तज्ज्ञानव्यक्तेरेव तत्पदे-नोपादानान्नभागासिद्धिरिति भावः । एतस्मिन्ननुव्यवसाये यः प्रामाण्यसंशयः तत्पूर्वकालीनो य एतज्ज्ञानगोचरो निश्चयस्तदविषय इत्यर्थः । प्रामाण्य-संशयानन्तरभाव्ये तज्ज्ञानगोचरनिश्चये इदं ज्ञानं प्रमेत्येवमाकारक-प्रामाण्यविषयतया बाध इति पूर्वकालीनान्तं विशेषणम् । पूर्वकालीनत्वं चाव्यवहितपूर्वक्षणवर्तित्वं एवं चैतत्संशयव्यवहितपूर्वकालीननिश्चयविषयत्वेन बाध । एतत्संशयसमानाधिकरणत्वं चैतत्संशयविशेषणम् । तेन पुरुषान्तरीयोक्तनिश्चयत्वेपि न बाधः ।। **एतज्ज्ञानेति** ।। यज्ज्ञानगोचर-निश्चानन्तरं तृतीयक्षणे गुणत्वादिकोटिकः संशयो न वृत्तः तज्ज्ञान-व्यक्तेरेवैतज्ज्ञानपदेनोक्तत्वान्नगुणत्वे व्यभिचारः । पूर्वोक्तयकारेणै-तज्ज्ञानत्वावच्छेदेनोक्तसंशयकोटित्वाद्वा न तत्रानैकान्त्यम् ।

।। **किं विमतमिति** ।। पूर्वत्र साध्ये नोक्तविशेषणप्रक्षेपो नेह तथेति भेदः । तज्ज्ञानान्तरं प्रामाण्यानुमित्यादिरूपैतज्ज्ञाननिश्चविषयतया

बाधस्स्यादतोऽनुव्यवसायेत्युक्तम् । ज्ञानांशलौकिकप्रत्यक्षत्वं चानुव्यवसायत्वमिति नोक्तदोषः । तदिति तद्धर्मितावच्छेदकावच्छेदेन तदनुव्यवसायाधिकतृतीयक्षणवर्तिसंशयकोटितापर्याप्त्यधिकरणत्वात् । तद्धर्मितावच्छेदकावच्छेदेन तदनुव्यवसायसमानकालीन ।

[1]।। **अनुव्यवसायस्येति** ।। अनुव्यवसायत्वस्य [2]प्रामाण्यव्याप्त्यव्याप्त्यत्वादित्यर्थः ।

न्यायदीपः

हेतुपक्षतावच्छेदकैक्यनिबन्धनसिद्धसाधनताशङ्कापि यथा न भवति तथा पक्षान्तरमाह ।। **यद्वेति** ।। **एकमिति** ।। आद्यं द्वितीयं वा पक्षतावच्छेदकीकृत्य द्वितीयतृतीयौ वाद्यतृतीयौ वा हेतूकर्तव्यावित्यर्थः ।

''अनभ्यासदशापन्नैतज्ज्ञानप्रामाण्यं'' इत्यादिना **मण्युक्तं** पक्षान्तरं चाह ।। **यद्वैतज्ज्ञानप्रामाण्यमिति** ।। वस्तुतो यदनुव्यवसायानन्तरं तृतीयक्षणे संशयविषयीभूतं प्रामाण्यं तद्व्यक्तेरेवैतत्पदेन ग्रहणम् । अतो नासिद्धिर्हेतूनामिति भावः । बाधवारणाय कालीनेत्यन्तम् ।। **पूर्वेति** ।। अव्यवहितपूर्वकालीनेत्यर्थः । एतज्ज्ञाननिश्चयानन्तरं सन्दिह्यमानत्वादित्युक्तहेतुमुपलक्षणं मत्वाह ।। **हेतुत्रयादिति** ।।

एवं स्वतस्त्ववादिमात्रसाधारणं वा गुरुभिन्नस्वतस्त्ववादिमात्रसाधारणं वा द्वेधा प्रयोगं **मण्य**भिमतं प्रदर्श्य अनभ्यासदशापन्नज्ञानप्रामाण्यं न स्वाश्रयग्राह्यमिति गुरुमतासाधारण्येन प्रयोगोक्तिमुपलक्षणमभिप्रेत्य सिद्धान्तविरोधिप्रयोगान्तरमाह ।। **विमतमिति** ।। यद्वेत्यनुषङ्गः । उक्तरूपसंशयविषयीभूतप्रामाण्यस्यैव व्यवसायप्रामाण्यपदेन ग्रहणमिति द्योतनाय विमत-

---

१. एतावत्पर्यन्तम् मातृका न लब्धा । २. प्रामाण्यव्याप्तत्वादिति स्यात् ।

मित्युक्तिः ।। **तस्मादिति** ।। उक्तरीत्या प्रयोगसम्भवादित्यर्थः ।। **स्वतस्त्वेति** ।। सामान्यतः प्रागुक्तस्वतस्त्वसाधकानुमानानीत्यर्थः । न तु संशयानवतारस्थलीयपक्षकानुमानानि । **मण्या**द्युक्तानां संशयस्थलीयपक्षकाणां भिन्नविषयतया विरोधाभावात् । यद्वा संशयस्थले तथात्वसिद्धावन्यत्रापि तथात्वमेव कल्प्यम् । न वैरूप्यमित्याशयेन सर्वानुमानानीत्यर्थः ।

दूषणसुज्ञानतायै पदकृत्यं विवेचयति ।। **अत्र साध्येत्यादिना** ।। **स्वतस्त्वनिरुक्ताविति** ।। परोक्तस्वतस्त्वनिरुक्तिभङ्गप्रस्ताव इत्यर्थः । आद्ये पूर्वदलद्वयेन तव घटत्वप्रकारकं ज्ञानं तव घटत्ववद्विशेष्यकं ज्ञानमिति शाब्दज्ञानयोः सिद्धसाधननिरासः । यावदित्त्युक्त्या न्यायमते पञ्चमानुव्यवसायादौ बाधनिरासः फलम् । द्वितीये आद्येन ज्ञानपदेन तत्पदस्य प्रामाण्यपरामर्शितापत्त्या बाधनिरासः फलम् । द्वितीयेन तु व्यापारानुबन्धितया तादृशात्मादिनाऽप्रसिद्धिनिरासः फलम् । तृतीयेनापि व्यापारानुबन्धितयात्मादिग्राह्यतया बाधनिरासः फलम् । समानाधिकरणपदद्वयेन तादृशेश्वरज्ञानग्राह्यतया तदग्राह्यत्वाभावाद् बाधनिरासः फलमुक्तप्रायमित्यर्थः ।

तर्कताण्डवम्

प्रथमं व्यवसायः, अनन्तरं ज्ञानत्वनिर्विकल्पकं विना ज्ञानांशे निर्विकल्पस्य घटांशे सविकल्पकस्य नरसिंहाकारस्य धर्मिज्ञानरूपस्यानुव्यवसायस्योत्पत्तिः, अनन्तरं द्वितीये तदनुव्यवसायस्य स्थितिक्षणे कोटिस्मरणं, अनन्तरं तृतीयक्षणे प्रामाण्यसन्देहः, तदनन्तरं चतुर्थक्षणेऽर्थसन्देह इति स्थितिः ।

द्वितीयहेतावपि तृतीये प्रमाण्यसन्देहक्षणेऽनुव्यवसायनाशात्

प्रामाण्यसंशयघटिता याऽर्थसन्देहसामग्री तस्य अनुव्यवसाय-समकालीनत्वं नास्तीति नार्थे व्यभिचारः । न तु स्वाश्रयविषयक-निश्चयसमानकालीनसंशयविषयत्वं हेतुः । प्रामाण्यसंशयोत्पत्तिक्षणेऽनु-व्यवसायस्य नाशेनासिद्धेः ।

तृतीयहेतावपि घटविषयकनिश्चयधर्मिकप्रामाण्यसंशयजन्य-संशयविषयत्वं पटेप्यस्तीत्यर्थे व्यभिचारः । तद्वारणाय ग्राह्य-प्रामाण्याश्रयविषयकत्वेन निश्चयो विशेषितः । तथापि व्यवसाय-प्रामाण्यस्य स्वाश्रयविषयिका या प्रामाण्यानुमितिस्तद्धर्मिकप्रामाण्य-संशयजन्यसंशयविषयत्वादसिद्धिः । तद्वारणाय किञ्चिदिति विशेषणम् । एवं च नासिद्धिः । अनुमितिप्रामाण्यसंशयेन व्यवसायप्रामाण्यसंशयेपि अनुव्यवसायप्रामाण्यसंशयेन तत्संशयाभावात् । न तु प्रामाण्यसंशया-जन्यसंशयविषयत्वं हेतुः । अर्थस्यापि तदजन्यसंशयं प्रत्यपि विषय-त्वेन व्यभिचारात् । अत्र सर्वत्र विपक्षे हेतूच्छित्तिरेव बाधिका । स्वतस्त्वपक्षेऽनुव्यवसायस्यैव प्रामाण्यनिश्चयरूपत्वात् द्वितीये तत्स्थितिक्षणे तदभावघटिता या संशयसामग्री तदभावेन तृतीयक्षणे प्रामाण्यसंशयानुपपत्तेः ।

न्यायदीपः

उक्तार्थपरिज्ञानाय **पक्षधराद्युक्ततदीयप्रक्रियामाह ।। प्रथममिति ।। निर्विकल्पकस्येति** ।। ज्ञानत्ववैशिष्ट्यविषयकस्येत्यर्थः ।। **सविकल्पक-स्येति** ।। घटत्वप्रकारकत्वपुरोवृत्तिविशेष्यकत्वविषयकस्येत्यर्थः । संशयहेतु-त्वोपपादनायैवमुक्तिः । घटांशेपि निर्विकल्पकस्य तदयोगात् ।। **कोटीति** ।। कोटिद्वयस्मरणं समूहालम्बनरूपमित्यर्थः । साधारणधर्मदर्शनरूपधर्मिज्ञान-स्योभयकोटिसाधारण्यादिति भावः ।। **अथेति** ।। इदं रजतं न वेत्येवं

रूपेणार्थसन्देह इत्यर्थः । अर्थघटितपूर्वभाविप्रामाण्यसन्देहस्यैव कोटिस्मृतिरूपत्वाच्चतुर्थक्षणेऽर्थसन्देह इति भावः ।

।। **प्रामाण्यसंशयघटितेति** ।। कोटिस्मृतिरूपत्वात्तस्य तद्घटितात्ममनस्संयोगादिरूपा या सामग्रीत्यर्थः । सामग्रीजन्येति विशेषणं व्यर्थं । एवं च नार्थेनैकान्त्यमित्याशङ्क्य तत्सार्थक्यं वक्तुमाह ।। **नत्विति** ।। द्वितीयहेतु**र्मणि**कृदभिमत एवोत्प्रेक्षितो न साक्षादुक्त इति एवमेव तस्याभिमतिः किं सामग्रीपदप्रक्षेपेणेत्यतोऽसिद्धिरूपबाधकोपदर्शनमेतत्कृतम् । असिद्धिवारकत्वेपि यथोक्तविशेषणविशेष्यभावेन वैयर्थ्यमिति भावः ।। **पटेपीति** ।। पटज्ञानस्यापि ग्राह्यप्रामाण्याश्रयतया तद्ग्राहकानुव्यवसायग्राह्यत्वेन साध्याभावादिति भावः ।

।। **विशेषित इति** ।। तथा च तस्याप्यनुव्यवसायग्राह्यतया तद्धर्मिकप्रामाण्यसंशयजन्यसंशययोग्यत्वेन हेत्वभावान्न व्यभिचार इति भावः ।। **नासिद्धिरिति** ।। अखण्डाभावत्वान्नासिद्धिवारकत्वं दोष इति भावः ।। **अनुव्यवसायेति** ।। तस्य प्रामाण्यनियमेन कदापि तत्र सन्देहाभावादिति भावः । हेतूच्छित्तिं व्यनक्ति ।। **स्वतस्त्वेत्यादिना** ।। **प्रामाण्यनिश्चयेति** ।। तथा च विशेषदर्शने कथं सन्देह इति भावः ।। **तदभावेति** ।। प्रामाण्यनिश्चयरूपविशेषदर्शनाभावेत्यर्थः ।

तर्कताण्डवम्

अत एव द्वितीये प्रामाण्यनिश्चयस्थितिक्षणे तदभावघटितसंशयसामग्र्यभावेन प्रामाण्यस्य स्वाश्रयनिश्चयसमानकालीनसामग्रीजन्यसंशयविषयत्वायोगात् । अनुव्यवसायस्य प्रामाण्यग्राहकत्वे ग्राहकप्रामाण्यसन्देहे ग्राह्यसन्देहनियमेन व्यवसायप्रामाण्यानुमितेः

प्रामाण्यसन्देहेनेवानुव्यवसायप्रामाण्यसन्देहेनापि कदाचिद्व्यवसाय-प्रामाण्यसन्देहापातात् । न चेष्टापत्तिः । अनुव्यवसायस्य प्रामाण्य-नियमादिति ।

उच्यते– आद्ये साध्येऽपसिद्धान्तो बाधो व्याघातश्च । द्वितीयेंऽशे सिद्धसाधनम् । उपपादितं चैतत्परोक्तस्वतस्त्वनिरुक्तिभङ्गे ।

किञ्च साध्ये स्वशब्दः किं पक्षीकृतप्रामाण्यमात्रपरः किं वा समभिव्याहृतपरः । नाद्यः । अप्रामाण्यस्याप्रामाण्यवत्यप्रामाण्य-प्रकारकत्वरूपप्रामाण्याश्रयग्राहकेण ज्ञानेन ग्राह्यतया तदग्राह्यत्वरूप-साध्यस्याप्रामाण्यरूपे दृष्टान्ते अभावात् । नान्त्यः । घटरूपेऽर्थे व्यभिचाराप्रसक्त्या हेतौ तृतीयपदस्य व्यर्थत्वात् ।

अस्मिन् पक्षे हि समभिव्याहृतो घट एव स्वशब्दार्थः । घटे च घटाश्रयीभूतकपालग्राहकयावज्ज्ञानाग्राह्यत्वरूपं साध्यमस्त्येवेति कथं तत्र व्यभिचारप्रसक्तिः ।

युक्तिरत्नाकरः

।। **आद्येति** ।। स्वाश्रयप्रकारकत्वादिविशेषितस्वाश्रयग्राहकेणाप्रामाण्य-ग्रहस्य परेणापि स्वीकृतत्वेनापसिद्धान्तः । उक्तस्वाश्रयनिश्चयदशायामेव प्रामाण्ये तद्ग्राह्यत्वनिश्चयाद्बाधः । स्वाश्रयप्रकारकत्वाद्व्यतिरेकेण प्रामाण्या-भावेन प्रामाण्यग्राहकेण तन्निगृह्यत इत्युक्तिपर्यवसानेन व्याघातश्चेत्यर्थः । न च स्वातन्त्र्येणग्राह्यत्वं विवक्षितमिति नोक्तदोषत्रयावकाशः उक्तसाध्यस्यार्थेऽपि सत्वेनानैकान्त्याप्रसक्त्या तद्वारकविशेषणवैय्यर्थ्यापत्तेः । सविषयज्ञानग्राहकयावज्ज्ञानग्राह्यमिति साध्येऽपि तद्विवक्षया दूषणावसरे तत्पदादिना प्रामाण्यग्रहाद्बाध इत्युक्तसिद्धसाधनमुक्तप्रायम् ।। **उपपादित-**

मिति ।। यद्यपि बाधव्याघातौ न कण्ठरवेणोक्तौ तथापि तदुपपादकस्योक्तत्वादित्यमुक्तिः ।। **अप्रामाण्यस्येति** ।। शुक्तिकाशकले रजतभ्रमानन्तरं बाधावतारादिदं ज्ञानं प्रमेत्यनुव्यवसाये पदप्रामाण्यप्रकाशकत्वरूपं प्रामाण्यं तस्यापि पक्षत्वेन तत्प्रकारतयेत्यादिरूपेण तत्प्रामाण्यग्राहकेण तद्घटकीभूताप्रामाण्यस्यैव ग्राह्यतया तत्र साध्यवैकल्यमित्यर्थः । यद्यप्यप्रामाण्यवत्यप्रामाण्यप्रकारकत्वरूपप्रामाण्यस्य पक्षत्वेन तद्विरोध्यप्रामाण्यस्यैव दृष्टान्ततया न तत्र साध्यवैकल्यम् । तथापि सामान्यतः प्रामाण्यमात्रस्य पक्षतया प्रामाण्यमेव दृष्टान्तमित्यभिप्रेत्येयमुक्तिरिति ध्येयम् ।। **साध्यमस्त्येवेति** ।।

ननु स्वाश्रयप्रकारप्रकारकत्वादिना स्वाश्रयग्राहकत्वरूपविशेषिततया घटाश्रयस्य निष्प्रकारकतया तद्रूपेण तद्ग्राहकाप्रसिध्या कथम[1]र्थसाध्यसत्वम् । न च न स्वाश्रयग्राहकग्राह्यत्वमिति मण्युक्तयथाश्रुतसाध्याभिप्रायमिदम् । तथा सत्यप्रामाण्यवत्यप्रामाण्यप्रकारकत्वरूपप्रामाण्याश्रयग्राहकेण ज्ञानपदादिना अप्रामाण्यग्राहकेण तत्र साध्यवैकल्योक्त्ययोगादिति चेन्न । नान्त्य इत्यनन्तरं स्वपदस्य समभिव्याहृतपरत्वपक्षेऽपि स्वाश्रयग्राहकं स्वाश्रयप्रकारकाप्रकारकत्वादिना विशेष्यते नवेति हृदिविकल्प्य नाद्यः घटादावर्थे स्वाश्रयप्राकरप्रकारकत्वादिना स्वाश्रयग्राहकप्रसिध्या तद्धर्मसाध्याभावस्याप्रसिध्यानैकान्त्यज्ञानासम्भवेन तद्धारकतृतीयेत्यादिवैय्यर्थ्यापत्तिरित्याह ।। **घटरूपेऽर्थ इति** ।। न द्वितीयः घटादावर्थे साध्यस्यापि सत्वेन नानैकान्त्यप्रसक्त्या तृतीयेत्यादिविशेषणवैय्यर्थ्यादित्याह ।। **अस्मिन्पक्ष इति** ।। वाक्यभेदेन ग्रन्थावतारात्साक्षिशब्दः स्वाश्रयप्रकारप्रकारकतयेत्यादिरूपेण स्वाश्रयग्राहकपरः ।

---

१. ''अर्थे'' इति स्यात् ।

न्यायदीपः

।। **अंत एव** ।। प्रामाण्यनिश्चयस्य तन्निश्चयत्वादेवेत्यर्थः । द्वितीय इत्यस्य विवरणं स्थितिक्षण इति । तृतीये हेतूच्छित्तिं व्यनक्ति ।। **अनुव्यवसायस्येति** ।।

प्रतिज्ञादोषांस्तावदाह ।। **आद्ये साध्य इत्यादिना** ।। उक्तरूपेण स्वाश्रयग्राहकत्वस्य प्रामाण्यग्राहकत्वरूपतया तादृशेनानुमित्यादिना ग्राह्यत्वस्य परमतेपि सिद्धत्वात्तदभावसाधने अपसिद्धान्तः । प्रामाण्यग्राहकेण प्रामाण्यं न ग्राह्यमित्युक्ते बाधो व्याघातश्च स्फुट एव । स्वातन्त्र्येणेत्युक्तावपि बाधोद्धारग्रन्थोक्तरीत्या बाध एव । उक्तरूपसाध्यस्यार्थेपि सत्वेन व्यभिचाराप्रसक्त्या तद्वारकहेतुविशेषणवैयर्थ्याच्चेति भावः ।। **अंश इति** ।। सर्वं ज्ञानं गुण इति शब्दजन्यज्ञानप्रामाण्यांश इत्यर्थः । तत्पक्षीकरणस्यापि प्रागुक्तत्वादिति भावः । अत एवाह ।। **उपपादितं चैतदिति** ।। बाधव्याघातयोः कण्ठतोऽनुक्तावपि उपपादितप्रायत्वादुपपादितमित्युक्तम् ।

दृष्टान्तहेतुदोषौ पक्षभेदेनाह ।। **किञ्चेति** ।। **अप्रामाण्यस्येति** ।। शुक्तौ रूप्यत्वभ्रमानन्तरं बाधावतारादिदं ज्ञानमप्रमेत्यनुव्यवसाये यदप्रामाण्यवत्यप्रामाण्यप्रकारकत्वरूपं प्रामाण्यं तस्यापि पक्षत्वेन तत्प्रामाण्याश्रयग्राहकेण तद्घटकीभूताप्रामाण्यस्य ग्राह्यतया तत्र साध्यवैकल्यमित्यर्थः । अप्रामाण्यवदित्यत्र पक्षीभूतप्रामाण्यसंशयकोटिभूताप्रामाण्यवदित्यर्थस्य तट्टीकोक्तावपि तादृशप्रामाण्यघटकस्यापि तथात्वादिति भावः । व्यभिचाराप्रसक्तिं व्यनक्ति ।। **अस्मिन् पक्ष इति** ।।

ननु ग्राह्यज्ञानप्रकारेत्यत्र ग्राह्यज्ञानशब्दस्यापि स्वाश्रयपरतया घटाश्रयकपालस्य निष्प्रकारतया घटाश्रयप्रकारप्रकारकतया तद्विशेष्यविशेष्यकतया

घटाश्रयग्राहकयावज्ज्ञानमप्रसिद्धमिति चेन्न । तादृशज्ञानाप्रसिद्धेरेव तद्ग्राह्यत्वं नेति तदभावरूपसाध्यसत्वात् । अत एव ''साध्यमस्त्येव'' इत्युक्तम् ।

तर्कताण्डवम्

किञ्चैतैरनुमानैः प्रामाण्यस्य किं साक्षिग्रहणयोग्यत्वाभावः साध्यते निश्चयरूपफलाभावो वा । नाद्यः धर्म्यंश इव वैशिष्ट्यांशेपि त्वन्मते व्यवसायोपनीतत्वरूपा मन्मते व्यवसायोपनीते तस्मिन् साक्षिणः सहजशक्तिरूपा योग्यतास्तीत्युक्तत्वेन बाधात् । संशयस्य निश्चयरूप-फलाभावेनैव उपपत्त्या योग्यत्वाभावसाधने अप्रयोजकत्वाच्च । अन्त्येऽपि फलाभावसाधनं किं दोषशङ्कादिरूपेण प्रामाण्यविरोध्युप-स्थापकसामग्रीसमवधानेनाप्रतिबन्धदशायामुत प्रतिबन्धदशायाम् ।

नाद्यः । तदा प्रामाण्ये संशयाभावेनाश्रयासिद्धेः । स्वरूपासिद्धेश्च । नान्त्यः । इष्टापत्तेः ।

न च फलाभावेनैव योग्यत्वाभावः सिध्यति । बाधस्य उक्तत्वात् । वह्नौ दाहशक्तेरिव साक्षिणि प्रामाण्यग्रहणशक्तेः सहजत्वेपि मण्यादि-प्रतिबन्धेनादाहस्येव दोषशङ्कादिप्रतिबन्धेन प्रामाण्याग्रहणस्योपपत्तेश्च । उक्तं हि टीकाकारैः''न हि गोक्षुरकापसर्पणसापेक्षत्वेन गजस्य गमनशक्तिः परतन्त्रा'' इति ।

युक्तिरत्नाकरः

धर्म्यंश इत्युपलक्षणम् । धर्मधर्मिणावित्यर्थः ।। **अन्त्येपीति** ।। यद्यपि संशयं विषयप्रामाण्यस्यैव पक्षीकृततया तत्र च प्रामाण्यविरोध्युप-स्थापकसामग्रीसमवधाननियमेनाद्यकोट्यनुच्छित्तेर्नोक्तविकल्पावकाशः । तथापि

प्रतिबन्धकस्थलीयप्रामाण्यमेव पक्ष इत्युक्तं स्मारयितुमेव विकल्प इति ध्येयम् ।। **इष्टापत्तेरिति** ।। अप्रतिबद्धसाक्षिणा प्रामाण्यग्रहरूपफलस्य साक्षिणि फलाभावसाधनस्य सहजशक्तिरूपप्रामाण्यग्रहयोग्यताया वास्मदभिमत-स्वतस्त्वरूपतया प्रतिबद्धसाक्षिणि फलाभावसाध्यस्य तदुभयविरोधि-तयार्थान्तरत्वमिति भावः ।

ननूक्तफलाभावेन योग्यत्वरूपस्वतस्त्वाभावसाधनेन प्रकृतोपयोगान्नार्थान्तरं तत्राह ।। **नचेति** ।। **बाधस्येति** ।। योग्यतयोपपादितत्वादिति भावः । फलाभावरूपहेतोर्योग्यत्वरूपसाध्येन विना प्रतिबाधादप्युपपत्त्याप्रयोजकत्वं चेत्याह ।। **वह्नाविति** ।। फले जनयितव्ये बाधकाभावसापेक्षत्वमात्रेण शक्तेः सहजत्वमक्षतमित्यत्र टीकाकृत्सम्मतिमाह ।। **उक्तञ्चेति** ।। सापेक्षत्वेन गमन इति शेषः । न परतन्त्रा स्वोत्पत्तौ परतश्चान्याहिता सहजैवेतियावत् ।

न्यायदीपः

यद्वा कपालविषयतादृशज्ञानाप्रसिद्धेरेव तद्विषयत्वरूपफलाभावो घटे न सिद्धः । येन तत्र व्यभिचारप्रसक्तिर्न स्यादित्यरुचेराह ।। **किञ्चेति** ।। धर्म्यंश इत्युपलक्षणम् । धर्मधर्म्यंशयोरिवेत्यर्थः ।। **अस्मिन्निति** ।। वैशिष्ट्यांशविषय इत्यर्थः ।। **उक्तत्वेनेति** ।। बाधोद्धारग्रन्थे ।। **अप्रति-बन्धेति** ।। साध्ये संशयवेलायामग्राह्यमित्यनुक्तेर्विकल्पद्वयावकाश इति भावः ।। **इष्टापत्तेरिति** ।। अप्रतिबद्धसाक्षिवेद्यत्वस्य साक्षियोग्यत्वस्य वा स्वतस्त्वस्यास्मदभिमतस्यानपायादिति भावः ।

ननु फलाभावेन योग्यत्वाभावानुमानात्स्वतस्त्वहानिरेवेत्यत आह ।। **न चेति** ।। **बाधस्योक्तत्वादिति** ।। त्वन्मत इत्यादिनेत्यर्थः । शक्तिरूप-योग्यत्वसत्वे तदग्रहोऽयुक्त इत्यत आह ।। **वह्नाविति** ।। प्रतिबन्धाभाव-

सापेक्षत्वे कथं न स्वतस्त्वहानिरित्यत आह ।। **उक्तं हीति** ।। वादावल्यामित्यर्थः ।

तर्कताण्डवम्

किञ्चोक्तेनानवस्थारूपेण प्रथमस्य प्रामाण्यग्रहणस्य अनुपपत्तिरूपेण च तर्केण पराहतिः । अपि चोपाधेर्व्यभिचारोन्नायकत्वपक्षेऽनुव्यवसायविषयत्वयोग्यतारहितोपाधिघटितत्वमुपाधिः । तदग्राह्योपाधिघटितत्वं च तदग्राह्यत्वं विनाऽनुपपन्नम् । प्रत्यक्षाग्राह्यगुरुत्वघटितगुरुत्ववत्त्वादौ तथा दर्शनात् । त्वदीयो हेतुस्तु तद्ग्राह्यत्वेपि ग्रहणरूपफलाभावेनैवोपपन्न इत्युपाधिः साध्यव्यापकः ।

किञ्चानुव्यवसायस्य नरसिंहाकारत्वे घटविषयकं प्रमाणं न वेत्येव संशयः स्यात् । न तु घटविषयकं ज्ञानं प्रमाणं न वेति । ज्ञानत्वस्य धर्मितावच्छेदकत्वेनाज्ञानात् ।

युक्तिरत्नाकरः

यदि प्रामाण्यं परतो ज्ञायेत तदानवस्था स्यात् प्रथमप्रामाण्यग्रहश्च नस्यादिति प्रतिकूलतर्कपराहतिश्चेत्याह ।। **किञ्चेति** ।। ननु सत्प्रतिपक्षेनोपाध्युद्भावनं युक्तम् । उपाधिर्हि स्वव्यतिरेकेण साध्याभावं साधयन् सत्प्रतिपक्षोत्थापकः । प्रागेव सत्प्रतिपक्षे पुनस्तदुद्भावनायोगादत्राह ।। **व्यभिचारोन्नायकत्वपक्षे इति** ।। **अनुव्यवसायेति** ।। यद्यप्रामाण्यादेरपि तदनुमित्यनुव्यवसायपदेनात्र विवक्षिताः । यद्यपि धर्मत्वाधर्मत्वादौ अखण्डघटितत्वाभावात्साध्याव्याप्तिस्तथा घटितत्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वं द्रष्टव्यम् । अनुव्यवसायरहितत्वमत्रोक्तौ प्रामाण्यघटकतद्वत्वादावपि प्रतिबन्धदशायामभावात्साधनव्यापकताशङ्कास्यात् । अतो न योग्यतारहितेत्युक्तम् ।

ननु साध्यव्याप्यहेत्वव्यापकत्वेनोपाधिः साध्यव्यापकत्वमेव किन्न स्यात् इत्याशङ्क्य हेतोः साध्यव्याप्तिग्रहानुकूलतर्काभावादुपाधेः साध्यव्यापकत्व-ग्राहकत्वग्राहकतर्कसद्भावान्नैवमित्याह ।। **तदग्राह्येति** ।। तदग्राह्यत्वेऽपि न ग्रहणयोग्यत्वेत्यर्थः ।

ननु निर्विकल्पकस्य कोटिस्मृतिसमये सत्वेन जायमानसंशये ज्ञानत्व-वैशिष्ट्यभानस्यापि सम्भवेन घटविषयकं ज्ञानं प्रमाणं न वेति संशयस्स्यादे-वेत्यत्राह ।। **ज्ञानत्वस्येति** ।। ज्ञानत्वस्य वैशिष्ट्यस्य पूर्वज्ञानविषयतया विधेयतयैवभानान्नतूद्देशतावच्छेदककोटाविति भावः । यद्यप्येतन्न हेतुदूषणं तथापि तदीयप्रक्रियाप्ययुक्तेति वक्तुमिदमुक्तम् ।

न्यायदीपः

ननु मण्युक्तहेतूनां स्वोक्तहेतुप्रतिपक्षत्वेनात्रोपन्यासादुपाधेः प्रतिपक्षोन्नायकत्वपक्षे प्रतिपक्षे प्रतिपक्षान्तरवदुपाध्युद्भावनं व्यर्थमित्यतो मणिकृन्मतावष्टम्भेनाह ।। **उपाधेर्व्यभिचारेत्यादि** ।।

धर्मधर्मिवद्वैशिष्ट्यांशेपि योग्यताया उपपादितत्वेनानुव्यवसाययोग्यता-रहितोपाधिघटितत्वं पक्षीभूतप्रामाण्ये साधनवति नेति साधनाव्यापकत्वं स्पष्टम् । साध्यव्यापकत्वं कथमित्यतः साध्यं प्रति प्रयोजकत्वमस्य व्यनक्ति ।। **तदग्राह्येति** ।। पूर्वोक्तोपाधेर्निष्कृष्यानुवादोयम् ।

हेतोरप्रयोजकत्वमाह ।। **त्वदीय इति** ।। तद्ग्राह्यत्वेपि तद्ग्रहण-योग्यत्वेपीत्यर्थः । एवं चोपाधिहेत्वोरनुकूलतर्कभावाभावोक्त्या

''अनुकूलेन तर्केण सनाथे सति साधने ।
साध्यव्यापकताभङ्गात्पक्षे नोपाधिसम्भवः ।''

इत्यस्यानवकाश इति भावेनाह ।। **साध्यव्यापक इति** ।।

साक्षिणो ज्ञानगोचरस्य ज्ञानत्वांशेपि सविकल्पकत्वात्तत्सिद्ध्यर्थं परोक्तं निराह ।। **किञ्चेति** ।। **अज्ञानादिति** ।। एवं च तदर्थं ज्ञानत्ववैशिष्ट्य-ज्ञानान्तराङ्गीकारे च स्वाश्रयनिश्चयावधिकतृतीयक्षणवृत्तित्वमसिद्धमिति भावः ।

तर्कताण्डवम्

किञ्चाद्ये हेतौ संशयस्य तृतीयक्षणवृत्तित्वमसिद्धम् । असर्वज्ञेनातीन्द्रियातिसूक्ष्मक्षणेयत्ताया निश्चेतुमशक्यत्वेन स्वाश्रयनिश्चयावधिकतृतीयक्षण एव संशयो न तु चतुर्थादाविति निर्णेतुमशक्यत्वात् ।

यदि त्वनुव्यवसायस्य प्रामाण्यनिश्चयरूपत्वाभावाद् द्वितीयक्षणे तन्निश्चयाभावविशिष्टकोटिस्मरणरूपसंशयसामग्र्याः सत्वेन संशयस्य तृतीयक्षणवर्तित्वकल्पनं तर्हि संशयस्य तृतीयक्षणवृत्तित्वेनानुव्यवसायस्य प्रामाण्यनिश्चयरूपत्वाभावरूपं परतस्त्वं त्वया साध्यत इत्यन्योन्याश्रयः ।

न च चतुर्थादिक्षणवृत्तिनापि संशयेन परतस्त्वसिद्धिः । द्वितीयक्षणोत्पन्नेन कोटिस्मरणेन प्रामाण्यनिश्चयरूपप्रतिबन्धकवशात्तृतीयक्षणे संशयानुत्पादेपि तृतीयक्षणोत्पन्नेन प्रतिबन्धकध्वंसेन विशिष्टं तत्क्षणे तिष्ठद्यत्संशयसामग्रीरूपकोटिस्मरणं तेन चतुर्थक्षणे संशयोत्पादसम्भवात् ।

द्वितीयहेतावप्यनुव्यवासयस्य प्रामाण्याविषयकत्वे सिद्धे द्वितीयेऽनुव्यवसायस्य स्थितिक्षणे प्रामाण्यनिश्चयाभावविशिष्टकोटिस्मरणरूपसंशयसामग्र्याः सत्वेन तस्या अनुव्यवसायरूपनिश्चयसमानकालीनत्वसिद्धिः । सिद्धे च तस्मिन्नुक्तरूपसामग्रीजन्य-

संशयविषयत्वेन प्रामाण्यस्यानुव्यवसायाविषयत्वसिद्धिरित्य-न्योन्याश्रयः ।

युक्तिरत्नाकरः

एवं हेतुत्रयसाधारणदोषानुक्त्वा असाधारणं दोषमाह ।। **किञ्चेति** ।। असिद्धं सन्दिग्धसिद्धम् । ननु न निर्णयासम्भवः व्यवसायोत्पत्यनन्तर-मनुव्यवसायेन प्रामाण्यनिश्चयात्तस्यैव धर्म्यधीनत्वेन कोटिद्वयस्मृतेः तदनन्तरमेवोदये सम्भूतसामग्रीकतया तृतीयक्षणे संशयोदयनिश्चयादित्याशङ्क्य तथा सत्यन्योन्याश्रय इत्याह ।। **यदित्विति** ।। ननु मास्त्वन्योन्याश्रयादुक्तो हेतुः चतुर्थादिलक्षणवर्तिसंशयविषयत्वेनाप्युक्तसाध्यसिद्धिः किन्नस्यादिति तत्राह ।। **न चेति** ।। **चतुर्थक्षण इति** ।। न च तदा धर्मिज्ञानाभावान्न संशयः । धर्मिज्ञानस्य कोटिस्मृतिद्वारा तद्धेतुत्वेन तद्द्वारकत्वे तदसत्वस्या-किञ्चित्करत्वात्तदिदमुक्तं ।। **संशयसामग्रीरूपमिति** ।।

न च धर्मिज्ञानस्य विशेषविषयस्यैव कोटिस्मारकत्वादस्य च प्रामाण्य-रूपविशेषविषयकत्वात् न कोटिस्मारकत्वं लाघवेन साधारणधर्मदर्शनत्वेनेक-कोटिस्मारकत्वं न विशेषविषयकत्वेनापि गौरवात् । नचैवं निश्चितेऽपि निश्चयनाशानन्तरं संशये घटादावपि निश्चयनाशोत्तरक्षणे निमीलिताक्षस्यापि संशयापत्तिरित्यतिप्रसङ्गः घटेन्द्रियसन्निकर्षाभावादेव तदभावात् । न चैवम् व्यवसायस्यापि नाशान्न तद्धर्मिकः संशयः । संशयस्मृत्युपनीते तत्सम्भवात् । न च घटादावपि तथात्वापत्तिः तत्र धर्मिस्मृतेः सर्वानुभूतघटत्वप्रकारकत्वेन विशेषदर्शनेन प्रतिबन्धात् । प्रकृते तु फलबलेन पूर्वानुभूतेपि प्रामाण्ये संस्कारप्रमोपहेतुं दोषकल्पनात् । न हि पूर्वानुभूतं सर्वं स्मर्तव्यमिति नियमः । प्रमादावप्यप्रमेति इष्ट एवेति प्रामाण्यनियमसिद्धिरिति । अनेन हेतुना प्रामाण्यानुव्यवसायाग्राह्यत्वरूपपरतस्त्वसिद्धौ भ्रमविषयकानुव्यवसाय-

स्यापि प्रामाण्यविषयकत्वाप्रसक्त्यानुव्यवसायत्वस्य प्रमात्वनियमसिद्धिरित्यर्थः । ननु व्यवसायत्वस्य प्रमाव्याप्यत्वेऽपि तदग्रहदशायां तत्प्रामाण्यसंशयसम्भवेन हेत्वसिद्धिरित्यपि बोध्यम् ।।

न्यायदीपः

ननु निश्चयपदेन सविकल्पक एव विवक्ष्यत इत्यत आह ।। **किञ्चेति** ।। हेतुत्रयसाधारणदोषानुक्त्वा प्रातिस्विकरूपेणापि दोषमाह ।। **किञ्चाद्य इति** ।। **असिद्धमिति** ।। सन्दिग्धासिद्धमित्यर्थः ।। **अन्योन्याश्रय इति** ।। सिद्धे चानुव्यवसायस्य प्रामाण्यनिश्चयत्वाभावे संशयस्य तृतीयक्षणवृत्तित्वसिद्धिः । तत्सिद्धौ च तत्सिद्धिरित्यर्थः ।

ननु मास्तु हेतुनिश्चयः चतुर्थादिक्षणवृत्तिसंशयविषयत्वेनाप्युक्तसाध्यसिद्धिरस्त्वित्यतः प्रथमक्षणे धर्मिज्ञानरूपानुव्यवसायेन प्रामाण्ये निश्चितेपि चतुर्थक्षणादौ तत्र संशयो नानुपपन्न इत्यप्रयोजको हेतुरित्याह ।। **न चेत्यादिना** ।। **द्वितीयेति** ।। अनुव्यवसायस्थितिक्षणोत्पन्नेनेत्यर्थः ।। **प्रामाण्यनिश्चयरूपेति** ।। पूर्वतनधर्मिज्ञानाख्यप्रामाण्यनिश्चयरूपेत्यर्थः ।। **तत्क्षण इति** ।। तृतीयक्षण इत्यर्थः ।। **सामग्रीरूपमिति** ।। तदा तन्मते धर्मिज्ञानस्य नाशेपि तस्य कोटिस्मरण एवोपयोगेन तदभावस्यादोषत्वात् । तस्य नाशेपि स्मृत्युपनीते तस्मिन् ज्ञानं प्रमाणं न वेति संशयोपपत्तेश्च ।

न च तस्य प्रामाणत्वेनैव स्मृत्योपनयः तथैव प्रागनुभवादिति वाच्यम् । दोषेण प्रामाण्यांशप्रतिबन्धसम्भवात् । वस्तुतस्तु मन्मते दोषस्थले व्यवसायस्य साक्षिवेद्यत्वात्तत्प्रामाण्यस्य च मानसत्वात्तन्मात्रोपनयो न विरुद्ध इति भावः ।

।। **द्वितीयहेतावपीति** ।। स्वाश्रयनिश्चयसमानकालीनत्वं संशय-सामग्र्यामसिद्धमिति योज्यम् । ननु धर्मिनिश्चयरूपानुव्यवसायस्य प्रामाण्या-विषयकत्वादेव विशेषादर्शनविशिष्टा कोटिस्मरणादिसामग्री तत्कालीनेति ज्ञायत इत्यतो दुर्ज्ञानमेतदित्याह ।। **अनुव्यवसायस्येत्यादिना** ।। द्वितीय इत्यस्यार्थोऽनुव्यवसायस्य स्थितिक्षण इति ।

तर्कताण्डवम्

एवं तृतीयहेतावप्यनुव्यवसायस्य प्रामाण्यनियमे सिद्धे किं प्रमैव प्रमात्वेन गृहीता अप्रमैव वेति संशयस्य प्रामाण्यानुमितिधर्मिकत्वमेव न त्वनुव्यवसायधर्मिकत्वमित्यस्यार्थस्य सिद्ध्या व्यवसायप्रामाण्य-स्यानुव्यवसायधर्मिकप्रामाण्यसंशयजन्यसंशयाविषयत्वसिद्धिः । सिद्धे तस्मिन्ननुव्यवसायस्य प्रामाण्यनियमसिद्धिरित्यन्योन्याश्रय एव ।

एतेन प्रामाण्यं परतो ज्ञायते अनभ्यासदशायां सांशयिकत्वात् अप्रामाण्यवत् । परतस्त्वं च यत्प्रतिवादिना निषिध्यते तदेव साध्यते । अत्र च भागासिद्धिर्न दोषः । उद्देश्यस्य पक्षतावच्छेदकधर्म-समानाधिकरणसाध्यप्रतीतिरूपस्य फलस्य तत्समानाधिकरणसाधन-प्रतीतिरूपस्य करणस्य चाविघातात् । यत्र सर्वत्र पक्षे साध्यप्रतीति-रुद्देश्या तत्रैव सा दोषः । अत्र च न काचन कुसृष्टिः । नापि सामान्यविप्रतिपत्त्यनानुगुण्यमिति निरस्तम् । बाधाप्रयोजकत्वाद्युक्त-दोषात् ।

एतेनैव प्रामाण्यं परतो ज्ञायते । प्रामाण्याप्रामाण्यान्यतर-मात्रकोटिकसंशयविषयत्वादप्रामाण्यवदित्याद्यपि निरस्तम् ।

तस्माज्ज्ञप्तावुत्पत्तौ च प्रामाण्यं स्वत एवेति । एतदप्युक्तं

''अन्यथा'' इत्यादिना । फलाभावमात्रेण स्वरूपयोग्यत्वाभावसाधने लोकसिद्धसर्वव्यवस्थायोगादित्यर्थः ।

युक्तिरत्नाकरः

अनभ्यासदशायामिति ।। एतच्चाभ्यासदशायां संशयासिद्धिवारणाय । ननु परत्वस्यान्योन्याभावाश्रयत्वरूपस्य केवलान्वयितया स्वतस्त्वेप्युपपत्त्यार्थान्तरमात्रमत्राह ।। [१]**परतस्त्वेचेति** ।। तथाचोभयवादिसमाधेयतया तन्निर्वचनेहमेवनियोज्यत इति भावः । वस्तुतः परत्वाभावरूपतया तन्निर्वचने तदसिद्धिरुक्तप्रायेति बोध्यम् ।

ननु प्रत्यग्रोत्पन्नव्यक्तिगोचरधीमात्रवृत्तियत्प्रामाण्येनोक्तसंशयस्तत्र हेत्वभावाद्भागासिद्धिरित्यत्राह ।। **अत्र चेति** ।। फलस्य यत्कारणं तद्विघातादित्यर्थः । कृते च प्रामाण्यत्वरूपपक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धिरेवोद्देश्यस्तावतापि विवादपर्यवसानादिति भावः । कतर्हि भागासिद्धिर्दूषणमत्राह ।। **यत्रत्विति** ।। पृथिवी इतरेभ्यो भिद्यत इत्यादौ घटपटादौ साध्यसिध्या पृथिवीत्वसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे सिद्धसाधनापत्या तदवच्छेदेन साध्यसिद्धेरेवोद्देश्यतया तदवच्छिन्ने सर्वत्र हेत्वभावे साध्यसिद्धेरा[२]कस्मिकापत्त्या भागासिद्धिस्तत्रैव दोषः ।। [३]**तत्र चेति** ।। प्रामाण्यत्वस्यैव पक्षतावच्छेदकत्वेन व्यावर्तपक्षतावच्छेदकनिर्वचनक्लेशो हेतोरेव पक्षतावच्छेदकत्वे सिद्धसाधनशङ्कानिरासादिप्रयासश्च पूर्वत्र नात्रेत्यर्थः । अप्रयोजकत्वादीत्यदिपदेन प्रतिकूलतर्कपराहतिः । सोपाधिकत्वं च गृह्यते । इदमुपलक्षणाम् । मन्मते व्याप्तिग्रहानुपयुक्ततयानभ्यासदशापन्नविशेषणवैय्यर्थ्यं च बोध्यम् ।। **प्रामाण्येति** ।।

---

१. ''परतस्त्वं चेति'' इति स्यात् । २. ''आकस्मिकत्वापत्त्या'' इति स्यात् ।
३. ''अत्र च'' इति स्यात् ।

अनुव्यवसायग्राह्यघटत्वाद्यर्थे संशयकोटित्वगतमिति ।। **प्रामाण्याप्रमाण्यकोटिकेति** ।। इदं ज्ञानं न वा प्रमाणं न वेति ।। **तदनङ्गीकृतेति** ।। चतुष्टोटिकसंशयविषये ज्ञानत्वे व्यवसायमात्रं पदम् ।। **उक्तमिति** ।। प्रागनुपपादितस्याप्युत्पत्तौ स्वतस्त्वस्योपसंहारे कीर्तनं स्वतः प्रमाणोभयविधस्यापि स्वतस्त्वस्योभयपक्षव्याप्ततयोत्तरत्र तत्साधनं सङ्गतमिति सूचनार्थम् ।। **फलाभावमात्रेणेति** ।। प्रामाण्यं स्वत एवेत्येवकारेण । ननु संशयस्थले प्रामाण्यनिश्चयरूपफलाभावमात्रेणानुव्यवसायविषयत्वायोग्यत्वाभावरूपं परतस्त्वमिति व्यवच्छेदेन्यथेत्यस्यायमर्थो लभ्यत इति भावः ।। **लोकेति** ।। प्रतिबन्धस्थलीयदाहाभावेपि वह्न्यादेस्तद्योग्यतास्तीति लोकसिद्धव्यवस्था नस्यादित्यर्थः ।

।। इति ज्ञप्तौ परतस्त्वानुमानभङ्गः ।। ९ ।।

न्यायदीपः

।। **तृतीयहेतावपीति** ।। अनुव्यवसायधर्मिकप्रामाण्यसंशयजन्यसंशयविषयत्वं दुर्ज्ञानमिति योज्यम् । अनुव्यवसायस्य प्रामाण्यनियमादेव तत्सुज्ञानमित्यत आह ।। **अनुव्यवसायस्येति** ।। **सिद्धे च तस्मिन्निति** ।। व्यवसायप्रामाण्यस्येत्यादिपरामर्शः । सिद्धान्तेपि संशयादिस्थलीयप्रामाण्यानुव्यवसायस्य प्रमात्वानियमादिति भावः ।

एवं **मण्युक्तानुमानानि** निरस्य द्वितीयस्तबके **कुसुमाञ्जलावुदयनोक्तं** सुधायामाशङ्कितमनुमानं च निराह ।। **एतेनेति** ।। निरस्तमित्यन्वयः । ननु परत्वस्यान्यत्वरूपस्य केवलान्वयित्वेन स्वतस्त्वेप्युपपत्याऽर्थान्तरमित्यतस्तत्परिष्करोति ।। **परतस्त्वं चेति** ।। तत्प्रकारप्रकारेत्यादिना प्रागुक्तरूपज्ञानाग्राह्यत्वं निषिध्यत इति तदेवेत्यर्थः । तथा च ''स्वग्राह्य-

त्वेपि कदाचित्परग्राह्यत्वात् स्वस्याप्यन्यापेक्षया परत्वात्'' इत्यादि**मण्युक्त**-खण्डनानवकाश इति भावः ।। **अत्र चेति** ।।

ननु ''अनभ्यासदशायामिति भागासिद्धिवारणार्थं'' इति **वर्धमानोक्तेः** कथं भागासिद्धिशङ्केति चेन्न । प्रामाण्यमात्रस्य पक्षत्वेन सांशयिकत्वादित्युक्तौ क्वचिदसिद्धेरनभ्यासदशायामित्युक्तावभ्यासदशोत्पन्नज्ञानप्रामाण्ये पक्षैकदेशेऽनभ्यासोत्पन्नेपि सर्वत्र सन्देहाभावेन भागासिद्धिशङ्कायां प्राचीनमताभिप्रेतादोषत्वोक्तिरिति ज्ञेयम् ।

।। **उद्देश्यस्येति** ।। यथा भोगायतनत्वादिरूपाव्यग्रशरीरादिलक्षणेनापि केवलव्यतिरेकिणेतरभेदादिसाधनम् अन्यथा तन्न स्यात् । तथेहापि यावति हेतुरस्ति तावति पक्षे पक्षताच्छेदकसामानाधिकरण्येन साध्यसिद्धिसम्भवात् । तावत एवोद्देश्यत्वात् । उद्देश्यसिद्धिफलकत्वादनुमानस्येत्यर्थः । तर्हि स दोष एव न स्यादित्यत आह ।। **यत्र त्विति** ।। तथा च **मणौ** यदनभ्यासेति विशेषणमु**दयनोक्त**हेतुविशेषणं भङ्क्त्वा पक्षविशेषणं कृतं तदसिद्धिवारकं व्यर्थमित्युपेत्येति ज्ञेयम् ।

मण्युक्तपक्षापेक्षयात्र गुणविशेषमाह ।। **अत्र चेति** ।। प्राचीनोक्तानुमानपक्षे पक्षतावच्छेदकनिर्वचनक्लेशो वा हेतुपक्षतावच्छेदकैक्यनिबन्धनः सिद्धसाधनताक्लेशो वा नरसिंहाकारज्ञानहेतुविशेषणदुर्ज्ञानत्वक्लेशो वा नेत्यर्थः । अप्रयोजकत्वादीत्यादिपदेन प्रतिकूलतर्कपराहतिसोपाधिकत्वादिग्रहः । सुधोक्तदिशा स्वतः प्रमाणत्वेनाङ्गीकृतधर्मिज्ञानानुमितिप्रामाण्ये व्यभिचारस्य च ग्रहः ।। **एतेनैवेति** ।। बाधादिनैवेत्यर्थः । दृष्टान्तघटनाय हेतावप्रामाण्यपदम् । अन्यतरशब्द उभयपरः । प्रामाण्याप्रामाण्योभयमात्रकोटिकेत्यर्थः । संशयविषये घटाद्यर्थे व्यभिचारनिरासाय प्रामाण्याप्रामाण्यान्यतरकोटिकेत्युक्तिः । इदं ज्ञानं गुणो न वा प्रामाणमप्राणं वेति तदङ्गीकृत-

चतुष्कोटिकसंशयविषयज्ञानगुणत्वे व्यभिचारनिरासाय मात्रेत्युक्तिः । [१]यदि च विषयत्वादित्यस्य कोटित्वादित्यर्थस्तदा गुणत्वे व्यभिचारवारणाय मात्रपदमिति ज्ञेयम् । आदिपदेन प्रामाण्यं परतो ज्ञायते स्वतोऽग्राह्यत्वे सति ग्राह्यत्वादित्यादेर्ग्रहः ।

उपपादितज्ञप्तिस्वतस्त्वेनैवोत्पत्तावपि तत्सिद्धप्रायमिति भावेनोत्तरवादोपक्षेपणायोक्तमुपसंहरति ।। **तस्मादिति** ।। स्वतस्त्वे साधकभावाद् बाधकाभावात्परतस्त्वपक्षे तदुभयाभावादित्यर्थः । उत्पत्तौ स्वतस्त्वं च सुधोक्तदिशा ज्ञानजनकमात्राधीनजन्मत्वमिति स्पष्टमिति भावः ।। **एतदपीति** ।। निश्चयरूपफलाभावे योग्यत्वाभावो नेत्येतदपीत्यर्थः ।। **लोकेति** ।। प्रतिबन्धकस्थलीयदाहाद्यभावेपि वह्न्यादेस्तच्छक्तास्तीति लोकसिद्धव्यवस्थेत्यर्थः ।

।। इति ज्ञप्तौ परतस्त्वानुमानभङ्गः ।। ९ ।।

उत्पत्तौ परतस्त्वे चिरन्तनानुमानभङ्गः

ननु कथमेतत् अनित्यप्रमा ज्ञानहेत्वतिरिक्तहेतुजन्या कार्यत्वे सति तद्विशेषत्वात् । अप्रमावत् । अन्यथाऽप्रमापि प्रमा स्यात् । यदि दोषप्रतिबन्धान्न प्रमा तर्हि ज्ञानमपि न स्यादित्यनुकूलतर्कसनाथानुमानविरोधात् । स्वतस्त्वे च मानाभावादिति चेन्न । प्रमाया ज्ञानत्वेन तद्धेतोर्ज्ञानहेतुतया तदतिरिक्तजन्यत्वसाधने बाधात् । विरोधाच्च ।

---

१. 'यदि च' इत्यारभ्य ''मात्रपदमिति ज्ञेयम्'' इति पङ्क्तिः पाठान्तरेषु न दृश्यते ।

नापि ज्ञानत्वप्रयोजकहेत्वतिरिक्तहेतुजन्येति साध्यम् । प्रत्यक्षत्वादिप्रयोजकानामिन्द्रियादीनां चाक्षुषत्वादिप्रयोजकानां चक्षुरादीनां च ज्ञानत्वप्रयोजकातिरिक्तत्वेन यथायथं तैस्सिद्धसाधनात् ।

युक्तिरत्नाकरः

उक्तमुत्पत्तौ प्रामाण्यस्वतस्त्वमसहमानः प्रत्यवस्थितो ।। **नन्विति** ।। **अनित्येति** ।। ईश्वरप्रमामादायांशतो बाधवारणायेदम् । अनित्यज्ञानमित्युक्ते ज्ञाने ज्ञानत्वहेत्वन्यहेतुजन्यत्वाभावसाधने बाधात् प्रमापदम् । तद्विशेषत्वात् ज्ञानविशेषत्वात् । एतच्च ज्ञानसामान्ये व्यवसाये बाधवारणाय । ईश्वरज्ञाने तद्वारणाय कार्यत्वे सतीति । यद्यपि परैर्जन्यज्ञानत्वादित्येवहेतूकृतं तथापि जन्यज्ञानत्वज्ञानसामान्यसामग्रीजन्यत्वेनाप्युपपत्त्या तद्विशेषज्ञानसामग्रीजन्यत्वे अप्रयोजकतया ज्ञानविशेषत्वस्य च विशेषसामग्रीजन्यत्वप्रयोजकत्वेनैवमुक्तम् । एवमप्रयोजकतावारणाय ।। **तद्विशेषत्वादिति** ।। यन्निष्टयन्निरूपितेत्यादिवत्परैरप्यप्रयोजकत्वाहितव्यभिचारवारकस्यापि सार्थक्यस्य वक्तव्यत्वादिति ज्ञापनाय तत्वनिर्णयटीकायामेवमनूदितमभिप्रेत्य तदेवेह लिखितं बोध्यम् । अन्यथा ज्ञानमात्रजन्यत्वे यथा ज्ञानसामान्यसामग्र्यामधिकदोषानुप्रवेशाज्जायमानाप्रमाज्ञानविशेषतस्तथा प्रमाविशेषोऽपि स्यात् । ज्ञानसामग्र्या एव प्रमासामग्रीत्वम् । नापि तस्यामधिकदोषानुप्रवेशात्प्रमाविशेषस्याप्यवकाशत्वादिति भावः ।

ननु ज्ञानसामान्यज्ञानसामग्र्या एव प्रमासामग्रीत्वेऽपि प्रतिबन्धकता दोषसत्वान्न तत्र प्रमात्वं प्रयोजयति किन्तु तद्विपरीतप्रमात्वमेव दोषाणां प्रकृतकार्यप्रतिबन्धेन विपरीतकार्यजनकत्वदर्शनादित्याङ्कच्य तद्वदेव ज्ञानत्वमपि न स्यात् । तत्सामग्यामपि प्रतिबन्धकदोषप्रवेशादित्याह ।। **यदीति** ।। मानाभावाच्चेति चकारसम्बन्धः ।। **प्रमाया इति** ।।

अत्राहुः ज्ञानहेत्वतिरिक्तहेतुजन्येऽपि साध्ये सर्वं वाक्यं सावधारणमिति न्यायेन ज्ञानहेत्वन्येनैव हेतुना जन्या न तु ज्ञानहेतुनेति । ज्ञानहेत्वजन्यत्वं विवक्षितं उत यथाश्रुतमेव । नाद्य इत्याह ।। **प्रमायामिति** ।। नान्त्य इत्याह ।। **विरोधाच्चेति** ।। लोके सर्वस्यापि ज्ञानहेतुतया तदतिरिक्तस्यैवाप्रसिद्ध्या तद्घटितभावरूपसाध्याप्रसिद्ध्यौ व्यतिरेकव्याप्तेरपि दुर्ग्रहतया पक्षे साध्यसिद्धिविरोधादित्यर्थः । विकल्पद्वये दूषणद्वयाभिधानेप्येकस्मिन्नेवोक्तसाध्ये दूषणद्वयाभिधानेन चकारोपपत्तिः । नचातीन्द्रियाणां साक्षात्काराविषयतयानुमित्यादौ विषयस्य हेतुतया ज्ञानजनकत्वस्य तत्रैव प्रसिद्धिरिति वाच्यम् । वेद्येपि वायावनुद्भूतरूपाभावस्य परमाणौ महत्वाभावस्य मनसि महत्वसमानाधिकरणोद्भूतरूपाभावस्य च प्रतियोगिसत्वप्रसंजितोपलम्भप्रतियोगित्वरूपानुपलब्ध्ययोग्यत्वसत्वेन प्रत्यक्षतया तत्र च संयुक्तविशेषणतादिप्रत्यासत्तिघटकतया वाय्वादेरपि हेतुत्वात् । पारिमाण्डिल्यगुरुत्वपरमाणुकर्मविशेषादिष्वपि महत्वसमानाधिकरणोद्भूतरूपाभावादेः योग्यानुपलब्ध्या प्रत्यक्षत्वनियमेन तत्र संयुक्तसमवेतविशेषणतादिघटकप्रत्यासत्तिघटकत्वेन तेषामपि जनकत्वसामान्यप्रत्यासत्त्या भूयोऽपि सर्वस्य ज्ञानजनकत्वसम्भवाच्च । न चैवमपि गिरिदरीविवरादिवृत्युत्पन्नविनष्टव्यक्तिविशेषे ज्ञानजनकत्वप्रसिद्धिः तद्घटितमानतादृशायां प्रमेयत्वादिसामान्यप्रत्याकस्मिकस्यापि ज्ञानं न वृत्तमित्यत्र मानाभावेन ज्ञानजनकत्वस्य सन्दिग्धतया तद्घटितसाध्याप्रसिद्धेः वज्रलेपत्वादिति ।

तन्न । गिरिदरीविवरादिवर्त्युत्पन्नविनष्टव्यतिरिक्तविशेषादीनां परः सहस्राणां ज्ञानाजनकत्वात् । न हि तद्वर्तमानदृशायां प्रमेयत्वादिप्रत्यासत्या कस्यचित् ज्ञानं वृत्तमित्येतावता व्यवहितदेशे स्थितानां तेषामपि हेतुत्वम् । व्यवहितकालस्थितानामतीतानागतानामपि तथात्वापत्तेः । न हि देशतः कालतो वावधाने कश्चिद्विशेषः । प्रमेयत्वस्य तु प्रत्यासत्तित्वं लौकिकेन्द्रिय-

सन्निकर्षवतः कस्यचित्प्रमेयस्य जनकत्वेऽप्युपपन्नम् । न चेन्द्रियसन्निकृष्टस्य प्रमेयस्य देशान्तरस्थप्रमेयवता सम्बन्धाभावेन कथं तदुपस्थापकत्वमिति वाच्यम् । वर्तमानप्रमेयस्यातीतानागतेः सहसम्बन्धाभावेन कथमतीतानागतप्रमेयवदुपस्थितरिति साध्यात् तदीयातीतादिसम्बन्धिवर्तमानमेवाभिधेयत्वादिप्रमेयं तदुपस्थापकम् । तदा देशान्तरवर्तिसम्बन्धेन्द्रियसन्निकृष्टप्रमेयत्वादिरूपप्रमेयमेव तदुपस्थापकं भविष्यतीति न देशान्तरस्थवर्तमानप्रमेयस्य प्रमेयवत्वसामान्यप्रत्यासत्तिज्ञानहेतुत्वमिति ज्ञानजनकत्वप्रसिद्धेरिव कलापादपि संयुक्तविशेषणतादिप्रत्यासत्तिघटकमतीन्द्रियमात्रस्य ज्ञानहेतुत्वमिति ।

तन्न । प्रत्यासत्तिघटकत्वेप्रत्यासत्तिनिष्टहेतुतावच्छेदकतयैव सात्रहेतुता । अन्यथा असिद्धेः । नचैवं चक्षुःसम्बन्धविशेषणतादिघटकत्वेनान्यथासिद्धतया चक्षुषोप्यहेतुता । रूपाद्युपलब्धयः करणसाध्याः क्रियात्वादिति धर्मिग्राहकमानेन तत्सिद्धेः । चक्षुषापश्यामीत्याद्य[1]भवबलसिद्धं रूपाद्युपलब्धिनिष्ठचाक्षुषत्वादिजातिप्रयोजकतया च तद्धेतावश्यम्भवात् । नचैवं घटपटत्वाभावा इत्यादिप्रत्यक्षेऽपि संयुक्तविशेषणतादिप्रत्यासत्तिघटकत्वेन अन्यथासिद्धतया संयोगघटादेरप्यहेतुत्वापत्तिः । तदभावप्रस्यक्षे घटादेरप्यधिकरणतया विषयत्वेन तदंशे संयोगादेः सन्निकर्षत्वेन घटादेश्च स्वविषयतया हेतुत्वात् परमाणुतत्परिमाणादौ महत्वाभावामहत्वाभावादिप्रत्यक्षादौ च परमाण्वाद्यंशे तस्यालौकिकप्रत्यक्षतया विषयतत्संयोगादेर्हेतुत्वमेवेत्यतीन्द्रियाणां ज्ञानहेतुप्रत्यासत्तिघटकत्वेनान्यथासिद्धतया ज्ञानहेतुत्वमेवेति ।

नापि योगिप्रत्यक्षं प्रति तेषां हेतुत्वं तस्यालौकिकप्रत्यक्षत्वेन विषययाजन्यत्वात् । नचानादेः पूर्ववृत्तित्वाभावेन तदहेतुत्वेपि

१. "अनुभव" इति स्यात् ।

वर्तमानस्यहेतुत्वमविरुद्धम् । विषयस्य प्रत्यक्षहेतुतादिलौकिकेन्द्रिय-सन्निकर्षसम्पादनेन हि [१]कारणत्वादिषु स्थितानां योगिनां रामेश्वरादि-स्थितविषयाणां लौकिकः सन्निकर्षोस्ति । न च यथा जन्यज्ञानादि-सहकारिवशादस्मदादिनयनरश्मिना कुड्यभूतलादिव्यवहितनिक्षेपादिभिः सम्बन्धः तथा योगजधर्मरूपसहकारिवशात्तैरपि लौकिकसन्निकर्ष एव सम्भवीतीति वाच्यम् । गिरिदरीविवरादिवर्त्युत्पन्नविनष्टादीनां च स्ववर्तमानतादृशायामेव योगिलौकिकप्रत्यक्षविषयत्वं सम्भवेपि महत्व-समानाधिकरणोद्भूतरूपत्वादिबहिर्द्रव्यादिलौकिकप्रत्यक्षे तन्त्रत्वेन कृप्त-स्यातीन्द्रियपरमाण्वादिष्वभावेन तद्गोचरयोगिप्रत्यक्षस्य लौकिकत्वानुप-पत्या तत्रलौकिकप्रत्यक्षसन्निकर्षस्याहेतुत्वात् । न चालौकिकसन्निकर्ष-जन्यप्रत्यक्षे साक्षात्करोमीत्यनुव्यवसायादर्शने योगिनां परमाण्वादिगोचर-प्रत्यक्षे साक्षात्करोमीत्यनुव्यवसायोनस्यादिति वाच्यम् । अतीतादि-गोचरतत्साक्षात्कारवदुपपत्तेः । न हि तत्रापि लौकिकसन्निकर्ष-जन्यत्वसम्भव इति सङ्क्षेपः ।

एवं चातीन्द्रियेष्वेवज्ञानहेत्वतिरिक्तत्वप्रसिध्या साध्याप्रसिध्यभावेन नोक्तदिशा विकल्पमुखेन ग्रन्थोवतरणनीयः । किन्तु यथास्थितसाध्य एव प्रमाया इत्यादिवाक्यमुक्त्वाहेतुर्विरुद्धोपीत्याह ।। **विरोधाच्चेति** ।। कार्यत्वे सति ज्ञानविषयत्वस्याज्ञानहेतुजन्यव्याप्यतयोक्तहेतोः साध्यसहचारस्यैव भावादित्यथार्थ इत्येवयोजनीय इति युक्तमुत्पश्यामः ।

ननु ज्ञानहेत्वित्यनेन ज्ञानत्वप्रयोजकत्वं विवक्षितम् । तत्त्वं च ज्ञानत्वम् । यज्जन्यत्वप्रयुक्तं यज्जन्यतावच्छेदकमिति यावत् । एवं च ज्ञानत्वावच्छिन्नकार्यतानिरूपितकारणताश्रयभिन्नजन्यत्वं साध्यमतो नोक्तः दोषः । न च ज्ञानत्वस्य नित्यवृत्तितया न कार्यतावच्छेदकत्वं

१. "काश्यादिषु" इति स्यात् ।

यद्धर्माश्रयस्य सर्वोत्पत्तिवद्धेत्वधीनधर्मस्यैव तद्धेतुजन्यतावच्छेदकत्वात् अत्र सर्वपदोपादानात् प्रमेयत्वादेर्दण्डादिजन्यतावच्छेदकतानिवारिता प्रमेयपदाद्युत्पत्तेर्दण्डाधीनत्वात् । नचैवं कम्बुत्वादेरपि दण्डत्वादिजन्यतावच्छेदकापत्तिः । बाधकाभावे [1]सत्यपि विशेषणानि । तत्र गौरवत्वस्यैव बाधकत्वात् ।

नचैवं सत्तादिकमेवेश्वरादिजन्यतावच्छेदकत्वं स्यात् न कार्यत्वादिकमिति वाच्यम् । एतन्मत[2]दुष्टत्वादित्याह ।। **नापीति** ।। प्रत्यक्षत्वादीति जन्यप्रत्यक्षत्वादीत्यर्थः । अनुमितित्वादिरादिशब्दार्थः । इन्द्रियमित्यादिपदेन परामर्शग्रहः । चाक्षुषत्वादीत्यादिपदेन रासनत्वादेः रासनादेश्च परिग्रहः । इदमुपलक्षणम् । यद्धर्माश्रयः सर्वोयदधीनः तद्धर्मस्यैव तदवच्छेदकत्वम् । लाघवात् । न तु यद्धर्माश्रयस्य सर्वो[3]पपत्तिरिति । उत्पत्तिपदप्रवेशेन गौरवात् । एवं च ज्ञानसत्वाश्रयस्य सत्वस्य हेत्वधीनत्वेन ज्ञानत्वस्य कार्यतावच्छेदकतया तद्धर्मसाध्याप्रसिद्धिरित्यपि बोध्यम् ।

न्यायदीपः

।। **एतदिति** ।। उत्पत्तौ च प्रामाण्यं स्वत एवेत्येतदित्यर्थः । कुत इत्यतः **कुसुमाञ्जल्युक्तेन** तत्वनिर्णयटीकाद्याशङ्कितेनानुमानेन विरोधं मानाभावं च हेतुद्वयमाह ।। **अनित्यप्रमेति** ।। प्रमेत्येवो**दयनो**क्तावपीश्वरज्ञानांशे बाधवारणाय तदभिप्रेतम् स्वयमुक्तमनित्येति ।। अत एव अनित्यप्रमात्वं कार्यतावच्छेदकं इति रुचिदत्तोक्तिः । हेत्वधीनत्वे ज्ञानहेत्वधीनत्वे च साध्ये सिद्धसाधनमतो ।। **ज्ञानहेत्वतिरिक्तहेतुजन्येति** ।। **तद्विशेषत्वात्** ।। ज्ञानविशेषत्वादित्यर्थः । ईश्वरज्ञाने व्यभिचारनिरासाय ।। **कार्यत्वे सतीति** ।। ज्ञाने तद्दोषनिरासाय विशेष्यम् ।

१. "सतीत्यपि विशेषणीयं" इति स्यात् । २. "मतस्य" इति स्यात् । ३. "उत्पत्तिः" इति स्यात् ।

एतेन **मणौ** जन्यत्वादिति हेत्वनुवादोऽनुचित इति सूचितम् । **कुसुमाञ्जलौ मणौ** चोक्तमनुकूलतर्कमाह ।। **अन्यथेति** ।। प्रमात्वस्य ज्ञानसामग्रीमात्रप्रयोज्यत्वेऽप्रमायामपि प्रमात्वं स्यात् । तत्रापि ज्ञानसामान्य-हेतोः सत्त्वादिति भावः ।। **ज्ञानमपीति** ।। ज्ञानत्वप्रमात्वयोरेकसामग्री-प्रयोज्यत्वादेकांशे प्रतिबन्धेऽपरांशेपि तथात्वादिति भावः । मानाभावाच्चेति चान्वयः । व्याघातं चाह ।। **विरोधाच्चेति** ।। ज्ञानजनकजन्यत्वार्थ-त्वेप्युक्तदोषावेवेति भावः ।

मणिकृतोत्प्रेक्ष्य दूषितानपि पक्षान् शिष्याणां सुबोधायानूद्यनिराकरोति ।। **नापीति** ।। प्रत्यक्षत्वादीत्यादिपदेनानुमितित्वोपमितित्वशाब्दत्वानां तथा चाक्षुषत्वादीत्यत्र रासनत्वादीनां द्वितीयचतुर्थादिपदाभ्यां च परामर्शोप-मानशब्दज्ञानानां रसनादीनां च ग्रहः । सिद्धसाधनादित्युपलक्षणम् । ज्ञान-त्वस्येश्वरज्ञानवृत्तित्वेन कारणाप्रयोज्यतया तत्प्रयोजकसामग्र्यप्रसिद्ध्या साध्याप्रसिद्धिरित्यपि बोध्यम् ।

तर्कताण्डवम्

नापि ज्ञानसामान्यसामग्र्यतिरिक्तसामग्रीजन्येति साध्यम् । सामग्रीशब्देन कृत्स्नकारणचक्रविवक्षायां सामग्रीभेदे कार्यभेदनियमेन प्रमाया ज्ञानभिन्नत्वापत्तेः । कतिपयकारणचक्रविवक्षायां चोक्त-रीत्येन्द्रियादिभिः सिद्धसाधनात् ।

एतेनानित्यज्ञानत्वावच्छिन्नकार्यताभिन्नकार्यत्वप्रतियोगिककारणजन्येति साध्यत इति निरस्तम् । इन्द्रियादिभिः सिद्धसाधनात् ।

एतेन अनित्यप्रमा प्रमाऽप्रमोभयहेतुभिन्नहेतुजन्या जन्यत्वात्, प्रमाऽप्रमान्यतरप्रतिबन्धकजन्या वा प्रमाऽप्रमान्यतरत्वात्, स्वविरो-

ध्यनुभवप्रतिबन्धकजन्या वा अनित्यानुभवत्वात् अप्रमावत् । चाक्षुषप्रमा चाक्षुषभ्रमाजनकजन्या अनित्यप्रमात्वात् रासनप्रमावदिति निरस्तम् । प्रमाजनकव्यक्तिविशेषस्योभयहेतुभिन्नत्वेनाप्रमाप्रतिबन्धकत्वेन चाक्षुषभ्रमाजनकत्वेन च सिद्धसाधनात् ।

युक्तिरत्नाकरः

ज्ञानसामान्यसामग्रीत्यत्र ज्ञानत्वं प्रति सामग्रीत्युक्तौ तस्य जातिरूपतया तत्सामग्र्यसम्भवेन तद्घटितसाध्याप्रसिध्यापत्या ज्ञानत्वावच्छिन्नं प्रतीत्युक्तौ च नित्यवृत्तिज्ञानत्वस्योक्तरीत्या[१]नवच्छेदकताया पुनः [२]प्रसिध्यापत्या ज्ञानत्वाश्रयत्वं प्रति या सामग्रीति वाच्यतया तत्र सामग्रीशब्दार्थं विकल्प्य दूषयति ।। **सामग्रीशब्देनेति** ।। **सामग्रीभेद इति** ।। ननु सर्वत्रैवकार्यविशेषसामान्यसामग्र्यतिरिक्तविशेषसाग्रीजन्यत्वमावश्यकम् । अन्यथा विशेषस्याकस्मिकत्वापत्तेः । तथा च कथमयं नियम इति चेत् । न । सामान्यविशेष[३]सामग्र्याः मिलितयोरेवैकविरोधकार्यजनकत्वनियमेन विवक्षितकृत्स्नकारणचक्ररूपसामग्रीभेदस्य क्वापि सामान्यविशेषस्थले अभावात्सामान्यसामग्र्यतिरिक्तसामग्रीजन्यो विशेष इत्यादौ सामग्रीशब्दस्य कतिपयकारणमात्रपरत्वादिति भावः ।। **एतेनेति** ।। अनित्यज्ञानत्वावच्छिन्नामनोयोगादिनिरूपितकार्यतातदन्यानित्यप्रमात्वावच्छिन्ना तत्प्रतियोगिककारणतन्निरूपितकारणतायाश्रयोगुणः तज्जन्येति पक्षे साध्यपर्यवसानमिति भावः । प्रमाप्रमेति उभयसाधारणग्रहेत्वित्यर्थः । एवं चेन्द्रियादिभिर्न सिद्धसाधनम् । [४]नन्वमाहेतुपित्तादेरपि स्वगोचरप्रमाहेतुत्वेन प्रमाप्रमोभयहेतुभिन्नत्वाभावादप्रमायां साध्यवैकल्यं घटादेः दृष्टान्तत्वेचाप्रमायां व्यभिचारः । न प्रमाहेत्विति स्वान्यगोचरप्रमाहेतुत्वं विवक्षितम् । पित्तादेः

१. "अनवच्छेदकतया" इति स्यात् । २. "अप्रसिद्ध्यापत्त्या" इति स्यात् ।
३ "सामग्र्योः" इति स्यात् । ४. "ननु वमहेतु" इति स्यात् ।

स्वाप्रमाहेतुत्वेऽपि साध्यप्रमाहेतुत्वाभावान्नोक्त इति वाच्यम् । पीतः शङ्ख इत्या(कारक)ज्ञानस्य धर्मिणः शङ्खाद्यंशे प्रमात्वेनोक्तदोषतादवस्थ्यादिति चेत् । यद्विषयकत्वेनज्ञानं प्रतिजनकत्वं तदंशे या प्रमा तद्धेतुत्वान्यत्वं विवक्षितम् । पीतादेश्च पीतत्वांशे वैशिष्ट्यांश एव जनकतया तत्र च न प्रमात्वाभावेन तज्जनकान्यत्वसत्वात् नोक्तव्यभिचाराभावः । प्रमेति जन्यप्रमेत्यर्थः । तेन नेश्वरज्ञानेनैकान्त्यमीशज्ञानं प्रमाप्रमाबहिर्भूतमिति मतेनायं हेतुरित्याहुः ।। **स्वेति** ।। अत्र यत्किञ्चिदनुभवप्रतिबन्धकजन्यत्वे सिद्धाधनं यावदनुभवप्रतिबन्धकजन्यत्वे बाधोतः ।। **स्वविरोधीति** ।। अनुमित्यादिप्रतिबन्धकप्रत्यक्षादिसामग्रीजन्यत्वेन सिद्धसाधनवारणाय स्वविरोधीति स्वशब्दस्य पक्षीभूतानित्यप्रमामात्रपरतया अनुमित्यादौ तद्विरोधित्वान्नोक्तदोषः । स्वविरोधप्रतिबन्धकानुभवसामग्रीजन्यतया सिद्धसाधनवारणायानुभवपदे ।। **अनित्येति** ।। अनित्यत्वमात्रस्य घटादौ सत्वात्स्वविरोध्यनुभवप्रसिद्ध्यास्तद्घटितसाध्याप्रध्याव्याप्यत्वासिद्धिरतो ज्ञानपदम् । स्मृतौ निर्विकल्पके च व्यवसायस्मृतिव्यतिरिक्तत्वं प्रकारकत्वं च विशेषणमित्याहुः ।

।। **उभयहेतुभिन्नत्वेनेति** ।। ननु प्रमाजनकव्यक्तिविशेषस्याप्यप्रमाजनन-योग्यतया तद्भिन्नत्वाभावात् न सिद्धसाधनम् । न च प्रमाप्रागभावपदं व्यक्तिविशेषपरं प्रमाप्रमोभयहेत्वन्यभावरूपहेतुजन्येतिविवक्षितमतो नोक्तदोष इति चेत् अनुमित्यादौ गुणस्य सल्लिङ्गपरामर्शादिप्रतियोगिज्ञानत्वेन सविषय-प्रतियोगिकाभावभ्रमहेतुतयानुमितौ तदजन्यत्वसाधने बाधने बाधादित्यत्र तात्पर्यात् ।। **अप्रतिबन्धकत्वेनेति** ।। कारणीभूताभावप्रतियोगित्वस्य प्रतिवाद्यप्रसिध्या कार्यानुत्पादव्याप्यत्वरूपस्यैव तस्य वाच्यतया तस्य च व्यक्तिविशेषे सत्वात्साध्ये सिद्धसाधनत्वादिति भावः । न च तज्जातीयेति विवक्षितम् । प्रमाजनकव्यक्तिविशेषस्य चाप्रमाप्रतिबन्धकजातीयत्वाभावात्

नोक्तदोष इति वाच्यम् । प्रतिबन्धकवृत्तिजातिमत्वविवक्षायां सत्तादिक-मारोपसिद्धसाधनात् असाधारणजातिविवक्षायां गुणत्वदोषत्वयोरजातित्वेन बाधापत्तेः । तदन्यवृत्तिप्रतिबन्धकतावच्छेदकधर्मविवक्षायां चानित्यप्रमायां च तद्विशेषप्रत्यक्षासु चानुगतगुणभावस्य वक्ष्यमाणतया बाधतादवस्थ्यादिति भावः ।

।। **चाक्षुषभ्रमजनकत्वेनेति** ।। यद्यप्यत्राप्युक्तन्यायेन चाक्षुष-प्रमाजनकव्यक्तिविशेषस्यापि भ्रमजननयोग्यतया प्रागभावस्य तदयोग्यत्वेपि भावत्वेन विशेषणान्नसिद्धसाधनम् । तथापि संशयोत्तरचाक्षुषप्रमागुणस्य पुरुषत्वव्याप्यकरादिमानिति प्रमारूपविशेषदर्शनस्य इह करादिमत्वाभाव इति भ्रमप्रतियोगिज्ञानत्वेन जनकतया संशयोत्तरचाक्षुषप्रमायां बाधादित्यत्रैव तात्पर्यम् ।

न्यायदीपः

ननु ज्ञानत्वप्रयोजकहेत्वित्यस्य ज्ञानत्वाश्रयजनकसामग्रीत्यर्थो विवक्षितः । तेन नेन्द्रियादिभिः सिद्धसाधनम् । तेषामपि तदाश्रयजनक-सामग्रीत्वेन तदन्यत्वाभावादित्यत आह ।। **नापि ज्ञानसामान्येति** ।। ज्ञानत्वाश्रयसामग्रीत्यर्थः ।। **सामग्रीभेद इति** ।। सामान्यविशेषकार्यस्थलेपि सामान्यकार्यसामग्रीतो विशेषकार्यसामग्री न भिन्ना किन्तु मिलितैवेति भावः ।। **सिद्धसाधनादिति** ।। इन्द्रियादीनामपि ज्ञानत्वाश्रयकतिपयकारणान्यत्वादिति भावः ।

ज्ञानत्वस्य नित्यवृत्तितयानवच्छेदकत्वादाह ।। **अनित्यज्ञानत्वेति** ।। अनित्यज्ञानत्वेन अवच्छिन्ना नियता व्यावर्तिता वा या कार्यता अनित्यज्ञानमात्रवृत्तिरात्ममनोयोगादिप्रयोज्या कार्यता तदन्यकार्यत्वं प्रमा-

निष्ठमप्रमानिष्ठं च तत्प्रतियोगिकं तन्निरूपितं यत्कारणं प्रमारूपकार्यकारणं अप्रमारूपकार्यकारणं गुणदोषलक्षणं तज्जन्येत्यर्थः । दोषजन्यत्वे बाधाद्गुणजन्यत्वेन साध्यपर्यवसानं दृष्टान्तेऽप्रमायां दोषजन्यत्वेन साध्यानुगमो ज्ञेयः ।। **सिद्धसाधनादिति** ।। कार्यत्वपदेन प्रमादिवृत्तिकार्यत्वमिव प्रत्यक्षमात्रवृत्तिकार्यत्वमनुमित्यादिमात्रवृत्तिकार्यत्वं चाक्षुषादिज्ञानमात्रवृत्ति-कार्यत्वमपि भवतीति तत्तत्प्रतियोगिककारणानीन्द्रियादीन्यपि भवन्तीति तैः सिद्धसाधनमित्यर्थः ।। **प्रमाऽप्रमेति** ।। तदुभयहेतुर्ज्ञानसामान्य-सामग्र्यात्ममनोयोगादिः । तद्भिन्नहेतुर्गुणो दोषश्च । तज्जन्यत्वं च पक्ष-दृष्टान्तयोः प्रमाऽप्रमयोः पूर्ववज्ज्ञेयम् । प्रमेत्युक्त्या सिद्धसाधनत्वस्या-प्रमेत्युक्त्या बाधस्य च निरासः । न च प्रागभावव्यक्तिविशेषेणार्थान्तरम् । भावत्वेन विशेषणात् ।

यन्मते गुणादेर्विरोधिप्रतिबन्धकत्वं स्वकार्यकरत्वं च तन्मतेनाह ।। **प्रमाऽप्रमान्यतरेति** ।। अनित्यप्रमेत्येवं प्रागुक्तपक्षानुकर्षोऽत्रोत्तरत्र च ज्ञेयः । अन्यतरप्रतिबन्धकश्च गुणो दोषश्च । तज्जन्यत्वं पूर्ववत् । हेतौ जन्यप्रमेति योज्यम् । प्रमाऽप्रमाबहिर्भूतमीश्वरज्ञानमिति मते तु यथाश्रुतमेव । अनुमित्यादिप्रतिबन्धकप्रत्यक्षसामग्रीजन्यत्वेन सिद्धसाधनवारणाय स्वविरोधीत्यनुभवविशेषणम् । अप्रामारूपोऽनुभव इत्यर्थः । स्वशब्दस्य पक्षीभूतानित्यप्रमामात्रपरत्वेनानुमित्यादेः स्वविरोधित्वाभावान्नोक्तदोषः । स्वविरोधिस्मृतिप्रतिबन्धकानुभवसामग्रीजन्यतया सिद्धासाधनतावारणायानु-भवपदम् ।। **अप्रमावदिति** ।। तत्र दोषजन्यत्वेन साध्यानुगमो ध्येयः ।। **चाक्षुषभ्रमाजनकेति** ।। पक्षे गुणजन्यत्वेन दृष्टान्ते रसनेन्द्रिय-सम्प्रयोगजन्यत्वेन साध्यं बोध्यम् ।

आद्यद्वयं स्मृत्यनुभवसाधारणं ध्येयम् तृतीयमनुभवासाधारणं चतुर्थं

चक्षुरादिप्रत्यक्षसाधारणमिति साध्यचतुष्टयम् विवेक्तव्यम् ।। **व्यक्तिविशेषस्येति** ।। निर्देषार्थकरणसम्प्रयोगादिरूपस्येत्यर्थः ।। **अप्रमाप्रतिबन्धकत्वेनेति** ।। तदनुत्पादव्याप्यत्वरूपप्रतिबन्धकत्वेनेत्यर्थः । अप्रमायाः स्वविरोध्यनुभवत्वादप्रमाप्रतिबन्धकत्वेनेत्यनेनैव स्वविरोध्यनुभवप्रतिबन्धकत्वेनेत्यस्य अप्युक्तत्वान्न तस्य पृथगुक्तिः ।। **इन्द्रियसम्प्रयोगस्येति** ।। इन्द्रियादिसम्प्रयोगत्वस्याप्रमाव्यावृत्तत्त्वेन तदवच्छिन्नकार्यत्वं तस्येत्यर्थः । इन्द्रियसम्प्रयोगस्येति ध्येयम् । अग्र इन्द्रियादीति श्रवणात् ।। **तज्जन्यत्वेनेति** ।। संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन जनकत्वादिन्द्रियस्यापि द्रव्यत्वादिति भावः ।

तर्कताण्डवम्

नापि अनित्यप्रमा अप्रमाव्यावृत्तधर्मावच्छिन्नकार्यताप्रतियोगिककारणजन्या अप्रमाविजातीयकार्यत्वात् । घटवदिति युक्तम् । अप्रमाव्यावृत्तधर्मावच्छिन्नकार्यत्वमिन्द्रियसम्प्रयोगस्य तत्प्रतियोगिककारणमिन्द्रियादीति तज्जन्यत्वेन सिद्धसाधनात् ।

नापि अनित्यप्रमा अप्रमाकारणविजातीयकारणजन्या अप्रमाविजातीयकार्यत्वात् घटवत् । अन्यथा कार्यवैजात्यमाकस्मिकं स्यादिति युक्तम् । हेतौ विजातीयत्वं यदि विरुद्धजात्यधिकरणत्वं तदा प्रमात्वस्य अजातित्वेन असिद्धेः । यदि तु विरुद्धधर्ममात्राधिकरणत्वं तदा पटज्ञानविजातीयकार्ये घटज्ञाने व्यभिचारः । अनुमित्यादिसाधारणघटज्ञानमात्रानुगतकारणाभावात् । पाकजरूपरसादौ कारणावैजात्येपि [१]कार्यवैजात्यदर्शनाच्च ।

---

१. अत्र कार्यपदं माभूदिति भाति ।

स्यादेतत् । अनित्यप्रमात्वं अनित्यज्ञानत्वावच्छिन्नकार्यत्व-प्रतियोगिककारणताभिन्नकारणताप्रतियोगिककार्यतावच्छेदकम् । अनित्यज्ञानत्वव्याप्यकार्यतावच्छेदकधर्मत्वात् अप्रमात्ववत् ।

युक्तिरत्नाकरः

।। [1]**तन्यायत्वेनेति** ।। नन्वप्रमाव्यावृत्तधर्मावच्छिन्नज्ञानवृत्तिकार्यता-निरूपितकारणताश्रयजातित्वं विवक्षितम् । अन्यथोक्तन्यानेनाप्रमायामपि साध्यसत्वे हेतौ तद्व्यावर्तकविशेषणोपादानानुपपत्तेः । एवं चोक्तदोषः । न चैवं दृष्टान्ते घटे साध्यवैकल्यम् । व्यतिरेकदृष्टान्ताभिप्रायेण तदुप-पादनात् । न च घटे हेतुव्यतिरेकाभावेन कथमेदमिति वाच्यम् । विवक्षित-साध्यस्य घटेऽभावेन तत्र हेतोः व्यभिचारापत्या ज्ञानवृत्तित्वे सतीति तद्विशेषणे हेतुव्यतिरेकस्य तत्रापि सत्वात् । नचैवमप्रमाव्यावृत्तधर्मावच्छिन्न-ज्ञानवृत्तिकार्यताऽप्रसिध्या साध्याप्रसिद्धिः । प्रमानिष्टकार्यत्वं अप्रमा-व्यावृत्तधर्मावच्छेद्य अप्रमाविजातीयकार्यवृत्तित्वादित्यादिना तत्प्रसिद्धि-सम्भवात् । नचैतावतेव समीहितसिध्योक्तानुमानवैय्यर्थम् । अनिप्रमा-विशेष्यकोक्तसाध्यप्रकारकबुद्धेरुद्देश्यतायाः सिद्धये तदादरणात् ।

यद्वा यद्विजातीयं कार्यं तत्तद्विजातीयं कार्यं तदवृत्तिधर्मावच्छिन्नकार्यत्व-प्रतियोगिककारणताश्रयजन्यमिति सामान्यव्याप्त्याशयेन घटवदिति दृष्टान्तो-पपत्तेरिति चेत् न जन्याजन्यसाधारणस्याप्रमावैजात्यस्य प्रमासाधारण-कारणजन्यत्वमात्रेणोपपत्त्या कार्यत्वस्य च सकारणकत्वमात्रेणोपपत्योक्त-हेतोरुक्तसाध्यं विनानुपपत्त्याभावेन प्रयोजकहेतुरित्यत्र तात्पर्यात् । अप्रमाकारणविजातीयकारणजन्योऽत साध्येऽप्रमाकारणविजातीयं यत् अनुगतकधर्मावच्छिन्नकारणताकं तज्जन्यमिति विवक्षितं उत यथोक्तमेव ।

---

१. "तज्जन्यत्वेनेति" इति स्यात् ।

नान्त्यः । व्यक्तिविशेषमादायसिद्धसाधनात् । आद्ये दोषमाह ।। **घटज्ञान-विजातीय इति** ।। घटज्ञाने घटानित्यज्ञाने ।। **कारणावैजात्येपीति** ।। न च पाकजरूपादावपि प्रागभावहेतुवैजात्यमस्त्येवेति वाच्यम् । अप्रमाकारणविजातीयकारणजन्येत्यत्र प्रागभावव्यक्तीरादाय सिद्धसाधनवारणाय भावरूपकरणजन्यत्वस्यावश्यविवक्षणीयतया पाकजरूपादौ तदभावा-दित्यर्थात् । अनित्यज्ञानत्वेपि अनित्य[1]ज्ञानवत्वावच्छिन्ना या कार्यता तदनिरूपिता कारणतात्ममनोयोगादिनिष्टा तद्भिन्ना कारणता गुणनिष्ठा तन्निरूपितकार्यतायाः अनवच्छेदकमिति साध्यपर्यवसानमिति बोध्यम् ।। **अनित्यज्ञानत्वेति** ।। अनित्यज्ञानत्वे व्यवसायव्याघातं न च भेदेपि व्याप्तिसत्वात् दोषतादवस्थ्यम् । यदिच व्याप्तिभेदगर्भा तदानित्य-ज्ञानत्वान्यत्वे सतीत्येतावतैवोक्तदोषवारणे व्याप्त्यंशवैय्यर्थमिति वाच्यम् । व्यवसायपदेन भिन्नमात्रन्यूनवृत्तित्वस्य वा विवक्षितत्वात् । घटानित्यत्वादौ तद्वारणायविशेष्यम् ।

न्यायदीपः

मणिकृता सिद्धान्तितानुमानान्यप्यनूद्य निराह ।। **नाप्यनित्य-प्रमेत्यादिना** ।। **अप्रमाविजातीयेति** ।। अप्रमाकारणविजातीयेत्यर्थः । तदुक्तमेवानुकूलतर्कमाह ।। **अन्यथेति** ।। विजातीयकारणाजन्यत्व इत्यर्थः ।। **अजातित्वेनेति** ।। इदं रजतमित्यादौ धर्म्यंशे सत्वेपि धर्मांशेऽभावेन प्रमात्वस्याव्याप्यवृत्तित्वात् । [2]ज्ञानत्वसमनियतत्वाच्चेति भावः ।

घटज्ञानजातीयमपि कार्यं तद्विजातीयकार्यकारणविजातीयघटेन्द्रिय-सन्निकर्षादिजन्यमिति न व्यभिचार इति **मण्युक्त**निरासाय व्यभिचारं व्यनक्ति ।। **अनुमित्यादीति** ।। अप्रयोजकत्वं चाह ।। **पाकजेति** ।। न च तत्रापि

१. "ज्ञानत्वावच्छिन्ना" इति स्यात् । २. "यथार्थज्ञानत्व" इति स्यात् ।

स्यादेतत् । अनित्यप्रमात्वं अनित्यज्ञानत्वावच्छिन्नकार्यत्व-प्रतियोगिककारणताभिन्नकारणताप्रतियोगिककार्यतावच्छेदकम् । अनित्यज्ञानत्वव्याप्यकार्यतावच्छेदकधर्मत्वात् अप्रमात्ववत् ।

युक्तिरत्नाकरः

।। [1]**तन्यायत्वेनेति** ।। नन्वप्रमाव्यावृत्तधर्मावच्छिन्नज्ञानवृत्तिकार्यता-निरूपितकारणताश्रयजातित्वं विवक्षितम् । अन्यथोक्तन्यानेनाप्रमायामपि साध्यसत्वे हेतौ तद्व्यावर्तकविशेषणोपादानानुपपत्तेः । एवं चोक्तदोषः । न चैवं दृष्टान्ते घटे साध्यवैकल्यम् । व्यतिरेकदृष्टान्ताभिप्रायेण तदुप-पादनात् । न च घटे हेतुव्यतिरेकाभावेन कथमेदमिति वाच्यम् । विवक्षित-साध्यस्य घटेऽभावेन तत्र हेतोः व्यभिचारापत्या ज्ञानवृत्तित्वे सतीति तद्विशेषणे हेतुव्यतिरेकस्य तत्रापि सत्वात् । नचैवमप्रमाव्यावृत्तधर्मावच्छिन्न-ज्ञानवृत्तिकार्यताऽप्रसिध्या साध्याप्रसिद्धिः । प्रमानिष्टकार्यत्वं अप्रमा-व्यावृत्तधर्मावच्छेद्य अप्रमाविजातीयकार्यवृत्तित्वादित्यादिना तत्प्रसिद्धि-सम्भवात् । नचैतावतेव समीहितसिध्योक्तानुमानवैय्यर्थम् । अनिप्रमा-विशेष्यकोक्तसाध्यप्रकारकबुद्धेरुद्देश्यतायाः सिद्धये तदादरणात् ।

यद्वा यद्विजातीयं कार्यं तत्तद्विजातीयं कार्यं तदवृत्तिधर्मावच्छिन्नकार्यत्व-प्रतियोगिककारणताश्रयजन्यमिति सामान्यव्याप्त्याशयेन घटवदिति दृष्टान्तो-पपत्तेरिति चेत् न जन्याजन्यसाधारणस्याप्रमावैजात्यस्य प्रमासाधारण-कारणजन्यत्वमात्रेणोपपत्त्या कार्यत्वस्य च सकारणकत्वमात्रेणोपपत्योक्त-हेतोरुक्तसाध्यं विनानुपपत्त्याभावेन प्रयोजकहेतुरित्यत्र तात्पर्यात् । अप्रमाकारणविजातीयकारणजन्योऽत साध्येऽप्रमाकारणविजातीयं यत् अनुगतकधर्मावच्छिन्नकारणताकं तज्जन्यमिति विवक्षितं उत यथोक्तमेव ।

---

१. "तज्जन्यत्वेनेति" इति स्यात् ।

नान्त्यः । व्यक्तिविशेषमादायसिद्धसाधनात् । आद्ये दोषमाह ।। **घटज्ञान-विजातीय इति** ।। घटज्ञाने घटानित्यज्ञाने ।। **कारणावैजात्येपीति** ।। न च पाकजरूपादावपि प्रागभावहेतुवैजात्यमस्त्येवेति वाच्यम् । अप्रमाकारणविजातीयकारणजन्येत्यत्र प्रागभावव्यक्तीरादाय सिद्धसाधनवारणाय भावरूपकरणजन्यत्वस्यावश्यविवक्षणीयतया पाकजरूपादौ तदभावा-दित्यर्थात् । अनित्यज्ञानत्वेपि अनित्य[1]ज्ञानवत्त्वावच्छिन्ना या कार्यता तदनिरूपिता कारणतात्ममनोयोगादिनिष्ठा तद्भिन्ना कारणता गुणनिष्ठा तन्निरूपितकार्यतायाः अनवच्छेदकमिति साध्यपर्यवसानमिति बोध्यम् ।। **अनित्यज्ञानत्वेति** ।। अनित्यज्ञानत्वे व्यवसायव्याघातं न च भेदेपि व्याप्तिसत्वात् दोषतादवस्थ्यम् । यदिच व्याप्तिभेदगर्भा तदानित्य-ज्ञानत्वान्यत्वे सतीत्येतावतैवोक्तदोषवारणे व्याप्त्यंशवैय्यर्थमिति वाच्यम् । व्यवसायपदेन भिन्नमात्रन्यूनवृत्तित्वस्य वा विवक्षितत्वात् । घटानित्यत्वादौ तद्वारणायविशेष्यम् ।

न्यायदीपः

मणिकृता सिद्धान्तितानुमानान्यप्यनूद्य निराह ।। **नाप्यनित्य-प्रमेत्यादिना** ।। **अप्रमाविजातीयेति** ।। अप्रमाकारणविजातीयेत्यर्थः । तदुक्तमेवानुकूलतर्कमाह ।। **अन्यथेति** ।। विजातीयकारणाजन्यत्व इत्यर्थः ।। **अजातित्वेनेति** ।। इदं रजतमित्यादौ धर्म्यंशे सत्वेपि धर्मांशेऽभावेन प्रमात्वस्याव्याप्यवृत्तित्वात् । [2]ज्ञानत्वसमनियतत्वाच्चेति भावः ।

घटज्ञानजातीयमपि कार्यं तद्विजातीयकार्यकारणविजातीयघटेन्द्रिय-सन्निकर्षादिजन्यमिति न व्यभिचार इति **मण्युक्त**निरासाय व्यभिचारं व्यनक्ति ।। **अनुमित्यादीति** ।। अप्रयोजकत्वं चाह ।। **पाकजेति** ।। न च तत्रापि

१. "ज्ञानत्वावच्छिन्ना" इति स्यात् । २. "यथार्थज्ञानत्व" इति स्यात् ।

तत्प्रागभावरूपहेतुवैजात्यमस्तीति वाच्यम् । भावरूपविजातीयेति साध्यार्थत्वात् । अन्यथा प्रागभावेनैव सिद्धसाधनतापत्तेरिति भावः ।

मण्युक्तानुमानान्तरमाशङ्कते ।। स्यादेतदिति ।। प्रमात्वस्य नित्यवृत्तितया कार्यतानवच्छेदकत्वादनित्यप्रमात्वमित्युक्तिः । एवं साध्येऽपि ज्ञेयम् । अनित्यज्ञानत्वावच्छिन्नं यत्कार्यत्वं तत्प्रतियोगिका तन्निरूपिता कारणता आत्ममनोयोगादिनिष्ठा तद्भिन्ना या कारणता गुणदोषनिष्ठा तत्प्रतियोगिककार्यतावच्छेदकमित्युक्तौ पक्षे गुणजन्यतावच्छेदकत्वेन दृष्टान्ते दोषजन्यतावच्छेदकत्वेन साध्यसिद्धिः । अन्यथा बाधादिति भावः । हेतावनित्यज्ञानत्वे व्यभिचारनिरासाय व्याप्यान्तं धर्मविशेषणम् । अभेदेपि व्याप्यत्वमिति पक्षे तु न्यूनवृत्तित्वं व्याप्यत्वं बोध्यम् । अनित्यघटज्ञानत्वादौ तद्वारणाय विशेष्यम् ।। **बाधकं विनेति ।।** अवच्छेदकान्तरोपपन्नकार्यताश्रयवृत्तित्वं वा स्वावच्छिन्नकार्यताप्रतियोगिककारणासम्भवो वा एकव्यक्तिकत्वं वा गौरवं वेत्यादि यत्कार्यतावच्छेदकत्वे बाधकं तद् विनेत्यर्थः ।। **अप्रमात्ववदिति ।।** तत्र बाधकचतुष्टयस्याप्यभावाद्धेतुसाध्ये व्यक्ते इति भावः ।

तर्कताण्डवम्

न च विशेष्यासिद्धिः । अनित्यप्रमात्वं कार्यतावच्छेदकं बाधकं विना कार्यमात्रवृत्तिधर्मत्वात् अप्रमात्ववदित्यनेन तत्सिद्धेः । नीलघटत्वादौ प्रत्येकानुगतप्रयोजकद्वयादेव नीलरूपघटत्वयोः सिद्ध्या समाजस्यार्थिकत्वं बाधकम् । जन्यघटज्ञानत्वादौ तु स्वावच्छिन्नकार्यत्वप्रतियोगिककारणासम्भवो बाधक इति न तत्र व्यभिचार इति चेन्मैवम् । घटज्ञान इव वक्ष्यमाणरीत्याऽनित्यप्रमामात्रेप्यनुगतगुणाभावेनानुमानद्वयेपि बाधात् । द्वितीये विशेषणासिद्धेश्च । बाधकराहित्यस्यैव हेतुत्वसम्भवे व्यर्थविशेष्यत्वाच्च । साधकाभावेन

सत्प्रतिपक्षत्वाच्च । अप्रमामात्रानुगतदोषाभावेन दृष्टान्तस्य साध्य-साधनवैकल्याच्च ।

ननु प्रमाविशेषहेतूनां भूयोऽवयवेन्द्रियसन्निकर्षादीनां प्रमामात्रे सन्निकर्षत्वादिनाऽननुगमेपि गुणत्वेनानुगतिरस्तीति कथं बाध इति चेन्न । गुणत्वस्याजातित्वेन प्रमामात्रजनकत्वरूपतयान्योन्याश्रयात् ।

एतदप्युक्तं ''प्रामाण्यं च स्वत एव अन्यथानवस्थानात्'' इति । उत्पद्यत इति शेषः । ज्ञानात्मिकाया भ्रमेपि धर्म्यंशेऽनुवृत्तायाश्च प्रमायाः ज्ञानहेत्वजन्यहेतुजन्यत्वादिति साधने घटादिवदज्ञानत्वाद्या-पत्त्या प्रमा ज्ञानं घटस्तु नेत्यादिव्यवस्थाऽयोगादित्यर्थः ।

युक्तिरत्नाकरः

।। **बाधकं विनेति** ।। नन्वत्र बाधकाभावादित्येवालम् । ज्ञानत्वादौ नित्यवृत्तित्वस्यैव कार्यतावच्छेदकत्वे बाधकत्वे चानैकान्त्यवारणादिति चेत् नात्रबाधकसामान्यबाधकाभावो विवक्षितः । किंत्ववच्छेदकान्तरोपपन्न-कार्यताश्रयवृत्तित्वं स्वावच्छिन्नकार्यताप्रतियोगिकैककारणसम्भवः । एकव्यक्तिकं गौरवं चेति तद्बाधकचतुष्टयं तदभाव एव एवं च न विशेष्य-वैय्यर्थ्यमिति भावः । अत्र च नीलघटत्वे व्यवसायाद्यंविशेषणं तत्र नीलघटत्वरूपावच्छेदकान्नोपपन्नकार्यताश्रयवृत्तित्वरूपबाधकसत्वादित्याह ।। **नीलघटत्वादाविति** ।। **आर्थिकत्वमिति** ।। अवच्छेदकान्तरोपपन्न-कार्यताश्रयवृत्तित्वमित्यर्थः ।

नन्वेवं घटत्ववद्विशेष्यकत्वे सति घटत्वप्रकारकत्वरूपप्रामाण्यस्यापि स्वघटकीभूतदार्ढ्यद्वयावच्छिन्नद्रव्यत्वप्रकारकत्वप्रयोजकसामग्र्या च निरूपिते तदाश्रयवृत्तित्वरूपबाधकत्वेनासिद्धेरिति चेत् । न हि घटत्ववद्विशेष्यकत्वे

सति घटत्वप्रकारकत्वं [१]प्रामाण्ये घटपटयोः पटघटाविति भ्रमेतिव्याप्तेः । किन्तु घटत्ववद्विशेष्यकत्वावच्छेदेन घटत्व[२]प्रकारकत्वम् रूपम् । तच्च न प्रामाण्यघटकघटत्वप्राकारकत्वादिरूपधर्मद्वयप्रयोजकसामग्रीद्वयमात्रप्रयोज्य-पटघटयोः घटपटादावित्यादावपि प्रमात्वापातात् । किन्त्वतिरिक्त-सामग्रीद्वयमात्रप्रयोज्येति नासिद्धिः ।

नन्वेवं ज्ञानत्वस्यानित्यज्ञानत्वरूपावच्छेदकान्तरोपपन्नकार्यताश्रय-वृत्तित्वेन तत एव तत्रानैकान्त्यवारणायेति विशेष्यवैय्यर्थ्यमिति चेत् । अवच्छेदकान्तरोपपन्नं कार्यताश्रयवृत्तीत्यनेन तदाश्रयमात्रवृत्तित्वस्योक्ततया ज्ञानत्वस्य च तदाश्रयान्येश्वरज्ञानवृत्तितयोक्ताद्यबाधकाभावसत्वेन तत्र व्यवसायविशेषसार्थक्यात् ।

नन्वेवमनित्यप्रमात्वे अनित्यज्ञानत्वरूपवच्छेदकान्तरोपपन्नकार्यताश्रय एव सत्वादुक्तबाधकाभावोसिद्धः । नचोक्तबाधकाभावे सतीत्यनेन तादृशकार्यताद्वयव्याप्यत्वबाधकाभाव एवोक्तः अनित्यप्रमात्वस्या-नित्यज्ञानत्वावच्छिन्नकार्यताव्याप्यत्वेपि तादृशकार्यताद्वयव्याप्यत्वसत्त्वा-भावान्नासिद्धिः । नीलघटत्वे तु नलीत्वावच्छिन्नघटत्वावच्छिन्नकार्यद्वय-व्याप्यत्वसत्वान्न व्यभिचारोपीति वाच्यम् । एवं ह्यनित्यप्रमात्वेऽपि जन्यत्वानित्यज्ञानत्वोभयावच्छिन्नकार्यताद्वयव्याप्यत्वसत्वेनासिद्धिस्स्यादिति चेत् । न स्वघटकानेकावच्छेदकोपपन्नकार्यताव्याप्यत्वाभावस्य तदर्थत्वान्ना-सिध्यनैकान्त्ये । यद्वोक्तकार्यताद्वयं व्याप्यव्यापकभावानापन्नं विवक्षितम् । एवं च जन्यत्वावच्छिन्नकार्यता नित्यज्ञानत्वावच्छिन्नकार्यतां प्रति व्यापकै-वेति नासिद्धिः ।

नीलघटत्वावच्छिन्नेतु कार्यते व्याप्यव्यापकभावापन्ने इति नानैकान्त्यम्

---

१. "प्रामाण्यं" इति स्यात् । २. "प्रकारकत्वरूपं" इति स्यात् ।

चेति घटानित्यज्ञानत्वं तद्धारणाय स्वावच्छिन्नत्यादि द्वितीयबाधकाभावो विशेषणमित्याह ।। **जन्येति** ।। न च स्वावच्छिन्नकार्यताप्रतियोगिकैक-कारणस्य सिध्यसिद्धव्याहतिः स्वावच्छिन्नकार्यत्वनिरूपितसम्भवदेककारण-तान्यत्वस्य तदर्थत्वात् सपक्षस्यान्योन्याभावप्रतियोगविशेषणत्वेनोक्तदोषा-भावात् । न चाज्ञानत्वेस्वावच्छिन्नकार्यत्वाभावेनोक्तबाधकसत्वादेवाव्यभिचारे विशेष्यवैय्यर्थ्यम् । स्वावच्छिन्नत्वस्य कार्यताविशेषणत्वे स्वाधिकरण-सकलकार्यवृत्तिकार्यतालाभेन ज्ञानत्वे स्वाश्रयास्मदादिसकलज्ञानवृत्तिकार्यता-निरूपितकारणसम्भवेनोक्ते बाधकाभावसम्भवे न तत्रव्यवसायप्रविशेष-सार्थक्यादिति भावः इदमुपलक्षणम् । तत्र घटात्वादौ कम्बुग्रीवत्वादौ चाभिप्राय तृतीयचतुर्थबाधकाभावादिति विशेषणमित्यपि बोध्यम् नत्वेकव्यक्तिवृत्तित्वात् घटादेरपि प्रागभावजन्यतावच्छेदकत्वे साध्यसत्वा-त्तृतीयविशेषणं व्यर्थम् । न च तस्यैकव्यक्तित्वेनाननुगमाप्रसक्त्यावच्छेदका-नपेक्षेति वाच्यम् । अनुगमार्थं तदनपेक्षे परविष्टव्याप्तेः ससम्बन्धिकत्वेन तत्प्रत्यक्षत्वस्य ससम्बन्धितावच्छेदकज्ञानसाध्यतया तेन रूपेण तदपेक्षावश्यम्भावादिति चेत् जातिः शक्तेति मते व्यक्तिः शक्तेतिमते घटत्वादिपदे निर्विकल्पकोपस्थितायां तस्यां शक्तिग्रहायोगेन शक्तिग्रहार्थं व्यक्तिरूपावच्छेदकग्रहापेक्षणेति तस्या एकत्वेनानुगमार्थं व्यक्तेरवच्छेदक-त्वेनापेक्षावत् प्रकृतेऽपि अनुगमार्थं तदपेक्षाया अभावात् । अनुगमार्थ-मपेक्षितस्यैव कार्यतावच्छेदकत्वात् । अन्यथाकाशादिनिष्ठशब्दादिकारणताया-मप्यवच्छेदकापेक्षायामप्रसिद्धानापातादित्याहुः । घटज्ञाने घटानित्यज्ञाने वेत्यर्थः ।

।। **द्वितीय इति** ।। वक्ष्यमाणरीत्या [१]प्रमात्रेनुगतगुणाभावेन स्वावच्छिन्न-कार्यताप्रतियोगिकैककारणासम्भवरूपबाधकसद्भावेन तदभावोसिद्ध इत्यर्थः ।

---

१. "प्रमामात्र" इति स्यात् ।

।। **बाधकाराहित्यस्येति** ।। बाधकसामान्याभावस्यैव हेतुत्वसम्भवे विशेषसार्थक्यानि गुरुशरीरानेकविशेषाभावोपादानायोगादिति भावः । न च बाधकसामान्याभावस्य कार्यतावच्छेदकत्वरूपसाध्यसिद्धेः प्रागनिश्चय इति वाच्यम् । कार्यतावृत्तिरूपविशेष्येण नित्यवृत्तित्वरूपबाधकाभावस्यापि सङ्गृहीततया तदुपात्तसाधकबाधकं चा का.....भावस्य न यावद्विशेषाभावरूपतया तदा तत्रैव व्यभिचारापत्या त्वदुक्तहेतोरप्यसाधकत्वापत्तेः ।

यद्वा ज्ञानत्वेऽपि स्वावच्छिन्नकार्यताप्रतियोगिकाकारणासम्भवरूपबाधकाभावसत्वेन तत्र व्यभिचार[1]प्रसक्त्या विशेष्यवैय्यर्थ्यादित्यर्थः । स्वावच्छिन्नेत्यादेः स्वाश्रययावत्कार्यवृत्तीत्यादिविशेषणान्तरप्रक्षेपेण व्यभिचारसम्पातविशेष्योपादानस्यातिगोरवकत्वादिति भावः ।

।। **दृष्टान्तस्येति** ।। अनुमानद्वयेपीत्यनुवर्तते । अनुगतदोषा सम्भवेनाद्यहेतौ कार्यतावच्छेदकत्वस्य द्वितीयहेतौ कार्यत्वादिबाधकाभावस्य सम्भवेन साधनवैकल्यमिति भावः ।। **कथं बाध इति** ।। इदमुपलक्षणम् पीतादिदोषाणामपि दोषत्वेनानुगततया दृष्टान्तेन साध्यसाधनवैकल्यमित्यपि बोध्यम् ।। **अजातित्वेनेति** ।। संयोगत्वज्ञानत्वादिना संकरात्तेरिति भावः ।। **प्रमामात्रेति** ।। पित्तादेः स्वसाक्षात्कारजनकत्वेन मात्रेति । न च गुणस्यान्ततः स्वध्वंसादिहेतुत्वादप्रसिद्धिः । अनित्यप्रमात्वावच्छिन्नाकार्यतानिरूपिता कारणताश्रयत्वस्य तदर्थत्वात् एवं चानित्यप्रमात्वस्य कार्यतावच्छेदकत्वसिद्धौ उक्तगुणसिद्धिः तत्सिद्धौ तस्य कार्यतावच्छेदकत्वसिद्धिरित्यन्योन्याश्रय इत्यर्थः । इदमुपलक्षणम् । दोषत्वस्याप्येवमेव निर्वक्तव्यत्वेनान्योन्याश्रय इत्यपि बोध्यम् ।

।। **प्रामाण्यं चेति** ।। यद्यपि प्रामाण्यज्ञप्तौ परतस्त्वपरतया टीकाकारैरिदं

---

१. "अप्रसक्त्या" इति स्यात् ।

वारयितुं योजितम् । युक्तम् चोत्तरवाक्यपर्यालोचनया तथापि वेदस्य वाक्यत्वेन पौरुषेयत्वेपरेणोक्ते तत्र चाप्रयोजकत्वे भगवत्पादैर्निरूपिते यदि वेदः पौरुषेयो न स्यात् तदाप्तिमूलकत्वलिङ्गज्ञानात् तत्प्रामाण्यज्ञानमेव न स्यादिति विपक्षबाधकर्तशङ्कायामिव वेदस्य यदिपौरुषेयत्वं न स्यात् वक्तव्यार्थयथार्थज्ञानलक्षणगुणजन्यत्वाभावात् प्रामाण्यमेव तस्य न स्यादिति विपक्षबाधकशङ्कायामपि प्रामाण्यस्योत्पत्तौ स्वतस्त्वात् । गुणाभावेप्युपपन्नं तत्प्रमाण्यमतो प्रयोजकतैवेति वक्तुमस्यवाक्यस्य प्रवृत्तिसम्भवात् । इत्थं योजितमिति बोध्यम् । उत्पद्यत इति स्वीयवाचिशब्देन स्वाश्रयज्ञानलाभादेव कारणव्यवस्छेदलाभात् स्वाश्रयवृत्तिधर्मावच्छिन्नकार्यतानिरूपितकारण-ताश्रयातिरिक्ताप्रयोज्यत्वमुत्पत्तौ स्वतस्तवमित्यर्थः । एवं च नेश्वरसाक्षि-ज्ञानप्रामाण्ये तदनुपपत्तिः । यदितु प्रमामात्रे नानुगतोगुणः किन्त्व-नित्यप्रयक्षप्रमात्वादिकमेवगुणजन्यतावच्छेदकमिति मतं तदाकारणताश्रयः तदा तादृशकारणताश्रयातिरिक्ताप्रयोज्यधर्मव्यापकत्वं तदिति नैतन्मते-नित्यप्रमात्वे सिद्धसाधनम् । अभेदेऽपि व्याप्यव्यापकभावान्न चाक्षुष-प्रमात्वादावपि सिद्धसाधनमिति भावः । ज्ञाननित्यताया इत्यत्र साधन इत्येतदर्थं भगवत्पादगतान्यथाशब्दार्थप्रदर्शनपरम् यत्रापि पद क्रमाद-प्रमाव्यावृत्तहेतुजन्यत्वं अप्रमानुव्यावृत्तत्वं अप्रमाप्रामुव्यावृत्ता घटस्तु चेति च गृह्यते ततश्चभ्रमे धर्म्यंशानुवृत्ताया प्रमाया अप्रमाव्यावृत्तहेतुजन्यत्वसाधने घटादिवत् भ्रमाननुवृत्तत्वापत्या प्रमाभ्रमवृत्ता घटस्तु नेति व्यवस्था नस्यादित्यर्थः ।

।। इति उत्पत्तौ परतस्त्वे चिरन्तनानुमानभङ्गः ।। १० ।।

न्यायदीपः

हेतौ विशेषणकृत्यं **मण्युक्तमेव** दूषणज्ञानसौकर्यायाह ।। **नीलेति** ।।

प्रयोजकद्वयादिति ।। घटत्वप्रयोजकान्नीलत्वप्रयोजकाच्चेत्यर्थः ।। **समाजस्य** ।। घटत्वनीलत्वयोर्मेलनस्येत्यर्थः ।। **आर्थिकत्वमिति** ।। घटत्वनीलत्वरूपावच्छेदकान्तरोपपन्नकार्यताश्रयवृत्तित्वमित्यर्थः ।। **स्वेति** ।। स्वावच्छिन्नं यत्कार्यत्वं तन्निरूपितानुगतैककारणासम्भव इत्यर्थः ।। **घटज्ञान इवेति** ।। जन्यघटज्ञान इवेत्यर्थः ।। **विशेषणेति** ।। स्वावच्छिन्नकार्यत्व-प्रतियोगिकैककारणासम्भवरूपबाधकस्यैव सत्वेन बाधकं विनेत्यस्यासिद्धे-रित्यर्थः ।। **व्यर्थेति** ।। ज्ञानत्वादौ नित्यवृत्तित्वबाधकभावेनैव व्यभिचार-निरासादिति भावः । न च बाधकं विनेत्यत्र प्रागुक्तबाधकचतुष्टयमेव बाधकपदेन विवक्षितम् । अतो ज्ञानत्वादौ व्यभिचारनिरासाय विशेष्यमिति वाच्यम् । सामान्यशब्दस्य विशेषपरत्वमुपेत्य विशेष्यकृत्योक्तेरयुक्तत्वादिति भावः ।

।। **साधकेति** ।। अनुगतकारणतावच्छेदकेन हि कार्यतावच्छेदक-मुपेयम् । प्रकृते चानुगतकारणं नेति वक्ष्यमाणत्वादिति भावः ।। **दृष्टान्त-स्येति** ।। अनुमानद्वयेपीत्यनुकर्षः । अनुगतदोषाभावेनाद्यहेतौ कार्यता-वच्छेदकत्वस्य द्वितीये स्वावच्छिन्नकार्यतेत्यादिबाधकाभावस्य चाभावेन साधनवैकल्यम् । अनुगतकारणाभावेन साध्यवैकल्यं चेत्यर्थः ।। **अजाति-त्वेनेति** ।। संयोगत्वज्ञानत्वादिना साङ्कर्यादिति भावः । एतेन दृष्टान्ते भ्रमहेतूनां दोषत्वेनानुगमोपि प्रत्युक्तः ।। **अन्योन्याश्रयादिति** ।। अनित्यप्रमात्वस्य कार्यतावच्छेदकत्वसिद्धावुक्तरूपगुणत्वसिद्धिः । तत्सिद्धौ च तत्सिद्धिरित्यन्योन्याश्रयादित्यर्थः ।। **चिरन्तनानुमानभङ्गः** ।। **उदयनोक्तानुमानस्यैव मणिकृता** परिष्कृतत्वेन नूतनानुमानाकरणात्तद्भङ्गेन **मण्युक्तानुमानभङ्गोपीति** चिरन्तनेत्येवोक्तम् ।

।। इति उत्पत्तौ परतस्त्वे चिरन्तनानुमानभङ्गः ।। १० ।।

अनित्यप्रमामात्रानुगतगुणभङ्गः

अथ मतं ग्राह्यप्रमा वा विशेष्यनिष्ठविशेषणज्ञानं वा अविद्यमानासंसर्गाग्रहो वा गुणः प्रमामात्रेऽनुगतो हेतुः । नचात्र प्रमाणाभावः । आद्ये पक्षे विशिष्टज्ञानत्वेन विशेषणज्ञानजन्यां धारावाहिकोत्तरप्रमां प्रति विशेष्यमपि विषयीकुर्वन्त्याः पूर्वस्या ग्राह्यप्रमायाः कारणत्वे क्लृप्ते प्रमान्तरं प्रत्यपीश्वरनिष्ठाया ग्राह्यप्रमाया गुणत्वकल्पनात् ।

द्वितीयेपि विशिष्टज्ञानरूपं सामान्यं प्रति विशेषणज्ञानस्य विशेषणज्ञानत्वरूपेण सामान्येन कारणत्वे "यत्सामान्ययोः कार्यकारणभावो बाधकाभावे सति तद्विशेषयोरपि सः" इति न्यायेन विशिष्टप्रमां प्रति विशेष्यनिष्ठविशेषणज्ञानत्वेन कारणत्वकल्पनात् ।

तृतीयेपि संसर्गग्रहसामान्यं प्रत्यसंसर्गाग्राहमात्रस्य कारणत्वेन तद्विशेषस्याविद्यमानासंसर्गाग्रहस्य संसर्गप्रमां प्रति कारणत्वकल्पनात् इति ।

मैवम् । आद्यपक्षे धारावाहिकपूर्वप्रमायां ग्राह्यप्रमात्वे सत्यपि तस्या विशेषणज्ञानत्वेनैव कारणतया ग्राह्यप्रमात्वेन तदभावात् । तत्र तस्याः समानाधिकरणाया एव कारणत्वकृप्त्या प्रमान्तरेपि समानाधिकरणाया एव तत्कल्पनाप्रसङ्गाच्च ।

ईश्वरज्ञानस्य भ्रमं प्रतीवोपादानसाक्षात्कारतयैव कारणत्वस्य क्लृप्तत्त्वेन ग्राह्यप्रमात्वेन कारणत्वकल्पनस्य प्रामाण्यपरतस्त्वनिश्चयाधीनत्वेनान्योन्याश्रयाच्च ।

लिङ्गाभासविप्रलम्भकवाक्यजन्ययोर्यादृच्छिकसंवादेन प्रमयो-

स्त्वदुक्तव्यधिकरणगुणजन्यत्ववत् समानाधिकरणदोषजन्यत्वस्यापि सत्वेनाप्रामाण्यस्याप्यापाताच्च ।

युक्तिरत्नाकरः

।। **ग्राह्येति** ।। यद्यपि ग्राह्यत्वशब्देन विशेषणतयात्रोक्तौ भ्रमसाधारण्यं विशेषणविशेष्यं वैशिष्ट्योक्तौ निर्विकल्पकप्रत्ययप्रयोजकत्वेन तेन रूपेण हेतुतेति न तत्साधारण्यम् । तथापि यत्र ज्ञाने तद्द्वितीयः तत्प्रमात्वेन हेतुतेति भावः । निर्विकल्पकप्रमाप्रमाबहिर्भूतमितिमतेन पक्षद्वयमाह ।। **विशेष्येति** ।। विशेष्यसम्बन्धेत्यर्थः । एवं चाकाशे शब्द इत्यादौ नानुपपत्तिः । अविद्यमानत्वसंसर्गविशेषणम् विशेष्यमपीति विशेष्ये विशेषवैशिष्ट्यमित्यर्थः । एतच्च ग्राह्यत्वप्रमात्वोपपादकं कारणत्वेग्राह्यप्रमात्वे कारणत्वे सामानाधिकरण्येनापि हेतुत्वे गौरवादिति भावः ।

।। **तदभावादिति** ।। ग्राह्यप्रमात्वस्य विशेषणज्ञानविशेषणत्वाभावेन यत्सामायोन्ययोरिति न्यायप्रवृत्त्या हेतुत्वकल्पकत्वादिति भावः । यदि च तत्र हेतुभूतमानग्राह्यत्वं प्रमात्वं दृष्टमित्येतावता तेनापि रूपेण हेतुता तदा सामानाधिकरण्यमपि दृष्टमिति तेनापि तद्धेतुतास्यादित्यत्राह ।। **तत्रेति** ।। धारावाहिकस्थले जनकज्ञाने जन्यधीसामानाधिकरण्यं दृष्टमितितेन रूपेण हेतुत्वापत्येत्यर्थः ।। [१]**क्लृप्ततयेति** ।। न च प्रमायां गुणजन्यसाधनस्येश्वरसिध्यर्थतया इतः पूर्वं तदसिध्यातज्ज्ञानस्योपादानसाक्षात्कारत्वेन हेतुता चापि अक्लृप्तेति वाच्यम् । कार्यत्वलिङ्गेनोपादानसाक्षात्कारत्वेनापि तत्सिद्धिसम्भवात् । एवं च प्रमात्वस्य गुणजन्यतावच्छेदकत्वरूपपरतस्त्वसिद्धौ तदनुरोधेन ग्राह्यप्रमात्वस्य हेतुतावच्छेदकत्वसिद्धिः तत्सिद्धौ चानुगतगुणसम्भवात् परतसत्वसिद्धिरित्यन्योन्याश्रय इत्यर्थः ।। **लिङ्गा-**

१. "क्लृप्येति" इति स्यात् ।

भासेति ।। धूलीपटले धूमभ्रमेण वा पर्वतवृत्तिद्रव्यत्वादौ वह्निव्याप्तिभ्रमेण वा वस्तुतो वह्निमति पर्वते यत्र वह्न्यनुमितिर्यत्र वा घटवति घटाभाव-भ्रमवद्विप्रलम्भकोदीरिते गेहे घटो नास्तीतिवाक्येन शाब्दधीस्तत्रोभयत्रेत्यर्थः ।

न्यायदीपः

यदुक्तमनुगतगुणाभावेनानुमानद्वये बाधादित्यादि तन्नेति भावेनानुगतगुण-माशङ्क्य निराह ।। **अथेति** ।। यद्यपि ''प्रमामात्रे नानुगतो गुण'' इत्येवोक्तं **मणौ** तथापि **पक्षधरप्रगल्भा**दिव्याख्यातृभिरनुगतगुणस्योक्तत्वात्तन्मता-शङ्केयम् ।। **ग्राह्येति** ।। येन यद्ग्राह्यं तत्र तत्प्रमा हेतुरित्यर्थः ।। **विशेष्य-निष्ठेति** ।। विशेष्यसम्बद्धेत्यर्थः । तेनाकाशे शब्द इत्यादौ न दोषः । अविद्यमानो योऽसंसर्गः धर्मिधर्मसम्बन्धाभावः तदग्रह इति तृतीयपक्षार्थः । मतत्रयेपि क्रमेण युक्तीराह ।। **आद्येत्यादिना** ।। **प्रमान्तरं प्रतीति** ।। अनुभवं प्रतीत्यर्थः ।। **विशिष्टेति** ।। जन्यविशिष्टज्ञानेत्यर्थः ।। **तदभावा-दिति** ।। कारणत्वाभावादित्यर्थः । ग्राह्यप्रमात्वेनैव कारणत्वमित्यत्र कल्पकाभावादिति भावः ।

न च शाब्दप्रमायां ग्राह्यविशेषस्य [1]वाक्यार्थस्य प्रमाहेतुरिति प्रमासामान्ये ग्राह्यप्रमासामान्यं हेतुरिति वाच्यम् । तथापि ग्राह्यप्रमामात्रस्यातिप्रसक्ततया तद्ग्राह्यप्रमायां तद्ग्राह्यप्रमाहेतुरित्यननुगम एवेत्यनुगतगुणालाभात् । अप्रमात्वे दृष्टान्ते साध्यवैकल्यस्यैवमप्यपरिहाराच्चेति भावः ।

नन्वस्तु विशेषणज्ञानत्वेनैव हेतुतेत्यत आह ।। **तत्रेति** ।। यद्वा ग्राह्यप्रमात्वेन तत्र कारणत्वेपि न सर्वत्रानुगतगुणलाभ इत्याह ।। **तत्रेति** ।। उक्तिविशिष्टप्रमायां तस्याः विशेषणप्रमात्वेन हेतुभूतपूर्वप्रमाया इत्यर्थः ।। **क्लृप्येति** ।। अन्यथातिप्रसङ्गान्निर्विकल्पकानादरापत्तेश्चेति भावः ।

१. 'पदार्थस्य' इति स्यात् ।

नन्वीश्वरज्ञानस्य प्रकारान्तरेण हेतुत्वाक्लृप्तेर्वा[1] प्रमात्वस्य गुणप्रयोज्यत्वान्यथानुपपत्त्यैवैतत्कल्प्यत इत्यत आह ।। **ईश्वरेति** ।। **यादृच्छिकेति** ।। यादृच्छिसंवादेन हेतुनावगतप्रमात्वयोरित्यर्थः ।। **अप्रामाण्यस्येति** ।। नचायं दोषः सिद्धान्तेऽपीति वाच्यम् । विषयसत्त्वाभावविशिष्टस्यैव दोषस्याप्रमाहेतुत्वात् । नचैवं परमते युक्तम् । उक्तरूपदोषाभावादेव प्रमात्वोपपत्तौ गुणस्य हेतुतानापत्तेरिति भावः ।

तर्कताण्डवम्

धारावाहिके भ्रमे पूर्वस्य भ्रमस्योत्तरभ्रमं प्रति त्वदुक्तरीत्या ग्राह्यभ्रमत्वेन कारणत्वे क्लृप्ते भ्रमान्तरेपि ग्राह्यभ्रमः कारणत्वेन कल्प्यः । स एव च भ्रममात्रेऽनुगतो दोषः । एवं च संवादिशुकादिवाक्यमूलत्वेन नित्यप्रमावद्विसंवादिशुकादिवाक्यमूलत्वेन नित्यभ्रमोऽपि सिद्ध्येदित्यतिप्रसङ्गाच्च ।

आद्यद्वितीययोर्विशिष्टज्ञानं प्रति विशेषणज्ञानकारणत्वस्यैव मां प्रत्यसिद्धेश्च । वक्ष्यते चैतन्निर्विकल्पकभङ्गे । द्वितीयतृतीययोर्निर्विकल्पकरूपप्रमाननुगमाच्च ।

ननु निर्विकल्पकेप्यविद्यमानस्यासंसर्गस्याग्रहोऽस्त्येवेति चेन्न । असंसर्गाग्रहस्यासंसर्गग्रहरूपो यः संसर्गग्रहप्रतिबन्धकः तदभावतया संसर्गग्रह एव हेतुत्वात् ।

न च निर्विकल्पकं प्रमाऽप्रमाबहिर्भूतम् । तथापि निर्विकल्पकस्य गुणाजन्यत्वेप्यप्रमावैजात्यवत्प्रमाया अपि तदुपपत्तेः । तृतीयेऽविद्यमानासंसर्गशब्देनोक्तस्य विद्यमानसंसर्गस्य योऽयमग्रहस्तस्य

---

१. 'वा' इति न स्यात् ।

धारावाहिकद्वितीयादिप्रमाननुगमाच्च । अविद्यमानासंसर्गस्य संसर्गरूपतया तदग्रहस्य असंसर्गाग्रहविशेषत्वाभावाच्च ।

युक्तिरत्नाकरः

।। **दोषेति** ।। न च दोषत्वस्य फलबलकल्प्यतया तत्र विप्रलम्भकस्य दोषतैवेति वाच्यम् विप्रलम्भस्याव्यभिचारेण विप्रलम्भवत्वेनैव दोषकृप्या तत्रापि स्वतस्त्वेन भ्रमत्वावश्यम्भावात् । न च भ्रमसामानाधिकरणविप्रलम्भत्वेनैव दोषता तथैव सर्वत्र दर्शनादिति वाच्यम् । यत्किञ्चिद्भ्रमसानाधिकरण्यस्यासम्भवेन प्रकृतवाक्यार्थप्रयोगहेतुभ्रमसामानाधिकरण्यस्य चात्रापि सत्वात् । नचैवं सिद्धान्तेऽपि दोषसत्वात् तत्रापि प्रमात्वं दुर्वारम् । विषयसत्वाभावविशिष्टदोषस्यैव प्रमाजनकत्वेन प्रकृतवाक्यार्थविरोधिभ्रमासमानाधिकरणविप्रलम्भस्यैव शाब्दप्रमाजनकत्वेन वा तत्र प्रमात्वोपपत्तेः प्रमाप्येवमस्त्विति चेत् तदुक्तदोषाभावादेव प्रमात्वोपपत्तौ गुणस्यहेतुत्वे मानाभावादित्यत्र तात्पर्यात् ।

।। **धारावाहिक इति** ।। ननु ग्राह्यभ्रमस्य धारावाहिकभ्रमस्थलेऽपि आद्यभ्रमेन अनैकान्त्यदर्शनेन कथं हेतुत्वग्रहः । ग्राह्यप्रमायास्तु कार्यत्वलिङ्गसिद्धेश्वरज्ञानस्योपस्थितस्या आद्यप्रमायामपि धारावाहिकस्थले व्यभिचाराद्धेतुत्वग्रहः सम्भवतीति चेत् भ्रमत्वस्य बाधकं विना कार्यमात्रवृत्तिधर्मत्वेन कार्यतावच्छेदकत्वेनानुगतहेतुजन्यत्वस्यावश्यकत्वेन धारावाहिकद्वितीयादिभ्रमदृष्टान्तेनाद्यभ्रमो ग्राह्यभ्रमजन्यत्वसाधने पक्षीयानेकान्त्यसंशयस्य मङ्गलस्य समाप्तिसाधकत्वसाधन इव ग्राह्यसंशयपर्यवसन्नस्याप्रतिबन्धकत्वेन हेतुत्वग्रहसम्भवात् । न च ग्राह्यभ्रमत्वस्य कार्येपि सत्वान्नहेतुतावच्छेदकत्वम् । ग्राह्यप्रमात्वेपि तौल्यात् । यदि च कार्यभूतविशिष्टज्ञानवृत्तिविशेषणज्ञानस्य हेतुतावच्छेदकत्वदर्शनात् कार्यवृत्तित्व-

मात्रस्य तदबाधकत्वादनित्यप्रमात्वस्यैव तदन्यस्य कार्यतावच्छेदकत्वान्न तत्र दोषस्तदभ्रमत्वस्य ग्राह्यभ्रमत्वान्यस्य प्रकृतेपि कार्यतावच्छेदकत्वाददोष इति सामयादिति भावः ।

।। **आद्येति** ।। इदमुपलक्षणम् । परम्परासम्बन्धे स्फटिकनिष्टलौहित्य-ज्ञाने सति साक्षात्सम्बन्धेन तद्विशेषात् ज्ञानस्य प्रमात्वाभावेन यत्र विशेष्य यस्य विशेषणस्य यत्सम्बन्धावगाहिनी या प्रमा तत्र तेन सम्बन्धेन तद्विशेषात् ज्ञानस्य प्रमात्वाभावेन यत्र विशेष्य यस्य विशेषणस्य यत्सम्बन्धावगाहिनी या प्रमा तत्र तेनसम्बन्धेन तद्विशेष्यनिष्टतद्विशेषणज्ञानं गुण इति द्वितीयेवश्यवाच्यतयाननुगमः । परैरप्यभावत्वादेः प्रागनुपस्थितस्यैव प्रकारत्वाभ्युपगमेनोक्तगुणाभावाद् व्यभिचारश्चेयमपि बोध्यम् । अयमननुगमः प्रथमतृतीययोरपि बोध्यः ।

।। **नन्विति** ।। इदमुपलक्षणम् । ईश्वरीयविशेष्यनिष्ठविशेषण-ज्ञानमस्तीत्यपि बोध्यम् ।। **असंसर्गेति** ।। निर्दिकल्पकस्य विशिष्टधीत्वेन न तत्र विशेष्यनिष्ठविशेषणज्ञानापेक्षेति भावः । निर्विकल्पकस्य प्रमाबहिर्भाव अप्रमात्वापत्या दोषजन्यत्वंस्यादिति शङ्कानिरासायाप्रमाबहिर्भावोक्तिः ।। **तदुपपत्तेरिति** ।। तथा चाप्रमात्वावैजात्याऽनुरोधेन प्रमाव्यावृत्तहेतुजन्यत्वं कल्पनेति भावः ।

।। **अविद्यमानेति** ।। यद्यप्यसंसर्गस्यापि विद्यमानत्वविशेषणेन पुरोवर्तिनिष्ठात्यन्ताभावप्रतियोगीयः संसर्गाभावस्येश्वरग्रहोपलम्भेन तथापि पुरोवर्तिनिष्ठात्यन्ताभावप्रतियोगित्वविशेषितसंसर्गाभावस्य योग्रहः सविशेषण-संसर्गविशयीकुर्वन् समानसंवित्संवेद्यतया संसर्गप्रतियोगिकाभावरूपसंसर्गमपि विषयीकरोतीत्यसंसर्गग्रहाभावो हेतुतया पर्यवस्यतीति भावेनेदं वक्ष्यमाणं च दूषणं च बोध्यम् ।

केचित्त्वविद्यमानसंसर्गेति नञो व्यत्यासेन विद्यमानसंसर्गाभावाभावरूप-संसर्ग इत्याहुः ।।

न्यायदीपः

।। **नित्यभ्रमोपीति** ।। अन्यथा प्रागुक्ताप्रमात्वदृष्टान्ते साध्यसाधन-वैकल्यापत्तेः । इतोन्यस्य अनुगतदोषस्याभावेन कार्यतावच्छेदकत्वासिद्धेरिति भावः ।। **विशेषणज्ञानकारणत्वस्यैवेति** ।। दूरे यत्सामान्ययोरिति न्यायावतार इत्येवकारार्थः । प्रामाणिकत्वेनसिद्धमित्यत आह ।। **वक्ष्यत इति** ।।

रुचिदत्तादिस्तु विशेष्यनिष्ठविशेषणज्ञानं गुण इत्ययुक्तम् । लोहितः स्फटिक इत्यादौ लौहित्यसाक्षात्सम्बन्धविषयकभ्रमे अन्वयव्यभिचारात् । लौहित्यरूपविशेषणस्य परम्परासम्बन्धेन विशेष्यनिष्ठत्वात् । न च तत्सम्बन्धविषयकप्रमायां तत्सम्बन्धेन विशेष्यवृत्ति यद्विशेषणं तज्ज्ञानत्वेन हेतुतेति वाच्यम् । एवं हि तत्सम्बन्धविषयकतद्विशेषणविशेष्यकप्रमात्वं कार्यतावच्छेदकम् । तत्सम्बन्धेन [१]तद्विशेषणज्ञानत्वं कारणतावच्छेदक-मित्यननुगम एव । किञ्च भावत्वविशिष्टप्रत्यक्षे व्यभिचारश्चेत्यदूषयत् ।

।। **अननुगमाच्चेति** ।। नन्वीश्वज्ञानमादाय द्वितीयमपि निर्विकल्पके अनुगमयितुं शक्यमिति चेन्न । तस्य साधारणहेतुत्वेन विशेषाकारेण हेतुत्वकल्पकाभावादिति भावः । तृतीयमनुगतमिति शङ्कते ।। **नन्विति** ।। अननुगमो न दोषायेति शङ्कते ।। **नचेति** ।। **बहिर्भूतमिति** ।। गुणदोषा-न्यतराजन्यत्वादिति भावः ।। **संसर्गरूपतयेति** ।। नञ्द्वयेन विद्यमानसंसर्गलाभं विना पर्यवसानाभावादिति भावः ।। **असंसर्गाग्रह-**

१. 'तद्विशेष्यवृत्ति' इति पाठान्तरम् ।

विशेषत्वाभावाच्चेति ।। तथाच यत्सामान्ययोरिति न्यायानवतारेण कथं तस्य गुणत्वलाभ इति भावः ।

तर्कताण्डवम्

किञ्चानित्यप्रमामात्रानुगतगुणाङ्गीकारे प्रमारूपानुमित्यादौ प्रमात्वस्यानित्यप्रमामात्रानुगतगुणेन अनुमितित्वशाब्दत्वादेश्च लिङ्गपरामर्शशब्दकारणकत्वादिनैवोपपत्त्या यथायथं [१]लिङ्गपरमर्शादि-प्रतिनियतगुणोक्तिर्व्यर्था ।

किञ्च परतस्त्ववादिना हि विषयसत्वनैरपेक्ष्येण स्वत एवा-प्रमाव्यावृत्तं ज्ञानसाधारणकारणादधिकं किञ्चित्कारणं प्रमायां साधनीयम् । नतु ज्ञानसाधारणकारणस्यैव विषयसत्वविशेषणेना-प्रमाव्यावृत्तिः साधनीया । स्वतस्त्ववादिनापि प्रमायां ज्ञानसाधारण-कारणस्य विषयसत्वस्य च स्वीकृतत्वेन सिद्धसाधनात् । अत एव सुधायां ''ज्ञानजनकमात्राधीनजन्मत्वं च स्वतस्त्वं'' इति मात्रशब्देन जनकान्तरमेव निषिद्धम् । न तु विषयसत्वम् । तस्यातीतादि-विषयकानुमित्यादिसाधारणत्वेन प्रामाण्यशरीरान्तर्गतत्वेन च तदजनकत्वात् ।

युक्तिरत्नाकरः

।। **गुणोक्तिरिति** ।। न च प्रमात्वसामान्यपरतस्त्वसिद्धावप्यनुमिति प्रमात्वादि तद्विशेषणपरतस्त्वार्थं तदुक्तिः । अनुमितित्वप्रमात्वाद्यवच्छेद-कान्तरोपपन्नकार्यताश्रयमात्रवृत्तित्वेन कार्यतावच्छेदकत्वस्यैव सम्भवादिति भावः । किञ्च ग्राह्यगुण इत्यत्र विषयसत्वस्य प्रमाशरीरप्रविष्टत्वाद्वितीये

१. 'सल्लिङ्गपरामर्शेति' स्यात् ।

विशेष्यनिष्ठेत्यनेनोपात्तत्वात् तृतीयेप्यविद्यमानसंसर्गेप्यनेनोक्तत्वाद्विषयसत्वं सामान्यकारणं चेति द्वयं स्वतस्तववादिनाप्यङ्गीकृतमिति तस्य परतस्त्वनिर्वाहकतया तादृशस्य चासाधनं तदर्थान्तरमित्याह ।। **किं चेति** ।। अत एवेत्येतद्विशेषणं विषयसत्वे नैरपेक्ष्येणेति अप्रमाव्यावृत्त-व्यक्तिविशेषजन्यतया सिद्धसाधनवारणाय ।। **ज्ञानेति** ।। तस्य सामान्य-धर्मावच्छिन्नकार्यताप्रतियोगिककारणताश्रयत्वान्नोक्तदोषः दोषजन्यत्वमादाय साध्यपर्यवसानं माभूदिति बाधवारणायाद्यप्रमाव्यावृत्तमिति ।। **स्वतस्त्वेति** ।।

यद्यपि ग्राह्यज्ञानविशेषणे ज्ञानयोर्नसिद्धं साधारणकारणता तथापि परेण तथा स्वीकारात् सामान्यकारणमात्रस्य च सिद्धान्तेपि स्वीकारात्तदुक्तिरिति बोध्यम् । नन्वेवं प्रमायां विषयसत्वस्यापि स्वीकारे सुधाविरोधः । तत्र ज्ञानकारणमात्राधीनेति मात्र च ज्ञानसामान्यकारणातिरिक्तस्य विषय-सत्वस्यापि विषयव्यवच्छेदादित्याह ।। **अत एवेति** ।। **मात्रशब्देनेति** ।। प्रमाण्यजन्यजन्यज्ञानसामान्यकारणमात्राधीनं नत्वप्रमायामिव तद्विशेष-कारणाधीनमिति तद्वाक्यार्थलाभादिति भावः ।

नन्वेवमपि विषयसत्वव्यवच्छेदस्यादेव तस्य सामान्यहेत्वन्यहेतुत्वात्तत्राह ।। **नत्विति** ।। **अतीतेति** ।। तदनुमित्यादेः प्रमात्वनिर्वाहाय विषय-सत्वस्यावश्यकतया तस्य चातीतादेरिदानीन्तनानुमित्यादौ हेतुत्वसम्भवा-दित्यर्थः ।। **प्रामाण्येति** ।। आत्माश्रयादित्यर्थः ।

न्यायदीपः

एवमनुगतगुणपक्षत्रयं प्रत्येकं दूषयित्वा संहत्यापि दूषयितुं ''भूयोऽवयवेन्द्रियसन्निकर्षयथार्थलिङ्गसादृश्यवाक्यार्थज्ञानानां यथायथं प्रत्येकमेव गुणत्वं'' इति **मण्युक्तं** विरुद्धं चेति भावेनाह ।। **किञ्चेति** ।।

यद्वा उक्तप्रकारत्रयेण वा प्रकारान्तरेण वा प्रमामात्रानुगतगुणस्वीकारपक्ष एव न युक्त इत्याह ।। **किञ्चेति** ।।

न च प्रमात्वानुमितित्वादिरूपकार्यतावच्छेदकबलात्तदनुगुणोनुगतगुणः कश्चित्स्वीकार्य इति शङ्क्यम् । नीलघटत्वादाविव प्रमात्वानुमितित्वादेः स्वसामग्रीमहामाहिम्नैवैकत्र समाजेनावच्छेदकान्तरोपपन्नकार्यताश्रय-वृत्तित्वरूपबाधकेन तस्य कार्यतानवच्छेदकत्वात् । अत एव प्रमात्व-स्यानुमितित्वादेश्च प्रयोजकसामग्रीसमाजस्य प्रमामात्रानुगतगुणेनेति लिङ्गपरामर्शशब्दकारणकत्वादिनेत्युक्तिः ।

पूर्वोक्तमतत्रयेपि विषयसत्वमेव गुण इति फलितमिति ''तच्चानेन साधितमित्यादिना'' वक्ष्यन् विषयसत्त्वं च न गुण इत्याह ।। **किञ्चेति** ।। **अप्रमेति** ।। अप्रमाकारणव्यावृत्तमित्यर्थः । ज्ञानसाधारणकारणस्येति पररीत्योक्तिः । स्वमते ग्राह्यज्ञानविशेषणज्ञानयोरहेतुत्वादिति ज्ञेयम् ।। **अप्रमेति** ।। अप्रमाकारणव्यावृत्तिः ।। **अत एवेति** ।। विषयसत्वस्यानुमत-त्वादेवेत्यर्थः ।। **सुधायां** ।। जिज्ञासाधिकरणसुधायामित्यर्थः ।

ननु विषयसत्वस्यापि प्रमाजनकतया जनकान्तरनिषेधे विषयसत्वमपि सुधायां निषिद्धमेव । अतस्तदनुप्रवेशे सति न सिद्धसाधनमित्यत आह ।। **तस्येति** ।। विषयसत्वस्येत्यर्थः ।। **अतीतेति** ।। अनुमित्यादिप्रामाण्याय पूर्वं तत्र विषयसत्वस्य वाच्यतया तस्येदानीन्तनानुमित्यजनकत्वादिति भावः ।। **तदजनकत्वादिति** ।। यत्तु प्रमाणपद्धतौ साधनपदेन प्रमातृप्रमेययो-र्व्यवच्छेद इति कारणत्वमात्रमुपेत्य साधकतमत्वाभाववचनं तदभ्युपेत्य-वादेनेति भावः ।

तर्कताण्डवम्

एतेन यादृच्छिकसंवादेन प्रमायां लिङ्गाभासेन शब्दाभासेन च जन्यायामनुमितौ शाब्दप्रतीतौ च पक्षस्य वस्तुतः साध्यवत्त्वं योग्यता च गुण इति निरस्तम् । स्पष्टयिष्यते चैतत् । तच्चानेन साधितम् । विशेषणज्ञानस्यासंसर्गाग्रहस्य च भ्रमसाधारण्यात् । विशेष्यनिष्ठ-शब्देनाविद्यमानशब्देन च विषयसत्वस्यैवोक्तेः । अन्यथा भ्रमेपि विशेष्यानिष्ठविशेषणज्ञानं विद्यमानासंसर्गाग्रहश्च प्रमाव्यावृत्तत्वाद्दोष इति तज्जन्यत्वेनैव परतस्त्वं स्यात् ।

तस्माद् भ्रमे स्वत एव प्रमाव्यावृत्तं पित्तादिकमिव प्रमायामपि स्वत एव भ्रमव्यावृत्तं भूयोऽवयवेन्द्रियसन्निकर्षादिकमधिकं वाच्यमिति किमनेन ।

एतेन अनित्यप्रमात्वं अप्रमाकरणतावच्छेदकरूपानवच्छिन्न-कारणताप्रतियोगिककार्यतावच्छेदकम् । भ्रमावृत्तिकार्यतावच्छेद-कत्वात् । घटत्ववदित्याद्यपि निरस्तम् । कार्यतावच्छेदकत्वस्यैव निरासादिति ।।

एतदुक्तं "अन्यथा" इत्यादिना । अनुगतगुणाभावेप्यनित्यप्रमा-त्वस्य कार्यतावच्छेदकत्वे घटत्वादिकं कार्यतावच्छेदकं न तु नीलघटत्वादिकमिति व्यवस्थाऽयोगादित्यर्थः ।

युक्तिरत्नाकरः

।। **एतेनेति** ।। यद्यपीदमननुगतगुणनिरासप्रस्तावे वाच्यम् । नत्विह । तथाप्युक्तदूषणातिदेशसौकर्यात्परोक्तविषयत्वघटितस्य सर्वगुणेष्वप्ये-तद्दूषणमिति ज्ञापयितुं चेहोक्तम् ।।

।। **तच्चेति** ।। विषयसत्वनैरपेक्ष्येण प्रमाव्यावृत्तज्ञानसाधारणकारणादधिकं कारणं ग्राह्यं प्रमादिगुणजन्यत्वसाधनेन न साधितमित्यर्थः ।। **विशेषणेति** ।। ग्राह्यत्वज्ञानं चार्थः ।। [१]**अविगानेति** ।। असंसर्गे अविद्यमानत्वोक्त्येत्यर्थः ।। **ग्राह्यप्रमेति** ।। प्रमाशब्देनचेति चार्थः । ज्ञानसामान्यहेतोरेव विषयसत्वविशेषितस्य गुणत्वमुपेत्य प्रामाण्यपरतस्त्वसमर्थने अप्रामाण्यमपि तदसत्वविशेषितसामान्यहेतोरेव तत्परतस्त्वप्रयोजकदोषतास्यादित्याह ।। **अन्यथेति** ।। अत्रापि ग्राह्यभ्रमश्चकारार्थः ।

यद्वा ग्राह्यप्रमागुणत्वस्यानियामकत्वेन तमुपेक्ष्य द्वितीयतृतीययेरिव तद्दूषणमिति सर्वत्र चकारोयुक्तसमुच्चयार्थ एव बोध्यः । किमनेन स्वतस्त्वं वा परतस्त्वं योगिनोक्तगुणतया ।। **प्रभेति** ।। अप्रमाकारणतया मनोदोषादि-निष्ठा तदनवच्छेदरूपं गुणनिष्ठं विशेष्यनिष्ठविशेषणज्ञानत्वादि-तदवच्छिन्नकारणनिरूपितं कार्यतावच्छेदकमिति पक्षे साध्यपर्यवसानमिति भावः । हेतावप्रमात्वे व्यवसायभ्रमवृत्तीति तच्च भ्रमनिष्ठात्यन्ताभाव-प्रतियोगित्वमतो नोक्तानैकान्त्यतादवस्थ्यम् । नित्यानित्यवृत्तिप्रमात्वादो तद्वारणाय विशेष्यम् ।। **कार्यतेति** ।। अनुगतगुणासम्भवेन कार्यतावच्छेद-कत्वस्य निस्तत्वादित्यर्थः । तथा च बाधासध्रीचीन इति भावः ।

।। **अनुगतेति** ।। प्रामाण्यं च स्वत एवोत्पद्यते न तु परत इत्येवकारेणोक्ते कार्यतावच्छेदकत्वं त्वनुरूपे साध्ये अनुगतगुणासम्भवादिति हेत्वध्याहारे तत्र चाप्रयोजकताशङ्कायामस्य प्रवृत्ततयान्यथाशब्देनोक्तपरामर्श-सिद्धिरिति भावः ।। **नीलघटत्वादिकमिति** ।। यद्यपि नीलघटत्वस्य कार्यतानवच्छेदकत्वं नानुगतकारासम्भवप्रयुक्तं तथाप्यतद्गुणसंविज्ञानबहुव्रीहिणा घटानित्यज्ञानत्वादिकमेव गृह्यत इति बोध्यम् ।।

।। इति अनित्यप्रमामात्रानुगतगुणभङ्गः ।। ११ ।।

१. "अविद्यमानेति" इति स्यात् ।

न्यायदीपः

।। **एतेनेति** ।। विषयसत्वस्य गुणत्वाभाववचनेनेत्यर्थः । वास्तव-साध्यवत्वयोग्यतयोर्विषयसत्वरूपत्वादिति भावः । कथमिदं साध्यवत्वादिकं विषयसत्वगर्भमित्यत आह ।। **स्पष्टयिष्यत इति** ।। उत्तरभङ्ग इत्यर्थः ।

नन्वस्तु विषयसत्वं न गुणः । तथापि ग्राह्यप्रमेत्याद्युक्तपक्षत्रयेपि किमागतमित्यत आह ।। **तच्चेति** ।। ज्ञानसाधरणकारणस्य विषयसत्वेन विशेषितत्वमनेन पक्षत्रयेण साधितं त्वयेत्यर्थः । कथमित्यतो व्यनक्ति ।। **विशेषणेत्यादिना** ।। विशेषणज्ञानस्येत्युक्त्या ग्राह्यज्ञानस्यापि ग्रहः प्राप्तः ।। **विशेष्यनिष्ठेति** ।। ग्राह्यप्रमेति प्रमाशब्देनेत्यपि ध्येयम् ।

परतस्त्ववादिना हीत्यादिनोक्तप्रमेयानङ्गीकारे बाधकमाह ।। **अन्यथेति** ।। स्वत एवाप्रमाव्यावृत्तस्य ज्ञानसाधारणकारणादधिकस्यानङ्गीकारे विषयसत्वेनैव परतस्त्वस्वीकार इत्यर्थः । ग्राह्यभ्रमोऽप्यत्रोपलक्ष्यः । यद्वा आद्यपक्षस्याति-फल्गुत्वाद् द्वितीयतृतीययोरेवात्र पूर्वत्र च दोषोत्कीर्तनमिति बोध्यम् ।। **स्वत एवेति** ।। विषयसत्वनैरपेक्ष्येणेत्यर्थः । एवं प्रमात्वमात्रेऽनुगत-कारणदूषणेन **मण्युक्तमनुमानान्तरमपि** निरस्तमित्याह ।। **एतेनेति** ।। **अप्रमेति** ।। अप्रमाकारणता दोषादिनिष्ठा तदनवच्छेदकं रूपं विशेष्यनिष्ठ-विशेषणज्ञानत्वादिकम् । तदवच्छिन्नकारणतानिरूपितकार्यतावच्छेदक-मित्यर्थः । दृष्टान्ते दण्डत्वादिकमेव अप्रमाकारणतानवच्छेदकरूपं बोध्यम् । हेतावप्रमात्वे व्यभिचारवारणाय भ्रमाद्यवृत्तीति । भ्रमनिष्ठात्यन्ताभाव-प्रतियोगीत्यर्थः । नित्यानित्यवृत्तिप्रमात्वादौ तन्निरासाय विशेष्यम् । आदिपदेन अनित्यरजतप्रमात्वं रजताप्रमाकारणतानवच्छेदकरूपावच्छिन्न-कारणताप्रतियोगिककार्यतावच्छेदकं रजतभ्रमावृत्तिकार्यतावच्छेदकधर्मत्वाद् घटत्ववदित्यादिग्रहः ।। **कार्यतेति** ।। अनुगतगुणनिरासेन स्वावच्छिन्न-

कार्यत्वप्रतियोगिककारणासम्भवरूपबाधकस्यैव भावेन बाधकं विना कार्यमात्र-वृत्तिधर्मत्वात् कार्यतावच्छेदकमित्यस्यासम्भवात् । तथाच बाधासिद्धी इति भावः । रजतानुमित्यादिसाधारणगुणाभावेन रजतप्रमात्वेपि न कार्यता-वच्छेदकत्वमिति ज्ञेयम् ।

।। इति अनित्यप्रमामात्रानुगतगुणभङ्गः ।। ११ ।।

यज्ञपत्युक्तवक्रानुमानभङ्गः

अथापि स्यात् । प्रमामात्रानुगतगुणाभावेपि परतस्त्वं सेत्स्यति । न ह्यनित्यप्रमात्वस्योक्तकार्यतावच्छेदकत्वं परतस्त्वम् । किन्तु तस्य स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्तित्वम् । तच्चानित्य-प्रमामात्रानुगतगुणाभावेप्यननुगतगुणैरपि सेत्स्यति ।

तत्र च प्रमाणं अनित्यप्रमात्वं स्वाश्रयमात्रवृत्तिधर्मा-वच्छिन्नकार्यताश्रयमात्रवृत्ति स्वाश्रयमात्रावृत्तिधर्मावच्छिन्नकार्यता-प्रतियोगिककारणत्वाश्रयमात्रानुत्पाद्यकार्यमात्रवृत्तिधर्मत्वात् । अप्रमात्ववदित्यनुमानम् ।

अनेन सामान्यकारणमात्रानुत्पाद्यकार्यमात्रवृत्तिधर्मत्वरूपेण हेतुना साध्यमानं विशेषकारणजन्यत्वं सर्वप्रमानुगतगुणस्य बाधितत्वे-नाननुगतगुणजन्यत्वमादाय पर्यवस्यति ।

युक्तिरत्नाकरः

एवमनुगतगुणपक्षे प्रतिक्षिप्यानुगततत्पक्षमपि प्रतिक्षेप्तुं तमाशङ्कते ।। **अथापीति** ।। **किन्त्विति** ।। स्वस्यानित्यप्रमात्वस्य य आश्रय-

स्तदितरावत्तयो ये प्रत्यक्षप्रमात्वादयस्तदवच्छिन्नकार्यताश्रय एव वर्तमानत्वमुक्तकार्यताव्याप्यत्वमिति यावत् ।

।। **तच्चेति** ।। मात्र[1]मर्थः । एवं चानित्यप्रमात्वस्य कार्यतानवच्छेदकत्वेपि तदाश्रयसर्वप्रमासु गुणजन्यतावच्छेदकधर्मत्वमेव परतस्त्वमिति भावः ।। **अनित्ये इति** ।। एतच्च बाधवारणाय । साध्यमुक्तार्थः ।। **स्वेति** ।। साध्यहेत्वोः स्वपदं समाभिव्याहृतपरम् । एवं यो वर्तते धर्मः नित्यज्ञानत्वादिः तदवच्छिन्नकार्यतानिरूपितकारणताश्रयो मनस्संयोगादिः तन्मात्रानुत्पाद्यं कार्यं अनित्यप्रमा तन्मात्रवृत्ति धर्मत्वादित्यर्थः । हेतोः अप्रयोजकतां निरस्यन् साध्यपर्यवसान प्रकारमाह ।। **अनेन इति** ।।

न्यायदीपः

यज्ञपतिमतमाशङ्कते ।। **अथापीति** ।। अथापीत्याद्युक्तमेव व्यनक्ति ।। **प्रमेति** ।। **उक्तेति** ।। अप्रमाकारणतेत्यादिनोक्तेत्यर्थः ।। **तस्येति** ।। अनित्यप्रामात्वस्येत्यर्थः ।। **स्वेति** ।। स्वस्यानित्यप्रमात्वस्य य आश्रयस्तन्मात्रवृत्तयस्तदितरावृत्तित्वे सति तद्वृत्तयो ये धर्माः जन्यप्रत्यक्षप्रमात्वादयः तदवच्छिन्नकार्यताश्रय एव वर्तमानत्वम् उक्तकार्यताश्रयत्वव्याप्यत्वमिति यावत् ।

तदुक्तमेव पञ्चमात्रानुमानमाह ।। **अनित्यप्रमात्वमिति** ।। बाधनिरासाय ।। **अनित्येति** ।। साध्यमुक्तार्थम् । साध्यहेत्वोः स्वपदं समभिव्याहृतपरम् । एवं चानित्यप्रमात्वाश्रय एव यो न वर्तते धर्मः अनित्यज्ञानत्वादिः तदवच्छिन्नकार्यतानिरूपितकारणताश्रयो मनस्संयोगादिः

---

१. "मात्रशब्दस्य कात्स्न्र्यमर्थः" इति स्यात् ।

तन्मात्रानुत्पाद्य कार्यमनित्यप्रमा तन्मात्रवृत्तिधर्मत्वादिति हेत्वर्थः । अनित्यज्ञानकारणमात्रानुत्पाद्यकार्यमात्रवृत्तिधर्मत्वादिति फलितोर्थः । हेतोरप्रयोजकतां निरस्यन् साध्यपर्यवसानप्रकारमाह ।। **अनेनेति अननुगतेति** ।। प्रत्यक्षप्रमाद्येकैकानुगतेत्यपि योज्यम् । अन्यथा जन्यप्रत्यक्षप्रमात्वादेरवच्छेदकत्वायोगेन बाधापत्तेरिति भावः ।

तर्कताण्डवम्

अत्र च साध्ये आद्यं मात्रपदं स्वतस्त्वपक्षेप्यनित्यप्रमात्वस्य स्वाधिकदेशवृत्तिनाऽनित्यज्ञानत्वेनावच्छिन्नकार्यताश्रय एव वर्तमानत्वात्सिद्धसाधनमिति शङ्कानिरासाय । द्वितीयं तु सर्वासां प्रमाणां गुणजन्यत्वसिद्ध्यर्थम् ।

हेतौ[1] प्रथममात्रपदाभावे एतद्घटपटान्यतरत्वे व्यभिचारः । घटत्वपटत्वयोः कार्यतावच्छेदकयोः एतद्घटपटान्यतरत्वादिकारणमात्रवृत्तित्वाभावेन साध्याभावत् । [2]अन्यतरत्वस्य च स्वानुगतकारणाभावेन कार्यतानवच्छेदकत्वात् ।

अतः स्वाश्रयमात्रावृत्तिधर्मावच्छिन्नकार्यत्वप्रतियोगिककारणताश्रयमात्रानुत्पाद्येति कार्यं विशेषितम् । तेनैतद्घटपटान्यान्यत्वाश्रयकार्यस्य तदुभयान्यात्वाधिकरणमात्रावृत्तिघटत्वपटत्वावच्छिन्नकार्यत्वप्रतियोगिककारणत्वाश्रयमात्रोत्पाद्यत्वेन हेत्वभावान्न व्यभिचारः ।

---

१. 'कार्यमात्रवृत्तित्वादित्येतावत्युक्ते' इति पाठान्तरम् ।

२. 'अन्यतरत्वस्य' इत्यारभ्य 'कार्यतानवच्छेदकत्वात्' इति पर्यन्तं ग्रन्थः पाठान्तरे नास्ति ।

प्रथममात्रपदाभावे हेतुस्तत्र वर्तते । अन्यतरत्वाश्रयावृत्ति-कुड्यत्वादिरूपधर्मावच्छिन्ना या कार्यता तत्प्रतियोगिककारण-त्वाश्रयीभूतं यत्कुड्यकारणं तन्मात्रानुत्पाद्ये एतद्घटपटरूपे कार्येऽ-न्यतरत्वस्य वृत्तेः । मात्रपदे दत्ते तु न व्यभिचारः । स्वाश्रयमात्रा-वृत्तिपदेनान्यतरत्वाधिकदेशवर्तिनोर्घटपटत्वयोरपि सङ्गृहीतत्वेन तदवच्छिन्नकार्यता प्रतियोगिककारणत्वाश्रयीभूतं यद्घटादिकारणं तन्मात्रोत्पद्ये घटादावप्यन्यतरत्वस्य वृत्त्या तदनुत्पाद्यकार्यमात्र-वृत्तित्वरूपहेत्वभावात् ।

युक्तिरत्नाकरः

।। स्वाधिकदेश इति ।। अनेन अत्र मात्रशब्दस्य कात्स्न्यार्थकत्वेन तदुपादाने तदाश्रये सर्वत्र वर्तमानेन अनित्यज्ञानत्वेन अनवच्छिन्नकार्यताश्रय एव अनित्यप्रमात्वात् सिद्धसाधनं स्यात् अतः व्यवच्छेदार्थकत्वं इति सूचितम् ।

ननु व्यवच्छेदार्थकत्वेऽपि सर्वज्ञानं धर्मिण्यभ्रान्तं इति न्यायेन भ्रमस्यापि स्वाश्रयतया तदितरघटादौ अनित्यज्ञानस्य अवृत्तेः सिद्धसाधनतादवस्थ्यम् । न च शुक्तौ इदं रजतमिति भ्रमानन्तरं दोषवशात् [१]न तत्ताप्रमोषेण रजतमिति भ्रमरूपस्मृतिसम्भवेन स्वाश्रयादन्यस्मिन् तत्त अनित्यज्ञानत्वसत्वात् नोक्त-दोषः इति वाच्यम् । उक्तस्मृतौ स्मृतिविशेष्यकत्वाननुभवेन सत्यरजतानुभव-मूलकत्वेन अभ्रमत्वात् ।

न च रजतविशेष्यकत्वस्यापि अनुभवेन प्रमात्वमपि नियन्तुं शक्यम् । एवमपि रजतत्वेनानुभूतमात्रविषयकत्वेन प्रमात्वात् । अनित्यज्ञानत्वस्य तदन्यावृत्तित्वात् इति चेन्न । स्वाश्रयेतरावृत्ति इत्यनेन स्वात्यन्ताभाव-

१. "न इति" न स्यात् ।

वदवृत्तित्वस्य विवक्षिततया अन्योन्याभावस्य व्याप्यवृत्तित्वेऽपि अत्यन्ताभावस्य [१]तथात्वेन अनित्यज्ञानत्वस्य प्रमात्वात्यन्ताभाववत् भ्रमवृत्तितया उक्तदोषाभावात् ।

नन्वेवमपि स्वात्यन्ताभावे प्रतियोगिव्यधिकरणविशेषणे भ्रमे तादृशात्यन्ताभावाभावात् दोषतादवस्थ्यम् । तदविशेषणे प्रत्यक्षप्रमात्वादेरपि भ्रमे धर्म्यंशे सत्वेन प्रमात्वाश्रयमात्रावृत्तित्वेन बाध इति चेन्न ।

स्वात्यान्ताभावावच्छेदेन अवृत्तित्वस्य विवक्षिततया प्रत्यक्षप्रमात्वे स्वात्यान्ताभावावच्छेदेन वृत्या उक्तबाधाभावात् । अनित्यज्ञानस्य तु तदवच्छेदेनापि सत्वेन सिद्धसाधनत्वस्याप्याभावात् इति ।

।। **द्वितीयमिति** ।। तदनुपादाने स्वाश्रयमात्रवृत्तिनिप्रत्यक्षप्रमादिष्वेकेन केनचिदवच्छिन्नकार्यताश्रये अनित्यप्रमात्वस्य वृत्याप्युक्तसाध्योपपत्त्या सर्वासुप्रमासु गुणजन्यत्वं न सिध्येदतो द्वितीय[२]मात्रचेदुपादानम् । तथा च तस्य व्यवच्छेदार्थकत्वेन स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रय एवानित्यप्रमात्वस्य वर्तमानत्वलाभादनित्यप्रमात्वाश्रये सर्वत्र गुणजन्यत्व-सिद्धिः । [३]मात्रे च क...र्थतत्वेतु स्वाश्रयमात्रवृत्त्येकानित्यप्रत्यक्षप्रमात्वा-वच्छिन्नकार्यताश्रयकृत्स्नवृत्तितयाद्युपपत्या सर्वत्र गुणजन्यत्वं नसिध्यति इति भावः । मात्रचोरुभयोरपि कास्त्न्यार्थकत्वेऽनित्यप्रमात्वस्योक्तदिशा सर्वाश्रयबुद्धावन्यज्ञानत्वावच्छिन्नकार्यताश्रयसर्वत्र सत्वात् सिद्धसाधनं स्यादत उभयोरपि व्यवच्छेदार्थत्वमेवेति ध्येयम् ।।

एतद्घटपटान्यतरत्वेन साध्याभावमुपपादयति ।। **कार्यते** ।। ययोः घटत्वपटत्वयोः कार्यतावच्छेदकत्वं न तयोश्चाश्रयमात्रयवृत्तित्वे यस्य च तद्घटपटान्यतरत्वस्य स्वाश्रयमात्रवृत्तित्वं न तस्यानुमतहेत्वभावेन कार्यता-

१. "अतथात्वेन" इति स्यात् । २. "मात्रपदोपादानं" इति स्यात् । ३. "मात्रशब्दस्य कात्स्न्यर्थकत्वे तु" इति स्यात् ।

वच्छेदकतेति साध्याभाव इति भावः । अत्र घटपटान्यतरत्वे स्वाश्रय-मात्रवृत्तिघटत्वपटत्वावच्छिन्नकार्यताश्रय एव वृत्त्या साध्यसत्वे-नानैकान्त्याप्रसक्तेरेतत्पदोपादानम् ।

न च तद्घटपटान्यतरत्वे स्वाश्रयमात्रयवृत्तिकार्यतया एवाप्रसिद्ध तद्घटित-साध्याभावोदुर्ग्रह इति वाच्यम् । स्वपस्य तादृशकार्यताश्रयमात्रवृत्तिधर्मपरत्वे च घटत्वादेरेव च तार्दृशतया तदभावस्य सुग्रहत्वात् । तत्रान्यतरत्वमेतद्घ-पदान्यतरत्वतन्मात्रानुत्पाद्येति । न च तन्मात्रानुत्पाद्यत्वं तदितरोत्पाद्यत्वे सति [1]तदुसाधनय तद्घटत्वपटान्यतरात्मके कार्ये कुड्यकारणानुत्पाद्यता-नास्तीति नानैकान्त्यमिति वाच्यम् । तन्मात्रानुत्पाद्यत्वं हि तन्मात्रो-त्पाद्यत्वाभावः तन्मात्रोत्पाद्यत्वं च तदिरानुत्पाद्यत्वे सति तदुत्पाद्यत्वम् । अत्र विशेषणाभावाद्विशिष्टाभावोस्त्येव । नचैवमपि कुड्यत्वाद्यवच्छिन्न-कार्यतानिरूपितकारणताश्रयान्यानुत्पाद्यत्वे सति तदुत्पाद्यत्वमप्रसिद्धम् कार्यमात्रस्य तादृशकारणताश्रयान्या[2] ।

न्यायदीपः

साध्ये मात्रपदद्वयं व्यवच्छेदार्थकं न तु कात्स्न्यर्थार्थकमित्युपेत्य दूषणज्ञानसौकर्याय व्यावर्त्यं व्यनक्ति ।। **अत्र चेति** ।। **द्वितीयमिति** ।। अनित्यप्रमात्वं तादृशकार्यताश्रय एव वर्त्ति न त्वन्यत्रेत्यस्य व्यवच्छेदार्थक-मात्रपदेन लाभात्तस्य जन्यप्रत्यक्षप्रमात्वानुमितित्वोपमितित्वशाब्दत्वाश्रयेषु सर्वत्र वर्तनं तेषां सर्वेषां गुणजन्यत्व एवोपपाद्यते । अन्यथा बाधात् । कात्स्न्यर्थार्थत्वे तु यत्किञ्चित्तादृशधर्मावच्छिन्नकार्यताश्रये सर्वत्र वर्तित्वोपपत्येष्टासिद्धेर्व्यवच्छेदार्थ एव द्वितीयोपीति भावः ।

---

१. "तदुत्पाद्यत्वं" इति स्यात् । २. इतः परं द्वित्रिवाक्यानि अस्पष्टानि । ततः परं ग्रन्थपातः ।

हेतावपि मात्रपदानि व्यवच्छेदार्थनीत्युपेत्यानुत्पाद्यान्तविशेषणकृत्यं वक्तुमाह ।। **हेताविति** ।। घटपटान्यतरत्वे साध्यसत्वादेतदित्युक्तम् । एतद्घटपटान्यतरत्वे साध्याभावं व्यनक्ति ।। **कार्यतेति** ।। ययोर्घटत्व-पटत्वयोः कार्यतावच्छेदकत्वं न तयोः स्वाश्रयमात्रवृत्तित्वं ततोऽधिकदेश-वृत्तित्वात् । अन्यतरत्वस्याप्यनुगतकारणाभावेन कार्यतानवच्छेदकत्वात् । एवं च स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयवृत्तित्वरूपसाध्याभावा-दित्यर्थः । एतेन प्रथममात्रपदस्यापि कृत्यमुक्तं ध्येयम् । प्रथममात्रपदं हित्वा स्वाश्रयावृत्तिधर्मावच्छिन्नेत्यादेरेवोक्तावेतद्घटपटान्यतरत्वस्य स्वाश्रयावृत्तिकुड्यत्वादिधर्मावच्छिन्नकार्यताप्रतियोगिककारणताश्रयः कुड्याद्य-साधारणकारणं तन्मात्रानुत्पाद्यं यदेतद्घटपटरूपं कार्यं तद्वृत्तित्वेन एतद्घट-पटान्यतरत्वे उक्तहेतोः सत्वेपि मूलोक्तदिशा साध्याभावेन व्यभिचारः । दत्ते तु मात्रपदे न दोषः । कुड्यत्वस्य एतद्घटपटान्यतरत्वान्यतराश्रये[1] अवृत्ति-धर्मत्वेपि तद्वृत्तित्वे सति ततोधिकदेशवृत्तित्वरूपतन्मात्रावृत्तिधर्मत्वाभावेन तत्र हेतोरेवाभवात् ।

यद्यप्यत्र विवक्षितं तन्मात्रानुत्पाद्यत्वं तदुत्पाद्यत्वे सति ततोऽधि-कोत्पाद्यत्वम् । तच्चोक्तस्थले नास्ति । एतद्घटपटान्यतरत्वे कुड्यकारणो-त्पाद्यत्वे सति ततोधिकोत्पाद्यत्वरूपतन्मात्रानुत्पाद्यत्वस्य बाधात् । तथाच हेत्वभावादेव न तत्र व्यभिचारः । तथापि तन्मात्रानुत्पाद्यत्वं तदितरानु-त्पाद्यत्वे सति तदुत्पाद्यत्वरूपतन्मात्रोत्पाद्यत्वस्याभावरूपं यत्तदनुत्पाद्यत्वं तदस्त्येवैतद्घटपटान्यतरत्वाश्रये एतद्घटपटरूपेऽर्थ इति तावन्मात्रेण तत्र हेतुसत्वमुपेत्य व्यभिचारे चोदिते मात्रपदेन तन्निरासः ।

मूले तु प्रकृताभिमततन्मात्रानुत्पाद्यत्वस्य तत्राभावात् । कुड्याद्य-

१. 'एतद्घटपटान्यतरत्वाश्रये' इति स्यात् ।

साधारणकारणेतरेश्वरज्ञानोत्पाद्यत्वेन तदितरानुत्पाद्यत्वस्याप्रसिद्ध्या तदभावस्य दुर्ग्रहत्वाच्च व्यभिचारचोदना न युक्तेत्यरुच्यैव प्रथममात्रपदस्येदं कृत्यमित्याद्यनुक्त्वा स्वाश्रयमात्रावृत्तिधर्मावच्छिन्नकार्यत्वप्रतियोगिक-कारणताश्रयमात्रानुत्पाद्येति कार्यं विशेषितमित्येवोक्तम् ।

केचित्तु प्रथममात्रपदाभावे इत्यादिः प्रथममात्रपदकृत्यपरतयापि पाठ उपलभ्यत इति पक्षे तु तन्मात्रानुत्पाद्येत्यस्य तदितरानुत्पाद्यत्वविशिष्ट-तदुत्पाद्यत्वाभाववत्वरूपतन्मात्रानुत्पाद्यार्थकत्वेपि इहाप्रसिद्धिनिरासाय तदितरानुत्पाद्यत्वमात्रं विवक्षणीयम् । तच्च गगनादौ प्रसिद्धमिति तदभाव एतद्घटपटान्यतरत्वाश्रयकार्ये ग्रहीतुं शक्य इति व्यभिचारचोदनोपपाद्या । असिद्धिरप्रसिद्धिः । तथाच नासिद्धिवारकत्वं दोष इत्याहुः ।

तर्कताण्डवम्

द्वितीयमात्रपदाभावेऽसिद्धिः । अनित्यप्रमात्वस्य स्वाश्रयाधिक-देशवृत्तिनाऽनित्यज्ञानत्वेनावच्छिन्ना या कार्यता तत्प्रतियोगिक-कारणत्वाश्रयो यो मनःसंयोगादिः तदुत्पाद्यप्रमारूपकार्यवृत्तित्वेन तदनुत्पाद्यकार्यवृत्तित्वाभावात् । मात्रपदे दत्ते तु नासिद्धिः । प्रमाया ज्ञानसामान्यकारणोत्पाद्यत्वेपि तन्मात्रानुत्पाद्यत्वात् । तथात्वेन ह्यप्रमापि प्रमा स्यात् ।

तृतीयं मात्रपदं तु कार्याकार्यवृत्तिधर्मेषु व्यभिचारवारणायेति चेन्मैवम् । स्वतस्त्वेप्यनित्यप्रमामात्रवृत्तिना तत्तत्प्रमात्वरूपेण धर्मेणावच्छिन्ना या तत्तत्प्रागभावनिरूपिता कार्यता तदाश्रयमात्र-वृत्तित्वस्यानित्यप्रमात्वे सत्वेन सिद्धसाधनात् । न च प्रागभावस्यापि तत्तत्प्रागभावत्वेन तत्तद्व्यक्तिं प्रति न हेतुता किन्तु प्रागभावत्वेन

कार्यमात्रं प्रति हेतुतेति वाच्यम् । उत्पन्नस्य घटस्य स्वप्रागभावाभावेप्यन्यप्राग़भावसत्वेन पुनरुत्पत्तिदोषतादवस्थ्यात् ।

यदि तु सिद्धसाधनवारणाय साध्ये कार्यताशब्देन भावकारणनिरूपिता कार्यताऽभिप्रेता । तर्हि सामान्यकारणमात्रानुत्पाद्यकार्यमात्रवृत्तित्वहेतोरभावरूपविशेषकारणेनाप्युपपत्त्याऽप्रयोजकता । तत्तद्घटत्वादौ व्यभिचारश्च । तद्वारणाय हेतावपि कार्यमात्रेत्यत्र कार्यशब्देन भावकारणोत्पाद्यकार्यविवक्षायां स्वतस्त्ववादिनं प्रत्यसिद्धिः । प्रत्यक्षप्रमादाविन्द्रियार्थसन्निकर्षादेर्गुणस्य सत्वान्नासिद्धिरित्यादि त्वनुपदमेव निरसिष्यते ।

।। इति यज्ञपत्युक्तवक्रानुमानभङ्गः ।। १२ ।।

न्यायदीपः

।। **तथात्व इति** ।। तन्मात्रोत्पाद्यत्व इत्यर्थः ।। **कार्याकार्येति** ।। प्रमात्वादावित्यर्थः । [१]अनित्यज्ञानत्वस्य ततोऽधिकदेशवृत्तित्वेन तत्र साध्याभावात् । प्रागभावनिरूपिता प्रागभावनिष्ठकारणतानिरूपिता तत्तत्प्रमात्वावच्छिन्नकार्यतेत्यर्थः ।। **उत्पन्नस्येति** ।। घटोत्पत्तिसमवहितोत्तरक्षणे तद्घटसामग्रीसत्वेन तया तस्यैव घटस्य पुनरुत्पत्तिप्रसङ्गदोषनिरासाय हि प्रागभावे हेतुतोक्ता । प्रागभावत्वेनैव हेतुत्वे हेतुतावच्छेदकावच्छिन्नयत्किञ्चिद्धेतुसत्वेपि कार्योत्पत्तिनियमेन तादृशप्रागभावान्तरसत्वात्पुनस्तदुत्पत्तिदोषो न परिहृत एव स्यादिति न प्रागभावत्वेन हेतुता किन्तु तत्प्रागभावत्वेनेति प्रागुक्तदोष एवेति भावः ।

।। **भावेति** ।। भावनिष्ठकारणतानिरूपितेत्यर्थः ।। **अप्रयोजकतेति** ।। सामान्यसामग्रीमात्रानुत्पाद्यकार्यमात्रवृत्तित्वस्य विशेषकारणजन्यत्वं

१. 'तस्य' इति स्यात् ।

विनाऽनुपपत्या तदाक्षेपकत्वेपि विशेषकारणत्वस्य भावत्वं विनाऽनुपपत्त्यभावेन भावभूतविशेषकारणजन्यवृत्तित्वसाधने अप्रयोजकतैवेति भावः ।। **तत्तद्घटत्वेति** ।। घटत्वेन [१]मृत्पिण्डत्वेनैव कार्यकारणभावो न तद्घटत्वेन मृत्पिण्डत्वेन हेतुहेतुमद्भावः । एकव्यक्तिकत्वेन बाधकेन तद्घटत्वस्य कार्यतानवच्छेदकत्वात् । बाधकं विना कार्यमात्रवृत्तिधर्मत्वादिति हेतुनैव कार्यतावच्छेदकत्वसाधनात् । तथाच स्वाश्रयमात्रवृत्तेः स्वस्य वान्यस्य वा धर्मस्य कार्यतावच्छेदकस्याभावेन तदवच्छिन्नकार्यताश्रयमात्रवृत्तित्वरूपसाध्याभावेन स्वाश्रयमात्रवृत्तिघटत्वरूपधर्मावच्छिन्नकार्यताप्रतियोगिककारणमात्रानुत्पाद्यकार्यं तद्घट एव । स्वप्रागभावभूताधिककारणजन्यत्वात् । तथाच तन्मात्रवृत्तित्वरूपहेतुसत्वाद्व्यभिचार इत्यर्थः ।

यत्सामान्यन्यायेन विशेषयोः कार्यकारणभावो न तत्वेन रूपेण किन्तु सामान्येनैव । न चैवं तन्मृत्पिण्डत्वेन हेतुहेतुमद्भावाभावो मृत्पिण्डान्तरादेतद्घटोत्पत्तिः स्यादिति वाच्यम् । मृत्पिण्डान्तरे एतद्घटप्रागभावाभावादेव तत उत्पत्त्यप्रसक्तेः । तत्तत्प्रागभावत्वेन हेतुत्वकल्पनं पूर्वोक्तदिशोत्पन्नस्य पुनरुत्पत्तिबाधकादेवेति भावः ।। **भावकारणेति** ।। स्वाधिकरण-मात्रावृत्तिधर्मावच्छिन्नकार्यताप्रतियोगिककारणमात्रानुत्पाद्यभावकारणकार्येत्युक्तौ तादृशकारणादधिकभावकारणजन्यकार्यमात्रवृत्तित्वादित्यर्थलाभात् । तद्घटत्वादौ च स्वप्रागभावरूपाधिककारणजन्यकार्यमात्रवृत्तित्वेनोक्तहेत्वभावान्न व्यभिचार इति भावः ।। **असिद्धिरिति** ।। अनित्यप्रमात्वव्याप्यानित्यप्रत्यक्षप्रमात्वाद्याश्रयनिष्ठकार्यतानिरूपितानुगतगुणाभावादनित्यज्ञानसामान्यसामग्रीतोऽधिकभावकारणजन्यकार्यमात्रावृत्तिधर्मत्वस्यानित्यप्रमत्वेऽभावादिति भावः । अत एवोक्तं **रुचिदत्तेन**ापि ''सन्दिग्धासिद्धेः'' इति ।

---

१. 'तन्मृन्पिण्डत्वेन' इति स्यात् ।

यत्तूक्तस्थले व्यभिचारवारणाय यावत्कार्यमात्रवृत्तिधर्मत्वादिति विशेषणम् । तत्तद्घटत्वादेश्च तादृशैककार्यमात्रवृत्तित्वादिति तन्न । तथापि नीलघटत्वादौ व्यभिचारानिरासात् । एतेन साध्ये स्वाश्रयमात्रवृत्त्यनेकमात्रवृत्तिधर्मेति विशेषणमितिनिरस्तम् । अप्रयोजकत्वव्यभिचारयोरपरिहारात् । यज्ञपत्युक्तेरर्वाचीनत्वान्न तन्निरासो मूलारूढतया प्रदर्शितः ।

॥ इति यज्ञपत्युक्तवक्रानुमानभङ्गः ॥ १२ ॥

प्रत्यक्षादिप्रमासु प्रत्येकानुगतगुणभङ्गः

अथ मतं अनित्यप्रत्यक्षप्रमात्वमनुमितिप्रमात्वं शाब्दप्रमात्वं च कार्यतावच्छेदकम् बाधकं विना कार्यमात्रवृत्तित्वात् घटत्ववदिति प्रत्येकमेव प्रयोक्तव्यम् । बाधकं च समाजस्यार्थिकत्वमनुगतहेत्वभावश्च । तेन नीलघटत्वादौ घटज्ञानत्वादौ च न व्यभिचारः । एतादृशप्रत्यक्षप्रमात्वादिकं प्रत्यनित्यप्रमात्वस्य व्यापकत्वमेव प्रमात्वस्य परतस्त्वम् । एवं च तत्तत्प्रागभावनिरूपितकार्यतया नार्थान्तरम् ।

नचात्राप्यनुगतहेत्वभावो बाधकः । प्रत्यक्षप्रमायामिन्द्रियार्थसन्निकर्षस्यार्थस्य च अनुमितिप्रमायां यथार्थलिङ्गपरामर्शस्य शाब्दप्रमायां यथार्थवाक्यार्थज्ञानस्य च गुणस्य अनुगमात् । भ्रमे त्वर्थोऽसन्निति न हेतुर्न वा तस्य सन्निकर्ष इति चेदुच्यते ।

न्यायदीपः

अनित्यप्रमात्वं कार्यतावच्छेदकं बाधकं विना कार्यमात्रवृत्तिधर्मत्वात् इति **मण्युक्तानुमाने प्रगल्भादिनोक्तानुगतगुणपक्षं** निरस्य यज्ञपत्युक्त-

प्रमात्वपक्षीयमनुमानं च निरस्य यत्**पक्षधरे**णैव पक्षान्तरमुक्तं ''यद्यपि यथाश्रुतं साध्यं बाधितं अनित्यप्रमानुगतहेत्वसिद्धेः अत एव स्वरूपासिद्धिरपि तथाप्यनित्यप्रमात्वमित्यनेन अनित्यप्रत्यक्षप्रमात्वादिकमेव विवक्षितं कार्यतावच्छेदकव्यापकत्वमेव साध्यं तादृशकार्यमात्रवृत्तिधर्मव्यापकत्वादिति हेतुरिति वा स्मर्तव्यमिति'' तदनुरोधेन प्रमामात्राननुगतगुणपक्षमाशङ्कते ।। **अथेति** ।। **मतमिति** ।। इति प्रयोक्तव्यमित्यन्वयः ।। **बाधकं विनेति** ।। अवच्छेदकान्तरोपपन्नकार्यताश्रयवृत्तित्वस्वावच्छिन्नकार्यताप्रतियोगिककारणासम्भव इत्यादिबाधकं विनेत्यर्थः ।

नित्यवृत्तित्वादिकार्यतावच्छेदकत्वबाधकस्य ज्ञानत्वादाविव नीलघटत्वादावभावात् । विशिष्टहेतोरपि तत्र व्यभिचार इत्यतो विवक्षित-**पक्षधरा**द्युक्तबाधकशब्दार्थोक्त्योक्तदोषं निराह ।। **बाधकं चेति** ।। समाजस्य मेलनस्य आर्थिकत्वं अवच्छेदकान्तरोपपन्नकार्यताश्रयवृत्तित्वमित्यर्थः ।। **अनुगतेति** ।। स्वावच्छिन्नकार्यताप्रतियोगिकानुगतहेत्वभाव इत्यर्थः ।। **तेनेति** ।। बाधकं विनेत्यत्र विवक्षितबाधकाभावरूपविशेषणेनेत्यर्थः ।

एवं जन्यप्रत्यक्षप्रमात्वादेः परतस्त्वप्राप्तावप्यनित्यप्रमात्वस्य तन्न प्राप्तमित्यत आह ।। **एतादृशेति** ।। प्रमात्वस्य अनित्येति योज्यम् । यद्वा ईश्वरज्ञानप्रामाण्यस्यापि परतस्त्वं प्राप्तमिति भावेन प्रमात्वस्येत्येवोक्तिः ।। **एवं चेति** ।। अनित्यप्रत्यक्षत्वादेः कार्यतावच्छेदकत्वेनानित्यप्रमात्वस्य तद्व्यापकत्वे साध्यमाने सतीत्यर्थः ।। **बाधक इति** ।। स्वावच्छिन्नकार्यतानिरूपितैककारणाभावरूपबाधकसत्वाद्बाधकं विनेत्युक्तविशेषणासिद्धिरिति भावः ।

तर्कताण्डवम्

प्रत्यक्षप्रमामात्रे न सन्निकर्षार्थौ हेतू । शुक्तौ रूप्यभ्रमकालेपि तयोः सत्वेन शुक्तित्वेन शुक्तिप्रमाप्रसङ्गात् । दोषः प्रतिबन्धक इति चेत्तर्ह्यावश्यकत्वाद्दोषाभावादेव प्रमास्तु ।

किञ्च षड्विधसन्निकर्षान्यतरद्योगिप्रत्यक्षादौ प्रत्यभिज्ञायां च तत्तादौ नास्ति । तत्र च योगजधर्मसंस्कारादिः प्रत्यासत्तिश्चेत्तर्हि भ्रमेपि दोषस्तथा स्यात् ।

किञ्च चक्षुरादिवत्कारणत्वेन धर्मिग्राहकमानासिद्धोर्थः सन्निकर्षेणान्यथासिद्धत्वादतीतादिविषयकयोगिप्रत्यक्षादौ असत्वाच्च न प्रत्यक्षप्रमाहेतुः । अन्यथा वर्तमानविषयकानुमितावप्यर्थो हेतुः स्यात् ।

न्यायदीपः

मण्याद्युक्तमेवाह ।। **प्रत्यक्षेति** ।। अनित्येति योज्यम् ।। **गुणस्येति** ।। अन्वयव्यतिरेकादिति **मण्युक्ते**रिति भावः । सादृश्यज्ञानमुपमितौ गुण इति **मण्यु**क्तमप्यत्र नानूदितम् । उपमानस्यानुमानानतिरेकस्यान्यत्र व्यक्तत्वात् ।। **सन्निकर्षार्थाविति** ।। अल्पनिरासत्वात्सन्निकर्षस्य पूर्वं निर्देशः । यद्वा ''नासिकास्तनयोर्ध्माधेटोः'' इत्यादिनिर्देशेन ''अल्पाच्तरं पूर्वं'' इत्यस्य प्रायिकत्वादर्थस्य यौ सन्निकर्षाविति भ्रमनिरासायैवं निर्देशाददोषः ।

अन्वयव्यभिचारमाह ।। **शुक्ताविति** ।। तयोः शुक्तिरूपार्थतत्सन्निकर्षयोरित्यर्थः । इदन्त्वेन प्रमात्वस्य सत्त्वाच्छुक्तित्वेनेत्युक्तिः । तथाचानुगतहेत्वभावरूपबाधकस्यैव भावाद् बाधकं विनेत्यसिद्धमिति भावः । मण्यादिना दाहाभावेपि वह्नेर्दाहाहेतुत्वाभाववदिहाप्यहेतुत्वं न सन्निकर्षादेः

प्राप्यत इति भावेनाशङ्क्य निराह ।। **दोष इति ।। दोषाभावादेवेति ।।** तस्य चानित्यप्रमामात्रे अनुगतहेतुत्वात्किमुक्तकुसृष्ट्येति भावः ।

नन्वेवं दाहस्थलेपि मण्याद्यभाव एव हेतुः स्यान्न वह्निः । अन्वय-व्यतिरेकबलाद्वह्नेर्दाहहेतुत्वे सन्निकर्षादेरप्यस्तु हेतुत्वम् । सन्निकर्षोत्कर्षेण प्रमोत्कर्षदर्शनाच्चेति चेत् । किमत्र सन्निकर्षपदेन लौकिक एवाभिमतोऽथा-लौकिकप्रत्यासत्तिसाधारणं सन्निकर्षमात्रमिति कल्पौ हृदि कृत्वाऽऽद्ये व्यतिरेकव्यभिचारमाह ।। **किञ्च षड्विधेति ।।** संयोगसंयुक्तसमवाय-संयुक्तसमवेतसमवायसमवायसमवेतसमवाय विशेषणविशेष्यभावरूपेत्यर्थः । अन्यतरदित्यस्य प्राग्वत्साधुत्वं ध्येयम् । योगिप्रत्यक्षादावित्यादिपदेन सामान्यजप्रत्यक्षग्रहः । प्रत्यभिज्ञायामित्युपलक्षणम् । सुरभिचन्दनमित्यादि-प्रत्यक्षं च ग्राह्यम् । तेन तत्तादावित्यादिपदेनोपनीतगन्धादिग्रहः । द्वितीय-माशङ्क्यान्वयव्यभिचारेण निराह ।। **तत्र चेति ।।** संस्कारादिरित्यादिपदेन ज्ञानसामान्ययोर्ग्रहः ।। **तथेति ।।** प्रत्यासत्तिरित्यर्थः । तथाच तादृश-प्रत्यासत्तौ सत्यामपि तत्र प्रमानुदयाद्व्यभिचार इति भावः ।

एवमर्थस्याप्यनन्यथासिद्धान्वयव्यतिरेकौ न स्तः । अन्यथाख्यातिविचारे सुधोक्तरीत्या क्वचिद्विशेषणाभावात् क्वचिद्विशेष्याभावादिति भावेनाह ।। **किञ्चेति ।।** ननु सन्निकर्षेणैवार्थोन्यथासिद्धश्चेच्चक्षुरादिरपि तथा स्यादित्यत उक्तम् ।। **चक्षुरादिवदित्यादि ।।** रूपाद्युपलब्धयः करणसाध्याः क्रियात्वात् च्छिदिक्रियावदित्यनुमानेन सिद्ध्यच्चक्षुरादिकं करणत्वेनैव सिद्धम् । नत्वर्थ इति वैषम्यमिति भावः ।। **अतीतेति ।।** अतीतानागतविषयके योगिप्रत्यक्षे सामान्यजप्रत्यक्षे चेत्यर्थः ।। **अन्यथेति ।।** उक्तदिशाऽन्यथासिद्ध्यकल्पन इत्यर्थः ।

तर्कताण्डवम्

अपि च त्वन्मते भ्रमेपि यस्मिन्नंशे भ्रमत्वं तद्रजतत्वादिकं विशेषणं सदेव । वैशिष्ट्यं त्वसदप्यसत्ख्यातिभीतस्य तव मते न भाति । किञ्च त्वन्मते प्रत्यक्षप्रमायामपि विशेषणज्ञानमेव हेतुर्न तु विशेषणम् । विशेष्यं तु भ्रमेऽपि सदेव ।

ननु तथापि लौकिकप्रत्यक्षप्रमायां वैशिष्ट्यरूपोऽर्थो गुणः । भ्रमे तु चिरन्तनमतेऽसदपि वैशिष्ट्यं सदुपरक्तत्वेन भातीति चेन्न । अर्थो न हेतुरित्युक्तत्वात् ।

किञ्च यद्वैशिष्ट्यमसत् न तदंशे त्वन्मते बाधस्तत्प्रयुक्तभ्रमत्वं वा सम्भवति । त्वन्मतेऽसतोऽभावविरहात्मत्वरूपप्रतियोगित्वाभावेन स्वप्रतियोगिकाभावप्रमारूपबाधायोगात् । यत्र तु रजतत्वांशे ते सम्भवतः न तदसदिति नार्थो भ्रमव्यावृत्तो हेतुः । एवं बाष्पे धूमभ्रमेणोत्पन्नायां यादृच्छिकसंवादेन प्रमायामनुमितौ न यथार्थलिङ्ग-परामर्शोऽस्ति ।

न्यायदीपः

अन्वयव्यभिचाराच्चार्थो न हेतुरिति भावेनाह ।। **अपिचेति** ।। **सदेवेति** ।। तथा च तत्रान्वयव्यभिचारान्नार्थः प्रमायां हेतुरिति भावः । ननु वैशिष्ट्यांश एव भ्रमत्वम् । तच्चासदेव । अतो न व्यभिचार इत्यत आह ।। **वैशिष्ट्यं त्विति** ।। **तवेति** ।। **मणि**कृत इत्यर्थः । एतेन "भ्रमे त्वर्थोऽसन्निति न हेतुः" इति प्रागुक्तं प्रत्युक्तम् ।

ननु विशेषणमन्यत्र सदपि पुरतोऽसदेवेति चेत्तर्हि विशेषणमर्थश्चेद-सम्भवि । विशेष्यं चेद्व्यभिचारीत्याह ।। **किञ्च त्वन्मत इत्यादिना** ।।

सदेवेति ।। तथाच शुक्तित्वेन शुक्तिप्रमा स्यात् । नास्ति च सा अतो न विशेष्यरूपोर्थः प्रमायां गुणतया हेतुरिति भावः ।

ननु **मणि**कृन्मते वैशिष्ट्यरूपार्थ एव प्रमारूपजन्यप्रत्यक्षमात्रे गुणोस्तु । भ्रमे च वैशिष्ट्यरूपोर्थः पुरतोऽसन्निति तस्य भ्रमाहेतुतया भ्रान्तेः प्रमात्वा-नापत्तिः । अन्यत्र सत्वेन भ्रान्तौ भानोपपत्तेश्चेति चेन्न । यत्र क्वचन सत्व-मात्रेण तद्गोचरजन्यप्रत्यक्षं प्रत्यनन्यथासिद्धनियतपूर्वक्षणवृत्तित्वाभावेन हेतुत्वानिर्धारणात्पुरतोऽसत्वेनाहेतुत्वस्य सन्निकर्षाभावेनोपपत्त्या पुरत-स्सत्वस्य सन्निकर्ष एवोपयोगेन सर्वथापि तदहेतुत्वस्यैव न्याय्यत्वाच्चेति ध्येयम् ।

प्राचां मतमाशङ्कते ।। **नन्विति** ।। **उक्तत्वादिति** ।। चक्षुरादि-वदित्यादिना ग्रन्थेनेत्यर्थः । वैशिष्ट्यरूपोऽर्थोऽर्थपदेन न विवक्षितुं शक्यः । किन्तु विशेषणं विशेष्यं वा । तच्चान्वयव्यभिचारान्न प्रमायां हेतुरिति भावेनाह ।। **किञ्चेति** ।। यदिति भिन्नं पदम् ।। **त्वन्मते** ।। प्राचीनतार्किकमते ।। **स्वप्रतियोगिकेति** ।। प्रामाणिकस्य घटादेरेवात्यन्ताभावोपगमेनाप्रामाणि-कात्यन्ताभावाऽनङ्गीकारात् । तदनङ्गीकारे हेतुरभावविरहेत्यादि । बाधायोगा-दित्युक्त्या तत्प्रयुक्तभ्रमत्वस्याप्ययोग उक्तप्राय इति भावः ।। **त इति** ।। बाधभ्रमत्वे इत्यर्थः । उक्तरूपबाधयोगादेव तत्प्रयुक्तभ्रमत्वं च सम्भवतीति भावः ।

प्रत्यक्षप्रमायामनुगतगुणासम्भवमुक्त्वा ''दृश्यते च यादृच्छिकसंवादिना गुणाभावेपि प्रमाजनकत्वं'' इति तत्वनिर्णयटीकां विवृण्वन्ननुमितावपि प्रागुक्तानुगतगुणं निराह ।। **एवमित्यादिना** ।।

तर्कताण्डवम्

अपि च त्वन्मते भ्रमेपि यस्मिन्नंशे भ्रमत्वं तद्रजतत्वादिकं विशेषणं सदेव । वैशिष्ट्यं त्वसदप्यसत्ख्यातिभीतस्य तव मते न भाति । किञ्च त्वन्मते प्रत्यक्षप्रमायामपि विशेषणज्ञानमेव हेतुर्न तु विशेषणम् । विशेष्यं तु भ्रमेऽपि सदेव ।

ननु तथापि लौकिकप्रत्यक्षप्रमायां वैशिष्ट्यरूपोऽर्थो गुणः । भ्रमे तु चिरन्तनमतेऽसदपि वैशिष्ट्यं सदुपरक्तत्वेन भातीति चेन्न । अर्थो न हेतुरित्युक्तत्वात् ।

किञ्च यद्वैशिष्ट्यमसत् न तदंशे त्वन्मते बाधस्तत्प्रयुक्तभ्रमत्वं वा सम्भवति । त्वन्मतेऽसतोऽभावविरहात्मत्वरूपप्रतियोगित्वाभावेन स्वप्रतियोगिकाभावप्रमारूपबाधायोगात् । यत्र तु रजतत्वांशे ते सम्भवतः न तदसदिति नार्थो भ्रमव्यावृत्तो हेतुः । एवं बाष्पे धूमभ्रमेणोत्पन्नायां यादृच्छिकसंवादेन प्रमायामनुमितौ न यथार्थलिङ्ग-परामर्शोऽस्ति ।

न्यायदीपः

अन्वयव्यभिचाराच्चार्थो न हेतुरिति भावेनाह ।। **अपिचेति** ।। **सदेवेति** ।। तथा च तत्रान्वयव्यभिचारान्नार्थः प्रमायां हेतुरिति भावः । ननु वैशिष्ट्यांश एव भ्रमत्वम् । तच्चासदेव । अतो न व्यभिचार इत्यत आह ।। **वैशिष्ट्यं त्विति** ।। **तवेति** ।। **मणि**कृत इत्यर्थः । एतेन "भ्रमे त्वर्थोऽसन्निति न हेतुः" इति प्रागुक्तं प्रत्युक्तम् ।

ननु विशेषणमन्यत्र सदपि पुरतोऽसदेवेति चेत्तर्हि विशेषणमर्थश्चेद-सम्भवि । विशेष्यं चेद्व्यभिचारीत्याह ।। **किञ्च त्वन्मत इत्यादिना** ।।

सदेवेति ।। तथाच शुक्तित्वेन शुक्तिप्रमा स्यात् । नास्ति च सा अतो न विशेष्यरूपोर्थः प्रमायां गुणतया हेतुरिति भावः ।

ननु **मणि**कृन्मते वैशिष्ट्यरूपार्थ एव प्रमारूपजन्यप्रत्यक्षमात्रे गुणोस्तु । भ्रमे च वैशिष्ट्यरूपोर्थः पुरतोऽसन्निति तस्य भ्रमाहेतुतया भ्रान्तेः प्रमात्वानापत्तिः । अन्यत्र सत्त्वेन भ्रान्तौ भानोपपत्तेश्चेति चेन्न । यत्र क्वचन सत्त्वमात्रेण तद्गोचरजन्यप्रत्यक्षं प्रत्यनन्यथासिद्धनियतपूर्वक्षणवृत्तित्वाभावेन हेतुत्वानिर्धारणात्पुरतोऽसत्त्वेनाहेतुत्वस्य सन्निकर्षाभावेनोपपत्त्या पुरतस्सत्त्वस्य सन्निकर्ष एवोपयोगेन सर्वथापि तदहेतुत्वस्यैव न्याय्यत्वाच्चेति ध्येयम् ।

प्राचां मतमाशङ्कते ।। **नन्विति** ।। **उक्तत्वादिति** ।। चक्षुरादिवदित्यादिना ग्रन्थेनेत्यर्थः । वैशिष्ट्यरूपोऽर्थोऽर्थपदेन न विवक्षितुं शक्यः । किन्तु विशेषणं विशेष्यं वा । तच्चान्वयव्यभिचारान्न प्रमायां हेतुरिति भावेनाह ।। **किञ्चेति** ।। यदिति भिन्नं पदम् ।। **त्वन्मते** ।। प्राचीनतार्किकमते ।। **स्वप्रतियोगिकेति** ।। प्रामाणिकस्य घटादेरेवात्यन्ताभावोपगमेनाप्रामाणिकात्यन्ताभावाऽनङ्गीकारात् । तदनङ्गीकारे हेतुरभावविरहेत्यादि । बाधायोगादित्युक्त्या तत्प्रयुक्तभ्रमत्वस्याप्ययोग उक्तप्राय इति भावः ।। **त इति** ।। बाधभ्रमत्वे इत्यर्थः । उक्तरूपबाधयोगादेव तत्प्रयुक्तभ्रमत्वं च सम्भवतीति भावः ।

प्रत्यक्षप्रमायामनुगतगुणासम्भवमुक्त्वा ''दृश्यते च यादृच्छिकसंवादिना गुणाभावेपि प्रमाजनकत्वं'' इति तत्त्वनिर्णयटीकां विवृण्वन्ननुमितावपि प्रागुक्तानुगतगुणं निराह ।। **एवमित्यादिना** ।।

तर्कताण्डवम्

नचेश्वरे सोऽस्तीति वाच्यम् । उक्तरीत्या दोषजन्यत्वस्यापि सत्वेन भ्रमत्वस्याप्यापत्तेः । ईश्वरज्ञानस्य सत्यपरामर्शत्वेन कारणत्वकल्पनस्य परतस्त्वसिद्ध्यधीनत्वेनान्योन्याश्रयाच्च । भ्रमघटादिसाधारणेनोपादानाद्यपरोक्षज्ञानत्वेन कारणत्वे च तस्य न गुणता । अन्यथास्मदादिनिष्ठानां संशयप्रत्यक्षानुमितिनिर्विकल्पकानां यथाक्रममीश्वरनिष्ठैर्विशेषदर्शनलिङ्गपरामर्शवाक्यार्थज्ञानविशेषणज्ञानैर्जन्यत्वाद्ययथाक्रमं निश्चयत्वानुमितित्वशाब्दज्ञानत्वसविकल्पकत्वानि स्युः ।

अपिचैवं व्यधिकरणस्य परामर्शस्य गुणत्वे दोषत्वमपि तस्यैव स्यात् । सामानाधिकरण्यस्याप्रयोजकत्वात् । तथाचाभासानुमितिमूलत्वेन नित्यभ्रमः सिद्ध्येत् । किञ्चैवं सति स्थाणौ करादिविपर्यजन्यस्य पुरुषत्वभ्रमस्येश्वरनिष्ठया वक्रकोटरत्वादिप्रमया जन्यत्वात्स्थाणुप्रमात्वं स्यात् ।

न्यायदीपः

ननु समानाधिकरणस्य तस्य तत्राभावेपि कार्यमात्रं प्रति कारणस्येश्वरीयज्ञानस्य सल्लिङ्गविषयकस्य तत्रापि सत्त्वमस्ति सामानाधिकरण्यस्याप्रयोजकत्वात् । अतो न व्यतिरेकव्यभिचार इति भावेनाशङ्क्य निराह ।। **न चेति** ।। **दोषेति** ।। अस्मदीयासल्लिङ्गपरामर्शरूपेत्यर्थः ।

ईश्वरज्ञानमपि किं सल्लिङ्गपरामर्शत्वेन हेतुरुतोपादानादिज्ञानत्वेन । आद्ये दोषमाह ।। **इश्वरेति** ।। अन्त्ये तु न तस्य गुणत्वेन हेतुत्वम् । तथात्वे भ्रमस्यापि गुणजन्यतापत्तिरिति भावेनाह ।। **भ्रमेति** ।। भ्रमसाधारणेन

घटादिसाधारणेनेत्यर्थः । उपादानादिप्रत्यक्षत्वेन हेतुतेत्युपपादनाय घटादीत्युक्तिः । विपक्षेऽनिष्टप्रसङ्गद्योतनाय भ्रमेत्युक्तिः । अतिप्रसङ्गान्तराण्याह ।। **अन्यथेति** ।। तेनापि रूपेण हेतोस्सल्लिङ्गविषयकत्वमात्रेण गुणत्व इत्यर्थः ।

येन केनापि रूपेण हेतोरपीश्वरज्ञानस्य गुणत्वकल्पनेऽतिप्रसङ्गान्तरं चाह ।। **अपि चेति** ।। एवमित्यस्य व्यक्तीकरणं व्यधिकरणस्येत्यादि **नित्यभ्रम इति** ।। ननु सति सम्भवे त्यागायोगात्तत्र समानाधिकरण एवासल्लिङ्गपरामर्शरूपदोषसम्भवान्न व्यधिकरणदोषकल्पनेति चेन्न । गन्धप्रागभावावच्छिनो घटो गन्धवान् पृथिवीत्वादित्यादावाभासानुमितौ समानाधिकरणदोषासम्भवे व्यधिकरणस्यैव कल्प्यत्वेऽनुगतिलाभाय सर्वत्र तस्यैव दोषत्वकल्पनौचित्यादिति भावः ।

ननु गुणे सामानाधिकरण्यमप्रयोजकम् । दोषे तु तन्नियमः प्रयोजकः । गन्धप्रागभावावच्छिन्न इत्यादौ बाधितत्वप्रमादिरेव कश्चित्कल्प्यत इत्यत आह ।। **किञ्चैवं सतीति** ।। व्यधिकरणस्यापि गुणस्य हेतुत्वे सतीत्यर्थः ।

।। **स्थाणुप्रमात्वमिति** ।। न च तत्र समानाधिकरणो दोषः प्रबल इति शङ्क्यम् । यादृच्छिकसंवादिनि प्रमानुदयापातात् । न चारोपे[1] सति निमित्तानुसरणमिति न्यायेन तत्र प्रमात्वादृष्ट्या न विशेषप्रमात्वेनेश्वरज्ञानं हेतुरिति युक्तम् । प्रामाण्यस्य स्वतस्त्वेनाप्युपपत्त्या ईश्वरज्ञानस्याप्यनुमितिप्रमायां न गुणत्वेन हेतुत्वमिति सुवचत्वादिति भावः ।

तर्कताण्डवम्

ननु तर्ह्यनुमितिसमानाधिकरणं वस्तुतः साध्यव्याप्यवतः पक्षस्य

१. 'कार्ये सति' इति स्यात् ।

व्याप्यवत्त्वेन ज्ञानं गुणोस्त्विति चेन्मैवम् । लाघवेन वस्तुतः साध्यवत्पक्षस्य ज्ञानेनैव प्रमात्वसम्भवात् । स च विषयसत्वोपहितत्वान्न गुण इत्युक्तम् ।

किञ्च गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यनुमाने वस्तुतोऽनेककर्तृके लाघवतर्कानुग्रहादेककर्तृकत्वविषयानुमाने चोक्तगुणसद्भावात्प्रमा जायेत ।

न च बाधाभावसहकृतसत्यपरामर्शादिर्गुण इति वाच्यम् । आवश्यकत्वाद्बाधाभावेनैव प्रमात्वसम्भवेन गुणस्य हेतुत्वासिद्धेः । एवं विप्रलम्भकादिवाक्यजन्यायां शुकादिवाक्यजन्यायां च यादृच्छिकसंवादेन प्रमायां न यथार्थवाक्यार्थज्ञानमस्ति । [१]न च तत्रापीश्वरे तदस्तीति शङ्क्यम् । व्यधिकरणगुणजन्यत्वेन प्रमात्ववत् समानाधिकरणदोषजन्यत्वेनाप्रमात्वं च स्यादित्याद्यतिप्रसङ्गात् । किञ्च तद्धि न साक्षाच्छाब्दप्रमाजनकम् । वक्तृनिष्ठे तस्मिंश्चिरध्वस्तेपि श्रोतरि प्रमोत्पत्तेः । किन्तु वाक्यरचनाद्वारा । रचनायां च न तत्कारणम् । शुकबालादीनामिव तादृशपदावलीज्ञानमात्रेण तदुपपत्तेः ।

न्यायदीपः

एवं यादृच्छिकसंवादिनि पूर्वोक्तगुणव्यभिचारमुक्त्वा तत्स्थैर्याय व्यधिकरणस्य गुणत्वमनेकदोषोक्त्या निरस्येदानीं प्रकारान्तरेण तत्र गुणव्यभिचाराभावमाशङ्क्य च दोषान्तरमाह ।। **नन्वित्यादिना** ।। यादृच्छिकसंवादिनि धूमाभावेपि वह्निव्याप्यस्यालोकादेः सत्वेन तादृशे पक्षे बाष्पे धूमज्ञानं व्याप्यवत्वज्ञानं भवतीति न तत्र व्यभिचार इति भावः ।। **वस्तुत इति** ।।

---

१. 'न च' इत्यारभ्य ''इत्याद्यतिप्रसङ्गात्'' इति पर्यन्तं ग्रन्थः पाठान्तरेनास्ति ।

वस्तुतः साध्यवान् यः पक्षः तादृशपक्षज्ञानेनैवेत्यर्थः ।। **स चेति** ।। उक्त-रूपपक्षस्य ज्ञानमित्यर्थः । तच्चेति वक्तव्ये विधेयगुणापेक्षया पुल्लिङ्गप्रयोगः ।

उक्तरूपगुणस्यान्वयव्यभिचारं चाह ।। **किञ्चेति** ।। **अनेकेति** ।। प्रासादः सकर्तृकः कार्यत्वात् घटवदित्यनुमान इत्यर्थः ।। **उक्तेति** ।। वस्तुतः साध्यव्याप्यवत इत्यादिनोक्तेत्यर्थः ।

एतेन पक्षतावच्छेदकावच्छेदेन ज्ञाप्यवति पक्षे लिङ्गज्ञानं गुण इति **रुचिदत्तोक्तं** निरस्तम् । वस्तुतोऽनेककर्तृक इत्यादिनोक्तदोषानतिलङ्घनात् । लाघवेन वस्तुतो ज्ञाप्यवत्पक्षस्य ज्ञानेनैव प्रमात्वसम्भवात् । तस्य च विषयसत्वोपहितत्वेनागुणत्वात् ।

एतेनैव पक्षतावच्छेदकाविरोधिसाध्यकानुमितिप्रमायां यथार्थलिङ्गपरामर्शो गुण इति **पक्षधरोक्तमपि** प्रत्युक्तम् । गन्धप्रागभावेत्युक्तस्थले त्वदुक्तगुणे सत्यपि पक्षतावच्छेदकाविरोधिसाध्यप्रमाया अनुदयात् ।। **बाधाभावे-नैवेति** ।। स च विषयसत्वपर्यवसन्न इति न गुण इति भावः ।

एतेन बाधितत्वज्ञानं गुण इति प्रत्युक्तम् । विषयसत्वोपहितत्वात् । घनगर्जितस्थले व्यभिचाराच्च । ''दृश्यते च यादृच्छिकसंवादिनोऽनाप्तवाक्यस्य गुणाभावेपि यथार्थज्ञानजनकत्वं'' इति तत्वनिर्णयटीकावाक्यं विवृण्वानः प्रागुक्तं शाब्दप्रमायामप्यनुगतगुणं निराह ।। **एवमिति** ।। घटोस्तीति वक्तव्ये प्रमादादिना पटोस्तीत्युक्तवाक्यमादिपदार्थः । ननु तद्वाक्ये तादृशगुणाभावेपि तज्जातीये वाक्यान्तरेऽस्तीत्यतस्तत्रापि तस्य न हेतुत्वमित्याह ।। **किञ्चेति** ।। चिरध्वस्तेपि तस्मिन्निति पूर्वेणान्वयः ।

तर्कताण्डवम्

न च तत्रापीश्वरनिष्ठं यथार्थवाक्यार्थज्ञानं रचनाद्वारा हेतुरिति वाच्यम् । तस्य ज्ञानसामान्यं भ्रमं च प्रतीवोपादानापरोक्षत्वेनैव हेतुतया प्रमां प्रत्यसाधारण्याभावात् । अन्यथोक्तातिप्रसङ्गात् । विसंवादिशुकादिवाक्यरचनाहेतुत्वेन भ्रमोपि कल्प्यत इति नित्यप्रमावन्नित्यभ्रमप्रसङ्गाच्च ।

ननु शाब्दप्रमायां योग्यता तत्प्रमा वा गुणः । स च सर्वत्र प्रमाण-वाक्येऽस्तीति चेन्न । मदिष्टवेदापौरुषेयत्वाविरोधिनस्त्वदिष्टेश्वरसिद्धि-विरोधिनश्चैवंविधगुणजन्यत्वस्य साधने अर्थान्तरात् ।

न्यायदीपः

ननु कार्यमात्रं प्रति कारणीभूतमीश्वरज्ञानमेव यथार्थवाक्यार्थज्ञानरूपं सद्रचनाद्वारा प्रमां प्रति गुणत्वेन कारणमस्तु । अतो न यादृच्छिकप्रमायां व्यभिचारः । नापि तेन विना वाक्यरचनोपपत्तिः । तस्य कार्यमात्रं प्रति हेतुत्वेन रचनायां तज्जन्यप्रमायां च हेतुत्वात् । शुकादिवाक्यजन्य-प्रमायामपीश्वरीयप्रमामादायैव न व्यभिचार इति तदीयव्याख्यात्रुक्तेः । ''भ्रान्तप्रतारकवाक्ये शुकादिवाक्ये चेश्वरस्यैव यथार्थवाक्यार्थज्ञानं जनकं'' इति **मण्युक्तेरिति** भावेन शङ्कते ।। **न च तत्रापीति** ।। यादृच्छिकसंवादि-न्यामपीत्यर्थः ।। **उक्तेति** ।। अन्यथाऽस्मदादीत्यादिनोक्तेत्यर्थः ।

''वयन्तु ब्रूमः'' इत्युपक्रम्य ''शाब्दप्रमायां वक्तुर्यथार्थवाक्यार्थज्ञानं न गुणः । किन्तु योग्यत्वादिकं यथार्थतज्ज्ञानं वेति **मण्युक्तं** पक्षान्तरमाशङ्कते ।। **नन्विति** ।। योग्यता स्वरूपसती न हेतुरतो न गुणः इत्यतस्तत्प्रमा वेत्युक्तम् ।। **त्वदिष्टेति** ।।

''प्रमायाः परतन्त्रत्वात्सर्गप्रलयसम्भवात् ।
तदन्यस्मिन्ननाश्वासान्न विधान्तरसम्भवः ।''

इति **कुसुमाञ्जल्युक्त्या** प्रामाण्यपरतस्त्वस्येश्वरसिध्यर्थत्वोपगमाद्यथार्थ-वाक्यार्थज्ञानस्य गुणत्वपक्ष एव वेदे तादृशयथार्थवाक्यार्थज्ञानवत्वे-नेश्वरसिद्धेरिति भावः ।

तर्कताण्डवम्

किञ्च योग्यता किं शब्दप्रतिपाद्यस्य संसर्गस्य सत्वं किं वा संसर्गसत्वाविनाभूतं धर्मान्तरम् ।।

नाद्यः । शाब्दप्रमायां शाब्दप्रमाया वा तद्विषयस्य वा अजन-कत्वात् । विषयसत्वस्य प्रमात्वान्तर्गतत्वेन तद्धेतुत्वायोगाच्च । प्रत्यक्षादिप्रमास्वपि नियतविषयसत्वस्य सद्भावेन त्वदुक्तस्य शाब्दा-साधारण्यस्यायोगाच्च । अप्रमायामपि विषयासत्वस्यैव दोषत्वा-पाताच्च । आवश्यकेन निर्दोषत्वेनैव प्रमात्वोपपत्तेश्च ।

नान्त्यः । त्वया ह्येकपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभाव-प्रतियोगित्वप्रमाविशेष्यत्वाभावो वा एकपदार्थसंसर्गेऽपरपदार्थनिष्ठा-त्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वं वा योग्यतेत्युक्तम् ।।

न्यायदीपः

ननु ''न वैदिकप्रमाया गुणजन्यत्वेनेश्वरसिद्धिः'' इति **मणि**कृदुक्तेरेतन्मते हेत्वन्तरेणास्त्वीश्वरसिद्धिरित्यत आह ।। **किञ्चेति** ।। ''वाक्यार्थाबाधो योग्यता'' इतीहैव प्रामाण्यवादे **मण्युक्ते**राद्यः कल्पः । योग्यतावादोक्त्यनु-रोधेनान्त्यः ।। **धर्मान्तरमिति** ।। एतच्चाग्रे व्यक्तम् ।। **अजनकत्वादिति** ।।

आद्य आत्माश्रयात् । अन्त्येऽतीतादिसाधारण्यादिति[1] भावः ।। **तद्धेतुत्वायोगाच्चेति** ।। आत्माश्रयादिति भावः ।। **विषयासत्वस्यैवेति** ।। गुणविरोधिन एव दोषत्वादनुगतिसम्भवाच्च । तथाच भ्रमेऽसतोपि भानं त्वयापि स्वीकार्यम् । अन्यथा भ्रमत्वमेव न स्यादिति भावः ।

ननु शुकबालादिवाक्यजन्यप्रमायामन्यस्य प्रमात्वप्रयोजकस्याभावादनन्यगत्या विषयसत्वरूपापि योग्यतैव गुणः इत्येव वाच्यमित्यत आह ।। **आवश्यकेनेति** ।। वक्तुर्भ्रमविप्रलम्भादिदोषभावे योग्यताया अप्यभावेन तदर्थं तस्यापेक्षणीयत्वेनावश्यकत्वमिति भावः । योग्यतावादोक्तमाह ।। **एकेति** ।। जलेन सिञ्चतीत्यादौ सेकरूप एको यः पदार्थः तत्संसर्गेऽपरपदार्थभूतजलनिष्ठात्यन्ताभावप्रतियोगी सेकसंसर्ग इति कदापि प्रमित्यभावेनापरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारिका या प्रमा, तद्विशेष्यत्वाभावोस्तीति तद्योग्यवाक्यम् । वह्निना सिञ्चतीत्यादौ तु सेकनिरूपितसंसर्गे वह्निनिष्ठात्यन्ताभावप्रतियोगी सेकसंसर्ग इति प्रमित्युदयेन तत्रापरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वमेवास्तीति तदयोग्यवाक्यम् । अतो नाव्याप्त्यतिव्याप्ती । अत्र आकाशे शब्द इति योग्यवाक्ये शब्दनिष्ठात्यन्ताभावप्रतियोगित्वप्रमाविशेष्यत्वमवृत्तिपदार्थे आकाशेऽस्तीत्यव्याप्तिनिरासाय एकपदार्थ इत्यनुकत्वा एकपदार्थसंसर्ग इत्युक्तम् । आकाशसंसर्गस्तु न तथेति न दोषः । अपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वाभाव इत्येव पूर्तौ तादृशप्रतियोगित्वप्रमाविशेष्यत्वं प्रतिबन्धकमिति मतावष्टम्भेन तत्प्रमाविशेष्यत्वाभाव इत्यन्तमुक्तमित्याहुः ।

नरहरिस्तु उक्तात्यन्ताभावप्रतियोगित्वाभाव इत्येवोक्तौ वाक्यार्थ एव योग्यता स्यादिति तत्प्रमाविशेष्यत्वाभाव इत्युक्तमित्यब्रवीत् । तथाच

१. 'साधारण्याभावात्' इति पाठान्तरम् ।

योग्यतावादे स्पष्टयिष्यामः । घटसंसर्गत्वं गेहनिष्ठात्यन्ताभावप्रतियोगीति प्रमाविषयत्वस्य घटसंसर्गेपि सत्वेन घटोस्तीति वाक्येऽव्याप्तिनिरासाय प्रमाविशेष्यत्वाभाव इत्युक्तम् ।

अत्र स्वपरसाधारणप्रमाविशेष्यत्वाभावनिश्चयस्याशक्यत्वात्प्रमाप्रवेशे गौरवाच्चेत्यादिदोषाद्वितीयं लक्षणम् । वह्निसंसर्गत्वं हि सेकपदार्थ-निष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मः तच्छून्यत्वं जलसंयोगेऽस्तीति जलेन सिञ्चतीत्यादिवाक्यं योग्यम् । अग्निनेति वाक्यं त्वयोग्यमिति नाव्याप्त्यादि-दोषः । अत्रोक्तरूपप्रतियोगित्वाभावस्य वाक्यार्थरूपसंसर्गसत्वपर्यवसन्नतया तज्ज्ञानस्य शाब्दप्रमायामहेतुत्वादेतत्प्रतियोगितावच्छेदकधर्मशून्यत्वमित्युक्तम् ।

तर्कताण्डवम्

तत्र चाद्यपक्षेऽनन्वयप्रमाविरहो योग्यता द्वितीये जलेन सिञ्च-तीत्यत्र सेकानन्वयप्रतियोगितावच्छेदका येऽग्नित्वादयो धर्मास्त-च्छून्यत्वं जले विद्यमानं योग्यतेति पर्यवस्यति । तत्र यद्यपि इदं द्वयं संसर्गसत्वाविनाभूतं न तु संसर्गरूपमिति न पूर्वोक्तदोषः । तथाप्यत्र पक्षद्वयेऽनन्वयप्रमाविरहो वा अनन्वयप्रमाविरहप्रमा वा अनन्वय-प्रतियोगितावच्छेदकधर्मशून्यत्वं वा तच्छून्यत्वप्रमा वा गुण इति फलितार्थः । स चायुक्तः । आवश्यकेन निर्दोषत्वेनैव प्रमात्वोपपत्तौ संसर्गव्याप्यस्य संसर्गाभावप्रमाविरहस्य वा तत्प्रमाया वा संसर्गा-भावप्रतियोगितावच्छेदकधर्मशून्यत्वस्य वा तत्प्रमाया वा गुणत्व-कल्पनेऽतिगौरवात् । न हि निर्दोषत्वे सति तयोर्वा तत्प्रमयोर्वा व्यतिरेकेण शाब्दप्रमाव्यतिरेको दृष्टः । न च शाब्दप्रमाया गुण-जन्यत्वमद्यापि सिद्धम् । येन तन्निर्वाहाय तयोर्वा तत्प्रमयोर्वा गुणत्वं कल्प्यते ।

किञ्च प्रत्यक्षादावपि विषयसत्वाविनाभूतस्य विषयासत्व-प्रमाविरहादेः सत्वात्स एव गुणः स्यात् इतीन्द्रियार्थसन्निकर्षा-देर्गुणत्वोक्तिरयुक्ता स्यात् । तत्र सतोपि तस्य गुणत्वेन जनकत्वे मानं नेति चेत्समं प्रकृतेपि ।

न्यायदीपः

।। **अनन्वयेति** ।। एकपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगि-त्वस्यानन्वयरूपत्वादिति भावः ।। **अग्नित्वादय इति** ।। अग्नित्वमृत्व-पाषाणत्वादयः । सेकानन्वयः सेकनिष्ठान्वयाभावः । अग्निसंसर्गत्वादेः सेकनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वस्याग्नित्वादिधर्मनिबन्धनत्वादग्नित्वादय इत्युक्तम् । प्रतियोगितावच्छेदका इत्यस्याधिकरणतावच्छेदका इत्यर्थ इत्यप्याहुः । ''योग्यता तत्प्रमा वा'' इति प्रागुक्तकल्पद्वयोक्त्यनुरोधादाह ।। **अनन्वयप्रमाविरहो वेत्यादि** ।। **आवश्यकेनेति** ।। उक्तप्रमाविरहा-देर्वाक्यगतनिर्दोषत्वेनैव सम्भवादिति भावः । संसर्गव्याप्यस्येत्ये-तत्प्रमाविरहस्य विशेषणम् । ननु निर्दोषत्वस्येव तयोरप्यन्वयव्यतिरेक-सिद्धकारणत्वस्य त्यागायोगादित्यत आह ।। **न हीति** ।। **तयोरिति** ।। उक्तरूपप्रमाविरहधर्मशून्यत्वयोरित्यर्थः । विसंवादिशुकादिवाक्येऽपि निर्दोषत्वं न सिद्धम् । भ्रान्त्यादिदोषाभावेप्यन्यस्य कस्यचित्कल्प्यत्वादिति भावः । गुणजन्यत्वान्यथानुपपत्त्यैव तत्कल्प्यत इत्यत आह ।। **न च शाब्देति** ।। **अद्यापीति** ।। अनुगतगुणकल्पनवेलायामपीत्यर्थः ।

स्वतन्त्रान्वयव्यतिरेकाभावेऽपि हेतुत्वकल्पनेऽतिप्रसङ्गमाह ।। **किञ्चेति** ।। प्रमाविरहादेरित्यादिपदेन तत्प्रमावच्छेदकधर्मशून्यत्वतत्प्रमयोश्च ग्रहः ।। **सन्निकर्षादेरिति** ।। सल्लिङ्गपरामर्श आदिपदार्थः ।

तर्कताण्डवम्

अपिचैवमप्रमायामपि विषयासत्वाविनाभूतविषयाभावप्रमा वा विषयासत्वावच्छेदकधर्मवत्वं वा तयोः प्रमा वा दोषः स्यान्न तु काचादिः । किञ्च शाब्दी संसर्गप्रमा नियमेन संसर्गव्याप्यधीजन्या चेदनुमितिः स्यात् ।

किञ्च असंसर्गप्रमाविरहो वाऽसंसर्गप्रमाविरहप्रमा वा गुण इति मते अग्निना सिञ्चेदित्यादौ श्रोतुरनन्वयप्रमाविरहदशायां संसर्गप्रमा स्यात् ।

न्यायदीपः

।। **अपि चैवमिति** ।। विषयसत्वाविनाभूतस्य गुणत्व इत्यर्थः ।। **विषयासत्वाविनाभूतेति** ।। विषयाभावप्रमाविशेषणम् । प्रमाविशेष्यत्वमित्यर्थः ।। **तयोरिति** ।। विषयाभावप्रमाविषयासत्वावच्छेदकधर्मवत्वयोरित्यर्थः ।। **नत्विति** ।। तथाच भ्रमे काचादिर्दोष इति **मण्याद्युक्तिरयुक्ता** स्यात् । तदन्वयव्यतिरेकविरोधश्च स्यादिति भावः ।

ननु विषयासत्वाविनाभूत[1]धर्मप्रमादेर्विषयसत्वभ्रमविरोधित्वात्कथं दोषतेत्यतः संसर्गव्याप्यप्रमा गुण इति पक्षे दोषान्तरमाह ।। **किञ्च शाब्दी संसर्गप्रमेति** ।। पर्वतवह्निसंसर्गादिप्रमावदिति भावः ।

ननु संशयोत्तरप्रत्यक्षमिव व्याप्यधीजन्यमपि नानुमितिरूपमिति चेन्न । तत्र बलवत्प्रत्यक्षकरणकत्वेन व्याप्यधीकरणकत्वाभावात् । इह च नियमेन व्याप्यधीजन्यत्वे तत्करणकत्वापातात् । न हि परामर्शादपि शब्दः प्रत्यक्षसामग्रीवद् बलवान् ।

---

१. 'विषयाभावप्रमादेः' इति स्यात् ।

न च व्याप्यत्वप्रकारकज्ञानजन्यत्वेन तदजन्यत्वान्नानुमितित्वम् । नियमेन तज्ज़न्यत्वे तथात्वेन तज्जन्यत्वावश्यम्भावात् । अन्यथा प्रमेयत्वादिनापि ज्ञाने तत्प्रमाया गुणत्वापत्तेः । असंसर्गप्रमाविरहप्रमात्वादिना हेतुत्वापेक्षया संसर्गव्याप्यत्वप्रमात्वस्य लघुत्वात् । अन्यत्र तेन रूपेण हेतुतायाः क्लृप्तत्वात् । असंसर्गप्रमाविरहप्रमात्वादिना हेतुत्वस्य प्रमाया गुणजन्यत्वसिद्ध्याधीनत्वेन अन्योन्याश्रयाच्चेति भावः ।

संसर्गव्याप्यप्रमा गुण इति पक्षं निरस्यासंसर्गप्रमाविरहो गुण इति पक्षेपि दोषमाह ।। **किञ्चासंसर्गेति** ।। क्वचित्तु असंसर्गप्रमाविरहप्रमा वेत्यपि पाठः । तदा तूभयत्र दोषान्तरमाहेत्यवतार्य विरहदशायामित्यनन्तरं तत्प्रमा-दशायामित्यपि व्याख्येयम् ।। **संसर्गप्रमा स्यादिति** ।। तथाचान्वय-व्यभिचारान्नायं गुणत्वेन हेतुरिति भावः ।

तर्कताण्डवम्

न च श्रोतुस्तद्विरहदशायामपीश्वरस्यासंसर्गप्रमास्ति सा च श्रोतुः संसर्गप्रमाप्रतिबन्धिकेति वाच्यम् । तथात्वे ईश्वरस्य वाक्यार्थप्रमा गुण इति चिरन्तनमतत्यागायोगात् ।

किञ्चेश्वरस्यानन्वयप्रमा न तावद्विषयासत्वावेदनेन प्रतिबन्धिका । श्रोतुस्तदावेदनस्य व्यधिकरणया स्वरूपसत्येश्वरनिष्ठप्रमया कर्तुमशक्य-त्वात् । नापि लिङ्गभूतया ज्ञातया तया तत्कर्तुं शक्यम् । तथात्वे ह्यनन्वयप्रमाज्ञानस्यैव प्रतिबन्धकत्वेन तत्प्रमाया अज्ञानदशायां संसर्गप्रमा स्यात् । नापि सा विषयासत्वमनावेद्य स्वरूपेणैव विषयसत्वविरोधित्वेन विषयसत्वगर्भितप्रमाप्रतिबन्धिका । तथात्वेऽनन्वस्यैव साक्षाद्विषयसत्वविरोधित्वेन प्रमाप्रतिबन्ध-कत्वौचित्येन प्रमाग्रहणवैयर्थ्यात् ।

किञ्च वस्तुगत्यानन्वयविषयाया अपि सर्वकार्यहेतुभूताया ईश्वर-प्रमायाः शाब्दप्रमां प्रत्यपि हेतुत्वेन कथं तत्प्रतिबन्धकत्वम् । न च प्रमाया गुणजन्यत्वमद्यापि सिद्धम् । येनेश्वरज्ञानस्योपादाना-परोक्षज्ञानत्वेन हेतुत्वमनन्वयप्रमात्वेन तु प्रतिबन्धकत्वमिति कल्पेत ।।

किञ्चानन्वयप्रतियोगितावच्छेदकधर्मशून्यत्वम् प्रमागुण इति मते अतीन्द्रियविषये वाक्ये संसर्गप्रमातः प्राक्तस्या असम्भवान्न शाब्द-प्रमाहेतुता ।

न्यायदीपः

ननु तत्र सत्यप्युक्तरूपगुणे कार्याभावः प्रतिबन्धनिमित्तौ नाऽहेतुत्व-निमित्त इति भावेनाशङ्क्य निराह ।। **न चेति** ।। **चिरन्तनमतेति** ।। ''न वैदिकप्रमाया गुण्यजन्यत्वेनेश्वरसिद्धिः'' । इत्यादि**मण्युक्त्या** प्रतीतश्चिरन्तनमतत्यागोऽयुक्तः स्यादित्यर्थः ।

ननु व्यधिकरणस्य गुणत्वायोगेन त्यागोऽपि विरोधिविषयकत्वा-त्प्रतिबन्धकत्वं स्यादेवेत्यतो न युक्तं तदपीत्याह ।। **किञ्चेति** ।। प्रतिबन्धकत्वं किं विरोधिविषयज्ञापनरूपेणोत साक्षात् । आद्येऽपि किं स्वरूपसती वा ज्ञाता सती लिङ्गतया वेति विकल्प्याद्यद्वयं क्रमेण निराह ।। **न तावदित्यादिना** ।। तदावेदनस्य विषयासत्वज्ञापनस्येत्यर्थः । समानाधिकरणज्ञानेनैतदावेदनस्य दृष्टचरत्वादिति भावः ।। **लिङ्गभूतयेति** ।। अग्निना सिञ्चेदिति वाक्येऽन्वयोऽसन् तथेश्वरप्रमाविषयत्वात्सम्मत-वदित्येवं लिङ्गभूतयेत्यर्थः । अन्त्यपक्षं निराह ।। **नापि सेति** ।। विरोधि-विषयत्वेप्ययुक्तं प्रतिबन्धकत्वमित्याह ।। **किञ्च वस्तुगत्येति** ।। ननु

प्रमाया गुणजन्यत्वान्यथानुपपत्त्यैव द्वैरूप्यमाकारभेदेनेश्वरप्रमायाः कल्प्यत इत्यत आह .।। **न चेति** ।।

प्रागुक्तमतान्तरमपि प्रातिस्विकदोषेण निराह ।। **किञ्चेति** ।। **अतीन्द्रियेति** ।। ''ज्योतिष्टोमेन स्वर्गकामो यजेत'' इत्यादिवाक्ये हेतुहेतुमद्भावादिरूपस्वर्गाद्यनन्वयप्रतियोगितावच्छेदकधर्मो ज्योतिष्टोमत्वादिर्न किन्तु कृषित्वादिरेवेति ज्ञानस्य तदन्वयप्रमित्यनन्तरभावित्वेन तद्धेतुत्वमयुक्तमित्यर्थः । योग्यताज्ञानस्य हेतुत्वोपपादनायोक्तमयोग्यतेत्यादि । साक्षादप्रतिबन्धकस्य कार्यानुकूलकिञ्चिद्विघटकत्वरूपत्वात्प्रतिबन्धकत्वस्येति भावः ।। **तद्विशेषाविति** ।। ''यत्सामान्ये यत्सामान्यं हेतुर्बाधकाभावे तद्विशेषयोरपि'' इति न्यायादिति भावः ।

तर्कताण्डवम्

एतेनायोग्यताज्ञानेन शाब्दज्ञानप्रतिबन्धात् तद्विघटनीस्य योग्यताज्ञानस्य शाब्दधीहेतुत्वे सिद्धे तद्विशेषौ योग्यताप्रमाभ्रमौ शाब्दप्रमाभ्रमौ प्रति जनकाविति निरस्तम् । अयोग्यताया उक्तरीत्या विषयाभावरूपत्वे बाधवद्विषयाभावव्याप्यरूपत्वे सत्प्रतिपक्षवत्साक्षात्प्रतिबन्धकत्वसम्भवे योग्यताज्ञानविघटकत्वकल्पकाभावात् । व्यभिचारज्ञानासंसर्गग्रहाप्रामाण्यज्ञानानि तु न साक्षादनुमितिप्रवृत्तिप्रतिबन्धकानि भिन्नविषयकत्वादित्यनुमितिप्रवृत्तिहेतुभूतव्याप्तिज्ञानसंसर्गग्रहप्रामाण्यज्ञानविघटकानि ।

तस्माच्छाब्दज्ञाने आकाङ्क्षाऽऽसत्ती अयोग्यतानिश्चयविरहश्च हेतवः । ते च भ्रमसाधारणाः । प्रमाणाबाधरूपा स्वरूपसती योग्यता तु प्रामाण्यान्तर्गतविषयसत्वात्मकत्वान्न गुणः । अप्रमासामग्रीतः

प्रमासामग्र्यां विशेषस्तु निर्दोषत्वमेवेति वक्ष्यते । तस्मादनित्यप्रमात्व-पक्षकानुमानेष्विवानित्यप्रत्यक्षप्रमात्वादिपक्षकानुमानेष्वपि तदनुगत-गुणाभावाद्बाधासिद्ध्यादीति ।

तदप्युक्तं ''अन्यथा'' इत्यादिना । अनुगतगुणाभावेपि जन्य-प्रत्यक्षप्रमात्वादेः कार्यतावच्छेदकत्वे पूर्वोक्ताव्यवस्थापातादित्यर्थः । एवमुत्तरात्रापि द्रष्टव्यम् ।।

न्यायदीपः

एतेनेत्येतद्व्यनक्ति ।। **अयोग्यतेति** ।। **उक्तरीत्येति** ।। ''योग्यता किं शब्दप्रतिपाद्यस्य संसर्गस्य सत्वं'' इत्यादिनोक्तरीत्येत्यर्थः ।। **विषया-भावव्याप्येति** ।। ''एकपदार्थसंसर्गः'' इत्यादिनोक्तरीत्येत्यनुषङ्गः ।। **योग्यताज्ञानेत्यादि** ।। तथाच योग्यताज्ञानस्यैव शब्दज्ञानहेतुत्वे ''यत्सामान्य'' इति न्यायानवतारान्न योग्यताप्रमाभ्रमौ गुणदोषौ सिद्ध्यत इति भावः ।

नन्वेवं व्याप्तिज्ञानमप्यनुमितिहेतुर्न स्यात् । तथा वैशिष्ट्यज्ञानं प्रमाण्यज्ञानं च प्रवृत्तिहेतुर्न स्यात् । तद्विघटकस्य व्यभिचारज्ञानादेः साक्षादेवानुमितिप्रतिबन्धकत्वसम्भवादित्यत आह ।। **व्यभिचारेति** ।। एवं योग्यतादेर्गुणत्वं निरस्य **मणौ** योग्यत्वादिकं गुण इत्यादिपदेन आकाङ्क्षाऽऽसत्त्योरप्युपादानं यत्तदप्ययुक्तमिति हेतुं वदन्नेवोपसंहरति ।। **तस्मादिति** ।।

अयोग्यतानिश्चयविरह इति ।। न तु योग्यताज्ञानमित्यर्थः । विवरिष्यते चैतद्योग्यतावाद इति भावः । भ्रमसाधारण इति हेतुगर्भम् । न गुण इत्यन्वयः । नन्वेवं गुणनिरासे कार्ये कारणवैजात्यनिमित्तत्वाज्ज्ञान-

सामान्यसामग्र्या अप्रमायामपि सत्त्वेन प्रमासामग्र्यामप्रमासामग्रीतो वैलक्षण्याभावे तत्कार्यवैलक्षण्यं न स्यादित्यत आह ।। **अप्रमेति** ।। **निर्दोषत्वमेवेति** ।। यद्यपि दोषाभावोपि न प्रामाण्यहेतुरिति वक्ष्यते । तथापि भिक्षुपादप्रसारन्यायेन गुणहेतुत्वनिरासाय दोषाभावस्य प्रमानिमित्तत्वोक्तिरिति ध्येयम् ।। **पूर्वोक्त्येति** ।। अनित्यप्रमामात्रे अनुगतगुणभङ्गान्तेक्त्येत्यर्थः ।

।। इति प्रत्यक्षादिप्रमासु प्रत्येकानुगतगुणभङ्गः ।। १३ ।।

स्थूलावयविप्रत्यक्षप्रमादौ भूयोऽवयवेन्द्रियसन्निकर्षादेर्हेतुत्वभङ्गः ।

अथापि स्यात् भ्रमसामान्ये प्रत्यक्षादिभ्रमे वानुगतदोषस्याभावेपि तत्तद्भ्रमविशेषे पित्तादिरिव स्थूलावयविप्रत्यक्षप्रमायां भूयोवयवेन्द्रियसन्निकर्षः, संशयविपर्ययोत्तरप्रत्यक्षप्रमायां विशेषप्रमा, नियमेन प्रमयोरनुमितिशाब्दप्रतीत्योः सत्यलिङ्गपरामर्शवाक्यार्थज्ञाने चान्वयव्यतिरेकाभ्यां हेतू । एवं च प्रमाया अप्रमाव्यावृत्ताननुगताधिकहेतुजन्यत्वात्परतस्त्वम् । त एवाननुगता हेतवः प्रमां प्रत्यसाधारणहेतुत्वेनोपाधिना गुणा इत्युच्यन्ते । तस्मादनित्यप्रमात्वमनित्यज्ञानत्वप्रयोजकाधिकप्रयोज्यं तदन्वयव्यतिरेकानुविधायित्वात् । अप्रमात्ववत् । अन्यथा अप्रमापि प्रमा स्यात् । न चाप्रमायामधिको दोषो हेतुरस्तीति वाच्यम् । तथात्वे भ्रमस्य प्रमात्वप्रयोजकजन्यत्वे सत्यधिकजन्यत्वेन प्रमाविशेषत्वापातादिति मम सिद्धान्तरहस्यमिति चेन्मैवम् ।

भूयोवयवेन्द्रियसन्निकर्षे शङ्खत्वादिविशेषदर्शने च सत्यपि पीतः

शङ्ख इत्यादिभ्रमस्य वंशे उरगभ्रमस्य बाष्पावयवे धूमावयविभ्रमेऽवयव्यंशे एव भ्रमस्य दर्शनेनान्वयव्यभिचारात् ।

यदि च तत्र पित्तमण्डूकवसाञ्जनादिदोषप्रतिबन्धात् प्रमानुत्पत्तिस्तर्ह्यावश्यकत्वाद्दोषाभाव एव हेतुः मम तु दोषाभावेनाप्रमारूपविपरीतकार्यानुत्पत्तौ ज्ञानसामग्र्येव प्रमोत्पत्तिः ।

न्यायदीपः

यत्तूक्तं **मणौ** "तत्तत्प्रमायां भूयोऽवयवेन्द्रियसन्निकर्षयथार्थलिङ्गसादृश्यवाक्यार्थज्ञानानां यथायथं प्रत्येकमेव गुणत्वम् । अन्वयव्यतिरेकात् । तत्तदप्रमायां पित्तादिलिङ्गभ्रमादीनां दोषत्ववत् प्रत्यक्षे विशेषदर्शनमपि गुणः । तदनुविधानात्" इत्यादितत्तात्पर्यमाशङ्कते ।। **अथापि स्यादित्यादिना** ।। **संशयेति** ।। संशयोत्तरविपर्ययोत्तरेत्यर्थः ।। **विशेषेति** ।। व्याप्येत्यर्थः । प्रमयोरिति प्रतीत्योर्विशेषणम् । तावता कथं प्रमात्वस्य परतस्त्वमित्यत आह ।। **एवं चेति** ।। उक्तसन्निकर्षादिः हेतुत्वे सतीत्यर्थः । गुणाजन्यत्वात्कथमेतदित्यत आह ।। **त एवेति** ।। **असाधारणेति** ।। भ्रमव्यावृत्तेन्यर्थः ।

मणिकृदभिमतमनुमानमाह ।। **तस्मादिति** ।। उक्तसन्निकर्षादिर्गुणत्वेन तज्जन्यत्वेन प्रमायाः परतस्त्वसम्भवात्प्रयोग उच्यत इत्यर्थः ।। **तदन्वयेति** उक्तरूपसन्निकर्षादिलक्षणाधिककारणपरामर्शः । हेतोरप्रयोजकत्वनिरासाय विपक्षे बाधकमाह ।। **अन्यथेति** ।। अनित्यज्ञानत्वप्रयोजकादधिकाप्रयोज्यत्वे तन्मात्रप्रयोज्यत्व इत्यर्थः । आपादकासिद्धिमाशङ्क्याह ।। **न चेति** ।। **प्रमात्वप्रयोजकेति** ।। अनित्येति योज्यम् । अनित्यज्ञानत्वप्रयोजकस्यैवानित्यप्रमात्वप्रयोजकत्वेन त्वदभिमतेरिति भावः ।। **इत्यादिभ्रमस्येति** ।। तिक्तो गुड इत्यादिरादिपदार्थः ।। **वंशेति** ।।

[१]अनुरगत्वस्य स्पर्शने दर्शने भूयोऽवयवेन्द्रियसन्निकर्षे सत्यपि मण्डूकवसाक्त-नेत्रस्य मण्डूकवसादोषेण जायमानस्य वंशे उरगभ्रमस्येत्यर्थः ।

तदिन्द्रियजप्रत्यक्षप्रमायां तदिन्द्रियजविशेषदर्शनं हेतुरिति विशेषदर्शनस्य हेतुत्वे भवेदेवं विशेषविवक्षा । तदेवायुक्तमिति ''एवं भ्रमोत्तरप्रमायामपि'' इत्यादिना वक्ष्याम इति भावेन स्थलान्तरेप्युक्तसन्निकर्षस्य व्यभिचारमाह ।। **बाष्पेति** ।। **धूमेति** ।। धूमरूपावयवीत्यर्थः ।

यत्र स्थूलावयविप्रत्यक्षे भूयोऽवयवेन्द्रियसन्निकर्षो गुण इत्युक्तं तस्मि-न्नेवेति विरोधस्फोरणायावयव्यंश एवेत्युक्तम् । अञ्जनादीत्यादिपदेन सारूप्यादिग्रहः ।। **दोषाभाव एवेति** ।। यादृच्छिकसंवादिनि दोषाभावः प्रमाव्यभिचारीति तूत्तरभङ्गे निरसिष्यत इति भावः । यत्तु सन्निकर्षाद्युत्कर्षेण प्रमोत्कर्षात्सन्निकर्षादिरेव हेतुरिति । तन्न । उक्तस्थलेषु तदुत्कर्षे सत्यपि प्रमानुदयेन व्यभिचारात् ।

ननु सिद्धान्ते दोषाभावस्य प्रामाण्याहेतुत्वादुक्तस्थले प्रामाण्यप्रयोजक-ज्ञानसामग्रीसत्त्वात्प्रमोत्पत्तिः स्यादित्यत आह ।। **मम त्विति** ।। यद्वा तावतापि सिद्धान्ते स्वतस्त्वहानिरित्यत आह ।। **मम त्विति** ।।

तर्कताण्डवम्

एवं भ्रमोत्तरप्रमायामपि तदनुत्तरप्रमायां या कृत्स्ना सामग्री भ्रमकाले सा न वर्तते चेत्तदभावादेव कार्याभावो न तु विशेषदर्शनाभावादिति विशेषप्रमा न हेतुः । वर्तते चेद्विशेषदर्शनाभावेपि तदनुत्तरप्रमेव तदुत्तर-

---

१. अनुरगत्वव्याप्यस्य इति स्यात् । तथाचैवं वाक्यार्थः वर्णनीयमिति भाति । उरगत्वाभावव्याप्यस्य काठिन्यादेः पुरोवर्तिवंशे सत्यपि, वंशदर्शने स्पर्शने च सत्यपि दोषवशात् भ्रमो जायत इति । पाठान्तरे ''अनुरगत्वस्य'' इति नास्ति ।

प्रमाप्युत्पद्येतैव । न हि कार्येवैचित्र्याभावेपि कालभेदमात्रेण विचित्र-हेत्वपेक्षा । यदि तदा संशयादिदोषः प्रतिबन्धकस्तर्ह्यावश्यकत्वाद् दोषाभावादेव प्रमास्तु ।

किञ्च करादौ चरणादिभ्रमजन्ये संशयानन्तरभाविनि प्रमारूपे पुरुषसाक्षात्कारे विशेषप्रमारूपस्य वह्न्यालोके धूमभ्रमजन्यायां नियमेन प्रमायामनुमितौ यथार्थलिङ्गपरामर्शरूपस्य भ्रान्तविप्रलम्भक-वाक्यजन्यायां नियमेन प्रमायां शाब्दप्रतितौ यथार्थवाक्यार्थज्ञानरूपस्य गुणस्य अभावेपि प्रमात्वदर्शनेन व्यतिरेकव्यभिचारोपि ।

न्यायदीपः

[१]विशेषदर्शनपदेन विशेषदर्शनसामान्यविवक्षायां प्रागुक्तान्वयव्यभिचार-लगनेप्युक्तरूपविशेषदर्शनविवक्षायां नोक्तदोषलगनमित्यतः । अनौपाधिक-भ्रमोत्तरप्रत्यक्षप्रमायामेव विशेषदर्शनं गुणोऽतो नोक्तदोषः इत्यतो विशेष-दर्शनाभावे भ्रमोत्तरप्रमाभाव इति व्यतिरेकोऽन्यथासिद्धो न विशेषदर्शनहेतुता कल्पक इति भावेन दोषान्तरमाह ।। **एवं भ्रमेति** ।। संशयविपर्यय-रूपभ्रमेत्यर्थः । प्रमायामपि न विशेषप्रमाहेतुरित्यन्वयः । ननु भ्रमानुत्तर-प्रत्यक्षसामग्र्या कथं तदुत्तरप्रत्यक्षप्रमा जायेतेत्यत आह ।। **न हीति** ।। **विचित्रेति** ।। विशेषदर्शनरूपेत्यर्थः ।। **संशयादीति** ।। विपर्यय आदिपदार्थः ।

ननु संशयस्य ग्राह्यसंशयपर्यवसन्नतया प्रमाण्यापरिपन्थित्वात्कथं प्रतिबन्धकत्वशङ्का । अन्यथा तस्मिन् सति विशेषदर्शनादपि प्रत्यक्षा-

---

१. "विशेषदर्शन" इत्यारभ्य "नोक्तदोषलग्नमित्यतः" इति पर्यन्ते ग्रन्थः पाठान्तरे नास्ति ।

नापत्तेरिति चेन्न । विशेषदर्शनविरहविशिष्टसंशयादेः प्रतिबन्धकत्वेन तदभिप्रायेण संशयादिदोषः प्रतिबन्धक इत्युक्तेः ।

।। **दोषाभावादेवेति** ।। ननु विशेषदर्शनविरहविशिष्टसंशयादिदोषाभावो हि संशयादिस्थले विशेषादर्शनरूपविशेषणाभावेनैव वाच्य इति विशेषदर्शनमेव पर्यवसन्नमिति चेन्न । तावता तस्य प्रतिबन्धकरूपदोषाभावत्वेनैव हेतुत्वप्राप्त्या तेन रूपेण हेतुत्वाऽप्राप्तेः । विशिष्टाभावसम्पादनेनान्यथोपक्षीणत्वाच्च ।

रुचिदत्तादयस्तु भ्रमस्थले विशेषादर्शनसहकृतसंशयादेः प्रतिबन्धकत्वे संशयोत्पत्तिकाले प्रत्यक्षापत्तिः । न च ''यज्ज्ञानं यत्र प्रतिबन्धकं तत्सामग्र्यपि तत्र प्रतिबन्धिका'' इति न्यायात्तदा संशयसामग्रीप्रतिबन्धान्न प्रत्यक्षमिति वाच्यम् । एवमपि धर्मिज्ञानकाले दैवात्पुरुषत्वादिज्ञानात्वतः पुरुषत्वादिनिश्चयापत्तेः । संशयस्य तत्सामग्र्या वा तदानीमभावात् । न च दोषस्य प्रतिबन्धकत्वान्न तदा प्रत्यक्षमिति वाच्यम् । तर्ह्यावश्यकत्वात्संशयकालेऽपि तत एव दोषात्प्रत्यक्षानुत्पत्तिरस्तु । किं संशयस्य प्रतिबन्धकत्वाभ्युगमेन । तथाच विशेषदर्शने सति विशेषादर्शनरूपदोषाभावादेव प्रत्यक्षप्रमोत्पत्तिर्न तु निरुक्तविशिष्टाभावस्य प्रत्यक्षप्रमाहेतुत्वम् । मानाभावात् । न च विशेषादर्शनस्य दोषत्वे संशयानुत्तरप्रमानुदयापत्तिरिति शङ्क्यम् । फलबलेनैतस्य क्वचिदेव दोषत्वकल्पनादित्याहुः ।

दोषाभावादेव साऽस्त्वित्यनन्तरं मम त्वित्यादिवाक्यमत्राप्यनुवर्त्य योज्यम् । भ्रमोत्तरप्रमाव्यतिरेकस्य विशेषदर्शनत्वेन विशेषदर्शनव्यतिरेकनिमित्तता नास्ति, किन्तु दोषनिमित्ततेत्यन्यथासिद्धिमुक्त्वा सत्यपि विशेषप्रमाव्यतिरेकादौ प्रमोत्पत्तेर्व्यभिचारान्न विशेषप्रमायथार्थलिङ्गपरामर्शादेः प्रमां प्रति हेतुत्वं दूरे गुणत्वेनेति भावेनाह ।। **किञ्चेति** ।।

ननूक्तस्थले सर्वत्रेश्वरप्रमामादाय विशेषप्रमासत्यपरामर्शयथार्थवाक्यार्थ-ज्ञानानां न व्यतिरेकव्यभिचार इति चेन्न । अस्मिन्पक्षे ''न चेश्वरे सोऽस्तीति वाच्यं'' इत्यादिना दोषाणां पूर्वमेवोक्तत्वादिति भावः ।

तर्कताण्डवम्

किञ्च दुष्टायां ज्ञानसामग्र्यां सत्यामपि गुणव्यतिरेकेण प्रमा-व्यतिरेको न दृष्ट इति गुणो न हेतुः । दृष्टो विसंवादिशुकादिवाक्ये, तत्र भ्रान्तिविप्रलम्भादिदोषाभावादिति चेन्न । तत्राप्यनित्यवाक्य-दोषस्य विवक्षितार्थतत्त्वज्ञानाभावस्य वा शुकवाक्यमूलभूतवाक्य-प्रयोक्तृपुंनिष्ठस्य भ्रान्त्यादेर्मूलदोषस्य वा सत्वात् । गुणव्यतिरेकेण प्रमात्वव्यतिरेके सिद्धेपि भ्रमत्वार्थं त्वयापि भ्रमत्वप्रयोजकत्वेन क्लृप्तस्य दोषस्य तत्र वक्तव्यत्वाच्च । अभावोपि हि करणापाटव-विशेषादर्शनादिरिव लोकव्यवहारात्प्रमाव्यावृत्तकारणत्वात् तत्त्वज्ञान-विरोधित्वाच्च दोष एव । अङ्गीकृतं च त्वयापि नीलं तम इति भ्रमे दोषान्तराभावेनाधिष्ठानभूतस्याभावरूपस्य तमस एव दोषत्वम् । क्वचिद्गुणसन्निधानन्तु रासभवद्यादृच्छिकं वा गन्धं प्रति क्लृप्तकारण-गन्धप्रागभावसहभूतपाकजरसप्रागभाववत् प्रमां प्रति क्लृप्तप्रयोजकदोषा-भावसहभूतत्वेनान्यथासिद्धं वा ।

किञ्च त्वयाप्यन्याथासिद्धशब्दस्य यौगिकत्व आत्माश्रयाल्लोक-व्यवहारानुसारेण पारिभाषिक एवार्थ उक्तः । एवं च भ्रमरूपविपरीत-कार्योत्पादकदोषनिरासकस्य गुणस्य विपरीतकार्योत्पादकनिरास-कत्वरूपान्यैवान्यथासिद्धिः परिभाष्यताम् । लोके घटं प्रति दण्डत्व इव कदलीकाण्डरूप विपरीतकार्योत्पादकस्य वेत्रबीजसम्बन्धिदा-वाग्निदाहस्य विरोधिनि पदार्थे वेत्राङ्कुरं प्रति कारणत्वाव्यवहारात् ।

दाहविरोधिनो हेतुत्वे क्काप्युत्सर्गापवादाभावप्रसङ्गाच्च । यस्य हि स्वसामाग्रीवशेन प्रसक्तिस्तदौत्सर्गिकम् । सत्यामपि सामग्र्यां यद्वशात्तद्विपरीतं कार्यं भवति तत्तस्यापवादकम् । न च दाहविरोधिनो हेतुत्वे दाहस्थले वेत्राङ्कुरसामग्र्यस्ति । अन्यथा दण्डाभावाद्घटानुत्पत्तिरपि तदुत्पत्तेरपवादः स्यात् ।

न्यायदीपः

ननु गुणव्यतिरेकेण प्रमाव्यतिरेकस्यापि दर्शनादुक्तस्थलेष्वपि कश्चन गुणः कल्प्यत इत्यतो व्यतिरेकासिद्धिदोषमाह ।। **किञ्चेति** ।। शङ्कते ।। **दृष्ट इति** ।। सत्यपि दोषाभावे गुणव्यतिरेकेण प्रमाव्यतिरेक इत्यनुषङ्गः । तत्र दोषाभावसत्वमुपपादयति ।। **तत्रेति** ।। आदिपदेन प्रमादकरणापाटवयोर्ग्रहः । अप्रामाण्यस्य दोषजन्यत्ववादिना त्वयापि तत्र कश्चिद्दोषः कल्प्यः । अन्यथा तस्य परतस्त्वाहानेरित्याह ।। **गुणव्यतिरेकेणेति** ।। ननु विवक्षितार्थतत्वज्ञानाभावस्याभावरूपत्वात्कथं दोषत्वमित्यत आह ।। **अभावोऽपि हीति** ।। अन्वयाभावादिरादिपदार्थः ।। **अधिष्ठानेति** ।। नैल्यारोपाधिष्ठानभूतस्यालोकाभावरूपस्येत्यर्थः । कुत्रचिद्वा गुणानुविधानस्य का गतिरित्यत आह ।। **क्वचिदिति** ।। प्रमायां गुणानुविधानमभ्युपेत्यापि **मण्युक्तान्यथासिद्धिमाह** ।। **गन्धमिति** ।।

ननु रसप्रागभावोन्यत्र कार्ये क्लृप्तान्वयव्यतिरेकत्वादस्त्वन्यथासिद्धः । गुणसन्निधिस्तु नान्यत्र कार्ये क्लृप्तान्वयादिः । प्रकृतकार्येण विना कार्यान्तरोपक्षीणो ह्यन्यथासिद्धः । न हि गुणः कार्यान्तरेण सिद्धः । येनान्यथासिद्धः स्यादित्यत आह ।। **किञ्चेति** ।। **आत्माश्रयादिति** ।। कारणलक्षणशरीरप्रविष्टस्यान्यथासिद्धशब्दस्य कार्यान्तरजनकत्वमिति वा अनेन विना कारणान्तरेण कार्यं सिद्धमुत्पन्नमिति वार्थोक्तावात्माश्रयादित्यर्थः ।।

पारिभाषिक एवेति ।। ''अनन्यथासिद्धनियतपूर्ववर्तिजातीयत्वं वा कारणत्वम् । अन्यथासिद्धत्वं च त्रिधा । येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तत्तथा । घटं प्रति दण्डरूपस्य । अन्यं प्रति पूर्ववर्त्तित्वे ज्ञात एव यं प्रति यस्य पूर्ववर्तित्वमवगम्यते । शब्दं प्रति पूर्ववर्त्तित्वे ज्ञात एव ज्ञानं प्रत्याकाशस्य । अन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतत्वम् । यथा गन्धवति गन्धानुत्पादाद्गन्धं प्रति गन्धप्रागभावस्य नियतपूर्ववर्तित्वकल्पनात् पाकजस्थले गन्धं प्रति रूपादिप्रागभावानामन्यथासिद्धत्वं'' इत्यादिग्रन्थेनानुमानखण्डे कारणतावाद उक्त इत्यर्थः । अन्यैवान्यथासिद्धिरित्यनन्तरं लोकव्यवहारानुसारेणेत्यनुकर्षः । स चासिद्ध इत्याह ।। **लोक इति ।।** दण्डत्वे यथा कारणताऽव्यवहारस्तथा कारणत्वाव्यवहारात् । किन्त्वन्यथासिद्धत्वेनैव व्यवहारादित्यर्थः । एतेन ''किञ्चेदं गुणान्वयव्यतिरेकित्वं अन्यत्रानुपक्षीणत्वं सामान्यं वा । नाद्यः । दोषनिरासोपक्षीणत्वादि''त्यादिदेवताधिकरणटीका विवृता ।

तर्कताण्डवम्

अत एव यत्र संशयादिरूपा दोषाः प्रतिबन्धकाः तत्रैव तन्निरासार्थं भूयोवयवेन्द्रियसन्निकर्षविशेषदर्शनादिगुणापेक्षा । अन्यथा संशयोत्तर-प्रमायामिव तदनुत्तरप्रमायामपि विशेषदर्शनमपेक्ष्येत ।

किञ्च दोषनिरासेऽवश्यं कारणस्य गुणस्य प्रमायामपि कारणत्वे गौरवम् । नच प्रमारूपं कार्यमनन्यथासिद्धम् । येनोभयं कल्प्येत ।

न्यायदीपः

लौकिकव्यवहाराभावेप्यस्तु हेतुत्वमित्यतः ''औत्सर्गिकत्वात् प्रामाण्यस्य'' इति तत्त्वनिर्णयटीकोक्तं विपक्षबाधकत्वेन संयोज्य तद्व्यनक्ति

।। **देहेत्यादिना** ।। अस्त्वेवमुत्सर्गापवादशब्दार्थः । विरोधिनोपि हेतुत्वे तदभावप्रसङ्गः कुत इत्यत आह ।। **न चेति** ।। दाहस्थल इत्यादि ।। तथा च ''सत्यामपि तत्सामग्र्यां'' इत्यादेरभावादुत्सर्गापवादाभावप्रसङ्गः इत्यर्थः ।

एतेन तत्वनिर्णयटीकायां ज्ञप्तिस्थलेऽभिहितमिदं बाधकमुत्पत्तिस्थलेप्यनुसन्धेयमिति सूचितम् ।। **अन्यथेति** ।। सामग्र्यभावेऽपि कार्यानुत्पत्तेरपवादत्व इत्यर्थः ।। **तदुत्पत्तेरिति** ।। घटोत्पत्तेरित्यर्थः ।। **अत एवेति** ।। दोषनिरासोपक्षीणत्वादेवेत्यर्थः ।। **अन्यथेति** ।। सर्वत्र प्रमामात्रे तद्धेतुतायामित्यर्थः ।

नन्वस्तु दोषनिरासकत्वं गुणस्य प्रामाण्यहेतुत्वं चास्तु । अप्रामाण्ये गुणनिरासे च दोषाणां हेतुत्वमिवेत्यतः ''न चोभयकारणत्वकल्पकमस्ति'' इति भाष्यटीकां विवृण्वन्नाह ।। **किञ्चेति** ।। प्रमायाः परतस्त्वान्यथानुपपत्तिप्रमाणसिद्धगौरवं न दोषायेत्यत आह ।। **न चेति** ।। अनन्यथेति ।। ज्ञानसामान्यसामग्रीतो न सिद्धमिति न चेत्यर्थः ।

तर्कताण्डवम्

एतेन अप्रमापि प्रमाविशेषः स्यादिति निरस्तम् । प्रमात्वप्रयोजिकाया अदुष्टसामग्र्या भ्रमेऽभावात् । अन्यथा दावाग्निदग्धवेत्रबीजजन्यकदल्यङ्कुरोपि वेत्राङ्कुरविशेषः स्यात् ।

ननु तत्र दाहेन दोषेण सहजाया वेत्राङ्कुरजननशक्तेर्नाशाद् विपरीतशक्तेश्चोत्पादाद्वेत्राङ्कुरसामग्र्येव नास्तीति चेत्समं प्रकृतेपि । ममापि लोकसिद्धौत्सर्गिकापवादकसाम्यमेव प्रामाण्याप्रामाण्ययोरपेक्षितम् ।

अन्ये तु यथा नीलरूपसामग्रीजन्यस्यापि चित्ररूपस्य न नीलरूपविशेषत्वम् । यथा च विरुद्धनिश्चयद्वयसामग्रीजन्यस्य संशयस्य न निश्चयविशेषत्वम् । यथा च पाकजरूपसामग्रीजन्यस्य रसस्पर्शादिर्न रूपविशेषत्वं तथा भ्रमस्यापि न प्रमाविशेषत्वमित्याहुः ।

न्यायदीपः

प्रागुक्तानुकूलतर्कं निराह ।। **एतेनेति** ।। प्रमायाः दोषाभावसहितज्ञान-सामग्रीजन्यत्वकथनेनेत्यर्थः । परमुखेनैव समाधिं वाचयति ।। **नन्विति** ।। अस्त्वेवं लोके प्रामाण्यादौ तु कथमित्यत आह ।। **ममापीति** ।। अनन्यथासिद्धशब्दार्थे तव यथा तथेत्यपेरर्थः ।

प्रमायामभिमतसामग्र्यभावेनैव भ्रमस्य न प्रमाविशेषत्वमिति स्वयमेकं समाधिमुक्त्वा अन्यापदेशेन समाध्यन्तरमाह ।। **अन्ये त्विति** ।। **न नीले-त्यादि** ।। किन्तु विजातीयरूपान्तरत्वमित्यर्थः । तथैवोदयनाद्युक्तेरिति भावः ।। **विरुद्धेति** ।। ''विरुद्धोभयारोपसामग्रीद्वयसमाजादुभयारोप एक एव भवति । स एव संशय'' इति ज्ञप्तिप्रामाण्ये **मण्युक्तेरिति** भावः ।। **यथाच पाकजेति** ।। तेजस्संयोगदेशकालादृष्टादिसामग्र्यास्तुल्यत्वादिति भावः ।

अस्मिन्पक्षे दृष्टान्तानामसम्प्रतिपत्तिर्वक्ष्यमाणदिशा प्रमासामग्र्यां दोषाभावस्यावश्यकत्वात् सामग्र्यभावादेव तद्विशेषत्वाभावोपपत्तावुक्त-समाधिरयुक्ता इत्यरुचिबीजं ध्येयम् ।

तर्कताण्डवम्

तस्मादन्वयव्यभिचाराद्व्यतिरेकव्यभिचारादन्यथासिद्धेश्च गुणो न प्रमाहेतुः । भ्रमप्रतिबन्दी तूद्धरिष्यते । एतदप्युक्तं ''अन्यथा''

इत्यादिना । अन्वयव्यभिचारे व्यतिरेकव्यभिचारे औत्सर्गिक-कार्यापवादक़निरासकत्वेन अन्यथासिद्धौ च सत्यामपि गुणस्य हेतुत्वे रासभादेरपि हेतुत्वप्रसङ्गेन हेत्वहेतुव्यवस्थित्ययोगादित्यर्थः ।

न्यायदीपः

तस्मादित्युक्तं व्यनक्ति ।। **अन्वयेति** ।। पीतः शङ्ख इत्यादिभ्रम इत्यर्थः ।। **व्यतिरेकेति** ।। ''करादौ चरणादिभ्रमजन्य'' इत्यादिनोक्त-प्रमाविशेष इत्यर्थः ।। **अन्यथेति** ।। विरोधिनिरासोपक्षीणत्वाच्चेत्यर्थः । उभयकारणत्वे गौरवात्कल्पकाभावादप्रमायाः प्रमाविशेषत्वापत्तिरूपबाधका-भावाच्चेत्यपि ध्येयम् ।

नन्वेवं दोषस्यापि भ्रमहेतुत्वखण्डनसम्भवेन भ्रमोपि स्वत एव स्यात् । तत्र या गतिः सा प्रमायामपीत्यत आह ।। **भ्रमेति** ।। स्वतस्त्वानुमानोक्त्य-नन्तरमुद्धरिष्यत इत्यर्थः । एतदपीत्युक्तमेवान्यथादिशब्दार्थविवरणेन व्यनक्ति ।। **अन्वयेत्यादिना** ।।

।। इति स्थूलावयविप्रत्यक्षप्रमादौ भूयोवयवेन्द्रियसन्निकर्षादेर्हेतुत्वभङ्गः ।। १४ ।।

प्रमायां दोषाभावस्य हेतुत्वभङ्गः

अस्तु तर्हि दोषाभावादेव प्रमा । तस्यानन्यथासिद्धान्वय-व्यतिरेकित्वादिति चेन्न । कारणतावच्छेदकप्रतिबन्धकाभावादि-साधारणस्य प्रयोजकत्वमात्रस्यापादन इष्टत्वात् ।।

''अदुष्टमिन्द्रियं त्वक्षं तर्कोऽदुष्टस्तथानुमा आगमोऽदुष्टवाक्यं च''

इति ब्रह्मतर्के, ''निर्दोषार्थेन्द्रियसन्निकर्षः प्रत्यक्षम् निर्दोषोपपत्तिरनुमा निर्दोषः शब्द आगमः'' इति प्रमाणलक्षणे; ''दोषाभावस्य कारणत्वे च नास्माकमनिष्टम् तावता वेदापौरुषेयत्वाव्याघातात्'' इति भाष्यटीकायां चोक्तेः । दोषाभावस्यापेक्षि-तत्वेपि प्रमाजननशक्तिस्सहजा, न तु भ्रमजननशक्तिवदाधेयेत्येतावतैव प्रामाण्यस्वतस्त्वसिद्धेश्च ।

उक्तं हि सुधायां ''इन्द्रियादीनामौत्सर्गिकी शक्तिः प्रमाण्यजनने दोषापवादादप्रामाण्यमपि जनयति'' इति कारणत्वस्यापादनं त्वयुक्तम् ।।

न्यायदीपः

।। **अस्त्विति** ।। तथाच ज्ञानहेतुतोऽधिकजन्यत्वात्स्वतस्त्वहानिरिति भावः । प्रयोजकत्वमापाद्यते कारणत्वं वा । आद्य आह ।। **कारणेति** ।। प्रतिबन्धकाभावाहेतुताया वक्ष्यमाणत्वाशयेनाह ।। **प्रतिबन्धकाभावादीति** ।। कारणकारणादिरादिपदार्थः ।। **प्रयोजकत्वेति** ।। तद्व्यतिरेक[१]प्रयुक्तव्यतिरेकप्रतियोगित्वमात्रस्य न त्वनन्यथासिद्धस्येत्यर्थः ।

इष्टत्वमेव क्रमात्सूत्रभाष्यटीकाकृतां सम्मत्या दृढयति ।। **अदुष्टमिति** ।। अक्षं अनुमा आगमः इति लक्ष्यनिर्देशः । तत्त्वनिर्णयोदाहृतब्रह्मतर्क इत्यर्थः । मानत्रयेपि दोषाभावापेक्षाद्योतनाय त्रितयोदाहरणम् ।। **टीकायां चेति** ।। देवताधिकरणभाष्यस्य टीकायामित्यर्थः । तत्र कारणत्वे चेत्युक्तिः प्रयोजकत्वे चेत्यर्थ इत्यग्रे व्यक्तम् ।

नन्वेवमपि कथं न स्वतस्त्वहानिः । ज्ञानहेत्वतिरिक्तानपेक्षत्वा-

१. 'प्रयोजक' इति पाठान्तरम् ।

भावादित्यत आह ।। **दोषाभावस्येति** ।। **एतावतैवेति** ।। दोषाभावस्य कारणत्वपक्षे. शक्त्याधायकत्वेपि प्रयोजकत्वपक्षे तदभावादिति भावः ।। **उक्तं हीति** ।। दोषेत्यादिनोक्तं प्रमेयं जिज्ञासाधिकरणसुधायामुक्तमित्यर्थः । **औत्सर्गिकी** उत्सर्गः सामान्यं ज्ञानमात्रजनिकेवेत्यर्थः । दोषापवादादित्यस्य दोषाहितशक्तिरूपापवादादित्यर्थ इति भावः ।

नन्वेवं गुणस्यापि प्रयोजकत्वोपपत्तौ किं तन्निरासायासेनेति चेन्न । गुणवादिनोपि दोषाभावस्य आवश्यकत्वोपपादनात् । गुणस्य दोषनिरासोपक्षीणतोपपादनाच्चेति भावः ।

तर्कताण्डवम्

क्लृप्तकारणं चक्षुरादिकमादायैव दोषाभावस्य प्रमां प्रति नियतपूर्वभावित्वग्रहणेन दण्डत्ववत् दण्डगतदार्ढ्यवत् शक्तिः कारणतावच्छेदिकेति पक्षे शक्तिवत् उपस्थितेष्टभेदाग्रहः प्रवर्तक इत्यत्रोपस्थितिवत् विषयत्वेन विषयजन्यं ज्ञानं प्रत्यक्षमित्यत्र विषयत्ववच्च चक्षुरादिनिष्ठकारणतावच्छेदकत्वमात्रेणान्वयव्यतिरेकयोरुपपत्तौ दोषाभावे कारणतायाः दोषाभावत्वे कारणतावच्छेदकतायाश्च कल्पने गौरवात् । उक्तरीत्या सत्यपि दोषे प्रमात्वदर्शनेन प्रमासामान्यं प्रति व्यतिरेकव्यभिचाराच्च ।

उक्तं हि विष्णुतत्वनिर्णयटीकायां ''दोषाभावोपि न प्रामाण्यकारणम् । यादृच्छिकसंवादिषु सत्यपि दोषे प्रमाणज्ञानोदयात्'' इति ।

किञ्च प्रतिबन्धकाभावे लोके कारणत्वाव्यवहारादौत्सर्गिककार्यापवादकविरोधित्वरूपान्यैवान्यथासिद्धिः परिभाष्यतामित्युक्तम् । उक्तं हि सुधायां ''तर्हि दोषाभावः कारणमित्यायातमिति चेन्न । तथा सत्युत्सर्गापवादयोः काप्यभावप्रसङ्गात् इति ।

न चैवं भाष्यटीकायाः विष्णुतत्त्वनिर्णयटीकया सुधया च विरोध इति शङ्क्यम् । भाष्यटीकायां कारणशब्दस्यास्मदुक्तं यद्घटं प्रति कुलालपित्रापि साधारणं तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरूपं प्रयोजकत्वं तन्मात्रपरत्वात् । उक्तं हि 'तस्माद्गुणेभ्यो दोषाणामभावस्तदभावतः अप्रमाण्यद्वयाभावस्तेनोत्सर्गोनपोदितः'' इति ।

न्यायदीपः

द्वितीयं निराह– **कारणत्वस्येति** । कुत इत्यतः ''येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तत्तेनान्यथासिद्धं'' इति **मण्युक्तान्यथासिद्धि**मत्वादित्याह ।। **क्लृप्तेति** ।। **ग्रहणेनेति** ।। त्वदुक्तपारिभाषिकान्यथासिद्धत्वेन हेतुनेत्यर्थः । अस्य चक्षुरादिनिष्ठकारणतेत्यादिनान्वयः ।

गुरुमतेनाह ।। **उपस्थितेति** ।। **उपस्थितम्** ।। बुद्धौ विपरिवर्तमानं यदिष्टं रजतादि तेन पुरोवर्तिनो भेदाग्रह इत्यर्थः । उपस्थितेरपि पुरोवृत्तिगोचरप्रवृत्तिकारणत्वे वैशिष्ट्यज्ञानस्यापि हेतुतापत्त्या भेदाग्रहः प्रवृत्तिहेतुरिति मतहान्यापत्तेर्हेतुतावच्छेदकत्वं यथा तथेत्यर्थः । **न्यायमते**नाह ।। **विषयत्वेनेति** ।। **प्रत्यक्षमित्यत्रेति** ।। इति प्रत्यक्षलक्षण इत्यर्थः । अन्यथासिद्धिमुक्त्वा व्यभिचारं चाह ।। **उक्तेति** ।। ''किञ्च करादौ चरणादिभ्रमजन्य'' इत्यदिनोक्तरीत्येर्थः ।

ननु दोषस्य प्रतिबन्धकतया तदभावस्य स्वतन्त्रावेव कार्यान्वयव्यतिरेकावतो न प्रागुक्तान्यथासिद्धिर्युक्तेत्यत आह ।। **किञ्चेति** ।। अन्यथासिद्धशब्दस्य त्वया यौगिकार्थं त्यक्त्वा लोकव्यवहारानुरोधेन त्रिधा पारिभाषिकार्थोक्तेरिहापि व्यवहारानुरोधेन त्वदुक्तान्यथासिद्धित्रयादन्यैवान्यथासिद्धिः परिभाष्यतामित्युक्तमतीतभङ्ग इत्यर्थः ।। **उक्तं हीति** ।। दोषा-

भावादित्यत आह ।। **दोषाभावस्येति** ।। **एतावतैवेति** ।। दोषाभावस्य कारणत्वपक्षे. शक्त्याधायकत्वेपि प्रयोजकत्वपक्षे तदभावादिति भावः ।। **उक्तं हीति** ।। दोषेत्यादिनोक्तं प्रमेयं जिज्ञासाधिकरणसुधायामुक्तमित्यर्थः । **औत्सर्गिकी** उत्सर्गः सामान्यं ज्ञानमात्रजनिकेवेत्यर्थः । दोषापवादादित्यस्य दोषाहितशक्तिरूपापवादादित्यर्थ इति भावः ।

नन्वेवं गुणस्यापि प्रयोजकत्वोपपत्तौ किं तन्निरासायासेनेति चेन्न । गुणवादिनोपि दोषाभावस्य आवश्यकत्वोपपादनात् । गुणस्य दोषनिरासोपक्षीणतोपपादनाच्चेति भावः ।

तर्कताण्डवम्

क्लृप्तकारणं चक्षुरादिकमादायैव दोषाभावस्य प्रमां प्रति नियतपूर्वभावित्वग्रहणेन दण्डत्ववत् दण्डगतदार्ढ्यवत् शक्तिः कारणतावच्छेदिकेति पक्षे शक्तिवत् उपस्थितेष्टभेदाग्रहः प्रवर्तक इत्यत्रोपस्थितिवत् विषयत्वेन विषयजन्यं ज्ञानं प्रत्यक्षमित्यत्र विषयत्ववच्च चक्षुरादिनिष्ठकारणतावच्छेदकत्वमात्रेणान्वयव्यतिरेकयोरुपपत्तौ दोषाभावे कारणतायाः दोषाभावत्वे कारणतावच्छेदकतायाश्च कल्पने गौरवात् । उक्तरीत्या सत्यपि दोषे प्रमात्वदर्शनेन प्रमासामान्यं प्रति व्यतिरेकव्यभिचाराच्च ।

उक्तं हि विष्णुतत्वनिर्णयटीकायां ''दोषाभावोपि न प्रामाण्यकारणम् । यादृच्छिकसंवादिषु सत्यपि दोषे प्रमाणज्ञानोदयात्'' इति ।

किञ्च प्रतिबन्धकाभावे लोके कारणत्वाव्यवहारादौत्सर्गिककार्यापवादकविरोधित्वरूपान्यैवान्यथासिद्धिः परिभाष्यतामित्युक्तम् । उक्तं हि सुधायां ''तर्हि दोषाभावः कारणमित्यायातमिति चेन्न । तथा सत्युत्सर्गापवादयोः काप्यभावप्रसङ्गात् इति ।

न चैवं भाष्यटीकायाः विष्णुतत्त्वनिर्णयटीकया सुधया च विरोध इति शङ्क्यम् । भाष्यटीकायां कारणशब्दस्यास्मदुक्तं यद्घटं प्रति कुलालपित्रापि साधारणं तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरूपं प्रयोजकत्वं तन्मात्रपरत्वात् । उक्तं हि 'तस्माद्गुणेभ्यो दोषाणामभावस्तदभावतः अप्रमाण्यद्वयाभावस्तेनोत्सर्गोनपोदितः'' इति ।

न्यायदीपः

द्वितीयं निराह– **कारणत्वस्येति** । कुत इत्यतः ''येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तत्तेनान्यथासिद्धं'' इति **मण्युक्तान्यथासिद्धि**मत्वादित्याह ।। **क्लृप्तेति** ।। **ग्रहणेनेति** ।। त्वदुक्तपारिभाषिकान्यथासिद्धत्वेन हेतुनेत्यर्थः । अस्य चक्षुरादिनिष्ठकारणतेत्यादिनान्वयः ।

गुरुमतेनाह ।। **उपस्थितेति** ।। **उपस्थितम्** ।। बुद्धौ विपरिवर्तमानं यदिष्टं रजतादि तेन पुरोवर्तिनो भेदाग्रह इत्यर्थः । उपस्थितेरपि पुरोवृत्तिगोचरप्रवृत्तिकारणत्वे वैशिष्ट्यज्ञानस्यापि हेतुतापत्त्या भेदाग्रहः प्रवृत्तिहेतुरिति मतहान्यापत्तेर्हेतुतावच्छेदकत्वं यथा तथेत्यर्थः । **न्यायमते**नाह ।। **विषयत्वेनेति** ।। **प्रत्यक्षमित्यत्रेति** ।। इति प्रत्यक्षलक्षण इत्यर्थः । अन्यथासिद्धिमुक्त्वा व्यभिचारं चाह ।। **उक्तेति** ।। ''किञ्च करादौ चरणादिभ्रमजन्य'' इत्यदिनोक्तरीत्येर्थः ।

ननु दोषस्य प्रतिबन्धकतया तदभावस्य स्वतन्त्रावेव कार्यान्वयव्यतिरेकावतो न प्रागुक्तान्यथासिद्धिर्युक्तेत्यत आह ।। **किञ्चेति** ।। अन्यथासिद्धशब्दस्य त्वया यौगिकार्थं त्यक्त्वा लोकव्यवहारानुरोधेन त्रिधा पारिभाषिकार्थोक्तेरिहापि व्यवहारानुरोधेन त्वदुक्तान्यथासिद्धित्रयादन्यैवान्यथासिद्धिः परिभाष्यतामित्युक्तमतीतभङ्ग इत्यर्थः ।। **उक्तं हीति** ।। दोषा-

भावस्यान्यथासिद्धतया कारणत्वं नेत्येतज्जिज्ञासाधिकरणे''प्रत्यक्षवच्च प्रामाण्यं'' इत्यादिश्लोकव्याख्यानसुधायामुक्तमित्यर्थः ।

उपलक्षणमेतत् ''दोषाभावान्वयव्यतिरेकनियमात्प्रामाण्यस्य परतस्त्वं किं न स्यादिति चेन्न । यादृच्छिकसंवादिषु प्रामाण्येपि दोषाभावेन कारणत्वभङ्गात्'' इत्यादिना वादावल्यामुक्तमित्यर्थः । उत्सर्गेत्यादेरर्थस्तु ''दाहाविरोधिनो हेतुत्व'' इत्यदिना पूर्वतनग्रन्थेनैव विवृतो ध्येयः ।। **भाष्यटीकाया इति** ।। प्रागुक्ताया इत्यर्थः ।। **सुधया चेति** ।। वादावल्या चेत्यपि ध्येयम् ।। **तद्व्यतिरेकेति** ।। दोषाभावव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वं प्रामाण्यस्य यत्तद्रूपं प्रयोजकत्वमित्यर्थः । स्वविरहप्रयुक्तविरहप्रतियोगिकार्यकत्वरूपं यत्प्रयोजकत्वमिति फलितोर्थः ।। **उक्तं हीति** ।। वार्तिके दोषाभावस्योक्तरूपं प्रयोजकत्वमुक्तमित्यर्थः । तदभावतः गुणाधीनदोषाभावतः । अबोधकत्वरूपं विपरीतबोधकत्वरूपं वा विपरीतबोधकत्वरूपमननुष्ठानरूपं वा यदप्रामाण्यद्वयं तदभावः । तेन दोषाभावस्याप्रामाण्यनिरासोपक्षयेण ज्ञानसामग्रीत एव प्रमा जायत इत्युत्सर्गो न भग्न इत्यर्थः ।

तर्कताण्डवम्

ननु कथं तर्हि दोषस्य प्रतिबन्धकत्वमपि । तत्रैव तस्मिन् सत्यपि प्रमाया दर्शनादिति चेन्न । तत्र यादृच्छिकस्य विषयसत्वस्योत्तेजकत्वेनोत्तेजकाभावविशिष्टस्य प्रतिबन्धकस्य अभावात् । न च तर्ह्यावश्यकत्वाद्विषयसत्वमेव प्रमाप्रयोजकं न तु दोषाभावापेक्षेति वाच्यम् । शुक्तौ रूप्यभ्रमकाले शुक्तित्वादेर्विषयस्य सत्वेपि दोषरूपप्रतिबन्धेन शुक्तित्वादिप्रमाव्यतिरेकात् ।

यद्वा इमं मा दहेत्यादौ मन्त्रादेरुद्देश्यव्यक्तिविशेष इव लिङ्गाभासस्य यत्र विषयसत्वाभावस्तत्रैव प्रतिबन्धकत्वाद् यादृच्छिकविषयसत्वस्थले केवलस्य प्रतिबन्धकस्याभाव एवास्ति । दोषाभावस्य स्वरूपेण हेतुत्वे तु व्यतिरेकव्यभिचारो दुष्परिहर इति दोषाभावोपि न हेतुः । तस्मात्परतस्त्वे न किञ्चिन्मानम् ।

एतदप्युक्तं ''अन्यथा'' इत्यादिना । औत्सर्गिककार्यापवादकनिरासरूपस्यापि दोषाभावस्य हेतुत्वे इदमौत्सर्गिकमिदमापवादकमिति व्यवस्थित्ययोगादित्यर्थः ।

न्यायदीपः

प्रागुक्तप्रतिबन्धकविरोधित्वरूपान्यथासिद्धिरयुक्तेति भावेन शङ्कते ।। **नन्विति** ।। **तत्रेति** ।। यादृच्छिकसंवादिनीत्यर्थः । तस्मिन् दोष इत्यर्थः ।। **मा दहेतीति** ।। अस्य साधुत्वं संशयोपपादनग्रन्थोक्तं ज्ञेयम् ।। **व्यतिरेकव्यभिचार इति** ।। यादृच्छिकसंवादिनीत्यर्थः ।। **तस्मादिति** ।। अनुगतगुणस्याभावाद्दोषाभावस्य चाहेतुत्वादित्यर्थः ।

।। इति प्रमायां दोषाभावस्य हेतुत्वभङ्गः ।। १५ ।।

उत्पत्तौ स्वतस्त्वे अनुमानानि ।

स्वतस्त्वे तु अनित्यप्रमामात्रानुगतो गुण इति पक्षे अनित्ययथार्थज्ञानत्वं अनित्यज्ञानत्वानवच्छिन्नकार्यतानवच्छेदकं अनित्यज्ञानावृत्तित्वरहितत्वात् ज्ञानत्ववत् । तत्समनियतधर्मघटितत्वात् यदेवं तदेवम् यथा पृथुबुध्नोदराकारघटितं घटत्वम् घटत्वान-

वच्छिन्नकार्यतानवच्छेदकम् । भ्रमावृत्तिकार्यतानवच्छेदकं वा भ्रमवृत्तित्वात् भ्रमत्ववत् ।

न चैतेषां हेतूनामसिद्धिः । भ्रमेपि धर्म्यंशे प्रमात्वस्य सत्त्वात् । प्रमात्वस्य ज्ञानत्वघटितत्वाच्च । नाप्यप्रयोजकता । समनियतयोरेकस्यैव कार्यतावच्छेदकत्वे आवश्यके लघावर्थे प्रमाणप्रसराल्लघुनोऽनित्यज्ञानत्वस्यैव तदौचित्यात् । भ्रमे ज्ञानत्वप्रमात्वयोर्व्याप्यवृत्तित्वाव्याप्यवृत्तित्वे त्वेकसामग्रीप्रयोज्यत्वेपि त्वन्मते वेगविभागयोरिव युक्ते ।

मन्मते तु प्रकारांशे प्रमात्वापवादकस्य दोषस्य सत्वात् तद्भावो युक्तः ।

न्यायदीपः

।। **स्वतस्त्वे त्विति** ।। मानमित्यनुकर्षः । उच्यत इत्यर्थः । अननुगतगुणपक्षे सिद्धसाधनतावारणाय **'इति पक्षे'** इति विवेकायोक्तम् । अनित्यप्रमात्वं अनित्यज्ञानत्वावच्छिन्नकार्यत्वप्रतियोगिककारणताभिन्नकारणताप्रतियोगिककार्यतावच्छेदकं अनित्यज्ञानत्वव्याप्यकार्यतावच्छेदकधर्मत्वादप्रमात्ववदिति **मण्युक्तानुमानस्य** प्रत्यनुमानमाह ।। **अनित्येति** ।। विशेष्यमात्रस्य नित्यवृत्तितया कार्यतानवच्छेदकत्वेन सिद्धसाधनवारणायानित्येति पक्षविशेषणम् । यथार्थेत्युक्तिरपि तद्वारणार्थैव । साध्येऽ[1]नित्यज्ञाननिष्ठकार्यतानवच्छेदकत्वेन सिद्धसाधननिरासायानित्येत्यादिकार्यताविशेषणम् । प्रमानिष्ठेत्यपि योज्यम् । तेन घटादिनिष्ठकार्यतानवच्छेदकत्वेन न सिद्धसाधनम् । हेताविन्द्रियत्वादिनेन्द्रियादिनिष्ठकारणताप्रतियोगिककार्यतावच्छेदके प्रत्यक्षत्वादौ व्यभिचारवारणाय नञ्द्वयम् ।

१. नित्यज्ञानेति स्यात् ।

तत्रानित्यज्ञानवृत्तित्ववत्तदवृत्तित्वस्यापि सत्वेन तद्ग्राहित्याभावात् । उक्तदोषनिरासायैवानित्यज्ञानेत्यप्युक्तिः । असिद्धिनिरासायानित्येति ।। **ज्ञानत्ववदिति** ।। तस्य नित्यवृत्तितया कार्यतानवच्छेदकत्वादनित्यज्ञान-वृत्तित्वाच्चेति भावः ।। **तत्समेति** ।। अनित्यप्रमात्वसमनियतो यो धर्मो अनित्यज्ञानत्वं तद्घटितत्वादित्यर्थः ।

भ्रमेपि धर्म्यंशे प्रमात्वेनानित्यप्रमात्वानित्यज्ञानत्वयोरन्योन्यं व्याप्य-व्यापकभावादिति भावः । अत एव तत्समनियतधर्मघटितत्वद्योतनायैव अनित्यप्रमात्वमिति पक्षनिर्देशमकृत्वाऽनित्ययथार्थज्ञानत्वमित्युक्तम् ।। **यदेवमिति** ।। यद्यत्समनियतधर्मघटितं तत्तदनवच्छिन्नकार्यता-नवच्छेदक-मित्यर्थः ।। **पृथुबध्नेति** ।। पृथुबुध्नोदराकारघटत्वं नाम धर्मः । स्वसमनियत-घटत्वधर्मघटितत्वात् तदनवच्छिन्नकार्यता पटादिनिष्ठा तदनवच्छेदक इत्यर्थः ।

प्राचीनपक्षनिर्देश एव साध्यान्तरमाह ।। **भ्रमावृत्तीति** ।। भ्रमावृत्ति-कार्यता प्रमादिनिष्ठा कार्यता तदनवच्छेदकमित्यर्थः । अनित्ययथार्थज्ञानत्वं तादृशज्ञाननिष्ठकार्यतानवच्छेदकमित्येव साध्यकरणे अनित्यज्ञानत्वे व्यभिचारः । तस्यात्ममनःसंयोगादिहेतुनिरूपितकार्यतावच्छेदकत्वात् । भ्रमवृत्तित्वाच्च । अतो भ्रमवृत्तीत्येवमुक्तिः । अनित्यज्ञानत्वस्य च तादृशघटादिनिष्ठकार्यतानवच्छेदकत्वान्न दोषः ।। **न चैषामिति** ।। त्रयाणामित्यर्थः । भ्रमेपीत्यनेनाद्यन्तयोरसिद्ध्युद्धारः ।। **प्रमात्वस्येति** ।। अनित्यप्रमात्वस्यानित्यज्ञानत्वघटितत्वादित्यर्थः ।

यद्वा प्रमात्वस्य ज्ञानत्वघटितत्वेऽनित्यप्रमात्वस्यानित्यज्ञानत्व-घटितत्वमर्थसिद्धमिति प्रमात्वस्येत्येवोक्तं **लघुन इति** ।। प्रमात्वस्य विषयसत्वघटितत्वेन गुरुत्वमिति भावः ।

तर्कताण्डवम्

ननु विभागस्याव्याप्यवृत्तित्वं स्वात्यन्ताभावसामानाधिकरण्यम् । अत्यन्ताभावस्याधिकरणविशेषसम्बन्धः स्वरूपानतिरिक्त इति न हेतुसापेक्ष इति चेत्तुल्यं प्रमात्वेपि । अनित्यप्रमात्वं दोषविरोधिवृत्ति-धर्मावच्छिन्नकारणत्वप्रतियोगिककार्यतानवच्छेदकं दोषजन्यवृत्ति-त्वात् । भ्रमत्ववत् । दोषविरोधी गुणो दोषाभावश्चेति स्वतस्त्व-सिद्धिः । अनित्यप्रमात्वं न कार्यतावच्छेदकम् । तथात्वे बाधक-वत्त्वात् । घटज्ञानत्ववत् । न चासिद्धिः । अनुगतकारणाभावरूपस्य बाधकस्योक्तत्वात् ।

न्यायदीपः

अनित्यप्रमात्वप्रमाकारणतानवच्छेदकरूपावच्छिन्नकारणताप्रतियोगिक-कार्यतावच्छेदकं भ्रमावृत्तिकार्यतावच्छेदकत्वात् घटत्ववदिति **मण्युक्तस्य** प्रत्यनुमानमाह ।। **अनित्यप्रमात्वमिति** ।। दोषः पित्तादिः । तद्विरोधि-वृत्तिधर्मो गुणत्वादिरूपः । तदवच्छिन्नेत्यर्थः । दोषजन्यवृत्तित्वादिति हेतोरसिद्ध्युद्धारः प्राग्वत् ।

ननूक्तानुमानेन दोषविरोधिनो गुणस्याहेतुत्वलाभेपि दोषाभावस्य हेतुत्वानिवारणात् ज्ञानहेत्वधिकजन्यत्वात् प्रमात्वस्य ज्ञानहेतुमात्र-जन्यत्वक्षतिरित्यत आह ।। **दोषविरोधीति** ।। विरोधित्वं च सहानव-स्थायित्वं वा तन्निश्चयप्रतिबन्धकनिश्चयविषयत्वं वोभयानुगतम् । प्रतिबन्धकत्वं च तदनुत्पादव्याप्यत्वमिति भावः ।

अनित्यप्रमात्वं कार्यत्वच्छेदकं बाधकं विना कार्यमात्रवृत्तिधर्मत्वात् अप्रमात्ववदिति **मण्युक्तस्य** प्रत्यनुमानमाह ।। **अनित्यप्रमात्वमिति** ।।

अत्र पूर्वत्र च सिद्धसाधनताव्युदासायानित्येति प्रमात्वविशेषणम् ।। **तथात्वे** ।। कार्यतावच्छेदकत्व इत्यर्थः ।। **बाधकेति** ।। स्वावच्छिन्न-कार्यताप्रतियोगिकानुगतैककारणासम्भवरूपबाधकवत्त्वादित्यर्थः ।। **घटेति** ।। घटज्ञानमात्रे अनुगतकारणाभावाद्घटज्ञानत्वं नावच्छेदकमित्युप-पादितमधस्तादिति भावः ।। **उक्तत्वादिति** ।। प्रमामात्रानुगतगुणभङ्ग इत्यर्थः ।। **इति पक्ष इति** ।। विरोध्यनुमानमुच्यत इति योज्यम् ।

विषयसत्वं गुण इति पक्षमुपेत्याह ।। **न विषयेति** ।। इन्द्रियसन्निकर्षो गुण इति पक्ष आह ।। **न षड्विधेति** ।। **अन्यतरेति** ।। अन्यतमेत्यर्थः । साधुत्वं पूर्वमुक्तं ध्येयम् । प्रागुपपादितमेव स्मारयति ।। **योगिप्रत्यक्षादे-रिति** ।। सामान्यप्रत्यासत्तिजप्रत्यक्षमादिपदार्थः ।। **अन्यतरेणेति** ।। अन्यतमेनेत्यर्थः । अनुमितिशाब्दप्रमयोरपि गुणजन्यत्वे क्रमेणानुमाने आह ।। **अनुमितीत्यादिना** ।। विवक्षितार्थतत्वज्ञानं गुण इति मत आह ।। **विवक्षितेति** ।।

तर्कताण्डवम्

प्रत्यक्षादिप्रमासु प्रत्येकानुगता गुणा इति पक्षे अनित्यप्रत्यक्ष-प्रमात्वं न विषयजन्यतावच्छेदकं, न षड्विधसन्निकर्षान्यतरजन्यता-वच्छेदकं वा । तदजन्यवृत्तित्वात् । घटत्ववत् । न चासिद्धिः । योगिप्रत्यक्षादेर्विषयेण षड्विधसन्निकर्षान्तरेण चाजन्यत्वात् । अनुमितिप्रमात्वं सत्यलिङ्गपरामर्शत्वावच्छिन्नकारणताप्रतियोगिक-कार्यतानवच्छेदकं असत्यलिङ्गपरामर्शजन्यवृत्तित्वात् भ्रमत्ववत् । शाब्दप्रमात्वं विवक्षितार्थतत्वज्ञानत्वावच्छिन्नकारणताप्रतियोगिक-कार्यतानवच्छेदकं विवक्षितार्थतत्वज्ञानाजन्यवृत्तित्वात् भ्रमत्ववत् ।।

तर्कताण्डवम्

ननु विभांगस्याव्याप्यवृत्तित्वं स्वात्यन्ताभावसामानाधिकरण्यम् । अत्यन्ताभावस्याधिकरणविशेषसम्बन्धः स्वरूपानतिरिक्त इति न हेतुसापेक्ष इति चेत्तुल्यं प्रमात्वेपि । अनित्यप्रमात्वं दोषविरोधिवृत्ति-धर्मावच्छिन्नकारणत्वप्रतियोगिककार्यतानवच्छेदकं दोषजन्यवृत्ति-त्वात् । भ्रमत्ववत् । दोषविरोधी गुणो दोषाभावश्चेति स्वतस्त्व-सिद्धिः । अनित्यप्रमात्वं न कार्यतावच्छेदकम् । तथात्वे बाधक-वत्त्वात् । घटज्ञानत्ववत् । न चासिद्धिः । अनुगतकारणाभावरूपस्य बाधकस्योक्तत्वात् ।

न्यायदीपः

अनित्यप्रमात्वप्रमाकारणतानवच्छेदकरूपावच्छिन्नकारणताप्रतियोगिक-कार्यतावच्छेदकं भ्रमावृत्तिकार्यतावच्छेदकत्वात् घटत्ववदिति **मण्युक्तस्य** प्रत्यनुमानमाह ।। **अनित्यप्रमात्वमिति** ।। दोषः पित्तादिः । तद्विरोधि-वृत्तिधर्मो गुणत्वादिरूपः । तदवच्छिन्नेत्यर्थः । दोषजन्यवृत्तित्वादिति हेतोरसिद्ध्युद्धारः प्राग्वत् ।

ननूक्तानुमानेन दोषविरोधिनो गुणस्याहेतुत्वलाभेपि दोषाभावस्य हेतुत्वानिवारणात् ज्ञानहेत्वधिकजन्यत्वात् प्रमात्वस्य ज्ञानहेतुमात्र-जन्यत्वक्षतिरित्यत आह ।। **दोषविरोधीति** ।। विरोधित्वं च सहानव-स्थायित्वं वा तन्निश्चयप्रतिबन्धकनिश्चयविषयत्वं वोभयानुगतम् । प्रतिबन्धकत्वं च तदनुत्पादव्याप्यत्वमिति भावः ।

अनित्यप्रमात्वं कार्यत्वच्छेदकं बाधकं विना कार्यमात्रवृत्तिधर्मत्वात् अप्रमात्ववदिति **मण्युक्तस्य** प्रत्यनुमानमाह ।। **अनित्यप्रमात्वमिति** ।।

अत्र पूर्वत्र च सिद्धसाधनताव्युदासायानित्येति प्रमात्वविशेषणम् ।। **तथात्वे** ।। कार्यतावच्छेदकत्व इत्यर्थः ।। **बाधकेति** ।। स्वावच्छिन्न-कार्यताप्रतियोगिकानुगतैककारणासम्भवरूपबाधकवत्त्वादित्यर्थः ।। **घटेति** ।। घटज्ञानमात्रे अनुगतकारणाभावाद्घटज्ञानत्वं नावच्छेदकमित्युप-पादितमधस्तादिति भावः ।। **उक्तत्वादिति** ।। प्रमामात्रानुगतगुणभङ्ग इत्यर्थः ।। **इति पक्ष इति** ।। विरोध्यनुमानमुच्यत इति योज्यम् ।

विषयसत्वं गुण इति पक्षमुपेत्याह ।। **न विषयेति** ।। इन्द्रियसन्निकर्षो गुण इति पक्ष आह ।। **न षड्विधेति** ।। **अन्यतरेति** ।। अन्यतमेत्यर्थः । साधुत्वं पूर्वमुक्तं ध्येयम् । प्रागुपपादितमेव स्मारयति ।। **योगिप्रत्यक्षादे-रिति** ।। सामान्यप्रत्यासत्तिजप्रत्यक्षमादिपदार्थः ।। **अन्यतरेणेति** ।। अन्यतमेनेत्यर्थः । अनुमितिशाब्दप्रमयोरपि गुणजन्यत्वे क्रमेणानुमाने आह ।। **अनुमितीत्यादिना** ।। विवक्षितार्थतत्वज्ञानं गुण इति मत आह ।। **विवक्षितेति** ।।

तर्कताण्डवम्

प्रत्यक्षादिप्रमासु प्रत्येकानुगता गुणा इति पक्षे अनित्यप्रत्यक्ष-प्रमात्वं न विषयजन्यतावच्छेदकं, न षड्विधसन्निकर्षान्यतरजन्यता-वच्छेदकं वा । तदजन्यवृत्तित्वात् । घटत्ववत् । न चासिद्धिः । योगिप्रत्यक्षादेर्विषयेण षड्विधसन्निकर्षान्तरेण चाजन्यत्वात् । अनुमितिप्रमात्वं सत्यलिङ्गपरामर्शत्वावच्छिन्नकारणताप्रतियोगिक-कार्यतानवच्छेदकं असत्यलिङ्गपरामर्शजन्यवृत्तित्वात् भ्रमत्ववत् । शाब्दप्रमात्वं विवक्षितार्थतत्वज्ञानत्वावच्छिन्नकारणताप्रतियोगिक-कार्यतानवच्छेदकं विवक्षितार्थतत्वज्ञानाजन्यवृत्तित्वात् भ्रमत्ववत् ।।

[1](न च तर्ह्यावश्यकत्वाद्विषयसत्वमेव प्रमाप्रयोजकं न तु दोषाभावापेक्षेति वाच्यम् । शुक्तौ रूप्यभ्रमकाले शुक्तित्वादेः विषयस्य सत्वेपि दोषरूपप्रतिबन्धेन शुक्तित्वादिप्रमाव्यतिरेकात् ।।)

[2]अनित्यप्रत्यक्षप्रमात्वानुमितिप्रमात्वशाब्दप्रमात्वानि दोष-विरोधिवृत्तिधर्मावच्छिन्नकारणताप्रतियोगिककार्यतानवच्छेदकानि दोषजन्यवृत्तित्वात् भ्रमत्ववत् ।

नचासिद्धिः । करादौ चरणादिभ्रमजन्ये पुरुषज्ञाने प्रमात्वस्य सत्त्वात् । यथार्थयोग्यताज्ञानं च न शाब्दप्रमाजनकम् । तद्व्यतिरेका-पादनप्रयोजकापादनविषयव्यतिरेकाप्रतियोगित्वात् । पाकजगन्धे रसप्रागभाववत् ।।

न चात्रासिद्धिः । उक्तरीत्या योग्यतायां स्वरूपतः सत्यामनन्वय-निश्चयविरहेणैव शाब्दप्रमोपपत्त्या यदि यथार्थयोग्यताज्ञानं न स्यात्तर्हि शाब्दी प्रमा न स्यादित्यापादनासम्भवात् ।

न्यायदीपः

प्रत्येकमुक्त्वा मिलित्वापि दोषाभावस्याप्यहेतुत्वलाभायाह ।। **प्रत्यक्षेति** ।। **दोषविरोधीति** ।। स च गुणो दोषाभावश्चेति स्वतस्त्वसिद्धिरिति भावः ।। **असिद्धिरिति** ।। उक्तहेतूनामित्यर्थः । अन्त्यहेतोर्धम्यंश इत्यादिपूर्व-ग्रन्थेनासिद्ध्युद्धारप्रकारस्य द्वितीयहेतोरपि संवादिशुकादिवाक्यजन्यज्ञाने भ्रान्तप्रतारकवाक्यजन्यज्ञाने च पूर्वोक्तदिशा सत्त्वेन सिद्धत्वादाद्यस्य तं व्यनक्ति ।। **करेति** ।। नच शुकादिवाक्यजज्ञानेपि तादृशेश्वरज्ञानजन्यत्व-

---

१. अयं ग्रन्थः पाठान्तरे नास्ति । ३८२ पुटस्थपङ्क्तिः पुनरावर्तिता इति भाति । २. अनित्यपदकृत्यं न ज्ञायते ।

सत्त्वादसिद्धिरेवेति शङ्क्यम् । तस्य भ्रमसाधारणोपादनादिगोचरज्ञानत्वेनैव जनकतयात्राभिमतस्य विवक्षितार्थतत्त्वज्ञानत्वादिना रूपेणजनकत्वस्याभावादित्युक्तत्वात् ।

योग्यताज्ञानं गुण इति मत आह ।। **यथार्थेति** ।। योग्यता च वाक्यार्थरूपसंसर्गसत्त्वं वा प्रागुक्तदिशा तद्ग्राप्यमन्यद्वेति भावः ।। **तदिति** ।। शाब्दप्रमाव्यतिरेकापादने प्रयोजकं निमित्तं यदापादनं तद्विषयेत्यर्थः । आपादनप्रकारश्चाग्रे व्यक्तः ।। **पाकजेति** ।। तत्र यदि रसप्रागभावो न स्यात्तदा गन्धो न स्यादिति नास्ति । रसप्रागभावस्य कारणतावादे मण्युक्तदिशा क्लृप्तकारणगन्धप्रागभावसाहित्यरूपान्यथासिद्धत्वेन गन्धव्यतिरेकापादनप्रयोजक[1]व्यतिरेकाप्रतियोगित्वमत एव तदजनकत्वं चेति भावः ।। **उक्तरीत्येति** ।। प्रत्यक्षादावनुगतगुणभङ्ग उक्तरीत्येत्यर्थः ।

तर्कताण्डवम्

यज्ञपतिमते अनित्यप्रमात्वं न स्वाश्रयमात्रवृत्तिधर्मावच्छिन्ननानावृत्तिकार्यताश्रयमात्रवृत्ति । विषयमात्रोपाधिकधर्मत्वात् । घटज्ञानत्ववत् ।

न्यायदीपः

।। **यज्ञपतीति** ।। तन्मते हि स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्तित्वमेव प्रमात्वस्य परतस्त्वमित्युपेत्याननुगतगुणजन्यत्वेनाप्येतत्सिध्यतीत्युक्त्वा अनित्यप्रमात्वं स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्तीत्याद्यनुमानमुक्तम् । तत्प्रत्यनुमनमाह ।। **अनित्येति** ।। सिद्धसाधनतानिरासायानित्येत्युक्तिः ।

---

१. 'आपादनविषये'ति पाठान्तरे अधिकम् ।

।। **स्वेति** ।। स्वस्यानित्यप्रमात्वस्य आश्रयमात्रवर्ती धर्मः प्रत्यक्षत्वादिः तदवच्छिन्ना नानावृत्तिरनेकाश्रयवृत्तिश्च या कार्यता तदाश्रयमात्रवृत्ति न भवतीत्यर्थः । अत्राद्यं मात्रपदं अनित्यप्रमात्वस्य स्वाधिकदेशवृत्तिनाऽनित्यज्ञानत्वेनावच्छिन्ननानावृत्तिकार्यताश्रय एव वर्तनाद् बाधनिरासाय । द्वितीयमपि तन्निरासायैव । अन्यथा अनित्यप्रमात्वस्य तादृशप्रत्यक्षत्वानुमितित्वचाक्षुषत्वादिधर्मावच्छिन्नकार्यताश्रयवृत्तितया बाधापत्तेः । अत्रानित्यप्रमात्वस्य स्वाश्रयमात्रवृत्तिप्रत्यक्षत्वादिधर्मसमानाधिकरणकार्यताश्रय एव सत्वेन तद्वृत्तित्वाभावेन साध्यपर्यवसाने बाधात् जन्यप्रत्यक्षप्रमात्वादेः पराभिमतावच्छेदकत्वस्याभावेनैव साध्यपर्यवसानमिति भावः । स्वपदं समभिव्याहृतपरम् । तेन अप्रमात्वे व्यभिचारवारणाय विषयमात्रोपाधिकेति हेतौ विशेषणम् । अप्रमात्वस्याननुगतपित्तादिदोषजन्यतावच्छेदकधर्मावच्छिन्ननानावृत्तिकार्यताश्रयमात्रवृत्तित्वेन विपक्षत्वेपि भ्रमाविषयतदभावघटितत्वेन हेत्वभावात् । विषयोपाधिकेत्युक्तावप्युक्तदोषतादवस्थ्यात् मात्रेत्युक्तिः । विषयोपाधिकत्वे सति तदितरानुपाधिकत्वं हि तदर्थः । तत्र ज्ञानान्यतदितरानुपाधिकेत्यर्थो ध्येयः । तेन च प्रमात्वस्य विषयेतरज्ञानोपाधिकत्वादसिद्धिः दृष्टान्ते साधनवैकल्यमिति शङ्कानवकाशः । विषयपदं च स्वविषयपरम् । तेन घटपटान्यतरत्वे ज्ञानविषयघटपटमात्रोपाधिकहेतुमति स्वाश्रयमात्रवृत्तिघटत्वपटत्वावच्छिन्ननानावृत्तिकार्यताश्रय एव वर्तमाने साध्यभावाद्व्यभिचार इति शङ्कानवकाशः । यद्वा विषयतयोपाधित्वविवक्षाया अग्रे स्पष्टत्वात्स्वेति न देयम् । तावतोक्तस्थले व्यभिचारनिरासात् ।

।। **घटज्ञानत्ववदिति** ।। तत्र तद्व्याप्यस्य कार्यतावच्छेदकस्य कस्यचिदभावात् स्वाश्रयमात्रवृत्तिधर्मावच्छिन्नकार्यताश्रयमात्रवृत्तित्वाभावरूपसाध्यमस्ति । न च तत्रापि घटप्रत्यक्षत्वं घटानुमितित्वमित्यादिरेव

तद्ध्वाप्योस्तीति शङ्क्यम् । घटप्रत्यक्षत्वाद्यवच्छिन्नकार्यताप्रतियोगिकानुगतैककारणाभावान्न घटप्रत्यक्षत्वादिकमवच्छेदकम् । अस्तु वावच्छेदकत्वम् । अथापीश्वरज्ञानसाधारणं घटज्ञानत्वं न तन्मात्रवृत्तीति भावः ।

तर्कताण्डवम्

तत्तत्प्रागभावनिरूपितकार्यताश्रयत्वेन बाध इति शङ्कानिरासाय नानावृत्तीत्युक्तम् । नात्रासिद्धिः । प्रमात्वस्य विषयमात्रोपाधिकत्वात् ।

न च विषयजनितं ज्ञानं प्रत्यक्षमिति मते प्रत्यक्षज्ञानत्वे व्यभिचार इति वाच्यम् । विषयस्य विषयतयोपाधित्वस्य विवक्षितत्वात् । प्रत्यक्षज्ञानत्वे च तस्य जनकतयोपाधित्वात् । यथावस्थितार्थविषयकत्वरूपे प्रमात्वे तु तस्य विषयतयोपाधित्वात् । अप्रमात्वोपाधिभूतं विषयान्यथात्वं तु नाप्रमाया विषय इति नाप्रमात्वे व्यभिचारः ।

भ्रमे पित्तादिरिव प्रमायामननुगता एव गुणा हेतव इति मते । संशयोत्तरप्रमात्वं सत्यविशेषदर्शनत्वावच्छिन्नकारणताप्रतियोगिककार्यतानवच्छेदकं असत्यविशेषदर्शनजन्यवृत्तित्वात् ज्ञानत्ववत् । संशयोत्तरप्रमा विशेषप्रमाजन्या न । तां विनाप्युपपन्नत्वात् भ्रमवत् । अत्रासिद्धिः प्रागेवोद्धृता ।

न्यायदीपः

ननु साध्ये परानुक्तं नानावृत्तीति कार्यताविशेषणमधिकं किमर्थमुपात्तमित्यत आह ।। **तत्तदिति** ।। तत्तत्प्रमाव्यक्तिप्रागभावनिरूपितकार्यता-

वच्छेदकं तत्तत्प्रमाव्यक्तित्वम् । तदवच्छिन्नकार्यता च तत्तद्व्यक्तिमात्रनिष्ठा न तु व्यक्तिद्वयनिष्ठा । तथाच तादृशकार्यताश्रयमात्रवृत्तित्वेन तदभावसाधने बाधः स्यात् । नानावृत्तीत्युक्त्या तदन्यकार्यतैव लभ्यत इति तदाश्रयमात्रवृत्तित्वाभावसाधने तु न बाध इति भावः ।

।। **इति मत इति** ।। विषयजन्यत्वं प्रत्यक्षलक्षणमिति मत इत्यर्थः ।। **प्रत्यक्षेति** ।। तत्र स्वव्याप्यचाक्षुषत्वरासनत्वादिधर्मावच्छिन्ननानाधिकरण-निष्ठकार्यताश्रयवृत्तित्वस्यैव भावेन विपक्षे विषयमात्रोपाधिकधर्मत्वसत्वादिति भावः । अप्रमात्वस्य साध्याभाववत्वेपि हेतोरेवाभावान्न व्यभिचार इत्याह ।। **अप्रमात्वेति** ।।

।। **इति मत इति** ।। विरोध्यनुमानं स्वतस्त्वसाधकमुच्यत इति योज्यम् । संशयाद्युत्तरप्रमायां विशेषप्रमा गुण इति वादिनं प्रत्याह ।। **संशयेति** ।। एतच्च सिद्धसाधनतावारणाय विशेषणम् । संशयोत्तरप्रमा-विशेषदर्शनजन्या नेत्येवोक्तौ ज्ञानवदिति दृष्टान्तोक्तौ च तत्र साध्यहीनता स्यादतस्तत्र प्रमात्वमित्युक्तिः ।

।। **सत्येति** ।। यथार्थेत्यर्थः । असत्यमयथार्थं यद्विशेषदर्शनं करादौ चरणादिभ्रमरूपं तज्जन्यसंशयोत्तरप्रमावृत्तित्वादित्यर्थः ।

ननु संशयोत्तरप्रमायां न सर्वत्र विशेषप्रमाहेतुः । करादौ चरणादि-भ्रमजन्यसंशयोत्तरप्रमादिभिन्नस्थल एवेत्यतस्तदनुरोधेनाप्यह ।। **संशयोत्तर-प्रमेति** ।। **तां विनापीति** ।। दोषाभावे-प्युपपन्नत्वादित्यर्थः ।। **अत्रेति** ।। हेतुद्वय इत्यर्थः ।। **प्रागिति** ।। ''करादौ चरणादिभ्रमजन्य'' इत्यादिना ''एवं भ्रमोत्तरप्रमायामपि'' इत्यादिना च ग्रन्थेनानुगतगुणभङ्ग एवेत्यर्थः ।

तर्कताण्डवम्

भूयोऽवयवेन्द्रियसन्निकर्षो न प्रमायामसाधारणकारणम् । भ्रमजनकत्वात् । मनःसंयोगवत् । प्रमा भ्रमसाधारणकारणातिरिक्तकारणाजन्या । भ्रमधर्मिकान्योन्याभावाप्रतियोगित्वात् । अनन्यथासिद्धतदन्वयव्यतिरेकानुविधानरहितत्वाच्च । भ्रमवत् । अत्र सर्वत्रापि हेतूच्छित्तिरेव बाधिकेति नाप्रयोजकतेति दिक् ।

एतदप्युक्तम् 'अन्यथा' इत्यादिना । उक्तसाध्यानि विना उक्तहेतूनां पक्षेऽवस्थित्ययोगादित्यर्थः ।

न्यायदीपः

भूयोऽवयवेन्द्रियसन्निकर्षो गुण इति पक्षनिरासकमनुमानमाह ।। **भूय इति** ।। अत्राप्यसिद्धिः, पीतः शङ्ख इत्यादिभ्रमजनकत्वाद्युक्त्या प्रागोवोद्धृतेति भावः ।

प्रमा ज्ञानहेत्वतिरिक्तहेतुजन्येति प्रचीनानुमानस्य प्रत्यनुमानमाह ।। **प्रमेति** ।। अतिरिक्तकारणपदेन गुणो दोषाभावश्चाभिमतः । भ्रमधर्मिकेत्यादिहेतोरप्यसिद्धिः । ''भ्रमेपि धर्म्यंशप्रमायां'' इत्यादिना प्रागेवोद्धृतेति भावः ।

तार्किकमतेप्यत्यन्ताभावस्याव्याप्यवृत्तित्वेन भ्रमे प्रमात्वतदत्यन्ताभावयोरंशभेदेन सत्त्वेप्यन्योन्याभावस्याव्याप्यवृत्तित्वाभावेन प्रमान्योन्याभावस्य भ्रमे सर्वथैवाभावादिति भावः ।। **अनन्यथेति** ।। अत्रापि गुणानां विरोधिदोषनिरासोपयोगस्योक्तत्वान्नासिद्धिरिति भावः ।

।। **दिगिति** ।। प्रमा गुणजन्या न भवति प्रमात्वादीशप्रमावत् । प्रमा दोषविरोधिजन्या न भवति प्रमात्वादीशप्रमावदित्यादिरूहनीय इति भावः ।

।। **इति उत्पत्तौ स्वतस्त्वेऽनुमानानि** ।। १६ ।।

अप्रामाण्यस्य परतस्त्वम्

अप्रमायां त्वनन्यथासिद्धान्वयव्यतिरेकित्वाद् दोषः कारणम् । क्वचित् सादृश्यादिके दोषे सत्यपि भ्रमानुत्पत्तिरसंसर्गाग्रहादिहेत्वन्तर-वैकल्यादिति नान्वयव्यभिचारः । विसंवादिशुकादिवाक्येपि दोषस्योक्तत्वान्न व्यतिरेकव्यभिचारोऽपि ।

न च प्रमायां गुणः प्रतिबन्धकस्य दोषस्येवाप्रमायामपि दोषः प्रतिबन्धकस्य गुणस्य दोषाभावस्य वा निरासक इत्यन्यथासिद्ध इत्यप्रामाण्यमपि स्वतः स्यादिति वाच्यम् । पीतः शङ्ख इत्यादिप्रत्यक्षे भूयोऽवयवेन्द्रियसन्निकर्षे शङ्खत्वादि-विशेषदर्शनादिरूपे गन्धप्राग-भावावच्छिन्नो घट इत्याद्यनुमाने सत्यपरमार्शरूपे घटोस्तीति वक्तव्ये पटोस्तीति वाक्यजन्यज्ञाने विवक्षितार्थतत्वज्ञानरूपे च गुणे सत्यपि पित्तबाधप्रमादरूपेण दोषेण भ्रमोत्पादनेन दोषस्य गुणनिरासो-पक्षीणत्वायोगात् । स्वाभावनिरासोपक्षीणत्वेन अन्यथासिद्धौ च सहकारिमात्रापलापप्रसङ्गात् ।

न्यायदीपः

ननु प्रमायां गुणस्येव भ्रमेप्यन्वयव्यतिरेकव्यभिचाराद् भ्रमविरोधिगुण-निरासादावुपक्षयेन अन्यथासिद्धेश्च दोषो न हेतुरिति सोपि स्वतः स्यादित्यतः ''परतोऽप्रामाण्यम्'' इति तत्त्वनिर्णयाद्युक्तमप्रामाण्यस्य परतस्त्वं साधयितु-मुक्तदोषं निरस्यन् भ्रमे दोषस्य हेतुत्वमाह ।। **अप्रमायान्त्विति** ।। हेतो-र्विशेष्यासिद्धिम् निराह ।। **क्वचिदिति** ।। ''कारणे सत्यपि कार्यानुत्पादस्य सामग्र्यभावेनोपपत्तेः'' इति तत्त्वनिर्णयटीकां हृदि कृत्वाह ।। **असंसर्गा-ग्रहादीति** ।। विशेषादर्शनादिरादिपदार्थः ।

एतेन यादृच्छिकसंवादिन्यपि दोषस्य व्यभिचारो निरस्तः । तत्र विषया-सत्वादिसहकारिविरहात् ।। **उक्तत्वादिति** ।। भूयोऽवयवेन्द्रियसन्निकर्षादि-हेतुत्वभङ्गे ''तत्राप्यनित्यवाक्यदोषस्य विवक्षितार्थतत्त्वज्ञानाभावस्य'' चेत्यादिनोक्तत्वादित्यर्थः । अनन्यथासिद्धेत्यादिहेतोर्विशेषणा-सिद्धिमाशङ्क्य निराह ।। **न चेति** ।। **प्रतिबन्धकस्येति** ।। प्रमाप्रतिबन्धकस्य दोषस्य यथा निरासकस्तथाऽप्रमाप्रतिबन्धकस्य गुणस्येत्यर्थः ।

दोषस्यान्यथासिद्धिं वदता हि गुणस्य प्रतिबन्धकत्वमुपेत्य तदभावस्य भ्रमे कारणत्वं वा प्रमायां दोषाभावस्येव प्रयोजकत्वं वा वाच्यम् । आद्ये भ्रमस्य न स्वतस्त्वापत्तिः । द्वितीये किं गुणाभाव एव प्रयोजकोऽथो-त्तेजकाभावविशिष्टगुणः प्रतिबन्धकः तदभावश्च प्रयोजक इति वा नाद्यः । व्यभिचारादिति भावेनाह ।। **पीतः शङ्ख इत्यादिना** ।। **विशेषदर्शनादिरूप इति** ।। पीतत्वाद्यसंसर्गग्रह आदिपदार्थः । सप्तम्यन्तरूपपदानां गुण-पदेनान्वयः ।

ननु क्वचित् कश्चिद्गुण इत्यननुगतगुणपक्षे पीतःशङ्ख इत्यादौ विपरीतप्रत्यक्षादिरेव कश्चिदन्यो गुणः । स तत्र नेति वदन्तं प्रत्याह ।। **गन्धेति** ।। यद्वा[1] विशेषप्रमा गुण इति मते व्यभिचारोक्तिरियमित्युपेत्य प्रत्यक्षादिभ्रमत्रयेपि गुणाभावव्यभिचारोक्तिरियमिति बोध्यम् ।

।। **पित्तेति** ।। प्रत्यक्षे पित्तं अनुमाने बाधः शाब्दे प्रमादो दोष इति विवेकः । दोषाभावस्य वा निरासक इत्येतन्निराह ।। **स्वाभावेति** ।। **सहकारीति** ।। दण्डचक्रादेरपि स्वाभावनिरासोपक्षयेण मृत्पिण्ड एक एव हेतुर्न त्वन्यः कश्चिदपीति स्यादित्यतिप्रसङ्ग इत्यर्थः ।

---

१. अत्र ''सर्वत्र'' इति स्यात् ।

तर्कताण्डवम्

ननु तथाप्यौत्सर्गिकस्याप्रामाण्यस्य क्वचिद् गुणः प्रतिबन्धकः । पीतः शङ्ख इत्यादौ तु विषयासत्वमुत्तेजकम् । त्वन्मते यादृच्छिक-संवादिलिङ्गाभासादौ प्रमाप्रतिबन्धकस्य दोषस्य विषयसत्त्वमिवेति चेन्न । अयथार्थधूमज्ञानेन ज्ञापनीयस्य वह्नेर्दैवात्सत्त्ववद्गुणेन ज्ञाप-नीयस्य श्वैत्यादेः शङ्खे सत्त्वेन विषयासत्त्वस्याभावात् । आरोप्य-पीतत्वासत्त्वस्य च दोषापगमदशायामपि सत्त्वेन तदापि भ्रमापातात् ।

अस्तु तर्हि पित्तादिदोष उत्तेजक इति चेत्तर्हि दोषाभावविशिष्टस्य गुणस्याभावो भ्रमे प्रयोजक इत्युक्तं स्यात् । ततो वरं दोष एव प्रयोजक इति लाघवात् । दाहे तु नोत्तेजक एव हेतुः । तस्मिन्नसत्यपि दाहदर्शनात् । भ्रमस्तु नासति दोषे दृष्टः ।

किञ्च यादृच्छिकसंवादिलिङ्गशब्दाभासादिज्ञाने प्रतिबन्धके गुणे त्वन्नयेन विद्यमाने मन्नयेनाविद्यमाने चोत्तेजकस्य दोषस्य सत्त्वेनौ-त्सर्गिकमप्रामाण्यं स्यात् ।

न्यायदीपः

द्वितीयकल्पेप्युत्तेजकं किं विषयासत्वमथ पित्तादिदोषः । आद्यमाशङ्कते ।। **नन्विति** ।। **औत्सर्गिकस्येति** ।। कारणगतसहजशक्तिजन्यस्येत्यर्थः ।। **क्वचिदिति** ।। प्रमोत्पत्तिस्थल इत्यर्थः ।। **उत्तेजकमिति** ।। तथाच तदभावविशिष्टगुणाभावो प्रामाण्ये प्रयोजक इत्युक्तस्थलेषु तदभावादेव प्रमाया अभावे कारणगतसहजशक्त्यैवाप्रमोत्पादो न दोषरूपहेतुबलेन । दोषस्तु तत्रावर्जनीयसन्निधिरेवेति भावः ।। **त्वन्मत इति** ।। ''यादृच्छिकस्य विषय-सत्त्वस्योत्तेजकत्वेन'' इत्यादिना दोषाभावहेतुत्वभङ्गे तथोक्तेरिति भावः ।

विषयासत्वमित्यत्र विषयपदेन गुणेन ज्ञाप्यो विषयो अभिमतः उत भ्रमविषय इति विकल्प्याद्यं निराह ।। **अयथार्थेति** ।। द्वितीयं निराह ।। **आरोप्येति** ।। **तदापीति** ।। प्रतिबन्धकस्य गुणस्योत्तेजकयुक्तत्वेनोत्तेजकाभावविशिष्टगुणाभावस्य सत्वादिति भावः ।

द्वितीयं शङ्कते ।। **अस्त्विति** ।। **पित्तादिरिति** ।। काचकामलादिरादिपदार्थः ।। **उत्तेजक इति** ।। औत्सर्गिकाप्रामाण्यप्रतिबन्धकगुणस्येति योज्यम् ।। **दोष एव प्रयोजक इतीति** ।। ननु प्रमायां दोषाभाव इव दोषो भ्रमप्रयोजकश्चेदपि नाप्रामाण्यस्य स्वतस्त्वभञ्जक इति चेन्न । तद्व्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वरूपकुलालपितृसाधारणप्रयोजकत्वे लाघवतर्केणावश्यं प्राप्ते सति प्रतिबन्धकगुणनिरासोपक्षयाभावे चोक्तदिशा सिद्धे सति प्रागुक्तानन्यथासिद्धान्वयव्यतिरेकहेतुबलेन कारणत्वमेव दोषस्य सिद्ध्यतीति तात्पर्यात् । अत एवोत्तरवाक्ये हेतुपदप्रयोगः ।

।। **दाहदर्शनादिति** ।। **मण्याद्यभावस्थल** इति भावः । अस्तु भ्रमेप्येवमित्यत आह ।। **भ्रमस्त्विति** ।।

दोषस्यान्वयव्यभिचारादुत्तेजकतया भ्रमहेतुत्वमयुक्तमिति भावेनाह ।। **किञ्चेति** ।। ईश्वरज्ञानस्य सल्लिङ्गपरामर्शरूपत्वेन यथार्थवाक्यार्थज्ञानत्वेन गुणत्वाङ्गीकारात्त्वन्नयेनेत्युक्तम् । भ्रमसाधारण्येन हेतुतया गुणत्वेनाहेतुत्वान्मन्नयेनाविद्यमान इत्युक्तम् ।। **औत्सर्गिकम्** ।। ज्ञानजननशक्तिप्रयुक्तमित्यर्थः । सिद्धान्ते तु सत्यपि दोषे भ्रमरूपकार्यानुत्पादो हेत्वन्तरवैकल्यादित्युक्तत्वान्नान्वयव्यभिचार इति भावः ।

तर्कताण्डवम्

ननूत्तेजकस्य दोषस्य विषयसत्त्वं प्रतिबन्धकमिति चेत्तर्हि

विषयसत्त्वाभावविशिष्टो यो दोषस्तदभावविशिष्टस्य गुणस्याभावो भ्रमप्रयोजक इत्युक्तं स्यात् । स च दोषापेक्षया अतिगुरुः । तस्माद् भ्रमे अर्थस्यासत्त्वेन सन्निकर्षासम्भवेन तत्स्थानीयस्य दोषस्यावश्यकत्वात् । पित्तादिदोषोत्कर्षेण भ्रमोत्कर्षदर्शनात् । अनन्यथासिद्धान्वयव्यतिरेकित्वाच्च अप्रामायां दोषो हेतुरित्यप्रामाण्यं परत एव ।।

उक्तं हि भगवत्पादैः । ''परतोऽप्रामाण्यं'' इति । परतः अपवादात् न तु प्रामाण्यमिव स्वतः उत्सर्गत इत्यर्थः ।।

न्यायदीपः

नन्वेवं सत्यप्युत्तेजके कार्यानुत्पादो हेत्वन्तरवैकल्यनिमित्तकः विषयासत्त्वरूपहेत्वन्तरसापेक्षजन्यत्वात्तस्येति भावेन शङ्कते ।। **नन्विति ।। तस्मादिति ।।** दोषस्य गुणनिरासोपक्षयाभावादित्यर्थः । तावता कथं भ्रमहेतुत्वमित्यतो हेतुत्रयमाह ।। **भ्रम इत्यादिना ।। उक्तं हीति ।।** विष्णुतत्वनिर्णय इत्यर्थः ।

।। इति अप्रामाण्यस्य परतस्त्वम् ।। १७ ।।

करणप्रामाण्यस्य स्वतस्त्वम्

करणगतस्य यथार्थज्ञानसाधनत्वरूपप्रामाण्यस्य तु ज्ञानजनकत्वग्राहकमात्रग्राह्यत्वरूपं ज्ञप्तौ स्वतस्त्वम् । अयथार्थज्ञानसाधनत्वरूपाप्रामाण्यस्य तु ज्ञानजनकत्वग्राहकमात्राग्राह्यत्वरूपं परतस्त्वम् । दोषादिज्ञानं विना भ्रमजनकत्वस्याज्ञानात् ।।

या तु पद्धतौ ''करणप्रामाण्यज्ञप्तिस्तु परत एव । इन्द्रियलिङ्गशब्दानां यथायथमनुमानप्रत्यक्षादिवेद्यत्वात् । यथार्थ-

ज्ञानसाधनत्वस्य त्वनुमानवेद्यत्वात्'' इत्युक्तिः सा करणग्राहकमात्र-ग्राह्यत्वरूपं स्वतस्त्वं नेत्यभिप्रेत्य ।।

अत एव सुधायां ''करणानां तु ज्ञप्तौ स्वतस्त्वं नास्त्येव'' इत्यादिना पद्धत्युक्तं पक्षमुक्त्वा ''अथवा ज्ञानजनकत्वं येन गृह्यते तत एव यथार्थज्ञानजनकत्वस्य तदीयस्य ग्राह्यत्वं स्वतस्त्वम्'' इति पक्षान्तरमुक्तम् ।

न्यायदीपः

नन्वस्त्वेवमुक्तदिशा ज्ञानप्रामाण्यस्योत्पत्तिज्ञप्त्योः स्वतस्त्वमथापि स्वतः प्रमाणैराम्नायैरित्युक्तिरयुक्ता । तत्प्रमाण्यस्योत्पत्तौ स्वतस्त्वेपि ज्ञप्तौ पद्धत्युक्तदिशा तदभावादित्यत आह ।। **करणेति** ।। स्वतस्त्वस्य स्पष्टत्वाय यथार्थज्ञानसाधनत्वरूपेति प्रामाण्यं विशेषितम् ।। **ज्ञानेति** ।। ज्ञानजनकत्वग्राहकं च रूपादिज्ञानं करणसाध्यं कार्यत्वात् च्छिदादिकार्य-वदित्याद्यनुमानं वा चक्षुरादि ज्ञानजनकमित्यादिवाक्यं वा तन्मात्रग्राह्यत्व-रूपमित्यर्थः । ज्ञानजननशक्तेरेव प्रमाजननशक्तित्वादिति भावः ।

''अप्रामाण्यं तथान्यत'' इत्यनुव्याख्याने ''परतोऽप्रामाण्यम्'' इति तत्वनिर्णये चोक्तेराह ।। **अयथार्थेति** ।। मात्रेत्युक्त्या सूचितमधिकं ग्राहकं व्यनक्ति ।। **दोषादीति** ।। करणगतकाचकामलासिद्ध्यव्याप्तिभ्रमप्रमादादि-दोषाणामज्ञाने विसंवादाज्ञाने च भ्रमजनकत्वाज्ञानात् । पूर्वोक्तदिशा ज्ञान-जनकशक्तेः सहजत्वेपि भ्रमजननशक्तेः काचादिकरणगतदोषाहितत्वेन ज्ञान-जननशक्त्यप्रमाजननशक्त्योर्भेदेन ज्ञानजननशक्तिग्राहकमात्रेण भ्रमजननशक्ते-र्ग्रहणायोगात् । दोषादिज्ञानानुविधानाच्च भ्रमजननशक्तिग्रहस्येति भावः ।

स्वतस्त्वोक्तेः प्रमाणपद्धतिविरोधमाशङ्क्य तदभिप्रायमाह ।। **या त्विति** ।। **सुधायामिति** ।। जिज्ञासांधिकरणे प्रत्यक्षवच्च प्रामाण्यमित्यत्रेत्यर्थः ।

तर्कताण्डवम्

उत्पत्तौ स्वतस्त्वं तु करणगतायाः यथार्थज्ञानजननशक्तेः करणगता या करणहेत्वासादिता सहजा ज्ञानजननशक्तिः तद्वत्सहजत्वं वा तदभिन्नत्वं वा । अप्रमाजननशक्तिस्तु न सहजा किन्तु दोषाहितेत्यप्रामाण्यं परत इति दिक् ।

एतदप्युक्तम् । ''परतोऽप्रामाण्यम्'' इति । तस्मात् प्रामाण्यस्य स्वतस्त्वादपौरुषेयोऽपि वेदः प्रमाणमेव ।

।। इति करणप्रामाण्यस्य स्वतस्त्वम् ।। १८ ।।

।। इति श्रीब्रह्मण्यतीर्थपूज्यपादाराधकेन व्यासयतिना विरचिते तर्कताण्डवे प्रामाण्यवादः समाप्तः ।।

न्यायदीपः

''करणानां च ज्ञानजननशक्त्यैव तद्याथार्थ्यजनकत्वं स्वतस्त्वम्'' इति सुधोक्तिं द्वेधा विवृण्वन्नाह ।। **उत्पत्ताविति** ।। करणगतस्य प्रामाण्यस्येत्यनुकर्षः । शक्तेरित्यस्य सहजत्वमित्यादिनान्वयः ।। **करणहेत्विति** ।। एतच्च जन्यकरणाभिप्रायम् न त्वपौरुषेयवेदाभिप्रायम् । शक्तिभेदमुपेत्य तद्वत्सहजत्वमित्युक्तिः दोषेण प्रमाशक्तिप्रतिबन्धेपि ज्ञानशक्तेरप्रतिबन्धनिर्वाहार्था । शक्तेरेकत्वेपि विषयभेदेन प्रतिबन्धाप्रतिबन्धयोरुपपत्तेः ।

सुधोक्तिस्वारस्यानुरोधेनाह ।। **तदभिन्नत्वं चेति** ।। ''वाक्यगता हि दोषास्तस्य यथार्थज्ञानजननशक्तिं प्रतिबध्य विपरीतज्ञानजननशक्ति-

माविर्भावयन्ति'' इति तत्वनिर्णयटीकायां वाक्यपदं इन्द्रियादीनामौत्सर्गिकी शक्तिः प्रामाण्यजनने दोषापवादादित्यादि-सुधानुरोधादुपलक्षणमुपेत्याह ।। **अप्रमेति** ।। करणगतेत्यनुकर्षः ।। **दोषाहितेति** ।।

ननु यदि प्रमाजननशक्तिः ज्ञानजनकत्वग्राहकमात्रग्राह्या तर्हि भ्रमजनन-शक्तिरपि तथा स्यात् [१]दोषादिज्ञानानुविधानात् सा परग्राह्या चेत् प्रमाजनन-शक्तिरपि गुणदोषाभावज्ञानानुविधानात्तथैव स्यात् । अप्रमाजनकत्वशङ्कादि-रूपविरोधिनिरासोपक्षीणं तच्चेत् दोषादिज्ञानानुविधानमपि तथा स्यात् । तथा यदि भ्रमजननशक्तिर्दोषाहिता तर्हि प्रमाजननशक्तिरपि गुणाहिता स्यात् । तस्याः सहजत्वे भ्रमजननशक्तिरपि तथा स्यात् । यदि दोषान्वयव्यतिरेक-बलात् भ्रमजनकशक्तिर्दोषाधीना तर्हि गुणानुविधानात्प्रमाजननशक्तिरपि गुणाधीना स्यात् । गुणानां विरोधिदोषनिरासोपक्षयेणान्यथासिद्धौ दोषाणामपि विरोधिगुणनिरासेनान्यथासिद्धेस्साम्यात् । गुणाभावसहकृतस्य करणस्य भ्रम-जनकत्वेन करणाप्रामाण्यस्य परतस्त्वे दोषाभावसहकृतस्य प्रमाजनकत्वात् प्रमाजनकत्वं परत एवेति स्यात् । दोषाभावस्य प्रयोजकत्वमेव न प्रमा-जननशक्त्याधायकत्वं तर्हि गुणाभावस्याप्येवमिति सममिति चेन्न । ज्ञान-प्रामाण्याप्रामाण्यस्वतस्त्वपरतस्त्वयोरुक्तसाधककलापस्याशेषस्यापि करण-प्रामाण्याप्रामाण्यस्वतस्त्वपरतस्त्वयोरनुसन्धेयत्वात् । अभ्यासदशास्थले गुणाद्यनुसन्धानाभावेपि प्रमाजनकत्वज्ञानानुभवेन व्यभिचारात् । पीतः शङ्ख इत्यादिभ्रमे विशेषदर्शनादिरूपे गुणे सत्यपि पित्तादिकरणदोषेण भ्रमोत्पादनेन दोषस्य गुणनिरासोपक्षीणत्वायोगादित्यादेरुक्तत्वादिति भावेनाह ।। **दिगिति** ।।

तथा ह्यनुमानानि । प्रमाजननशक्तिः ज्ञानजनकशक्तिग्राहकमात्रग्राह्या तदन्याग्राह्यत्वे सति ग्राह्यत्वात् सम्मतवत् । यथार्थज्ञानजनकत्वं ज्ञान-

१. 'दोषादिज्ञानानुविधानात्' इति पाठान्तरे नास्ति ।

जनकत्वहेत्वन्यहेत्वधीनं न ज्ञानजनकत्वाधिकरणमात्रवृत्तित्वात् ज्ञान-जनकत्ववदित्यांदिरूपेण ध्येयानि । भ्रमजनकेऽपि धर्म्यंशे प्रमाजनकत्वा-भावान्नासिद्धिः । भ्रमजनकत्वे च यावज्ज्ञानजनकत्वाधिकरणे वृत्त्यभावान्न व्यभिचारः ।। **अप्रामाण्यमितीति** ।। करणगताप्रामाण्यमित्यर्थः । स्वतस्त्वोक्तेरुपयोगं वदन्नुपसंहरति ।। **तस्मादिति** ।। **अपौरुषेयोऽपीति** ।। आप्तोक्तत्वादिगुणाभावेऽपीत्यर्थः ।

।। इति करणप्रामाण्यस्य स्वतस्तवम् ।। १८ ।।

।। इति श्रीराघवेन्द्रयतिविरचिते तर्कताण्डवव्याख्याने
न्यायदीपे प्रामाण्यवादः समाप्तः ।।

वेदापौरुषेयत्ववादः

वेदापौरुषेयत्वे अनुमानानि

ननु कथं वेदस्यापौरुषेयत्वम् । तत्र प्रमाणाभावात् । वाक्यत्वा-द्यनुमानेन ''च्छन्दांसि जज्ञिरे'' इत्यादिश्रुत्या ''प्रतिमन्वन्तरं चैषां श्रुतिरन्या विधीयते'' इत्यादिस्मृत्या च पौरुषेयत्वसिद्धेश्चेति चेत् ।

उच्यते । ज्योतिष्टोमस्य स्वर्गसाधनत्वं वेदतात्पर्यविषयो वा पौरुषेयशब्देतरप्रमाणकः पौरुषेयशब्दाप्रमाणकत्वे सति सप्रमाणक-त्वात् । यद्यदप्रमाणकत्वे सति सप्रमाणकं तत्तदितरप्रमाणकम् । यथा संमतम् । वक्ष्यमाणरीत्या पक्षधर्मताबलादपौरुषेयशब्दसिद्धिः ।

न्यायदीपः

एवं ''नविलक्षणत्वादस्य'' इति नयसिद्धं ''स्वतः प्रमाणैः'' इति श्लोकोक्तं प्रामाण्यस्वतस्त्वं समर्थ्य अधुना विलक्षणत्वादिति हेतोर-

पौरुषेयत्वरूपवैलक्षण्यवत्वादित्यर्थान्तरोपगमेन ब्रह्मसूत्राभिमतमादिवर्जितैरिति श्लोकोक्तमपौरुषेयत्वं साधयितुं **मणि**कृदाद्युक्तमाशङ्कते ।। **नन्विति**[1] ।। वाक्यत्वादीत्यादिपदार्थव्यक्तिरग्रे परोक्तानुमानखण्डनप्रस्तावे ज्ञेया । [2]**मण्या**द्युदाहृतश्रुतिस्मृती चाह ।। **च्छन्दांसीति** ।।

"न चापौरुषेयं वाक्यमेव नास्तीति वाच्यम् । तदभावे सर्वसमयाभिमतधर्माद्यसिद्धेः" इति विष्णुतत्त्वनिर्णयवाक्यसूचितानां धर्माधर्मस्वर्गनरकादिकं प्रमाणोपेतं वस्तुत्वादित्यादिना जिज्ञासाधिकरणसुधोक्तसामान्यपरिशेषनिष्कर्षभूतानामुक्त्या प्रमाणाभावादिति हेतुं तावन्निराह ।। **ज्योतिष्टोमस्येति** ।। विशिष्यैवं पक्षनिर्देशे तद्बोधकैकवाक्यस्यापौरुषेयत्वसिद्धिर्न तु सर्वस्यापि वेदस्येत्यतः सामान्यपक्षनिर्देशमाह ।। **वेदेति** ।। यद्वा "यः शब्दो वक्त्रा यदिच्छया प्रयुक्तः स तत्पर" इति तदिच्छया वक्तृप्रयुक्तशब्दगोचरत्वमेव शब्दतात्पर्यविषयत्वमिति वेदगततात्पर्यपर्यालोचनया तस्य पौरुषेयत्वम् इति **मणि**कृदुक्तिखण्डनाय वेदतात्पर्यविषय इति सामान्यपक्षनिर्देशः । यद्वा अस्मिन्पक्षे सप्रमाणकत्वादिति हेतुर्वस्तुत्वादिहेतुना प्रसाध्याङ्गक इति भावेनाह ।। **वेदेति** ।। आपातप्रतिपाद्ये बाधवारणाय ।। **तात्पर्येति** ।। लौकिकशब्दतात्पर्यविषये बाधवारणाय ।। **वेदेति** ।।

[3]ननु कोयं वेदो नाम (१) यदि वेदपदार्थो वेदस्तर्हि इतिहासपुराणतात्पर्यविषये बाधः । "इतिहासपुराणः पञ्चमो वेदानां वेदः" इति तयोरपि वेदपदार्थत्वात् । (२) नापि वेदशब्दमुख्यार्थो वेदः । मुख्यत्वप्रयोजकप्रवृत्तिनिमित्तस्येतिहासादिव्यावृत्तस्यानिरूपणात् । (३) नापि शाखासमुदायो

१. ४२९ पुटे. ।

२. ३७२ पुटे (चौ.सं.प्र.) शब्दखण्डे चतुर्थभागस्य प्रथमपरिच्छेदे तात्पर्यवादान्ते । ऋचः सामानि जज्ञिरे इति मणौ दृश्यते ।

३. एतत्सर्वं मणौ तात्पर्यवादे पूर्वपक्षिणाशङ्कितम् । (३४३ पुटे)

वेदः । शाखायाः वेदैकदेशत्वेनान्योन्याश्रयात् । (४) नापि सन्दिग्धकर्तृकं वाक्यं वेदः ।. वादिप्रतिवादिनोर्निश्चयात् । मध्यस्थसन्देहेन पक्षतावच्छेदक-करणे अन्योन्याश्रयात् । वादिप्रतिवाद्यनुमानान्तरभावित्वान्मध्यस्थसन्देहस्य । (५) नापि प्रमाणशब्दो वेद इति युक्तम् । भारतादौ गतत्वात् । (६) नापि यथार्थवाक्यार्थज्ञानाजन्यप्रमाणशब्दो वेद इति । परमतेऽप्रसिद्धेः । प्रमाणशब्दमात्रस्य तादृशेश्वरज्ञानजन्यत्वात् । (७) न च जन्ययथार्थ-वाक्यार्थज्ञानाजन्यप्रमाणशब्दो वेद इति युक्तम् । संवादिशुकबालादिवाक्येऽपि गतत्वेन बाधापत्तेः । सिद्धान्तिमते नित्यज्ञानव्यासप्रणीतभारतादावपि गतत्वाच्चेति चेत् ।

उच्यते । (१) ''शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्य-विषयार्थकत्वे सति शब्दजन्ययथार्थवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वं वेदत्वं'' इति **मण्युक्त**रीत्या वा (२) ''क्रमविशिष्टा वर्णा वेदः'' इति सुधोक्तदिशा वा (३) वक्ष्यमाणदिशा ''साक्षाद्धर्मादिबोधकशब्दो वेद'' इति वा (४) प्रमाकरणामूलकत्वे सति प्रमाणशब्दो वेद इति वा (५) पूर्वतन्त्रे विधिमन्त्राधिकरणे मन्त्रपदार्थोक्तरीत्या (६) ''वेद इत्यभियुक्तप्रयोगविषयो वा वेद'' इति तन्निरुक्त्युपपत्तेः ।

आद्ये सत्यन्तमात्रस्य वेदसमानार्थस्मृतौ गतत्वाद्विशेष्यम् । वेदार्थस्य शब्दतदुपजीव्यनुमानविषयकत्वादसम्भववारणाय शब्दतदुपजीविप्रमाणाति-रिक्तेत्युक्तिरिति । तात्पर्यं च तत्प्रमितिशेषत्वमित्यग्रे व्यक्तम् । तद्विषयो ज्योतिष्टोमादिरित्यर्थः । साध्ये बाधवारणाय पौरुषेयेत्युक्तिः । स्वतन्त्रपुरुष-पूर्वकशब्देत्यर्थः । पौरुषेयेतरेत्येवोक्तौ यत्किञ्चित्प्रत्यक्षादिरूपपौरुषेयेतर-प्रमाणकत्वेनापि उपपत्तेः । पौरुषेयशब्दसिद्ध्याऽर्थान्तरवारणाय शब्दपदम् । पौरुषेयशब्दार्थे व्यभिचारनिरासाय हेतौ सत्यन्तम् । अप्रयोजकतानिरासाय

विशेष्यम् ।। **यथासम्मतमिति** ।। श्रोत्राद्यप्रमाणकत्वे सति सप्रमाणकं रूपं श्रोत्रादीतरचक्षुःप्रमाणकमित्यर्थः ।

ननु प्रत्यक्षादिप्रमाणकत्वेनापि साध्योपपत्त्यार्थान्तरमित्यत आह ।। **वक्ष्यमाणेति** ।। ''न चात्र हेतुत्रयेऽपि विशेषणासिद्धिः'' इत्यादौ वक्ष्यमाणदिशा प्रत्यक्षानुमानावेद्ये पक्षे उक्तरूपसप्रमाणकत्वाख्यहेतोः पक्षनिष्ठताया अपौरुषेयप्रमाणकत्वेन विना पर्यवसानाभावादिति भावः ।

तर्कताण्डवम्

अपौरुषेयशब्दप्रमाणकत्वं वा साध्यम् । तत्र चेन्द्रियलिङ्ग-पौरुषेयशब्दाप्रमाणकत्वे सति सप्रमाणकत्वं हेतुः । पूर्ववत्सामान्य-व्याप्तिः । अप्रसिद्धविशेषणता तु व्याप्तौ सत्यां न दोषः । त्वन्मते अभावसाध्यके व्यतिरेकिणि हेत्वभावेन साध्याभावरूपस्य भावस्य व्याप्तिग्रहरूपानुमितिकरणस्येव इहापि साध्यप्रसिद्धिं विनैव सामान्यव्याप्तिग्रहरूपस्य अनुमितिकरणस्य निष्पन्नत्वात् ।

न च तन्निष्पत्तावपि विशेषणज्ञानरूपसहकारिविरहादनुमिति-रूपविशिष्टज्ञानानुत्पत्तिरिति वाच्यम् । मन्मते तस्य विशिष्ट-ज्ञाना-हेतुत्वात् । त्वन्मतेऽप्यभावसाध्यकव्यतिरेकिणीवात्राप्यादौ साध्य-विशेष्यिकाया एवानुमितेः सम्भवात् ।

न्यायदीपः

ननु पक्षधर्मताबलादपि साध्यं सिध्यत् व्यापकतावच्छेदकधर्मप्रकारेणैव सिध्यति न त्वन्यथा । अतिप्रसङ्गादसामर्थ्याच्च । अन्यथा प्रामाण्याभाव-साध्यक**मण्यु**क्तव्यतिरेकिखण्डनायोगादिति वदन्तं प्रत्याह ।। **अपौरुषेयेति** ।।

नन्वेवं प्रागुक्तहेतोरिन्द्रियलिङ्गविषये व्यभिचार इत्यत आह ।। **तत्र चेति** ।। उक्तरूपसाध्यं इत्यर्थः । पूर्वत्रात्र च विशेषणासिद्धिनिरासाय पौरुषेयेत्युक्तिः । ''आश्रयसाध्यव्यधिकरणासिद्धयो न दूषणम्'' इत्यादि-प्रमाणलक्षणं हृदि कृत्वाऽह ।। **न दोष इति** ।।

सा किं साध्याज्ञाने तन्निरूपितव्याप्तिग्रहायोगाद्व्याप्तिज्ञानरूपकरण-विघटकत्वेन दोष उत विशिष्टज्ञाने विशेषणज्ञानस्य कारणत्वेनानुमितिरूप-विशिष्टज्ञानानुत्पादकत्वेन । नाद्य इत्याह ।। **त्वन्मत इति** ।। अयं वह्नित्वेनानुभवो वह्नित्वप्रकारकत्वे सति वह्नित्वाभाववद्विशेष्यको न समर्थ-प्रवृत्तिजनकत्वादिति व्यतिरेकिणीत्यर्थः । उक्तमेतत्पूर्वं परतस्त्वे प्रामाण्यानु-मित्यसम्भववादे ।

द्वितीयमाशङ्क्य निराह ।। **न चेति** ।। **तस्येति** ।। विशेषण-ज्ञानस्येत्यर्थः । उपपादयिष्यते चैतन्निर्विकल्पकभङ्ग इति भावः । परमते-प्यनुमित्युत्पादप्रकारमाह ।। **त्वन्मतेऽऽपीति** ।। विशेषणज्ञान-हेतुकत्वमतेऽपीत्यर्थः ।। **अभावसाध्यकेति** ।। प्रागुक्तव्यतिरेकिणीत्यर्थः । मणिकृता ज्ञप्तिप्रामाण्यवादे ''विशेषणज्ञानं विना कथं प्रामाण्य-विशिष्टानुमितिरिति चेत् । प्रथमं न कथञ्चित् ज्ञाने प्रामाण्यमित्यनुमित्यनन्तरं तेनैव हेतुना तत्रैव प्रामाण्यविशिष्टानुमितिः । अभावविशेष्यकप्रतीत्य-नन्तरमभाववद्भूतलमिति ज्ञानवत्'' इत्युक्तेरिति भावः ।

तर्कताण्डवम्

यद्वा वेदत्वमपौरुषेयवृत्ति । तदितरावृत्तित्वे सति वृत्तिमत्वात् । यदेवं तदेवम् । यथा सम्मतम् ।

न चात्र हेतुत्रयेऽपि विशेषणासिद्धिः । वेदार्थे धर्माधर्मादावस्मदादिप्रत्यक्षस्याप्रवृत्तेः । ईश्वरयोगिप्रत्यक्षयोश्च धर्मादिवद्वेदं विना असिद्धेः । धर्मादिकं कस्यचित्प्रत्यक्षं वस्तुत्वाद्घटवदित्यादावद्यापि धर्माद्यसिद्ध्याऽन्योन्याश्रयात् । ताभ्यामस्मदादीन् प्रति धर्माद्यसिद्धेश्च । इष्टापूर्तयोः प्रेक्षावत्प्रवृत्त्यन्यथानुपपत्त्या फलवत्त्वमात्रानुमानेऽप्यस्य यागहोमदानादेरिदं फलमित्यस्यातिसूक्ष्मस्य विशेषस्यानुमानायोग्यत्वात् ।

फलविशेषोद्देशेन ज्योतिष्टोमादिकर्मविशेषे बहूनां प्रेक्षावतां प्रवृत्तिस्तु चैत्यवन्दनादाविवोपपन्ना । तदुक्तं भगवत्पादैः ''तदभावे सर्वसमयाभिमतधर्माद्यसिद्धेः'' इति ।

न्यायदीपः

अप्रसिद्धिदोषहीनं प्रयोगान्तरमाह ।। **यद्वा वेदत्वमिति** ।। पक्षनिरुक्तिः पूर्ववत्साक्षाद्धर्मबोधकशब्दत्वादिरूपेण ध्येया । साध्यस्य गगनादिवृत्तित्वे बाधादपौरुषेयशब्दवृत्तित्वेनैव पर्यवसानमिति भावः । हेतौ तदित्यपौरुषेयपरामर्शः । सत्यन्तमात्रस्यावृत्तिमद्गगनादौ व्यभिचारनिरासाय विशेष्यम् । घटत्वादौ तन्निरासाय सत्यन्तम् । न च सिद्धान्ते

''एकत्राप्यनवस्थस्य सर्वत्रावस्थितिः कथम्''

इत्यादिना वैशेषिकनयानुव्याख्याने गगनादेर्वृत्तिमत्वोक्तेर्विशेष्यं व्यर्थमिति शङ्क्यम् । असति शशशृङ्गादौ स्वमते व्यभिचारवारकत्वात् । वृत्तिमत्त्वं च समवायादिवृत्त्येति ज्ञेयम् । तेन जगदाधारताप्रयोजकसम्बन्धेनेदानीं वेदत्वमिदानीं घटत्वमित्यादिप्रतीत्या कालेऽपि वेदत्वादेर्वृत्तिमत्त्वेनार्थान्तरत्वं हेतौ विशेष्यवैयर्थ्यमिति च शङ्कानवकाशः ।

।। **यदेवमिति** ।। यद्यदितरावृत्तित्वे सति वृत्तिमत् तत्तद्वृत्ति । यथा घटेतरावृत्तित्वे सति वृत्तिमद्घटत्वं घटवृत्तीत्यर्थः । आद्ये हेतौ विशेषणासिद्धिं न चेत्यादिना ग्रन्थेनोद्धरिष्यन् द्वितीयहेतावुपात्तस्य इन्द्रियलिङ्गाप्रमाणकत्व-रूपाधिकविशेषणस्यासिद्धिं सुधोक्तविवरणेन तावदुद्धरन्निन्द्रियपदेनाभिमतं प्रत्यक्षं किमस्मदादिप्रत्यक्षमुतेश्वरयोगिप्रत्यक्षे इति विकल्पौ मनसि निधाय आद्ये आह ।। **वेदार्थ इति** ।। तस्यैव विवरणम् ।। **धर्मेत्यादि** ।। ज्योति-ष्टोमादिर्धर्मः । श्येनयागादिरधर्मः । आदिपदेन स्वर्गनरकाद्यतीन्द्रियवेदैक-वेद्यार्थग्रहः । अन्त्य आह ।। **ईश्वरेति** ।। **असिद्धेरिति** ।। ईश्वरप्रत्यक्षेण योगिप्रत्यक्षेण वा धर्मादिकं सिद्धमित्यस्यास्मदाद्यप्रत्यक्षत्वेन वेदेनैव तस्यावगन्तव्यत्वात् तथा च वेदेनेश्वरादिप्रत्यक्षं विज्ञाय तेन धर्मादिस्वरूपावगत्यपेक्षया ''चोदनालक्षणोऽर्थो धर्मः'' इति जैमिन्युक्तदिशा वेदेनैव तन्निर्णयोस्तु किं बकबन्धप्रयासेनेति प्रत्यक्षाविषयत्वं तस्येति भावः ।

अस्तु तर्ह्यनुमानेन धर्मादिगोचरेश्वरादिप्रत्यक्षसिद्धिरित्यत आह ।। **धर्मादिकमिति** ।। प्रमेयत्वादिहेतुरादिपदार्थः ।। **अद्यापीति** ।। वेदेन विना धर्मादिसिद्धिर्नेति वदन्तं प्रति धर्मादिसाधकतयोपन्यस्तेश्वरादिप्रत्यक्ष-साधकानुमानोपन्यासवेलायामपि । न केवलं पूर्वमित्यर्थः ।। **अन्योन्येति** ।। धर्मादिसिद्धौ तत्पक्षीकारेणेश्वरादिप्रत्यक्षसाधकानुमानसिद्धिः । अनुमानसिद्धौ च तत्सिद्धप्रत्यक्षेण धर्मादिसिद्धिरित्यन्योन्याश्रयादित्यर्थः ।

अस्तु वा वेदानुमानाभ्यां धर्मादिगोचरेश्वरप्रत्यक्षसिद्धिः तथाप्यस्मदादे-रनुष्ठानोपयोगिधर्मादिनिश्चयो नेश्वरयोगिप्रत्यक्षाभ्यां सिध्यतीति दोषान्तरं चाह ।। **ताभ्यामिति** ।। तथाचास्मदादिज्ञानोपायो वेद एवैष्टव्य इति किमीश्वरादि-प्रत्यक्षोपन्यासेनेति भावः ।

एवमिन्द्रियाप्रमाणकत्वरूपविशेषणं समर्थ्य लिङ्गाप्रमाणकत्वरूपविशेषणासिद्धिमुद्धरति ।। **इष्टेति** ।। इष्टं यागः, पूर्तं तटाकादि, ''अन्येभ्योऽपि दृश्यते'' इति दीर्घविधानादिष्टापूर्तयोरिति साधु ।। **इत्यस्येति** ।। तज्ज्ञानस्यैवानुष्ठानोपयोगित्वादिति भावः ।

प्रवृत्तिविशेषेण विशेषसिद्धिरस्त्वित्यत आह ।। **फलविशेषेति** ।। स्वर्गादिरूपेत्यर्थः ।। **चैत्येति** ।। यथा वेदबाह्यानामनेकेषामधर्मे च फलाहेतौ धर्मत्वादिभ्रान्त्या प्रवृत्तिस्तथान्धपरम्परयोपपन्ना । न तु धर्मादिस्वरूपं निर्णाययतीत्यर्थः ।। **तदुक्तमिति** ।। अपौरुषेयवाक्यादन्येन प्रत्यक्षेणानुमानेन वा धर्मादिसिद्धिर्नेत्येतत् तत्त्वनिर्णये उक्तमित्यर्थः । तदभावे अपौरुषेयवाक्याभाव इत्यर्थः ।

एवमिन्द्रियलिङ्गाप्रमाणकत्वरूपविशेषणसमर्थनपरग्रन्थेनैवाद्यसाध्ये अपौरुषेयशब्दसिद्धिर्हेतोः पक्षधर्मताबलादित्येतदप्युपपादितं ज्ञेयम् ।

तर्कताण्डवम्

न च पौरुषेयवाक्येन तत्सिद्धिः । पुरुषेष्वज्ञानमिथ्याज्ञानविप्रलम्भप्रमादकरणापाटवादीनां सम्भावितत्वेन अनाश्वासात् ।

तन्निवृत्त्यर्थमीश्वरस्य नित्यसार्वज्ञ्याद्यङ्गीकारे च तदर्थं धर्मबोधके शब्द एवापौरुषेयत्वमात्रं कल्प्यताम् । अर्थापत्तेरुत्सर्गतः साक्षादुपपादकविषयत्वात् । न तु परम्परयोपपादकं वक्तरि सार्वज्ञ्यादिकम् । अन्यथा वेदस्यासर्वज्ञ्यप्रणीतत्वमङ्गीकृत्याश्वासार्थं तस्य सर्वज्ञप्रणीतशब्दान्तरमूलत्वं कल्प्यं स्यात् ।

तदुक्तं भगवत्पादैः ''अपौरुषेयवाक्याङ्गीकारे न किञ्चित् कल्प्यम्'' इति । साक्षाद्बोधके वाक्येऽपौरुषेयत्वमात्राङ्गीकार इत्यर्थः ।

न्यायदीपः

यदप्याद्यांद्वितीयहेत्वोः पौरुषेयशब्दाप्रमाणकत्वे सतीति विशेषणं यच्च तृतीयहेतावपौरुषेयेतरावृत्तित्वे सतीति विशेषणम् तदसिद्धिं ''न च पौरुषेयवाक्येन तत्सिद्धिः । अज्ञानविप्रलम्भयोः प्राप्ते''रित्यादितत्त्वनिर्णय-वाक्यार्थव्यक्तीकरणेनोद्धरति ।। **न चेत्यादिना** ।। **पौरुषेयेति** ।। ईश्वर-कृतेत्यर्थः । तत्सिद्धिः धर्मादिनिश्चयः ।। **अज्ञानम्** ।। विवक्षितार्थतत्व-ज्ञानाभावः । ज्ञात्वापि परप्रतारणं विप्रलम्भः । घटोऽस्तीति वाच्ये पटोऽस्तीत्युक्तिः प्रमादः ।। **तन्निवृत्त्यर्थमिति** ।। पुरुषेषु सम्भाविता-ज्ञानादिदोषनिमित्तकानाश्वासाभावसिद्ध्यर्थमित्यर्थः ।। **नित्येति** ।। दोषजन्यत्वेन भ्रमत्वनिवृत्यर्थं नित्येति सार्वज्ञ्यविशेषणम् । शब्द एवेत्यत्र सप्तम्यन्तं शब्दपदम् । को विशेष इत्यत उक्तम् ।। **मात्रमिति** ।। तत्र तु सार्वज्ञ्यादिकं बह्वित्यग्रे व्यक्तम् ।

विशेषान्तरं चाह ।। **अर्थापत्तेरिति** ।। धर्मादिनिश्चयरूपस्योपपादक-प्रमाणेन विनानुपपद्यमानस्य अर्थापत्तिशब्दितस्य साक्षादुपपादकं हि धर्मादि-प्रमापकशब्दे अपौरुषेयत्वम् । नित्यसार्वज्ञ्यादिकं तु तत्र धर्मादिनिश्चाय-कत्वोपपादकोपपादकम् । अज्ञानादिदोषहीनपुरुषकृतत्वं तदुपपादकम् । तदुपपादकं च सार्वज्ञ्यमिति परम्परयोपपादकं बहु च तत्कल्प्यम् । तथाचाल्पत्वात्साक्षादुपपादकत्वात्तदेव कल्प्यमिति भावः ।

ननु लोके क्वापि शब्देऽपौरुषेयत्वादृष्टेः परम्परा युक्तैवेत्यत आह ।। **अन्यथेति** ।। एवं साक्षादुपपादके सम्भवति [१]शब्दत्वापौरुषेयत्वयोः सहदर्शनमात्रेण परम्पराश्रयण इत्यर्थः ।। **अङ्गीकृत्येति** ।। शब्दमात्रेऽ-

१. 'शब्दत्वपौरुषेयत्वयोः' इति भाव्यमिति भाति ।

सर्वज्ञप्रणीतत्वस्य लोके दर्शनादिति भावः ।। **तदुक्तमिति** ।। अपौरुषेयत्व-मात्रकल्पनं लघ्वित्येतत्तत्त्वनिर्णये उक्तमित्यर्थः ।

यद्वाऽभ्युपेत्योक्तमपौरुषेयत्वमात्रं कल्प्यतामिति तदपि न कल्प्यमेवेत्ये-तत्सम्मत्युक्तिव्याजेनाह ।। **तदुक्तमिति** ।। **न किञ्चिदिति** ।। अपौरु-षेयत्वमपि वेदकर्तुरप्रसिद्धेरेव सिद्धमिति भावः ।

वेदकर्तृपुरुषगतदोषहीनत्वोपपादकवक्तृसार्वज्ञ्यप्रतिपादकतया परम्परया धर्मादिबोधकापौरुषेयवाक्याङ्गीकार इति भ्रान्तिनिरासाय प्रकृतोपयोगितयार्थ-माह ।। **साक्षादिति** ।। साक्षाद्धर्मादिबोधक इत्यर्थः ।

तर्कताण्डवम्

किञ्चाप्रामाणिकानां सार्वज्ञ्याविप्रलम्भकत्वाप्रमादकरणपाट-वोपदेष्टृत्वादीनां, वेदे तत्कृतत्वस्य च कल्पनीयत्वे कल्पनागौरवं स्यात् ।

न च सार्वज्ञ्येनैवाविप्रलम्भादिसिद्धिः । सर्वज्ञेश्वरावतारेष्वपि बुद्धादिषु विप्रलम्भादिदर्शनात् । सर्वज्ञस्य शरीरेऽपि शरीरत्वकृत-करणापाटवादेरवर्जनीयत्वात् । ज्ञानिनामप्युपदेशवैमुख्यदर्शनात् । वेदे तत्कृतत्वप्रसिद्ध्यभावेन तस्यापि कल्प्यत्वात् । कार्यत्वाद्यनुमाने-नेश्वरस्य सार्वज्ञ्यसिद्धिस्तु निरसिष्यते ।

न च वेदादेव तस्य सार्वज्ञ्यादिसिद्धिः । वेदप्रामाण्यस्य ईश्वर-सार्वज्ञ्यादिसिद्ध्यधीनत्वेनान्योन्याश्रयात् । अन्यथा बुद्धाद्यागमा-त्तस्यापि सार्वज्ञ्यादिकं सिद्ध्येत् । तदुक्तं भगवत्पादैः

''अविप्रलम्भस्तज्ज्ञानं तत्कृतत्वादयोऽपि च ।
कल्प्या गौरवदोषेण पुंवाक्यं ज्ञापकं न तत्'' इति ।

तस्मान्न विशेषणासिद्धिः ।

न्यायदीपः

एवं स्वपक्षे लाघवोपपादनेन पौरुषेयशब्दाप्रमाणकत्वादिरूपं अपौरुषेयेतरावृत्तित्वरूपं विशेषणं च समर्थ्य परपक्षे वक्ष्यमाणानुव्याख्यानोक्तगौरवोपपादनेन च समर्थयते ।। **किञ्चेति** ।। यद्वा न किञ्चित्कल्प्यमित्ययुक्तं अपौरुषेयत्वस्य कल्प्यत्वादित्यतोऽस्तु तावदेतावत् तथापि न तवेव बह्विति भावेनाह ।। **किञ्चेति** ।।

ननु सार्वज्ञ्यादिकं नाप्रामाणिकं कार्यत्वाद्यनुमानेन सिद्धेः । सार्वज्ञ्येनैव च सर्वदोषहीनता सिध्यति । तथाहि । धर्मादिसाक्षात्कारवतो न रागादिदोषाः सम्भवन्ति । ''अविद्याक्षेत्रत्वमुत्तरेषाम्'' इति पतञ्जल्युक्त्या तेषामज्ञानमूलत्वात् । सर्वज्ञेऽज्ञानायोगात् । रागादिरहितस्य च तत्कार्यविप्रलम्भायोगात् । एवम्भूतमहानुभावस्य करणापाटवादेरनाशङ्कचत्वात् । ज्ञानी सन्नज्ञलोकाय कुतो नोपदिशेत् । प्रसिद्धवेदे तदुपदेशकल्पनस्य लघुत्वाच्चेत्याशङ्कच प्रत्याह ।। **न चेत्यादिना निरसिष्यत** इत्यन्तेन । आदिपदेन अप्रमादादिकं उपदेष्टृत्वं वेदे तत्कृतत्वं च गृह्यते ।। **शरीरेऽपीति** ।। त्वन्मते सर्वज्ञस्येश्वरस्य नास्ति शरीरं, उपदेशौपयिकतया शरीरेऽङ्गीकृतेऽपीत्यर्थः ।। **ज्ञानिनामपीति** ।। सिद्धानामित्यर्थः । व्यक्तमेतत्सर्वं तत्त्वनिर्णयटीकायाम् ।

।। **अन्योन्येति** ।। सिद्धे सार्वज्ञ्ये तत्प्रणीतत्वेन वदेप्रामाण्यसिद्धिः तत्सिद्धौ च तेन सार्वज्ञ्यसिद्धिरित्यर्थः ।

।। **तदुक्तमिति** ।। जिज्ञासाधिकरणानुव्याख्यान इत्यर्थः । **तज्ज्ञानं** धर्मादिप्रमितिः । **तत्कृतत्वं** तेन पुरुषेण कृतत्वम् । आदिपदात्करण-पाटवादिग्रहः । ज्ञापकं निश्चायकं, धर्मादिरित्यर्थः । चो यत इत्यर्थे । तत् तस्मादित्यर्थः ।

तर्कताण्डवम्

यद्वा ईश्वरज्ञानं न प्रमेति मते वेदः कालभेदेनानियतानुपूर्वीको न दोषामूलकत्वे सति प्रमामूलकत्वरहितत्वात् गगनवत् । प्रमेति मते दोषामूलकत्वे सति प्रमाकरणामूलकत्वं हेतुः ।

यद्यप्यानुपूर्व्यगर्भितस्वरूपे गगने शश्वदेकप्रकारानुपूर्वीकत्व-मपौरुषेयत्वं नास्ति । तथाप्यनियतानुपूर्वीराहित्यरूपं तदस्त्येव ।

यद्यपीदमनित्याद्घटादेर्न व्यावृत्तम् । तथापि पौरुषेयवाक्याद् व्यावृत्तत्वात् परोक्तं यद्बुद्धिपूर्वकाबुद्धिपूर्वकवाक्यसाधारणं पौरुषेयत्वं तदभावरूपत्वाच्च न तद्व्यतिरेकसाधनेऽर्थान्तरम् ।

न्यायदीपः

नियतैकप्रकारत्वमपौरुषेयत्वमिति सुधोक्तिमनुरुध्याह ।। **यद्वेति** ।। हेतोरसिद्धिनिरासायोक्तम् ।। **न प्रमेति** ।। **मम इति** ।। गुणजन्यस्यैव प्रमात्वेनेश्वरज्ञानस्य तदजन्यत्वान्न प्रमेति मत इत्यर्थः । सिद्धसाधन-तानिरासाय साध्ये कालभेदेनेत्युक्तिः । पूर्वोत्तरकल्पभेदेनेत्यर्थः । नियतानु-पूर्विक इत्युक्तावेकप्रकारानुपूर्वीकत्वस्य साध्यत्वप्राप्तौ दृष्टान्ते साध्यवैकल्येन परस्याप्रसिद्धेः परोक्तसाध्यनिरासलाभाय च नञ्द्वयम् ।

''प्रत्यक्षादिप्रमाणं वा विप्रलम्भादिकं वाऽस्य मूलं नोपलभ्यत इति प्रसिद्धिविषयत्वं वेदत्वम्'' इति तत्वनिर्णयटीकायां प्रमाणपदं प्रमित्यर्थक-

मुपेत्य तदर्थमेव निष्कृष्य हेतुमाह ।। **दोषेति** ।। विप्रलम्भादिदोषेत्यर्थः । भ्रान्तिमूलकवाक्ये प्रमितिमूलकपुंवाक्ये च व्यभिचारवारणाय क्रमेण विशेषणविशेष्ययोरुक्तिः ।। **प्रमेतीति** ।। गुणाजन्यत्वेऽपि दोषाजन्यज्ञानत्वा-त्तद्वति तत्प्रकारकत्वाच्च । ज्ञानत्वस्य प्रमात्वभ्रमत्वान्यतरव्याप्यतया भ्रमत्वहीनस्य प्रमात्वाभावे ज्ञानत्वाभावप्रसङ्गाच्च प्रमेति मत इत्यर्थः ।

इदानीं प्रमाणपदं प्रमितिकरणार्थमुपेत्याह ।। **प्रमाकरणेति** ।। परमते वेदस्येश्वरज्ञानमूलकत्वेऽपि तस्याजन्यतया करणाभावात्स्वयमकरणत्वाच्च नासिद्धिरिति भावः ।

यद्यप्येतन्मतेऽपि पूर्वोक्तदिशा भ्रमसाधारणोपादानादिगोचरज्ञानत्वेनैवेश्वर-ज्ञानस्य सर्वत्र हेतुतया प्रमात्वेनाहेतुत्वात्प्राचीनहेतूक्तावपि नासिद्धिः । तथाप्यभ्युपेत्यवादेन वा प्रमात्वेन प्रमामूलकत्वविवक्षायाः प्रागुनुक्तेर्वा हेत्वन्तरोक्तिः ।

पर्यवसितसाध्ये साध्यवैकल्यमाशङ्क्य च निराह ।। **यद्यपीति** ।। ननूक्त-रूपहेतुद्वयस्य घटादावपि सतस्तत्रानित्यत्वेनेव पक्षेऽप्यनित्यत्वेनैव पर्यवसानसम्भवान्न शश्वदेकप्रकारानुपूर्वीकत्वरूपसाध्यसिद्धिः स्यात् । विशेष्याभावमात्रेण विशिष्टाभावोपपत्तेरिति भावेनाशङ्क्य च निराह ।। **यद्यपीति** ।। **पौरुषेयेति** ।। तथाच पुंवाक्यव्यावृत्तत्वस्यानुपूर्वीगतानैयत्या-भावनिमित्तत्वस्यैव वाच्यत्वात् । प्रकृतेऽपि पक्षे हेतुसत्त्वस्यानुपूर्वीयुक्ते तदभावेन पर्यवसाने बाधात् । तद्वतानैयत्याभावेनैव पर्यवसानमिति भावः ।। **परोक्तमिति** ।। ''सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वं पौरुषेयत्वम्'' इति **मण्युक्त**मित्यर्थः ।। **बुद्धीति** ।। चैत्रादिवाक्यं बुद्धिपूर्वकं शुकबालादिवाक्यं चाबुद्धिपूर्वकम् । तदुभयसाधारणं यन्नियतानुपूर्वीकत्वा-भावरूपं तत्परोक्तमित्यर्थः ।

तर्कताण्डवम्

यद्वा स्वप्रतिपाद्यगोचरज्ञानत्वावच्छिन्नकारणताप्रतियोगिक-कार्यतानाश्रय इति साध्यम् । तत्र भ्रमामूलकत्वे सति प्रमाकरणा-मूलकत्वं हेतुः । अपौरुषेयत्वपक्षेऽपि वेदस्य पदावलीगोचरज्ञानत्वा-वच्छिन्नकारणताप्रतियोगिककार्यताश्रयत्वात् तदभावसाधने बाधः । तन्निवृत्यर्थं स्वप्रतिपाद्येत्युक्तम् । स्वप्रतिपाद्यज्ञानाजन्य इत्येवोक्ते पदावलीगोचरमेवेश्वरनिष्ठं ज्ञानं वेदप्रतिपाद्यगोचरमपि भवतीति पुनरपि बाधः । तन्निवृत्त्यर्थं ज्ञानत्वावच्छिन्नेत्याद्युक्तम् ।

इदमपि साध्यं परोक्तस्य प्रमाप्रमामूलकवाक्यसाधारणस्य पौरुषेय-त्वस्याभावरूपम् । न च शुकबालादिवाक्ये पररीत्या व्यभिचारः । तस्यापि पक्षतुल्यत्वात् ।

यद्वा स्वप्रतिपाद्यगोचरयथार्थज्ञानत्वावच्छिन्नकारणताप्रतियोगिक-कार्यतानाश्रय इति साध्यम् । तत्र च प्रमाकरणामूलकत्वमात्रं हेतुः ।

इदमपि साध्यं परोक्तस्य प्रमाणवाक्यमात्रासाधारणपौरुषेय-त्वस्याभावरूपम् । विपक्षे सर्वसमयाभिमतधर्माद्यसिद्धेरुक्तत्वादनुकूल-तर्काणां च वक्ष्यमाणत्वान्नाप्रयोजकता ।

न्यायदीपः

वाक्यार्थगोचरज्ञानजन्यत्वं पौरुषेयत्वम् इति मते तदभावसाधकमनुमानमाह ।। **यद्वा स्वेति** ।। ईश्वरज्ञानं प्रमेति मत इति ज्ञेयम् । वेद इत्यनुकर्षः । स्वेन वेदेन प्रतिपाद्यो योऽर्थो धर्मादिः तद्गोचरं यज्ज्ञानं तत्त्वावच्छिन्नकारणतानिरूपिता या कार्यता तदनाश्रय इत्यर्थः । गगनमेव दृष्टान्त इति भावः ।

साध्यगतविशेषणयोः कृत्यं व्यनक्ति ।। **अपौरुषेयत्वेति** ।। **वेदस्येति** ।। क्रमविशेषविशिष्टवर्णानां वेदत्वात्क्रमस्य च कृतकत्वात् कार्यताश्रयत्वमस्तीति भावः ।। **इत्युक्तमिति** ।। प्रतिपाद्येत्युक्तावपि पदावलीत्यादिशब्दप्रतिपाद्यत्वं पदावल्या अप्यस्तीत्युक्तदोषनिरासायैव स्वेत्यप्युक्तिरिति भावः ।

नन्वत्राप्युक्तसाध्यवतो गगनघटादितोऽव्यावृत्तोयं हेतुस्तत्रेवोक्त-रूपज्ञानाजन्यत्वेनैवोपपन्नः सन् शश्वदेकप्रकारानुपूर्वीकत्वरूपविवक्षिता-पौरुषेयत्वं न साधयतीत्यर्थान्तरमित्यत आह ।। **इदमपीति** ।। **परोक्त-स्येति** ।। चिरन्तनोक्तस्येत्यर्थः ।। **पौरुषेयत्वस्येति** ।। तथाच पौरुषेयवाक्यादुक्तरूपसाध्यहीनाद् व्यावृत्तोयं हेतुस्तादृशज्ञानाजन्यत्वरूप-साध्यमादाय पर्यवस्यन्नपि पराभिमतपौरुषेयत्वाभावरूपत्वात्तस्य नार्थान्तरम् । शश्वदेकप्रकारानुपूर्वीकत्वमिवेदमपि पारिभाषिकं किञ्चिदपौरुषेयत्वमिति भावः । एवमग्रेऽपि ।। **पररीत्येति** ।। तन्मते वाक्यमात्रस्येश्वरज्ञानजन्य-तयोक्तरूपसाध्याभावेऽपि तत्र हेतुसत्त्वादिति भावः ।। **पक्षेति** ।। तस्येश-ज्ञानजन्यत्वेऽपि घटादिसाधारणोपादानादिगोचरज्ञानत्वेनैव तज्जन्यतया स्वप्रतिपाद्यगोचरज्ञानत्वावच्छिन्नेत्यादिरूपसाध्यस्यापि सत्त्वेन तदभावा-सम्मतेरिति भावः ।

''वेदाः शब्दजन्यवाक्यार्थगोचरयथार्थज्ञानजन्याः प्रमाणशब्दत्वात्'' इति मण्युक्तसाध्यस्य अभावसाधकमाह ।। **यद्वा स्वेति** ।। वेद इत्यनुकर्षोऽत्रापि ध्येयः । प्रागुक्तमेव साध्यपदकृत्यं ध्येयम् ।

भ्रान्तवाक्ये उक्तरूपसाध्यस्यापि सत्वेन विशेष्यमात्रस्याव्यभिचारा-दोषामूलकत्वविशेषणस्य व्यर्थत्वमुपेत्याह ।। **तत्र चेति** ।। निरुक्तसाध्य इत्यर्थः । पूर्ववदर्थान्तरताव्युदासायाह ।। **इदमपीति** ।। उक्तहेतूनाम-पौरुषेयत्वं विनाप्युपपत्तिमाशङ्क्याह ।। **विपक्ष इति** ।।

तर्कताण्डवम्

एतेन वेदस्यानादित्वरूपमपौरुषेयत्वं बाधितं सिद्धान्तविरुद्धश्च । क्रमविशेषविशिष्टानां वर्णानां वेदत्वान्नित्यानां सर्वगतानां च तेषां स्वतः क्रमस्यायोगेनाभिव्यक्तिगतस्यैव तस्य वक्तव्यत्वादभिव्यक्तेश्च जन्यत्वेन तद्गतस्य क्रमस्यापि जन्यत्वात् टीकायां ''क्रमस्य कृतकत्वेऽपि'' इत्युक्तेश्चेति निरस्तम् । क्रमस्य कृतकत्वेऽप्याधुनिकाध्यापकेन स्वबुद्धिस्थपूर्वपूर्वदिवसीयक्रमानुसारेणैवोत्तरदिवसेष्विव ईश्वरेणापि स्वबुद्धिस्थप्रवाहानादिपूर्वपूर्वकल्पीयक्रमानुसारेणैवोत्तरोत्तरकल्पेष्वपि वेदस्योच्चरितत्वेन [1]स्वातन्त्र्याभावेनानियतानुपूर्वीरहितत्वादिरूपोक्तत्रिविधापौरुषेयत्वे बाधाद्यभावात् ।

उक्तञ्च सुधायाम् ''नियतैकप्रकारत्वमपौरुषेयत्वम्'' इति । एतदप्युक्तं ''गौरवदोषेण'' इति । क्रमाकृतकत्वस्याप्यपौरुषेयत्वप्रवेशे गौरवदोषेणेत्यर्थः ।

यद्वा वेद आप्ताप्रणीतः प्रमाकरणामूलकत्वात् । गगनवत् शुकादिवाक्यवद् वा । अत्र च पक्षतावच्छेदकं वेदत्वं प्रमाकरणामूलकत्वे सति प्रमाणशब्दत्वं, न तु हेतुमात्रम् । प्रत्यक्षाभासादिमूलकशब्दाभासेऽतिव्याप्तेः । येन पक्षतावच्छेदकस्यैव हेतुत्वे तत्समानाधिकरणसाध्यप्रतीतिरूपस्य अनुमानफलस्य व्याप्तिग्रहकाल एव सिद्धत्वादनुमानवैयर्थ्यमिति शङ्क्येत ।

न्यायदीपः

।। एतेनेति ।। [2]यद्वेश्वरज्ञानमित्यादिनोक्तपक्षत्रयेणेत्यर्थः । प्रतिज्ञातं

१. सजातीयोच्चारणमनपेक्ष्योच्चारणकर्तृत्वमिह स्वातन्त्र्यं विवक्षितम् ।

२. ४१३ तः ।

द्वयमपि क्रमेण व्यनक्ति ।। **क्रमेत्यादिना** ।। **टीकायामिति** ।। तत्वनिर्णयटीकायामित्यर्थः । एतेनेत्युक्तं व्यनक्ति ।। **क्रमस्येति** ।। **उक्तश्चेति** ।। जिज्ञासानये ''न मानमपि वेदानाम्'' इत्यत्र । प्रकृतोपयोगितया अर्थमाह ।। **क्रमाकृतकत्वस्येति** ।।

''वेदः आप्तप्रणीतः वेदत्वाद्व्यतिरेकेण लौकिकवाक्यवत्'' इति परोक्तस्य प्रत्यनुमानमाह ।। **यद्वा वेद इति** ।। वाक्यार्थप्रमावत्वे सति विप्रलम्भादिदोषहीनो ह्याप्तः । तदप्रणीत इत्यर्थः । भ्रान्ताप्रणीतत्वेनार्थान्तरतानिरासायाप्तेत्युक्तिः ।। **प्रमाकरणेति** ।। परमते वेदस्येश्वरप्रमामूलकत्वेऽपि तत्करणामूलकत्वस्य नासिद्धिरिति भावः ।

अन्तरङ्गदृष्टान्तमाह ।। **शुकादीति** ।। शुकबालादिवाक्यवदित्यर्थः । प्रणीतत्वस्योच्चारणघटितत्वेन वा वाक्यार्थप्रमात्वेन रूपेण आप्तप्रमामूलकत्वेन वा विवक्षितत्वाच्छुकादिवाक्येऽपीश्वरप्रणीतत्वं नेति न साध्यवैकल्यम् । परमतेऽपि तत्रेश्वरज्ञानस्य भ्रमसाधारण्येनैव हेतुत्वस्य प्रागुपपादनादिति भावः ।

पक्षतावच्छेदकहेत्वोरैक्यमाशङ्क्य निराह ।। **अत्र चेति** ।। अकर्तृकत्वप्रसिद्धिमत्वं वेदत्वम् । [१]अकर्तृकप्रसिद्धिमत्वं नाम प्रत्यक्षादिप्रमाणं वा विप्रलम्भादिकं वाऽस्य मूलं नोपलभ्यत इति प्रसिद्धिविषयत्वम्'' इति तत्वनिर्णयटीकोक्तस्य निष्कृष्टार्थमाह ।। **प्रमेति** ।।

ननु न हेतुमात्रमित्ययुक्तं तथात्वेऽपि दोषाभावात्किमधिकप्रवेशेनेत्यत आह ।। **प्रत्यक्षेति** ।। तथाच वेदपदेन शब्दाभासस्यापि पक्षतापत्तावंशे सिद्धसाधनता स्यादिति भावः । दोषान्तरञ्चाह ।। **येनेति** ।। तन्मात्रस्य पक्षताच्छेदकीकरणेनेत्यर्थः ।। **तदिति** ।। पक्षतावच्छेदकसमानाधिकरणं यत्साध्यं तत्प्रतीतिरूपस्येत्यर्थः । यत्र प्रमाकरणामूलकत्वं तत्राप्ताप्रणी-

१. 'अकर्तृकत्वप्रसिद्धिमत्वं' इति भाव्यमिति भाति ।

तत्वमिति गगनादौ व्याप्तिग्रहदशायामेव हेतुसामानाधिकरण्येन तत्साध्य-ज्ञानस्य जातत्वात् । हेतोरेव पक्षतावच्छेदकत्वेनानुमानफलस्य सिद्ध-त्वादित्यर्थः ।

यद्यपि साध्यविशेष्यकप्रतीतेर्व्याप्तिग्रहणदशायां जातत्वेऽपि साध्य-विशेषणकप्रतीतेरुद्देश्यायास्तादानीमभावेन नानुमानवैयर्थ्यम् । तथाप्यतिशया-भावेन तादृशप्रतीतेरुद्देश्यत्वस्यैवायोगात् यत्प्रमाकरणामूलकत्ववत् तदाप्ता-प्रणीतत्ववदित्यपि व्याप्तिग्रहसम्भवाच्चैवमुक्तमिति ज्ञेयम् ।

तर्कताण्डवम्

यद्वा वेदानुपूर्वीनिष्ठादृष्टादिकारणता केनचिदवच्छिन्ना कारण-तात्मकत्वात् दण्डगतकरणतावत् ।

न च क्लृप्तमानुपूर्वीगतनियततत्तद्वर्णपदादिनिरूप्यत्वं विनान्यद-वच्छेदकमस्ति । न चेश्वरविरचितत्वमेव तदवच्छेदकम् । तस्य वेदानुपूर्वीमात्रसाधारण्येन सूक्तविशेषजपादिना फलविशषानुपपत्तेरिति नियतानुपूर्वीकत्वरूपापौरुषेयत्वसिद्धिः ।

अन्यथैतत्कल्पेऽनर्थहेतुभूताया अन्यादृश्या आनुपूर्व्याः कल्पान्तरे श्रेयःसाधनत्वम् एतत्कल्पेऽनर्थहेतोर्ज्योतिष्टोमाद्यङ्गव्युत्क्रमस्य ब्रह्महत्यादेश्च कल्पान्तरे श्रेयःसाधनत्वम् एतत्कल्पे दाहकत्वादि-स्वभावस्य वह्न्यादेः कल्पान्तरेष्वदाहकत्वादिकं च कल्प्यं स्यात् । एतदप्युक्तम् ''गौरवदोषेण'' इति ।

न्यायदीपः

सामान्यपरिशेषाभ्यामप्यपौरुषेयत्वं साधयति ।। **यद्वा वेदेति** ।।

आनुपूर्वी नाम वर्णानां क्रमविशेषः स च नित्यसर्वगतानां वर्णानामुच्चारण-घटितो वा बुद्धिघटितो वा वाच्यः । न तु स्वतः । तथाच तादृशानुपूर्वी दृष्टरूपार्थज्ञानार्थापि नियमादृष्टार्था । जपेन चादृष्टार्था सर्ववादिसम्मतेत्य-दृष्टजनिका भवतीति तत्र विद्यमानादृष्टकारणतापक्ष इत्यर्थः । आदिपदेनार्थ-ज्ञानकारणताग्रहः ।

एवं सामान्यतः कारणतावच्छेदकसिद्धौ प्रसक्तमीश्वररचितत्वं निरसिष्यन् स्वाभिमतमवच्छेदकमाह ।। **न च क्लृप्तमिति** ।। पक्षान्तरं निराह ।। **न चेश्वरेति** ।। सूक्तविशेषेति ।। पवमानसूक्तपुरुषसूक्तादिजपेन पठनादिना च श्रुतफलविशेषो न स्यादित्यर्थः । श्रूयते च फलविशेषः

"यन्मे गर्भे वसतः पापमुग्रं यज्जायमानस्य च किञ्चिदन्यत् ।
जातस्य च यच्चापि च वर्धतो मे तत्पावमानीभिरहं पुनामि" ।

इत्यादिना । आनुपूर्वीगतेत्यादिनोक्तमेवावच्छेदकं न त्वीश्वर-रचितत्वमित्येतदेवानेकविपक्षबाधकोक्त्या द्रढयति ।। **अन्यथेति** ।। **एतदप्युक्तमिति** ।। अन्यथेत्यादिनोक्तमित्यर्थः ।

तर्कताण्डवम्

यद्वा प्रत्यक्षन्यायामूलमन्वादिस्मृतिः प्रमाणमूला प्रमाणभूत-स्मृतित्वात् । न्यायमूलस्मृतिवत् । जन्या धर्मादिप्रमा करणजन्या जन्यज्ञानत्वात् सम्मतवत् धर्मादिकं प्रमाणोपेतं वस्तुत्वात् घट-वदित्यादिनाऽपौरुषेयवाक्यसिद्धिः ।

धर्मादावुक्तरीत्या प्रत्यक्षानुमानप्रामाण्यस्य बाधितत्वादनन्तकल्पेषु भिन्नानन्तपौरुषेयवाक्याङ्गीकारे च गौरवात् कार्यत्वहेतोर्नित्यज्ञान इव कर्त्रैक्य इव चास्यापि सामान्यतो दृष्टस्यापौरुषेयवाक्ये, तत्राप्यन्येषां

सकर्तृकत्वप्रसिद्धेर्वेदे च तदभावाद्वेदापौरुषेयत्वे पर्यवसानात् । एतदप्युक्तं ''गौरवदोषेण'' इति ।

न्यायदीपः

रीत्यन्तरमाश्रित्य सामान्यपरिशेषाभ्यामपौरुषेयवाक्यसिद्धिं वदन् ''धर्मादिकं प्रमाणोपेतं वस्तुत्वात्'' इति सुधोक्तसमान्यानुमानमुपलक्षणं मत्वा त्रेधा सामान्यानुमानमाह ।। **यद्वा प्रत्यक्षेति** ।। प्रत्यक्षादिमूलान्तरेणार्थान्तरवारणाय प्रत्यक्षन्यायामूलेत्युक्तिः । प्रत्यक्षामूला न्यायामूला चेत्यर्थः । प्रत्यक्षतोऽर्थमुपलभ्य रचितस्मृतिः प्रत्यक्षमूला । यथा [1]आद्यभारतपुराणादिरूपा । तस्याः सर्वज्ञव्यासप्रत्यक्षमूलत्वात् । युक्तिबलादर्थं विज्ञाय रचिता स्मृतिर्न्यायमूला । यथा अथातो धर्मजिज्ञासेत्यादिमीमांसासूत्रादिरूपा स्मृतिः । अतादृशी या स्मृतिरित्यर्थः ।

न च न्यायमते वाक्यमात्रस्येश्वरनिष्ठप्रत्यक्षप्रमाजन्यत्वात्प्रत्यक्षामूलस्मृतिरप्रसिद्धेति वाच्यम् । वाक्यार्थप्रमात्वेन तज्जन्यत्वस्यैव तन्मूलत्वेनेहाभिप्रेतत्वात् । प्रत्यक्षप्रमाकरणं वा प्रत्यक्षपदार्थो ध्येयः । नैय्यायिकानां न्याय एवातिविश्वासान्न्यायमूलस्मृतिवदित्युक्तम् । ईश्वरप्रमांशे बाधवारणाय जन्येति प्रमाविशेषणम् ।। **सम्मतवदिति** ।। चाक्षुषादिज्ञानवदित्यर्थः ।

नन्वेतावता प्रमाणसामान्यसिद्धावपि कथमपौरुषेयवाक्यरूपप्रमाणविशेषसिद्धिरित्यतः परिशेषप्रमाणमाह ।। **धर्मादावुक्तरीत्येत्यादिना पर्यवसानादित्यन्तेन** ।। [2]न चात्र हेतुत्रयेऽपि विशेषणासिद्धिरित्यादिग्रन्थेनोक्तरीत्येत्यर्थः ।। **एतदपीति** ।। अनन्तकल्पेष्वित्यादिनोक्तमपीत्यर्थः ।

---

१. अत्र भारतस्य आद्यत्वं नाम व्यासप्रणयनकालीनत्वम् । एवं च अद्यतनपठितभारते प्रत्यक्षतः अर्थमुपलभ्य रचितत्वरूपलक्षणाभावेन अव्याप्तिरिति नाशङ्कनीयम् । प्रत्यक्षमूलस्मृतिलक्षणं प्रति अद्यतनपठितभारतस्य लक्ष्यत्वाभावात् । इति वक्तव्यमिति भाति । २. ४०७ पुटे

आनुपूर्वी नाम वर्णानां क्रमविशेषः स च नित्यसर्वगतानां वर्णानामुच्चारण-घटितो वा बुद्धिघटितो वा वाच्यः । न तु स्वतः । तथाच तादृशानुपूर्वी दृष्टरूपार्थज्ञानार्थापि नियमादृष्टार्था । जपेन चादृष्टार्था सर्ववादिसम्मतेत्य-दृष्टजनिका भवतीति तत्र विद्यमानादृष्टकारणतापक्ष इत्यर्थः । आदिपदेनार्थ-ज्ञानकारणताग्रहः ।

एवं सामान्यतः कारणतावच्छेदकसिद्धौ प्रसक्तमीश्वररचितत्वं निरसिष्यन् स्वाभिमतमवच्छेदकमाह ।। **न च क्लृप्तमिति** ।। पक्षान्तरं निराह ।। **न चेश्वरेति** ।। सूक्तविशेषेति ।। पवमानसूक्तपुरुषसूक्तादिजपेन पठनादिना च श्रुतफलविशेषो न स्यादित्यर्थः । श्रूयते च फलविशेषः

"यन्मे गर्भे वसतः पापमुग्रं यज्जायमानस्य च किञ्चिदन्यत् ।
जातस्य च यच्चापि च वर्धतो मे तत्पावमानीभिरहं पुनामि" ।

इत्यादिना । आनुपूर्वीगतेत्यादिनोक्तमेवावच्छेदकं न त्वीश्वर-रचितत्वमित्येतदेवानेकविपक्षबाधकोक्त्या द्रढयति ।। **अन्यथेति** ।। **एतदप्युक्तमिति** ।। अन्यथेत्यादिनोक्तमित्यर्थः ।

तर्कताण्डवम्

यद्वा प्रत्यक्षन्यायामूलमन्वादिस्मृतिः प्रमाणमूला प्रमाणभूत-स्मृतित्वात् । न्यायमूलस्मृतिवत् । जन्या धर्मादिप्रमा करणजन्या जन्यज्ञानत्वात् सम्मतवत् धर्मादिकं प्रमाणोपेतं वस्तुत्वात् घट-वदित्यादिनाऽपौरुषेयवाक्यसिद्धिः ।

धर्मादावुक्तरीत्या प्रत्यक्षानुमानप्रामाण्यस्य बाधितत्वादनन्तकल्पेषु भिन्नानन्तपौरुषेयवाक्याङ्गीकारे च गौरवात् कार्यत्वहेतोर्नित्यज्ञान इव कर्त्रैक्य इव चास्यापि सामान्यतो दृष्टस्यापौरुषेयवाक्ये, तत्राप्यन्येषां

सकर्तृकत्वप्रसिद्धेर्वेदे च तदभावाद्वेदापौरुषेयत्वे पर्यवसानात् । एतदप्युक्तं ''गौरवदोषेण'' इति ।

न्यायदीपः

रीत्यन्तरमाश्रित्य सामान्यपरिशेषाभ्यामपौरुषेयवाक्यसिद्धिं वदन् ''धर्मादिकं प्रमाणोपेतं वस्तुत्वात्'' इति सुधोक्तसमान्यानुमानमुपलक्षणं मत्वा त्रेधा सामान्यानुमानमाह ।। **यद्वा प्रत्यक्षेति** ।। प्रत्यक्षादिमूलान्तरेणार्थान्तरवारणाय प्रत्यक्षन्यायामूलेत्युक्तिः । प्रत्यक्षामूला न्यायामूला चेत्यर्थः । प्रत्यक्षतोऽर्थमुपलभ्य रचितस्मृतिः प्रत्यक्षमूला । यथा [१]आद्यभारतपुराणादिरूपा । तस्याः सर्वज्ञव्यासप्रत्यक्षमूलत्वात् । युक्तिबलादर्थं विज्ञाय रचिता स्मृतिर्न्यायमूला । यथा अथातो धर्मजिज्ञासेत्यादिमीमांसासूत्रादिरूपा स्मृतिः । अतादृशी या स्मृतिरित्यर्थः ।

न च न्यायमते वाक्यमात्रस्येश्वरनिष्ठप्रत्यक्षप्रमाजन्यत्वात्प्रत्यक्षामूलस्मृतिरप्रसिद्धेति वाच्यम् । वाक्यार्थप्रमात्वेन तज्जन्यत्वस्यैव तन्मूलत्वेनेहाभिप्रेतत्वात् । प्रत्यक्षप्रमाकरणं वा प्रत्यक्षपदार्थो ध्येयः । नैय्यायिकानां न्याय एवातिविश्वासान्न्यायमूलस्मृतिवदित्युक्तम् । ईश्वरप्रमांशे बाधवारणाय जन्येति प्रमाविशेषणम् ।। **सम्मतवदिति** ।। चाक्षुषादिज्ञानवदित्यर्थः ।

नन्वेतावता प्रमाणसामान्यसिद्धावपि कथमपौरुषेयवाक्यरूपप्रमाणविशेषसिद्धिरित्यतः परिशेषप्रमाणमाह ।। **धर्मादावुक्तरीत्येत्यादिना पर्यवसानादित्यन्तेन** ।। [२]न चात्र हेतुत्रयेऽपि विशेषणासिद्धिरित्यादिग्रन्थेनोक्तरीत्येत्यर्थः ।। **एतदपीति** ।। अनन्तकल्पेष्वित्यादिनोक्तमपीत्यर्थः ।

---

१. अत्र भारतस्य आद्यत्वं नाम व्यासप्रणयनकालीनत्वम् । एवं च अद्यतनपठितभारते प्रत्यक्षतः अर्थमुपलभ्य रचितत्वरूपलक्षणाभावेन अव्याप्तिरिति नाशङ्कनीयम् । प्रत्यक्षमूलस्मृतिलक्षणं प्रति अद्यतनपठितभारतस्य लक्ष्यत्वाभावात् । इति वक्तव्यमिति भाति । २. ४०७ पुटे

एवं प्रसक्तं प्रत्यक्षानुमानपुंवाक्यरूपपक्षत्रयं प्रतिक्षिप्य विवक्षित-साध्यपर्यवसनमाह ।। **कार्यत्वेति** ।। नित्यज्ञानादिसिद्धिप्रकारोऽग्रे कार्यत्वादिहेतुभङ्गे व्यक्तः[1] ।

।। इति वेदापौरुषेयत्वेऽनुमानानि ।। १९ ।।

अपौरुषेयत्वे अनुकूलतर्कः

नचोक्तहेतूनामप्रयोजकता । यदि वेदः पौरुषेयः स्यात् तर्हि

"यतस्ता हरिणा दृष्टाः श्रुता एवाखिलैर्जनैः ।
श्रुतयो दृष्टयश्चेति तेनोच्यन्ते पुरातनैः ।"

इत्यादिस्मृतिष्वीश्वरेणापि दृष्टत्वस्यैवोक्तिर्न स्यात् । वेदाध्येतॄणां तत्र कर्तृविशेषस्मृतिश्च स्यात् । मुक्तकश्लोकादौ तन्नियमाभावेऽप्य-नेककर्तृकाविच्छिन्नाध्ययनधारणादिमत्युरुतरप्रबन्धात्मके भारतादौ तन्नियमात् । एतेन कर्तृस्मरणस्याविध्यर्थत्वादिति निरस्तम् ।

वेदे प्रतिकल्पमनियतान्यनेकानुपूर्व्याणि तेषां यथावदध्ययनानि चाभ्युदयकारणानि, अन्यथाध्ययनानि च वाग्वज्रतयानर्थकारणानि, अभ्युदयादीनि च विजातीयकारणजन्यत्वात्तार्णाद्यग्निवद्विजातीयानीति कल्प्यत्वात् कल्पनागौरवं च स्यात् । अन्यथेश्वर एकस्मिन्नेव कल्प एकस्मा एकयानुपूर्व्या विशिष्टवेदमुपदिश्यान्यस्मा अन्ययानुपूर्व्या विशिष्टमुपदिशतीति स्यात् । एककल्पीयायाः पूर्वस्या आनुपूर्व्या अपि [2]स्मरणान्न तत्त्याग इति चेत्तत्किमीश्वरः कल्पान्तरीयां पूर्वा-मानुपूर्वीं व्यस्मार्षीत् ।

---

१. ४७२ पुटे । २. 'अविस्मरणात्' इति पाठान्तरम् ।

धर्मादिसिद्धिश्च न स्यात् । प्रकारान्तरेण तदसिद्धेरुक्तत्वात् । वेदस्य पौरुषेयत्वे ईश्वरस्य बुद्धजिनादिना, वेदस्य च बुद्धाद्यागमादिना, तुल्यताया अपरिहार्यत्वेन, वेदप्रामाण्यं च न स्यात् ।

न्यायदीपः

पौरुषेयत्वरूपविपक्षे बाधकानि विवक्षुस्तत्त्वनिर्णयोदाहृतब्रह्माण्डस्मृतौ दृष्टत्वोक्तिविरोधं तावदाह ।। **यदीत्यादिना** ।। **पौरुषेय इति** ।। स्वतन्त्रपुरुषेणेश्वरेण प्रणीतो यदीत्यर्थः । श्रुता एव न तु कृता इत्यर्थः । दृष्टा एवेत्यप्येवकारान्वयमुपेत्याह ।। **दृष्टत्वस्यैवेति** ।। ''वेदकर्तुरप्रसिद्धेः'' इति तत्त्वनिर्णयवाक्यसूचितं बाधकमाह ।। **वेदेति** ।। यदीत्याद्यापादकानुवृत्तिः सर्वत्र ज्ञेया ।

मुक्तकश्लोका नाम तत्र तत्र नानाग्रन्थस्थाः ततस्तत उद्धृता इति वा, प्रबन्धेष्वनिबद्धा एव तेन तेन पुरुषेण कृताः सुभाषितश्लोका इत्याहुः ।

।। **अनेकेति** ।। अनेककर्तृकं यदविच्छिन्नमध्ययनं यच्च तादृशं धारणं अविस्मरणेनानुसन्धानं आदिपदोक्तप्रवचनादिकं तद्वतीत्यर्थः । तथाचाल्पप्रबन्धे तदभावेऽपि भारतादाविवोक्तविशेषणवत्युरुतरप्रबन्धे वेदे स्यादेव कर्तृस्मृतिरध्यापकानाम् । न च साऽस्तीति भावः ।

एतेन गूढकर्तृकवाक्ये सत्यपि पौरुषेयत्वे कर्तृस्मृतिर्नेति व्यभिचार इति प्रत्युक्तम् । उक्तविशेषणवत्युत्तरप्रबन्धे तस्यावश्यकत्वादिति ।

एतेन ''कपिलकणादगौतमैस्तच्छिष्यैश्चाद्यपर्यन्तं वेदे सकर्तृकत्वस्मृतिरस्ति'' इति **मणिकुसुमा**ञ्जल्यादावुक्तं निरस्तम् । अध्यापकानां स्मृतेरसिद्धेः ।

यत्तु सुधायां ''किञ्चेश्वरः सर्गादौ यं वेदं निर्मायैकस्मै शिष्यायोपदिशति तमेवान्यस्मा उपदिशति वेदान्तरं वा'' इत्यादिनोक्तं तदपि बाधकं स्पष्टं विवृण्वन्नाह ।। **वेद इत्यादिना** ।। आनुपूर्व्याणीत्यस्य, कारणान्यनर्थकारणानीत्यनयोश्च, ''इति कल्प्यत्वात्'' इत्यनेन प्रत्येकमन्वयः ।। **यथावदिति** ।। तस्मिंस्तस्मिन्कल्प इत्यर्थः ।। **वाग्वज्रतयेति** ।। वाग्रूपवज्रतयेत्यर्थः ।

''मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्'' ।
इत्यादेरिति भावः ।

।। **अभ्युदयादीनि चेति** ।। प्रतिकल्पं जायमानानि स्वर्गादीनीत्यर्थः ।। **विजातीयेति** ।। भिन्नभिन्नानुपूर्वीरूपत्वाद्विजातीयकारणेत्यर्थः ।। **तार्णेति** ।। तृणजन्याग्नावरणिजन्याग्नितो वैजात्यम् आरणेयाग्नौ च तार्णाद्यग्नितो वैजात्यं यथा त्वन्मते तथेत्यर्थः । एतच्चाग्रे तृणादीनामेकशक्तिसाधनवादे द्वितीयपरिच्छेदे व्यक्तम् ।

ननूक्तकल्पनाचतुष्टयमपि न दोषायेत्यतः प्रागुक्तापाद्यस्यानिष्टत्वद्योतनाय विपक्षे बाधकमाह ।। **अन्यथेति** ।। उक्तकल्पनाचतुष्टयस्य गौरवतया दोषत्वानभ्युपगम इत्यर्थः ।। **इति स्यादिति** ।। गौरवस्य तवादोषत्वादिति भावः । वैलक्षण्यमाशङ्क्य च समं प्रकृतेऽपीति भावेनाह ।। **एकेत्यादिना** ।।

''न हि धर्मादिसिद्धिः स्यान्नित्यवाक्यं विना क्वचित् ।''

इत्यनुभाष्याद्युक्तबाधकञ्चाह ।। **धर्मादीति** ।। यदि वेदः पौरुषेयः स्यादित्यनुवृत्तिः ।। **उक्तत्वादिति** ।। न च हेतुत्रयेऽपि विशेषणासिद्धिरित्यादिग्रन्थेनेत्यर्थः । अन्यत्रादृष्टस्य सर्वज्ञत्वस्य कल्पनमित्यत्र तत्त्वनिर्णयटीकायां तर्हि जिनादावपि तत् स्यादित्यापादितं साम्यमीश्वर-

वादेऽपि सममिति भावेनाह ।। **वेदस्य पौरुषेयत्व इति** ।। ईश्वरकृतत्व इत्यर्थः ।। **बुद्धजिनादिनेति** ।। ईश्वरसार्वज्ञ्यवद् बुद्धादावपि तद्भावस्यापादनसम्भवादिति भावः ।

तर्कताण्डवम्

न च बौद्धागमाद्वेदे महाजनपरिग्रहो विशेषः । महत्त्वस्य पूज्यत्वरूपत्वे वेदपरिग्रहीतॄणां पूज्यत्वस्याद्याप्यसिद्धेः । सङ्ख्याधिक्यरूपत्वे सन्धिग्धासिद्धेः । तुरुष्कागमादौ व्यभिचाराच्च । सप्तघटिकाभ्यन्तरभोजनादिरूपजीविकादिहेतुदर्शनशून्यत्वरूपत्वे वैदिकेष्वपि केषुचिज्जीविकादिहेतोर्दर्शनात् । बौद्धादिष्वपि केषुचित्तददर्शनाच्च ।

नापि सर्वसम्मतवैद्यशास्त्रपरिगृहीतार्थकत्वं महाजनपरिगृहीतत्वम्, वैद्यशास्त्रे रोगशान्त्यर्थं वैदिककर्मविशेषविधानादिति वाच्यम् । बौद्धानुसारिवैद्यशास्त्रे तच्छान्त्यर्थं बौद्धागमोक्तकर्मणोऽपि विधानात् ।

नापि सर्वसम्मतव्याकरणपरिपालनीयत्वम् । जैनव्याकरणपरिपालनीयत्वस्य जैनागमेऽपि सत्त्वात् । न च सर्वदर्शनानुमतार्थकत्वम् वेदोक्तसत्यभाषणादीनां धर्मत्वस्य सर्वदर्शनानुमतत्वादिति वाच्यम् । बौद्धोक्ताहिंसाधर्मत्वस्यापि सर्वैः स्वीकारात् । साङ्ख्यैर्वैदिकहिंसाया अधर्मत्वस्वीकाराच्च ।

[1]न च मन्त्रायुर्वेदादौ संवादित्वम् । एकदेशसंवादित्वस्य बौद्धोक्ताग्निस्तम्भादिकर्मस्वपि दर्शनात् । विसंवादाभावस्य च वेदेऽप्यभावात् ।

तस्मादपौरुषेयवेदपरिग्रहादेव वैदिकानां पूज्यत्वम् । न तु

---

१. 'न च मन्त्राणां आयुर्वेदादौ' इति भाव्यमिति भाति ।

तत्परिग्रहाद्वेदस्य प्रामाण्यम् । एतदप्युक्तं ''गौरवदोषेण'' इति । बुद्धाद्यागमतुल्यत्वेन विपरीतलक्षणया [१]लाघवदोषेण इत्यर्थः । तस्मात्पौरुषेयत्वे वेदस्य बौद्धागमतौल्यमेवेति सुस्थ एवानुकूलतर्कः ।।

न्यायदीपः

''वेदस्य प्रामाण्यं महाजनपरिग्रहादवधार्यते'' इति **मण्युक्तमाशङ्क्य** निराह ।। **न चेति** ।। ''अपौरुषेयत्वाद्वेदस्य'' इत्येतद्व्याख्यावसरे तत्त्वनिर्णयटीकोक्तखण्डनरीतिमनुसृत्य महत्त्वं विकल्प्य निराह ।। **महत्वस्येति** ।।

।। **अद्यापीति** ।। पौरुषेयतया वेदप्रामाण्यविवादवेलायमेव न किन्तु महाजनपरिग्रहात् प्रामाण्यमित्युक्तिदशायामपीत्यर्थः ।। **सन्दिग्धेति** ।। बौद्धेषु वा वैदिकेषु वा सङ्ख्याप्रकर्षस्यानिर्णयादिति भावः ।

यत्तु कुसमाञ्जलौ द्वितीयपरिच्छेदे ''हेतुदर्शनशून्यैर्ग्रहणाध्ययनधारणार्थानुष्ठानादिरेव महाजनपरिग्रहः'' इत्युक्त्वा सप्तघटिकान्तभोजनादिरूपजीविकारूपो हेतुर्बौद्धेष्वस्ति न वैदिकेष्वित्युक्तम् तदाशङ्क्य निराह ।। **सप्तेति** ।। सप्तघटिकाभ्यन्तरे सप्तघटिकामध्ये प्रातः काले भोजनाभ्यञ्जनादिरूपजीविकाहेतुर्येषु न दृश्यते ते महान्त इत्यर्थः । जीविकादीत्यादिपदेन रागकुहकवञ्चनादिरूपकुसुमाञ्जल्युक्तहेत्वन्तरग्रहः ।। **दर्शनादिति** ।। तथाच भागासिद्धिरिति भावः । व्यभिचारश्चाह ।। **बौद्धेति** ।।

महत्वं निरस्य तत्परिगृहीतत्वं विकल्प्य निराह ।। **नापीति** ।। वैद्यशास्त्रपरिगृहीतार्थकत्वं व्यनक्ति ।। **वैद्यशास्त्र इति** ।। धान्वन्तरमन्त्रैरयुतहोमजपादिरूपवैदिककर्मेत्यर्थः ।। **बौद्धागमोक्तेति** ।। ज्वरादिशान्त्यर्थं बुद्धार्चनादिकर्मण इत्यर्थः ।। **जैनेति** ।।

१. बुद्धागमतुल्यत्वेन वेदस्य नीचत्वं स्यादिति भावः ।

''इन्द्रश्चन्द्रः काशकृत्स्नः पिशली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ।।''

इति कविकल्पद्रुमोक्तेस्तस्यापि व्याकरणकर्तृत्वप्रसिद्धेरिति भावः । व्यभिचारासिद्धी क्रमेणाह ।। **बौद्धेति ।। साङ्ख्यैरिति ।। एतदपीति ।।** बौद्धाद्यागमसाम्यमित्येतदपीत्यर्थः । लाघवदोषेण अप्रयोजकतापत्तिरूप-दोषेणेत्यर्थः । तत्र हेतुः बौद्धाद्यागमतुल्यत्वेनेति ।

तर्कताण्डवम्

किञ्च ''वाचा विरूपनित्यया'' ''श्रुतिर्वाव नित्या अनित्या वाव स्मृतयो याश्चान्या वाचः'' इत्यादिश्रुत्या,

''अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।''

''नित्या वेदाः समस्ताश्च शाश्वता विष्णुबुद्धिगाः''

इत्यादिस्मृत्या च विरोधः ।

न चेदं वाक्यं श्रुतीनां बहुकालीनत्वादुपचरितार्थम् । वावेत्यव-धारणात् । तादृशीनामपि स्मृतीनामनित्यत्वोक्तेश्च । स्मृतौ वाक्यशेषे

**''सर्गेसर्गेऽमुनैवैत उद्गीर्यन्ते तथैव च ।
तत्क्रमेणैव तैर्वर्णैः तैः स्वरैरेव नान्यथा''**

इति क्रमाद्यव्यत्यासोक्तेश्च ।

''तदुत्पत्तिवचश्चैव भवेद् व्यक्तिमपेक्ष्य तु''

इति वेदोत्पत्तिवाक्यगतिकीर्तनाच्च ।

''विज्ञेयं परमं ब्रह्म ज्ञापिका परमा श्रुतिः ।
अनादिनित्या सा तच्च विना तां न स गम्यते''

इति श्रुत्यन्तरस्थाऽनादिनित्यशब्दयोर्ब्रह्मणि मुख्यवृत्तिः वेदे त्वमुख्येति वृत्तिद्वयापाताच्च ।

''यावद्ब्रह्म विष्ठितं तावती वाक्''

इति श्रुत्यन्तरे ब्रह्मतुल्यत्वेन सर्वदेशकालव्याप्ततयावस्थित्युक्तेश्च । एतदप्युक्तं ''गौरवदोषेण'' इति । श्रुत्यादिविरुद्धक्रमवैजात्य-रूपगौरवेणेत्यर्थः ।

न्यायदीपः

वेदस्य पौरुषेयत्वे तत्त्वनिर्णयाद्युक्तश्रुत्यादिविरोधं च बाधकमाह ।। **किञ्चेति** ।।

''तस्मै नूनमभिद्यवे वाचा विरूपनित्यया । वृष्णे चोदस्व सुष्टुतिं''

इति मन्त्रस्यायमर्थः । अभितो द्यौः प्रकाशो यस्यासावभिद्युः तस्मा अभिद्यवे वृष्णे वर्षित्रे नूनं निश्चितम् हे विरूप नित्यया वाचा वेदलक्षणया सुष्टुतिं शोभनां स्तुतिं चोदस्व चोदयस्व प्रेरय कुर्विति विरुपमृषिं प्रत्युच्यते ।

वाक्छब्दो वागिन्द्रियेऽपि प्रसिद्ध इति स्पष्टां वेदविषयां श्रुतिमाह ।। **श्रुतिरिति** ।। आदिपदेन–

''विज्ञेयं परमं ब्रह्म ज्ञापिका परमा श्रुतिः ।
अनादिनित्या सा तच्च''

इत्यादिग्रहः । उक्तश्रुतिद्वयेनानादित्वानुक्तेर्देवताधिकरणभाष्योक्तस्मृतिं चाह ।। **अनादीति** ।। आदिनिधनवर्जितत्वेन नित्येत्यर्थः ।

ननु विधिः प्रेरणा नियोग इत्यनर्थान्तरत्वाद्विध्युद्देशानां लौकिकवत् स्वतन्त्रवक्तृकत्वमेवेत्यादिचोद्यनिरासाय तत्त्वनिर्णयोक्तं ब्रह्माण्डपुराणवाक्यं चाह ।। **नित्या वेदाः समस्ताश्चेति** ।। समस्तपदेन विधिभागस्यापि गृहीतेरिति भावः ।। **विरोध इति** ।। वदेस्य पौरुषेयत्व इत्यापादकानुवृत्तिर्ज्ञेया । तादृशीनां बहुकालीनानामित्यर्थः ।। **स्मृताविति** ।। नित्या वेदा इति स्मृताविति्यर्थः ।। **तदुत्पत्तीति** ।। स्मृतौ वाक्यशेषे इत्यनुकृष्यते । नोपचरितार्थमिति साध्येन पञ्चम्यन्तानामन्वयः । तच्च ब्रह्म चानादिनित्यमित्यर्थः । न स गम्यत इति तच्छब्दस्य ब्रह्मशब्दोक्तः परमात्मेत्यर्थः ।। **यावदिति** ।।

"सहस्रधा महिमानः सहस्रं यावद् ब्रह्म"

इति श्रुतौ यस्य सहस्रं अपरिमिता महिमानः प्रत्येकमपि सहस्रधा अपरिमितविधाः । तद् ब्रह्म यावत् देशकालव्यापितया विष्ठितं विशेषेण स्थितं वाक् वेदवागपि तावद्देशकालव्यापिनीत्युक्तेरित्यर्थः ।। **एतदपीति** ।। पौरुषेयत्वे श्रुत्यादिविरोध इत्येतदपीत्यर्थः । तद्व्यनक्ति ।। **श्रुत्यादीति** ।।

।। इति अपौरुषेयत्वे अनुकूलतर्कः ।। २० ।।

पौरुषेयत्वानुमानादिभङ्गः

न चोक्तानुमानानां सत्प्रतिपक्षत्वं शङ्क्यम् । वेदः पौरुषेयो वाक्यत्वाल्लौकिकवाक्यवदित्यत्र पुरुषाधीनोत्पत्तिकत्वरूपे सकर्तृकत्वे साध्ये उक्तरीत्या क्रमस्य कृतकत्वेन सिद्धसाधनात् । अर्थमुपलभ्य रचितत्वरूपे विप्रतिपन्ने पौरुषेयत्वे साध्ये च अबुद्धिपूर्वकत्वेऽपि रेखाविशेषवत्त्वेनैव पिपीलिकादिलिपेर्लिपित्ववत्, [१]गुणाजन्ययोः

१. 'गुणाजन्यत्वेऽपि' इति पाठान्तरम् ।

साक्षिज्ञानेश्वरज्ञानयोर्याथार्थ्यवत्, आकाङ्क्षादिमत्त्वेनैव आकाङ्क्षादिमत्स्वप्नादिवाक्यस्य वाक्यत्ववच्च वेदस्यापि वाक्यत्वस्य उपपत्त्या गौरवेणोक्तसाध्यं प्रत्यप्रयोजकत्वात् ।

अन्यथा वेदो ज्ञानकरणेनार्थमुपलभ्य रचितो वाक्यत्वादित्यपि स्यात् । अर्थानभिज्ञोच्चारिते आधुनिके वेदे विसंवादिनि शुकादिवाक्ये च व्यभिचाराच्च । उक्तश्रुत्यादिबाधप्रतिकूलतर्कपराहत्यादिसाधारणदोषाच्च ।

अत्रोक्तं मणौ वेदः सजातीयोच्चारणानपेक्षोच्चरितजातीयो वाक्यत्वात् सम्मतवत् । अत्र साध्ये सजातीयपदं शब्दमूलकशब्दे व्यभिचारपरिहारार्थम् । शब्दस्यार्थैक्यमात्रेण मूलत्वोपपत्त्योच्चारणसाजात्यस्यानपेक्षितत्वात् । जातीयपदं त्वाधुनिकवेदे बाधनिरासार्थम् । तत्र च न सिद्धसाधनम् । अपौरुषेयत्वपक्षे सर्वस्यापि वेदाध्ययनस्य गुर्वध्ययनपूर्वकत्वेन सजातीयोच्चारणसापेक्षत्वात् । न चाप्रयोजकता । उक्तसाध्ये वेदातिरिक्तवाक्यत्वापेक्षया लघुत्वेन वाक्यत्वस्यैव प्रयोजकत्वादिति ।

मैवम् । मीमांसकं प्रति सिद्धसधनाभावेऽपि मां प्रति, सर्गादावीश्वरेण स्वबुद्धिस्थपूर्वपूर्वकल्पक्रमेणोच्चारणेऽपि तस्योच्चारणन्तरानपेक्षत्वेन सिद्धसाधनात् । व्याप्य इव व्यापकेऽप्यवच्छेदकलाघवस्यादरणीयत्वेनोच्चरितत्वस्यैव व्यापकतया हेतोरुक्तसाध्यं प्रति गौरवेणाप्रयोजकत्वाच्च । आकाङ्क्षादिमत्त्वं तु त्वयाप्याहर्तव्यम्[१] । स्वयम्प्रतिभातानां वेदवाक्यानां सजातीयोच्चारणानपेक्षत्वेनांशे सिद्धसाधनाच्च ।

---

१. 'अनुसर्तव्यम्' इति पाठान्तरम् ।

न्यायदीपः

पञ्चमस्तबके कुसुमाञ्जल्याद्युक्तमनुमानमाशङ्क्य प्रतिज्ञादोषेण निराह ।। **वेद इति** ।। प्रमाकरणामूलकत्वे सति प्रमाणशब्दरूपो वेद इत्यर्थः ।। **उक्तरीत्येति** ।। [१]वेदापौरुषेयत्वानुमानवादे क्रमविशेषविशिष्टानां वर्णनामित्यादिनोक्तरीत्येत्यर्थः । ''न च लौकिकवाक्यवत्सकर्तृकत्वम् । तस्याकर्तृकत्वप्रसिध्यभावात्'' इत्यादिना तत्त्वनिर्णयतट्टीकयोरभिमतमप्रयोजकत्वं व्यनक्ति ।। **अर्थमुपलभ्येत्यादिना** ।। **विप्रतिपन्न इति** ।। तथाच न सिद्धसाधनतादोष इति भावः । अबुद्धिपूर्वकत्वेऽपीत्यस्य वाक्यत्वस्योपपत्त्येत्यनेनान्वयः । तत्र दृष्टान्तत्रयोक्तिः ।। **रेखेत्यादि** स्वमतेनोक्तिः ।। **साक्षीति** शुकादिवाक्येपीश्वररचितत्वेन साध्यसत्त्वनिरासाय ।। **विसंवादिनीति** विशेषणोक्तिः ।

''तर्कपराहतं च वाक्यत्वानुमानं श्रुतिपुराणविरुद्धं चे''ति तत्त्वनिर्णयटीकोक्तमाह ।। **उक्तेति** ।। एतच्च प्रतिकूलतर्कपदेनाप्यन्वेति । वेदापौरुषेयत्वानुमाने येऽनुकलूतर्का उक्तास्ते सर्वे पौरुषेयत्वे प्रतिकूलतर्का इत्यर्थः । आदिपदेनानुकूलतर्कराहित्यग्रहः ।। **साधारणेति** ।। पौरुषेयत्वानुमानमात्रसाधारणेत्यर्थः ।। **अत्रेति** ।। वाक्यत्वहेतुदूषणविषये तत्परिहारार्थमन्यथानुमानमुक्तं शब्दखण्डे वेदपौरुषेयत्ववाद इत्यर्थः । वेदः पौरुषेयो वाक्यत्वादित्यत्र सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वं पौरुषेयत्वमिति साध्यस्य निरुक्तत्वादेवं प्रयोग उक्तः सजातीयपदं समानजातीयानुपूर्वीकशब्दपरम् । सजातीयोच्चारणानपेक्षया तदपेक्षां विनैवोच्चरितो यस्तज्जातीय इत्यर्थः । सर्गादावीश्वरोच्चरितत्वं पर्यवस्यतीति विवक्षितसिद्धिरिति भावः ।

अस्फुटत्वात्पदकृत्यं व्यनक्ति ।। **अत्रेति** ।। पक्षधराद्युक्तमाह ।।

---

१. ४१७ पुटे ।

बाधेति ।। तस्याध्यापकोच्चारणापेक्षयैवोच्चरितत्वाद् बाधः । जातीयपदे दत्ते तु तादृशादिकालीनजातीयत्वान्न बाध इति भावः । रुचिदत्तस्तु पठ्यमानभारतादौ सम्प्रदायमते हेतुनिश्चये साध्यसन्देहे सन्दिग्धानैकान्त्यमिति जातीयपदमित्यवोचत् ।

।। **मीमांसकं प्रतीति** ।। तस्य निरीश्वरवादित्वादिति भावः । ''पौरुषेयत्वानुमानानामप्रयोजकत्वात्'' इति सुधोक्तिमनुरुध्याप्रयोजकत्वं व्यनक्ति ।। **व्याप्य इवेति** ।। यथा धूमादौ नीलधूमत्वादिकं न व्याप्यतावच्छेदकं किन्तु लाघवाद्धूमत्वादिकमित्युच्यते तथा व्यापकेऽपि पीतवह्नित्वादिकं न व्यापकतावच्छेदकं किन्तु वह्नित्वादिकमेव तद्वदिहापि वेदातिरिक्तवाक्यत्वापेक्षया वाक्यत्वं लघ्वितिवत् साध्ये वाक्यत्वनिरूपितव्यापकतावच्छेदकं न सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वं किन्तु लाघवादुच्चरितत्वमेवेत्युक्तसाध्ये वाक्यत्वहेतुर्गौरवपराहतः सन्नप्रयोजको भवतीत्यर्थः ।

नन्वेवं वेदे आकाङ्क्षायोग्यताऽऽसत्त्यादिमत्त्वमपि न सिध्येत् । लाघवेनोच्चरितत्वमात्रेण वाक्यत्वस्योपपत्त्या गौरवेणाकाङ्क्षादिमत्त्वं प्रत्यप्रयोजकत्वादित्यत आह ।। **आकाङ्क्षादीति** ।। **त्वयापि** ।। पौरुषेयत्ववादिनापीत्यर्थः । वाक्यत्वस्याकाङ्क्षादिमच्छब्दत्वरूपतया तदभावे वाक्यत्वस्य स्वरूपोच्छित्तेरुभयसम्मततया तत्र गौरवदोषाभावात् । इह च त्वदुक्तगुरुभूतसाध्येन विनाप्यस्तु वाक्यत्वमित्युक्तौ बाधकाभावादप्रयोजकत्वमेव वाक्यत्वस्येति भावः ।। **स्वयमिति** ।। गुरुमुखोच्चारणापेक्षां विनैवेत्यर्थः ।

''जन्मान्तरे श्रुतास्तास्तु वासुदेवप्रसादतः ।
मुनीनां प्रतिभास्यन्ति भागेनैव न सर्वशः'' ।

इति स्मृत्या जन्मान्तरेऽधीतानामस्मिञ्जन्मनि गुरुमुखोच्चारणापेक्षां विनैव कदाचित्कालविशेषे प्रतीतानां वेदवाक्यानामित्यर्थः ।

यदत्रोक्तं **रुचिदत्तादिना** तद्भिन्नत्वेन पक्षो विशेषणीय इति तन्न । वेदः पौरुषेयो न वेति कृत्स्नवेदविषयपौरुषेयत्वविमत्यनानुगुण्येनार्थान्तरात् ।

तर्कताण्डवम्

एतेन वेदत्वं सजातीयोच्चारणानपेक्षोच्चरितवृत्ति महाजन-परिग्राह्यतावच्छेदकत्वे सति वाक्यवृत्तित्वात् । स्वाधिकरणसमानानु-पूर्वीकसकलवृत्तित्वाद्वा । भारतत्ववत् । अत्र च पक्षस्यैकत्वेन नांशे सिद्धासाधनम् ।

आद्ये हेतावेतद्वेदत्वादौ व्यभिचारपरिहाराय महाजनेत्यादिसत्यन्तं विशेषणम् । एतद्वेदत्वं तु न तदवच्छेदकम् । लाघवेन धूमत्ववद् वेदत्वस्यैव तदवच्छेदकत्वात् । यागत्वादौ व्यभिचारवारणाय वाक्यवृत्तित्वादित्युक्तम् ।

द्वितीये सकलपदेनैवैतद्वेदत्वादौ व्यभिचारनिरासः । एतद्वेदत्वस्य स्वाधिकरणेनैतद्वेदेन समानानुपूर्वीके पूर्ववेदे वृत्त्यभावादिति निरस्तम् ।

उक्तरीत्या वेदत्वस्य सजातीयोच्चारणानपेक्षेणेश्वरेण स्वयं प्रतिभातवेदैर्वसिष्ठादिभिश्चोच्चरिते वृत्त्या सिद्धसाधनात् । वाक्यवृत्ति-त्वस्योच्चरितवृत्तित्वेन महाजनपरिग्राह्यतावच्छेदकत्वस्य च धर्मादि-प्रमापकवृत्तित्वेनैव उपपत्त्योक्तं साध्यं प्रति गौरवेणाप्रयोजकत्वाच्च ।

द्वितीयहेतोरपि स्वाधिकरणे सर्वत्र तुल्यानुपूर्वीप्रयोजककण्ठ-

ताल्वादिरूपतुल्यकारणेनैवोपपत्त्या गौरवेणोक्तसाध्यं प्रत्यप्रयोजकत्वात् ।

न्यायदीपः

मण्युक्तप्रयोगान्तरं निराह ।। **एतेनेति** ।। निरस्तमित्यन्वयः । अत्रापि साध्ये सजातीयपदं पूर्ववच्छब्दमूलकस्मृतित्वे व्यभिचारवारकं ध्येयम् । पठ्यमानवेदे बाधाप्रसक्तेर्न जातीयपदोक्तिः ।

।। **महाजनेति** ।। यद्यपि **मणौ** प्रमाणतावच्छेदकवाक्यधर्मत्वादित्येव हेतुरुक्तस्तथापि प्रमाणतावच्छेदकत्वस्य प्रमाणमात्रवृत्तित्वरूपत्वेऽद्यतनवेदत्वे व्यभिचारात् । तदवच्छित्तिप्रत्ययजनकत्वे त्वसिद्धिः । मणिकृन्निरुक्तवेदत्वस्य गुरुत्वेनावच्छित्तिप्रत्ययाजनकत्वेन स्मृतिसाधारणस्यान्यस्यैव वाच्यत्वादित्यतः पक्षधराद्युक्तविवक्षानुरोधेन महाजनेत्याद्युक्तम् ।

नरहर्युक्तविवक्षानुरोधेनाह ।। **स्वेति** ।। स्वस्य वेदत्वस्य यदधिकरणम् सर्गादिकालीनो वाऽद्यतनैः पठ्यमानो वा वेदः तत्समानानुपूर्वीकाः सर्वैः पाठ्यमाना वेदाः तत्सकलवृत्तित्वादित्यर्थः ।। **भारतत्ववदिति** ।। तस्य तादृशाद्यभारतवृत्तित्वात्साध्यवत्त्वं साधनवत्वं च व्यक्तमिति भावः ।। **अंश इति** ।। स्वयम्प्रतिभातवेदांश इत्यर्थः ।। **एतद्भेदत्वेति** ।। बुद्धिस्थं किञ्चित् चैत्रादिना पठ्यमानवेदत्वमेतद्भेदत्वपदेन गृह्यते । सत्यन्तेनोक्तदोषनिरासं व्यनक्ति ।। **एतद्भेदत्वं त्विति** ।। **धूमत्ववदिति** ।। धूमत्वं यथा वह्निव्याप्यत्वावच्छेदकं न त्वेतद्धूमत्वं तथेत्यर्थः ।। **द्वितीय इति** ।। हेताविवत्यर्थः । व्यभिचारनिरासं व्यनक्ति ।। **एतद्भेदत्वस्येति** ।। **इतीति** ।। मणावुक्तमेतेन निरस्तमित्यर्थः । एतेनेत्युक्तं व्यनक्ति ।। **उक्तरीत्येति** ।। [१]मां प्रतीत्यादिनोक्तरीत्येत्यर्थः ।। **स्वयम्प्रतिभातवेदैरिति** ।। बहुव्रीहिः ।

१. ४३० पुटे ।

हेतौ विशेष्यविशेषणरूपांशद्वयस्याप्युक्तसाध्येन विनाऽन्यथोपपत्त्याऽप्रयोजकत्वमाह ।। **वाक्येत्यादिना** ।। उच्चरितवृत्तित्वेनोपपत्त्येत्यन्वयः । गौरवेणेत्युपलक्षणम् । विपक्षे बाधकाभावेन चेत्यपि ध्येयम् । श्रुत्यादिबाधादिरूपप्रागुक्तसाधारणदोषोऽप्यत्रानुसन्धेयः ।। **तुल्यकारणेनेति** ।। येन कारणेन वेदत्वाश्रयव्यक्तिषु सर्वत्र तुल्यानुपूर्वी भवति तादृशकारणेनैव हेतुरुपपन्नः । न त्वन्येन । तच्च कारणं कण्ठताल्वादिकं न तु तलताडनादिरूपम् । तथा च सजातीयोच्चारणानपेक्षोच्चरितवृत्तित्वप्रयुक्तत्वाभावादप्रयोजकत्वं हेतोरित्यर्थः ।

तर्कताण्डवम्

एतेन बुबोधयिषुपठितो वेदः स्वानपेक्षस्वसमानविषयकज्ञानपूर्वकः । बुबोधयिषुवाक्यत्वात् लौकिकवाक्यवदिति निरस्तम् । स्वसमानविषयकज्ञानपूर्वकत्वमात्रेण बुबोधयिषुवाक्यत्वस्योपपन्नत्वेन गौरवेण स्वानपेक्षज्ञानं प्रत्यप्रयोजकत्वात् । अन्यथोक्तेनैव हेतुना स्वानपेक्षस्वसमानविषयकज्ञानकरणसापेक्षत्वमपि सिद्ध्येत् । मन्मते ईश्वरज्ञानस्य वेदानपेक्षत्वेन सिद्धसाधनाच्च ।

नापि वेदो वाक्यार्थगोचरयथार्थज्ञानजन्यः । प्रमाणशब्दत्वात् । भारतवदिति वाच्यम् । यथार्थज्ञानमात्रस्य हेतुत्वविवक्षायामर्थबुबोधयिषया पठिते आधुनिकवेदांशे सिद्धसाधनात् । तन्निरासाय शब्दाजन्यत्वेन ज्ञानस्य विशेषणे च शब्दमूलकशब्दे व्यभिचारात् ।

सोऽपि पक्षतुल्य इति चेन्न । प्रामाण्यस्य स्वतस्त्वेन परतस्त्वेऽपि यादृच्छिकसंवादिवाक्य इवावश्यकयोग्यतादिनोपपन्नत्वेन गौरवेणोक्तसाध्यं प्रत्यप्रयोजकत्वात् । अन्यथोक्तेनैव हेतुना वाक्यार्थगोचरप्रमाकरणपूर्वकत्वमपि सिद्ध्येत् ।

एतेन यथार्थज्ञानत्वस्य कारणतावच्छेदकत्वं विवक्ष्यत इति निरस्तम् । प्रामाण्यस्य स्वतस्त्वेन परतस्त्वेऽपि नित्यत्वेन ईश्वर-ज्ञानस्य प्रमात्ववद्वेदस्यापि नित्यत्वेन प्रमाणशब्दत्वोपपत्तेः ।

न्यायदीपः

।। **बुबोधयिष्विति** ।। शिष्यान्बोधयितुमिच्छताऽध्यापकेन पठितो वेद इत्यर्थः । इदानीन्तनाज्ञपठितवेदे बाधवारणाय बुबोधयिषुपठितेत्युक्तिः । स्वेति सन्निहितो बुबोधयिषुपठितो वेद उच्यते । तदनपेक्षं तदजन्यमित्यर्थः । तत्समानविषयकं च यद्ज्ञानं तत्पूर्वक इत्यर्थः । तादृशं च ज्ञानमीश्वर-निष्ठमिति तज्जन्यत्वेन साध्यसिद्धिरिति भावः । अज्ञोच्चरितवाक्ये वाक्यत्वस्य व्यभिचारनिरासाय बुबोधयिष्विति हेतौ विशेषणम् ।

''अनुमानानामप्रयोजकत्वात्'' इति **सुधो**क्तिमनुरुध्याह ।। **स्वसमानेति** ।। **मण्युक्तं** प्रयोगान्तरं प्रत्याचष्टे ।। **नापि वेद इति** ।। **मणौ** वेदा इति पक्षनिर्देशेऽपि तत्रैव पठ्यमानवेदस्य पक्षसमत्वोक्तेः यत्किञ्चिद्वेदपक्षकत्वेऽपीष्टसिद्धेर्बहुवचनमविवेकमूलमिति सूचनाय वेद इत्येव पक्षनिर्देशः कृतः । अध्यापकानुपूर्व्यादिज्ञानजन्यत्वेनार्थान्तरवारणाय साध्ये वाक्यार्थगोचरेत्युक्तिः । वाक्यार्थगोचरज्ञानजन्य इत्येवोक्तौ ईश्वरे भ्रमसिद्धावपि नेष्टसिद्धिरिति तादृरूप्यसिद्धये यथार्थपदम् ।। **भारतवदिति** ।। प्रत्यक्ष-मूलाद्यभारतवदित्यर्थः ।। **मात्रस्येति** ।। शब्दाजन्यत्वविशेषणहीनस्येत्यर्थः ।। **हेतुत्वेति** ।। जनकत्वेत्यर्थः ।

नन्वेतद्दोषनिरासायैव शब्दाजन्येति ज्ञानविशेषणमुक्तं **मणा**वित्यत आह ।। **तन्निरासायेति** ।। [१]''तादृशस्यापि द्विकर्तृकत्वादिति'' **मण्युक्ते**र्भावमा-

१. न च पठ्यमाने वेदे बाधः भारते मन्वादिस्मृतौ च व्यभिचारः । तेषां द्विकर्तृकत्वात् तादृशज्ञानजातीयत्वं वा साध्यं, तवाप्येतदभावादेव वेदेऽपौरुषेयत्व-

शङ्कत्याह ।। **सोऽपीति** ।। प्राचीनमते पक्षसमेऽपि सन्दिग्धसाध्यवति हेतुनिश्चयेन व्यभिचारस्य दोषत्वेऽप्याधुनिकमते दोषत्वाभावस्येश्वरवादे **मणा**वेव व्यक्तत्वादिति ।। **प्रामाण्यस्येति** ।। हेतौ विशेष्यस्य विशेषणस्य वोक्तरूपसाध्येन विनाऽनुपपत्त्या विशिष्टहेतुना साध्यसिद्धिर्वाच्या । तत्र विशेष्यं शब्दत्वं तावन्नानुपपन्नम् । शब्दाभासेऽपि तस्य सत्त्वात् । किन्तु विशेषणस्य प्रमाजनकत्वरूपप्रामाण्यस्यैवानुपपत्त्या साध्यसिद्धिर्वाच्या । तस्याप्यन्यथोपपत्त्याऽप्रयोजकत्वमित्यर्थः । स्वतस्त्वेनेत्यस्य ज्ञानजनकत्व-शक्त्यैवेत्यर्थः । उपपन्नत्वेनेत्यन्वयः ।। **परतस्त्वेऽपीति** ।। गुणप्रयुक्त-त्वेऽपीत्यर्थः । योग्यतादीत्यादिपदेन योग्यताज्ञानदोषाभावादिग्रहः ।। **अप्रयोजकत्वादिति** ।। त्वदुक्तसाध्यं प्रतीत्यर्थः ।। **विवक्ष्यत इति** ।। प्रागुक्तांशतः सिद्धसाधनतानिरासायेति योज्यम् ।

तर्कताण्डवम्

एतेन वेदस्य यथार्थज्ञानपूर्वकत्वाभावेऽन्धपरम्परा स्यादिति निरस्तम् । प्रत्यक्षवद्गुणाजन्येश्वरज्ञानवच्च तदपूर्वकत्वेऽप्यन्ध-परम्पराभावोपपत्तेः ।

अत एव च वेदजन्या प्रमा करणगुणपूर्विका जन्यप्रमात्वात् चाक्षुषप्रमावदिति निरस्तम् । अप्रयोजकत्वात् । नापि वेदाः सर्वज्ञ-प्रणीताः वेदत्वात् व्यतिरेकेण लौकिकवाक्यवदिति वाच्यम् । अप्रसिद्धविशेषणत्वात् ।

ननु तर्ह्यसंसारिप्रणीता इति साध्यते । न चैवमप्रसिद्धविशेषण-

व्यवहारः । (चौ.सं.प्र.) श.ख.च.प्र. तात्पर्यवाद ३६६ पुटे । तथा च टिप्पण्यां ''तेषां द्विकर्तृकत्वादिति'' इति पाठः स्यात् । इति भाति ।

त्वम् । आत्मत्वमसंसारिनिष्ठम् जातित्वात् घटत्ववदित्यनेनासंसारिप्रणीतत्वसिद्धेरिति चेन्न । उक्तरीत्या गौरवेण वेदस्वरूपतत्प्रामाण्ययोरसंसारिप्रणीतत्वं विनाप्युपपत्त्याऽप्रयोजकत्वात् ।

नापि वैदिकमहम्पदं स्वतन्त्रवक्तृपरं अहम्पदत्वात् सम्मतवदित्यनेन पौरुषेयत्वसिद्धिरिति वाच्यम् । तथात्वे त्वन्मते वेदे ''शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तम'' इत्यादौ स्वतन्त्रवक्तुरीश्वरस्यैव, भारतादौ च ''किं नो राज्येन गोविन्द'' ''शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्'' इत्यादौ व्यासस्यैव, लोके च ''वाच्यस्त्वया मद्वचनात्स राजा'' इत्यादौ कालिदासादेरेवाहंशब्दार्थत्वापातात् ।

न्यायदीपः

वेदनित्यत्वे **मण्याद्युक्तं** बाधकान्तरं निराह ।। **एतेन वेदस्येति** ।। **अन्धपरम्परेति** ।। तथाच वेदेऽनाश्वासः स्यादिति भावः ।। **अत एवेति** ।। गुणाभावेपि प्रमात्वस्योपपन्नत्वादेवेत्यर्थः । तदेव व्यनक्ति ।। **अप्रयोजकत्वादिति** ।।

चिरन्तनानुमानान्तरमाशङ्क्य तत्त्वनिर्णयटीकोक्तदोषेण निराह ।। **नापि वेदा इति** ।। टीकोक्तमुपलक्षणमुपेत्य परोक्तमन्यदप्याशङ्क्य निराह ।। **ननु तर्हीत्यादिना** ।। **उक्तरीत्येति** ।। प्रत्यक्षवद् गुणाजन्येश्वरज्ञानवच्चेत्यादिनोक्तरीत्योपपत्येत्यन्वयः ।

उदयनोक्तं प्रयोगान्तरमाशङ्क्य निराह ।। **नापीति** ।। ''तद् ब्रह्मावेदहं ब्रह्मास्मीति'' ''अहमेव स्वयमिदं वदामि'' इत्यादौ श्रुताहमाद्यस्मदादेशपदमित्यर्थः ।

''तथात्त्वे सङ्कल्पप्रार्थनादिवाक्यानामनर्थकत्वप्रसङ्गात्'' इति **तत्व-निर्णयटीकां** विवृण्वन्नेव हेतुमाह ।। **तथात्व इति** ।। तैत्तिरीयोपनिषदि श्रुते प्रार्थनावाक्ये **मे** मम **शरीरं** विशिष्टाश्चर्षण्यः प्रजाः यस्य तत् विशिष्टप्रजायुक्तमस्तु **मे** मम **जिह्वा मधुमत्तमा** अतिशयेन स्वादुमती भवत्विति प्रार्थनाकर्तृयजमानवाचित्वेन श्रुतास्मदादेशरूपमदिति शब्दार्थत्व-मीश्वरस्य स्यात् । तथा

''किं नो राज्येन गोविन्द किं भोगैर्जीवितेन वा'' । इति विषाद-परगीतावाक्ये तथा–

''पृच्छामि त्वां धर्मसम्मूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेहं''

इति शिक्षाप्रार्थनापरे अर्जुनकर्तृकवाक्ये व्यासस्यैव न इत्यहमिति च श्रुतास्मच्छब्दार्थत्वप्रसङ्गात् । तथा रघुवंशे च मद्वचनादिति सीता-प्रयुक्तास्मच्छब्दार्थत्वं कालिदासस्य स्यादित्यर्थः ।

तर्कताण्डवम्

ननु ''शरीरं मे'' इत्यादावीश्वरादेरेव स्वतन्त्रवक्तृत्वेऽपि मन्त्रलिङ्गप्रकरणादिना यजमानाद्यभिप्रायानुप्रवेशाङ्गीकाराद्यजमाना-र्जुनसीतादिरेवाहंशब्दार्थ इति चेत्तर्हि वेदापौरुषेयत्वेऽपि ''शरीरं मे'' इत्यादिप्रार्थनादिमन्त्रेषु मन्त्रलिङ्गादिना यजमानेश्वराद्यभिप्रायानुप्रवेशस्य मयापि स्वीकृतत्वात्तत्र यजमान एवाहंशब्दार्थः ''मामुपास्व'' इत्यादौ त्वीश्वर इत्यस्तु । किञ्च मन्मते ईश्वरस्य अन्योच्चारणानपेक्षमेवोच्चार-यितृत्वेन स्वतन्त्रवक्तृत्वमप्यस्ति ।

एतेन वैदिकेन स्यामाभूमेत्याद्युत्तमपुरुषेण पौरुषेयत्वसिद्धिः ।

तदभिधेयायाः सङ्ख्यायाः स्वतन्त्रवक्त्रन्वयादिति निरस्तम् । तस्याः ''गृभ्णामि ते सौभगत्वाय हस्तं'' इत्यादौ परतन्त्रवक्त्रन्वयस्यापि दर्शनात् । प्रत्युत त्वत्पक्ष एव ''वयं स्याम पतयो रयीणां'' ''भूयिष्ठां ते नम उक्तिं विधेम'' इत्यादौ बहुवचनादिकमयुक्तम् । स्वतन्त्रवक्तुरीश्वरस्यैकत्वात् ।

एतेन वैदिकेन युष्मच्छब्देन पौरुषेयत्वसिद्धिः । तस्य स्वतन्त्रवक्तृसम्बोध्यवाचकत्वादिति निरस्तम् । ''त्वां प्रपन्नं'' ''वाच्यस्त्वया'' इत्यादौ परतन्त्रवक्तृसम्बोध्येऽपि तत्प्रयोगात् ।

एतेनैव वैदिकाभ्यां यत्तच्छब्दाभ्यां पौरुषेयत्वसिद्धिः । तयोर्यथाक्रमं स्वतन्त्रवक्तृनिष्ठबुद्धिविषये तादृशपरामर्शोपहिते च शक्तत्वादिति निरस्तम् । ''योऽस्मान् द्वेष्टि'' ''स राजा'' इत्यादौ चास्वतन्त्रवक्तृबुद्धिविषयादावपि प्रयोगदर्शनात् ।

अन्यथा वैदिकानां किमहोबतधिगादिशब्दानामपि स्वतन्त्रवक्तृनिष्ठसंशयसुखदुःखोपहितार्थत्वाद्वेदस्य नित्यसंशयाद्याधारकृतत्वमपि स्यात् । तत्र संशयादिकमाहार्यं चेदिहापि स्वातन्त्र्यमाहार्यमस्तु । एतदप्युक्तं गौरवदोषेणेति ।

न्यायदीपः

''न हि वयं वेदे पुरषाभिप्रायप्रवेश एव नास्तीति वदामः'' इति **टीकोक्त**समाधिं परमुखेनैव वाचयन्नाह ।। **ननु शरीरमित्यादिना** ।। **मन्त्रलिङ्गेति** ।। मन्त्राणामर्थप्रतिपादनसामर्थ्यं हि मन्त्रलिङ्गमिति मीमांसकादिपरिभाषा । व्यक्तमेतल्लिङ्गप्रकरणादिस्वरूपमग्रे द्वितीयपरिच्छेदे । यस्मिन्मन्त्रे यदर्थप्रतिपादनसामर्थ्यं प्रकरणस्थानादिकं वा विद्यते

तदभिप्रायानुप्रवेशस्य तत्राङ्गीकारादित्यर्थः ।

तर्हि ''मामुपास्व'' इत्यादावनन्यपरे स्वतन्त्रवक्तृपरता स्यादित्यतः सिद्धसाधनत्वं चाह ।। **किञ्चेति ।। स्यामेति ।।** ''वयं स्याम पतयो रयीणां, अपाम सोममृता अभूम, अभूमागसो वयं'' इत्यादौ श्रुतोत्तम-पुरुषस्य ''द्व्येकयोर्द्विवचनैकवचने'' ''बहुषु बहुवचनं'' इत्युक्तवचनरूपतया सङ्ख्यावाचित्वात्तदभिधेयायाः सङ्ख्याया इत्युक्तम् ।। **तस्या इति ।।** सङ्ख्याया इत्यर्थः । ''गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथा सः'' इति बह्वृचवाक्ये उद्वोढुपुरुषेण ते तव हस्तं सौभाग्याय गृभ्णामि ''हृग्रहोर्भश्च्छन्दसि'' इति भादेशः गृह्णामीति कन्यां प्रत्युच्चार्यमाणे श्रुतोत्तम-पुरुषोक्तसङ्ख्यायास्तद्वाक्यं प्रत्यस्वतन्त्रवक्त्रन्वयदर्शनादित्यर्थः । एकत्वा-दित्युपलक्षणम् । सर्वनम्यत्वात्प्रणामोक्तिंश्च न युक्तेत्यपि ध्येयम् ।। **इत्या-दाविति ।।** पूर्वोक्तगीतारघुवंशवाक्यादौ व्यासकालिदासादेरेव स्वतन्त्रवक्तृ-तयाऽर्जुनसीतादेरेतादृशवक्तृत्वात्तत्सम्बोध्येऽपि कृष्णादौ युष्मत्पदादेश-प्रयोगदर्शनाद्व्यभिचार इत्यर्थः ।।

।। **वैदिकाभ्यामिति ।।** ''यश्छन्दसामृषभो विश्वरूपः च्छन्दोभ्योध्य-मृतात्सम्बभूव समेन्द्रो मेधया स्पृणोतु'' इत्यादौ श्रुताभ्यामित्यर्थः ।। **यथा-क्रममिति ।।** स्वतन्त्रवक्तृनिष्ठबुद्धिविषये यच्छब्दः तादृशपरामर्शोपहिते विषये च तच्छब्द इत्यर्थः । पूर्ववदेव वेदे लोके च व्यभिचारमाह ।। **य इति ।।** ''अप्रतिष्ठो स भूयाद्योस्मान्द्वेष्टि यं च वयं द्विष्म'' इत्यत्र यो द्वेष्टि सः अप्रतिष्ठो भूयादिति ''वाच्यस्त्वया मद्वचनात्स राजा'' इति रघुवंशे च प्रयोगदर्शनादित्यर्थः ।

स्वोक्तगत्यन्तरपक्षे अनुकूलतर्कं परपक्षे बाधकं चाह ।। **अन्यथेति ।।** स्वतन्त्रवक्तृपरत्वादिकमेव अहमादिपदानामिति पक्षे इत्यर्थः । ''किं

स्विद्भिमस्य भेषजं'' ''को न आत्मा किं ब्रह्म'' इत्यादौ च किं शब्दः इत्यादावहोशब्दः[१]: ''अहो बतासि यमेनैव ते मनोहृदयं विदाम'' इत्यादौ बतशब्दः च्छन्दोगोपनिषदि सप्तमे ''आचार्यं वा ब्राह्मणं वा किञ्चिद्भृशमिव प्रत्याह धित्त्वाऽस्त्वित्येनमाहुः'' इत्यादौ च धिक्छब्दः श्रुतः । तत्र किंशब्देन संशयः अहो इति सुखं बत धिगिति दुःखं प्रतीयत इतीश्वरो वेदकर्ता नित्यज्ञानादिमानिव नित्यसंशयादिमानपि तादृशवाक्यकर्तृत्वेन स्यादित्यर्थः ।

।। **आहार्यं चेदिति** ।। एतेन ''न च जिज्ञासादयः सर्वज्ञे विप्रतिषिद्धा इति युक्तम् । शिष्यबोधनाय आहार्यत्वोपपत्तेः'' इति कुसुमाञ्जल्युक्तं निरस्तम् । सुखदुःखादेरवर्जनीयत्वात् । तस्याप्याहार्यारोपत्वे तद्बोधक-वेदभागस्याप्रामाण्यापत्तेरिति भावः ।। **गौरवेति** ।। नित्यसंशयादि-मत्वरूपगौरवदोषेण पुंवाक्यं ज्ञापकं न तदित्यर्थः ।

तर्कताण्डवम्

एतेनैव काठकं कालापकं इत्यादि समाख्ययेश्वरसिद्धिः । ईश्वरस्यैव कठादिकायपरिग्रहेण तत्तच्छाखानिर्मातृत्वात् । अध्ययन-मात्रस्य साधरण्यादिति निरस्तम् । कठादिऋषिधृतत्व[२]मात्रेण काठकादिसञ्ज्ञोपपत्तेः ।

न्यायदीपः

।। **एतेनैवेति** ।। अन्यथोपपन्नत्वकथनेनैवेत्यर्थः ।। **समाख्ययेति** ।।

---

१. अत्र ''इत्यादावहोशब्दः'' इति वाक्यं अनन्वितं वर्तते । यद्वा ''विदाम'' इत्यादौ अहोशब्दः बतशब्दः'' इति स्यात् ।

१. 'दृष्टत्वेति' पाठान्तरम् ।

''यौगिकी सञ्ज्ञा समाख्या'' इति मीमांसकपरिभाषया कठेन कृतं काठकमित्यादियौगिकसञ्ज्ञारूपसमाख्ययेत्यर्थः । तावता कथमीशकृतत्वमित्यत आह ।। **ईश्वरस्यैवेति** ।। कठादिमुनिनाधीतत्वात्काठकमित्यस्त्वित्यत आह ।। **अध्ययनमात्रस्येति** ।। अध्येत्रन्तरसाधारण्यादित्यर्थः ।। **कठादिऋषिधृतत्वेति** ।। तज्जन्मन्यश्रुतानां सुप्तप्रतिबुद्धैरिव कठादिभिर्दृष्टत्वस्य तन्निबन्धनत्वोपपत्तेः'' इति तत्त्वनिर्णयटीकोक्तदिशा कठादिमुनिभिर्जन्मान्तरेऽधीतशाखाविशेषस्य प्रतिभाबलेनेदानीं स्फुरितत्वेन तद्दृष्टत्वरूपतद्बुद्धिधृतत्वेनोपपत्तेरित्यर्थः ।

तर्कताण्डवम्

नापि वेदस्तात्पर्यपूर्वकः प्रमाणशब्दत्वात् भारतवत् । न चाप्रयोजकता । तात्पर्यज्ञानस्य शाब्दज्ञानानियामकत्वे हि नानार्थे श्लिष्टे च विनिगमकाभावेनार्थविशेषधीर्न स्यात् । यष्टीः प्रवेशयेत्यादावन्वयानुपपत्त्यभावेन लक्षणा च न स्यादि[1]त्युक्तानुकूलतर्कसद्भावात् । तात्पर्यस्य चार्थप्रत्यायनेच्छयोच्चरितत्वरूपत्वात् पौरुषेयत्वसिद्धिः । तस्माच्छ्रुतिकुमार्यास्तात्पर्यरूपो गर्भ एव पुंयोगे लिङ्गमिति वाच्यम् ।

तत्प्रमितिशेषत्वरूपस्य तात्पर्यस्येच्छाघटितत्वाभावात् । तद्घटितत्वेपि मन्मते सजातीयोच्चारणानपेक्षस्य इश्वरस्य अर्थप्रत्यायनेच्छयोच्चारणेऽपि सर्वदाप्येकप्रकारानुपूर्विकत्वरूपापौरुषेयत्वाहानेश्च ।

अन्यथा त्वन्मतेऽप्याधुनिकेनार्थज्ञानवताध्यापकेन तदिच्छयोच्चरितस्य वेदस्य आधुनिककृतत्वं स्यात् । यादृच्छिकसंवादि-

---

१. 'उक्त' इति पाठान्तरे नास्ति ।

शुकादिवाक्ये इच्छारूपतात्पर्याभावेऽपि शाब्दप्रमादर्शनेन हेतोरप्रयोजकत्वाच्च ।

न्यायदीपः

यत्तु **मणौ** "तत्प्रतीतीच्छयोच्चरितत्वं तात्पर्य"मिति तात्पर्यस्वरूपं निरूप्यान्ते "लोके कृत्स्नत्वाद्वेदेपीदं तात्पर्यमिति पौरुषेयत्वम्"[१] इत्यादिनोक्तं तदाशङ्क्य निराह ।। **नापीति ।। तात्पर्यपूर्वक इति ।।** अर्थप्रतीतीच्छया केनचिदुच्चरित इत्यर्थः । यद्वा अर्थप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यज्ञानपूर्वक एवार्थप्रत्यायक इति साध्यार्थः । प्रमादादिदोषपूर्वकशब्दाभासे व्यभिचारनिरासाय प्रमाणेति हेतुविशेषणम् । अर्थप्रमितिजनकशब्दत्वादित्यर्थः ।

मण्याद्युक्तमेवानुकूलतर्कं निष्कृष्याह ।। **तात्पर्यज्ञानस्येति ।। नानार्थ इति ।।** अक्षमानयेत्यादौ ।। **श्लिष्ट इति ।।** राजा कुवलयोल्लासीत्यादौ पार्थिवचन्द्ररूपार्थद्वयश्लेषयुक्त इत्यर्थः ।। **अन्वयेति ।।** गङ्गायां घोष इत्यादौ प्रवाहग्रामयोराधाराधेयभावरूपान्वयानुपपत्त्या गङ्गापदस्य तीरे लक्षणाऽश्रीयते । यष्टीः प्रवेशयेत्यादौ तु यष्टीनां गृहप्रवेशान्वयसम्भवेन लक्षणाबीजान्वयानुपपत्यभावात् यष्टिपदस्य यष्टिमत्सु लक्षणा न स्यात् । तात्पर्यज्ञानस्य हेतुत्वे तु यष्टिमत्प्रवेशतात्पर्यानुपपत्तिरूपलक्षणाबीजसम्भवाल्लक्षणा स्यादेवेति भावः ।।

तावता कथं पौरुषेयत्वमित्यत आह ।। **तात्पर्यस्य चेति ।। श्रुतीति ।।** श्रुतिरूपकुमार्यास्तात्पर्यरूपो गर्भ इत्यर्थः । यथा कुमार्यां गर्भेण चिह्नेन

१. (चौ.सं.प्र.) श.ख.च.प्र. तात्पर्यवादे । ३३१ पुटे । "एवञ्च लोके कृत्स्नत्वात् वेदेऽपीदं तात्पर्यं इति तस्य पौरुषेयत्वं" इति तदीयं वाक्यम् । तथा च टिप्पण्यां "तस्य पौरुषेयत्वं" इति भवेत् ।

पुंयोगोऽस्ति तस्या इति ज्ञायते तथा श्रुतेरपि तात्पर्यरूपलिङ्गेन पुरुष-कृतत्वरूपपुंयोगो ज्ञायत इत्यर्थः ।

अस्त्वेवं वेदस्य तात्पर्यपूर्वकत्वं तावता न पौरुषेयत्वसिद्धिरिति भावेनाह ।। **तत्प्रमितिशेषत्वेति** ।। ''शेषः परार्थत्वात्'' इति जैमिन्युक्तदिशा तत्प्रमित्येकोद्देश्यकत्वं तच्छेषत्वं तदेव तत्तात्पर्यमित्यर्थः ।। **अन्यथेति** ।। तत्प्रत्यायनेच्छयोच्चरितत्वमात्रेण तत्कृतत्व इत्यर्थः । पराभिमतेच्छाघटित-तात्पर्यरूपसाध्ये प्रमाणशब्दत्वहेतोरप्रयोजकत्वं चाह ।। **यादृच्छिकेति** ।।

तर्कताण्डवम्

न च तत्रापीश्वरेच्छा कल्प्या । अबाधितार्थत्वेन तत्कल्पनस्य शाब्दबोधानन्तरभावित्वेन तत्राहेतुत्वात् । ईश्वराभावं निश्चितवतोऽपि मीमांसकस्य शुकादिवाक्येन शाब्दप्रमादर्शनाच्च । नानार्थादावपि मन्मते नेच्छारूपं तात्पर्यं नियामकम् । किन्तु तत्प्रमितिशेषत्व-रूपम् । त्वन्मतेऽप्यावश्यकं प्रकरणादिकमेवार्थविशेषज्ञापकमस्तु । ज्ञापके च धूमालोकादाविवाननुगमो न दोषाय ।

यद्वा त्वन्मते काशीमरणश्रवणादिजन्यतत्त्वज्ञानेष्विव प्रकरणादि-जन्यशाब्दबोधेष्वपि वैजात्यं कल्प्यताम् ।

न्यायदीपः

अबाधितेति ।। शुकादिवाक्यं तदर्थप्रत्यायनेच्छयेश्वरेणोच्चरितं अबाधितार्थत्वादित्यबाधितार्थत्वेन हेतुना तदिच्छयेश्वरोच्चरितत्वकल्पन-स्येत्यर्थः । तत्र शाब्दाबोधे । ईश्वरोच्चरितत्वरूपतात्पर्यज्ञानस्या हेतुत्वा-दित्यर्थः ।

अप्रयोजकत्वं प्रकारान्तरेण व्यनक्ति ।। **ईश्वराभावमिति** ।। यत्तु तात्पर्यज्ञानस्य शाब्दज्ञाननियामकत्वमुक्तं तत्तथैव । परन्तु न त्वदभिमत-तात्पर्यज्ञानं नियामकं किन्त्वन्यदेवेति भावेनाह ।। **नानार्थेति** ।। **तत्प्रमितीति** ।। तात्पर्यं ज्ञातं सदिति शेषः । एतेन यष्टीः प्रवेशयेत्यादौ लक्षणा न स्यादिति दोषोऽपि नेति भावः ।। **आवश्यकमिति** ।। तत्प्रत्यायनेच्छयोच्चरितत्वस्यापि प्रकरणादिनैव ज्ञातव्यत्वेन तात्पर्य-ज्ञानहेतुतयाप्यावश्यकमित्यर्थः ।

नन्वेवं क्वचिल्लिङ्गं क्वचित्प्रकरणम् क्वचित्समाख्येत्यननुगमोऽतोऽनुगतं प्रकरणादिजन्यं तात्पर्यज्ञानमेव हेतुरित्यत आह ।। **ज्ञापके चेति** ।।

ननूक्तस्थले वह्निव्याप्यज्ञानत्वेन धूमालोकादिज्ञानानामनुगमो वा धूमादिज्ञापजकजन्यानुमितौ वैजात्येन वाऽस्तु । अन्यथा व्यतिरेक-व्यभिचारेणानुमितिहेतुतैव न स्यादित्यत आह ।। **यद्वेति** ।। काशीमरणेन श्रवणादिना च जन्येषु तत्त्वज्ञानेष्वित्यर्थः ।

तर्कताण्डवम्

एतेन वैदिकानि निन्दावाक्यानि हानाभिप्रायपूर्वकाणि निन्दा-वाक्यत्वात् लौकिकनिन्दावाक्यवत् । एवं स्तुतिवाक्यमपि पक्षीकृत्य प्रयोक्तव्यमिति निरस्तम् । अपौरुषेयत्वेऽपि मन्मते ईश्वराभिप्राय-पूर्वकत्वस्य मीमांसकमतेऽप्यनादौ संसारेऽर्थाभिज्ञाध्यापकाभिप्राय-पूर्वकत्वस्य सत्त्वेन सिद्धसाधनात् । स्वतन्त्रेति विशेषणे च गौरवात् । शुकादिवाक्यवदभिप्रायपूर्वकत्वाभावेऽपि गुणदोषबोधकत्वेनैव निन्दादि-वाक्यतोपपत्तेश्च ।

एतदप्युक्तं ''गौरवदोषेण'' इति । तस्मात्पौरुषेयत्वे नानुमानं मानम् ।

नापि ''च्छन्दांसि जज्ञिरे'' इत्यादिश्रुत्यादिकं । तस्य

''तदुत्पत्तिवचश्चैव भवेद् व्यक्तिमपेक्ष्य तु ।''
''अवान्तराभिमानानां देवानां वा व्यपेक्षया ।''
''नानित्यत्वात्कुतस्तेषामनित्यत्वं स्थिरात्मनाम्'' ।

इत्यादिस्मृत्यैवाभिव्यक्तिपरत्वेन सम्प्रदायप्रवर्तकपरत्वेन च व्याख्यातत्वात् । तेनेश्वराधीनोत्पत्तिकत्वस्यैवोक्त्या मानान्तरेणार्थमुपलभ्य रचितत्वरूपस्य प्रणीतत्वस्यासिद्धेश्च ।

न ह्युक्तरीत्या क्रमविशेषघटितो वेद इदानीमप्यस्मदाद्यधीनोत्पत्तिक इति वयमपि वेदप्रणेतारः ।

न्यायदीपः

उदयनाद्युक्तमन्यदपि निराह ।। **एतेनेति** ।। [१]''यदश्रुवशीय तत् रजतं हिरण्यमभवत्तस्माद्रजतं हिरण्यमदक्षिण्यमश्रुजं हि यो बर्हिर्ददाति पुरास्य संवत्सराद्वहे रुदन्तीति'' ''यदभिघारयेद्रुद्रायास्ये पशून्निदध्यात्'' इत्यादीनि निन्दावाक्यानीत्यर्थः ।। **स्तुतीति** ।। ''वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागेनोपधावति'' इत्यादि वाक्यमुपादेयाभिप्रायपूर्वकं स्तुतिवाक्यत्वाल्लौकिकस्तुतिवाक्यवदिति प्रयोक्तव्यमित्यर्थः ।

तत्वनिर्णयटीकोक्तमेव समाधिमाह ।। **अपौरुषेयत्वेऽपीति** ।। अप्रयोजकत्वं हेतोराह ।। **शुकादीति** ।। तत्रापीश्वराभिप्रायकल्पनायां पूर्वोक्तदोषो

१. 'सोऽरोदीद्यदरोदीत्तद्रुदस्य रुद्रत्वं यदश्रु अवसीयते तद्रजतमभवत् तस्माद्रजतमदक्षिण्यमश्रुजम्'' इति न्यायामृतप्रकाशे शब्दबाध्यत्वबाधकप्रकरणे दृश्यते ।

ज्ञेय इति भावः । श्रुत्यादिकमित्यादिपदेन ''प्रतिमन्वन्तरम्'' इति प्रागुक्त-स्मृतिग्रहः ।। **तस्येति** ।। श्रुत्यादेरित्यर्थः । स्मृत्यैव व्याख्यातत्वादित्य-न्वयः ।। **तदुत्पत्तीति** ।। श्रुत्युत्पत्तिवचश्चेत्यर्थः । तुर्विशेषार्थः । आदि-कालीनां व्यक्तिन्त्विति । तेन प्रत्यहमुपाध्यायैर्व्यज्यमानत्वादुत्पत्तिव्यवहार-प्रसङ्ग इति निरस्तम् । अत एवावान्तराभिमानानामित्यस्मात्पूर्वार्ध एव

''वेदानां सृष्टिवाक्यानि भवेयुर्व्यक्तयपेक्षया'' ।

इति गत्युक्तिसद्भावेपि तदनुदाहृत्य स्थलान्तरस्थमेव तदुत्पत्तीत्य-र्धमुदाहृतम् ।। **देवानां वेति** ।। देहजन्मापेक्षयेत्यर्थः । मुख्याभिमानिश्रिय-स्तन्नेत्यतोऽवान्तराभिमानानामिति । अमुख्याभिमानवतामित्यर्थः ।। **तेषामिति** ।। वेदानामित्यर्थः ।। **स्मृत्यैवेति** ।। तत्त्वनिर्णयोक्तब्रह्माण्ड-पुराणवचनेनैवेत्यर्थः ।।

''अग्नेर्ऋग्वेदो वायोर्यजुर्वेदः'' इत्यादिवाक्यगत्युक्तिपरतयापि तदुत्पत्ति-वचश्चेत्यर्धस्यार्थमुपेत्याह ।। **सम्प्रदायेति** ।। चिरकालविरतस्य वेदस्य शिष्यप्रशिष्येषु प्रख्यापनं हि सम्प्रदायः । तत्कारित्वेन चेत्यर्थः । श्रुत्यादे-रन्यथासिद्धिं चाह ।। **तेनेति** ।। श्रुत्यादिनेत्यर्थः । अस्तु तावतैव प्रणीतत्वमित्यत आह ।। **न ह्युक्तरीत्येति** ।। क्रमविशेषविशिष्टानां वर्णाना-मित्यादिनोक्तरीत्येत्यर्थः ।।

तर्कताण्डवम्

ननु यथा वेदानादित्वश्रुतिर्न वेदस्वरूपानादित्वपरा । बाधात् । किन्त्वानुपूर्व्यनन्यथात्वपरा । तन्मात्रेणैव शब्दे अनुत्पत्तिव्यवहारात् । तथा तदुत्पत्तिश्रुतिरपि तदन्यथात्वपरेति चेन्मैवम् । ''तत्क्रमेणैव'' इत्यादिस्मृत्याऽनुत्पत्तिश्रुतेः क्रमानन्यथात्वपरत्वे स्थिते उत्पत्तिश्रुते-स्तदविरोधाय क्रमोत्पत्तिपरत्वस्यैवोचितत्वात् ।

अन्यथा ''ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्'' इति श्रुत्याऽसर्वज्ञस्य अग्न्यादेरपि वेदप्रणेतृत्वं स्यात् । न चैकस्मिन्वाक्येऽनेकेषां स्वतन्त्रप्रणेतृत्वं युक्तम् । युक्तं तु सम्प्रदायप्रवर्तकत्वम् । एतदप्युक्तं ''गौरवदोषेण'' इति ।

यद्यप्यृष्यादयोऽपि केषुचित्पुरुषेष्वचिरविरतस्य वेदैकदेशस्य सम्प्रदायप्रवर्तकाः । तथापि नेश्वरवत्सर्वपुरुषेष्वपि प्रलये चिरतर-विरतस्य कृत्स्नस्य वेदस्य प्रवर्तका इति न तेषु वेदहेतुत्वव्यवहारः । ईश्वरोऽपि ह्यस्मन्मते

''यो ब्रह्माणं विदधाति पूर्वं यो वेदांश्च प्रहिणोति तस्मै'' ।

इत्यादिश्रुत्या वेदसम्प्रदायप्रवर्तकत्वान्महोपाध्याय एव । तस्मा-द्वेदानां पौरुषेयत्वरूपं सादित्वमयुक्तम् ।

अनित्यत्वं त्वत्यन्तायुक्तम् । तथाहि । क्रमविशेषविशिष्टा वर्णा एव वेदाः । क्रमश्च बुद्धिनिमित्तक एव । न तु स्वत इत्युक्तम् । ततश्च सर्वेषां सर्वथा वर्णविषयविवक्षितक्रमोपाधिभूतबुध्युपरम एव वेदे विनाशो वक्तव्यः । न तु घटादीनामिवापरः । न चेश्वरस्य तथाविधबुध्युपरमो युज्यते । तस्य सर्वदा सर्वज्ञत्वात् । पुराणादीना-मप्यन्यथारचनमेव अनित्यत्वमिति । [१]विधिप्रत्ययस्य लोकवद्वेदेऽ-प्याप्ताभिप्रायवाचकत्वात् वैदिकविधिप्रत्ययेनैव वेदस्य पौरुषेयत्वमिति तु विधिवादे निरसिष्यते ।

न्यायदीपः

च्छन्दांसीत्यादिश्रुत्यादेः क्रमोत्पत्तिपरत्वेनान्यथासिद्धिरयुक्तेति भावेन

१. 'विधिवेदस्य' इति न्यायदीपपाठः ।

शङ्कते ।। **नन्विति** ।। **श्रुतिरिति** ।। ''अनादिनित्या सा तच्च'' इत्यादि-पूर्वोक्तश्रुतिरित्यर्थः ।। **बाधादिति** ।। क्रमस्य कृतकत्वादिति भावः ।। **अनन्यथात्वेति** ।।

''वेदास्ते नित्यविन्नत्वाच्छ्रुतयश्चाखिलैः श्रुतेः ।
आम्नायोऽनन्यथापाठादीशबुद्धिस्थिताः सदा'' ।

इति महावाराहस्मृतेरिति भावः ।। **स्मृत्येति** ।। प्रागुक्तयेत्यर्थः ।। **अन्यथेति** ।। क्रमोत्पत्तिपरत्वमनुपेत्य तदन्यथात्वपरत्वोक्ताविति्यर्थः । अस्त्वित्यत आह ।। **न चेति** ।। **एतदपीति** ।। एकस्मिन्वाक्ये अनेकेषां स्वतन्त्रप्रणेतृत्वं न युक्तमित्येतदित्यर्थः ।। **गौरवेति** ।। अनेकस्वतन्त्र-प्रणेतृकत्वकल्पनाख्यगौरवदोषेणेत्यर्थः ।

सम्प्रदायप्रवर्तकत्वस्य वेदहेतुत्वव्यवहारे व्यभिचारमाशङ्क्य निराह ।। **यद्यपीत्यादिना** ।। च्छन्दांसि जज्ञिरे तस्मादित्यादेः सम्प्रदायप्रवर्तकत्वेन गत्युक्तिरयुक्ता हेतोरसिद्धेरित्यत आह ।। **ईश्वरोऽपि हीति** ।। **पौरुषेयत्वेति** ।। स्वतन्त्रपुरुषप्रणीतत्वरूपमित्यर्थः ।

यत्तु–

''प्रमायाः परतन्त्रत्वात्सर्गप्रलयसम्भवात्'' ।

इत्यादिना **कुसुमाञ्जलौ** प्रलये वेदानामुत्सन्नत्वमुक्तम् । तदप्य-युक्तमित्याह ।। **अनित्यत्वं त्विति** ।। वेदानामित्यनुषङ्गः । क्रमस्योक्तदिशा कथञ्चित्पुरुषाधीनजन्मवत्त्वेन कृतकत्वसम्भवेऽप्यानुपूर्व्युच्छेदस्तु न युक्त एवेति तु शब्दार्थः ।। **इत्युक्तमिति** ।। [१]अपौरुषेयत्वानुमानवादे उक्त-मित्यर्थः ।। **अपर इति** ।। स्वरूपध्वंसलक्षण इत्यर्थः ।

---

१. ४१७ पुटे ''क्रमस्य कृतकत्वेऽपि'' इत्यादिना ।

तर्हि [१]पुराणानामिति नित्यत्वं स्यात् । ईश्वरबुद्धिनिमित्तकत्वस्य कदाप्यनाशादित्यतोऽस्त्येवैवं रूपं नित्यत्वम् किन्तु क्रमव्यत्यासोऽपि तत्रेत्यनित्यत्वमिति भावेन तत्त्वनिर्णयोक्तमेवाह ।। **पुराणादीनामिति** ।।

''पुराणानि तदर्थानि सर्गे सर्गेऽन्यथैव तु
क्रियन्तेऽतस्त्वनित्यानि तदर्थाः पूर्वसर्गवत्'' ।

इति ब्रह्माण्डपुराणोक्तेरिति भावः ।

नन्वेवं वेदपुराणयोरीश्वरबुद्धिनिमित्तकत्वेन नित्यत्वे पुराणानामप्यन्यथारचनं निष्फलमिति चेन्न ''भगवत्प्रवृत्तेः सर्वत्र स्वप्रयोजनहीनत्वस्य ''न प्रयोजनवत्वात्'' इति सूत्रकृतैवोक्तेः परप्रयोजनानामतिसूक्ष्माणामुत्प्रेक्षितुमशक्यत्वात्'' इति तत्वनिर्णयटीकासुधयोरेव व्यक्तत्वात् ।

नन्वेवमपि ''विधिर्नियोगः प्रेरणेत्यनर्थान्तरम् । स च प्रेरकपुरुषधर्मः । अतो वैदिकानां विध्युद्देशानां लौकिकवत्स्वतन्त्रवक्तृकत्वमेवोचितम् । यस्तु पौरुषेयत्वं नोपैति तं प्रति विधिरेव । गर्भ इव श्रुतिकुमार्याः पुंयोगप्रमाणम्'' इति विधिवादे मणिकृदुक्तेः । ''आम्नाभिप्रायां विध्यर्थः'' इत्युदयनोक्तेश्च । ''नित्या वेदाः समस्ताश्च'' इति स्मृत्युक्त्या निरस्तत्वेऽपि विशिष्य न निरस्तमित्याशङ्कामनूद्य निरासस्थलमाह ।। **विधीति** ।। **विधिवेदस्येति** ।। विधिभागरूपवेदस्येत्यर्थः ।। **विधिवाद इति** ।। द्वितीयपरिच्छेदे ।

।। इति पौरुषेयत्वानुमानादिभङ्गः ।। २१ ।।

।। इति श्रीराघवेन्द्रयतिविरचिते तर्कताण्डवव्याख्याने
न्यायदीपे वेदापौरुषेयत्ववादः समाप्तः ।।

---

१. पुराणानामपीति स्यात् ।

ईश्वरवादः

तर्कताण्डवम्

ननु यदुक्तमीश्वरस्य सार्वज्ञ्यादिकमप्रामाणिकमेव बहु कल्प्यमिति तन्न । तस्य धर्मिग्राहकमानसिद्धत्वात् ।

तथाहि । अदृष्टाद्वारकस्वोपादानगोचरजन्यकृतिजन्यभिन्नानि समवेतानि जन्यानि, समवेतपदस्थाने भावपदं वा प्रयोज्यम् १. स्वजन्यादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगिभिन्नोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि २. स्वजनकादृष्टोत्तरोपादानगोचरपरोक्षान्यज्ञानचिकीर्षाकृतिमज्जन्यानि वा । ३. अपरोक्षज्ञानचिकीर्षाप्रयत्नविषयीभवदुपादानानि वा । समवेतत्वे सति प्रागभावप्रतियोगित्वात् भावकार्यत्वाद्वा । घटवत् ।

न्यायदीपः

शास्त्रयोनित्वादिति ब्रह्मसूत्राभिमतमीश्वरस्यानानुमानिकत्वं साधयितुमाह ।। **यदुक्तमिति** ।। वेदापौरुषेयत्वानुमानोक्तिप्रस्ताव इत्यर्थः ।। **तस्येति** ।। सार्वज्ञ्यादेरीश्वररूपधर्मिग्राहकमानेन सिद्धेरित्यर्थः । तेन सार्वज्ञ्यमात्रसिद्धावपि तेनैव विप्रलम्भाद्यभावसिद्धेरग्रे व्यक्तत्वादेवमुक्तिरिति ज्ञेयम् । तत्र **कुसुमाञ्जलौ** पञ्चमे परिच्छेदे

> ''कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः ।
> वाक्यात्सङ्ख्याविशेषाच्च साध्यो विश्वकृदव्ययः'' ।।

इतीश्वरे धर्मिण्यनेकमानान्युक्तानि । तत्र कार्यत्वरूपं मानमेकं **मणौ** प्रपञ्चितम् । तत्तावदनुवदति ।। **अदृष्टेति** ।। अत्र जन्यानीत्यन्तं पक्षः ।

स्वजन्येत्यादीनि त्रीणि साध्यानीति विवेकः । पक्षे स्वपदं जन्येति निर्दिष्टवस्तुपरम् । अदृष्टाद्वारिका या स्वोपादानगोचरा साक्षादेव स्वोपादानगोचरा या जन्या कृतिः तज्जन्यानि घटादीनि तद्भिन्नानि समवेतानि समवायवृत्त्या स्थितानि पृथिव्यादीनीत्यर्थः ।।

अत्र **मणौ** ''अदृष्टाद्वारकोपादानगोचरजन्यकृत्यजन्यानी'' इत्युक्तावपि यथाश्रुत उपादानपदस्य यत्किञ्चिदुपदानपरत्वे रूपाद्युपादानमृदङ्गगोचरास्मदादिकृतिजन्यानां शब्दादीनां पक्षतानापत्तेः, क्षित्याद्युपादानपरत्वे तद्गोचरजन्यकृत्यप्रसिध्या तदजन्यत्वाप्रसिद्धेस्तदीयव्याख्यासूक्तपरिष्कारपूर्वकोऽयं स्वेत्यनुवादः । तथा जन्यकृत्यजन्यत्वं हि जन्यकृतिजन्यान्यत्वमिति मणावेवोत्तरत्रोक्तेर्जन्यकृतिजन्यभिन्नेत्यप्यनुवाद इत्यदोषः ।।

।। **भावेति** ।। समवेतानि जन्यानीत्यत्र भावकार्याणीति वा प्रयोज्यमित्यर्थः । अदृष्टप्रागभावव्याप्यप्रागभावप्रतियोगीति साध्यांशस्य परिष्कारपूर्वकमनुवादः **स्वजन्येत्यादि** ।। स्वपदेनोपादानगोचरज्ञानादिकमुच्यते । स्वजन्यं यददृष्टं तत्प्रागभावव्याप्यो यः प्रागभावः अदृष्टकारणीभूतज्ञानादिप्रागभावः तत्प्रतियोगि च यत्किञ्चिदुपादानभूतहविरादिगोचरज्ञानादि तद्भिन्नाः स्वजन्यादृष्टजनकभिन्ना इति फलितार्थः । या उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतयः तद्वता जन्यानीत्यर्थः । अत्रापरोक्षज्ञानपदं परोक्षान्यज्ञानार्थकं न त्वपरोक्षत्वजात्याक्रान्तज्ञानपरमित्यग्रे व्यक्तम् ।।

।। **स्वजनकेति** ।। स्वस्य कार्यस्य जनकं यददृष्टं तत उत्तराः **पक्षधरोक्त**दिशाऽदृष्टाधिकरणक्षणोत्तरक्षणवर्तिन्यः न तु तदुत्तरक्षणोत्पत्तिमत्यः । तेन न बाधः शङ्क्यः । तादृश्य उपादानगोचरपरोक्षान्यज्ञानचिकीर्षाकृतयस्तद्वता जन्यानीत्यर्थः । ईश्वरज्ञानादेर्नित्यतया क्षित्यादिकार्यजनकादृष्टोत्तरत्वात् कुलालज्ञानादेरपि घटादिजनकादृष्टोत्तरत्वादिति न दृष्टान्ता-

सिद्धिः । अपरोक्षेति बहुव्रीहिः । परोक्षान्यज्ञानचिकीर्षाप्रयत्नविषयोपादान-समवेतानीत्यर्थः । च्व्यर्थलडर्थौ तु न विवक्षितौ ज्ञेयौ ।। **घटवदिति** ।। स्वपदस्य समभिव्याहृतपरत्वात्तत्र साध्यहेतुसत्त्वं व्यक्तमिति भावः ।

तर्कताण्डवम्

अत्र पक्षे जन्यानीत्येवोक्ते ध्वंसस्यापि पक्षत्वेनांशे बाधः स्यात् । तस्योपादानाभावात् । तन्निवृत्यर्थं समवेतानीति । तावत्युक्ते घटादेरपि पक्षत्वेनांशे सिद्धसाधनं स्यात् । तन्निवृत्त्यर्थं जन्यभिन्ना-नीति । तावत्युक्तेऽङ्कुरादेरपि जन्यत्वात् आश्रयासिद्धिः । तन्निवृत्यर्थं जन्यकृतीति ।।

नचानीश्वरवादिनं प्रति व्यावर्त्याभावेन जन्यपदं व्यर्थम् । तन्मते प्रमेयो घट इतिवत् तदुपरक्तबुद्धेरुद्देश्यत्वात् । उभयसिद्धप्रयोजनवत्त्वं तन्त्रम् । न त्वेकस्यैव प्रयोजनस्योभयसिद्धिः । तावत्युक्ते शब्द-फूत्कारादेः पक्षता न स्यात् । तस्य शब्दादिनिमित्तभूतमृदङ्गताल्वादि-गोचरास्मदादिनिष्ठजन्यकृतिजन्यत्वात् । तदर्थं स्वोपादानगोचरेति । तज्जनकास्मदादिनिष्ठकृतेर्निमित्तभूतमृदङ्गादिगोचरत्वेप्युपादानी-भूताकाशादिगोचरत्वाभावात् । तावत्युक्ते कालीरूपादेः पक्षता न स्यात् । तस्य स्वोपादानभूतशरीरगोचर[१]तयोक्तरूपकृतिजन्यत्वेन तद्भिन्नत्वाभावात् । भाव्यं च तस्य पक्षतया । अन्यथा पक्षातिरिक्ते तत्र साध्यसन्देहेन सन्दिग्धानैकान्तिकतापत्तेः । तदर्थमदृष्टाद्वरकेति । कालीकृतिस्त्वदृष्टद्वारैव रूपजनिकेति न दोषः ।

---

१. तपोरूपकृतिजन्यत्वेन इति भाव्यमिति भाति । ''कालीशरीरगोचरतप-श्चरणादिकृत्या'' इत्यादीनां मकरन्दादिषु तदीयव्याख्यानेषु दर्शनात् ।

न्यायदीपः

हेत्वोर्ध्वंसे गगनपरिमाणादौ च व्यभिचारवारकं विशेषणद्वयं विशेष्यद्वयं चेति व्यक्तमित्युपेत्य पक्षसाध्यगतपदकृत्यानि दूषणोक्तिसौकर्याय तदीय-व्याख्यानाद्युक्तानि व्यनक्ति ।। **अत्रेति** ।। प्रयोग इत्यर्थः । अंशे बाध इत्युक्तं साध्याभावोपपादनेन व्यनक्ति ।। **तस्योपादानाभावादिति** ।। येन तद्गोचरज्ञानादिजन्यत्वं स्यादिति भावः ।। **अंशे सिद्धसाधनमिति** ।। अदृष्टजनकभिन्नोपादानगोचरकुलालादिनिष्ठज्ञानादिजन्यत्वात् स्वजनका-दृष्टोत्तरत्वात् कुलालज्ञानचिकीर्षादेरिति भावः ।

मण्युक्तमेवाह ।। **तन्मत इति** ।। **तदुपरक्तेति** ।। तद्विषयकेत्यर्थः । **पक्षधराद्युक्त**माह ।। **उभयसिद्धेति** ।। न्यायमते जन्यमात्रस्येश्वरकृतिजन्य-तयाऽऽश्रयासिद्धिवारणरूपप्रयोजनवत्त्वं अनीश्वरमते च उद्देश्यसिद्ध्यादि-रूपप्रयोजनवत्त्वमित्युभयसिद्धप्रयोजनवत्त्वमित्यर्थः ।

''एवं च शब्दफूत्कारादीनां पक्षतैव'' इति **मण्युक्तं** हृदि कृत्वाह ।। **तावत्युक्त इति** ।। जन्यकृतीत्यादावेवोक्त इत्यर्थः । फूत्कारो मुख-वायुविशेषः । न स्यादित्युक्तं व्यनक्ति ।। **तस्येति** ।। **तदर्थमिति** ।। शब्दादेः पक्षतासिद्ध्यर्थमित्यर्थः । तां व्यनक्ति ।। **तज्जनकेति** ।। मृदङ्गः शब्दस्य निमित्तं ताल्वादि च फूत्कारादेः ।

पक्षधराद्युक्तमाह ।। **कालीति** ।। काली नाम काचित्तपस्विनी तपसा स्वशरीरे गौरं रूपमुत्पादितवतीति तद्रूपादेरित्यर्थः ।। **तस्येति** ।। काली-शरीरोत्पन्नगौररूपस्येत्यर्थः ।। **सन्दिग्धेति** ।। प्राचीनमतेनेदं दूषणं बोध्यम् । **मणि**कृन्मते उक्तरूपसन्दिग्धानैकान्त्यं न दोषायेत्यग्रे व्यक्तत्वात् ।

तर्कताण्डवम्

साध्ये यद्यपि ज्ञानचिकीर्षाकृतीनां मध्ये एकैकोक्तावपीश्वर-सिद्धिः । तथापि यावदभिमतविशेषगुणवत्त्वसिद्ध्यर्थं त्रितयोक्तिः । साध्यविशेषणानामुद्देश्यसिद्धिप्रयोजनकत्वात् ।

अपरोक्षपदं तूपादानज्ञानस्यापरोक्षत्वेनैव हेतुत्वाद् व्यापकता-सिद्ध्यर्थम् । साक्षात्कारपदं तु नोपात्तम् । प्राभाकरं प्रति साक्षात्त्व-जातेरसिद्धेः । अपरोक्षपदेन तु परोक्षान्यज्ञानस्य विवक्षितत्वाददोषः । उपादानगोचरपदं तु भाष्यकाराद्युक्तध्वंसव्यावृत्तसकर्तृकत्वसिद्ध्यर्थम् । तावत्युक्ते सिद्धसाधनम् । अङ्कुरादेरपि स्वजनकादृष्टजनकयत्किञ्चि-दुपादानभूतहविरादिगोचरज्ञानादिमदस्मदादिजन्यत्वात् । तदर्थमदृष्ट-त्यादिभिन्नान्तं ज्ञानादिविशेषणम् । एवं च न सिद्धसाधनम् । कारणप्रागभावस्य कार्यप्रागभावं प्रति व्याप्यत्वेनास्मदादिनिष्ठादृष्ट-जनकज्ञानादिप्रागभावस्य स्वजन्यादृष्टप्रागभावं प्रति व्याप्यत्वेन तद्भिन्नत्वाभावात् ।

नचैवं कपालादिरूपोपादानगोचरमदृष्टप्रागभावव्याप्यप्रागभाव-प्रतियोगिभिन्नं च यज्ज्ञानादि तद्वताऽस्मदादिनार्थान्तरम् । ज्ञानेच्छा-कृतीनां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वेन कपालादिगोचर-ज्ञानादेः क्षित्याद्यजनकत्वेन बाधात् ।

अत्र यद्यप्यदृष्टजनकभिन्नेत्युक्तेऽप्यस्मदादिभिर्न सिद्धसाधनम् । तथापीश्वरज्ञानादेरप्यदृष्टजनकत्वाद्बाधः । स मा भूदिति वक्रोक्तिः । एवं च न बाधः । ईश्वरज्ञानादेरनादित्वेन प्रागभावप्रतियोगि-त्वस्यैवाभावेन तत्प्रतियोगिभिन्नत्वात् । तावत्युक्ते दृष्टान्तस्य साध्य-वैकल्यम् । कुलालनिष्ठस्य घटजनकज्ञानादिप्रागभावस्य तन्निष्ठ-

विहितादिक्रियान्तरोत्पत्स्यमानादृष्टप्रागभावं प्रति व्याप्यत्वात् । तदर्थं स्वजन्यत्वेनादृष्टं विशेषितम् । एवं च न साध्यवैकल्यम् । उत्पत्स्यमानादृष्टस्य घटोपादानादिविषयकज्ञानादिजन्यत्वाभावात् । द्वितीयसाध्ये अस्मदादिभिः सिद्धसाधनवारणाय स्वजनकादृष्टोत्तरेति । तृतीये च विषयीभवदिति विशेषणम् ।

न्यायदीपः

।। **यावदिति** ।। यावन्तोऽभिमता विशेषगुणास्तद्वत्त्वसिद्ध्यर्थमित्यर्थः ।। **व्यापकतेति** ।। गगनपरमाण्वादिज्ञानस्य शब्दादिकं प्रत्युपादानत्वेपि चिकीर्षाकृतिद्वारा शब्दाद्यहेतुत्वाद् भावकार्यत्वादिरूपहेतुव्यापकत्वसिद्ध्यर्थमपरोक्षपदोपादानमित्यर्थः ।

पक्षधरोक्तमाह ।। **सक्षात्कारेति** ।। **असिद्धेरिति** ।। गुणगतजातेरनङ्गीकारात् । इन्द्रियजन्यज्ञानपरत्वं तु न शङ्कार्हम् । बाधापातादिति भावः ।। **भाष्येति** ।। गौतमसूत्रभाष्यकारतट्टीकाकारोक्तेरित्यर्थः ।। **अङ्कुरादेरिति** ।। सर्वस्यापि जीवोपभोग्यतया तत्तददृष्टार्जितत्वेन यदङ्कुरादिकं यज्जीवादृष्टजन्यं तददृष्टं तावद्यज्ञादिसत्कर्मजन्यम् । तादृशादृष्टजनकं स्वगतरूपाद्युपादानभूतहविरादिगोचरं यज्ज्ञानादि तद्वदस्मदादिजीवजन्यत्वादित्यर्थः ।। **तदर्थमिति** ।। सिद्धसाधनतानिवृत्त्यर्थमित्यर्थः ।। **व्याप्यत्वेनेति** ।। यदा ज्ञानादिप्रागभावस्तदा तज्जन्यादृष्टप्रागभाव इति सम्भवादिति भावः ।। **वक्रोक्तिरिति** ।। अदृष्टजनकभिन्नेत्यर्थ एवादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगिभिन्नेत्युक्तिरित्यर्थः ।। **ज्ञानादीति** ।। घटाद्युपादानकपालादिगोचरज्ञानादीत्यर्थः ।। **तन्निष्ठेति** ।। कुलालनिष्ठेत्यर्थः ।। **विहितादीति** ।। निषिद्धाकरणमादिपदार्थः ।। **क्रियान्तरेति** ।। कपालादिक्रियातोऽन्यक्रियेत्यर्थः ।

।। **स्वजन्यत्वेनादृष्टं विशेषितमिति** ।। यद्यपि **पक्षधरा**दावदृष्टपदं स्वजनकादृष्टपरं स्वपदं च समभिव्याहृतपक्षदृष्टान्तरूपकार्यपरमित्युक्तं तथापि तस्मिन्पक्षे स्वपदार्थः क्वचित्पक्षः क्वचिद्दृष्टान्त इत्यननुगमः । न चात्र ग्रन्थकृदभिमतसामान्यव्याप्तावननुगमो न दोषायेति **रुचिदत्तो**क्तं युक्तम् । यत्तद्भ्यां सामान्यव्याप्तिर्नानुमानाङ्गमित्यर्थापत्तौ ग्रन्थकृतैव निरासात् । तथा कुलालकृतेर्घटजनकादृष्टसमानजातीयागाम्यदृष्टप्रागभावव्याप्यप्रागभावप्रतियोगित्वेनोक्तदोषतादवस्थ्यात् । तदर्थं **ठक्कुरो**क्तदिशा जनकत्वं फलोपधानरूपं विवक्षणीयमिति क्लेश इत्युत्तरसाध्यासाङ्कर्याय च स्वजन्येत्येव विवक्षणीयमिति भावः ।। **सिद्धसाधनेति** ।। तत्र स्वपदस्य समभिव्याहृतपक्षदृष्टान्तपरत्वात् अस्मदादिजीवकृतेः क्षित्यादिजनकत्वेऽप्यदृष्टद्वारैव न साक्षादिति क्षित्यादिजनकादृष्टपूर्वभावितया तदुत्तरभावित्वाभावान्न सिद्धसाधनमिति । **ठक्कुरादौ** तु कालीरूपादावंशतः सिद्धसाधनवारणाय स्वजनकादृष्टोत्तरेति विशेषणमित्युक्तम् ।। **तृतीये चेति** ।। सिद्धसाधनवारणायेत्यनुषङ्गः ।। **इति विशेषणमिति** ।। तस्य ज्ञानादिविषयोपादानसमवेतानीत्यर्थत्वेन क्षित्यादेरस्मदादिज्ञानादिविषयसमवेतत्वाभावादिति भावः ।

तर्कताण्डवम्

अत्र च भाष्यादौ सकर्तृकत्वनिरुक्तावुपादानपदप्रक्षेपाद् ध्वंसव्यावृत्तसकर्तृकत्वसिद्ध्यर्थं पक्षसाध्यहेतुषु समवेतोपादानभावपदानि प्रयुक्तानि ।

यदा तु ध्वंससाधारणसकर्तृकत्वमात्रेणेश्वरसिद्धेस्तन्मात्रं सिषाधयिषितं तदा पक्षादौ समवेतादिपदान्यनपेक्षितान्येव । अस्मिंश्च पक्षे अस्मदादिनिष्ठघटादिजनककृतिध्वंसस्य निरुक्तरूपकृतिजन्यत्वेन तद्भिन्नत्वाभावात्तस्य पक्षता न स्यात् । तदर्थं कृतिपदस्थाने सविषयत्रितयेति वाच्यम् ।

एवं च कृतिध्वंसस्य प्रतियोगिभूतया कृत्या विरोधिगुणभूते-नोत्तरज्ञानेन च जन्यत्वेपि चिकीर्षाजन्यत्वाभावात् । चिकीर्षाध्वंसस्य चोक्तरीत्या चिकीर्षाकृतिजन्यत्वेपि ज्ञानजन्यत्वाभावात्तयोरपि पक्षतासिद्धिः ।

न्यायदीपः

प्रागुक्तप्रयोगे ध्वंसस्य सकर्तृकत्वानापत्त्या सकलजगन्निर्मातृकर्तृसिद्धिर्न स्यादित्यतो यद्वेत्यादिना **मणा**वुक्तं पक्षान्तरं तत्पूर्वोक्तपक्षतात्पर्य-विवरणपूर्वमनुवदति ।। **अत्र चेत्यादिना** ।। **मात्रेणेति** ।। उपादानादि-घटितत्वेन विनेति मात्रपदार्थः ।। **पक्षादाविति** ।। पक्षसाध्यहेतुषु समवेतोपादानभावपदान्यनपेक्षितानीत्यर्थः । नन्वदृष्टाद्वारकजन्यकृतिजन्य-भिन्नानि जन्यानीत्येव पक्षनिर्देशे सति घटजनककृतिध्वंसस्य पक्षता न स्यादित्यतो ''जन्येच्छाकृतिजन्यत्वं च पक्षे विवक्षितम्'' इत्युक्तं **मणौ पक्षधरे** च ''अत्र ज्ञानेच्छाकृत्यजन्यत्वं च पक्षे विवक्षणीयम्'' इत्युक्त्वा कृतिध्वंसादेः पक्षत्वमुपपादितम् । तदाह ।। **अस्मिंश्चेति** ।। **सविषय-केति** ।। अदृष्टाद्वारकसविषयकत्रितयजन्यभिन्नानि जन्यानीति वाच्यमित्यर्थः ।। **विरोधीति** ।। उत्तरात्मविशेषगुणानां पूर्वपूर्वनिवर्तकत्वादिति भावः । चिकीर्षाध्वंसस्य पक्षता न स्यात् प्रतियोगितया चिकीर्षाजन्यत्वात् । विरोधिगुणभूतयोत्तरकृत्या जन्यत्वादित्यत आह ।। **चिकीर्षेति** ।। **ज्ञानेति** ।। तस्य चिकीर्षातः पूर्वभावितया तज्जनकत्वेन तद्ध्वंसाजन-कत्वादिति भावः ।। **तयोरपीति** ।। कृतिचिकीर्षाध्वंसयोरपीत्यर्थः ।

तर्कताण्डवम्

यद्वा क्षितिरेव पक्षः । नन्वेवं पक्षादन्यत्राङ्कुरे सन्दिग्धा-

नैकान्त्यम् । नच निश्चितसाध्याभाववति साधनसन्देह एव दोषो न तु सन्दिग्धसाध्ये साधननिश्चयोपीति वाच्यम् । हेतौ साध्याभाववद्वामित्वसन्देहस्य दूषकताबीजस्योभयत्रापि सत्त्वात् । नचैवंविधस्य सन्देहस्य पक्षेऽपि सत्त्वादनुमानमात्रोच्छेदः । तदर्थमेव पक्षादन्यत्रेति विशेषितत्वादिति चेन्न ।

पक्षादित्यत्र पक्षशब्देन प्रयोगविषयविवक्षायां स्वार्थानुमानोच्छेदात् । पक्षलक्षणवद्विवक्षायां चाङ्कुरस्यापि पक्षत्वात् । अत एव तत्र पक्षसमव्यवहारः । अङ्कुरस्यानुपादानं तु क्षितिमात्रोपादानेऽपीष्टसिद्धेः ।

न्यायदीपः

नन्वेवमपि न सर्वध्वंसस्य पक्षता । चरमघटसुखादिध्वंसस्य पक्षबहिर्भावावश्यम्भावात् । अन्यथा तस्य भोगतत्साधनेतरतया अदृष्टाजन्यत्वेन स्वजनकादृष्टाप्रसिद्ध्योक्तरूपसाध्यासम्भवेन तदंशे बाधापत्तेः । उक्तदिशा अन्योन्याभावस्य पक्षतावच्छेदकतया तस्य तन्मतेऽप्रसिद्ध्या आश्रयासिद्धेश्चेति **पक्षधरोक्तारुच्या मणौ** ''क्षितिरेव वा पक्ष'' इत्यादिना पक्षान्तरमुत्त्वोपपादितं तदाह ।। **यद्वेति** ।। **पक्ष इति** ।। प्रतिज्ञाविषय इत्यर्थः । सन्देहादिरूपपक्षताया अन्यत्रापि भावात् ।

क्षितेरेव पक्षत्वे **मण्युक्त**बाधकशङ्कां तदुत्तरं च निष्कृष्याह ।। **नन्वित्यादिनेष्टसिद्धेरित्यन्तेन** ।। अनुमानमात्रोच्छेदभयात्पक्षादन्यत्रेत्युक्तम् । पक्षस्वरूपमग्रे विकल्पयिष्यते ।। **पक्षलक्षणवदिति** ।। सिषाधयिषाविरहसहकृतसाधकबाधकमानाभावादिरूपपक्षलक्षणवदित्यर्थः ।। **अत एव** ।। पक्षलक्षणसत्त्वादेव । प्रतिज्ञाविषयत्वाभावात्समपदप्रयोग इति भावः

।। **इष्टसिद्धेरिति** ।। तावतैवेश्वरसिद्धेः इति वा घटादौ निश्चितव्याप्तिकस्य लिङ्गस्य पक्षपक्षसमयोर्दर्शनेनोभयत्राप्यनुमित्युत्पत्तेरिति वाऽर्थः ।

तर्कताण्डवम्

नन्वेवं सन्दिग्धोपाध्याहितः पक्ष एव व्यभिचारसन्देहोऽपि न दोषः स्यात् । नच तत्रानुकूलतर्काभावाद्व्याप्त्यनिश्चयः । अत्र तु कार्यत्व-रूपहेतूच्छित्तेरेव बाधकत्वात्तन्निश्चय इति वैषम्यमिति वाच्यम् । पक्षे व्यभिचारसन्देहस्य दूषकत्वे तर्कस्यापि पक्षे व्यभिचारसन्देहेन प्रशिथिलमूलत्वापातादिति चेन्न ।

विप्रतिपत्त्यादिजन्यस्य पक्षताप्रयोजकस्य संशयस्यानुमित्यनुकूल-त्वेनादोषत्वेऽप्युपाध्याहितस्य तस्य अतथात्वेन दोषत्वात् ।

नन्विदमप्रयोजकं नित्यायाः सर्वविषयायाश्च ईश्वरकृतेरिदानीं सन्दिग्धत्वेन कृतिसामान्यस्य देशतः कालतो वा व्यतिरेकानिश्चयेन कार्यसामान्यं प्रति कारणत्वाग्रहात् । वह्निधूमसामान्ययोस्तु ह्रदादौ व्यतिरेकनिश्चयोऽस्तीति चेन्न ।

घटकुलालकृतिरूपविशेषयोरेव व्यतिरेकस्य कारणत्वस्य वा ग्रहणेनाबाधे सामान्ययोरपि हेतुत्वसिद्धेः । कथमन्यथा आकाशादेः समवायिकारणस्य नित्यत्वाद्विभुत्वाच्च समवायिकारणसामान्य-व्यतिरेकानिश्चयात् शब्दादिसमवायिकारणत्वेनाकाशादिसिद्धिः ।

नन्वेवमपि दृष्टान्तः साध्यविकलः, कुलालादिकृतेरेव अन्वय-व्यतिरेकाभ्यां कारणत्वग्रहेण मानाभावेन कुलालस्य अहेतुत्वादिति चेन्न । प्रयत्नवदात्मसंयोगस्य चेष्टाद्वारा घटहेतुतया तद्विशेषणतया प्रयत्नस्येवात्मनोऽपि हेतुत्वात् ।

न्यायदीपः

सन्दिग्धसाध्यवति हेतुनिश्चयो न दोष इत्यत्र बाधकं वक्ष्यमाणदूषण-दाढर्ढ्याय स्वयमाशङ्क्य च हेत्वाभासादिग्रन्थे **मण्याद्युक्तसमाधिमाह ।। नन्वित्यादिना अदोषत्वादित्यन्तेन ।। सन्दिग्धेति ।।** स श्यामो मित्रातनयत्वादित्यष्टमगर्भस्थविषयप्रयोगे शाकपाकजत्वोपाधेः पक्षाद्व्यावृत्ति-सन्देहेन आहितसाध्यसन्देहमूलो व्यभिचारसंशयोऽपीत्यर्थः । तत्र तस्या-दोषत्वे व्याप्तिनिश्चयः स्यादिति भावः । तत्र व्याप्त्यनिश्चयोऽन्यनिमित्तक इत्याशङ्क्याह ।। **नचेति ।। तर्कस्यापीति ।।** साध्याभावे हेतुर्न स्यादित्येवंरूपतर्कस्यापि आपाद्यापादकयोर्व्याप्तिसन्देहेनेत्यर्थः ।। **विप्रति-पत्त्यादीति ।।** साधारणधर्मादिरादिपदार्थः ।। **अतथात्वेनेति ।।** अनुमित्यननुकूलत्वेनेत्यर्थः ।

''अथ कृतिकार्ययोः नान्वयव्यतिरेकाभ्यां व्याप्तिग्रहः'' इत्यादिना **मण्युक्त**मेव दूष्यांशं शङ्कापूर्वमनुवदति ।। **नन्विदमित्यादिना ।।** भावकार्यत्वादिरूपानुमानमित्यर्थः ।। **इदानीमिति ।।** अनुमानात्प्रागित्यर्थः । ईश्वरकृतिव्यतिरेकस्य न्यायमतेऽप्यभावेन प्राधान्याद्व्यतिरेकमात्र एवाक्षेप-समाधियुक्तिरिति ज्ञेयम् । अन्वयाक्षेपस्य अप्युपलक्षणं वा । एवं ह्यनुमानमात्रोच्छेद इत्यत आह ।। **वह्नीति ।। घटेति ।।** घटरूपकुलाल-कृतिरूपविशेषयोरित्यर्थः ।। **कारणत्वस्येति ।।** कार्यकारणभावस्येत्यर्थः । प्रमाणवाक्यत्वेन वक्तृवाक्यार्थप्रमात्वेन कार्यत्वादिकल्पनेऽपि वाक्यसामान्य-वक्तृज्ञानसामान्ययोस्तदभावादबाध इत्युक्तम् ।। **आकाशादिसिद्धिरिति ।।** तत्र घटकपालादिरूपविशेषयोरेव व्यतिरेकादिग्रहणेनेत्युक्तरीतेरेवानु-सर्तव्यत्वादिति भावः ।। **अहेतुत्वादिति ।।** तथाच कृतिमज्जन्यत्व-रूपसाध्यं तत्र नेत्यर्थः ।।

मानाभावेनेत्यसिद्धम् । कुलालो घटहेतुः तद्धेतुसंयोगावच्छेदकत्वात् कपालवत् घटहेत्वात्मसंयोगवदेकप्रयत्नवद्धेति मानभावादिति भावेनाह ।। **प्रयत्नेति** ।। प्रयत्नस्येवेत्युपलक्षणम् । असमवायिकारणसंयोगाश्रय-कपालादेरिवेत्यपि ध्येयम् ।

तर्कताण्डवम्

संयोगस्य हेतुत्वे मानं तु, चेष्टा प्रयत्नवदात्मसंयोगा-समवायिकारणिका स्वव्यधिकरणतदीयगुणव्यतिरेकप्रयुक्तव्यतिरेक-प्रतियोगित्वात् । यत्स्वव्यधिकरणयदीयगुणव्यतिरेकप्रयुक्त-व्यतिरेकप्रतियोगि तत्तदीयसंयोगासमवायिकारणकम् । यथा स्पर्श-वद्वेगवत्पवनाभिघातकारणिका पर्णादिक्रिया पवनसंयोगासमवायि-कारणिकेत्यनुमानम् ।

गुरुत्वव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगिनि गुरुत्वसमानाधिकरणे पतने गुरुत्ववद् द्रव्यसंयोगासमवायिकारणकत्वरहिते व्यभिचार-निरासाय हेतौ स्वव्यधिकरणेत्युक्तम् । अन्यथा चेष्टैव नोत्पद्येत । असमवायिकारणाभावात् । कारणप्रत्यासत्त्यभावेन प्रयत्नस्य हेतु-त्वानुपपत्तेश्च ।

नचैवमप्यात्मा हेतुभूतसंयोगावच्छेदक एव न हेतुरिति वाच्यम् । घटकारणीभूतसंयोगाश्रयस्य कपालस्य घटकारणत्वदर्शनात् ।

न्यायदीपः

नन्वात्मसंयोगे सति प्रयत्नं विना न चेष्टेति प्रयत्न एव हेतुर्न तु प्रयत्न-वदात्मसंयोग इत्यत आह ।। **संयोगस्येति** ।। प्रयत्नवदात्मसंयोगस्य

घटहेत्वङ्गचेष्टाहेतुत्वे मानं त्वनुमानमित्यग्रेतनेनान्वयः ।। **चेष्टेति** ।। शरीरस्पन्द इत्यर्थः ।। **प्रयत्नेति** ।। प्रयत्नवत आत्मनः शरीरस्य च यः संयोगः तदसमवायिकारणिकेत्यर्थः । अभिघातकसंयोगेनार्थान्तरनिरासा-योगेनार्थान्तरनिरासाय प्रयत्नवदित्यादिविशेषणम् । हेतौ स्वेति परिस्पन्दः । स्वव्यधिकरणः स्वाधिकरणभिन्नाधिकरणकः तदीयः आत्मीयो गुणः प्रयत्नः तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वादित्यर्थः । कपालरूपजन्यघटरूपे व्यभिचारनिरासाय तदीयेत्युक्तिः । आत्मीयेत्यर्थः ।

यद्वोक्तप्रतियोगिक्रियात्वादिति हेतुर्द्रष्टव्यः । अतो न व्यभिचारः । हेतोरेवाभावात् । एवं च तदीयेति तच्छब्दस्य समभिव्याहृतपरत्वेऽपि न दोषः । स्वव्यधिकरणपदकृत्यमग्रे व्यक्तम् ।

यद्यपि **मणौ** ''या क्रिया व्यधिकरणयदीयगुणजन्या'' इत्यादिव्याप्युक्त्या गुणजन्यत्वादिति हेतुर्वाच्या व्याप्तिश्च तथैव प्रदर्शनीया । तथापि क्रियाया ईश्वरगुणजन्यत्वेऽपि नेश्वसंयोगासमवायिकारणत्वमिति व्यभिचारनिरासाय तट्टीकार्थानुवादो गुणव्यतिरेकप्रयुक्तेत्यादिः ।।

।। **यदिति** ।। यत् परिस्पन्दाख्यं कर्मेत्यर्थः । **मणावपि** या क्रियेत्येवोक्तेः । अन्यथा कपालरूपजन्यघटरूपे व्यभिचारापत्तेः ।। **यथेति** ।। यथा पर्णादिक्रियेत्यन्वयः । तत्र हेतुसत्त्वव्यक्त्यर्थं स्पर्शवदिति । पर्णादिक्रिया स्वव्यधिकरणवायवीयवेगरूपगुणव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगिनीत्यर्थः ।। **पतन इति** ।। आम्रफलादिपतन इत्यर्थः । स्वव्यधिकरणयदीय-व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगीत्येतावत्युक्ते आम्रादिवृक्षपतनक्रियायां व्यभिचारः । तस्यां स्वव्यधिकरणो य आम्रादिवृक्षः स्वारम्भकावयव-सम्बन्धित्वादवयवीयश्च तद्व्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वेऽपि आम्रावयवसंयोगासमवायिकारणकत्वाभावात् अतो यदीयगुणेत्युक्तम् । विपक्षे

बाधकरूपं हेतोरनुकूलतर्कमाह ।। **अन्यथेति** ।। उक्तसाध्याभाव इत्यर्थः ।। **कारणेति** ।। अन्यथेत्यनुषङ्गः । कारणीभूतप्रत्यासत्तीत्यर्थः । अप्रत्यासन्नस्य हेतुत्वेऽतिप्रसङ्ग इति भावः । ''असमवायिकारणसंयोगाश्रयस्य तत्कार्यजनकत्वनियमाच्च'' इति **मण्युक्तमेवोदाहरणनिष्ठतया व्यनक्ति** ।। **घटकारणेति** ।।[1]

तर्कताण्डवम्

ननु घटादौ ज्ञानस्य कृतिद्वारैव हेतुत्वात्कृतिं च प्रतीष्टसाधनत्वानुमितेरेव हेतुत्वात्साक्षात्कारस्याहेतुत्वेन साध्यवैकल्यमिति चेन्न । कृतिर्हि सिद्धवृत्तिरसिद्धविषयिणी । तत्र साध्यांशे घटादाविष्टसाधनत्वानुमितिसत्त्वेऽपि सिद्धांशस्य कपालादेः साक्षात्कारव्यतिरेकेण कृतिव्यतिरेकदर्शनेनोपादानसाक्षात्कारस्यापि हेतुत्वात् ।।

न च मनःक्रियाहेतुमनोविषयककृतौ व्यभिचारः समानाधिकरणस्य सिद्धमनोविषयक साक्षात्कारादेरभावादिति वाच्यम् । त्वगिन्द्रियगृहीतमनोवहननाडीगोचरकृत्या नाड्यां क्रियोत्पत्तौ वेगवन्नाड्या संयोगविशेषरूपनोदनेन मनसि क्रियोत्पत्तेः । यद्यप्युपादानमात्रं सिद्धम् । तथाऽप्युपादेयवत्त्वेन साध्यत्वात्तत्र चिकीर्षा युक्ता ।।

नच घटे सिद्धविषयकसाक्षात्कारजन्यत्ववदसिद्धविषयकपरोक्षज्ञानजन्यत्वस्यापि दर्शनादीश्वरस्य नित्यप्रत्यक्षवन्नित्यानुमितिः स्यादिति वाच्यम् । सिद्धपरमाण्वादिविषयकपरोक्षज्ञाने सत्यप्यपरोक्षत्वव्यतिरेकेण कृतिव्यतिरेकस्येव साध्यांशज्ञाने सत्यपि परोक्षत्वव्यतिरेकेण कृतिव्यतिरेकस्यादर्शनात् ।

---

१. ''घटकारणीभूतेति'' इति भवेत् । ''घटकारणसंयोगाश्रयस्य'' इति वा मूलं स्यात् ।

न्यायदीपः

''अथ घटें कृतिसाध्येष्टसाधनताज्ञानं चिकीर्षाद्वारा हेतुः । तच्च न प्रत्यक्षम्'' इत्यादिना **मण्युक्तावेव** प्रकारान्तरेण साध्यवैकल्यतत्समाधी निष्कृष्यानुवदति ।। **नन्वित्यादिना** ।। **साध्येति** ।। उपादानगोचरापरोक्ष-ज्ञानचिकीर्षाकृतिमज्जन्यत्वादिरूपसाध्येत्यर्थः ।। **व्यभिचार इति** ।। यन्निष्ठा या कृतिः सा तद्गोचरापरोक्षपूर्विकेत्यस्य व्यभिचार इत्यर्थः । तमेव व्यनक्ति ।। **समानाधिकरणस्येति** ।। साक्षात्कारादेरित्यादिपदेन चिकीर्षा-ग्रहः । मनसोऽतीन्द्रियत्वादिति भावः ।। **मनोवहनेति** ।। मनस आधार-भूतेत्यर्थः ।। **मनसि क्रियोत्पत्तेरिति** ।। तथा च यत्र कृतिर्नाड्यां तत्रास्त्यपरोक्षादिपूर्वकत्वम् । यत्र मनसि नास्त्यपरोक्षज्ञानं तत्र न कृतिरिति न व्यभिचार इति भावः ।

नन्वेवमपि सिद्धे करणेच्छाभावेनोपादने चिकीर्षायोगात्पुनः साध्यवैकल्य-मित्याशङ्कामनूद्य निराह ।। **यद्यपीति** ।। एवमप्रयोजकत्वसाध्यवैकल्ये निरस्य ''नन्वेवं घटादावनुमितिजन्यत्वदर्शनादीश्वरे अनुमितिरपि स्यात्'' इत्यादिना **मण्युक्त**तर्कपराहतिशङ्कोत्तरे अनुवदति ।। **नचेत्यादिना** ।। ईश्वरे जन्यज्ञानाभावाल्लिङ्गजन्यज्ञानं कथं स्यादित्यत आह ।। **नित्येति** ।। प्रत्यक्षस्येन्द्रियजन्यत्वेपि नित्यप्रत्यक्षवदनुमितेर्लिङ्गजन्यत्वेपि नित्यानुमितिः स्यादित्यर्थः । अनुमितेरनित्यत्वे तदविनाभूतशरीरेन्द्रियापाताच्च भावः ।। **अपरोक्षत्वेपि** ।। तस्मिन् ज्ञान इत्यर्थः ।। **कृतीति** ।। परमाणुगोचर-कृतीत्यर्थः ।। **साध्यांशेति** ।। घटपटादिरूपसाध्यांशस्येष्टसाधनत्वेनानु-मितिरूपपरोक्षज्ञाने सति तद्विषयककपालादिनिष्ठकृतेर्दर्शनवत् साध्यांशस्येष्ट-साधनत्वेनापरोक्षज्ञाने सति साध्यविषयिण्यास्तद्धेतुनिष्ठायाः कृतेर्व्यतिरेकस्य काप्यदर्शनेन साध्यांशस्येष्टसाधनत्वे[१] ज्ञानत्वमेव तद्धेतुनिष्ठकृतौ प्रयोजकम्

१. इष्टसाधनत्वेन ज्ञाने इति वाक्येन भाव्यमिति भाति । इष्टसाधनत्वज्ञाने इति वा ।

लाघवात् न तु तत्र साध्यांशस्येष्टसाधनत्वज्ञाने परोक्षत्वमपि । गौरवात् । एवं चेश्वरस्यापि क्षित्यादिरूपसाध्यांशस्य स्वेष्टसाधनताज्ञानमपरोक्षरूपमस्तीति तद्धेतूपादानपरमाण्वादिकृतिर्युक्तेति न नित्यानुमित्यापत्तिदोष इति भावः ।

तर्कताण्डवम्

ननु द्वेषयोनिकृतिसाध्ये चिकीर्षाभावाद्व्यभिचारः । नच तत्रापि भगवतश्चिकीर्षा हेतुत्वेन कल्प्या । एवं हि द्वेषयोनिकृतिसाध्यदृष्टान्तेन क्षित्यादेरपि द्वेषवज्जन्यत्वापातेन नित्यद्वेषापत्तेरिति चेन्न । तत्रापि द्वेष्याभावस्यैवेष्टत्वेन तत्साधनत्वेन ज्ञाने चिकीर्षाया एव सम्भवेन भिन्नविषयकद्वेषस्याहेतुत्वात् ।

नचैवं [1]प्रवृत्तियत्नातिरिक्तस्य क्रियाव्यतिरेकानुगुणस्य द्वेषप्रयोज्यस्य निवृत्तियत्नस्याभावाद् द्वेषे मानाभावः । द्वेष्मीत्यबाधितानुभावात् ।

न्यायदीपः

एवं कृतेरपरोक्षज्ञानपूर्वकत्वे व्यभिचारमुद्धृत्य तत्प्रसङ्गागतमतिप्रसङ्गं च निरस्येदानीं कृतेश्चिकीर्षापूर्वकत्वे व्यभिचारचोद्योत्तरे **मण्युक्तमेवाह** ।। **ननु द्वेषेति** ।। द्वेषकारणकदुःखनिवृत्त्यनुकूलकृतिसाध्ये दुःखाभावादावित्यर्थः । तत्रेश्वरीयचिकीर्षाकल्पनेन व्यभिचाराभावेऽप्यनिष्टप्रसङ्गस्तु स्यादित्याह ।। **एवं हीति** ।। तत्र द्वेषयोनित्वमेव कृतेर्नास्ति येन तद्दृष्टान्तेन क्षित्यादावपि द्वेषवज्जन्यत्वं स्यादित्याह ।। **तत्रापीति** ।। दुःखाभावसाधनेपि **तत्साधनत्वेन** द्वेष्याभावसाधनत्वेन ज्ञाने सति साधनगोचरचिकीर्षाया एव सम्भवेनेत्यर्थः ।। **भिन्नेति** ।। शत्रुविषयकद्वेषस्य तद्वधसाधनगोचरकृतेश्च भिन्नविषयत्वेन द्वेष्याभावसाधनकृतौ शत्रुविषयकद्वेषस्याहेतुत्वादित्यर्थः ।।

१. प्रवृत्तियत्नव्यतिरेकातिरिक्तस्य इति भाव्यमिति भाति ।

यदि द्वेषो न कृतिहेतुस्तर्हि द्वेषोऽलीक एव भवेदित्याशङ्क्य प्रत्यक्षेण सिद्धिमाह ।। **न चैवमिति** ।। एवं द्वेषस्य प्रवृत्तिरूपसाधनगोचर-कृतावहेतुत्वे द्वेषविषये मानाभाव इत्यन्वयः । दुःखसाधनादौ निवृत्तिरूपप्रयत्नं प्रति भिन्नविषयस्यापि द्वेषस्यैव हेतुत्वात् द्वेषे निवृत्तिरूपकार्यमेव मान-मित्यत उक्तम् ।। **प्रवृत्तीति** ।। प्रवृत्तिरूपप्रयत्नेत्यर्थः ।। **क्रियेति** ।। अङ्गचेष्टादिरूपकार्येत्यर्थः ।। **अभावादिति** ।। दुःखादिकार्याभावानुकूलस्य दुःखगोचरद्वेषजन्यस्य निवृत्तिरूपप्रयत्नस्य अभावादित्यर्थः । प्रवृत्तिरूपो निवृत्तिरूपश्चेति यत्नद्वैविध्यं यदि स्यात्तदा प्रवृत्तिप्रयत्नश्चिकीर्षाद्वारेष्ट-साधनताज्ञानसाध्यः । निवृत्तियत्नस्तु द्वेषसाध्य इति द्वेषः प्रामाणिकः स्यात् । न चैवम् । प्रवृत्तिरूपप्रयत्नाभावस्यैव निवृत्तित्वात् ।।

न च निवृत्तिरूपयत्नाभाव एव प्रवृत्तिरिति वैपरीत्यं शङ्क्यम् । सुषुप्ति-दशायां निवृत्तिविरहसत्त्वेन प्रवृत्तिसाध्यचेष्टादिकार्याद्यापत्तेः ।। न च तदा निवृत्तिविरह एव नेति युक्तम् । तदा दुःखसाधनत्वज्ञानविरहेण तन्निमित्त-द्वेषस्य निवृत्तिहेतोरभावेन निवृत्तेरभावात् ।। न चैवं प्रवृत्तियत्नो रागान्नि-वृत्तिस्तु द्वेषादिति **कुसुमाञ्जल्युक्ति**विरोधः । तन्मते तथात्वेऽपि **मणि-कृन्मते** तदभावात् । अन्यथा ''कुतस्तर्हि द्वेषः । शत्रून् द्वेष्मीत्यबाधित-प्रत्यक्षा''दिति **मण्युक्ति**विरोधात् ।।

एतेन यत्तु **कुसुमाञ्जलि**वाक्यानुरोधेन कुत इत्यादि**मणि**वाक्यस्य **पक्षधरीयं** क्लेशेनार्थवर्णनं तत्तु मणिकृदभिप्रायाज्ञानमूलमिति विभावितं ध्येयम् ।।

तर्कताण्डवम्

ननु तथापि घटादौ चेष्टाव्यापारककृतेरेव हेतुत्वावधारणात् क्षित्यादौ च चेष्टाया योग्यानुपलब्धिबाधितत्वात् कृतेरहेतुत्वम् ।

नचैकस्मिन् घटे पितापुत्रयोरिव चेष्टाकृत्योः स्वातन्त्र्येण हेतुता । घटानुकूलचेष्टाश्रयसन्निहितस्य तदनुकूलकृतिमतो निगडनिश्चलदेहत्वेन चेष्टारहितस्यापि पुंसस्तद्धेतुत्वापत्तेरिति चेन्मैवम् ।

चेष्टाव्यापारककृतित्वेन कारणता न तावत्कार्यमात्रे क्षित्यादौ, व्यभिचारेण त्वयापि तथानभ्युपगमात् ।

नापि कृतिजन्यत्वावच्छिन्ने । आत्माश्रयेण कृतिजन्यत्वस्य स्वानवच्छेदकत्वात् । घटादौ कार्यविशेषे तथा कारणत्वे च सामान्य-विशेषन्यायेन कार्यसामान्ये कृतित्वेनैव हेतुत्वात् ।

अत एव चेष्टाजन्यत्वशरीरजन्यत्वादिरूपोपाधिरपि न । गौरवेण चेष्टात्वादिना रूपेणाकारणत्वेनोपाधेः अप्रयोजकत्वात् ।

न्यायदीपः

एवं कृतेरपरोक्षज्ञानचिकीर्षापूर्वकत्वं व्यभिचारनिरासेन समर्थ्य ''स्यादेतत् घटादौ कृतिसाध्यता हस्तादिव्यापारद्वारैव न तु साक्षात्'' इत्यादिना **मण्युक्तबाधशङ्कातत्समाधी आह ।। ननु तथापीत्यादिना ।।** अप्रयोजकत्वसाध्यवैकल्यव्यभिचारनित्यानुमितिनित्यद्वेषापत्तिरूपतर्क-पराहत्याख्यदोषाणामभावेऽपीत्यर्थः ।। **चेष्टेति ।।** अङ्गचेष्टेत्यर्थः ।। **अहेतुत्वमिति ।।** तथाच कृतिमज्जन्यत्वं बाधितमिति भावः ।

न चेष्टाकृत्योर्द्वारद्वारिभावापन्नतया घटादौ हेतुता । किन्तु प्रत्येकमेव । न चैवं कृतिचेष्टयोः पौर्वापर्यानुपपत्तिः । पितापुत्रयोः पौर्वापर्येऽप्येकत्र घटे द्वयोः स्वातन्त्र्येण हेतुत्ववदुपपत्तेः । तथा च यथोक्तसाध्ये न बाध इति भावेनाशाङ्क्य निराह ।। **न चेति ।।**

व्यभिचारान्न प्रत्येकं हेतुरित्याह ।। **घटेति** ।। किं कार्यमात्रे कृति-जन्यकार्यमात्रे वा घटादिकार्यविशेषे वेति हृदि विकल्प्याद्यद्वयं निरस्यान्ते त्विष्टसिद्ध्या न बाध इत्याह ।। **चेष्टेत्यादिना** ।। **त्वयापीति** ।। निरीश्वरवादिनापि । न केवलमशरीरेश्वरवादिना मयेत्यर्थः ।। **अवच्छिन्न इति** ।। कार्यमात्र इत्यनुकर्षः ।। **सामान्येति** ।। यद्विशेषयोः कार्यकारण-भावः बाधकाभावे तत्सामान्ययोरपीति न्यायेन घटादिरूपकार्यविशेषत्वेन चेष्टाद्वारककृतित्वेन कार्यकारणभावे व्यभिचाररूपबाधकाभावेन कार्यत्वेन कृतित्वेन कार्यकारणभावकल्पनपक्षेऽपि केवलकृतेरेव हेतुत्वादित्यर्थः ।। **अत एवेति** ।। कृतित्वेन कृतिजन्यत्वस्य न्यायप्राप्तत्वादेवेत्यर्थः । अनित्यज्ञानादिमज्जन्यत्वादिः आदिपदार्थः ।। **नेति** ।। न भवतीत्यर्थः ।। **चेष्टात्वादिनेति** ।। शरीरत्वादिरादिपदार्थः ।

तर्कताण्डवम्

नन्वथापि ज्ञानमनित्यमेव कर्ता शरीर्येवेत्यादिव्याप्तिबाध इति चेन्न । ज्ञानत्वादेरनित्यत्वादिना कार्यकारणभावादेः अभावेन व्याप्तेरेवाभावात् । कार्यकृत्योश्च कार्यकारणभावात् । अन्यथाऽवयवो महानेवेत्यादिव्याप्त्या परमाणुरपि न सिध्येत् ।

अत एवादृष्टाद्वारकानित्यज्ञानाजन्यत्वादिना सत्प्रतिपक्षत्वमपि निरस्तम् । अप्रयोजकत्वात् । अजन्यत्वस्यैव हेतुत्वसम्भवेन व्याप्ति-ग्रहानौपयिकविशेषणान्तरवैयर्थ्याच्च । अत एव शशशृङ्गप्रतिबन्ध्यपि निरस्ता । तत्रानुकूलतर्काभावात् । कर्त्रैक्यं तु लाघवात् ।

नन्वनुमितेर्व्यापकांशे व्यापकतावच्छेदकमात्रप्रकारकत्वादिहापि व्यापकः कर्ता व्यापकतावच्छेदककर्तृत्वेन सिध्येत् । एकत्वेन कथं सेत्स्यतीति चेन्मैवम् । अनुमितिसामग्रीमहिम्ना तथात्वेऽपि लाघव-

तर्कसहकाररूपप्रमाणसामग्रीमहिम्नैक्यस्य प्रकारत्वोपपत्तेः । तच्च क्षित्याद्युपादानगोचरं ज्ञानादिकं लाघवादेकं नित्यं चेति विषय-सङ्कोचकाभावात्कपालघटादिगतरूपगुरुत्वादावीश्वरस्यैव कर्तृत्वेन रूपाद्युपादानभूतकपालादिगोचरत्वावश्यम्भावाच्च सर्वविषयकमेवेति ।

न्यायदीपः

स्यादेतत् कर्ता शरीर्येव ज्ञानमनित्यमेवेत्यादिप्राथमिकव्याप्तिग्रह-प्रत्यक्षविरोधात् इत्यादिनोक्तशङ्कोत्तरे निष्कृष्यानुवदति ।। **नन्वित्यादिना** ।। **अन्यथेति** ।। व्याप्तिप्रयोजककार्यकारणभावस्य साध्येन विना हेतो-रनवस्थितत्वादेरनुकूलतर्कस्याभावेपि व्याप्त्यभ्युपगम इत्यर्थः । द्व्यणुकं स्वन्यूनपरिमाणद्रव्यारब्धं कार्यत्वाद्घटवदित्याद्यनुमानेन परमाणुसिद्धिर्न स्यात् । योऽवयवः स महान् यथा त्र्यणुकादिः । अवयवश्चायं परमाणुरित्यनेन बाधादिति स्यादित्यर्थः ।

नन्वथापि क्षित्यादिकं नोक्तसाध्यवत् अदृष्टाद्वारकानित्यज्ञानाजन्यत्वात् आत्मवदिति सत्प्रतिपक्षत्वम् । असिद्धिनिरासाय हेत्वोरदृष्टाद्वारकेत्याद्युक्ति-रित्यत आह ।। **अत एवेति** ।। तदेव व्यनक्ति ।। **अप्रयोजकत्वादिति** ।।

नन्वेवमयोग्यस्य साधने शशो विषाणवान् पशुत्वाद्गोवदिति शशशृङ्ग-सिद्धिरपि स्यादित्यत आह ।। **अत एवेति** ।। अप्रयोजकत्वादेवेत्यर्थः । तदेव व्यनक्ति ।। **अनुकूलेति** ।।

नन्वेवं कर्तृमात्रसिद्धावपि तदेकत्वं कुतः सिद्धमित्यत आह ।। **कर्त्रैक्यं त्विति** ।। तदेव शङ्कोत्तराभ्यां व्यनक्ति ।। **नन्वित्यादिना** ।। अस्तु कर्त्रैक्यं तद्गतज्ञानादेरेकत्वादिसिद्धिः कथमित्यत आह ।। **तच्चेति** ।। ज्ञानादिकमित्यन्वयः ।

तर्कताण्डवम्

अत्रोच्यते । अनुपलब्धप्राक्कोटिषु भूभूधरादिषु कार्यत्वमेव कुतः । सावयत्वादिति चेत् । सावयवत्वं सांशत्वं चेद् गगनादौ व्यभिचारि गगनादेः परमाणोश्च संयोगित्वेन सांशत्वसिद्धेः । विस्तृतं चैतदन्यत्र ।

न्यायदीपः

एवमनूदितमनुमानं दूषयितुं प्रतिजानीते ।। **अत्रोच्यत इति** ।। ''हेतुविरोधो द्विविधः असिद्धिरव्याप्तिश्चे''ति **भगवत्पादोक्त्या** हेतुदोषयोरसिद्धिव्याप्त्यभावयोर्मध्येऽसिद्धेरेव प्राथम्यात् परैरप्यसिद्धविरुद्धेत्यादिप्राचां निर्देशेनासिद्धेः प्राथम्योपगमाच्च । समवेतत्वे सतीत्यादिनाभिमतकार्यत्वहेतोरसिद्धिं तावत् ''किञ्चानुपलब्धप्राक्कोटिषु कार्यत्वं कुतः सिद्धम्'' इत्यादिना **तत्त्वनिर्णयटीकोक्तां** प्रपञ्चयति ।। **अनुपलब्धेति** ।। प्राक्कोटिः प्रागभावः ।

ननु क्षित्यादिकं कार्यं सावयवत्वाद्घटवदित्यनुमानात्तत्सिद्धिः । न च सावयवत्वेनैव उक्तरूपकृतिमज्जन्यत्वं साध्यतां किं मध्ये कार्यत्वसाधनेनेति वाच्यम् । पूर्वोक्तरीत्या कृतिजन्यत्वे कार्यत्वस्येव सावयवत्वस्यानुकूलतर्काभावात् कृतिजन्यत्वरूपसाध्येन हेतूच्छित्यादिरूपानुकूलतर्काभावादिति भावेनाशङ्कते ।। **सावयवत्वादिति चेदिति** ।।

''तर्ह्येवमाकाशादीनामपि कार्यत्वप्रसङ्गात्'' इत्यादि**शास्त्रयोनिसूत्रसुधोक्तिं** हृदि कृत्वाह ।। **गगनादौ व्यभिचारीति** ।। तदेव व्यनक्ति ।। **गगनेति** ।। गगनादिः सांशः संयोगित्वात् घटवत् । न चाप्रयोजको हेतुः । तस्येह पक्षी नेह पक्षीत्यबाधितप्रतीत्या गगनादौ व्याप्यवृत्तित्वायोगेन स्वात्यन्ताभावसामानाधिकरण्यरूपाव्याप्यवृत्तित्वस्य चैकत्र विरोधेनैक-

देशरूपांशवृत्तित्वस्यैव वाच्यत्वात् । न चांशस्यौपाधिकत्वेनोपपत्तिः । उपाधिसंयोगस्यापि गगनादौ सर्वत्र व्याप्यवृत्तित्वायोगेनैकदेशरूपांशवृत्तित्वस्यैव वाच्यत्वात् । तस्याप्यौपाधिकत्वेऽनवस्थाद्यापातेन स्वाभाविकांशव्यतिरेकेण संयोगित्वस्यैवानुपपत्तेरिति भावः ।

नन्वेवं गगनकालपरमाण्वादेरपि संयोगित्वेन सांशत्वे तुल्यन्यायतयांशस्यापि संयोगित्वेन सांशत्वं तदंशस्याप्येवमिति परमाण्वंशस्याप्यानन्त्यं स्यात् । तथा च गगनपरमाण्वोः तुल्यपरिमाणतापत्तिः । किञ्च परमाणोरपि न्यूनपरिमाणकांशस्य सत्त्वे यतः परमणुर्नास्ति स परमाणुरिति परमणुत्वव्याघातः । अपि चोपादानादिरूपावयवातिरिक्तांशसत्त्वे मानाभावात् तद्रूपांशवत्त्वस्य गगनादावप्यभ्युपगमेऽनित्यत्वापत्तेश्चेत्यत आह ।। **विस्तृतं चैतदन्यत्रेति** ।।

"अतः सर्वपदार्थानां भागाः सन्त्येव सर्वदा ।
सर्वदिक्ष्वभिसम्बन्धादविभागः पराणुता ।।

इत्याद्यनुव्याख्यानसुधयोर्वैशेषिकाधिकरणे विस्तृतमित्यर्थः । सर्षपो यावन्तं देशमवष्टभ्य वर्तमानो दृश्यते तावत्येवानधिकतदवयवपरम्परा गगनेऽप्येवमित्यङ्गीकारे तुल्यपरिमाणतानापत्तेः । यतः स्वावयवं विना स्वतन्त्रमनवयवरूपमपकृष्टपरिमाणं नास्ति स परमाणुरित्युक्तेर्व्याघाताभावादित्याद्युक्तेरिति भावः । तथोपादानातिरिक्तांशसत्त्वादिकं **चोपाधिखण्डनटीकाभावप्रकाशिकायां** विस्तृतमित्यर्थः ।

तर्कताण्डवम्

द्रव्यारब्धद्रव्यत्वं चेत् अकार्यत्ववादिनं प्रत्यसिद्धम् । द्रव्यसमवेतद्रव्यत्वं चेत् जात्यादेरिवाकार्यत्वेनाप्युपपत्त्या अप्रयोजकता ।

मध्यमपरिमाणत्वं चेत्तदाप्यप्रयोजकतैव गगनप्रदेशस्येव सांशत्वेनैव तदुपपत्तेः । अवयवनैरपेक्ष्येणैव मध्यमीभूतपरिमाणाश्रयत्वमात्रेण द्रव्यस्य मध्यमपरिमाणत्वोपपत्तेश्च । भूम्यादेरुपलभ्यमाना भागास्तु नारम्भकरूपा अवयवाः किन्तु गगनस्य प्रदेशभेदा इव कालस्य क्षणादय इव चांशा एव सन्तु ।

न्यायदीपः

।। **जात्यादेरिवेति** ।। अद्रव्यस्य जातेरेकत्वसङ्ख्यापरिमाणादेर्द्रव्यसमवेतत्वेऽप्यकार्यत्वं यथा तथा द्रव्यसमवेतद्रव्यस्याप्यकार्यत्वमस्तु । विपक्षे बाधकाभावादिति भावः ।। **गगनप्रदेशस्येवेति** ।। यथा इह पक्षीत्यादिप्रतीत्या पक्ष्याद्याधारप्रेदशस्य मध्यमपरिमाणत्वेऽपि तस्य प्रदेशस्याप्युक्तदिशा अनेकांशयुतत्वं तथा क्षित्यादेरवयवारब्धत्वरूपकार्यत्वाभावेऽपि गगनवत् पूर्वोत्तरावधिशून्यानन्तांशयुतत्वाभावेनानेकांशयुतपरमाणुतोऽनेकांशयुतत्वेन च तदुभयपरिमाणान्यपरिमाणरूपमध्यमपरिमाणत्वस्योपपत्तेरित्यर्थः ।

परिमाणस्यावयवोपचयहेतुकत्वमुपेत्योक्तम् । वस्तुतस्तदेव मास्त्वित्याह ।। **अवयवेति** ।। यथा परमाण्वादाववयवनैरपेक्ष्येणैवाणुपरिमाणं महत्परिमाणं च तथा मध्यमपरिमाणमस्तु । प्रदीपगुणे प्रभायां दर्शनात् । न च प्रभा न गुणोऽपि तु द्रव्यमिति युक्तम् । गुणाद्वाऽऽलोकवदिति सूत्रभाष्यटीकाचन्द्रिकासु तदनुविधानादिना गुणत्वसमर्थनादिति भावः ।

अवयवनैरपेक्ष्येणेत्याद्युक्तप्रमेये प्रत्यक्षबाधमाशङ्क्य निराह ।। **भूम्यादेरिति** ।। नन्वाकाशप्रदेशानां विनाशादृष्टेर्भूम्यवयवानां तद्दृष्टेर्वैषम्यमित्यत आह ।। **कालस्येति** ।। प्रदेशभेदक्षणलवादीनां औपाधिकत्वे भूम्यवयवानामपि तथात्वमस्त्विति भावः ।। **पूर्वावयवीति** ।। नोदनाभिघातादिना अवयवक्रियाद्वारा परमाणुपर्यन्तमसमवायिकारणसंयोगनाशेन

पूर्वद्रव्यनाशे सति पुनरदृष्टाधीनपरमाणुसंयोगद्वारा खण्डक्षित्यादिकार्योत्पत्तेः पीलुपाकप्रक्रियासिद्धत्वात्कार्यत्वं सिद्धमित्यर्थः । न चैवं खण्डक्षित्यादौ कार्यत्वसिद्धावप्यखण्डक्षित्यादौ न सिद्धमिति भागासिद्धिरिति वाच्यम् । नाशेन तत्रापि तदनुमानादिति भावः ।

तर्कताण्डवम्

अत एव भूमेः खननादिना पूर्वावयवविनाशेन अवयव्यन्तरोत्पत्तेः कार्यत्वं सिद्धमिति निरस्तम् । क्षणादिनाशेन कालस्यापि तत्प्रसङ्गात् । खनकादेरेव भूम्यादिकर्तृत्वापत्तेश्च । प्रत्यभिज्ञाविरोधाच्च । क्षणभङ्गापाताच्च ।

तदुक्तं भगवत्पादैः "विपर्ययेणाप्यनुमातुं शक्यत्वात्" इति । अस्मदाद्यनुपलभ्यमानप्राक्कोटित्वेन हेतुना गगनादिदृष्टान्तेनाकार्यत्वस्याप्यनुमातुं शक्यत्वादित्यर्थः (१) ।

न्यायदीपः

अत एवेत्युक्तं व्यनक्ति ।। **क्षणादीति** ।। न च क्षणादीनामौपाधिकत्वात्तत्रोपाधिनाश एवेति युक्तम् । विशेषणनाशे विशिष्टस्य नाशात् । अंशानामौपाधिकत्वस्योपाधिखण्डनादौ निरासेन स्वाभाविकत्वाच्चेति भावः । खननादिना क्षितिनाशोत्पत्त्यङ्गीकारोऽयुक्त एवेति भावेनाह ।। **खनकादेरिति** ।। तथाचांशतः सिद्धसाधनता स्यादिति भावः । यदत्रोक्तं **मणौ** "तत्र क्षितिनाश एव कर्तृत्वं न तु खण्डक्षितौ अवस्थितिसंयोगेभ्य एव तदुत्पत्तेः" इति । तन्न । तथात्वे खण्डक्षितिनाशेऽप्यकर्तृत्वापातात् । अनुभवविरोधस्योभयत्र तुल्यत्वात् ।

एकदेशनाशकर्तृत्वे त्वखण्डक्षित्युत्पत्तिरेव नेति कुतः कार्यत्वं क्षित्यादेरिति भावेनाह ।। **प्रत्यभिज्ञेति** ।। **क्षणेति** ।। प्रतिक्षणं क्षित्यादौ वाय्वाद्यभिघातादिनैकैकावयवापगमेन प्रतिक्षणं तदपगमनिमित्तनाशोत्पत्त्योरुपेयत्वादिति भावः ।

एवं सावयवत्वं सांशत्वादिरूपेण विकल्प्य व्यभिचारासिद्ध्यन्यथासिद्धय उक्ताः । अस्तु सावयवत्वं यत्किञ्चित् । अथापि तर्कपराहतिः । सावयवत्वात् क्षित्यादिकं कार्यं चेत् अनुपलब्धप्राक्कोटित्वादकार्यमपि स्याद्गगनवदिति भावेन तत्संवादोक्त्या व्यनक्ति ।। **तदिति** ।। क्षित्यादौ कार्यत्वानुमानं तर्कपराहतमित्येतत् ''न चानुमानात्तत्सिद्धिः विपर्ययेणाप्यनुमातुं शक्यत्वात्'' इति **तत्त्वनिर्णये** उक्तमित्यर्थः । प्रकृतोपयोगितया तद्वाक्यार्थमाह ।। **अस्मदिति** ।। पूर्ववाक्यस्य तु सावयवत्वानुमानात् क्षित्यादौ कार्यत्वसिद्धिरिति न च वाच्यमित्यर्थ इति भावः । एतेन कार्यत्वस्यासिद्ध्युक्तिपरटीका मूलारूढेति दर्शितम् ।

तर्कताण्डवम्

किञ्च घटादौ दर्शनमात्रेण भूभूधरादेः सावयवत्वेन कार्यत्वानुमाने रूपादौ दर्शनमात्रेण परमाण्वादेः सावयवत्वविपर्ययेण निरवयवत्वेन कार्यत्वानुमानं किं न स्यात् । एतदप्युक्तम् ''विपर्ययेण'' इति (२) ।

किं च कर्त्रभावेऽपि कार्यत्वस्य सकारणकत्वमात्रेण उपपन्नत्वेनाप्रयोजकता । अन्यथा कर्मादिकारकविशेषाभावेनासनशयनादिकार्यं न स्यात् ।

कर्मादिकं न सार्वत्रिकम् । कर्ता तु सार्वत्रिक इति चेन्न । तस्यैवाद्याप्यसिद्धेः । घटादौ दर्शनं तु सकर्तृकत्वस्यैव शरीरधर्माधर्मसुखदुःखस्वप्रयोजनापेक्षादिमज्जन्यत्वादेरप्यस्ति ।

एतदप्युक्तं ''विपर्ययेण'' इति । परानङ्गीकृतशरीरजन्यत्वादिनेत्यर्थः (३) ।

न्यायदीपः

ननु सावयवत्वकार्यत्वयोर्घटादिषु भूयः सहचारदर्शनात्प्राक्कोटिरप्यस्ति क्षित्यादेरित्यनुमीयत इत्यसिद्धो हेतुरिति चेत् तत्किमन्यथानुपपत्तिरूपानुकूलतर्कसहितं सहचारदर्शनं केवलं वा । नाद्यः । अन्यथोपपत्तेरुक्तत्वात् । नान्त्यः । अतिप्रसङ्गादित्याह ।। **किं चेति** ।। मूलवाक्यं विवृण्वन्नेवाह ।। **सावयवत्वविपर्ययेणेति** ।। फलितमाह ।। **निरवयवत्वेनेति** ।।

न च गगनादौ व्यभिचारः शङ्क्यः । कार्यातिरिक्तस्य सर्वस्यापि विप्रतिपत्त्या पक्षत्वात् । अत एव परमाण्वादेरित्युक्तिः । न च परमाणुकालाकाशादेः कार्यत्वे कारणान्तरमपि तस्योपेयम् तस्याप्येवमित्यनवस्थापत्त्यादिदोष इति वाच्यम् । बीजाऽङ्कुरवदुपपत्तेः । प्रलयस्य च निरीश्वरवादिनो सम्मतेः । निरवयवमध्ये कस्यचिदकार्यस्य कस्यचित्कार्यस्योपगमवत् कस्यचित्सावयवस्यैव अकार्यस्याभ्युपेयत्वाच्च । निरवयवं द्रव्यमकार्यमेवेति चेत् निरवयवं वस्तु कार्यमेव रूपादिवदित्युपपत्तेः ।

नन्ववयवाभावे तत्समवेत्वरूपकार्यत्वं बाधितमिति चेत् । रूपादिवदेवोपपत्तेः । द्रव्यस्यायं नियम इति चेत्तस्यैव निरस्यत्वात् । समवायस्याग्रे निरसिष्यमाणत्वेन परिमाणत्वेनैव कार्यत्वोपपत्तेश्च इत्यादि ज्ञेयमिति भावः ।। **एतदपीति** ।। निरवयवत्वेन परमाण्वादेः कार्यत्वानुमानमित्यर्थः ।

एवं कार्यत्वस्यासिद्धिमुक्त्वा व्याप्त्यभावोपपादनाय ''कारणाभावप्रयुक्तत्वात्कार्याभावस्य'' इत्यादिना टीकोक्तमनुकूलतर्काभावं प्रपञ्चयंस्तदपि मूलारूढं दर्शयति ।। **किञ्चेत्यादिना एतदप्युक्तमित्यन्तेन** ।।

अन्यथेति ।। कर्तृरूपकारकविशेषाभावेन कार्याभाव इत्यर्थः ।। **आसनेति** ।। आस उपवेशने आस्ते, शीङ् स्वप्ने शेते, भा दीप्तौ भातीत्यादेरकर्मकत्वादासनादिकार्यं कर्मसम्प्रदानापादानकारकहीनमिति कार्यं न स्यादित्यर्थः ।

विपर्ययेणेत्यस्य पराङ्कीकृतवैपरीत्येनेत्यर्थमुपेत्याह ।। **परानङ्गीकृतेति** ।। तथा च कार्यत्वस्य शरीरसुखदुःखादिमज्जन्यत्वादिना सह भावदर्शनेपि यथा तत्र कार्यत्वमप्रयोजकं तथा सकर्तृकत्वेऽपीति भावः । अस्मिन् पक्षे ''न चानुमानात्तत्सिद्धिः'' इति पूर्ववाक्यस्य कार्यत्वानुमानात् सकर्तृकत्वसिद्धिरिति न चेत्यर्थो ध्येयः ।

तर्कताण्डवम्

किञ्चास्तु कृतेः कार्यसामान्यं प्रति हेतुत्वम् । तथापि त्वदुक्तस्वजन्येत्यादिबहुविशेषणविशिष्टकृतित्वेन न । किन्तु तद्विपरीतेन लघुना कृतित्वेनैव । नचैवं कपालगोचरकृत्यभावेऽपि पटगोचरकृत्या घटोत्पत्तिः शङ्क्या । घटरूपकार्यविशेषं प्रति कपालगोचरकृतिरूपविशेषस्य हेतुतया तद्रहितायाः सामान्यसामग्र्याः कार्याजनकत्वात् । (४)

नचैवं प्रकृतेऽपि क्षित्युपादानगोचरकृतिरूपकारणविशेषः कल्प्यत इति वाच्यम् । त्वया कल्प्यमानकृतिविपरीतायाः कृत्साया क्षितिजनकादृष्टजनककृतेरेवेह विशेषकारणत्वात् (५) ।।

न्यायदीपः

ननु लोके सकर्मकाकर्मकादिकार्यं दृष्टमिति, अस्तु कर्मादिहीनमपि कार्यम् । कर्तृहीनन्तु न दृष्टम् । किन्तु कर्तृमदेव । क्षित्यादि तु विप्रतिपन्नम् ।

न च शरीरादिमत्कर्तृकमपि दृष्टमित्युक्तमिति वाच्यम् । कृतिं विना कार्यत्वानुपपत्तिवत् शरीरादिकं विना तदनुपपत्तेरभावात् । कार्यत्वं हि कृतिकर्मत्वम् । ऋहलोर्ण्यदिति ण्यत्प्रत्ययान्तस्य करोतेस्तदर्थत्वात् । न च कार्यशब्दो रूढः ।

''भवेतां यदि वृक्षस्य वाजिकर्णौ कथञ्चन ।
अदृष्टां समुदायस्य कः शक्तिं जातु कल्पयेत्'' ।

इति प्रोक्षण्यधिकरणवार्तिकोक्तरीत्याऽवयवार्थसम्भवे समुदायशक्तिकल्पनानुपपत्तेः । अन्यथा प्रोक्षण्यादिशब्दोऽप्युदकविशेषे रूढ इति स्यादित्यतोऽस्तु नाम कार्यत्वं कर्तृजन्यत्वे प्रयोजकं तथापि त्वदुक्तविशिष्टसाध्ये त्वप्रयोजकमेवेत्याह ।। **किञ्चेत्यादिना** ।। ज्ञानचिकीर्षाकृतीनां प्रत्येकमेव हेतुतया साध्यत्रयोपगमेन मिलितानामहेतुत्वात्कृतेरित्येवोक्तं न तु ज्ञानादेरिति । एवमग्रेऽपि ।। **तदिति** ।। हेतुत्वमित्यर्थः ।

एतदपि दूषणं मूलारूढमिति भावेन कार्यत्वानुमानात् स्वजन्यादृष्टप्रागभावव्याप्यप्रागभावप्रतियोगिभिन्नोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यत्वादिसिद्धिर्न चेति पूर्ववाक्यार्थमुपेत्य विपर्ययेणेत्युत्तरवाक्यस्थविपर्ययशब्दार्थं वदन्नेवाह ।। **तद्विपरीतेनेति** ।। **कार्यविशेषं प्रतीति** ।। यत्सामान्यन्यायादिति भावः ।

न चानुमानात्तत्सिद्धिरिति पूर्ववाक्यस्थतत्सिद्धिशब्दार्थं विवृण्वन्नेव शङ्कामनूद्य निराह ।। **नचैवमिति** ।। **प्रकृतेपीति** ।। क्षित्यादावपीत्यर्थः ।

उत्तरवाक्यस्थविपर्ययशब्दार्थं वदन्नेव हेतुमाह ।। **त्वयेत्यादिना** ।। **क्षितिजनकादृष्टेति** ।। हविरादिगोचरजीवकृतेरेवेत्यर्थः । अदृष्टस्य यज्ञादिसत्कर्मजन्यत्वात् ।

तर्कताण्डवम्

नच कपालंगोचरकृतिव्यतिरेकेण घटव्यतिरेक इव क्षित्युपादान-गोचरकृतिव्यतिरेकेण क्षितिव्यतिरेको दृष्टः । येन साऽपि हेतुः स्यात् । घटादौ दर्शनमात्रेण तत्कल्पने च त्वदुक्तचेष्टानिरपेक्षकृतिविपरीता चेष्टाद्वारककृतिरेव कल्प्या स्यात् ।

एवं च कृतेः कारणतावच्छेदककृतित्वेनैव जनकता साध्यते चेदस्मदादिकृत्या सिद्धसाधनम् । तन्निवृत्यर्थं स्वजन्येत्यादिविशेषणो-पादानेऽप्रयोजकता । तेन रूपेण कृतेरकारणत्वात् (६) ।

न्यायदीपः

नन्वेवं घटादावपि तज्जनकादृष्टजनककृतेरेव हेतुत्वमस्तु । न तु कपालगोचरकृतेरविशेषादित्यत आह ।। **न चेति** ।। **येन सापीति** ।। क्षितिजनकादृष्टजनकहविरादिगोचरजीवकृतिव्यतिरेकेण क्षित्यादिव्यतिरेकस्तु ''कार्यमात्रेऽदृष्टं हेतुः'' इति वदतस्तवापि सम्मत इति तादृशकृतिस्तु स्यादेव हेतुरिति भावः । उक्तं च **सुधायाम्** ''अदृष्टवतां जीवात्मनामेव कर्तृत्वोपपत्तेः'' इति शास्त्रयोनिसूत्रे ।

नन्वेवं नेदं सकर्तृकत्वं तथात्वे भोजकादृष्टद्वारा भोक्तृकृतिजन्ये घटादौ भोक्तृकर्तृकत्वव्यवहारापत्तेः । उक्तं च **मणौ** ''अत एव घटभोक्ता न तत्कर्ता व्यवह्रियत इति'' इति चेन्न । अदृष्टद्वारकघटाद्युपादानगोचरापरोक्षज्ञन-चिकीर्षाकृतिमतोऽपि तदनुकूलाङ्गचेष्टाहीनस्य कर्तृत्वा-व्यवहारात् तदनुकूल-चेष्टावत्येव तद्व्यवहारात् त्वदुक्तचेष्टानिरपेक्षकृतिमज्जन्यत्वेऽपि सकर्तृकत्व-व्यवहारानापत्त्या सकर्तृकत्वविवादापरिहारेणार्थान्तरतापत्तेः । शरीरचेष्टादि-हीनेऽपि क्षित्यादिकर्तरि कर्तृत्वं पारिभाषिकं चेत् अदृष्टद्वारा क्षित्यादिजनक-कृतिमत्यपि कर्तृत्वं पारिभाषिकमेवास्त्विति भावः ।

ननु घटादावुपादानव्यतिरेकेण घटादिव्यतिरेकदृष्ट्या तादृशकृतिमति कुलाले मुख्यकर्तृत्वोपपत्तेरिहापि क्षित्याद्युपादानकृतिमान् मुख्य एव कर्ता स्यादित्यत आह ।। **घटादाविति** ।। न चानुमानात्तत्सिद्धिरिति पूर्ववाक्यार्थानुवादः ।। **घटादाविति तत्कल्पने चेति** ।। स्वोपादानगोचर-कृतिकल्पने चेत्यर्थः । क्षित्यादाविति योज्यम् । उत्तरवाक्यस्थविपर्ययशब्दार्थं वदन्नेवापाद्यमाह ।। **त्वदुक्तेति** ।। **चेष्टाद्वारककृतिरेवेति** ।। ननूक्तमत्र घटादौ कार्यविशेषे चेष्टाद्वारककृतिदृष्टावपि यत्सामान्यविशेषन्यायेन कार्यसामान्ये कृतित्वेन हेतुत्वादिति चेन्न । क्लृप्तया क्षितिजनकादृष्टजनक-कृत्यैवोपपत्तावक्लृप्तकृतिकल्पनस्यैव बाधकत्वेन बाधकाभाव इत्यस्यासिद्धेरिति भावः ।

छलोत्तरत्वनिरासायानुमानदोषं निष्कृष्याह ।। **एवं चेति** ।। दर्शनमात्र-स्यातिप्रसञ्जकत्वे सतीत्यर्थः ।। **अकारणत्वादिति** ।। घटादौदर्शनमात्रस्य शरीरचेष्टाद्यतिप्रसञ्जकत्वात् यत्सामान्यविशेषन्यायस्याक्लृप्तानेकादृष्ट-कल्पनाप्रसङ्गबाधितत्वेनाग्रे दूष्यत्वेन चानवतारादिति भावः ।

तर्कताण्डवम्

किञ्चोपादानशब्दो यदि यत्किञ्चिदुपादानपरस्तदा शब्दफूत्कारादौ सिद्धसाधनम् । तस्यापि यत्किञ्चित्प्रत्युपादानभूतमृदङ्गादिगोचरा-स्मदादिनिष्ठज्ञानादिजन्यत्वात् । यदि तु सर्वलोकसिद्धव्युत्पत्त्यनुसारेण समभिव्याहृतपरस्तदोपादानशब्दार्थीभूतसमवायिकारणे लाघवात् समवायिभागत्यागेन क्षित्यादिकं प्रति त्वदुक्तविपरीतक्षित्यादिकारण-गोचरकृतित्वेनैव कारणत्वग्रहात्तथाभूतकारणसाधनेऽपि सिद्धसाधनमेव । क्षितिजनकादृष्टजनकज्ञानदेरदृष्टद्वारा क्षितिजनकहविरादिविषयत्वात् ।

नच हविरादि क्षितिं प्रति प्रयोजकमेव न तु कारणमिति वाच्यम् । तत्रापि कारणशरीरप्रविष्टानन्यथासिद्धभागत्यागेन त्वदुक्तविपरीत-नियतपूर्ववर्त्तिरूपप्रयोजकगोचरकृतित्वेनैव हेतुत्वेऽतिलाघवात् । (८)

न्यायदीपः

नन्वस्तु तर्हि उपादानगोचरेत्याद्येव साध्यमित्यतः ''कार्यसामान्यं हि कारणसामान्यायत्तम्'' इति टीकां हृदि कृत्वा पराभिमतसाध्यं निराह ।। **किञ्चोपादानेत्यादिना ।। सिद्धेति ।।** अंशतः सिद्धसाधनमित्यर्थः ।

न च तत्र ज्ञानेच्छयोर्न कारणत्वम् । किं तु कृतिमात्रस्यैव । मिलितानां तेषां स्वविषयसमवेतकार्यं प्रत्येव जनकत्वादिति वाच्यम् । ज्ञानादिघटितं साध्यत्रयमेवेदमिति **मणि**कृदभिमतत्वेन उक्तदोषापरिहारात् ।

यदत्रोक्तं **ठक्कुरादा**वुपादानगोचरत्वेन यस्य ज्ञानार्देर्जनकत्वं तादृश-ज्ञानादिजन्यत्वं साध्यम् । तेन च रूपेण स्वविषयसमवेतकार्यं प्रत्येव जनकत्वान्न दोषः । स्वजन्यादृष्टेत्यादिविशेषणं तु कालीरूपेंऽशतः सिद्धसाधनतावारणायेति । तन्न । वक्ष्यमाणदिशा लाघवेन कारणगोचरज्ञाना-दित्वेन जनकतयोक्तरूपेण जनकत्वस्य काप्यकल्पनात् ।

।। **यत्किञ्चिदिति ।।** स्वगतरूपादिकं प्रतीत्यर्थः । मृदङ्गादीत्यादि-पदेन ताल्वादिग्रहः ।। **उपादानशब्दार्थीभूतेत्यादि ।।** वेदान्तिमत इव परिणामिकारणानङ्गीकारात्समवायिकारणेत्युक्तम् । स्वोक्तदोषं मूलारूढं दर्शयितुं न चानुमानात्तत्सिद्धिरिति पूर्ववाक्यस्य क्षित्याद्युपादानगोचर-ज्ञानादित्वेन तज्जन्यत्वसिद्धिर्न चेत्यर्थमुपेत्योत्तरवाक्यस्थविपर्ययशब्दार्थमाह ।। **त्वदुक्तेति ।। कारणत्वग्रहादिति ।।** घटादौ लाघवेन घटादिकारण-गोचरकृतित्वेनैव कारणताग्रहात् क्षित्यादावपि तथैव कारणत्वकल्पनादित्यर्थः ।

अस्तु तथैवोपादानपदं कारणमात्रपरम् । तावतापीश्वरसिद्धेरित्यत आह ।। **तथाभूतेति** ।। क्षित्यादिकारणगोचरकृतित्वेन रूपेण कृतिरूपकारण-साधने चेत्यर्थः । उक्तरूपज्ञानवज्जन्यं चिकीर्षावज्जन्यमित्यत्राप्येवं दोषो ध्येय इति भावेन कृतिमात्रस्य प्राग्व्यवहारेपि ज्ञानादेरित्युक्तम् । न चैतदर्थ-मेव स्वजन्यादृष्टेत्यादिविशेषणमुक्तमिति वाच्यम् । तत्पक्षेऽप्रयोजकत्वदोषस्य हेतावुक्तत्वादिति भावः ।। **प्रयोजकमेवेति** ।। घटे कुलालपितृवदिति भावः । मूलारूढताप्रदर्शनाय त्वदुक्तविपरीतेत्युक्तिः । एवमग्रेऽपि ।। **प्रयोजकगोचरेति** ।। त्वदुक्तेत्यर्थः ।

तर्कताण्डवम्

यच्चोक्तं विशेषयोरन्वयव्यतिरेकेण वा कारणत्वेन वा सामान्य-योरपि कारणत्वमिति । तत्र न तावदाद्यः । अन्वयव्यतिरेकयो-स्त्वदुक्तविपरीते स्वसमानप्रकारककार्यकारणभावग्रह एव सामर्थ्यस्य क्लृप्तत्वात् । अधिकसामर्थ्यकल्पनायां च बीजाभावात् ।

नापि द्वितीयः विमते सामान्ये, कार्यकारणभावापन्ने, बाधकं विना कार्यकारणभावापन्नविशेषसम्बन्धित्वात् । धूमवह्निसामान्य-वदित्यत्र व्यतिरेकावच्छेदकरूपवत्त्वस्यैव उपाधित्वात् । नच साधन-व्यापकता । त्वत्पक्षे कृतित्वस्य देशतः कालतश्च व्यतिरेकरहितेश्वर-कृतिवृत्तित्वेन व्यतिरेकानवच्छेदकत्वात् । नचैवमाकाशाद्यसिद्धिः । साक्षिणैव तत्सिद्धेः । शब्दादिकारणत्वेन तदसिद्धावपि गुणस्य समवेतत्वव्याप्त्या शब्दसमवायित्वेनैव तत्सिद्धेश्च । निमित्तकारण-त्वादिग्रहे यत्र यदा न दण्डस्तत्र तदा न घट इति संसर्गभावरूपस्य व्यतिरेकस्य तन्त्रत्वेऽपि समवायिकारणत्वग्रहे यन्न समवायिकारणं

तत्र न कार्यमित्यन्योन्याभावरूपव्यतिरेकस्यैव तन्त्रत्वेन शब्द-समवायिकारणत्वेनापि तत्सिद्धिसम्भवाच्च ।

नच समवायिभिन्न इव त्वन्मते कृतिविषयभिन्नः प्रसिद्धः । येन कृतेरप्यन्योन्याभावरूपव्यतिरेकेण कारणता गृह्येत । सर्वस्यापीश्वर-कृतिविषयत्वात् । पारिमाण्डल्यस्यापि स्वनिष्ठघटाभावसाक्षात्कारं प्रति संयुक्तसमवेतविशेषणतारूपप्रत्यासत्त्यन्तर्भूततया हेतुत्वेन ईश्वरकृतिविषयत्वात् । नच तत्र घटाभावो न प्रत्यक्षः । अभाव-प्रत्यक्षत्वप्रयोजकत्वेन त्वदुक्तस्य योग्यप्रतियोगिकत्वादेस्तत्रापि सत्त्वात् । एवं च त्वदुक्तदेशकालापरिच्छिन्नकृतिजन्यत्वविपरीत-परिच्छिन्नकृतिजन्यत्वेनाप्यनुमितिः स्यात् (९) ।

न्यायदीपः

ननु यदुक्तं क्षित्याद्युपादानगोचरकृतिव्यतिरेकेण क्षितिव्यतिरेको न दृष्टः । येन सापि हेतुरिति । तन्न । विशेषयोरन्वयादिदृष्ट्या सामान्ययोरपि तत्कल्पनादित्यत आह ।। **यच्चोक्तमिति** ।। नन्विदमप्रयोजकमित्यादि-शङ्कोत्तररूपपूर्वग्रन्थ इत्यर्थः ।। **त्वदुक्तविपरीत इति** ।। घटकुलालकृत्योः अन्वयादिना कार्यसामान्यकृतिसामान्ययोः कार्यकारणभाव इति यत्त्वदुक्तं तद्विपरीते घटत्वकुलालकृतित्वरूपान्वयव्यतिरेकप्रकारसमानप्रकारक-कार्यकारणभाव एव सामर्थ्यमित्यस्य दण्डघटादौ निर्णीतत्वादित्यर्थः ।

।। **बीजेति** ।। ननु बाधकाभाव एव बीजमिति चेन्न । तादृशसामर्थ्य-कल्पनायामनेकादृष्टकल्पनस्यैव बाधकत्वात् । घटादावदृष्टस्य हस्तचेष्टा-निरपेक्षकृतिजन्यत्वनित्यसर्वविषयज्ञानादिजन्यत्वादेरनेकस्य कल्प्यत्वात् । क्लृप्तसामर्थ्यमात्रस्वीकारे तु लाघवात् । अन्यथा तन्तुरूपपटरूपयोरन्वय-

व्यतिरेकाभ्यां कार्यगतरूपसामान्यं प्रति कारणगतरूपसामान्यं, कार्यगत-गुणमात्रं प्रति कारणगतगुणमात्रं कारणमिति वा कल्प्यं स्यात् । तत्र यद्यद्बाधकमुपनिपतति तत्सर्वमपि तदनुगुणप्राक्रियाकल्पनया परिहार्यं स्यादिति भावः ।

सामान्ये इति द्विवचनान्तम् । कार्यसामान्यकृतिसामान्ये इत्यर्थः ।। **बाधकं विनेति** ।। सामान्ये व्यभचाररूपबाधकं विनेत्यर्थः । यद्धर्मवत्त्वे-नोपस्थितयोः विशेषयोः कार्यकारणभावस्तद्धर्मालिङ्गितत्वं तत्सम्बन्धित्वं ध्येयम् । घटकुलालयोः कार्यकारणभावे कार्यसामान्यपुरुषसामान्ययोः, प्रमाणवाक्यत्वेन वक्तृवाक्यार्थप्रमात्वेन कार्यत्वादिकल्पनेऽपि वाक्यसामान्य-वक्तृज्ञानसामान्ययोश्च तदभावाद्व्यभिचारवारणाय बाधकं विनेति ।। **व्यतिरेकेति** ।। अत्र रूपशब्दो धर्मपरः । धूमसामान्यवह्निसामान्ययोः कार्यकारणभावो हि न तादृशधूमविशेषवह्निविशेषसम्बन्धित्वनिबन्धनोऽपितु यत्र वह्न्यभावस्तत्र धूमाभाव इति व्यतिरेकं प्रत्यवच्छेदकभूतवह्नित्व-धूमत्वाख्यधर्मवत्त्वनिमित्त एव । कार्यकारणभावापन्नघटदण्दादिस्थले सर्वत्र तथा दर्शनेन साध्यव्यापकत्वं व्यक्तमिति साधनाव्यापकत्वं व्यनक्ति ।। **न चेत्यादिना** ।।

व्यतिरेकावच्छेदकरूपवत्त्वस्यैव कारणतायां ज्ञापकत्वे शब्दसमवायि-कारणतया आकाशसिद्धिर्न स्यात् । तथा ज्ञानादिसमवायिकारणत्वेन आत्म-सिद्धिश्च न स्यात् । परत्वापरत्वकारणतया देशकालसिद्धश्च न स्यात् । तेषां नित्यविभुत्वेन व्यतिरेकावच्छेदकरूपवत्त्वाभावादित्याशङ्क्य निराह ।। **न चैवमिति** ।। **साक्षिणैवेति** ।। आत्मस्वरूपज्ञानरूपेण साक्षिणैवेत्यर्थः । शब्दज्ञानविधुरजातिबधिरादेरप्याकाशप्रतीत्या शब्दकारणतयैवाकाशधीरिति नियमाभावात्साक्षिणैवेत्युक्तम् । विवृतं चैतत्–

''सत्यत्वं गगनादेश्च साक्षिप्रत्यक्षसाधितम् ।''

इत्याद्यानुमानिकपादीयानुव्याख्यानसुधयोर्वादावल्याञ्चेति भावः ।

किञ्च ''द्रव्ये समवायिकारणत्वं विशिष्टं न ग्राह्यं किन्तु समवायित्व-समानाधिकरणं कारणत्वमेव समवायिकारणत्वम् । तथा च ''उभयग्राहक-समाजादुभयग्रहे अर्थसमाज'' इति **पक्षधराद्युक्तेः** केवलसमवायित्वग्राहकोप-निपातेन तन्मात्रस्यापि ग्रहणसम्भवादिति भावेन साक्षिणि विप्रतिपन्नं प्रत्यन्यथाप्याकाशसिद्धिमाह ।। **शब्देति** ।। **समवायित्वेनेति** ।। समवाय-वृत्त्या शब्दाश्रयत्वेनेत्यर्थः । शब्दः क्वचिदाश्रितः गुणत्वादिति सामान्यत-स्तदाश्रयसिद्धौ शब्दोऽष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यवृत्तित्वे बाधकोप-पन्नत्वे सत्याश्रितत्वादिति सामान्यपरिशेषाभ्यां शब्दादिसमवायित्वेनैव सिद्धिसम्भवादिति भावः ।

समवायिकारणत्वं विशिष्टमेव ग्राह्यमिति मतेऽपि तेन रूपेणाकाशसिद्धि-प्रकारं **मण्युक्तमेव** दर्शयति ।। **निमित्तेति** ।। आदिपदेन व्याप्यसमवायि-कारणत्वग्रहः ।। **संसर्गाभावरूपस्येति** ।। निमित्तकारणकार्ययोराश्रयाश्रयि-भावाभावात् संसर्गाभावस्य तन्त्रत्वमिति भावः ।

नन्वेवं चेदीश्वरकृतिसिद्धिरप्येवमस्तु । यन्न कृतिविषयः न तत्र कार्यमित्यन्योन्याभावरूपव्यतिरेकेणैव कृतिकार्ययोः कार्यकारणत्वग्रहसम्भवेन क्षितिरूपकार्यानुकूलकृतिसिद्धिरित्यत आह ।। **न चेति** ।। **सर्वस्यापीति** ।। ईश्वरकृतेः कारणमात्रविषयकत्वात् सर्वस्यापि यत्किञ्चित्प्रति कारणत्वादिति भावः ।

नन्वस्त्वात्मकालाकाशादेरपि स्वगतगुणोपादानतयेश्वरकृतिविषयत्वम् । परमाणुपरिमाणस्य पारिमाण्डल्यशब्दितस्य किञ्चित्प्रत्यप्यकारणत्वात् तत्र

यन्न कृतिविषयो न तत्र कार्यमिति व्यतिरेकग्रहः सुशक इत्यत आह ।। **पारिमाण्डल्यस्यापीति** ।। द्व्यणुकगतह्रस्वपरिमाणस्यापि उपलक्षणं ध्येयम् ।। **योग्यप्रतियोगिकत्वादेरिति** ।। अन्योन्याभावप्रत्यक्षे ह्यधिकरणप्रत्यक्षं तन्त्रम् । न त्वभावप्रत्यक्षमात्रे । अभावप्रत्यक्षे हि प्रतियोगियोग्यत्वं वा यत्र यत्सत्त्वमनुपलब्धिविरोधीत्युक्तदिशा प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जित-प्रतियोगिकत्वरूपमनुपलब्धेर्योग्यत्वं वा तन्त्रम् । तच्च पारिमाण्डल्यादाव-भावग्रहेऽप्यस्तीति स्यादेवाभावः प्रत्यक्ष इत्यर्थः ।

न द्वितीय इत्यादिनोक्तं दोषं ''विपर्ययेणाप्यनुमातुं शक्यत्वात्'' इति मूलारूढं कुर्वन्नेव निष्कृष्य दर्शयति ।। **एवं चेति** ।। बाधकाभावेन व्यतिरेकावच्छेदकरूपवत्त्वस्य कारणत्वे तन्त्रत्वे सतीत्यर्थ ।। **परिच्छिन्नेति** ।। असर्वविषयानित्येत्यर्थः । तथाच कार्यत्वहेतुरप्रयोजक इति भावः ।

तर्कताण्डवम्

यच्चोक्तमुपादानज्ञानं साक्षात्कारत्वेनैव हेतुरिति तदपि न । त्वन्मते चेष्टोपादानस्य वायवीयशरीरस्याप्रत्यक्षत्वेऽपि तदधिष्टातु-रात्मनश्चेष्टाहेतुकृतेरावश्यकत्वेन त्वदुक्तापरोक्षज्ञानत्वविपरीतेन ज्ञान-त्वेनैव कृतिहेतुत्वात् । परमाण्वादिपरोक्षज्ञानेन कृत्यभावस्तु न साक्षात्त्वविरहात् । किं तु कृतियोग्यताप्रयोजकदेशकालविशेष-सत्त्वविषयकत्वविराहत् । अत एवान्धस्याप्तवाक्यादिना देशकाल-विशेषहेयोपादेयज्ञाने सति हानोपादाने युक्ते (१०) ।

यच्च कपालदृष्टान्तेन कारणीभूतसंयोगाश्रयत्वेनात्मनः कारणत्व-साधनं तन्न । कपालादेः कारणत्वे त्वदुक्तविपरीतस्य लघुनः कार्याश्रयत्वस्यैव तन्त्रत्वात् (११) ।

न्यायदीपः

एवं पराभिमंतकृतिजन्यत्वांशे कार्यत्वहेतोरप्रयोजकत्वमुक्त्वा अपरोक्ष-ज्ञानजन्यत्वांशेऽपि अप्रयोजकत्वमिति भावेन कृतेरपरोक्षज्ञानपूर्वकत्वं प्रागुक्तं निराह ।। **यच्चोक्तमित्यादि** ।। **हेतुरिति** ।। कपालादिकृताविति्यर्थः । तथाच क्षित्यादिनिष्ठकार्यत्वहेतोर्व्यापकतया क्षित्यादिजनकमपि ईश्वरज्ञान-मपरोक्षमेव सिद्ध्यतीति यदुक्तमित्यर्थः ।। **त्वन्मते चेष्टेत्यादि** ।। वायवीयशरीरादावुपादानापरोक्षज्ञानाभावेऽपि चेष्टाहेतुतया कृतिसत्त्वेना-परोक्षत्वस्य कृतौ व्यभिचारादिति भावः ।

तर्हि परमाण्वाकाशादिगोचरलिङ्गादिजन्यज्ञानेनापि तद्गोचरकृतिः स्यादित्यत आह ।। **परमाण्वादीति** ।। **देशेति** ।। कपालादेरिव देशविशेषे कालविशेषे सत्त्वाभावादित्यर्थः । परमाणोर्नित्यत्वेन कालविशेषसत्त्वं नास्ति गगनादौ तु देशविशेषसत्त्वं नेति न तत्र कृतिरिति भावः ।। **अत एवेति** ।। ज्ञानत्वेनैव कृतिहेतुत्वादेवेत्यर्थः ।। **हेयेति** ।। तत्र सर्पोऽस्ति अत्र रजतमस्तीति ज्ञाने सतीत्यर्थः ।

नन्वस्त्वपरोक्षज्ञानत्त्वसिद्ध्यभावस्तथापि कुलालवत्कार्यहेतुतया स्यादेवेश्वरसिद्धिः । कुलाले घटहेतुत्वस्य प्रागेव साधनादित्यतः प्रागुक्तं दृष्टान्ते साध्यवैकल्योद्धारमनूद्य निराह ।। **यच्चेति** ।। घटकारणीभूत-संयोगाश्रयस्य कपालस्य घटकारणत्वदर्शनादिति ग्रन्थेनोक्तमित्यर्थः ।। **लघुन इति** ।। कार्यासमवयिकारणसंयोगाश्रयत्वापेक्षया कार्याश्रयत्वस्य लघुत्वात् । तथा चात्मनस्तदभावान्न घटहेतुत्वमिति दृष्टान्तः साध्यविकल एवेति भावः । न च भूतलादेरपि घटकारणत्वप्रसङ्गः । समवायवृत्त्या तदाश्रयत्व-स्याभिमतत्वात् ।

एतच्चाभ्युपेत्योक्तम् । वस्तुतस्तु समवायस्याग्रे निरसिष्यमाणतया

''तन्तुभ्योऽन्यः पटः साक्षात् कस्य दृष्टिपथं गतः''

इति स्मृत्या संयोगविशेषविशिष्टकपालद्वयातिरिक्तघटस्यैवाभावाद् दृष्टान्तासिद्धिः ।

किं च संयोगस्य हेतुत्वोपगमेऽपि तदवच्छेदकत्वेनान्यथासिद्धत्वादात्मनो न हेतुत्वम् । न चैवं चेष्टाद्वारा घटहेतुप्रयत्नवदात्मसंयोगावच्छेदकत्वेनात्मनोऽन्यथासिद्धौ तत एव प्रयत्नस्याहेतुत्वमिति युक्तम् । प्रयत्नस्य स्वतन्त्रान्वयव्यतिरेकाभ्यामेव हेतुत्वेन तस्य तादृशसंयोगविशेषणत्वनिबन्धनत्वाभावात् । प्रयत्नवदात्मसंयोगस्य हेतुत्वे मानाभावाच्च । येन तदाश्रयतयाप्यात्मा हेतुः स्यात् । स्वव्यधिकरणतदीयगुणव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वं तु मन्त्रपाठजन्यविषचलने मन्त्ररूपशब्दगुणकाकाशसंयोगासमवायिकारणत्वहीने स्वव्यधिकरणमन्त्ररूपाकाशीयगुणव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरूपहेतुमति व्यभिचारि । तथा तुलायामेकदिगवस्थिताधिकगुरुत्वजन्यापरदिगवस्थितोन्नमनक्रियायां च व्यभिचारि । न च तत्रापि साध्यमस्तीति वाच्यम् । विप्रतिपत्तेः । न च क्रमेण स्थळद्वये व्यभिचारवारणायादृष्टाद्वारकेति प्रत्यक्षेति च गुणविशेषणम् । मन्त्रस्त्वाशुतरविनाशित्वाददृष्टद्वारैव विषचलनहेतुः गुरुत्वगुणश्च न प्रत्यक्ष इति वाच्यम् । तथात्वे स्वव्यधिकरणपदवैय्यर्थ्यापत्तेः । प्रत्यक्षपदेनैव प्रागुक्ततत्कृत्यलाभाददृष्टवदात्मसंयोगस्य कारणताभङ्गप्रसङ्गाच्च । चेष्टायामात्मकारणत्वप्राप्तावपि घटं प्रत्यात्मनः कारणत्वासिद्धेश्च ।।

एतेन मूर्तवृत्ति यत्कार्यं यदीयगुणनिमित्तकारणकं तत्तत्संयोगजन्यमिति व्याप्त्या संयोगकारणत्वसिद्धिः । अत्र शब्दजन्ये गगनसंयोगाजन्ये शब्द-

गोचरप्रत्यक्षे व्यभिचारनिरासाय मूर्तेति । तन्तुरूपजन्ये तन्तुसंयोगाजन्ये पटरूपे तन्निरासाय निमित्तेति । दण्डावयवीयदण्डनिमित्तके दण्डावयवसंयोगाजन्ये घटे तद्धारणाय गुणेति पदमिति **रुचिदत्तोक्तं** निरस्तम् । पूर्वोक्तोन्नमनक्रियायां व्यभिचारादित्यलम् ।

तर्कताण्डवम्

यच्चोक्तं ज्ञानमनित्यमेवेत्यादि व्याप्तिरमूलेति तन्न । लाघवेन कृतिजन्यत्वे जन्यत्वस्येव, मनोजन्यत्वे आत्मविशेषगुणत्वस्यैव, इन्द्रियजन्यत्वे साक्षात्कारत्वस्यैव, ज्ञानजन्यत्वे इच्छात्वस्यैव, इच्छाजन्यत्वे कृतित्वस्यैव, तन्त्रत्वेन व्याप्तेः समूलत्वे त्वदुक्तविपरीतस्येश्वरज्ञानाद्यनित्यत्वस्याप्यनुमातुं शक्यत्वात् ।

न्यायदीपः

नन्वस्तूपादानगोचरज्ञानं ज्ञानत्वेनैव कृतिहेतुर्न त्वपरोक्षत्वेन । अस्तु च घटादौ कुलालकृत्यादेरेव हेतुतया कुलालस्याहेतुत्वेन तद्दृष्टान्तेनेश्वरस्य क्षित्यादिहेतुतया सिद्ध्यभावः । तथापि तादृशज्ञानं कार्यत्वहेतोः पक्षधर्मताबलान्नित्यमेव सिध्यतीति तदाश्रयतयेश्वरसिद्धिर्भवतु को दोषः । न च ज्ञानमनित्यमेव, साक्षात्कारस्त्विन्द्रियजन्य एव, इच्छा ज्ञानजन्यैव, कृतिरिच्छाजन्यैवेत्यदिव्याप्तिबाधः । ज्ञानत्वानित्यत्वयोः कार्यकारणभावादेरभावेन व्याप्तेरमूलत्वात् । कार्यकृत्योश्च कार्यकारणभावादित्युक्तत्वादित्यतस्तन्निराह ।। **यच्चेति** ।। यथाहि कृतिजन्यत्वमेव प्रयोजकं लाघवात् न तु शरीरजन्यत्वादिकमित्युच्यते तथा आत्मविशेषगुणत्वादिरेव मनःप्रभृतिकारणजन्यत्वे प्रयोजक इति आत्मविशेषगुणत्वस्येश्वरीयज्ञानेच्छाकृतिषु तिसृष्वपि सत्त्वात् । साक्षात्कारत्वेच्छात्वकृतित्वरूपधर्मत्रयस्यापीश्वरी-

यज्ञानादौ प्रत्येकं सत्त्वेन च मनःप्रभृतिकारणजन्यत्वापत्त्या अनित्यत्वस्य दुर्वारत्वादिति भावः ।

सङ्ख्यापरिमाणाद्यात्मसामान्यगुणे मनोजन्यत्वाभावाद्विशेषगुणत्वस्येत्युक्तम् । मनोजन्यत्वं च मनस्त्वेन रूपेण तज्जन्यत्वं ध्येयम् । तेन मनःक्रियायामात्ममनःसंयोगादौ च मनोजन्ये नाव्याप्तिदोषः । एवं ज्ञानजन्यत्व इत्यादावपि ज्ञानत्वादिना तज्जन्यत्वं ध्येयम् ।

तर्कताण्डवम्

नचास्या व्याप्तेरस्मदादिज्ञानादिमात्रविषयकत्वात् कार्यत्वानुमानेन च पक्षधर्मताबलादस्मदादिभिन्नकर्तृसिद्ध्या भिन्नविषयकत्वादप्रतिबन्धकतेति वाच्यम् । सामान्यप्रत्यासत्त्यभ्युपगमे समानविषयकत्वात् । तदनभ्युपगमे स्थापनानुमानव्याप्तेरप्रसिद्धकर्तृसाधकत्व इवास्या अपि व्याप्तेः तद्बाधकत्वे समानप्रकारकत्वस्यैव तन्त्रत्वात् । अन्यथा बाधसत्प्रतिपक्षावप्यप्रतिबन्धकौ स्याताम् । प्रत्यक्षादिसिद्धाभावप्रतियोगि यच्छैत्यम् तदन्यस्यैव शैत्यादेः पक्षधर्मताबालात्सिद्धिरिति तत्रापि सुवचत्वात् (१२) ।

न्यायदीपः

''वयं तु ब्रूमः पक्षधर्मताबलान्नित्यत्वं सिध्यति'' इत्यादिना **मण्युक्तमेवाशङ्क्य** निराह ।। **न चास्या व्याप्तेरिति** ।। ज्ञानमनित्यमेव, साक्षात्कार इन्द्रियजन्य एव, इच्छा ज्ञानजन्यैव इत्यादिव्याप्तेरित्यर्थः ।। **मात्रेति** ।। पक्षधर्मताबललभ्याप्रसिद्धज्ञानाद्यविषयकत्वादित्यर्थः ।। **कर्त्रिति** ।। अपरोक्षज्ञानचिकीर्षाकृतिमत्पुरुषसिद्ध्येत्यर्थः ।

किमेतद्भिन्नविषयत्वं, यत्र धूमस्तत्राग्निरिति महानसादौ धूमवह्न्योर्व्याप्ति-ग्रहः, सामान्यप्रत्यासत्त्या पर्वतादिपक्षनिष्ठधूमवह्नी अपि विषयीकरोतीति त्वन्मतरीत्योच्यते, अथ सामान्यप्रत्यासत्तेरभावात् अन्यत्र जायमान-व्याप्तिग्रहः पक्षीयहेतुसाध्ये नावगाहते तथापि समानप्रकारकत्वमात्रेण पक्षीयहेतुसाध्ययोर्लिङ्गलिङ्गिभावे नियामक इति मीमांसकरीत्योच्यत, इति विकल्पौ हृदि कृत्वा क्रमेण निराह ।। **सामान्येति** ।। **समानेति** ।। कार्यत्वकृतिजन्यत्वरूपसमानप्रकारकत्वस्य च ज्ञानत्वानित्यत्व-रूपसमानप्रकारकत्वस्य चेत्यर्थः ।। **अन्यथेति** ।। उक्तव्याप्तेरबाधकत्व इत्यर्थः ।

बाधादेरप्रतिबन्धकत्वं व्यनक्ति ।। **प्रत्यक्षेति** ।। वह्निः शीतो वस्तुत्वादित्यादौ यत्पक्षधर्मताबललभ्यं शैत्यं तदन्यस्यैव शैत्यस्याभावः पक्षीभूतवह्निव्यतिरिक्ते गृहीत इति पक्षीभूतवह्नावेव वा यदि शैत्याभावो गृहीतः तदापि त्वगिन्द्रियगृहीताभावप्रतियोगिशैत्यादन्यदेवेदं साध्यमानं शैत्यमिति वक्तुं शक्यत्वादित्यर्थः ।

तर्कताण्डवम्

अदृष्टाद्वारकशरीरजन्यत्वमुपाधिश्च । नचायं पक्षमात्रव्यावर्तक-विशेषणवत्त्वात्, साधनघटितत्वाद्, व्याप्तिग्राहकतौल्येन हेतुसमान-योगक्षेमत्वाच्चानुपाधिरिति वाच्यम् । शरीरजन्यत्वे त्वदभिमतघट-त्वादेः अननुगतत्वेन तद्विपरीतस्य कर्तृजन्यत्वस्यैवावच्छेदकत्वेन साध्यव्यापकत्वात् । सति च साध्यव्यापकत्वे बाधोन्नीतस्य पक्षेतर-त्वस्य वह्निना धूमसाधन आद्रेन्धनप्रभववह्निमत्त्वरूपस्य साधन-घटितस्य, जलस्य रसवत्त्वेन गन्धवत्त्वे साध्ये पृथिवीत्वरूपस्य हेतुसमानयोगक्षेमस्य चोपाधितादर्शनात् (१३) ।

न च कर्तृजन्यत्वे लाघवेन जन्यत्वस्यैवावच्छेदकत्वाद्धेतोः व्याप्तिनिश्चये साध्यव्याप्यहेत्वव्यापकत्वादुपाधेः साध्याव्यापकतेति वाच्यम् । त्वदुक्तरीत्या कर्तृजन्यत्वे जन्यत्वमवच्छेदकं शरीजन्यत्वे तु घटत्वादिकं वा अथवा तद्विपर्ययेण शरीरजन्यत्वे जन्यत्वं कर्तृजन्यत्वे तु घटत्वादिकं वेति सन्देहेन सन्दिग्धोपाधेर्दुष्परिहरत्वात् । (१४)

न्यायदीपः

एवं कार्यत्वानुमानेऽसिद्ध्यप्रयोजकत्वबाधानुत्त्वोपाधिश्चाह ।। **अदृष्टेति** ।। क्षित्यादेरदृष्टद्वाराऽस्मदादिशरीरजन्यत्वात्साधनाव्यापकत्वाया-दृष्टाद्वारकेति शरीरेति च विशेषणम् । घटादौ साध्यव्यापकत्वं व्यक्तम् । उपाध्याभासोयमित्याशङ्क्य निराह ।। **न चायं पक्षमात्रेति** ।। तादृशस्या-प्युपाधित्वे पर्वतेतरत्वादेरप्युपाधितापत्त्याऽनुमानमात्रोच्छेद इति भावः ।। **साधनेति** ।। कार्यत्वापरपर्यायजन्यत्वघटितत्वादित्यर्थः । तादृशस्या-प्युपाधित्वेऽतिप्रसङ्गादिति भावः ।

यद्यपि समवेतत्वे सति जन्यत्वं साधनं न तु जन्यत्वमात्रम् । तथापि साधनविशेषितवत् साधनैकदेशविशेषितोपि नोपाधिरिति भावेनेदं योज्यम् । यद्वा ध्वंससाधारणपक्षत्वे जन्यत्वमेव हेतुरिति तदभिप्रायमेतत् ।

।। **व्याप्तिग्राहकेति** ।। यत्र सकर्तृकत्वं तत्र शरीरजन्यत्वमिति व्याप्तिग्राहकं भूयः सहचारदर्शनादिकं यत्र जन्यत्वं तत्र सकतृकत्वमिति व्याप्तिग्रहेऽपि तुल्यमिति व्याप्तिग्राहकतौल्येनेत्यर्थः । तथाच साध्य-व्यापकत्वानिश्चयान्नोपाधिरिति भावः ।

शङ्काग्रन्थ**मण्युक्त**मेव समाधिमाह ।। **शरीरजन्यत्व इत्यादिना**

दर्शनादित्यन्तेन ।। अननुगतत्वेनेत्यनन्तरं अनवच्छेदकत्वादिति शेषः । मूलारूढताभिव्यक्त्यर्थं तद्विपरीतेत्युक्तम् ।। **साध्येति** ।। सकर्तृकत्वरूप-साध्येत्यर्थः ।। **पक्षेतरत्वस्येति** ।। तेजोऽनुष्णं पदार्थत्वादित्यत्र अतेज-स्त्वस्येत्यर्थः । तत्र बाधस्थले इवेहापि पक्षभूतक्षित्यादितः शरीरजन्यत्व-रूपोपाधेर्व्यावृत्त्या तद्व्याप्यसाध्याभावस्यापि निर्णयादिति भावः ।

।। **वह्निनेत्यादि** ।। ननु तत्र धूमवत्त्वे वह्निमत्त्वमात्रमप्रयोजकम् । अनुकूलतर्काभावात् । [१]साधनघटितोऽपि स्यादुपाधिरिति चेत्तुल्यं प्रकृतेऽपि त्वदभिप्रेतसकतृकत्वे कार्यत्वहेतोरप्रयोजकत्वस्य प्रागुपपादनादिति भावः ।

।। **हेतुसमानयोगक्षेमस्येति** ।। रसवत्त्वस्य गन्धवत्त्वेन व्याप्तिः पृथिवीत्वोपहिते ग्राह्या । नत्वन्यत्र । सा च तत्र येन मानेन ग्राह्या तेनैव च गन्धवत्त्वपृथिवीत्वयोरपि सिद्ध्यतीति भावः । ''लाघवेन बाधकं विना कर्तृजन्यत्वे हि जन्यत्वमवच्छेदकं न तु शरीरजन्यत्वं गौरवात् । तथाच न शरीरजन्यत्वं सकतृकत्वव्यापकम् । घटादौ त्वार्थः समाजः । घटत्वेन शरीरजन्यत्वनियमात्'' इत्यादिना **मण्युक्त**माशङ्क्य निराह ।। **न च कर्त्रिति** ।। **हेतोरिति** ।। जन्यत्वहेतोरित्यर्थः । ध्वंससाधारणपक्षत्वपक्षे जन्यत्वस्यैव हेतुत्वादितिभावः ।

तर्कताण्डवम्

नच कर्तृजन्यत्वं प्रथमं ज्ञातं सच्छरीरजन्यतावच्छेदकत्वेन कल्प्यम् । तच्च कार्यत्वावच्छिन्नमेव ज्ञातमित्युपजीव्यविरोधान्न कर्तृजन्यत्वं शरीरजन्यतावच्छेदकमिति वाच्यम् । त्वदुक्तरीत्या

१. अत्र ''अतः'' इति भाव्यमिति भाति । अथवा ''ननुतत्र'' इत्यारभ्य ''इतिचेत्'' इति पर्यन्तं एकं वाक्यम् ।

शरीरजन्यत्ववत्तद्विपरीतकर्तृजन्यत्वस्यापि प्रथमं घटत्वाद्यवच्छेदेनैव ज्ञानसम्भवात् (१५) ।

किञ्च कृतिकार्ययोः कार्यकारणभावग्रहेऽपि न ज्ञानेच्छयोः सिद्धिः । आत्मनः शरीरसम्बन्धे ज्ञानगतकार्यत्वस्येव ज्ञानादिसम्बन्धेऽपि त्वदुक्तकृतित्वमात्रविपरीतकृतिगतकार्यत्वस्यैव तन्त्रत्वात् ।

नच कृतिवज्ज्ञानेच्छयोरपि स्वातन्त्र्येण कार्यहेतुत्वात् तत्सिद्धिः । आत्मसंयोगे सत्यपि कृतिव्यतिरेकेण इव कृतौ सत्यां ज्ञानादिव्यतिरेकेण कार्यव्यतिरेकादर्शनात् ।

नच कृतेर्विषयप्रत्यासत्त्यर्थं ज्ञानापेक्षा कृतिविषययोः ज्ञानस्यैव प्रत्यासत्तित्वादिति वाच्यम् । कृत्यजनकज्ञानस्य प्रत्यासत्तित्वेऽति-प्रसङ्गात्तज्जनकज्ञानस्य च कृतिकाले नष्टत्वेन अप्रत्यासत्तितया ज्ञाने ज्ञानस्वरूपस्येव कृतावपि कृतिस्वरूपस्यैव प्रत्यासत्तित्वात् । अन्यथा कृतिकाले ज्ञानाभावेन घटं करोमीति घटकृत्योः सम्बन्धधीर्न स्यात् । तस्मात् त्वदुक्तकृत्यादित्रयविपरीतकृतिमात्रवत्त्वेनाप्यनुमितिः स्यात् (१६) ।

किञ्चास्तु कृतिप्रत्यासत्तित्वेन ज्ञानसिद्धिः । इच्छा तु कथं सिद्ध्येत् । तथा च त्वदुक्तत्रितयविपरीतद्वितयवत्त्वेनापि अनुमितिः स्यात् । (१७)

न्यायदीपः

प्रथमं कर्तृजन्यत्वे जन्यत्वमवच्छेदकं क्लृप्तमिति तद्विरोधेन शरीरजन्यत्वे न सकर्तृकत्वमवच्छेदकं अत एव न सन्दिग्धोपाधित्वमित्यादि **मण्युक्त**-माशङ्क्य निराह ।। **न च कर्तृजन्यत्वमिति** ।। **तच्चेति** ।। कर्तृजन्यत्व-मित्यर्थः । कर्तृजन्यत्वे लाघवेन जन्यत्वस्यैव अवच्छेदकत्वात् । कार्यत्वा-

वच्छिन्नं कार्यत्वव्यापकम् । कर्तृजन्यत्वं शरीरजन्यतावच्छेदकं न सम्भवति । तस्य कार्यत्वरूपहेत्वव्यापकत्वात् । शरीरजन्यत्वं सकर्तृकत्वव्याप्यकार्यत्वाव्यापकं सकर्तृकत्वव्यापकं चेत्यस्यायोगात् । अत उपजीव्यविरोधान्न कर्तृजन्यत्वं शरीरजन्यतावच्छेदकमित्यर्थः ।

।। **शरीरजन्यत्ववदिति** ।। शरीरजन्यत्वं घटत्वादिनाऽवच्छिद्यते, यत्र घटत्वादिकं तत्र शरीरजन्यत्वमिति, कर्तृजन्यत्वं तु कार्यत्वेन, यत्र कार्यत्वं तत्र कर्तृजन्यत्वमिति, एतच्च प्रथमं ज्ञायत इति यथा त्वयोच्यते, तथैव कर्तृजन्यत्वं घटत्वादिनैवावच्छिद्यते यत्र घटत्वादि तत्र कर्तृजन्यत्वमिति प्रथमं चास्य ज्ञानं सम्भवत्येव । ग्राहकसत्त्वात् । तथा च कर्तृजन्यत्वं घटत्वादिनावच्छिन्नतया प्रथमं ज्ञातमिति तद्विरोधान्न कार्यत्वावच्छिन्नत्वेन पश्चाज्ज्ञातुं शक्यमिति कार्यत्वस्यैव कर्तृजन्यत्वाव्याप्यत्वात्तेन कथं त्वदभिमतसकर्तृकत्वानुमानम् । प्रत्युत शरीरजन्यत्वावच्छेदकत्वेनैव कार्यत्वस्यावगमात्तेन तदनुमानमेव स्यादित्यर्थः ।

ननु यत्सामान्यविशेषन्यायेन [१]कृतित्वकार्यत्वयोरवच्छेद्यावच्छेदकभावग्रहे सति कृतिजन्यत्वव्याप्यकार्यत्वाव्यापकत्वात्साध्याव्यापकत्वं शरीरजन्यत्वस्येति चेन्न । प्रागेव यत्सामान्येति न्यायलभ्यपक्षस्य खण्डनात् ।

अभ्युपेत्यापि कार्यत्वेन कृतिजन्यत्वानुमानम् । ज्ञानचिकीर्षावत्त्वांशे शरीरजन्यत्वमुपाधिर्भवत्येव । न हि कृतित्वकार्यत्वयोरिव ज्ञानत्वकार्यत्वयोरिच्छात्वकार्यत्वयोर्वा व्याप्यव्यापकभावे बीजमस्ति । येन ज्ञानेच्छाजन्यत्वव्याप्यकार्यत्वाव्यापकत्वाच्छरीरजन्यत्वं साध्याव्यापकं स्यादित्यत आह ।। **किञ्चेति** ।। ग्रहेऽपीत्यस्य ग्रहात्कार्यत्वेन कृतिसिद्धावपीत्यर्थो

---

१. "कृतिजन्यत्व" इति पाठेन भाव्यमिति भाति ।

ध्येयः ।। **न ज्ञानेच्छयोः सिद्धिरिति** ।। तयोः शरीरसम्बन्धनिमित्त-त्वादीश्वरे च त्वया तदनङ्गीकारादिति भावः ।

ननु कार्यत्वेन कृतिसिद्धावुपेतायां कृतेर्ज्ञानेच्छापूर्वकत्वस्य घटकृत्यादौ दर्शनात् कृत्यानुषङ्गिकतया तयोरपि सिद्धिः स्यादेव । न च शरीरसम्बन्धे तन्त्रयोर्ज्ञानेच्छयोर्भावात् तत्प्रयुक्तशरीरसम्बन्धसिद्धिः । तस्य जन्यज्ञानादि-प्रयुक्तत्वादित्यतः तर्हि जन्यकृतावेव ज्ञानेच्छापूर्वकत्वं नत्वजन्यकृताविति कार्यत्वस्य पक्षधर्मताबलान्नित्यकृतिसिद्ध्या न ज्ञानेच्छयोः सिद्धिरिति भावेनाह ।। **आत्मन इति** ।।

नन्वस्तु कार्यत्वेन कृतेरिव स्वातन्त्र्येण ज्ञानादिसिद्धिः । शरीरजन्य-त्वोपाधेः साध्यव्याप्यहेत्वव्यापकत्वेन निराससम्भवादिति भावेनाशङ्क्य निराह ।। **न चेति** ।। यद्वा ज्ञानेच्छयोः सिद्धिः किं कृत्यानुषङ्गिकत्वेनोत स्वातन्त्र्येणाथ ज्ञातस्यैव कृतिविषयत्वात्कृतेः स्वतोऽर्थासम्बद्धत्वाद्विषयेण सह कृतेः प्रत्यासत्तित्वेन । आद्यस्योत्तरम् ।। **आत्मन इत्यादि** ।। द्वितीयमाशङ्क्य निराह ।। **न चेत्यादि** ।। **आत्मसंयोग इति** ।। आत्मनो विभुत्वेन त्वन्मते सदा संयोगादिति भावः । तृतीयमाशङ्क्य निराह ।। **न च कृतेरिति** ।। **अतिप्रसङ्गादिति** ।। चैत्रकृतौ मैत्रज्ञानस्यापि तथात्वा-पत्तेरिति भावः ।

नन्वस्त्वतिप्रसङ्गभिया [१]जन्यकृतावन्यत्र जनकज्ञानस्य प्रत्यासत्तित्वम् । एवं च ज्ञानस्य कृतिप्रत्यासत्तित्वे क्वचित्सिद्धे सतीहागत्याऽनीदृशस्याऽप्यस्तु प्रत्यासत्तित्वमित्यतोऽन्यत्रापि तन्नास्तीत्याह ।। **तज्जनकेति** ।। अनन्य-गत्याऽस्तु नष्टस्यापि तथात्वमित्यत आह ।। **ज्ञान इति** ।। उक्तं च ''न प्रयोजनवत्त्वात्'' इत्याधिकरणसुधायां ''महातात्पर्ययुक्तेश्च''

१. ''**जन्यकृतौ जनकज्ञानस्य प्रत्यासत्तित्वं**'' इति पाठेन भाव्यमिति भाति ।

इत्येतद्व्याख्यावसरे ''प्रयत्नस्य विषयनियमार्थं बुद्धिरेष्टव्येति चेन्न बुद्धिवत्स्वतोविषयप्रवणतोपपत्तेः इतीति भावः ।। **कथं सिध्येदिति** ।। किं कृत्यानुषङ्गिकत्वेनाथ स्वातन्त्र्येणोत कृतिप्रत्यासत्तित्वेन । न पक्षत्रयमपि सम्भवति । पूर्वोक्तदोषादिति भावः ।

तर्कताण्डवम्

किञ्चोपाधेर्व्यभिचारोन्नायकत्वपक्षे त्वदुक्तसकर्तृकत्वविपरीताकर्तृकत्वस्य शरीराजन्यत्वेनापि अनुमातुं शक्यत्वात् सत्प्रतिपक्षता । नच कर्त्रजन्यत्वेऽजन्यत्वस्यैव तन्त्रत्वादप्रयोजको हेतुः । शरीरजन्यत्वे कर्तृजन्यत्वं वावच्छेदकं कर्तृजन्यत्वे कार्यत्वं वेति सन्देहस्योपापादितत्वेन स्थापनाहेतुतौल्यात् (१८) ।

न्यायदीपः

एवं कार्यत्वहेतोः सोपाधिकत्वमुक्त्वा सत्प्रतिपक्षतां चाह ।। **किञ्चेत्यादिना** ।। ननु प्रमाणलक्षणे ''स एवोपाधिदोषेति'' इत्युक्तोपाधेः प्रतिपक्षत्वेनैव दोषत्वोपगमात्, प्राचीनन्यायमते तथैवाभ्युपगमाच्चोपाध्युक्त्यैव तद्व्यतिरेकरूपप्रतिपक्षस्योक्तत्वात् किञ्चेति दोषान्तरतयोक्तिः अयुक्तेत्यत आह ।। **व्यभिचारेति** ।। मणिकृन्मते व्यभिचारोन्नायकत्वोपगमेनोपाध्युक्त्या हेतोर्व्यभिचारबुद्धेरेवोदयेन प्रतिपक्षबुद्धेरनुदयादिति भावः ।। **विपरीतेति** ।। विमतं क्षित्यादि अकर्तृकं शरीराजन्यत्वाद्गगनवदित्यनुमातुं शक्यत्वादित्यर्थः । अत्र शरीराजन्यत्वमदृष्टाद्वारकशरीरजन्यत्वाभावो ध्येयः । तेनादृष्टद्वाराऽस्मदादिशरीरजन्यत्वादसिद्धिरिति शङ्कानवकाशः ।। **अप्रयोजक इति** ।। अकर्तृत्वे अजन्यत्वमात्रस्य प्रयोजकत्वादिति भावः । ''सन्देहस्येति प्रतिपक्षतानिर्वाहायोक्तम् । वस्तुस्तु कर्तृजन्यत्वे कार्यत्वं नावच्छेद-

कम् । तेन विनापि तस्योपपत्तेः । अन्यथा कर्मजन्यतावच्छेदकमपि कार्यत्वं स्यादित्यादिना कार्यत्वहेतोरप्रयोजकत्वस्योक्तत्वादिति ।। **तौल्यादिति** ।। तथा च नाप्रयोजकत्वमिति भावः ।

तर्कताण्डवम्

अथ मतं आकाशादावजन्यत्वस्यैवाकर्तृकत्वेन व्याप्तिग्रहाच्छरीर-विशिष्टे तस्मिंस्तदभावाद् व्याप्यत्वासिद्धिः । तथा च विशेषणविशेष्य-योरेकैव व्याप्तिर्व्यासज्यवृत्तिरिति वा, विशिष्टव्याप्तिशब्दार्थः, विशेष्य-निष्ठैव व्याप्तिर्विशेषणेन अवच्छिद्यत इति वा । तत्र व्यासज्यवृत्तित्वे केवलविशेष्यवृत्तित्वासम्भवो हेतुः । विशेषणेनावच्छेद्यत्वे तु विशेष्य-तावच्छेदकस्य व्याप्यतावच्छेदकत्वासम्भवः । प्रकृते तु नोभयम् । व्याप्तौ केवलविशेष्यरूपाजन्यत्वनिष्ठतायाः विशेष्यत्वावच्छेदका-वच्छिन्नतायाश्च सम्भवात् । नच व्याप्तिवत्पक्षधर्मताया अप्यनु-मित्यङ्गत्वात्तत्सिद्ध्यर्थं विशेषणमिति वाच्यम् । व्याप्तिसमानाधि-करणाया एव तस्या अङ्गत्वेन अत्र विशेष्यनिष्ठव्याप्तिव्यधिकरणाया विशिष्टवृत्तिपक्षधर्मताया अनङ्गत्वात् ।

नच चक्षुस्तैजसं रूपादिषु पञ्चसु मध्ये रूपस्यैव ग्राहकद्रव्यत्वात् इत्यादौ विशिष्टवृत्तिपक्षधर्मता विशेष्यवृत्तिव्याप्तेरङ्गं दृष्टमिति वाच्यम् । तत्राप्यवधारणमहिम्ना रूपेतरविशेषगुणाव्यञ्जकत्वे सति रूपग्राह-कत्वस्य हेतुत्वेन विशेष्यमात्रस्य मनसि व्यभिचारितया व्याप्तेरपि विशिष्टनिष्ठत्वात् । नचात्र अजन्यत्वरूपस्य विशेष्यस्य व्यभि-चारोऽस्ति ।

यद्वा मनसि व्यभिचारवारकस्यावधारणस्य रूपादिष्विति विशेषणं विनाऽलब्धात्मकस्य व्यभिचारवारणाशक्त्या विशेषणस्यापि

तल्लाभसम्पादनद्वारा व्यभिचारवारणप्रयोजकत्वमेव । अन्यत्वं तु शरीरविशेषणं विनापि गगनादौ लब्धात्मकम् ।

न्यायदीपः

अपि च ''शरीरजन्यत्वे व्यर्थविशेषणत्वम् । लाघवेनाजन्यत्वस्यैव व्याप्यत्वा''दित्यादिना मण्याद्युक्तं निष्कृष्यानुवदति ।। **अथ मतमित्यादिना अत्रोच्यते इत्यन्तेन** ।। **विशिष्टव्याप्तीति** ।। विशिष्टहेतुनिष्ठा व्याप्तिरिति शब्दार्थ इत्यर्थः ।। **तत्रेति** ।। कल्पद्वय इत्यर्थः ।। **हेतुरिति** ।। यथा शब्दोऽनित्यः भावकार्यत्वादित्यादौ ।। **विशेषणेनेत्यादि** ।। यथा कृष्णागरुवह्निमान् सुरभिधूमवत्त्वादित्यादाविति भावः ।। **विशेष्यत्वावच्छेदकेति** ।। अजन्यत्वत्वरूपावच्छेदकेत्यर्थः ।

रूपादिषु पञ्चस्विति स्वरूपकथनं मत्वाह ।। **तत्रापीति** ।। ननु रूपस्यैवेत्यादेरेव रूपेतरविशेषगुणेत्याद्यर्थकत्वे रूपादिषु पञ्चस्विति व्यर्थम् । अतो रूपेतराव्यञ्जकत्वमेव तदर्थो वाच्यः । तथा च चक्षुषो रूपत्वस्यापि व्यञ्जकतया हेतोरसिद्ध्यापत्त्या तन्निरासकविशेषणविशिष्ट एव पक्षधर्मता, व्याप्तिस्तु विशेष्य इत्यरुचेरप्रसिद्धिवारकत्वेन सार्थक्यं मन्वान आह ।। **यद्वेति** ।। **अलब्धात्मकस्येति** ।। काप्यप्रसिद्धेर्मनःप्रभृतेः रूपत्वस्यापि ग्राहकत्वादिति भावः ।

तर्कताण्डवम्

अथ मतम् । नीलधूमादावपि विशिष्टनिष्ठैव व्याप्तिः । तत्र व्यभिचारोपाध्योरभावात् । अन्यथा विशेषणानामव्याप्यत्वे निराश्रया व्याप्तिः स्यात् । किं तु नीलधूमत्वं न तदवच्छेदकम् । गौरवात् । अपि तु धूमत्वमेव ।

नच व्यभिचारावारकनैल्यविशेषणवत्त्वेनाज्ञात एव व्याप्तिग्रहात्तद्वत्त्वेन ज्ञाते व्याप्तिप्रमाविरह इति वाच्यम् । सहचारदर्शने व्यभिचारादर्शने च सति द्रव्यत्वादिमत्तया ज्ञातेऽपि धूमेऽव्यभिचारादिरूपव्याप्तिग्रहादिति चेन्मैवम् ।

न्यायदीपः

''नीलधूमादौ व्याप्तिरस्त्येव । अन्यथा विशेषणानामव्याप्यत्वे निराश्रया व्याप्तिः स्या''दित्यादिना **मण्युक्तविशिष्टनिष्ठव्याप्तिपक्षाशङ्कामनुवदति ।। अथ मतमित्यादिना मैवमित्यन्तेन ।। नीलधूमादावपीति ।।** तथा च शरीराजन्यत्वेऽपि विशिष्टहेतौ व्याप्तिरस्त्येवेति तत्र व्याप्यसिद्धिव्युत्पादनमयुक्तमिति भावः ।

तर्कताण्डवम्

अनुमितिप्रयोजकव्याप्तिविरहो हि व्याप्यत्वासिद्धिः । तत्प्रयोजिका च व्याप्तिः साध्यसामानाधिकरण्यावच्छेदकरूपवत्त्वलक्षणा न त्वव्यभिचाररूपाऽनौपाधिकत्वरूपा वा । गौरवात् । अपदार्थत्वेन अवाक्यार्थत्वेन चोदाहरणवाक्येन तदप्रतीतेश्च ।

तद्विरहश्च सामानाधिकरण्याभावेन वा यथा निरधिकरणे वस्तुनि, सत्यपि तस्मिंस्तस्य साध्यनिरूपितत्वविरहाद्वा यथा विरुद्धे, सतोरपि तयोर्धर्मस्यावच्छेदकत्वविरहाद्वा यथेयं पृथिवी द्रव्यत्वादित्यत्र द्रव्यत्वे । व्यर्थविशेषणे च नीलधूमादौ सामानाधिकरण्ये तस्य साध्यनिरूपितत्वे च सत्यपि नीलधूमत्वस्य वह्निनिरूपितसामानाधिकरण्यावच्छेदकत्वविरहाद् व्याप्तिविरहः ।

न्यायदीपः

विशिष्टहेतोर्व्याप्तिविरहवादी अवान्तरविशिष्टनिष्ठव्याप्तिपक्षचोद्यं व्याप्तिवादे **मणि**कृदभिमतव्याप्तिलक्षणमुपेत्य निराह ।। **मैवमित्यादिना** ।। **गौरवादिति** ।। नञ्घटितत्वादिति भावः ।। **उदाहरणेति** ।। यो यो धूमवानसावसावग्निमानित्यादिरूपवाक्येन धूमे वह्निरूपसाध्येनैकाधिकरण्यस्य तदवच्छेदकधूमत्ववत्त्वस्य च प्रतीतेरिवाव्यभिचारादेरप्रतीतेरित्यर्थः ।। **वस्तुनीति** ।। पर्वतोऽग्निमान् गगनवत्त्वादित्यत्र गगनाख्यवस्तुनीत्यर्थ ।। **तस्मिन्निति** ।। सामानाधिकरण्य इत्यर्थः ।। **विरुद्ध इति** ।। पर्वतोऽग्निमान् ह्रदत्वादित्यादावित्यर्थः ।

।। **द्रव्यत्व इति** ।। तत्र सामानाधिकरण्यस्य तस्मिन्पृथिवीत्वरूप-साध्यनिरूपितत्वस्य चोभयस्य भावेऽपि द्रव्यत्वत्वं न पृथिवीत्वसामानाधि-करण्यावच्छेदकम् । द्रव्यत्वस्य पृथिवीत्वमात्रसामानाधिकरण्याभावादिति भावः । अस्तु । प्रकृते किमित्यत आह ।। **व्यर्थेति** ।। आदिपदेन शरीराजन्यत्वादिग्रहः ।। **अवच्छेदकत्वविरहादिति** ।। गौरवादिति भावः । तथा च विशिष्टो हेतुर्व्याप्तिशून्य एवेति भावः ।

तर्कताण्डवम्

नन्विहावच्छेदकत्वं न तावदवच्छित्तिप्रत्ययहेतुत्वादिकम् । आत्माश्रयात् । नाप्यवच्छेद्यान्यूनानतिरिक्तवृत्तित्वम् । वह्नि-सामानाधिकरण्यवत्त्यालोकादावविद्यमाने धूमत्वादावपि तदभावात् । किन्त्वनतिरिक्तदेशकत्वम् । तच्च [१]नीलधूमवत्त्वेऽप्यस्ति । नच तत्रातिव्याप्तिवारणायावच्छेद्यानतिरिक्तदेशकधर्मान्तराघटितत्वे सतीति

१. "नीलधूमत्वे" इति पाठेन भाव्यमिति भाति ।

विशेष्यते । नीलधूमत्वस्य च धूमत्वरूपतादृशधर्मान्तरघटितत्वान्न तदवच्छेदकतेति वाच्यम् । एवं सति व्याप्तिशरीरस्याभावद्वयघटितत्वेन अतिगौरवात् । उदाहरणवाक्ये तदभावाच्चेति चेन्मैवम् ।।

न्यायदीपः

विशिष्टनिष्ठव्याप्तिवादी व्याप्तिवादे पक्षधराद्युक्तमवच्छेदकत्वनिरुक्तिनिष्कर्षमनुवदन्नीलधूमत्वादावपि साध्यसामानाधिकरण्यावच्छेदकत्वमस्तीति शङ्कते ।। **नन्वित्यादिना मैवमित्यन्तेन** ।। आदिपदेनावच्छेद्यव्याप्यत्वावच्छेद्यसमनियतत्वादिग्रहः ।। **आत्माश्रयादिति** ।। हेतुत्वस्य नियतपूर्ववृत्तित्वरूपत्वान्नियमस्य व्याप्तितया व्याप्तिज्ञाने व्याप्तिज्ञानस्यावश्यकत्वादिति भावः ।। **अतिव्याप्तीति** ।। प्रमेयधूमत्वद्रव्यधूमत्वनीलधूमत्वैतद्धूमत्वादावपि वह्निसामानाधिकरण्यरूपावच्छेद्यानतिरिक्तदेशकत्वसत्त्वादतिव्याप्तीत्यर्थः ।। **अभावद्वयेति** ।। साध्यसामानाधिकरण्यानतिरिक्तदेशकधर्मान्तराघटितत्वे सति साध्यसामानाधिकरण्यानतिरिक्तदेशकत्वमित्यत्र यद्यपि नञ्त्रयप्रवेशादभावत्रयं तथापि अनतिरिक्तेत्यस्यैव द्विरुपादानादभावद्वयेत्युक्तम् । यद्वा सत्यन्तप्रविष्टनञ्द्वयापेक्षया अभावद्वयेत्युक्तम् ।

केचित्तु तादृशधर्मान्तराघटितत्वे सति साध्यसामानाधिकरण्यदेशत्वं तदर्थः । एवं चाभावद्वयमेवेत्याहुः । तच्चिन्त्यम् । प्रमेयत्वद्रव्यत्वादावतिव्याप्तेः ।

तर्कताण्डवम्

अवच्छेदकत्वं हि विशेषणताविशेषरूपः स्वरूपसम्बन्धः । नचास्याप्युदाहरणवाक्यादप्रतीतिः । उदाहरणस्थधूमपदोपस्थापितस्य धूमत्वस्योदाहरणवाक्योपस्थापितेन धूमगतवह्निसामानाधिकरण्येन

सहावच्छेदकत्वरूपसम्बन्धस्य संसर्गविधया भानात् । स च स्वरूप-सम्बन्धो लघुनि धूमत्व एव कल्प्यते । न तु गुरुणि नीलधूमत्व इति नीलधूमे न व्याप्तिः ।

नच लघुधूमत्वमपि नीलधूमेऽस्तीति वाच्यम् । हेतुतावच्छेद-कस्यैव हि सामानाधिकरण्यावच्छेदकता वाच्या । उपस्थितत्वात् । धर्मान्तरकल्पने गौरवाच्च । इह तु हेतुतावच्छेदकत्वेनोपात्तस्य नीलधूमत्वस्य शरीराजन्यत्वस्य च सामानाधिकरण्यानवच्छेदकत्वेन व्याप्यत्वासिद्धेः ।

नचैवं विमतो निर्धूमः आर्द्रेन्धनप्रभववह्निरहितत्वात्, सुरभि धूमरहितः चन्दनप्रभववह्निरहितत्वादित्यादावपि व्याप्यत्वासिद्धिः स्यादिति वाच्यम् । तत्र कार्यकारणभावमूलकानुकूलतर्केण वह्नि-रहितत्व इव आर्द्रेन्धनप्रभववह्निरहितत्वादावपि व्याप्तिनिश्चयादिति ।

न्यायदीपः

को विशेषणताविशेषः । विशिष्टज्ञानजनकज्ञानविषयत्वादिरूपत्वे चात्माश्रयादित्यत आह ।। **स्वरूपसम्बन्ध इति** ।। ननु कुत एवमिति चेत् । अवच्छेदकत्वानिरुक्तेरिति वदन्ति ।

तथाहि– यदुक्तमवच्छेद्यानतिरिक्तदेशकत्वमवच्छेदकत्वमिति । तन्न । इदं सुखि आत्मत्वादित्यादावीश्वरात्मनि सुखाभावसमानाधिकरणे व्यभिचारिणि गतत्वात् । आत्मत्वस्य जीवात्मनि सुखसामानाधि-करण्येनात्मत्वत्वस्य सुखसामानाधिकरण्यानतिरिक्तवृत्तित्वात् ।

न च साध्याभावसामानाधिकरणावृत्तित्वमवच्छेदकत्वम् । आत्मत्वं त्वीश्वरात्मनि सुखाभावसमानाधिकरणमेवेति वाच्यम् । केवलान्वयि-साध्यकहेतावभावात् । तत्र साध्याभावाप्रसिद्धेः ।

नापि साध्यसामानाधिकरण्याभावाधिकरणावृत्तित्वमवच्छेदकत्वम् । आत्मत्वं त्वीश्वरात्मवृत्तित्वावच्छेदेन सुखसामानाधिकरण्याभावाधिकरणमेवेति वाच्यम् । वृक्षः एतत्कपिसंयोगवान् एतद्वृक्षत्वादित्यादावव्याप्तेः । एतद्वृक्षत्वस्यापि मूलावच्छेदेनैतत्कपिसंयोगसामानाधिकरण्याभावाधिकरणत्वात् । यदि चैतद्वृक्षत्व एतत्कपिसंयोगसामानाधिकरण्यस्य सत्त्वात्कथं तदभाव इति । तर्ह्यात्मत्वेऽपि तुल्यमेतत् । विरुद्धयोरप्यवच्छेदकभेदेनाविरोध इत्येतस्यापि साम्यात् ।

नापि अधिकरणैकदेशानवच्छेदेन साध्यसामानाधिकरण्याभाववदवृत्तित्वं तत् । एतद्वृक्षत्वे चाधिकरणैकदेशमूलावच्छेदेनैव साध्यसामानाधिकरण्यमिति विशिष्टव्यतिरेकस्य तत्रापि सत्त्वान्नाव्याप्तिः । आत्मत्वे तु ईश्वररूपाधिकरणवृत्तित्वावच्छेदेनैव साध्यसामानाधिकरण्याभाववत्त्वम् । न तु तदैकदेशावच्छेदेनेति न तत्रातिव्याप्तिः । केवलान्वयिनि च तादृशसाध्यसामानाधिकरण्याभाववत्त्वं गगनादौ प्रसिद्धमिति न कोपि दोष इति युक्तम् । सुखादेरव्याप्यवृत्तितया जीवात्मन्यप्यात्मत्वस्य सुखसामानाधिकरण्याभावाधिकरणतया तत्र तदेकदेशवृत्तित्वस्यैवावच्छेदकत्वादिति दिक् ।

तस्मादवच्छेदकत्वानिरुक्तेः स्वरूपसम्बन्ध एवावच्छेदकत्वमिति नीलधूमेऽस्तीति । तथा च तादृशावच्छेदकधर्मवत्त्वान्नीलधूमोऽपि व्याप्य एवेति शङ्कितुर्भावः ।

।। न चैवमिति ।। गुरुधर्मस्य व्याप्यतानवच्छेदकत्वे कारणविशेषाभावेन कार्यविशेषाभावानुमानं न स्यादित्यर्थः ।

तर्कताण्डवम्

अत्रोच्यते । व्यभिचारज्ञानस्य ह्यनुमितिप्रतिबन्धकत्वमनुभवसिद्धम् । त्वदनुमतं च । तच्च न बाधादिवत् साक्षात्साध्य-

विरुद्धविषयकत्वात् । किं तु करणीभूतव्याप्तिज्ञानविघटनद्वारा । तच्च व्याप्तेस्त्वदुक्तसाध्यसामानाधिकरण्यावच्छेदकरूपवत्त्वविपरीते व्यभिचाराभावविशिष्टसहचाररूपत्व एव युक्तम् । विरुद्धवत्सहचार-रूपविशेष्यांशेनाविरोधेऽपि व्यभिचाराभावरूपविशेषणांशेन सह वैषयिकविरोधात् । न तु साध्यसामानाधिकरण्यावच्छेदकरूप-वत्त्वात्मकत्वे तद्युक्तम् । परस्परविरहानात्मकत्वेन साक्षादविरोधात् ।

न्यायदीपः

एवं नीलधूमदृष्टान्तेन शरीराजन्यत्वस्य व्याप्यत्वासिद्धत्वे पूर्वपक्षिते सति न मण्युक्तं व्याप्तिस्वरूपमनुमित्यङ्गम् किन्त्वन्यदेव तच्चास्ति नीलधूमे शरीराजन्यत्वे च अतो न व्याप्तिशून्यत्वमिति भावेन सिद्धान्तयति ।। **अत्रोच्यत इत्यादिना ।। त्वदनुमतं चेति ।।** अनुमितिकारणीभूताभाव-प्रतियोगियथार्थज्ञानविषयत्वमिति व्यभिचारादिहेत्वाभासलक्षणोक्तेरिति भावः ।

अनुमितिप्रतिबन्धकत्वं हि द्वेधा । अनुमितिविषयविरोधिविषयत्वेन साक्षादेव वा, तत्करणीभूतज्ञानविषयाभावावगाहित्वेन तत्करणविघटकत्वेन वा । तत्राद्यं बाधप्रतिपक्षयोरेव । न त्वन्यस्य । द्वितीयं तु स्यादिति भावेनाह ।। **तच्चेत्यादिना ।। व्याप्तिज्ञानेति ।।**

यद्यपि परामर्श एवानुमितिकरणम् तार्किकमते । यथाह ''लिङ्ग-परामर्शोऽनुमान''मिति । तथापि करणस्य व्यापारवत्त्वनियमात्परामर्शस्य करणत्वे व्यापाराभावाव्याप्तिज्ञानं करणं परामर्शोऽवान्तरव्यापार इति लिङ्गकरणतावादे मणिकृदुक्तरीत्या करणीभूतव्याप्तिज्ञानेत्युक्तम् ।। **तच्चेति ।।** व्याप्तिज्ञानविघटकत्वमित्यर्थः । मूलारूढतां दर्शयितुं विपरीत इत्युक्तिः ।

युक्तमित्येतद् व्यनक्ति ।। **विरुद्धवदिति ।।** साध्याभावमात्रसम्बद्ध-

विरुद्धहेत्वाभासवदित्यर्थः ।। **वैषयिकेति** ।। भावाभावरूपविरुद्धविषय-कृतेत्यर्थः ।। **तद्युक्तमिति** ।। व्याप्तिज्ञानविघटकत्वं युक्तमित्यर्थः ।

तर्कताण्डवम्

नच व्यभिचारेण हेतुतावच्छेदकस्य साध्यसामानाधिकरण्या-नवच्छेदकत्वानुमानात्परम्परया विरोधः । व्यभिचारज्ञानानन्तरमेव व्याप्तिविरहज्ञानानुभवेन परम्पराकल्पने अनुभवविरोधात् । बाधादिव-त्साक्षादनुमितिप्रतिबन्धकत्वस्य असिद्ध्यादिवत्परामर्शविषया-भावत्वस्य चाभावेनोपाधिवद्धेत्वाभासत्वोपाधित्वाभावापत्तेश्च ।

नचोदाहरणवाक्येन तदप्रतीतिः । तत्र वीप्साऽस्तीति मते "नित्यवीप्सयोः" इति सूत्रेण व्याप्तिप्रतिपादनेच्छायां सत्यामादिष्ट-स्यैकार्थवाचकत्वेनैकपदरूपस्य योय इत्यस्य शब्दस्यानुमित्यङ्गत्वेन निर्णीताव्यभिचारविशिष्टसहचाररूपव्याप्तिवाचकत्वोपपत्तेः ।

वीप्सा नास्तीति मते उदाहरणोत्पादितसहचारदर्शनसहकृतेन मनसैवोक्तव्याप्तिज्ञानसम्भवात् । तथाच व्यभिचाराभावविशिष्ट-सहचाररूपा व्याप्तिर्नीलधूमे शरीराजन्यत्वे चास्तीति कथं तयो-र्व्याप्यत्वासिद्धिः (१९) ।

न्यायदीपः

।। **व्यभिचारेणेति** ।। साध्याभावसम्बन्धरूपव्यभिचारेणेत्यर्थः ।। **परम्परयेति** ।। पर्वतो धूमवान् वह्निमत्त्वादित्यत्र वह्नित्वादिरूपहेतुता-वच्छेदकं न साध्यसामानाधिकरण्यावच्छेदकम् साध्याभावसमानाधि-करणवृत्तित्वादिति साध्यसामानाधिकरण्यानवच्छेदकत्वानुमितिः । तथा च

तादृशावच्छेदकधर्मवत्त्वरूपव्याप्तिज्ञानं नेति व्यभिचारज्ञानस्यानवच्छेदकत्व-ज्ञानद्वारा व्याप्तिज्ञानप्रतिबन्धकत्वमित्यर्थः । अनुभवे विवदमानं प्रत्याह ।। **बाधादिवदिति** ।। **हेत्वाभासत्वोपाधित्वेति** ।। अनुमितिप्रतिबन्धक-यथार्थज्ञानविषयत्वस्य हेत्वाभासतायामुपाधित्वरूपत्वात्तस्य च व्यभिचारो-न्नायकोपाधाविव साध्यसामानाधिकरण्यानवच्छेदकत्वानुमापके व्यभिचारेऽप्य-भावेनोपाधिवद्व्यभिचारोऽपि हेत्वाभासो न स्यादित्यर्थः ।।

तदप्रतीतिरिति ।। व्यभिचाराभावविशिष्टसहचाराप्रतीतिरित्यर्थः ।। **तत्रेति** ।। उदाहरणवाक्य इत्यर्थः । अवयवग्रन्थे पक्षद्वयस्याप्युक्तेः वीप्साऽस्तीति मते नास्तीति मत इति मतद्वयोक्तिः ।। **सूत्रेण** ।। व्याकरणसूत्रेणेत्यर्थः । सूत्रस्थवीप्साशब्दार्थमाह ।। **व्याप्तीति** ।। आदिष्टस्य आदेशतया विहितस्य । व्याकरणेऽष्टमाध्यायाद्यपदे ''नित्यवीप्सयोः'' इत्यत्र ''सर्वस्य द्वे'' इत्यधिकारसूत्रस्थपदद्वयानुवर्तनेन क्रियापौनःपुन्यरूपनित्येऽर्थे वीप्सायां च वर्तमानस्य सर्वस्य वर्णसमुदायरूपपूर्वतनशब्दस्य द्वे भवत इत्यर्थः ।

अत्र च पक्षद्वयं सम्भवति । पूर्वस्थितशब्दस्य स्थाने शब्दतोऽर्थतश्च समानशब्दरूपे द्वे आदेशौ भवत इति वा, पूर्वतनशब्दस्य द्विरुच्चारणं भवतीति वा । तत्राद्यपक्षस्यैव भाष्ये मञ्जर्यां च स्थिरत्वोक्तेरादिष्ट-स्येत्युक्तम् । तत्र स्थानिवद्भावेनार्थवत्त्वात्प्रातिपदिकत्वम् । अर्थैक्या-त्समुदायस्य एकपदत्वं चेति भावेनैकार्थ्येत्याद्युक्तिः ।। **शब्दस्येति** ।। वाचकत्वेत्यन्वयः । वीप्सितशब्देन यावत्साधनाधिकरणोपस्थितौ तत्र साध्यवत्त्वविधानात् यावत्स्वाश्रयाश्रितसाध्यसम्बन्धरूपव्याप्तिप्रतीतेः तस्या एवानुमित्यङ्गत्वनिर्णयादिति भावः ।

यत्तु मणावुदाहरणनिरूपणप्रस्तावे ''वीप्सायामपि व्यभिचार-

तादवस्थ्यमिति तु वय'' मित्युक्तम् । तदयुक्तम् । व्याप्तिप्रतिपादनेच्छाया-मादिष्टस्य योय इत्यस्य यावत्साधनाधिकरणे साध्यसम्बन्धबोधन-शक्तेर्व्युत्पन्नत्वेन व्यभचारशङ्कानवकाशात् ।।

तर्कताण्डवम्

किञ्च हेतुशरीरघटकं द्विविधम् । किञ्चित्सङ्कोचकम् । यथा नीलधूमादित्यत्र नीलत्वम् । किञ्चिद्विकासकम् । यथा प्रमात्वाश्रय-विषयत्वादित्यर्थके प्रमेयत्वादित्यत्राश्रयविषयत्वम् । [१]प्रमेयत्वा-दित्युक्तव्यभिचाराभावात् । तत्र सङ्कोचकविपरीतस्य अन्त्यस्य स्वेन विकासितदेशे व्याप्तिग्रहौपयिकत्वान्न व्यर्थता । अन्यथा लक्षणरूपे व्यतिरेकिणि भागासिद्धिरूपाव्याप्तिहरणाय विशेषणं न प्रयुज्येत । शरीरपदं चाजन्यत्वस्याङ्कुरादावसम्भावितस्य विकासकमिति न व्यर्थम् ।

न्यायदीपः

एवं नीलधूमादिसाधारण्येन व्याप्तिमुपपाद्येदानीं, नीलधूमादौ व्याप्य-भावेऽपि शरीराजन्यत्वेऽस्ति न च शरीरपदस्यासिद्धिवारकतया व्यभि-चारावारकत्वेन व्यर्थत्वात्कथं व्यर्थविशेषणवति व्याप्तिरित्यतो व्याप्याश्रय-विकासकतया व्याप्तिग्रहौपयिकत्वेन न व्यर्थविशेषणत्वमिति भावेन तां तत्रोपपादयति ।। **किञ्चेत्यादिना** ।। **सङ्कोचकमिति** ।। हेतुलक्षणस्य व्याप्यधिकरणस्याल्पत्वसम्पादकम् । धूमादित्यनेन नीलानीलसाधारण-धूमत्वाधिकरणमात्रस्य व्याप्याश्रयत्वं लभ्यते । नीलत्वविशेषणे तु नीलधूम-मात्रस्येति नीलत्वं व्याप्यधिकरणसङ्कोचकम् । घटोऽभिधेयः प्रमात्वाश्रय-विषयत्वादित्यत्र प्रमात्वादित्युक्ते तन्मात्रस्यैव व्याप्याश्रयत्वलाभो

१. ''प्रमात्वादित्युक्तेऽपि व्यभिचाराभावात्'' इति पाठान्तरम् ।

नान्यस्य । विशेष्यभागस्याप्युक्तौ तु प्रमेयत्वमात्रस्यापि तथात्वलाभाद्व्याप्यधिकरणविकासकमित्यर्थः ।।

ततः किमित्यत आह ।। **तत्रेति** ।। द्वयोर्हेतुशरीरघटकयोर्मध्य इत्यर्थः ।। **अन्त्यस्येति** ।। व्याप्याश्रयविकासकस्येत्यर्थः । असिद्धिवारकस्यापीति शेषः ।। **अन्यथेति** ।। असिद्धिवारकत्वेनैव व्यर्थत्वे गुणाश्रयो द्रव्यमित्यत्र गुणात्यन्ताभावानधिकरणत्वरूपद्रव्यलक्षणे गुणानधिकरणत्वस्य आद्यक्षणस्थितघटादौ सत्त्वेऽपि द्वितीयादिक्षणस्थे तस्मिन्नभावेनाव्याप्तिवारणायात्यन्ताभावेति विशेषणं नोपादीयेत । तस्य द्रव्यमितरेभ्यो भिद्यते गुणात्यन्ताभावानधिकरणत्वात् व्यतिरेकेण गुणादिवदित्यत्र द्वितीयादिक्षणस्थघटादौ भागासिद्धिवारकत्वात् । लक्षणमपि केवलव्यतिरेकीत्युक्तत्वेन व्यावृत्तिव्यवहारयोः साधने लक्षणस्य केवलव्यतिरेकित्वादिति भावः ।। यद्वा गुणाभावानधिकरणत्वादित्युक्तावाद्यक्षणस्थघटे भागासिद्धिवारणायात्यन्तेति विशेषणं नोपादीयेतेत्यर्थः ।।

अस्त्वेवं प्रकृते किमित्यत आह ।। **शरीरेति** ।। अजन्यत्वादित्येवोक्तावङ्कुरादावसम्भावनया हेत्वसिद्धिशङ्कायां तत्रापि हेतुसत्त्वोपपादकत्वेन हेत्वधिकरणबाहुळ्यसम्पादकत्वेन हेतुविकासकम् । तत्रादृष्टाद्वारकशरीरजन्यत्वाभावस्य प्रत्यक्षत एवावगमसम्भवात् । अतो न व्यर्थं शरीरविशेषणमित्यर्थः ।

तर्कताण्डवम्

अपि च शरीराजन्यत्वादित्यत्र शरीरविशिष्टोऽभावो न हेतुः । किन्तु शरीरविशिष्टस्य जन्यत्वस्याभावः । स च विशेषणविशेष्ययोरभावाभ्यां भिन्न एव । विशेषणविशेष्यसम्बन्धो विशिष्टमिति मते पदार्थन्तरमिति मते च प्रतियोगिभेदात् । विशेषणावच्छिन्नं विशेष्य-

मेव विशिष्टमिति मते प्रतियोगितावच्छेदकभेदात् । तादृशविशिष्टाभावधीश्च न विशेषणज्ञानं विना युक्ता । प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानसाध्यत्वादभावज्ञानस्य । एवं च शरीरविशेषणं विशेष्याभावविपरीतव्याप्त्याश्रयीभूतविशिष्टाभावोपस्थापनौपयिकं व्याप्तिग्रहौपयिकमेव । आश्रयज्ञानं विना व्याप्तेरग्रहात् (२०) ।

न्यायदीपः

न केवलं हेतुविकासकत्वेन शरीरपदमर्थवत् किन्तु "विशिष्टस्योपाधेः साध्यव्यापकत्वमस्त्येव । उपाध्यभावश्चात्र प्रतिपक्षत्वेनोक्त" इति **तत्त्वनिर्णयटीकोक्त**दिशा विशिष्टाभावरूपहेतुस्वरूपोपस्थापकतयाऽपि व्याप्तिग्रहौपयिकत्वेनेत्याह ।। **अपि चेति** ।। **अभाव इति** ।। जन्यत्वाभाव इत्यर्थः ।। **न हेतुरिति** ।। तथात्वे हि जन्यत्वाभावमात्रस्य गगनादावकर्तृकत्वेन व्याप्तस्य हेतुस्वरूपस्य अजन्यत्वपदेनैवोपस्थितिसम्भवेन शरीरपदं व्यर्थं स्यात् । न चैवमित्यर्थः । स च भिन्न एवेत्यन्वयः । यदि न भिन्नस्तदा लाघवेन विशेष्याभावादेरेव व्याप्यतया विशिष्टाभावो न व्याप्यः स्यात् । न चैवमित्यर्थः ।

कुत इत्यतस्तद्व्यनक्ति ।। **विशेषणेति** ।। प्रतिवादिमतानुरोधेनाह ।। **पदार्थान्तरमितीति** ।। अस्त्वतिरिक्तोऽभावस्ततः किमित्यत आह ।। **तादृशेति** ।। प्रतियोगिनिर्विकल्पकादभावबुद्धेः अभावाद्वास्तवमुपेत्याह ।। **प्रतीयोगितावच्छेदकप्रकारकेति** ।। तथा च शरीरजन्यत्वत्वेन शरीरजन्यत्वज्ञानं न शरीरज्ञानं विना युक्तमित्यर्थः । ततः किमित्यत आह ।। **एवं चेति** ।।

तर्कताण्डवम्

नच गगनादौ व्याप्तिग्रहार्थं विशिष्टाभावग्रहकाले विशेष्याभावस्यापि ग्रहनियमाल्लाघवेन तत्रैव व्याप्तिग्रहान्न विशिष्टाभावे तद्ग्रह इति वाच्यम् । विशेष्याभावाग्रहणेऽपि शब्दादिना विशिष्टाभावग्रहणेन नियमाभावात् । क्वचिदुपस्थितिमात्रेण लाघवादरे अयं घटो जन्यः कृतकत्वादित्यत्र लघुनि शीघ्रोपस्थितिके च घटत्वे सत्यपि कृतकत्वनिष्ठव्याप्तिग्रहं प्रतीव प्रकृतेऽपि लघौ विशेष्याभावे सत्यपि विशिष्टाभावनिष्ठव्याप्तिग्रहं प्रति भिन्नविषयत्वेन गौरवस्याप्रतिबन्धकत्वात् । नहि नीलधूमनिष्ठा व्याप्तिर्धूमत्वेनेव विशिष्टाभावनिष्ठा व्याप्तिर्विशेष्याभावत्वेन अवच्छेत्तुं शक्या । तत्र तदभावात् । येनावच्छेदकांशे लाघवं सहकारि स्यात् ।

न्यायदीपः

यदत्रोक्तं मणौ ''शरीरजन्यत्वाभावो नाखण्डो हेतुः । यदि हि शरीरजन्यत्वं सकर्तृकत्वप्रयोजकं स्यात्तदा तदभावप्रयुक्तः सकर्तृकत्वाभाव इति तस्य साध्यव्याप्यता स्यात् । न चैवम् । किन्तु जन्यत्वम् । लाघवादि''त्यादि तत्तु ''अदृष्टाद्वारकशरीरजन्यत्वमुपाधिश्च'' इत्यादिनोपाधेः सकर्तृकत्वप्रयोजकत्वप्रतिपादनपरपूर्वग्रन्थेनैव निरस्तमित्यभिप्रेत्य लाघवेन विशेष्याभावस्यैव व्याप्यत्वं न विशिष्टाभावस्येति विशिष्टाभावस्य व्याप्यत्वासिद्धिचोद्यं निराह ।। **न चेत्यादिना** ।। सामग्रीवशेनाजन्यत्वस्यापि क्वचिदुपस्थितिसम्भवादस्तु विशिष्टाभावस्याव्याप्यत्वमित्यत आह ।। **क्वचिदिति** ।। **भिन्नविषयत्वेनेति** ।। विशिष्टाभावमध्ये विशेष्याभावस्याप्रवेशात् । अत एव पूर्वं ''विशेषणविशेष्ययोरभावाभ्यां भिन्न एव'' इत्युक्तमिति भावः ।

नन्वखण्डस्य व्याप्यत्वेऽप्यखण्डनिष्ठा व्याप्तिर्जन्यत्वाभावत्वेनैवावच्छिद्यते । नीलधूमनिष्ठा व्याप्तिर्धूमत्वेनेव । तथा च हेतुस्वरूपोपस्थितौ विशेष्याभावविशिष्टाभावयोर्भिन्नत्वेन लाघवासहकारेऽप्यवच्छेदकग्रहे लाघवं सहकारि स्यादेवेत्यत आह ।। **न हीति** ।। **तत्रेति** ।। विशिष्टाभावे जन्यत्वाभावत्वाभावादित्यर्थः ।

तर्कताण्डवम्

नन्वेवं वह्न्यनुमापके धूमप्रागभावादौ, पृथिव्या इतरभेदानुमापके पृथिवीत्वसमवाये च, त्वदभिमता व्यर्थविशेष्यता न स्यात् । धूमपृथिवीत्वादिनिष्ठव्याप्तितो धूमप्रागभावपृथिवीत्वसमवायनिष्ठव्याप्तेर्भिन्नत्वेन तस्याः धूमपृथिवीत्ववृत्तिधर्माभ्यामवच्छेत्तुमशक्यत्वादिति चेन्न । इष्टापत्तेः ।

व्यर्थविशेष्योदाहरणं तु अयमभिधेयवान् प्रमेयवत्वे सति धूमवत्वादित्यादिकम् । नीलधूमादित्यादौ विशेषणाश्रयनिष्ठव्याप्तेर्विशेष्यतावच्छेदकेन धूमत्वेनावच्छेदसम्भवरूपव्यर्थविशेषणतादुष्टिबीजस्येव प्रकृतेऽपि विशेष्यतावच्छेदकावच्छिन्ननिष्ठव्याप्तेर्विशेषणतावच्छेदकेन प्रमेयत्वेनावच्छेदसम्भवरूपस्य व्यर्थविशेष्यतादुष्टिबीजस्य सम्भवात् ।

तस्माद् व्यर्थविशेषणस्य न क्वापि व्याप्यत्वासिद्धित्वेन दूषणता । किन्तु विशिष्टस्य हेतुत्वाभिप्रायेण प्रयोगेऽधिकत्वेन । हेतुद्वयोक्तौ द्वितीये, प्रथमेन कृतकार्यत्वस्येव विशिष्टेऽपि विशेष्येण कृतकार्यत्वस्य दुष्टिबीजस्य सत्त्वात् । विशेष्यस्यैव हेतुत्वाभिप्राये त्वर्थान्तरत्वेन । प्रकृते तु विशिष्टाभावरूपहेतुकार्यस्यान्येनाकरणान्नाधिकत्वम् ।।

नच विशिष्टाभावकार्यं विशेष्याभावेन कर्तुं शक्यम् । विशिष्टोपस्थितौ विशेष्यस्योपस्थितिनियमवत्, विशिष्टस्य हेतुत्वे विशेषणस्य हेतुत्वनियमवच्च, विशिष्टाभावोपस्थितौ विशेष्याभावोपस्थितिनियमस्य, तस्य हेतुत्वान्वये विशेष्याभावस्य हेतुत्वान्वयनियमस्य चाभावात् ।।

नाप्यर्थान्तरम् । असिद्धिवारकत्वेन प्रकृतोपयोगात् । एतदेवाभिप्रेत्योक्तं टीकाकारैः ''पक्षधर्मतासिद्ध्यर्थत्वात्'' इति । तस्मात्सत्प्रतिपक्षत्वं दुष्परिहरम् ।

न्यायदीपः

उक्तार्थे बाधकमाशङ्क्चेष्टापत्त्या निराह ।। **नन्वित्यादिना** ।। **वह्नीति** ।। गिरिर्वह्निमान् धूमप्रागभाववत्त्वात् । पृथिवी इतरभिन्ना पृथिवीत्वसमवायवत्त्वादित्यादावित्यर्थः । तर्हि व्यर्थविशेष्यत्वं क्वापि दोषो न स्यादित्यत आह ।। **व्यर्थेति** ।। आदिपदेन तादृशालोकवत्त्वादिग्रहः ।

नन्वत्राप्यखण्डं विशेष्यमात्रादन्यदेव व्याप्तमिति सुवचनमित्यतो व्यर्थविशेषणस्थल इवात्रापि दूषकताबीजप्रदर्शनेन व्यर्थविशेष्यतां व्यनक्ति ।। **नीलेति** ।। **विशेषणाश्रयनिष्ठेति** ।। नैल्यरूपविशेषणयुक्तधूमनिष्ठेत्यर्थः । विशिष्टस्य पदार्थान्तरत्वाभावमतेनैवमुक्तिः । विशेष्यतावच्छेदकेन धूमत्वेनेत्यर्थः ।। **सम्भवेति** ।। व्यभिचाराभावादिति भावः ।। **दुष्टीति** ।। विशेषणस्य दुष्टताबीजस्येत्यर्थः । प्रकृतेऽपि प्रमेयवत्त्वे सति धूमवत्त्वादित्यादावित्यर्थः ।। **सम्भवरूपस्येति** ।। प्रमेयवत्त्वादित्युक्तेऽपि व्यभिचाराभावादिति भावः ।

व्यर्थविशेषणस्य दूषणताबीजं निर्धारयन्नेव शरीराजन्यत्वे तन्नास्तीत्युपपादयति ।। **तस्मादिति** ।। नीलधूमादेरपि व्याप्यताया उपपादनादित्यर्थः ।। **अधिकत्वेनेति** ।। दूषणतेत्यनुषङ्गः । आधिक्यरूपनिग्रहस्थानत्वेन हेतुनेत्यर्थः ।

अन्वितोपयुक्तापुनरुक्तकृतकार्यप्रयोगस्याधिकत्वात्कथमत्रान्येन कृतकार्यत्वमित्यत आह ।। **हेतुद्वयेति** ।। धूमवत्त्वादालोकवत्त्वाच्चेत्येवंरूपेणेति भावः ।। **अर्थान्तरत्वेनेति** ।। प्रकृतानुपयुक्तान्वितोक्तिरर्थान्तरमित्युक्तार्थान्तररूपनिग्रहस्थानत्वेनेत्यर्थः । अत्रापि दूषणता व्यर्थविशेषणस्य इत्यनुषङ्गः ।। **एतदेवाभप्रेत्योक्तमिति** ।। विमतं विकर्तृकं अस्मत्सम्मतकर्तृरहितत्वादिति तत्त्वनिर्णयटीकायामुक्तमित्यर्थः । शरीरेति विशेषणस्येति शेषः ।

तर्कताण्डवम्

तदेवं कार्यत्वहेतोर्दुष्टतया प्रमित्यनुन्मुखत्वाल्लाघवतर्कानुगृहीतेन तेन कर्त्रैक्यसिद्धिरिति निरस्तम् । कार्यसामान्यस्य कर्तृमात्रसापेक्षत्वेऽपि तद्विशेषस्य घटस्य कुलालरूपकर्तृसापेक्षत्ववत्, वेदस्य शरीरसहकृतेश्वरसापेक्षत्ववच्च गुरुतरकार्यस्य सजातीयकारकसहितकर्तृसापेक्षत्वदर्शनेन त्वदुक्तैककर्तृकत्वविपरीतानेककर्तृकत्वेनाप्यनुमातुं शक्यत्वाच्च (२१) ।।

वैदिकेश्वरस्य तु वेदेनैव सर्वं सिद्धम् । तस्मान्न कार्यत्वहेतुनेश्वरसिद्धिः ।

न्यायदीपः

यदपि **मणौ** ''ननु क्षित्यादावेककर्तृसिद्धिः कुतः'' इत्यादिना

''उच्यते'' इत्यन्तेनैककर्तृसिद्धिमाक्षिप्य ''यत्र प्रमाणे लाघवगुरुविषयता'' इत्यादिना समाधानमुक्तं तदपि निराह ।। **तदेवमिति** ।। **तद्विशेषस्येति** ।। कार्यविशेषस्येत्यर्थः ।। **शरीरेति** ।। ''सर्गादावदृष्टभेदात् मीनशरीरोत्पत्तावदृष्टवदात्मसंयोगाददृष्टसहकृतप्रयत्नवदीश्वरसंयोगाद्वा सकलवेदार्थगोचरज्ञानविवक्षासहकृतान्मीनकण्ठताल्वादिक्रियातज्जन्यसंयोगाद्वेदोत्पत्तिः'' इति मण्युक्तेरिति भावः ।। **गुरुतरेति** ।। प्रासादादिरूपेत्यर्थः ।। **सजातीयकारकेति** ।। कर्त्रन्तरादिरूपेत्यर्थः । मूलारूढत्वायाह ।। **त्वदुक्तेत्यादि** ।। विमतमनेककर्तृकं गुरुतरकार्यत्वात्प्रासादादिकार्यवदित्यनुमातुं शक्यत्वादित्यर्थः ।

नन्वेवं त्वन्मतेऽपीश्वरसिद्धिः कर्त्रैक्यसिद्धिः नित्यज्ञानादिसिद्धिश्च न स्यात् । अनुमानस्य त्वया दूषितत्वादित्यतः ''वैदिकेश्वरस्य तु वेदेनैव सर्वशक्तित्वोक्तेः सर्वमुपपद्यते'' इति **भाष्यवाक्यं** हृदि कृत्वाह ।। **वैदिकेति** ।। वेदैकसमधिगम्येत्यर्थः ।। **वेदेनेति** ।। ''द्यावा भूमी जनयन् देव एकः, परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, यदात्मको भगवांस्तदात्मिका व्यक्तिः'' इत्यादिभाष्याद्युक्तवेदेनेत्यर्थः ।

तर्कताण्डवम्

एतेन अस्तु तर्हि परमाण्वोर्द्रव्यारम्भकसंयोगहेतुक्रियारूपकार्यायोजनेनेश्वरसिद्धिः । विमतं परमाण्वादि चेतनाधिष्ठितं स्पन्दते जडत्वात् शरीरवदित्यनुमानात् । अन्यथा जडत्वहानेरिति निरस्तम् ।

[१]उक्तरीत्या त्वदुक्तविपरीतस्यास्मदादीनामेवादृष्टद्वाराप्यधिष्ठातृत्वस्य सम्भवेन सिद्धसाधनात् (२२) । अदृष्टाद्वारकेति विशेषणेऽ-

१. ''विपर्ययेण'' इति मूलपदस्य पूर्वोक्तरीत्यैव व्याख्यानेऽपि, मतान्तरखण्डनपरत्वेन व्याख्यानात् द्वाविंशतितमव्याख्यानत्वेन परिगणनम् कर्तुम् शक्यते इति भाति ।

प्रयोजकत्वात् । अनेनेश्वरसार्वज्ञ्यासिद्धेश्च । इदमुत्तरानुमानेष्वपि द्रष्टव्यम् ।

न्यायदीपः

एवं–

''कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः ।
वाक्यात्सङ्ख्याविशेषाच्च''

इति **कुसुमाञ्जलि**सङ्गृहीतेश्वरसाधकहेतूनां मध्ये **मण्युक्त**कार्यत्व-हेतुप्रपञ्चनं निरस्येदानीं ''अनयैव दिशा सर्वाणि जगत्कारणमात्रसाधनानि स्वतन्त्रानुमानानि निरसनीयानि'' इति शास्त्रयोनिसूत्र**सुधोक्तिं** विवृण्वानः **कुसुमाञ्जल्युक्त**हेत्वन्तराण्यपि क्रमेण निराह ।। **एतेनेत्यादिना** ।। **कार्यायोजनेति** ।। यद्यपि कुसुमाञ्जलौ ''आयोजना खल्वपि'' इत्यादिना आयोजनमेव हेतुरुपात्तः । कार्येति कार्यत्वं हेतुः । तथापि ''युज्यते संयुज्यते अन्योन्यं द्रव्यमनेनेत्यायोजनं द्व्यणुकारम्भकसंयोगजनकं सर्गाद्य-कालीनपरमाणुकर्म'' इति वर्धमानोक्त्या कार्यपदेन [१]द्व्यणुकादिकार्यायोजन-मित्यप्यन्वयमुपेत्य कार्यायोजनेनेत्युक्तमिति ज्ञेयम् । क्वचित्तु आयोजनेनेत्येव पाठः ।

सिद्धिरित्युक्तं प्रयोगोक्त्या व्यनक्ति ।। **विमतमिति** ।। तत्किमित्यतः ।। **परमाण्वादीति** ।। आदिपदेन द्व्यणुकादिग्रहः । चेतनाधिष्ठितं सदेव स्पन्दत इति साध्यार्थः । अप्रयोजकत्वं हेतोर्निराह ।। **अन्यथेति** ।। चेतन-वत्स्वत एव स्पन्दवत्त्व इत्यर्थः । एतेनेत्युक्तं व्यनक्ति ।। **उक्तरीत्येति** ।।

उक्तदोषनिरासायादृष्टाद्वारकचेतनेति विशेषणमाशङ्क्य निराह

१. ''द्व्यणुकादिकार्यार्थं आयोजनं'' इति क्वचित् पाठः ।

।। **अदृष्टेति** ।। जडत्वहेतोरदृष्टद्वारकचेतनाधिष्ठितत्वेनाप्युपपत्तेरप्रयोजको हेतुरिति भावेनाह ।। **अप्रयोजकत्वादिति** ।।

ननु अदृष्टस्यापि केनचिदधिष्ठातृचेतनेन भाव्यमिति स एवेश्वर इति चेन्न । तत्राधिष्ठातुः कृत्याभावात् । न तावन्नोदनादिकम् । अद्रव्यत्वात् । न चातिशयाधानम् । स किं गुणोऽतीन्द्रयः कश्चिच्छक्तिविशेषः । न द्वयमपि । त्वया गुणे गुणान्तरानङ्गीकारात् । शक्त्यनभ्युपगमाच्च । नापि सहकारिसमवधानम् । अदृष्टादेव तदुपपत्तेः । नापि कार्यकारित्वम् । तस्यादृष्टस्वभावत्वात् । एककार्योत्पत्त्यनन्तरं कार्यान्तरानुत्पादनं च प्रबलादृष्टान्तरप्रतिबन्धेनोपपत्तेरिति सुधायामेव व्यक्तत्वादिति भावेन दोषान्तरमाह ।। **अनेनेति** ।। उक्तानुमानेन कस्यचिच्चेतनस्यैव सिद्ध्या तत्सार्वज्ञ्यासिद्धेः । सार्वज्ञ्यस्य धर्मिग्राहकमानसिद्धत्वादितीश्वरवादोपक्रमात्पूर्वं त्वदुक्तमयुक्तमिति भावः ।। **इदमिति** ।। सार्वज्ञ्यासिद्धिदूषणमित्यर्थः ।

तर्कताण्डवम्

ऐतेनैव विमतं ब्रह्माण्डादि धारकप्रयत्नवता धृतं गुरुत्वे सत्यपातित्वात् वियति विहङ्गमशरीरवत् । विमतं ब्रह्माण्डादि प्रयत्नवद्विनाश्यं विनाशित्वात् पाट्यमानपटवदिति निरस्तम् । उक्तसिद्धसाधनाप्रयोजकत्वान्यतरानिस्तारात् ।

न्यायदीपः

धृतिरूपं हेत्वन्तरमपि **कुसुमाञ्जल्युक्त**दिशाऽनूद्य निराह ।। **एतेनेति** ।। ब्रह्माण्डादीत्यादिपदेन पृथिव्यादिग्रहः । साध्ये व्यापकतासम्पत्तये धारकेति प्रयत्ने विशेषणम् । अन्यादृशप्रयत्नस्य अपतनाहेतुत्वात् । लघुवस्तुन्यपतनवति व्यभिचारवारणाय गुरुत्वे सतीति हेतुविशेषणम् । पतमाने गुरुत्व-

वति तन्निरासाय विशेष्यम्– **वियतीति** । गगने विहरत्पक्षिशरीरं यथा प्रयत्नवता चेतनेन विहगजीवेन धृतं तथा ब्रह्माण्डादिधारकः कश्चन चेतनः सिद्ध्यति । स एवेश्वर इति भावः ।

धृत्यादेरित्यत्रादिपदोपात्तानुमानं व्यनक्ति ।। **विमतमिति** ।। **उक्तेति** ।। एतच्चोपलक्षणम् । प्रबलादृष्टप्रतिबन्धेन गुरुत्ववतोप्यपतनोपपत्त्याप्य-प्रयोजकत्वमपातित्वहेतोः । सन्दिग्धासिद्धत्वं च ''पततोपि तस्य महत्त्वेन पतनानुपलम्भसम्भवात्'' इति सुधोक्तमपि ध्येयम् ।।

तर्कताण्डवम्

नच घटादिनिर्माणं स्वतन्त्रपुरुषविश्रान्तं निर्माणत्वात् इदानीन्तनापूर्ववस्तुनिर्माणवत्, घटादिशब्दव्यवहारः स्वतन्त्रपुरुष-विश्रान्तः व्यवहारत्वात् डित्थादिशब्दव्यवहारवत्, लिपिव्यवहारः स्वतन्त्रपुरुषविश्रान्तः व्यवहारत्वात् इदानीन्तननूतनलिपिव्यवहार-वदित्याद्यनुमानैस्तत्सिद्धिरिति वाच्यम् ।

लाघवेन सर्गादिभवानां सुप्तप्रबुद्धन्यायेन त्वदभिमतविपरीतस्य कल्पान्तरीयसंस्कारोद्बोधमात्रस्य कल्पनादेव घटादिनिर्माणादेरुपपत्त्या हेतूनामप्रयोजकत्वात् । अन्यथा ईश्वरस्य, द्व्यणुकादिक्रमेणारब्ध-तदीयानन्तशरीरादेश्च कल्पने गौरवात् (२३) ।

न्यायदीपः

पद्यते गम्यते व्यहाराङ्गमर्थोऽनेनेति वृद्धव्यवहार एव पदशब्देनोच्यते । ततोपीश्वरसिद्धिः । तथाहि । यदेतत्पटादिनिर्माणनैपुण्यम् कुविन्दादीनां वाग्व्यावहारश्चेत्यादि**कुसुमाञ्जल्युक्तिं** हृदि कृत्वा पदादीश्वरसिद्धिरित्येतदपि

निराह ।। **नचेत्यादिना** ।। **स्वतन्त्रेति** ।। तज्जातीयनिर्माणानुपजीवित्वं पुरुषस्य स्वातन्त्र्यम् । द्वितीये तु तज्जातीयव्यवहारानुपजीवित्वम् । तत्र पर्यवसितत्वं तत्र विश्रान्तत्वम् । अस्मदादिपुरुषविश्रान्तत्वेन बाधवारणाय ।। **स्वतन्त्रेति** ।। लाघवेनेत्यस्य कल्पनादित्यन्वयः ।। **सुप्तेति** ।। पूर्वकालैकेति समासः । सुप्तः सन् यः पश्चात्प्रबुद्धः स यथा सुप्तेः पूर्वमनुभूतं स्मृत्वा घटनिर्माणादि करोति तथैव सृष्ट्यादावदृष्टादिवशेन लब्धदेहः सर्गाद्यकालीनकुलालादिरेव प्रळयात्पूर्वकालीनानुभवजन्यसंस्कारोद्बोधेन प्रागनुभूतं स्मृत्वा सर्गादौ घटादिनिर्माणं तद्व्यवहारं च करोतीत्युपपत्त्या त्वदभिमतस्वतन्त्रपुरुषकृतत्वासिद्धेरप्रयोजकत्वादित्यर्थः ।

तर्कपराहतिं चाह ।। **अन्यथेति** ।। स्वतन्त्रपुरुषेणैव घटादि-नानाचित्रनिर्माणानां सृष्ट्यादौ कृतत्वे कुलालकुविन्दादिनानाशरीराणां धारणेनेश्वर एव तानि तानि विचित्रनिर्माणानि करोतीत्यनन्तदेहकल्पन-मीश्वरस्य स्यात् । तानि च द्व्यणुकादिक्रमेण जन्यानीति कल्पनीयमित्य-प्रामाणिकानेककल्पनाद्गौरवमित्यर्थः ।।

तर्कताण्डवम्

नच वाच्यं सर्गादौ ब्राह्मणत्वादेरधिकारस्याज्ञाने कर्मानुष्ठाना-सम्भवात् स्वतस्तदभिज्ञः कश्चित्स्वीकार्य इति । स्तनपानप्रवृत्ति-हेत्विष्टसाधनतानुमितिहेतुव्याप्तिस्मृतिवत् सर्गादिभवानां प्राचीनकल्पा-नुष्ठितस्य ब्राह्मण्यादिहेतोः कर्मणः, तस्य ब्राह्मणत्वाविनाभावस्य च, स्मृतिसम्भवात् ।

न्यायदीपः

''प्रत्ययपदेनात्राश्वासविषयः प्रामाण्यमुच्यते'' इत्यदिना ''न चासर्वज्ञो

धर्माधर्मयोः स्वातन्त्र्येण प्रभवति'' इत्यन्तेन **कुसुमाञ्जलिग्रन्थेनोक्तं** प्रत्यया-दीश्वरसिद्धिरित्येतत्प्रमेयमपि निष्कृष्यानूद्य निराह ।। **नच वाच्य-मित्यादिना** ।।

।। **स्वतस्तदभिज्ञ इति** ।। अन्यथाऽनाश्वासेनानुष्ठानलोपापत्तेरिति भावः ।। **स्तनेति** ।। स्तनपानप्रवृत्तिहेतुर्या इष्टसाधनतानुमितिः तद्धेतु-व्याप्तिस्मृतिवदित्यर्थः ।। **सर्गेति** ।। सर्गादावुत्पन्नानां ब्राह्मणादीनामित्यर्थः ।। **तस्येति** ।। कर्मण इत्यर्थः ।

तर्कताण्डवम्

ननु त्र्यणुकपरिमाणं सङ्ख्याऽसमवायिकारणकं परिमाणप्रचया-जन्यजन्यपरिमाणत्वात् । एतद्घटारम्भककपालद्वयसमानपरिमाणक-कपालत्रयारब्धघटान्तरगतातिशयितपरिमाणवत् । नच विशेषणा-सिद्धिः । त्र्यणुकपरिमाणस्य द्व्यणुकपरिमाणजन्यत्वे तद्वदेवाणुत्वा-पत्तेः । निरवयवावयवारब्धे द्व्यणुके द्व्यणुकान्तरनिष्ठभूयोवयवा-संयोगित्वे सति तत्संयोगित्वरूपस्य प्रचयस्याप्यसम्भवात् । तस्मात् त्र्यणुकपरिमाणं प्रति द्व्यणुकवृत्तित्रित्वसङ्ख्यैवासमवायिकारणम् ।

एवं परमाणुपरिमाणं न परिमाणारम्भकं अणुपरिमाणत्वात् द्व्यणुकपरिमाणवत् । नचाप्रयोजकता । द्व्यणुकपरिमाणस्य [१]परमाणुपरिमाणादणुतमत्वापत्तेः । तस्मात्परिशेषाद् द्व्यणुकपरि-माणस्य परमाणुनिष्ठद्वित्वसङ्ख्यैवासमवायिकारणम् । ते च त्रित्व-द्वित्वे अपेक्षाबुद्धिजन्ये अनेकवृत्तिसङ्ख्यात्वात् घटवृत्तिद्वित्वादिवत् । अपेक्षाबुद्धिश्चास्मदादिष्वसम्भाविनी तदाधारमीश्वरं कल्पयतीति चेन्मैवम् ।

१. ''परमाणुपरिमाणवदणुतमत्वापत्तेः'' इति पाठान्तरम् ।

निराह ।। **नचेत्यादिना** ।। **स्वतन्त्रेति** ।। तज्जातीयनिर्माणानुपजीवित्वं पुरुषस्य स्वातन्त्र्यम् । द्वितीये तु तज्जातीयव्यवहारानुपजीवित्वम् । तत्र पर्यवसितत्वं तत्र विश्रान्तत्वम् । अस्मदादिपुरुषविश्रान्तत्वेन बाधवारणाय ।। **स्वतन्त्रेति** ।। लाघवेनेत्यस्य कल्पनादित्यन्वयः ।। **सुप्तेति** ।। पूर्वकालैकेति समासः । सुप्तः सन् यः पश्चात्प्रबुद्धः स यथा सुप्तेः पूर्वमनुभूतं स्मृत्वा घटनिर्माणादि करोति तथैव सृष्ट्यादावदृष्टादिवशेन लब्धदेहः सर्गाद्यकालीनकुलालादिरेव प्रळयात्पूर्वकालीनानुभवजन्यसंस्कारोद्बोधेन प्रागनुभूतं स्मृत्वा सर्गादौ घटादिनिर्माणं तद्व्यवहारं च करोतीत्युपपत्त्या त्वदभिमतस्वतन्त्रपुरुषकृतत्वासिद्धेरप्रयोजकत्वादित्यर्थः ।

तर्कपराहतिं चाह ।। **अन्यथेति** ।। स्वतन्त्रपुरुषेणैव घटादि-नानाचित्रनिर्माणानां सृष्ट्यादौ कृतत्वे कुलालकुविन्दादिनानाशरीराणां धारणेनेश्वर एव तानि तानि विचित्रनिर्माणानि करोतीत्यनन्तदेहकल्पन-मीश्वरस्य स्यात् । तानि च द्व्यणुकादिक्रमेण जन्यानीति कल्पनीयमित्य-प्रामाणिकानेककल्पनाद्गौरवमित्यर्थः ।।

तर्कताण्डवम्

नच वाच्यं सर्गादौ ब्राह्मणत्वादेरधिकारस्याज्ञाने कर्मानुष्ठाना-सम्भवात् स्वतस्तदभिज्ञः कश्चित्स्वीकार्य इति । स्तनपानप्रवृत्ति-हेत्विष्टसाधनतानुमितिहेतुव्याप्तिस्मृतिवत् सर्गादिभवानां प्राचीनकल्पा-नुष्ठितस्य ब्राह्मण्यादिहेतोः कर्मणः, तस्य ब्राह्मणत्वाविनाभावस्य च, स्मृतिसम्भवात् ।

न्यायदीपः

''प्रत्ययपदेनात्राश्वासविषयः प्रामाण्यमुच्यते'' इत्यदिना ''न चासर्वज्ञो

धर्माधर्मयोः स्वातन्त्र्येण प्रभवति'' इत्यन्तेन **कुसुमाञ्जलिग्रन्थेनोक्तं** प्रत्यया-दीश्वरसिद्धिरित्येतत्प्रमेयमपि निष्कृष्यानूद्य निराह ।। **नच वाच्य-मित्यादिना** ।।

।। **स्वतस्तदभिज्ञ इति** ।। अन्यथाऽनाश्वासेनानुष्ठानलोपापत्तेरिति भावः ।। **स्तनेति** ।। स्तनपानप्रवृत्तिहेतुर्या इष्टसाधनतानुमितिः तद्धेतु-व्याप्तिस्मृतिवदित्यर्थः ।। **सर्गेति** ।। सर्गादावुत्पन्नानां ब्राह्मणादीनामित्यर्थः ।। **तस्येति** ।। कर्मण इत्यर्थः ।

तर्कताण्डवम्

ननु त्र्यणुकपरिमाणं सङ्ख्याऽसमवायिकारणकं परिमाणप्रचया-जन्यजन्यपरिमाणत्वात् । एतद्घटारम्भककपालद्वयसमानपरिमाणक-कपालत्रयारब्धघटान्तरगतातिशयितपरिमाणवत् । नच विशेषणा-सिद्धिः । त्र्यणुकपरिमाणस्य द्व्यणुकपरिमाणजन्यत्वे तद्वदेवाणुत्वा-पत्तेः । निरवयवावयवारब्धे द्व्यणुके द्व्यणुकान्तरनिष्ठभूयोवयवा-संयोगित्वे सति तत्संयोगित्वरूपस्य प्रचयस्याप्यसम्भवात् । तस्मात् त्र्यणुकपरिमाणं प्रति द्व्यणुकवृत्तित्रित्वसङ्ख्यैवासमवायिकारणम् ।

एवं परमाणुपरिमाणं न परिमाणारम्भकं अणुपरिमाणत्वात् द्व्यणुकपरिमाणवत् । नचाप्रयोजकता । द्व्यणुकपरिमाणस्य [१]परमाणुपरिमाणादणुतमत्वापत्तेः । तस्मात्परिशेषाद् द्व्यणुकपरि-माणस्य परमाणुनिष्ठद्वित्वसङ्ख्यैवासमवायिकारणम् । ते च त्रित्व-द्वित्वे अपेक्षाबुद्धिजन्ये अनेकवृत्तिसङ्ख्यात्वात् घटवृत्तिद्वित्वादिवत् । अपेक्षाबुद्धिश्चास्मदादिष्वसम्भाविनी तदाधारमीश्वरं कल्पयतीति चेन्मैवम् ।

१. ''परमाणुपरिमाणवदणुतमत्वापत्तेः'' इति पाठान्तरम् ।

न्यायदीपः

श्रुतेरिति हेतोर्ह्ययमर्थः । वेदाः सर्वज्ञप्रणीताः वेदत्वाव्यतिरेकेण पामरवाक्यवदिति श्रुतिरूपकार्येण व्यतिरेकिहेतुनेश्वरसिद्धिरिति । वाक्यादित्यस्य तु वेदवाक्यानि पौरुषेयाणि वाक्यत्वादस्मदादिवाक्यवदित्यन्वयिना वाक्यत्वहेतुनेश्वरसिद्धिरिति । तदुभयमपि वेदापौरुषेयत्ववादे निरस्तमित्युपेत्य

''सङ्ख्याविशेषाच्च साध्यो विश्वकृदव्ययः''

इत्यस्य प्रपञ्चनपरेण ''सङ्ख्याविशेषात् खल्वपि'' इत्यादिना कुसुमाञ्जलिग्रन्थेनोक्तं निष्कृष्यानुवदन् शङ्कते ।। **नन्वित्यादिना** ।। द्रव्यत्वेन हेतुना त्र्यणुकस्य परिमाणवत्त्वे सिद्धे तस्य परिमाणस्य कार्यगुणत्वेन जन्यत्वे च सति भावकार्यस्य च कारणत्रयजन्यतया त्र्यणुकस्य समवायिकारणस्यादृष्टाद्विनिर्मितस्य भावेऽप्यसमवायिकारणं द्व्यणुकगतत्रित्वसङ्ख्या वाच्या त्रिभिर्द्व्यणुकैस्त्र्यणुकारम्भादिति भावेन सङ्ख्याजन्यत्वं तावद्**बर्धमानोक्त**प्रयोगोक्त्या साधयति ।। **त्र्यणुकपरिमाणमिति** ।। तदुक्तरीत्या द्व्यणुकपरिमाणस्य पक्षतोपगमेनोक्तरूपसाध्यसाधनेऽपि वक्ष्यमाणदिशा परमाणुगतद्वित्वरूपसङ्ख्यानिमित्तकारणापेक्षाबुध्याश्रयत्वेनेश्वरसिद्धिरस्ति । तथापि परमाणुद्व्यणुकपरिमाणयोर्द्वयोरप्यणुपरिमाणत्वात् द्व्यणुकपरिमाणपक्षतापक्षे हेतोर्विशेषणसिद्धेर्वक्ष्यमाणदिशा परिहर्तुमशक्यत्वात् त्र्यणुकपरिमाणस्य पक्षत्वोक्तिः । हेतौ परिमाणाजन्येत्युक्त्या घटादिपरिमाणे, प्रचयाजन्येत्युक्त्या तूलपिण्डपरिमाणे, जन्येत्युक्त्या परमाण्वादिपरिमाणे, गुणत्वादित्यनुक्त्वा परिमाणेत्युक्त्या घटगतरूपादौ, व्यभिचारशङ्का निरस्ता । न च हेतोरप्रयोजकत्वं शङ्क्यम् । जन्यपरिमाणस्य सङ्ख्यापरिमाणप्रचयरूपत्रितयजन्यत्वात् । द्वाभ्यामजन्यत्वे सति जन्यत्वस्य सङ्ख्याजन्यत्वेन विनानुपपत्तेरिति भावः ।।

वर्धमानाद्यनुक्तमपि दृष्टान्तं स्वयं दर्शयति ।। **एतद्घटेति** ।। कश्चिद्बुद्धि-स्थो घट एतद्घटपदेन उच्यते । घटान्तरगतातिशयितपरिमाणे कपाल-स्थत्रित्वसङ्ख्याजन्यत्वरूपसाध्यस्योक्तरूपहेतोश्च सत्त्वं व्यक्तमिति भावः ।। **अणुत्वापत्तेरिति** ।। तथा च त्र्यणुकस्याप्रत्यक्षतापत्तेरिति भावः ।

प्रचयस्वरूपं वदन्नेव तदजन्यत्वं व्यनक्ति ।। **निरवयवेति** ।। निरवयवाभ्यां परमाणुरूपावयाभ्यामारब्ध इत्यर्थः । **वर्धमानोक्त**-प्रयोगान्तरमाह ।। **एवमिति** ।। सङ्ख्याया एव जनकत्वेन द्व्यणुकपरिमाण-स्याजनकत्वे सतीत्यर्थः । परमाणुगतद्वित्वसङ्ख्ययैव द्व्यणुकपरिमाणजन्म न तु तत्परिमाणेनेति न बाधो द्व्यणुकपरिमाणानुत्पादो वा शङ्क्य इति भावः । अयं च प्रयोगो द्व्यणुकपरिमाणे । तत्रोक्तप्रयोगोऽत्रापि ध्येयः ।

द्व्यणुकपरिमाणेऽणुत्वस्योपगमेनेष्टापत्तिनिरासायाह ।। **अणुतमत्वेति** ।। **तस्मादिति** ।। परिमाणस्याजनकत्वात् प्रचयस्य च प्रागुक्त-रूपस्यासम्भवादित्यर्थः । ततश्च किमीश्वरसिद्धावागतमित्यतः **कुसुमाञ्जल्युक्त**प्रयोगमाह ।। **ते चेति** ।। द्व्यणुकपरमाणुगते इत्यर्थः । एकत्वे व्यभिचारवारणाय हेतावनेकवृत्तीत्युक्तिः । संयोगादौ तद्वारणाय सङ्ख्यात्वादित्युक्तिः ।। **तदाधारमीश्वरमिति** ।। द्वित्वस्य निमित्तकारण-भूतापेक्षाबुद्धिनाशनाश्यत्वनियमेऽपीश्वरबुद्धेर्नित्यतया कारणान्तरनाशप्रयुक्त एव परमाण्वादिगततद्द्वित्वादिनाश इति न तस्य नित्यत्वशङ्केति भावः ।

तर्कताण्डवम्

सङ्ख्यायोनित्वेऽपि द्व्यणुकपरिमाणं प्रति त्वदुक्तपरमाणुगत-द्वित्वविपरीतयोः परमाणुगतैकत्वयोः त्र्यणुकपरिमाणं च प्रति द्व्यणुकनिष्ठैकत्वानामसमवायिकारणत्वसम्भवात् । एकत्वानाम-

नेकत्वेऽपि क्लृप्तत्वात् । द्वित्वत्रित्वयोस्तु प्रत्येकमेकत्वेऽपि कल्प्यत्वात् (२४)·।

नच त्र्यणुकपरिमाणस्य द्व्यणुकगतानेकैकत्वासमवायिकारणकत्वे द्व्यणुकपरिमाणवदणुत्वं स्यादिति वाच्यम् । अणुत्वरूपं विशेषं प्रति नित्यसङ्ख्यात्वेन महत्वरूपं विशेषं प्रति जन्यसङ्ख्यात्वेन हेतुत्वोपपत्तेः ।

न्यायदीपः

आद्यहेतोरन्यथोपपत्त्या त्वदभिमतापेक्षाबुद्ध्याश्रयत्वेन नेश्वरसाधकतेत्यप्रयोजकत्वमिति भावेन सिद्धान्तयति ।। **मैवमित्यादिना ।। सङ्ख्यायोनित्वेऽपीति ।।** द्व्यणुकत्र्यणुकपरिमाणयोः परमाणुद्व्यणुकगतसङ्ख्याजन्यत्वेऽपीत्यर्थः । अपीत्यभ्युपगमवादः ।। **द्व्यणुकेति ।।** द्व्यणुकत्रयनिष्ठेत्यर्थः ।

ननु नैवं सम्भवति । एकत्वानामनेकत्वात् । द्वित्वत्रित्वयोस्तु प्रत्येकमेकैकत्वेन लाघवात् । द्व्यणुकत्र्यणुकगतपरिमाणयोर्द्वयोरपि स्वावयवगतैकत्वसङ्ख्याजन्यत्वाविशेषेण त्र्युणुकपरिमाणस्याप्यणुत्वापत्तेश्चेत्यत आद्यं निराह ।। **एकत्वानामिति ।।** अन्त्यमाशङ्क्य निराह ।। **न चेति ।। नित्येति ।।** परमाणुगतैकत्वयोः नित्यत्वात्तज्जन्यं द्व्यणुकपरिमाणमणु । द्व्यणुकगतानां त्रयाणामेकत्वानां जन्यत्वात्तज्जन्यं त्र्यणुकपरिमाणं महदित्युपपत्तेरित्यर्थः ।।

यद्यपि त्रिभिरेकत्वैर्जन्यत्वादेव त्र्यणुकपरिमाणं महत् एकत्वद्वयजन्यत्वाद् द्व्यणुकपरिमाणमण्विति सुवचम् । तथापि चतुरणकादिपरिमाणस्यापि सङ्ख्यात एव जननोपपत्तेरिति वैशेषिकाधिकरणसुधोक्तदिशा

सर्वकार्यपरिमाणानामप्येकरूपत्वलाभेन क्लृप्ततत्तत्समवायिकारणगतानेकैकत्व-सङ्ख्याजन्यत्वमेव स्यात् । त्र्यणुकादिकार्यगतपरिमाणस्य सर्वस्यापि त्वन्मते महत्त्वेन जन्यसङ्ख्योत्पन्नत्वेनाणुपरिमाणवैलक्षण्योपपत्तेरिति भावेनैव जन्यसङ्ख्यात्वेनेत्येवमुक्तम् ।

ननु काणगतैकत्वसङ्ख्यायाः कार्यगतपरिमाणं प्रति नियतपूर्ववृत्तित्वेऽपि द्वित्वत्रित्वादिसङ्ख्यां प्रत्यसमवायिकारणतया क्लृप्तत्वेन तन्तुरूपादे-रिवान्यथासिद्धत्वान्न परिमाणकारणत्वम् कुतः तद्विशेषासमवायिकारणत्वमिति चेन्न । अन्यत्र तथात्वेऽपि परमाणुगतैकत्वसङ्ख्याया असम्भावितापेक्षाबुद्धि-जन्यपरमाण्वादिगतद्वित्वबहुत्वसङ्ख्ये प्रत्यसमवायित्वकल्पनापेक्षया परिमाणासमवायिकारणत्वकल्पनस्यैवोचितत्वात् । तद्धेतोरेवास्तु हेतुत्वं किं तेनेति न्यायात् । एकत्वं तु क्लृप्तत्वात् कल्प्यद्वित्वाद्यपेक्षया लघ्वित्युक्तम् ।

तर्कताण्डवम्

किञ्च द्रव्यारम्भकत्वेन क्लृप्तस्य त्वदुक्तसङ्ख्याविपरीतस्यैकस्य संयोगस्यैव परिमाणहेतुता कल्प्या । नियतपूर्ववृत्तित्वेन क्लृप्ते तस्मिन्न-नन्यथासिद्धिमात्रकल्पने लाघवात् । न तु द्वित्वस्य । तत्स्वरूपस्या-नन्यथासिद्धिनियमपूर्ववृत्तित्वानां च कल्पने गौरवात् (२५) ।।

किञ्चेदानीन्तनब्राह्मणस्य ब्राह्मणपूर्वकत्वेऽपि सर्गादिकालीनस्य तस्यादृष्टविशेषोपहितभूतपूर्वकत्ववत् इदानीन्तनद्वित्वादेरपेक्षाबुद्धि-जन्यत्वेऽप्यादिकालीनस्यादृष्टविशेषोपहितपरमाणुमात्रपूर्वकत्वमस्तु । अन्यथा नित्यापेक्षाबुद्धिवन्नित्यब्राह्मणोऽपि कल्प्यः स्यात् ।

युक्तं चैतत् । अन्यथा समवाय्यपेक्षाबुद्धिनाशरूपयोः परमाणु-वृत्तिद्वित्वनाशहेत्वोरभावेन तन्नाशाभावापातात् । अदृष्टविशेषो-

नेकत्वेऽपि क्लृप्तत्वात् । द्वित्वत्रित्वयोस्तु प्रत्येकमेकत्वेऽपि कल्प्यत्वात् (२४)·।

नच त्र्यणुकपरिमाणस्य द्व्यणुकगतानेकैकत्वासमवायिकारणकत्वे द्व्यणुकपरिमाणवदणुत्वं स्यादिति वाच्यम् । अणुत्वरूपं विशेषं प्रति नित्यसङ्ख्यात्वेन महत्वरूपं विशेषं प्रति जन्यसङ्ख्यात्वेन हेतुत्वोपपत्तेः ।

न्यायदीपः

आद्यहेतोरन्यथोपपत्त्या त्वदभिमतापेक्षाबुद्ध्याश्रयत्वेन नेश्वरसाधकतेत्यप्रयोजकत्वमिति भावेन सिद्धान्तयति ।। **मैवमित्यादिना ।। सङ्ख्यायोनित्वेऽपीति ।।** द्व्यणुकत्र्यणुकपरिमाणयोः परमाणुद्व्यणुकगतसङ्ख्याजन्यत्वेऽपीत्यर्थः । अपीत्यभ्युपगमवादः ।। **द्व्यणुकेति ।।** द्व्यणुकत्रयनिष्ठेत्यर्थः ।

ननु नैवं सम्भवति । एकत्वानामनेकत्वात् । द्वित्वत्रित्वयोस्तु प्रत्येकमेकैकत्वेन लाघवात् । द्व्यणुकत्र्यणुकगतपरिमाणयोर्द्वयोरपि स्वावयवगतैकत्वसङ्ख्याजन्यत्वाविशेषेण त्र्युणुकपरिमाणस्याप्यणुत्वापत्तेश्चेत्यत आद्यं निराह ।। **एकत्वानामिति ।।** अन्त्यमाशङ्क्य निराह ।। **न चेति ।। नित्येति ।।** परमाणुगतैकत्वयोः नित्यत्वात्तज्जन्यं द्व्यणुकपरिमाणमणु । द्व्यणुकगतानां त्रयाणामेकत्वानां जन्यत्वात्तज्जन्यं त्र्यणुकपरिमाणं महदित्युपपत्तेरित्यर्थः ।।

यद्यपि त्रिभिरेकत्वैर्जन्यत्वादेव त्र्यणुकपरिमाणं महत् एकत्वद्वयजन्यत्वाद् द्व्यणुकपरिमाणमण्विति सुवचम् । तथापि चतुरणकादिपरिमाणस्यापि सङ्ख्यात एव जननोपपत्तेरिति वैशेषिकाधिकरणसुधोक्तदिशा

सर्वकार्यपरिमाणानामप्येकरूपत्वलाभेन कृत्स्नतत्तत्समवायिकारणगतानेकैकत्व-सङ्ख्याजन्यत्वमेव स्यात् । त्र्यणुकादिकार्यगतपरिमाणस्य सर्वस्यापि त्वन्मते महत्त्वेन जन्यसङ्ख्योत्पन्नत्वेनाणुपरिमाणवैलक्षण्योपपत्तेरिति भावेनैव जन्यसङ्ख्यात्वेनेत्येवमुक्तम् ।

ननु काणगतैकत्वसङ्ख्यायाः कार्यगतपरिमाणं प्रति नियतपूर्ववृत्तित्वेऽपि द्वित्वत्रित्वादिसङ्ख्यां प्रत्यसमवायिकारणतया कृत्स्नत्वेन तन्तुरूपादे-रिवान्यथासिद्धत्वान्न परिमाणकारणत्वम् कुतः तद्विशेषासमवायिकारणत्वमिति चेन्न । अन्यत्र तथात्वेऽपि परमाणुगतैकत्वसङ्ख्याया असम्भावितापेक्षाबुद्धि-जन्यपरमाण्वादिगतद्वित्वबहुत्वसङ्ख्ये प्रत्यसमवायित्वकल्पनापेक्षया परिमाणासमवायिकारणत्वकल्पनस्यैवोचितत्वात् । तद्धेतोरेवास्तु हेतुत्वं किं तेनेति न्यायात् । एकत्वं तु कृत्स्नत्वात् कल्प्यद्वित्वाद्यपेक्षया लघ्वित्युक्तम् ।

तर्कताण्डवम्

किञ्च द्रव्यारम्भकत्वेन कृत्स्नस्य त्वदुक्तसङ्ख्याविपरीतस्यैकस्य संयोगस्यैव परिमाणहेतुता कल्प्या । नियतपूर्ववृत्तित्वेन कृत्स्ने तस्मिन्न-नन्यथासिद्धिमात्रकल्पने लाघवात् । न तु द्वित्वस्य । तत्स्वरूपस्या-नन्यथासिद्धिनियमपूर्ववृत्तित्वानां च कल्पने गौरवात् (२५) ।।

किञ्चेदानीन्तनब्राह्मणस्य ब्राह्मणपूर्वकत्वेऽपि सर्गादिकालीनस्य तस्यादृष्टविशेषोपहितभूतपूर्वकत्ववत् इदानीन्तनद्वित्वादेरपेक्षाबुद्धि-जन्यत्वेऽप्यादिकालीनस्यादृष्टविशेषोपहितपरमाणुमात्रपूर्वकत्वमस्तु । अन्यथा नित्यापेक्षाबुद्धिवन्नित्यब्राह्मणोऽपि कल्प्यः स्यात् ।

युक्तं चैतत् । अन्यथा समवाय्यपेक्षाबुद्धिनाशरूपयोः परमाणु-वृत्तिद्वित्वनाशहेत्वोरभावेन तन्नाशाभावापातात् । अदृष्टविशेषो-

पहिताया ईश्वरनिष्ठापेक्षाबुद्धेर्हेतुत्वेन तन्नाशाद् द्वित्वनाशे आवश्यकत्वाददृष्टविशेष एव हेतुरस्तु । न चैवमननुगमः । ब्राह्मणवद्वैजात्यसम्भवात् ।

न्यायदीपः

यद्येकत्वानामनेकत्वेनापरितोषं मन्यसे तर्हि क्लृप्तत्वाद्द्रव्यारम्भकमेव परिमाणारम्भकमस्तु । किं सङ्ख्यचयापीत्याह ।। **किञ्चेति** ।। **एकस्येति** ।। त्र्यणुकारम्भकद्व्यणुकत्रयसंयोगस्यानेकत्वेऽपि द्व्यणुकारम्भकपरमाणुद्वयसंयोगस्यैकत्वादेकस्येत्युक्तम् । अत एवाग्रे ''न तु द्वित्वस्ये''त्येवोक्तिः ।

ननु द्रव्योत्पत्तावन्यथाद्विस्य कथं परिमाणहेतुतेत्यत आह ।। **नियतेति** ।। **अनन्यथेति** ।। अनन्यथासिद्धिश्च नियमश्च पूर्ववृत्तित्वं च तेषामिति विग्रहः । द्वित्वजन्यत्वेऽपि परिमाणस्य नेश्वरसिद्धिरित्याह ।। **किञ्चेदानीन्तनेति** ।। ''ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः परिकीर्तितः'' इति स्मृतेराह ।। **ब्राह्मणस्येति** ।। **भूतेति** ।। पृथिव्यादिपञ्चमहाभूतेत्यर्थः । सर्गादावदृष्टोपगृहीतभूतभेदान्मीनादिशरीरोत्पत्ताविव्यादिमणिकृदाद्युक्तेरिति भावः ।

वैजात्ये समानेऽपि कोऽत्र पक्षे विशेष इत्यत आह ।। **युक्तं चैतदिति** ।। **अन्यथेति** ।। नित्येश्वरापेक्षाबुद्धिजन्यत्व इत्यर्थः ।। **तन्नाशेति** ।। द्वित्वनाशेत्यर्थः । ईश्वरापेक्षाबुद्धेर्नित्यत्वादविनाशेऽपि तदुत्पादितद्वित्वादेर्निमित्तान्तरनाशेन नाश इति **वर्धमानोक्त**माशङ्क्य निराह ।। **अदृष्टेति** ।। **तन्नाशेति** ।। अदृष्टनाशेत्यर्थः ।। **न चैवमिति** ।। क्वचिददृष्टोपहितपरमाणुपूर्वकत्वे क्वचिदपेक्षाबुद्धिपूर्वकत्वे च सतीत्यर्थः ।। **ब्राह्मणवदिति** ।। आदिकालीनब्राह्मणस्य कारणवैजात्यवदिहापि सम्भवादित्यर्थः । यद्वा तृणारणिमणिन्यायेनादिकालीनेदानीन्तनयोर्ब्राह्मणयोर्भिन्नकारणजन्ययोः वैजात्यवदिहाप्युपपत्तेरित्यर्थः ।

तर्कताण्डवम्

किञ्च द्वित्वादेरपेक्षाबुद्धिजन्यतैव न । अन्वयव्यतिरेकानुविधानस्य व्यञ्जकत्वेनाप्युपपत्तेः । न चाविनिगमः । सेनादिबुद्ध्यालम्बनस्येयत्तयाऽनिश्चितानेकैकत्वबुद्धिजन्यस्य बहुत्वस्य सत्त्वेऽपि इयत्तया विनिश्चितैकत्वबुद्धिरूपव्यञ्जकाभावेन शतत्वाद्यप्रतीत्या व्यञ्जकत्वस्य त्वयापि स्वीकारात् ।

वस्तुतस्तु द्व्यणुकादिपरिमाणं त्वदुक्तसङ्ख्याविपरीतपरिमाणजन्यमेव । परमाणुद्व्यणुकपरिमाणं परिमाणारम्भकं द्रव्यसमवायिकारणपरिमाणत्वात् त्र्यणुकपरिमाणवदित्याद्यनुमानात् (२६) ।

न्यायदीपः

द्वित्वादेरपेक्षाबुद्धिजन्यत्वमभ्युपेत्योक्तम् । वस्तुतस्तदेव नास्ति । येन तदाश्रयतयेश्वरसिद्धिः स्यादित्याह ।। **किञ्चेति** ।। तदन्वयाद्यनुविधानात्कथमित्यत आह ।। **अन्वयेति** ।। एवमुत्प्रेक्ष्य स्वयं [१]पक्षचतुष्टयमुक्त्वा इदानीं

> ''महत्त्वं चैव दीर्घत्वं त्र्यणुकाद्येषु कल्पितम् ।
> तस्माच्च सदृशं कार्यं तत्कार्येषूपजायते ।।
> यथा तथैव ह्रस्वत्वात्पारिमाण्डल्यतोऽपि हि।
> जायेत सदृशं कार्ये परिमाणं समत्वतः'' ।

इत्यादिवैशेषिकाधिकरणानुव्याख्यानोक्तसमाधिमाह ।। **वस्तुतस्त्विति** ।। विपर्ययेणापीत्यादिवाक्यारूढत्वाय त्वदुक्तसङ्ख्याविपरीतेत्युक्तिः ।

---

१. अनेकैकत्वैः परिमाणजन्म, (२) संयोगेन परिमाणजन्म, (३) द्वित्वसङ्ख्याजन्यत्वेऽपि सङ्ख्यायाः अदृष्टविशेषात् जन्म, (४) अपेक्षाबुद्धिसापेक्षत्वेऽपि सङ्ख्यायाः तदभिव्यक्तत्वमेव न तु तज्जन्यत्वं इति पक्षचतुष्टयम् ।

सुधोक्तप्रयोगमाह ।। **परमाणुद्व्यणुकपरिमाणमिति** ।। समुदायाभिप्रायमेकवचनम् । परिमाणे इत्यर्थः । स्वस्वकार्यद्व्यणुकत्र्यणुकगतपरिमाणारम्भके इति साध्यार्थः । द्रव्यसमवायिकारणगतपरिमाणत्वादिति हेत्वर्थः । अत्र द्रव्येत्युक्त्या शब्दसमवायिकारणगतगगनपरिमाणे, समवायीत्युक्त्या घटकारणदण्डादिपरिमाणे, गुणत्वादित्यनुक्त्वा परिमाणत्वादित्युक्त्या परमाण्वादिगतरूपादौ व्यभिचारशङ्कानिरासः । आदिपदेन ''द्व्यणुकत्र्यणुकपरिमाणे स्वाश्रयसमवायिकारणगतपरिमाणारब्धे कार्यगतपरिमाणत्वात् चतुरणुकादिपरिमाणव'' दित्यादिसुधोक्तग्रहः । इत्याद्यनुमानात् परिमाणजन्यमेवानुमीयत इति पूर्वेणान्वयः ।

तर्कताण्डवम्

नच परमाणुपरिमाणं परिमाणानारम्भकं नित्यपरिमाणत्वात् गगनपरिमाणवत्, अणुपरिमाणत्वात् मनःपरिमाणवदित्यनेन सत्प्रतिपक्षता । द्रव्यसमवायिकारणपरिमाणत्वाभावस्योपाधित्वात् ।

न चाप्रयोजको हेतुः । कारणगतगुणानां कार्यगुणं प्रति सजातीयत्वेनारम्भकत्वस्यौत्सर्गिकत्वात् । परिमाणसामान्यं प्रति कारणत्वग्रहदशायां परिमाणत्वस्य नियमेनोपस्थितेश्च ।

न्यायदीपः

सुधोक्ते एव प्रतिपक्षशङ्कातत्समाधाने चाह ।। **न चेत्यादिना** ।। मृत्पिण्डादिपरिमाणे व्यभिचारवारणाय हेतौ नित्येत्युक्तिः ।। **द्रव्येति** ।। गगनकालादिपरिमाणे साध्यव्यापकत्वात् साधनवति पक्षेऽभावेन साधनाव्यापकत्वादिति भावः । न च पूर्वसाधनव्यतिरेकत्वान्नायमुपाधिः, प्रतिपक्षमात्रोच्छेदापत्तेरिति वाच्यम् । प्राचीनहेतोरनुकूलतर्कवत्त्वेन

साध्यव्याप्यत्वनिश्चये सति तद्व्यतिरेकस्य प्रतिपक्षानुमाने साध्यव्यापकत्वनिश्चयात् । यत्र तु स्थापनाया आभासत्वं तत्रैव विशेषादर्शनदशायां सत्प्रतिपक्षे पूर्वसाधनव्यतिरेकस्य साध्याव्यापकत्वेनानुपाधित्वम् । यथा शब्दोऽनित्यः गुणत्वादित्यत्र शब्दो नित्यो व्योमैकगुणत्वादित्यनेन सत्प्रतिपक्षे गुणत्वाभावोनोपाधिः । जलपरमाणुरूपे साध्याव्यापकत्वात् । अत्र पूर्वसाधनव्यतिरेकस्याऽप्युपाधित्वे न कोपि दोष इति भावेन स्थापनायां निरुपाधिसहचारकार्यकारणभावग्रहरूपानुकूलतर्कौ व्यनक्ति ।। **न चाप्रयोजको हेतुरित्यादिना ।**

।। **औत्सर्गिकत्वादिति** ।। जातित एव प्राप्तत्वात् अपवादाभावे तस्यापि प्रमाणत्वात् । बाधकस्य चेहाग्रे निरसिष्यमाणत्वात् अस्याप्युत्सर्गविषयत्वमेवेति भावः ।

नचैवमपि तूलपिण्डादिपरिमाणस्य शिथिलभूयोऽवयवसंयोगरूपप्रचयमात्रजन्यत्वात् तूलपिण्डसमवायिकारणगतपरिमाणे व्यभिचारी स्थापनाहेतुरिति वाच्यम् । तस्यापि पक्षतुल्यत्वात् । न चैवं सत्यंशे बाधः । प्रचयकारणताया अप्यनिवारणात् । न चोभयकारणत्वकल्पने गौरवदोषः । ''द्वयोरपि क्लृप्तशक्तित्वा''दिति **सुधा**यामेवोक्तत्वात् । न च क्लृप्तशक्तित्वं परिमाणे असिद्धम् । कारणगतेत्यादिनोक्ततर्कद्वयसिद्धत्वात् । वक्ष्यमाणदिशा प्रचयसङ्ख्चयोः परिमाणहेतुत्वादिति भावः ।

तर्कताण्डवम्

ननु तूलपिण्डादिपरिमाणे प्रचयाख्यसंयोगविशेषस्य, समानपरिमाणाल्पसङ्ख्याकावयवारब्धापेक्षया तादृशाधिकसङ्ख्याकावयवारब्धद्रव्यगतातिशयितपरिमाणे बहुत्वसङ्ख्यायाश्च, कारणत्वदर्शनात्

सामान्यविशेषन्यायेन परिमाणसामान्यं प्रति संयोगसामान्यस्य सङ्ख्यासामान्यस्य वा कारणत्वमस्त्विति चेन्मैवम् । औत्सर्गिकस्य नियतोपस्थितिकस्य च बाधे सत्येव तद्विपरीते प्रमाणप्रवृत्तेः ।

नचैवं द्व्यणुकत्र्यणुकपरिमाणयोः परमाणुपरिमाणसाजात्यं स्यादिति वाच्यम् । [१]गुणत्वसाक्षाद्व्याप्यजात्या साजात्यापादन इष्टापत्तेः । तद्व्याप्यव्याप्यजात्या तदापादने तन्तुपरिमाणगतस्य [२]महत्वव्याप्यस्यापकर्षरूपजातिविशेषस्य पटपरिमाणेऽभावेन व्यभिचारात् । अन्यथा सङ्ख्यासंयोगजन्यत्वेऽपि महत्समवेतयोस्तयोर्महत्त्वजनकत्ववदणुसमवेतयोस्तयोरणुत्वजनकत्वं स्यात् ।

किञ्च द्व्यणुकादिपरिमाणस्य केवलसङ्ख्यायोनित्व एव द्वित्वादिवत्सङ्ख्यात्वेन कारणसाजात्यं स्यात् । किञ्च परसिद्धं परिमाणत्वावान्तरमणुत्वादिजातिभेदमङ्गीकृत्येदमुक्तम् । वस्तुतस्तु यथा त्र्यणुकादिषु महत्वमेकजातीयमेव उत्कर्षापकर्षवत्, यथा चाणुत्वं परमाणुद्व्यणुकयोः एवं परिमाणमवान्तरजातिरहितमेव सर्वद्रव्येषूत्कर्षापकर्षवद्वर्तते । एकस्यैवोत्कर्षापकर्षौ च प्रतियोगिभेदेन सन्निकर्षविप्रकर्षाविवाविरुद्धौ । विस्तरस्तु सुधायां द्रष्टव्यः ।

तस्मादीश्वरस्य सार्वज्ञादेर्वेदनिरपेक्षानुमानेनासिद्धेः कल्पनागौरवं सुस्थम् ।

।। इति ईश्वरस्यानुमानिकत्वभङ्गः ।। २२ ।।

।। ईश्वरवादः समाप्तः ।।

---

१. तद्व्याप्याव्याप्यत्वे सति तद्व्याप्यत्वं साक्षाद्व्याप्यत्वम् । प्रकृते गुणत्वव्याप्यरूपत्वाद्यव्याप्यगुणत्वव्याप्यत्वं परिमाणत्वे इति तेन साजात्यापादने इष्टापत्तेः । द्व्यणुकत्र्यणुकपरिमाणयोः परिमाणत्वस्य मया अङ्गीकारादिति भावः ।

२. परिमाणत्वव्याप्यस्य इति भवेत् ।

न्यायदीपः

कारणपरिमाणस्य कार्यपरिमाणं प्रतीव प्रचयसङ्ख्चयोरपि कारणत्वं क्लृप्तमिति इह परमाण्वादिगतसङ्ख्चाऽपि कारणं स्यादिति शङ्कते ।। **नन्विति** ।। **संयोगविशेषस्येति** ।। कारणत्वदर्शनादित्यन्वयः । प्रचयः प्रसङ्गादुपात्तः । बहुत्वस्य कारणत्वग्रहे स्थलमाह ।। **समानेति** ।। तुल्यपरिमाणकपालद्वयारब्धघटापेक्षया तत्तुल्यपरिमाणकपालत्रयजन्यघट-गतपरिमाण इत्यर्थः ।। **तादृशेति** ।। पूर्वद्रव्यावयवसमानपरिमाणेत्यर्थः ।। **सामान्येति** ।। यद्विशेषयोः कार्यकारणभावो बाधकाभावे तत्सामान्ययोरपि कार्यकारणभाव इति न्यायेनेत्यर्थः । कार्यगतपरिमाणं प्रति कारणगत-परिमाणमेव सर्वत्र हेतुर्न तु प्रचयादिरपीति सिद्धान्तयति ।। **मैवमित्या-दिना** ।। यद्वा अन्यत्र सङ्ख्चायामपि क्लृप्तशक्तित्वमस्तु । प्रकृते तु उत्सर्गतः प्राप्तपरिमाणहेतुत्वमेवास्तु बाधकाभावादित्याह ।। **मैवमित्यादिना** ।।

अस्ति परमाण्वादिपरिमाणारम्भवादेऽपि तुल्यपरिमाणापत्तिरेव बाधिकेत्याशङ्क्य निराह ।। **न चैवमिति** ।। परमाण्वादिपरिमाणस्य स्वकार्यगतपरिमाणारम्भकत्व इत्येवंशब्दार्थः ।। **साजात्यमिति** ।। तथा चाप्रत्यक्षतापत्तिरिति भावः ।। **साक्षाद्व्याप्येति** ।। परिमाणत्वजात्येत्यर्थः ।

।। **तद्व्याप्यव्याप्येति** ।। परिमाणं चतुर्विधम् । अणुत्वं, महत्त्वं, दीर्घत्वं, ह्रस्वत्वं चेति । नीलत्वपीतत्वाद्यवान्तरजातिवत्परिमाणत्वा-वान्तरजातिचतुष्टयमुपेत्य परमाणावेवाणुपरिमाणं द्व्यणुके ह्रस्वपरिमाणं त्र्यणुकादौ महत्त्वादीत्यभ्युपगमेन द्व्यणुकेऽप्यणुत्वरूपपरिमाणत्वावान्तर-जातिमत्परिमाणं त्र्यणुके च ह्रस्वत्वरूपपरिमाणत्वव्याप्यजातिमत्परिमाणं स्यादित्यापादने चेत्यर्थः । यद्वा उत्कर्षापकर्षादिरूपया गुणत्वव्याप्य-परिमाणत्वव्याप्यजात्येत्यर्थः ।

स्वोत्प्रेक्षितपक्षैः सहोक्तानि पञ्चधा समाधानान्यपि परिणामप्रवादा-ननुकूलानीति मन्वानः ''परमतमाश्रित्य परस्येदं दूषणाभिधानम्'' इति सुधोक्तं हृदि कृत्वाह ।। **किञ्च परसिद्धेत्यादि ।। सुधायामिति ।।** वैशेषिकाधिकरणे समयपाद इत्यर्थः ।

।। इति ईश्वरस्यानुमानिकत्वभङ्गः ।। २२ ।।

।। इति श्रीराघवेन्द्रयतिविरचिते तर्कताण्डवव्याख्याने
न्यायदीपे ईश्वरवादः समाप्तः ।।

वर्णवादः

वर्णानित्यत्वस्य प्रत्यक्षत्वभङ्गः

ननु तथाऽपि वर्णसमुदायरूपस्य वेदस्य न नित्यत्वम् । शान्तः कोलाहलः श्रुतपूर्वो गकारो नास्तीत्यादिप्रत्यक्षेण, वर्णोऽनित्यः भावत्वे सति कृतकत्वादित्यनुमानेन च वर्णानामेवानित्यत्वादिति चेदुच्यते । शान्तः कोलाहल इति धीः ध्वनिविषयैव । ध्वनिविशेष-स्यैव कोलाहलत्वात् । श्रुतपूर्वो गकारो नास्तीति धीस्तु नास्त्येव । श्रुत एव गकारः पुनः श्रूयते एक एव गकारोऽसकृदुच्चारित इत्यादि-प्रत्यभिज्ञाविरोधात् । किन्तूच्चारणेनोपलब्धवर्णस्यानुपलब्धिमात्रेण श्रुतपूर्वो गकारो न श्रूयत इत्येव धीः ।

उक्तं हि टीकाकारैः ''प्रागुच्चारणादनुपलब्धा वर्णा उच्चारणे सत्युपलभ्यन्ते इत्येवानुभवसिद्धम् । न तु तेषामुत्पत्तिर्विनाशो वा'' इति ।

न्यायदीपः

।। **तथापीति** ।। पौरुषेयवाक्येन धर्माद्यसिद्धावपि, पौरुषेयत्वे कल्पनागौरवदोषभावेऽपि, वेदपौरुषेयत्वे मानाभावेऽपीत्यर्थः ।। **न नित्यत्वमिति** ।। नानादिनित्यत्वमित्यर्थः ।

द्वितीयस्तबके कुसुमाञ्जलावुदयनोक्तमाह ।। **शान्त इति** ।। **श्रुतेति** ।। पूर्वं श्रुतः श्रुतपूर्व इत्यर्थः । शब्दोऽनित्य उत्पत्तिधर्मत्वादित्युदयनानुमानस्य परिष्कारपूर्वं **मणा**वुक्तस्यायमनुवादो ।। **वर्ण इत्यादि** ।। मणौ वर्णात्मकशब्द इत्युक्तावपि मणिकृन्मतेंऽशतस्सिद्धसाधनस्यादोषत्वाद् वर्णपदानर्थक्यम् । वर्ण इत्येव वा पूर्तौ शब्दपदानर्थक्यम् । रूपादिनार्थान्तरवारकं तदिति तु च्छलत्वात्तथाशङ्कैव न युक्तेति वर्णोऽनित्य इत्येवानुवादः कृतः ।

वर्णानामनित्यत्वेऽपि न वेदनित्यत्वक्षतिः । तथाप्यभ्युपेत्य तत्समाधत्ते ।। **उच्यत इत्यादिना** ।। व्यक्तं चैतद्वादान्ते ग्रन्थ एव ।[१]

।। **ध्वनिशेषस्यैवेति** ।। यत्तु वर्धमाने अनभिव्यक्तवर्णत्वव्याप्यजाति-विशेषो वर्णसमूह एव कोलाहल इत्युक्तम् । तन्न । वर्णशून्यध्वनिविशेषेऽपि कोलाहलपदप्रयोगात् ।। **प्रत्यभिज्ञेति** ।। तद्भ्रान्तित्वं त्वग्रे निरसिष्यत इति भावः ।। **उक्तं हीति** ।। "न चोच्चारणकाल एव वर्णानामुत्पत्तिरिति वाच्य"मिति तत्त्वनिर्णयवाक्यसम्बन्धिटीकायां वर्णजन्मवर्णाभावबुध्यो-रुच्चारणक्रियाविषयत्वम् इत्येतदुक्तमित्यर्थः ।

तर्कताण्डवम्

अस्तु वा सा । तथाऽपि घटो नास्तीतिवन्न विशेष्यमात्र-निषेधिका । श्रुतपूर्वत्वविशिष्टनिषेधस्त्वलंकृतपूर्वश्चैत्रो नास्तीतिव-त्पूर्वकालावच्छिन्नश्रवणरूपविशेषणनिषेधेनाप्युपपन्नः ।

१. "अभ्युपेत्य चेदमुदितं" इत्यादिना ५९१ पुटे ।

अस्तु वा सा विशेष्यमात्रनिषेधिका । तथापि व्यञ्जक उच्चारणेऽव्यञ्जकत्वभ्रान्त्याऽलिङ्गेऽनुपलब्धिमात्रे योग्यानुपलब्धिरूपलिङ्गाभिमानाद् भ्रान्तिरूपानुमितिरेव सा । न तु प्रत्यक्षा । प्रत्यासत्त्यभावात् ।

न्यायदीपः

अनुभवे विप्रतिपन्नं प्रत्याह ।। **अस्तु वा सेति** ।। श्रुतपूर्वो गकारो नास्तीति धीरित्यर्थः ।। **न विशेष्यमात्रेति** ।। घटस्य केवलत्वादस्य च सविशेषणत्वादिति भावः ।। **अलमिति** ।। पूर्वमलङ्कृतोऽलङ्कृतपूर्व इत्यर्थः ।। **विशेषणनिषेधेनेति** ।। ''सविशेषणे हि विधिनिषेधौ विशेष्ये बाधे विशेषणमुपसङ्क्रामत'' इति न्यायादिह च विशेष्यबाधस्य प्रागुक्तप्रत्यभिज्ञाविरोधेन व्यक्तत्वादिति भावः ।

विशेष्यबाधे विवादिनं प्रत्याह ।। **अस्तु वा सेति** ।। धीरित्यर्थः ।। **तथापीति** ।। भ्रान्तिरूपेत्यादिनान्वयः । भ्रान्तिरूपत्वे बीजमाह ।। **व्यञ्जक इति** ।। वर्णो नास्ति अनुपलब्धेः स्तम्भादिवदिति लिङ्गाभासजन्यानुमितिरेव । न प्रत्यक्षरूपा । नापि प्रमितिरूपा । परमाण्वादावनुपलम्भे सत्यपि नास्तित्वाभावेन व्यभिचारितयाऽनुपलब्धिमात्रस्यालिङ्गत्वेन तल्लिङ्गत्वस्याभिमानिकत्वात् । अलिङ्गे च लिङ्गत्वाभिमानो योग्यानुपलब्धित्वभ्रममूलः । सोपि भ्रमः उच्चारणस्य न वर्णाभिव्यञ्जकत्वम् । किन्तूत्पादकत्वमेवेति भ्रान्तिमूल एवेत्यर्थः ।

एतेन श्रुतपूर्वो गकारो नास्तीति प्रतीतिरनुमानादित्यसत् । शब्दस्यैव पक्षीकरणे हेतोरनाश्रयत्वम् । आकाशस्य पक्षत्वे तद्वत्तयानुपलभ्यमानत्वहेतोरनैकान्तिकत्वम् । शब्दसद्भावकालेपि तस्य सत्वात् । एवं कालपक्षेऽपि दोषात् । अहमिदानीं निःशब्दश्रोत्रवान् शब्दोपलब्धिरहितत्वात् बधिरवदिति

चेन्न । दृष्टान्तस्य साध्यविकलत्वात् व्याहतत्वाच्चेत्यादिखण्डनं निरस्तं ध्येयम् ।। अतीतघटादौ ज्ञानविषयत्वाभावप्रतियोगित्वादिधर्मवदनुपलभ्यमानत्वधर्मस्यापि सम्भवेनासिद्ध्यादेरनापत्तेरिति ।। **न तु प्रत्यक्षेति** ।। तादृशबुद्धेः प्रत्यक्षत्वेपि शुक्तिरूप्यादिप्रत्यक्षवत् प्रत्यभिज्ञारूपप्रबलप्रत्यक्षबाधाद्भ्रान्तिरेवेति सुवचम् । तथाप्युदयनोक्तप्रत्यक्षत्वोपपादनखण्डनायैवमुक्तिः ।

तर्कताण्डवम्

नचेन्द्रियविशेषणता प्रत्यासत्तिः । चक्षुषा स्वविशेषणीभूतस्य घटनिष्ठरूपप्रतियोगिकाभावस्य ग्रहप्रसङ्गात् । त्वदभिमतस्य योग्येऽधिकरणेऽनुपलब्धिरूपस्येन्द्रियसहकारिणः असत्त्वाच्च । त्वन्मते चाधिकरणस्य गगनस्यायोग्यत्वात् ।

नचाधिकरणस्यायोग्यत्वेऽपि प्रतियोगिनो योग्यत्वात् तत्सहकारिणी योग्यस्यानुपलब्धिरस्तीति वाच्यम् । पार्थिवपरमाणौ जलत्वाभावस्य प्रत्यक्षत्वप्रसङ्गात् ।

न्यायदीपः

अस्ति हि श्रोत्रशब्दाभावयोर्विशेषणविशेष्यभाव इत्यादि**नोदय**नोक्तमाशङ्क्य निराह ।। **न चेन्द्रियेति** ।। श्रोत्ररूपेन्द्रिये शब्दाभावस्य सत्त्वेन तयोः सम्बन्धान्तरमन्तरेण तदुपश्लिष्टस्वभावत्वरूपविशेषणताप्रत्यासत्तिरित्यर्थः । विशेषणविशेष्यभावेनैव समवायाभावयोर्ग्रहणादिति भावः ।

।। **चक्षुषेति** ।। [१]सम्बन्धिविशेषणतयैवाभावादेरिन्द्रियेण ग्रहणम् । न तु स्वविशेषणत्वेनैव । तथात्वे घटनिष्ठं यद्रूपं तत्प्रतियोगिकाभावस्य

१. ''स्वसम्बन्धि'' इति स्यात् ।

चक्षुष्यपि सत्त्वेन चक्षुषा विशेषणतारूपप्रत्यासत्त्या मम चक्षुषि घटरूपं नेति रूपाभावग्रहणप्रसङ्ग इत्यर्थः ।

ननु प्रत्यासत्तेः फलबलकल्प्यत्वाद्रूपाभावादिना विशेषणतारूपप्रत्यासत्तिकल्पकं नेत्यतो दोषान्तरमाह ।। **योग्य इति** ।। यद्वा स्वसम्बन्धिविशेषणतयैवाभावादेरिन्द्रियेण ग्रहणम् । चक्षुषा च घटादिरूपाभावो [१]रूपत्वादौ रूपं नेति गृह्यत एव । प्रकृते च श्रोत्रसम्बन्ध्याकाशविशेषणताऽस्त्येव शब्दाभावस्येत्यतः किं योग्ये स्वसम्बन्धिनि विशेषणतयाभावग्रहः उतायोग्ये? आद्य आह ।। **योग्य इति** ।। **अनुपलब्धीति** ।। प्रत्यक्षयोग्यप्रतियोगिनोऽनुपलब्धीत्यर्थः । सिद्धान्ते साक्षिप्रत्यक्षत्वादाह ।। **त्वन्मत इति** ।। अन्त्योऽतिप्रसङ्गदुष्ट इति भावः ।

ननु नातिप्रसङ्गः । प्रतियोगिनो योग्यत्वस्यातिप्रसङ्गभञ्जकत्वादिति भावेनाशङ्क्य निराह ।। **न चेति** ।। यद्वा अनुपलब्धिर्हि प्रत्यक्षस्याभावग्रहे सहकारिणी । सा च नानुपलब्धिमात्रम् । अतिप्रसङ्गात् । किन्तु योग्यानुपलब्धिः । सा च योग्येऽधिकरणेऽनुलब्धिरूपा वा, योग्यस्य प्रतियोगिनोऽनुपलब्धिरूपा वा, योग्यरूपानुपलब्धिरूपा वा? तत्रानुपलब्धेर्योग्यत्वं च किं प्रतियोगितद्व्याप्येतरेत्यादिरूपं वा, प्रतियोगिसत्त्वविरोधित्वरूपं वा, प्रतियोगिसत्त्वापादनेत्यादिरूपं वा? पक्षपञ्चकेऽपि न वर्णाभावस्य प्रत्यक्षतासिद्धिरिति भावेनाद्यं निराह ।। **योग्य इति** ।। द्वितीयमाशङ्क्य निराह ।। **न चेति** ।।

तर्कताण्डवम्

नच प्रतियोगितद्व्याप्येतरप्रतियोग्युपलम्भकसामग्रीरूपयोग्यताविशिष्टानुपलब्धिस्तत्सहकारिणी । एवं च जातिग्रहे व्यक्तियोग्यताया

१. "रूपत्वादौ" इति पदस्य कृत्यं न ज्ञायते ।

अपि कारणत्वात्परमाणोश्च अयोग्यत्वान्नोक्तदोषः । विशेषगुणग्रहे त्वाश्रययोग्यता न हेतुः । अन्यथा गन्धादिग्रहो न स्यादिति शब्दाभावग्रह उक्तरूपानुपलब्धिरस्तीत्युदयनोक्तं युक्तम् । एकस्य संयोगिनोऽपगमे सति संयोगध्वंसस्याप्रत्यक्षतापातात् । तत्र प्रतियोगिभूतात् संयोगात्तद्व्याप्यात्सन्निकर्षाच्चातिरिक्तस्य संयोगोपलम्भकस्यैकस्य संयोगिनोऽभावात् । वर्णोपलम्भकस्योच्चारणस्य अभावेनोपलम्भकसामग्र्या असत्त्वाच्च ।

एतेन प्रतियोगिसत्त्वविरोध्यनुपलब्धिरूपा योग्यानुपलब्धिस्तत्सहकारिणी, सा च शब्दाभावे संयोगध्वंसे चास्ति, शब्दादेः सत्त्वेऽनुपलब्ध्ययोगात्, पार्थिवपरमाणुगते जलत्वाभावे तु नास्ति, व्यक्तेरयोग्यत्वेन जलत्वानुपलब्धिसम्भवादिति मण्युक्तं निरस्तम् । उक्तप्रत्यभिज्ञया शब्दस्य सत्त्वेऽपि व्यञ्जकाभावेनानुपलम्भसम्भवात् ।

न्यायदीपः

उक्तदोषनिरासाय तृतीयं पक्षं **कुसुमाञ्जल्युक्तमाशङ्क्य** च निराह ।। **न चेति** ।। प्रतियोगि घटादि, यच्च घटादिव्याप्यं सन्निकर्षादि, ताभ्यामितरा घटादिलक्षणप्रतियोग्युपलम्भकसामग्री सैवानुपलब्धेर्योग्यता । तद्विशिष्टानुपलब्धिरभावप्रत्यक्षे सहकारिणीत्यर्थः । घटाभावप्रत्यक्षे तथा दर्शनादिति भावः । प्रतियोगिसत्त्वेऽनुपलब्धेरेवाभावः । तद्व्याप्ये सत्यपि प्रतियोगिनः सत्त्वनियमेनानुपलब्धिर्नेति ताभ्यामितरत्वेनोपलम्भकसामग्री विशेषिता ।। **नोक्तदोष इति** ।। उपलम्भकसामग्रीरूपयोग्यताभावेन पार्थिवपरमाणौ जलत्वाद्यभावप्रत्यक्षतापत्तिदोषो नेत्यर्थः । नन्वेवं शब्दाभावोऽपि न प्रत्यक्षः स्यात् जातिग्रह इव विशेषगुणग्रहेप्याश्रययोग्यत्वस्य तन्त्रत्वात्.... योग्यानुलब्ध्यभावादित्यत आह ।। **विशेषगुणेति** ।। शब्दरूपरसगन्धादि-

विशेषगुणेत्यर्थः । तथा च गगनलक्षणाधिकरणस्य अयोग्यत्वेऽप्युक्त-रूपयोग्यताविशिष्टशब्दानुपलंब्धेर्भावेन श्रोत्रेण गगने शब्दाभावग्रहो युक्त इति भावः । कुतोऽप्रत्यक्षत्वापात इत्यतः यावदुपलम्भकमेलनरूपसामग्र्य-भावादिति भावेनाह ।। **तत्रेति** ।। एकसंयोगिनोपगमस्थल इत्यर्थः । ननु संयोगाभावान्याभावप्रत्यक्षे सहकारिणीयमनुपलब्धेः योग्यतेत्यत आह ।। **वर्णेति** ।।

सन्निकर्षग्रन्थान्ते **मण्युक्त**दिशा शब्दाद्यभावप्रत्यक्षत्वानुकूलं चतुर्थपक्षभूतं योग्यत्वमनूद्य निराह ।। **एतेनेति** ।। प्रतियोगिसत्त्वविरोधीति बहुव्रीहिः । यस्या अनुपलब्धेः प्रतियोगिसत्त्वं विरोधि सानुपलब्धिर्योग्यानुपलब्धिः । भूतले घटाद्यनुपलब्धिस्तादृशी । परमाण्वाद्यनुपलब्धिस्तु नैवम् । तत्सत्त्वे-प्यनुपलब्धिसम्भवादिति भावः ।। **तत्सहकारिणीति** ।। अभावप्रत्यक्ष-सहकारिणीत्यर्थः । अस्मिन्पक्षे उदयनपक्षोक्तं दोषद्वंय नेति व्यनक्ति ।। **सा चेति** ।। शब्दादेरित्यादिपदेन संयोगग्रहः । पूर्वोक्तदोषश्च नेत्याह ।। **पार्थिवेति** ।। **उक्तेति** ।। एक एव गकारोऽसकृदुच्चरित इति प्रगुक्त-प्रत्यभिज्ञयेत्यर्थः ।।

तर्कताण्डवम्

एतेनैव प्रतियोगिसत्त्वासञ्जनप्रयुक्तासञ्जनविषयभूतोपलब्धेर-भावरूपा योग्यानुपलब्धिस्तत्सहकारिणी । अत एव पक्षिलभाष्ये यदि स्यात्तर्ह्युपलभ्येतेति तर्कपुरस्कारमेव अभावज्ञानं व्युत्पादितम् । नचैवं घटे मनस्त्वात्यन्ताभावो वायौ रूपवदन्योन्याभावश्च प्रत्यक्षः स्यात्; यदि घटे मनस्त्वं स्यात्तर्हि योग्यव्यक्तिवृत्तित्वात् घटत्व-मिवोपलभ्येत; यदि महति वायौ रूपवत्तादात्म्यं स्यात् तर्हि पृथि-

व्यामिव उपलभ्येतेत्यासञ्जनसम्भवादिति वाच्यम् । उक्तयोग्यानुपलब्धेः सत्त्वेनेष्टापत्तेरिति निरस्तम् ।

उक्तरीत्या शब्दस्य सत्त्वेप्यनुपलम्भसम्भवेन शब्दसत्त्वासञ्जनेनोपलब्ध्यासञ्जनासम्भवात् । कथं च विपर्यये पर्यवसानसहिते तर्के नियमेन सापेक्षस्याभावज्ञानस्याननुमितित्वम् । तस्मात् पररीत्यापि न वर्णध्वंस ऐन्द्रियकः । पराभिमतस्य सत्तयेन्द्रियसहकारिणोऽनुपलम्भस्याभावात् ।

न्यायदीपः

पञ्चमं पक्षमनूद्य निराह ।। **एतेनेति** ।। **प्रतियोगिसत्त्वासञ्जनेति** ।। आसञ्जनं देशविशेषे वर्तमानता । तत्प्रयुक्तासञ्जनविषयत्वं यस्या उपलब्धेः तादृशोपलब्ध्यभावो योग्यानुपलब्धिः । प्रतियोगिसत्त्वासञ्जनप्रसञ्जित-प्रतियोगिकत्वमनुपलब्धेर्योग्यत्वमित्यर्थः ।। **तत्सहकारिणी** ।। अभावप्रत्यक्षसहकारिणी ।। **उक्तेति** ।। व्यञ्जकाभावेनेत्युक्तरीत्येत्यर्थः । अस्मिन्पक्षेऽनुमितित्वं स्फुटमित्याह ।। **कथमिति** ।। यदीह शब्दः स्यादुपलभ्येत नोपलभ्यते अतो नास्ति शब्द इति विपर्यये पर्यवसानसहिते । तर्क इति विषयसप्तमी । तादृशतर्कविषये नियमेनापेक्षासहित-स्येत्यर्थः । त्वन्मते तर्कस्यानुमानानुग्राहकमात्रत्वेनानुमितेरेव तर्कसापेक्षत्वादिति भावः ।। **पराभिमतस्येति** ।। प्रतयिोगिसत्त्वप्रसञ्जितप्रतियोगिकत्वादिरूपयोग्यत्वस्येत्यर्थः । अनुपलम्भस्येत्यन्वयः ।। **सत्तयेति** ।। स्वरूपसत्तया न तु ज्ञाततयेत्यर्थः । तथात्वे ह्यनुमानरूपतया पृथङ्मानत्वेनेन्द्रिय-सहकारित्वाभावादिति भावः ।

तर्कताण्डवम्

मन्मते तु नेन्द्रियस्यानुपलब्धिः सहकारिणी । तथा हि । सहकारिण्या अनुपलब्धेः प्रत्यक्षाप्रत्यक्षसाधारणोपलब्धिसामान्याभावरूपत्वे शङ्खे, शङ्खत्वेन लिङ्गेन श्वैत्येऽनुमिते श्वेतो नेत्यभावभ्रमानुदयप्रसङ्गः ।

नचोक्तरूपानुपलब्धिरभावप्रमाहेतुरिति वाच्यम् । गुञ्जापुञ्जे चक्षुषारोपितेन वह्नित्वेनोष्णस्पर्शानुमितौ सत्यां त्वचोष्णस्पर्शाभावप्रमानुदयप्रसङ्गात् ।

नच प्रमात्वविशेषितोक्तरूपोपलब्धिसामान्याभावः अभावप्रमाहेतुरिति वाच्यम् । शुक्तौ रूप्यभ्रमे सत्यपि रूप्यप्रमाभावस्य सत्त्वेन रूप्याभावप्रमाप्रसङ्गात् ।

नचोक्तरूपानुपलब्धिः प्रत्यक्षरूपोपलब्धिविशेषाभावरूपा, ततो नोक्तदोष इति वाच्यम् । तथापि मण्डूकवसाञ्जनदोषेण वंशमुरगत्वेन चक्षुषा पश्यतस्त्वचोरगत्वाभावाप्रमितिप्रसङ्गात् ।

न्यायदीपः

ननु भवन्मते घटाभावादिग्रहे चक्षुरादेर्यादृशोऽनुपलम्भः सहकारी तादृश एव ममापि शब्दाभावग्रहेऽस्त्वित्यत आह ।। **मन्मते त्विति** ।। चक्षुरादिना घटादेरिव तदभावस्यापि साक्षात्संयोगसम्बन्धेनैव ग्रहणोपपत्तौ किमनुपलब्धिसहकारेणेति भावेन सहकारिताखण्डनमारभते ।। **तथा हीति** ।।

अनुपलब्धिरिन्द्रियसहकारिणीति वदन् प्रष्टव्यः अनुपलब्धिपदेन प्रत्यक्षादिसाधारणप्रतियोगिज्ञानसामान्याभावो वा प्रत्यक्षादिसाधारण-

प्रतियोगिप्रमाभावो वा प्रतियोगिप्रत्यक्षाभावो वा अभावग्राहकेन्द्रियकरणक-प्रतियोगिप्रत्यक्षाभावो वा विवक्षितः । आद्येपि फलीभूताभावग्रहपदेना-भावज्ञानमात्रमुताभावप्रमेति ।

आद्य आह ।। **सहकारिण्या इति** ।। आद्यस्य द्वितीयमाशङ्क्य निराह ।। **न चेति** ।। वह्नित्वेनेत्यनन्तरं लिङ्गेनेति शेषः । द्वितीयमाशङ्क्य निराह ।। **न च प्रमात्वेति** ।। तृतीयमनूद्य निराह ।। **न चोक्तरूपेति** ।। अभावग्राहकेन्द्रियसहकारिरूपेत्यर्थः ।

तर्कताण्डवम्

प्रत्यक्षशब्देनाभावग्राहकत्वेनाभिप्रेतेन्द्रियकरणकज्ञानविवक्षायामपि कपाले घटोस्तीति चाक्षुषसाक्षात्कारस्य विनश्यदवस्थाऽऽपन्ने घटे उत्पन्नत्वाद्घटध्वंसानन्तरं चक्षुषा घटध्वंससाक्षात्कारो न स्यात् । ध्वंससाक्षात्कारोत्पत्त्यपेक्षया पूर्वक्षणरूपे ध्वंसोत्पत्तिक्षण उक्तरूपस्य घटसाक्षात्कारस्य स्थित्या तदभावरूपहेत्वभावात् ।

तस्माद् भावसाक्षात्कारेऽभावानुपलब्धिरिवाभावसाक्षात्कारेऽपि न भावानुपलब्धिः सहकारिणी । किं त्ववर्जनीयसन्निधिः । तदुक्तं पद्धतौ अनुपलब्धिस्त्ववर्जनीयसन्निधिरेवेति । अभावप्रत्यक्षतायां त्वधिकरणयोग्यता तन्त्रम् ।

अन्यथा परमाणौ जलत्वाभावग्रहप्रसङ्गस्यापरिहार्यत्वात् । इतरनिरूप्येषु ज्ञानेच्छादीर्घत्वपरत्वपृथक्त्वादिषु क्लृप्तत्वाच्च । अन्योन्याभावग्रहे त्वयाऽपि स्वीकृतत्वाच्च । न तु त्वदुक्तानेक-विशेषणविशिष्टानुपलब्धिस्तन्त्रम् । अक्लृप्तत्वात् । विशेषणप्रयोजन-स्यातिप्रसङ्गनिरासस्य दीर्घत्वादौ क्लृप्ताधिकरणयोग्यतयैव सिद्धेश्च ।।

न्यायदीपः

अन्त्यपक्षमनूद्य निराह ।। **प्रत्यक्षेति ।। चाक्षुषसाक्षात्कारस्येति ।।** विनश्यदवस्थापन्नघटविषये जातस्येति भावः ।

तर्ह्यभावप्रत्यक्षे किं तन्त्रमित्यतः ''तत्प्रत्यक्षतायां धर्मिण एव प्रत्यक्षतोपयुज्यते'' इति पृथगधिकरणीयसुधावाक्यं हृदिकृत्वाऽऽह ।। **अभावेति ।। इतरेति ।।** ससम्बन्धिकपदार्थेष्वित्यर्थः ।। **अनेकेति ।।** प्रतियोगिसत्त्वासञ्जनप्रसञ्जितप्रतियोगिकत्वादिरूपानेकविशेषणविशिष्टेत्यर्थः ।

नन्वनुपलब्धिमात्रस्य ग्राहकत्वे पार्थिवपरमाण्वादौ जलत्वाद्यभावः प्रत्यक्षः स्यादित्यतिप्रसङ्ग इत्यत आह ।। **विशेषणेति ।।** दीर्घत्वेति परिमाणविशेषः । आदिपदेन पृथक्त्वादिप्रागुक्तधर्मग्रहः ।

तर्कताण्डवम्

नन्वभावप्रत्यक्षत्वप्रयोजकाधिकरणयोग्यता किमिन्द्रियग्राह्यत्व-मात्रं किं वा प्रतियोगिग्रहाकेन्द्रियग्रह्यत्वं यद्वा अभावग्रहकेन्द्रिय-ग्राह्यत्वम् ।

आद्येऽधिकरणं प्रतियोगिसमवायि चेदाश्रयनाशजन्यो भूतलनिष्ठो घटध्वंसः प्रत्यक्षो न स्यात् । आश्रयमात्रं चेच्छब्दाधिकरणमपि योग्यमेव । वने सिंहनाद इत्यादिप्रतीत्या विशेषणतारूपप्रत्या-सत्त्याऽधिकरणस्य वनस्यापि प्रत्यक्षत्वात् ।

न द्वितीयः । स्तम्भजीवनिष्ठयोः पिशाचेश्वरान्योन्याभावयोर-प्रत्यक्षत्वापातात् । न तृतीयः । वायुगुडपाषाणेषु रूपतिक्तरससौरभा-भावानामप्रत्यक्षत्वापातादिति चेन्न ।।

न्यायदीपः

अस्तूक्तरीत्याऽभावप्रत्यक्षत्वेऽधिकरणयोग्यत्वमेव तन्त्रं तावताऽपि शब्दाद्यभावप्रत्यक्षता सेत्स्यतीति भावेन शङ्कते ।। **नन्विति** ।। **प्रत्यक्षो न स्यादिति** ।। तत्राश्रयीभूतसमवायिनोनाशेन ऐन्द्रियकत्वप्रयोजकाधिकरण-योग्यताभावात् । भूतलस्य चासमवायित्वादिति भावः ।। **वनस्यापि प्रत्यक्षत्वादिति** ।। तथा च तदभावस्यापि प्रत्यक्षत्वमेवेति भावः ।

।। **अप्रत्यक्षत्वेति** ।। **मणौ** हि सन्निकर्षग्रन्थान्ते स्तम्भे पिशाच-तादात्म्याभावः प्रत्यक्ष इति प्रतियोगिसत्त्वविरोध्यनुपलब्धिरूपयोग्यानुप-लब्धिरभावप्रत्यक्षनियामिकेति प्रत्यक्षे स्तम्भादौ पिशाचान्योन्याभावप्रत्यक्षत्व-मुपपादितम् तन्न स्यात् । तत्र भवदभिमत प्रतियोगिग्राहकेन्द्रियग्राह्यत्व-रूपाधिकरणयोग्यताया अभावात् । प्रतियोगिनस्तत्रातीन्द्रियत्वादिति भावः ।।

।। **वायुगुडेत्यादि** ।। तत्र यथाक्रमं रूपतिक्तरसगन्धाभावानां चक्षू-रसनघ्राणेन्द्रियग्राह्यत्वात् वाय्वादीनं च क्रमेण चक्षूरसनघ्राणाविषयत्वेन तत्राभावग्राहकेन्द्रियग्राह्यत्वाभावादिति भावः ।।

तर्कताण्डवम्

यन्निष्ठत्वेनाभावो ज्ञायते तस्य प्रतियोगिसमवायिरूपस्य वाऽन्य-रूपस्य वाऽधिकरणस्याभावग्राहकत्वेनाभिमतेन्द्रिय-ग्राह्यत्वमधि-करणयोग्यतेति स्वीकारात् ।

एवं च कपालनाशजन्यस्य भूतलनिष्ठस्य घटध्वंसस्य स्तम्भ-जीवनिष्ठयोः पिशाचेश्वरान्योन्याभावयोश्च प्रत्यक्षता सिद्धा । भूतल-स्तम्भयोर्घटध्वंसपिशाचान्योन्याभावग्राहकचक्षुरादिग्राह्यत्वात् । जीवस्यापीश्वराद्भेदग्राहकसाक्षिग्राह्यत्वात् ।

अत एवोक्तमनुव्याख्याने ।

''शास्त्रगम्यपरेशानाद्भेदः स्वात्मन ईयते ।
अनुभूतिविरोधेन कथमेकत्वमुच्यते'' इति ।

न्यायदीपः

अधिकरणपदेनाभावप्रतीत्यधिकरणमात्रमित्युपेत्य अन्त्यपक्षाङ्गीकारेण समाधिमाह ।। **यन्निष्ठत्वेनेति** ।। पूर्वोक्तदोषं निराह ।। **एवं चेति** ।। तार्किकरीत्या मानसत्वभ्रमनिरासायाह ।। **जीवस्येति** ।। यद्वा जीवेश्वरभेदस्य द्वासुपर्णेत्याद्यागमग्राह्यतया कथमिन्द्रियग्राह्यत्वमित्यत आह ।। **जीवस्येति** ।। भेदान्योन्याभावयोरेकत्वाद्भेदेत्युक्तम् ।। **साक्षीति** ।। स्वरूपेन्द्रियग्राह्यत्वादित्यर्थः ।। **अत एवेति** ।। उक्तरूपेन्द्रियग्राह्यत्वरूपाधिकरणयोग्यत्वस्याभावप्रत्यक्षे तन्त्रत्वादेव । द्वितीयाध्यायतृतीयपादे ''पृथगुपदेशात्'' इत्यत्र शास्त्रैकगम्येश्वरभेदो जीवे साक्षिप्रत्यक्षसिद्ध इत्युक्तमित्यर्थः ।। **ईयत** ।। साक्षिणा ज्ञायत इत्यर्थः ।।

तर्कताण्डवम्

वनादिकं च शब्दाभावग्राहकत्वेनाभिमतश्रोत्राग्राह्यमिति न शब्दाभावस्य श्रावणता । यत्तु वाय्वादौ रूपाद्यभावानामप्रत्यक्षत्वापादनं, तन्न । तन्मते नीरूपो वायुः, गुडो न तिक्तः इति वाय्वादिविशेष्यकप्रतीतीनामिव मन्मतेऽपि वायौ न रूपं गुडे न तिक्ततेति वाय्वादिविशेषणकप्रत्ययानामपि लैङ्गिकत्वेनेष्टापत्तेः । तत्र विशेष्ययोग्यतारूपप्रत्यक्षत्वहेत्वभावेनेव प्रकृतेऽपि दीर्घत्वादौ क्लृप्ताधिकरणयोग्यतारूपतद्धेत्वभावेन योग्यानुपलब्धिरूपलिङ्गाद्यनुसन्धानकल्पनात् ।

नच भट्टमत इव मन्मतेऽनुपलब्धिरप्यनुमेया । येनानुपलब्धेरप्यनुपलब्ध्यन्तरानुमेयत्वेनानवस्था स्यात् ।

नचैवं वाय्वादौ रूपाद्यभावस्यानुमेयत्वे चक्षुरादिव्यापारवैयर्थ्यम्, पक्षस्य वाय्वादेश्चक्षुराद्ययोग्यत्वात्, लिङ्गीभूताया अनुपलब्धेश्च साक्षिवेद्यत्वात्, प्रतियोगिनश्च स्मरणादिति वाच्यम् । लिङ्गीभूतानुपलब्धिविशेषणयोग्यतान्तर्गतालोकादिग्रहार्थत्वात् ।

उक्तं हि प्रमाणलक्षणे ''योग्यानुपलब्धेश्च लिङ्गत्वम्'' इति । लिङ्गत्वेनोक्ता योग्यानुपलब्धिश्च न ग्राहकाभावप्रयुक्ता ।

न्यायदीपः

शब्दाधिकरणमपि योग्यमेवेति प्राागुक्तं निराह ।। **वनादिकमिति** ।। प्रागुक्तं दोषान्तरं च निराह ।। **यत्त्विति** ।। ननु वाय्वादिविशेष्यक-प्रतीतावधिकरणयोग्यत्वाभावाल्लैङ्गिकत्वं युक्तमित्यत आह ।। **तत्र विशेष्येति** ।। **प्रकृतेपीति** ।। वाय्वादिविशेषणकरूपाद्यभावप्रतीतावित्यर्थः । स्यादित्यनन्तरं किन्तु साक्षिप्रत्यक्षेति योज्यम् । ''अस्मत्पक्षेऽनुपलब्धेः स्वप्रकाशसाक्षिसिद्धत्वान्नानवस्थे''ति प्रमाणलक्षणटीकोक्तेरिति भावः । वैयर्थ्यमित्युक्तं व्यनक्ति ।। **पक्षस्येत्यादिना** ।। रूपादिलक्षणप्रतियोगिज्ञानार्थं च नेत्याह ।। **प्रतियोगिनश्चेति** ।। **अनुपलब्धिविशेषणेति** ।। अनुपलब्धिमात्रं नाभावग्राहकम् व्यभिचारात् । किन्तु योग्यानुपलब्धिरेव । योग्यता च प्रतियोग्युपलम्भकसामग्र्यादिरूपेति भावः ।। **योग्येति** ।। टीकोक्तरीत्या योग्यस्यानुपलब्धिः योग्यानुपलब्धिरिति विग्रहः । संसर्गाभावग्रहे प्रतियोगियोग्यताऽपि तन्त्रमित्यग्रे व्यक्तत्वात् ।।

न चैवं ''अनुपलब्धिस्त्ववर्वजनीयसीन्नधि''रिति प्रागुक्तपद्धतिवाक्य-

विरोधः''अभावोनुमा प्रत्यक्षं चे'' तिप्रमाणलक्षणेऽभावद्वैविध्यस्याप्युक्त्या प्रत्यक्षेणाभावग्रहेऽनुपलब्धिरवर्जनीयसन्निधिः अन्यत्र लिङ्गत्वेनेत्यविरोधात् ।।

नन्वनुपलब्धिलिङ्गतास्थळेऽनुपलब्धेरुपलम्भकसामग्र्यभावनिमित्तकतया तत्साहित्यरूपयोग्यताख्यविशेषणाभावाद्धेतोरसिद्धिरित्यत आह ।। लिङ्गत्वेनेति ।।

तर्कताण्डवम्

नचाधिकरणयोग्यतायास्तन्त्रत्वे आत्मादौ धर्माद्याभावोऽपि प्रत्यक्षः स्यादिति शङ्क्यम् । संसर्गाभावग्रहे त्वदभिमता प्रतियोगि-योग्यताऽपि तन्त्रमिति मया स्वीकृतत्वात् । दृष्टानुसारिणी हि कल्पना ।

ध्वनिध्वंसोऽपि योग्यानुपलब्धिरूपलिङ्गगम्य एव । न तु प्रत्यक्षः । अत एव ।

''क्वचिद्धटाद्यभावोऽपि प्रत्यक्षेणावगम्यते ।''

इति ब्रह्मतर्के, ''अभावोऽनुमा प्रत्यक्षं च परामर्शापरामर्श-विशेषात्'' इति प्रमाणलक्षणे, ''प्रायेणानुमानेऽन्तर्भावज्ञापनाय क्रमोल्लङ्घनम्'' इति प्रमाणलक्षणटीकायां च प्रत्यक्षप्रतियोगिका-भावस्यापि क्वचिदेव प्रत्यक्षत्वमुक्तम् ।

तस्माद्वर्णानित्यत्ववादिनस्तव रीत्याऽपि वर्णध्वंसग्रहे सहकारि-णोऽभावात् प्रत्यासत्त्यभावाच्च तदनित्यत्वे न प्रत्यक्षं मानम् ।

न्यायदीपः

कुसुमाञ्जल्याद्युक्तमाशङ्कते ।। **न चेति** ।। **तन्त्रत्व इति** ।। अभाव-प्रत्यक्षत्व इति शेषः ।। **प्रतियोगियोग्यताऽपीति** ।। एतेन ''अधिकरण-योग्यत्वं भेदग्रहे तन्त्र''मिति सुधोक्तिः ''प्रतियोगियोग्यत्वं तन्त्र''मिति लक्षणटीकोक्तिश्चाविरुद्धोपपादिता ज्ञेया ।। **अत एवेति** ।। प्रागभावादिरूप-संसर्गाभावग्रहेऽधिकरणप्रतियोगिनोर्द्वयोरपि योग्यत्वस्यापेक्षितत्वादेवेति बाहुल्येनानुमानान्तर्भावादेवेत्यर्थः । क्वचिदेव प्रत्यक्षत्वमुक्तमित्यन्वयः । तत्त्वनिर्णयोक्तब्रह्मतर्कवाक्ये इत्यर्थः ।। **क्रमेति** ।। अभावोऽनुमा प्रत्यक्षं चेतिमूलवाक्ये प्रत्यक्षमनुमा चेति वक्तव्ये अनुमा प्रत्यक्षञ्चेति क्रमव्यत्यासो बाहुल्येनानुमानान्तर्भावद्योतनायेति टीकार्थः ।। **सहकार्यभावादिति** ।। योग्यानुपलब्धिरूपसहकार्यभावादित्यर्थः ।। **प्रत्यासत्तीति** ।। इन्द्रिय-विशेषणतादेर्दूषितत्वादिति भावः । ''न प्रत्यक्षम्'' इति पदविभागः ।

।। इति वर्णानित्यत्वस्य प्रत्यक्षत्वभङ्गः ।। २३ ।।

वर्णानित्यत्वेऽनुमानभङ्गः

ननु तर्हि योग्यानुपलब्धिरूपं लिङ्गं वर्णध्वंसादौ मानमस्त्विति चेन्न । व्यञ्जकाभावेनाप्यनुपलम्भसम्भवेन विशेषणासिद्धेः ।

एतेन वर्णः प्रयत्नोत्पाद्यः तदनभिव्यङ्ग्यत्वे सति तदनन्तर-मुपलभ्यमानत्वात् घटवत् इति निरस्तम् । विशेषणस्यापाततः सन्दिग्धासिद्धेः । विमर्शे वक्ष्यमाणरीत्या निश्चितासिद्धेश्च ।

न्यायदीपः

''व्यञ्जकभावाभावाभ्यामेवोपलम्भानुपलम्भा''विति तत्त्वनिर्णयटीकां हृदि

कृत्वाऽऽह ।। **व्यञ्जकेति** ।। ध्वनिरूपव्यञ्जकेत्यर्थः ।। **विशेषणेति** ।। प्रतियोग्युपलम्भकसहितानुपलब्धेरेव योग्यानुपलब्धित्वाद्व्यञ्जकाभावनिबन्धनानुपलब्ध्या अभावनिश्चयेऽन्धकारावृते घटवति गेहे घटाभावप्रमापातादिति भावः ।

मणिकृदाद्यभिमतहेतूनाशङ्क्य निराह ।। **एतेनेति** ।। प्रयत्नाभिव्यङ्ग्ये प्रयत्नानन्तरमुपलभ्यमाने व्यभिचारनिरासाय हेतौ तदित्यादि सत्यन्तम् । गगनादौ तन्निरासाय विशेष्यम् ।। **आपातत इति** ।। नित्यत्वसाधकविशेषादर्शनदशायामित्यर्थः ।। **विमर्श इति** ।। उत्तरभङ्गे वक्ष्यमाणदिशा प्रत्यभिज्ञाविरोधादनित्यो न भवतीति विशेषदर्शने सतीत्यर्थः ।

तर्कताण्डवम्

[1]एतेनैव वर्णोऽनित्यः उत्पत्तिमत्त्वे सति भावत्वात्, सामान्यवत्त्वे सति अस्मदादिबहिरिन्द्रियग्राह्यत्वात् घटवत्, प्रत्यक्षविशेषगुणत्वात् घटरूपवत्, उत्कर्षापकर्षवत्त्वात् मधुरादिरसवत् बहिरिन्द्रियव्यवस्थापकगुणत्वात् घटरूपवदित्यादिमण्युक्तानुमानं तत्र मानम् । विपक्षे च शब्दध्वंसग्राहकप्रत्यक्षानुपपत्तिर्बाधिकेति निरस्तम् । विपक्षे बाधकस्यैव निरासात् ।

---

१. अत्र चैवं मणिवाक्यम् । "तस्मात् वर्णो ननित्यः अनित्यो वा सत्त्वे सति उत्पत्तिमत्वात्, अस्मदादिबहिरिन्द्रियग्राह्यत्वे सति जातिमत्वात्, अस्मदादिप्रत्यक्षगुणत्वाद्वा, आत्मैकत्वप्रत्यक्षत्वपक्षे प्रत्यक्षविशेषगुणत्वात्, व्यापकसमवेतप्रत्यक्षविशेषगुणत्वात्, अनात्मप्रत्यक्षगुणत्वात् अव्याप्यवृत्तित्वात्, ईश्वरज्ञानञ्च न तथा, तत्प्रयोजककारणाभावात्, बहिरिन्द्रियव्यवस्थाहेतुगुणत्वात्, भूतप्रत्यक्षगुणत्वात्, उत्कर्षापकर्षशब्दप्रवृत्तिनिमित्तजातिमत्वाद्वेत्यादि ।।"

न्यायदीपः

।। **एतेनैवेति** ।। ध्वंसे व्यभिचारनिरासाय हेतौ भावत्वादिति विशेष्योक्तिः । गगनादौ तन्निरासाय सत्यन्तम् । द्वितीयहेताविन्द्रिय-प्रत्यक्षत्वादित्यस्येन्द्रियकरणकज्ञानविषयत्वादित्यर्थः । क्वचिदिन्द्रियग्राह्यत्वा-दित्येव पाठः । तत्र प्रत्यक्षत्वमात्रस्यात्मनि व्यभिचारात् बहिरिन्द्रिये-त्युक्तिः । तथापि योगिबहिरिन्द्रियप्रत्यक्षत्वमादायोक्तदोषनिरासाय **अस्म-दादीति** ।। घटत्वादौ तन्निरासाय सत्यन्तम् । तन्मात्रस्यात्मन्यपि सत्त्वा-द्विशेष्यम् । तृतीये च गुणत्वमात्रस्य गगनादि-परिमाणादौ, विशेषगुणत्वस्य जलपरमाण्वादिरूपादौ, प्रत्यक्षगुणत्वमात्रस्य चात्मैकत्वादौ, सत्त्वा-द्व्यभिचारनिरासाय प्रत्यक्षविशेषगुणत्वादित्युक्तिः ।। **उत्कर्षेति** ।। उत्कर्षवत्त्वे सत्यपकर्षवत्त्वादित्यर्थः । एकैकस्य गगनादिपरिमाणे परमाण्वादिपरिमाणे च सत्त्वादुभयोक्तिः । तारमन्द्रत्वादिरूपोत्कर्षादिः पक्षे, दृष्टान्ते च माधुर्यातिशयादिः, तथापि जातिरूपोत्कर्षादिरुभयत्र सम इति भावः ।। **बहिरिन्द्रियेति** ।। शब्दज्ञानं करणसाध्यम् कार्यत्वात् इति करणसामान्यसिद्धौ चक्षुरादे रूपादिज्ञानकरणत्वादिना शब्दज्ञानाहेतुत्वा-त्परिशेषाच्चक्षुरादिबाह्येन्द्रियचतुष्टयादन्यच्छोत्रेन्द्रियं सिद्ध्यतीति श्रोत्ररूप-बहिरिन्द्रियव्यवस्थापकगुणत्वादित्यर्थः । गुणत्वमात्रस्य गगनादिपरिमाणादि-गुणे इन्द्रियव्यवस्थापकगुणत्वस्यात्मगतैकत्वादौ बहिरिन्द्रियव्यवस्थापकत्व-मात्रस्य रूपत्वरसत्वादौ सत्वेन व्यभिचारनिरासाय बहिरिन्द्रियव्यवस्थापक-गुणत्वादित्युक्तम् । ननु चैतद् ध्वनावप्यस्तीति चेत् किं तावता । यथोक्त-साध्यस्यापि तत्र सत्त्वात् ।। **तत्रेति** ।। वर्णानित्यत्व इत्यर्थः । एतेनेत्युक्तं व्यनक्ति ।। **विपक्ष इति** ।।

तर्कताण्डवम्

आद्ये हेतावुत्पत्तिमत्त्वस्य द्वितीये प्राभाकरं प्रति सामान्यवत्त्वस्य नैयायिकं प्रत्यपि क्षणिके शब्दे विषयजन्येन्द्रियकरणकज्ञान-विषयत्वस्य तृतीयपञ्चमयोर्मां प्रति गुणत्वस्य चतुर्थे उत्कर्षवत्त्वे सत्यपकर्षवत्त्वस्य मन्द्रतमे तारतमे चासिद्धेश्च । शब्दत्वरसत्वादिना साङ्कर्यप्रसङ्गेन शब्दे रसे चैकस्या उत्कर्षादिरूपाया जातेर-भावे-नासिद्धिसाधनवैकल्यान्यतरापाताच्च ।

न्यायदीपः

प्रातिस्विकदोषं चाह ।। **आद्य इत्यादिना** ।। षष्ठ्यन्तानाम-सिद्धेश्चत्यनेनान्वयः । उत्पन्नो गकार इति मण्युक्तप्रतीतिस्तु नास्त्येवेति भावः ।। **प्राभाकरं प्रतीति** ।। तस्यापि वर्णनित्यत्ववादित्वेन तं प्रत्यपि प्रयोज्यत्वात् । नित्यत्ववादे गकारादिव्यक्तेरेकत्वेन तत्र सामान्याभावात् । गुणत्वपक्षेऽपि तेन गुणगतजातेरनङ्गीकारादिति भावः । तं प्रति हेत्वन्तरं भविष्यतीत्यत आह ।। **नैयायिकं प्रतीति** ।। तन्मते कदम्बमुकलादिन्यायेन भेरीताडनोच्चारणादिदेशाच्छ्रोत्रदेशपर्यन्तं सजातीयशब्दपरम्परोत्पत्तेः । अन्त्योपान्त्यशब्दयोः सुन्दोपसुन्दन्यायेनान्योन्यनाशस्य च स्वीकारात् । सर्वशब्दानामिवान्त्यस्यापि [१]त्रिक्षणवत्त्वोपगमेऽन्त्यशब्दस्थितिक्षण-स्यैवोपान्त्यशब्दस्य विनाशक्षणत्वादन्त्यस्य तृतीयक्षणे पूर्वशब्दस्य ध्वंसेनान्त्यस्य विनाशकाभावेन नित्यतापत्तेः । क्षणिकत्वे चोपान्त्यशब्द-विनाशक्षणस्यैव अन्त्यशब्दविनाशक्षणत्वेन नित्यत्वापत्तिदोषाभावात्क्षणिकत्वं स्वीकृतम् । अतस्तस्मिन्ज्ञानात् पूर्ववृत्तित्वस्याभावेन ज्ञानजनकेन्द्रिय-सन्निकर्षायोगात् विषयजन्यं इन्द्रियकरणकं यज्ज्ञानं तद्विषयत्वस्या-सिद्धेरित्यर्थः ।।

१. "त्रिक्षणावस्थायित्वोपगमे" इति पाठश्चेत् स्वरसः ।

।। **माम्प्रतीति** ।। मन्मते वर्णस्य द्रव्यत्वादिति भावः ।। **शब्दत्वेति** ।। तारत्वस्य शब्दत्वपरिहारेण रसे, शब्दत्वस्यापि तारत्वपरिहारेण मन्दशब्दे, तारशब्दे च तारत्वशब्दत्वयोः उभयोरपि समावेशेन

"व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः ।
रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः ।।"

इति कारिकोक्तसाङ्कर्यरूपजातिबाधकेन तारत्वादेर्जातित्वायोगात् । एवं रसत्वादिनाऽपि साङ्कर्यं ध्येयम् ।

न च तर्हि शब्दत्वस्यैव जातित्वं त्यज्यतामिति वाच्यम् । तस्यानुगतप्रतीत्यादिना जातित्वस्य परमते सिद्धत्वादिति भावः ।

तर्कताण्डवम्

न चोत्कर्षस्य गुणत्वव्याप्यजात्या सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकत्वेन, अपकर्षस्य चोक्तजात्या सजातीयप्रतिबध्यसाक्षात्कारविषयतावच्छेदकत्वेनानुगम इति वाच्यम् । उक्तरूपस्योत्कर्षस्यापकर्षस्य वा परिमाणे अभावेनैकस्य हेतुत्वेऽपि परममहत्परिमाणाणुपरिमाणयोः व्यभिचाराभावेनोभयग्रहणवैयर्थ्यात् । उत्कर्षापकर्षयोः प्रत्येकं हेतुत्वे च यथोक्तमन्द्रतमतारतमयोः भागासिद्ध्यपरिहारात् । उक्तहेतुपञ्चकेऽपि श्रोत्रावृत्तित्वस्योपाधित्वाच्च । विपक्षाच्छ्रोत्रवृत्तिपरिमाणतो व्यावृत्तत्वान्न पक्षेतरता ।

न्यायदीपः

।। **सजातीयेति** ।। पक्षे शब्दान्तरं दृष्टान्ते रसान्तरं ध्येयम् । तारशब्दश्रवणे शब्दान्तरस्य अनुपलम्भात् । [१]यद्यपि **मणौ** सजातीये-

१. "नचानुगतव्यवहारानुपपत्तिः, सजातीयसाक्षात्कारप्रतिभन्धकतावच्छेदकत्वे-

त्याद्येवोक्तम् । तथापि सुखादिसाक्षात्काराप्रतिबन्धकत्वात् त्तद्व्यावृत्तये तदीयटीकोक्तस्यानुवादो **गुणत्वव्याप्यजात्येति** ।। प्रतिबन्धकत्वमात्रे तूक्ते फलोपधानप्राप्तौ बुभुत्सावशान्मन्देपि शब्दे गृह्यमाणे तारशब्दस्याप्रतिबन्धकतया तत्साधारणानुगतधीसिद्ध्यर्थं तदवच्छेदकत्वेनेत्युक्तम् । तथा च तत्र बुभुत्सोत्तेजिकेति भावः ।। **उक्तेति** ।। गुणत्वव्याप्यजात्येत्यर्थः । तारशब्दश्रवणे सत्यपकृष्टशब्दानुपलम्भादिति भावः ।

किञ्चायं विशिष्ट एको हेतुरुत प्रत्येकं हेतुः? आद्ये गगनपरिमाणेऽणुपरिमाणे चाव्यभिचाराय हि विशेष्यं विशेषणं चेति वाच्यम् । न च तत्र व्यभिचारप्रसक्तिरस्ति । स्वस्य साक्षात्काराभावात् । सजातीयसाक्षात्कारप्रतिबन्धकत्वाभावाच्चेति भावेनाह ।। **उक्तरूपस्येति** ।। परिमाणे गगनादिपरिमाणे ।। **अभावेनेति** ।। तत्र साक्षात्काराप्रसक्तेरिति भावः ।

अन्त्ये दोषमाह ।। **उत्कर्षेति** ।। **श्रोत्रावृत्तित्वस्येति** ।। तस्य घटादौ रूपरसादौ च साध्यव्यापकत्वात्साधनवति पक्षे शब्देऽभावेन साधनाव्यापकत्वात् । यदिन्द्रियं यद्गुणं गृह्णाति तदिन्द्रियं तद्गुणयुक्तमिति न्यायेन शब्दस्य श्रोत्रवृत्तित्वादिति भावः । न च श्रोत्रमशकसंयोगादौ साध्याव्यापकत्वम् । श्रोत्रेतरावृत्तित्वे सति श्रोत्रवृत्तित्वाभावस्य अभिमतत्वात् । न च सिद्धान्तेऽथापि दोषः । पररीत्या परस्य दोषोक्तेरिति भावः ।। पक्षमात्रव्यावर्तकश्रोत्राख्यविशेषणवत्त्वात् पर्वतेतरत्वादेरिव नोपाधित्वमस्येत्याशङ्क्याह ।। **विपक्षादिति** ।। श्रोत्रस्याकाशात्मकत्वेन तत्परिमाणस्याजन्यत्वादिति भावः । एतच्चोपलक्षणम् । बाधादिस्थले पक्षेतरत्वस्याप्युपाधित्वस्वीकारात् । प्रकृते विपक्षे बाधकाभावस्येह

नानुगतेन नानान्तारत्वेषु अनुगतव्यवहारसम्भवात्, तदज्ञाने व्यवहारासिद्धेः'' । इति मणिवाक्यम् । -श.ख.च.भा.प्र.प. शब्दानित्यत्ववाद ४४३ पुटे)

प्राग्व्यक्तत्वेन हेतूनामप्रयोजकत्वस्य वक्ष्यमाणदिशा बाधस्य च निर्णयेन पक्षेतरत्वस्याप्युपाधित्वे दोषो नेत्यपि ध्येयम् ।

॥ इति वर्णानित्यत्वेनुमानभङ्गः ॥ २४ ॥

वर्णानित्यत्वे प्रत्यभिज्ञाविरोधः

किञ्च स एवायं गकार इति प्रत्यभिज्ञाबाधः । नच तानेव शालीनुपभुञ्ज्महे इत्यादिवत्सोऽयं गकार इति व्यपदेशो गौण इति वाच्यम् । प्रत्यभिज्ञाबाध उक्ते व्यपदेशगौणत्वशङ्काया व्यधिकरणत्वात् । प्रत्यभिज्ञायाश्च स्थायिपदार्थान्तर इवाऽत्राप्यनुभवसिद्धत्वात् । ते शालय इमे शालयो न भवन्तीतिवत् स गकारोऽयं गकारो न भवतीति भेदप्रत्ययाभावाच्च ।

न्यायदीपः

''तदेवेदं वचनमिति प्रत्यभिज्ञाविरोधात् । न च सादृश्यात्प्रत्यभिज्ञा भ्रान्तिरिति वाच्यम् । सोऽयं देवदत्त इत्यादेरपि तथात्वप्राप्तेः'' इति तत्त्वनिर्णयतट्टीकयोरुक्तं व्यक्तीकुर्वन् उक्तहेतूनां बाधितविषयत्वं चाह ॥ **किञ्चेति** ॥ यद्यपि प्रत्यभिज्ञा न वर्णनित्यत्वं विषयीकरोति । तथापि पूर्वं गकारं श्रुतवतः पुनस्तच्छ्रवणे स एवायं गकार इति जायमाना प्रत्यभिज्ञा प्राक्तनस्येदानीन्तनेनैक्यं गोचरयन्ती तावत्कालस्थिरत्वमवगाहत इति ''तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यति'' इति न्यायेन पराभिमताशुतरविनाशस्य व्यतिरेकान्नित्यत्व एव पर्यवस्यतीति [१]**मण्युक्त**दिशा

१. यद्यपि प्रत्यभिज्ञायाः नित्यत्वं न विषयस्तथापि नाशकत्वाभिमतशब्दान्तरादीनां अन्तरासम्भवेऽपि तावत्कालीनतां गकारस्य गृह्णातीति ''तावत्कालं स्थिरश्चैनं कः पश्चान्नाशयिष्यति'' इति पराभिमताशुविनाशित्व-

वा टीकोक्तदिशा पूर्वं पूर्वतरं पूर्वतममप्येवमित्यनादिनित्यतैव सिद्ध्यतीति भावेन प्रत्यभिज्ञाबाध इत्युक्तम् ।।

अत्र चत्वारः पक्षाः सम्भवन्ति । ज्ञानमेवेदं नेति वा, ज्ञानत्वेऽप्यभिज्ञैव न प्रत्यभिज्ञेति वा, प्रत्यभिज्ञात्वेऽपि जात्यभेदविषयेति वा, व्यक्त्यभेदविषयत्वेऽपि भ्रान्तिरिति वा । तत्राद्यं **कुसुमाञ्जल्या**द्युक्तमाशङ्क्य निराह ।। **न चेति** ।। शालीन् सूक्ष्मव्रीहिविशेषान् । ज्ञानमेवेदं नेत्युच्यत इत्यत आह ।। **प्रत्यभिज्ञाया इति** ।। **स्थायीति** ।। सोऽयं देवदत्त इत्यादाविव स एवायं गकार इति प्रत्यभिजानामीत्यनुभवसिद्धत्वादित्यर्थः । तत्राप्येवमनुभवोऽस्तीत्यतस्तत्र विपरीतदर्शनान्न प्रत्यभिज्ञानुभवस्य भावोऽस्ति । अस्ति चेदपि भ्रम एव । प्रकृते तु न तथेति भावेनाह ।। **ते शालय इति** ।।

तर्कताण्डवम्

नचेयं प्रत्यभिज्ञा पुरोवर्तिनि गकारे गत्वेनोपस्थितगकाराभेदविषया, सा च पुरोवृत्तिगकारस्य स्वाभेदेनाप्युपपन्ना, न तु तत्कालाद्यवच्छेदेनोपस्थितगकाराभेदविषयेति वाच्यम् । प्रत्यभिज्ञान्तरवत् सोऽयमिति तत्तेदन्ताधिकरणाभेदप्रतीतेः ।

नन्वियं गत्वादिजात्यभेदविषया । नच तथात्वे तज्जातीयोऽयमित्याकारः स्यादिति वाच्यम् । जात्यभेदादधिकस्य जातिगतस्य जातित्वस्य प्रतीतावेव तदाकारादिह च जातित्वस्य अप्रतीतेरिति चेन्न । तारत्वादिना सांकर्यस्य वक्ष्यमाणत्वेन गत्वादिजातेरेवाभावात् । स एवायं घट इत्यादेरपि तथात्वापातेन व्यक्त्यभेदस्य

व्यतिरेकान्नित्यतायामेव पर्यवस्यति । -श.ख.च.भा.प्र.प. शब्दानित्यत्ववादपूर्वपक्षे ३७८ पुटे ।

क्वाप्यसिद्ध्यापत्तेश्च । क्वापि प्रत्यभिज्ञाया भ्रान्तित्वाभावापत्तेश्च । घटान्तराद्गृहीतभेदेऽपि घटे स एवायं घट इति प्रत्यभिज्ञाप्रसङ्गाच्च ।।

किञ्च प्रत्यभिज्ञाजनके स एवायं गकार इति वाक्ये स इत्यस्य जातिपरत्वेऽयमित्यस्य च व्यक्तिपरत्वे जत्या सह व्यक्तेरेवाभेदः प्रतीयेत न तु जात्या सह जातेः । तथा च निरसिष्यमाणभ्रान्तित्व-पक्ष एवान्तर्भावः स्यात् ।।

न्यायदीपः

द्वितीयं पक्षमाशङ्क्य निराह ।। **न चेयमिति** ।। **प्रत्यभिज्ञेति** ।। तव प्रत्यभिज्ञात्वेनाभिमतेत्यर्थः ।। **उपपन्नेति** ।। तथा चाभिज्ञैव जाता न तु प्रत्यभिज्ञेति भावः ।। **तत्कालेति** ।। अतीतकालेत्यर्थः ।

तृतीयं पक्षमाशङ्कते ।। **नन्विति** ।। [१]तथा सति तज्जातीयोऽयमिति स्यादिति **मणिग्रन्थोक्तं** निराह ।। **न च तथात्व इति** ।। तज्जातीयोऽय-मित्यस्य तन्निष्ठजातिमानयमिति ह्यर्थः । स चाकारो जातित्वभान एव युक्तो नान्यथेति भावः । सामान्यनित्यतायाः प्रमाणविरुद्धत्वादिति स्वमतावष्टम्भेन वास्तवमुपेत्य टीकायां परिहारोक्तावपि पररीतिमनुसृत्य स्वयं परिहारमाह ।। **तारत्वादिनेति** ।। **क्वापीति** ।। सोऽयं देवदत्त इत्यादावपि जातिविषय-त्वस्य वक्तुं शक्यत्वादिति भावः ।। **घटान्तरादिति** ।। तत्राप्यनुगतजातेः सत्त्वादिति भावः । जात्यभिप्रायेण तादृशप्रत्यभिज्ञापादनमिष्टमिति मन्वानं

---

१. एवञ्च भेदे भासमाने प्रत्यभिज्ञायाः सजातीयत्वं विषयः । न व्यक्त्यभेदः । न चैवं तज्जातीयोऽयमिति स्यात् न तु सोऽयमिति वाच्यम् । तज्जातीयत्व-प्रतीतेरपि सोऽयमित्याकारदर्शनात् यथा सैवेयं गाथा तदेवेदमौषधं बहुभिः कृतं मयापि प्रत्यहं क्रियमाणमस्तीत्यादौ । -श.ख.च.भा.प्र.प. शब्दनित्यत्ववाद-सिद्धान्ते ४४७ पुटे ।

प्रत्याह ।। **किञ्चेति** ।। शाब्दप्रत्यभिज्ञायां या विषयव्यवस्था सैव प्रत्यक्षप्रत्यभिज्ञायामपि भविष्यति । तथा च तत्र सोऽयमिति तदिदंशब्दाभ्यां किं जातिव्यक्त्योरुक्तिरथ जातेरेव उत व्यक्तेरेवेति वाच्यम् । पक्षान्तरासम्भवात् । आद्येऽपि व्यक्तेर्जात्यभेदोऽपि किं साक्षादथ परम्परया वा । तत्राद्यं निराह ।। **प्रत्यभिज्ञाजनक इति** ।। **भ्रान्तित्वपक्ष एवेति** ।। तथा च तन्निरासेनायं पक्षो निरस्तो भविष्यतीति भावः ।

तर्कताण्डवम्

नच जात्यभेदोऽपि व्यक्तौ परम्परासम्बन्धेनास्तीति न भ्रान्तित्वमिति वाच्यम् । क्वापि व्यक्त्यभेदासिद्ध्यादिपूर्वोक्तदोषात् ।

उभयोरपि जातिपरत्वे च व्यक्तिवाचकगकारसामानाधिकरण्यमयुक्तम् । उभयोरपि व्यक्तिपरत्वे तु शब्दजन्यप्रत्यभिज्ञा व्यक्त्यभेदविषयेति प्रत्यक्षप्रत्यभिज्ञाऽपि तद्विषयैव । तयोः करणकृताभ्यां परोक्षत्वापरोक्षत्वाभ्यां भेदेऽपि विषयकृतभेदाननुभवात् ।

नचेयं सोऽयं कुन्तलकलाप इत्यादिवद् भ्रान्तिः । बाधकाभावात् । नच भेदधीर्बाधिका । स गकारोऽयं गकारो न भवतीति विशेष्ये भेदबुद्धेरभावात् ।

तारो गकारो मन्द्रो न भवतीति धीस्तु विशेष्याभेदज्ञानेन पाकरक्ते घटे न श्याम इतिवत्, मुण्डिते चैत्रे न शिखीतिवच्च विशिष्टभेदविषयैव । न विशेष्यभेदविषया ।।

न्यायदीपः

अन्त्यमाशङ्क्य च निराह ।। **न चेति** ।। जातेर्जात्यभेदः साक्षात्

तत्समवायसम्बन्धेन व्यक्ताविति परम्परयेति भावः । द्वितीयं निराह ।। **उभयोरपि जातीति** ।। तृतीयं निराह ।। **उभयोरपि व्यक्तीति** ।।

नन्वस्त्वेवं प्रत्यभिज्ञा गकारव्यक्तयैक्यविषया । तथाऽपि सा भ्रान्तिरस्तु । परिलूनपुनर्जातकुन्तलकलापयोः सादृश्यान्निमित्तात्सोऽयं कुन्तलकलाप इति प्रत्यभिज्ञावदिति चतुर्थं पक्षमाशङ्कते ।। **न चेति** ।। तत्र परिलूनकुन्तल-समूहस्य भूमौ पतितस्य दर्शनेन नायमसाविति बाधकज्ञानोदयवदिह तदभावादित्याह ।। **बाधकेति** ।।

ननु बाधकाभावादित्यसिद्धमिति चेत्तत्किं भेदज्ञानमुतोत्पत्तिविनाश-ज्ञानमथ विरुद्धधर्मवत्त्वज्ञानम्, यद्वा गत्वादिव्याप्यजातिविशेषानुभवरूपज्ञानं बाधकम् । आद्यमाशङ्क्य प्रत्याह ।। **न चेति** ।। न बाधिकेत्यतः सा किं विशेष्यभेदविषयाऽथ तारत्वादिविशिष्टभेदविषयेति विकल्प्याद्यं निराह ।। **स इति** ।। द्वितीये त्विष्टापत्तिरिति भावेनाह ।। **तार इति** ।। विशिष्ट-भेदधीर्बाधान्न विशेष्यभेदविषयिणीति भावेनोक्तम् ।। **विशेष्याभेदज्ञानेनेति** ।। हेतुनेति शेषः ।।

तर्कताण्डवम्

इयांस्तु भेदः; तद्विशिष्टं मम पदार्थान्तरम्, तव तु विशेषणोपरक्तं विशेष्यमेव वा विशेषणविशेष्यसम्बन्ध एव वेति । उभयथापि न विशेष्याभेदहानिः ।

नापि तारो नष्टो मन्द्र उत्पन्न इत्युत्पत्त्यादिधीर्बाधिका । पाकरक्ते श्यामो नष्ट इत्यादिवन्मन्मते विशिष्टनाशविषयत्वेन त्वन्मते तु विशेषणनाशविषयत्वेन मतद्वयेऽपि विशेष्यनाशाविषयत्वात् ।

नापि तारत्वादिविरुद्धधर्मसंसर्गधीर्बाधिका । यो गकारो मन्द्रः

स एव तार इति सामानाधिकरण्यानुभवेनैकस्मिन्नेव चैत्रे शिखित्व-मुण्डित्ववद्घटे श्यामत्वरक्तत्ववत्, गगने शब्दतदभाववत् आत्मन्य-दृष्टतदभाववच्च कालादिभेदेनाविरोधात् ।

न्यायदीपः

ननु, विशिष्टं न विशेष्यादितोऽतिरिक्तमिति मते अस्तु विशेष्य-भेदविषयेत्यत आह ।। **इयांस्तु भेद इति** ।। उपरक्तविशेष्यमेव न तु केवलमित्यर्थः । तथा च त्वन्मते स्वर्गी ध्वस्त इत्यादाविवेहापि विशेषण-भेदविषयैव स्यादिति भावः । द्वितीयं बाधकं निराह ।। **नापि तार इति** ।।

तृतीयं निराह ।। **नापि तारत्वेति** ।। स किं तारत्वादिरौपाधिको धर्मः? उत जातिरूपः? आद्य आह ।। **यो गकार इति** ।। **कालादि-भेदेनेति** ।। ''एकस्यैव वर्णस्य कालभेदेनोच्चारयितृपुरुषभेदेन नासिकादि-स्थानभेदेन विरुद्धधर्माध्यासोपपत्तेरिति'' तत्त्वनिर्णयटीकोक्तेरिति भावः ।

तर्कताण्डवम्

नचैकदैव चैत्रमैत्रोच्चारितयोर्गकारयोस्तारत्वमन्द्रत्वे दृश्येते इति वाच्यम् । एकदैव गगने विहगदेहसंयोगतदभाववत् आत्मनि सुखदुःखादिवच्च प्रदेशभेदेनाविरोधात् । स च प्रदेशभेदो मम स्वाभाविकः तव त्वौपाधिक इत्यन्यदेवैतत् ।

नच तारत्वादीनां जातित्वान्न कालादिभेदेनाविरोध इति वाच्यम् । त्वन्मते गत्वादिना सङ्करात्सावधिकत्वाच्च । न हि जातिः सावधिका । तारेऽप्यन्यापेक्षया मन्द्रत्वस्य मन्द्रेऽप्यन्यापेक्षया तारत्वस्य सत्त्वेन तुल्यव्यक्तिकत्वाच्च । तारतमत्वादेरपि पाचकतमत्वादिवदतिशय-विशिष्टौपाधिकधर्मत्वात् ।।

नच गत्वादिव्याप्यतारत्वादीनां नानात्वादसङ्करः । सर्वत्राप्येवं सङ्करस्य सुपरिहरत्वेन तस्यादोषत्वापातात् ।

न्यायदीपः

द्वितीयमाशङ्क्य निराह ।। **न च तारत्वादीनामिति** ।। गत्वपरिहारेण तारत्वस्य वर्णान्तरे तारत्वपरिहारेण गत्वस्य मन्दगकारे, तारगकारे च गत्वतारत्वे द्वे अपि स्त इति न जातित्वं तारत्वस्य । एवं मन्दत्वादेरपीति भावः ।। **सावधिकत्वाच्चेति** ।। तारत्वस्य मन्दापेक्षत्वान्मन्दत्वस्य तारापेक्षत्वादिति भावः ।। **तुल्येति** ।। यावन्तस्तारगकारास्तावन्तो मन्दाश्च भवन्तीति गत्वतारत्वमन्दत्वानां घटत्वकरीरत्वकलशत्वानामिव न जातित्वम् । किं तु गत्वादिरेव जातिः । न तु तारत्वादिरिति भावः ।

ननु तारत्वादेरजातित्वे तारतमत्वादेरपि तथात्वं स्यादित्यतः स्यादेवेत्याह ।। **तारेति** ।। अतुल्यव्यक्तिकत्त्वात्तारतमत्वं जातिः स्यादित्यतो वाह ।। **तारेति** ।। **तस्येति** ।। सङ्करस्य जातिबाधकत्वानापत्तेरित्यर्थः ।।

तर्कताण्डवम्

[1]अत एव स्वर्णत्वादिव्याप्यघटत्वादिकमपि नाना । घटत्वस्या-

१. "अत एव न स्वर्णत्वादि" इति पाठश्चेत् स्वरसो भवतीति भाति । तथा चैवं वाक्यार्थः । ननु नानात्वेन साङ्कर्यपरिहारस्य भवतामपि सम्मतत्वेन न मां प्रति दोषदानम् । तथा हि । घटत्व परिहारेण तेजस्त्वस्य तेजसि, तेजस्त्वपरिहारेण घटत्वस्य च पार्थिवघटे, घटत्वतेजस्त्वयोश्च स्वर्णघटे वृत्तेः, घटत्वस्य तेजस्त्वेन साङ्कर्यापत्या, स्वर्णघटे स्वर्णत्वव्याप्यघटत्वतेजस्त्वयोः साङ्कर्येऽपि न घटत्वतेजस्त्वयोः साङ्कर्यं इति स्वर्णत्वव्याप्यघटत्वानां नानात्वेनैव साङ्कर्यस्य परिहार्यत्वात् इति चेन्न । स्वर्णत्वव्याप्यघटत्वं नाना इति घटत्वस्य जातित्वमिति न परिहर्तव्यम् । किन्तु घटत्वं जातिरेव नेति परिहर्तव्यम् । इति तदर्थः ।

वयवसंयोगविशेषरूपसंस्थानविशेषसमानाधिकरणद्रव्यत्वरूपौपाधिक धर्मत्वादिसम्भवात् । तारत्वादेर्नानात्वे ताराकारानुगतप्रत्ययानुपपत्तेश्च ।

नच भिन्नानामपि जातीनां तारशब्दप्रवृत्तिनिमित्तत्वेन अनुगमादेकाकारप्रत्ययः । अगृहीतसमयस्य बालस्यापि ताराकारानुगतप्रत्ययात् ।

नच सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकजातित्वेनानुगमः । आवश्यकेनोक्तप्रतिबन्धकत्वेनैव शब्दप्रवृत्तिव्यवहारयोरुपपत्तौ जातिकल्पनावैयर्थ्यात् ।

नच यदा मन्द्रे बुभुत्सा तदा मन्द्रग्रहरूपकार्यदर्शनेन प्रतिबन्धकत्वाभावात्तारव्यवहारो न स्यात् । प्रतिबन्धकतावच्छेदकविवक्षायां तु जातिसिद्धिः, जातितोऽन्यस्य अवच्छेदकस्याभावादिति वाच्यम् । त्वन्मतेऽपि प्रतिबन्धकतावच्छेदकाऽवच्छिन्ने सति मन्द्रग्रहरूपकार्यायोगात् ।

न्यायदीपः

नन्वेवं नानात्वेन साङ्कर्यस्यापरिहार्यत्वे स्वर्णघटे घटत्वं जातिर्न स्यात् । नानात्वेनैव तत्र जातिसाङ्कर्यस्य परिहार्यत्वादित्यत आह ।। **अत एवेति** ।। तत्र घटत्वं जातिरेव नेत्याह ।। **घटत्वस्येति** ।। **ताराकारेति** ।। अयं तारोऽयं तारोऽयं तारोऽयमपि तार इत्येवं ताराकारेत्यर्थः ।। **अगृहीतेति** ।। तारशब्दनिमित्तत्वमजानतोऽप्ययं तार इत्यनुगताकारप्रत्ययदर्शनादित्यर्थः ।। **सजातीयेति** ।। गुणत्वव्याप्यजात्या सजातीयेत्यर्थः । पूर्ववत्पदकृत्यं बोध्यम् ।। **उक्तेति** ।। सजातीयसाक्षात्कारप्रतिबन्धकत्वेनेत्यर्थः ।। **शब्देति** ।। तारशब्देत्यर्थः ।

उक्तविवक्षायां बाधकमाशङ्क्य निराह ।। **न चेति** ।। तारशब्दश्रवणदशायामेव बुभुत्सावशात् मन्दशब्दग्रहेण गुणत्वव्याप्यजात्या सजातीयशब्दग्रहाप्रतिबन्धाच्छ्रूयमाणे तारशब्दे तारशब्दव्यवहारो न स्यादित्यर्थः ।।

तर्कताण्डवम्

यदि च बुभुत्सोत्तेजिका तर्हि मन्मतेऽप्युत्तेजकस्य सत्त्वेन कार्यसम्भवेऽपि प्रतिबन्धकस्य सत्त्वात्तारव्यवहारो युक्तः । तस्मात्प्रत्यभिज्ञायास्तारत्वादिविरुद्धधर्मसंसर्गो न बाधकः ।

नापि शुकशारिकामनुष्यतद्विशेषरूपवक्तृविशेषानुमापकगत्वादिव्याप्यजातिविशेषानुभवो बाधकः । वर्णाश्रवणेऽपि तत्तद्ध्वनिविशेषेणैव तत्तदनुमानदर्शनेन वर्णश्रवणेऽप्यावश्यकेन ध्वनिविशेषेणैव तदनुमानात् । अन्यथा यो गकारः शुकेनोच्चारितः स एव मनुष्येणापीत्यादिप्रत्यभिज्ञा न स्यात् । अत एवानुव्यवसायो ''ध्वनिविशेषेणैव दूरस्थः पुत्रो मयानुमित'' इति ।।

नचैवं सति सैवेयं घर्घरी स एवायं ध्वनिरित्यादिप्रत्यभिज्ञया ध्वनिरपि नित्यः स्यादिति [१]मण्युक्तं युक्तम् । ध्वनिवर्णयोर्द्वयोरपि नित्यत्वे द्वयोरपि सदोपलब्धिप्रसङ्गात् । उच्चारणवैयर्थ्याच्च ।।

न्यायदीपः

।। **मन्मतेऽपीति** ।। तारत्वं न जातिः । तेषामनेकत्वेऽपि सजातीयसाक्षात्कारप्रतिबन्धकत्वेनानुगम इति वादिमतेऽपि बुभुत्सारूपोत्तेजकवशेन मन्दग्रहसम्भवेऽपि तारव्यवहारः स्यादेव । न ह्युत्तेजककृतप्रतिबन्धाभावो

१. अन्यथा ध्वनयोऽपि नित्याः स्युः उत्पत्तिविनाशतारत्वादिप्रतीतीनां प्रत्यभिज्ञानभलेनौपाधिकत्वात् । (श.ख.च.भा.प्र.प. ४५० पुटे)

मण्यादेः प्रतिबन्धकत्वमेव नेत्यस्य कल्पको भवति । तथात्वेऽतिप्रसङ्गादिति भावः । व्यवहितत्वात्तृतीयपक्षदोषमुक्तमुपसंहरति ।। **तस्मादिति** ।। तारत्वादेरविरोधादिति भावः ।

चतुर्थं पक्षं निराह ।। **नापि शुकेति** ।। **बाधक इति** ।। स एवायं गकार इति प्रत्यभिज्ञाया इत्यर्थः । गकारव्यक्तेरेकत्वे गत्वस्याजातित्वेन तद्व्यापाप्यजातेरयोगादिति भावः । गकारादिव्यञ्जकध्वनिविशेषणैव वक्तृ-विशेषानुमानम् । न तु त्वदुक्तजातिविशेषेण । येन प्रत्यभिज्ञा भ्रान्तिर्भवे-दित्याह ।। **वर्णाश्रवण इति** ।।

।। **एवं सतीति** ।। स एवायं गकार इत्यादिप्रत्यभिज्ञाया अभ्रान्तित्व इत्यर्थः ।। **मण्युक्तमिति** ।। शब्दानित्यत्ववादे सिद्धान्ते मण्युक्तमित्यर्थः । प्रत्यभिज्ञाद्वयस्याभ्रान्तित्वायोगादन्यतरभ्रान्तित्वे अवश्यम्भाविनि ध्वन्यंश एव तद्युक्तमिति सयुक्तिमाह ।। **ध्वनिवर्णयोरिति** ।।

तर्कताण्डवम्

नचोच्चारणस्य व्यञ्जकत्वान्नोक्तदोष इति वाच्यम् । भिन्नदेश-त्वात् । उच्चारणं हि वक्तृवक्त्रे । शब्दस्तु श्रोतृश्रोत्रे । भिन्नेन्द्रियग्राह्य-त्वाच्च । अत एव नोच्चारणजन्यो वायुः व्यञ्जकः । अत एवातीन्द्रियस्य व्यञ्जकान्तरस्य कल्पनाप्ययुक्ता । घटादावपि तत्कल्पनाप्रसङ्गात् ।।

तस्माद्द्वयोरेको नित्यः अन्यस्तु व्यञ्जक इति वक्तव्ये न ताव-द्ध्वनिरेव नित्यो वर्णस्तु व्यञ्जक इति युक्तम् । भेर्यादौ वर्णाभावेऽपि ध्वनिग्रहात् । तस्मात्परिशेषाद्वर्ण एव नित्यो ध्वनिस्तु व्यञ्जक इति युक्तम् । ध्वन्यभावे वर्णाग्रहात् ।।

न्यायदीपः

भिन्नदेशत्वं व्यनक्ति ।। **उच्चारणं हीति** ।। ध्वनिवर्णयोर्नित्यत्वे विभुद्रव्यतया सर्वगतयोर्निरवयवयोर्वक्त्रनिष्ठेनाप्युच्चारणेनाभिव्यक्तयोः श्रोत्रेण ग्रहणमविरुद्धम् । तथाप्यन्वयव्यतिरेकाभ्यां शब्दस्थळे श्रोत्रसम्बद्धेनैव व्यञ्जकेनाभिव्यक्तस्य श्रोत्रेण ग्रहणम् । अन्यथैकवक्तृनिष्ठोच्चारणाभिव्यक्त-शब्दस्य सर्वैरपि ग्रहणप्रसङ्गादिति भावः ।। **भिन्नेन्द्रियेति** ।। उच्चारणस्य चाक्षुषत्वाच्छब्दस्य श्रावणत्वादिति भावः ।।

यद्यपि गोघृतादेः कुङ्कुमगन्धादेश्च भिन्नेन्द्रियग्राह्यत्वेऽपि अस्ति व्यञ्जक-व्यङ्ग्यभावः । तथाप्यन्वयव्यतिरेकाभ्यां शब्दस्थले एकेन्द्रियग्राह्ययोरेव तथात्वावगतेरिति भावः । घृतादावपि प्रतिनियतव्यञ्जकव्यङ्ग्यवादे वक्ष्यमाणदिशा घृतादिगतगन्धादिरेवाभिव्यञ्जक इति भावः । अन्ये त्वेकेन्द्रियग्राह्यत्वं वा एकेन्द्रियग्राह्यगुणकत्वं वा व्यञ्जकत्वे तन्त्रमित्याहुः ।।

।। **अत एवेति** ।। वायोरतीन्द्रियत्वेन [१]श्रोत्रेन्द्रियाग्राह्यत्वादिति भावः ।। **अत एवेति** ।। तद्ग्राहकेन्द्रियग्राह्यस्यैव तद्व्यञ्जकत्वादित्यर्थः ।

तर्कताण्डवम्

तदेवमुपपत्तिविरोधादापणे ध्वनिरुत्पन्नः स च शान्त इति ध्वनित्वेनैवोत्पत्त्याद्यनुभवविरोधाद्वर्णप्रत्यभिज्ञाया ''यावद्ब्रह्म विष्ठितं तावती वागि''त्यादिश्रुत्यनुगृहीतत्वाच्च सैवेयं घर्घरीत्यादेरेव भ्रान्ति-त्वादिकं युक्तम् ।

तदेवमुक्तरीत्या बाधकाभावेऽपि वर्णे सोऽयमिति व्यपदेश एव न तु प्रतीतिरिति तदपलापे वा, तदनपलापेऽपि तस्याः पुरोवृत्तिगकारे

१. ''समानेन्द्रियाग्राह्यत्वात्'' इति पाठश्चेत् स्वरसः इति भाति ।

गत्वेनोपस्थितगकाराभेदविषयत्वेनाभिज्ञात्वे वा, प्रत्यभिज्ञात्वेऽपि साक्षात्परम्परया जात्यभेदविषयत्वे वा, व्यक्त्यभेदविषयत्वेऽपि तस्याः भ्रान्तित्वे वा, तत्तद्वादिभिः तत्तद्वस्तुनः स्थायित्वे प्रमाणत्वेनाङ्गीकृताया अपि स एवायमित्यादिप्रत्यभिज्ञाया अपलापादिप्रसङ्गेन कस्यापि स्थायित्वं न सिद्ध्येदिति क्षणिकवादः स्यात् । न हि स्थायित्वे प्रत्यभिज्ञातोऽन्यत्प्रमाणमस्ति ।।

न्यायदीपः

।। **तदेवमिति** ।। तस्मादेवं ध्वनिवर्णयोरित्यादिनोक्तरीत्येर्थः । तत्तस्मादित्यस्य विवरणम् ।। **उपपत्तीत्यादि** ।। **तावती वागिति** ।। तावत्कालीनो वर्ण इत्यर्थः ।

वागित्यस्य टीकायां ''वेदरूपा वाक्'' इति व्याख्यानेऽपि सजातीयानुपूर्वीकत्वेनैव तावत्कालत्वस्य वाच्यत्वेन मुख्यार्थलाभाय वर्णरूपार्थान्तरमुपेत्य वा वेदरूपवाचस्तावत्कालीनत्वस्य वर्णानां तावत्कालीनत्वाभावेऽयोगादर्थलब्धमुपेत्य वा श्रुत्यनुगृहीतत्वाच्चेत्युक्तम् । अत एव टीकायां ''तावती वागिति वर्णानां व्यापकत्वस्याभ्युपगतत्वेन'' इत्यप्युक्तमित्यदोषः ।

एवं प्रत्यभिज्ञाया अनन्यविषयत्वं प्रसक्तबाधकनिरासेनाभ्रान्तित्वं च समर्थ्योपसंहरन् परपक्षे बाधकोक्त्याप्युक्तं समर्थयते ।। **तदेवमित्यादिना** ।। **अन्यत्प्रमाणमस्तीत्यन्तेन** ।। **उक्तेति** ।। ''न च भेदधीर्बाधिका'' इत्यादिनोक्तरीत्येत्यर्थः ।। **तदपलापे वेति** ।। ''न च तानेव शालीन्'' इत्यादिनोक्तरीत्या प्रतीत्यपलापे वेत्यर्थः । ''तस्या'' इत्यतः पूर्वमप्युक्तरीत्येत्यनुषञ्जनीयम् । ''न चेयं प्रत्यभिज्ञा'' इत्यादिनोक्तरीत्येति तत्रार्थः । एवमग्रेऽप्युक्तरीत्येत्यनुवर्त्य यथायोगमर्थो योज्यः । सप्तम्यन्तोक्तापादक-

चतुष्टयेऽप्यनिष्टापादनमाह ।। **तत्तद्वादिभिरिति** ।। सर्वक्षणिकत्वं वदद्भिरपि बौद्धैः

''आकाशो द्वौ विनाशौ च नित्यं त्रयमसंस्कृतम्''

इत्युक्तत्वेनाकाशस्य बुद्धिपूर्वविनाशाबुद्धिपूर्वविनाशयोश्च नित्यत्वोपगमेन तेषामपीदमापादनं सममिति सूचनाय **तत्तद्वादिभिस्तत्तद्वस्तुन इत्युक्तम्** ।। अपलापादीत्यादिपदेन प्रागुक्तापादकत्रयग्रहः ।

तर्कताण्डवम्

तदेतदभिप्रेत्योक्तं भगवत्पादैः । ''नच सादृश्यात् प्रत्यभिज्ञा-भ्रान्तिरिति वाच्यम् । सोऽयं देवदत्त इत्यादेरपि तथात्वापत्तेः'' इति । अत्र प्रत्यभिज्ञाभ्रान्तिरित्यस्य समस्तपदत्वेन व्यपदेशमात्रत्वपक्षे तस्मिन्व्यपदेशे प्रत्यभिज्ञात्वभ्रान्तिरिति, पुरोवृत्तिनस्तदभेद-विषयकाभिज्ञात्वपक्षे तस्यास्त[1]त्कालीनावच्छिन्नाभेदविषयक-प्रत्यभिज्ञात्वभ्रान्तिरिति, जात्यभेदविषयकप्रत्यभिज्ञात्वपक्षे तस्यां व्यक्त्यभेदविषयकप्रत्यभिज्ञात्वभ्रान्तिरिति, व्यस्तपदत्वेन व्यक्त्य-भेदविषया प्रत्यभिज्ञा भ्रान्तिरिति पक्षे व्यक्त्यभेदविषयाऽपि प्रत्यभिज्ञा भ्रान्तिरेव न तु प्रमेति, चार्थो द्रष्टव्यः ।

न्यायदीपः

।। **तदेतदिति** ।। व्यपदेशादिपक्षचतुष्टयमपि नेत्येतत्तत्त्वनिर्णय उक्तमित्यर्थः ।

टीकायां चतुर्थपक्षनिरासपरत्वेन व्याख्यानेऽपि बह्वर्थकत्वान्मूलग्रन्थस्य स्वोक्तपक्षचतुष्टयनिरासमपि मूलारूढं दर्शयति ।। **अत्रेति** ।। मूलवाक्य

१. तत्कालावच्छिन्नेति पाठान्तरम् । अवच्छिन्नपदं वा न स्यात् ।

इत्यर्थः ।। **समस्तेति** ।। चतुर्थपक्ष एव भिन्नपदत्वात्तदन्यपक्षत्रयेऽपि भावप्रधाननिर्देशेन प्रत्यभिज्ञात्वेन भ्रान्तिः प्रत्यभिज्ञाभ्रान्तिरिति समासं प्राप्तपदत्वेन हेतुना व्यस्तपदत्वेन हेतुनेत्यर्थो द्रष्टव्य इत्यन्वयः । ''अर्थो द्रष्टव्यः'' इति पदद्वयम् । पूर्वत्र प्रत्येकं इतिशब्दत्रयान्तेऽपि व्यपदेशमात्र-पक्ष इत्यर्थो द्रष्टव्य इत्यादिरूपेणान्वेतव्यम् ।।

तर्कताण्डवम्

एतेन ''प्रत्यभिज्ञानन्तरमुत्पत्त्यादिप्रत्ययानां तदनन्तरं च प्रत्यभिज्ञाया दर्शनेनोभयाबाधायोत्पत्त्यादिधीर्व्यक्तिविषयिणी अभेदधीस्तु जातिविषया; यद्वोत्पत्त्यादिप्रत्ययानामनेकत्वात्तद्बुद्धिरुद्धैका प्रत्यभिज्ञा भ्रान्तिः । बहुबाधस्य अन्याय्यत्वात्'' इति [१]मण्युक्तं निरस्तम् । प्रत्यभिज्ञाया विशेष्यात्मकव्यक्त्यभेदविषयत्वेनोत्पत्त्यादिप्रत्ययस्य च विशिष्टविषयत्वेनोभयप्रामाण्यस्योक्तत्वात् । प्रत्यभिज्ञा व्यक्त्यभेद-विषया, उत्पत्त्यादि धीस्तु ध्वनिविषयेत्यपि सुवचत्वाच्च ।।

किं चोत्पत्तिधीः सम्मर्देऽपगतेऽवकाशो जात इत्याकाशोत्पत्तिधी-वदभिव्यक्तिविषयाऽस्तु । त्वन्मते बाधलाघवोक्तिश्चायुक्ता । त्वदभि-

१. अस्त्युत्पादविनाशप्रतीतौ सत्यामपि स एवाय गकार इति प्रत्यभिज्ञा, अस्ति हि तदनन्तरमपि उत्पादविनाशप्रथा न चोत्पादप्रतीत्यभेदप्रत्यभिज्ञयोरन्यतरस्य परस्परं विहायान्यद्बाधकमस्ति, न वानयोः परस्परं बाध्यबाधकभावे विनिगमक येनैकभ्रान्तित्वेनाविरोधः स्यात् । कथं वा भेदाभेदज्ञानयोरन्यत्रावधारितं परस्परप्रतिबन्धकत्वं, परिभूय प्रथमं तयोः एकसत्वेऽप्य परोत्पत्ति प्रसङ्ग इति सङ्कटप्रविष्टत्वेन प्रत्यभिज्ञानं शब्दनित्यत्वे प्रमाणयितुं न शक्यते । नन्वेवं उत्पत्तिमत्वादिनाप्यनित्यत्वसिद्धिः कथं, इत्थं, उत्पादादिबुद्धिप्रत्यभिज्ञयोरप्यवश्यं विषयभेदः, एकविषयत्वे विरोधेनैकानन्तरमपरानुत्पत्तिप्रसङ्गात् । एवञ्च भेदे भासमाने प्रत्यभिज्ञाया सजातीयत्वं विषयो न व्यक्त्यभेदः । (श.ख.च.भा.प्र.प. शब्दानित्यत्वसिद्धान्ते ४४७ पुटे)

मतानां अयं शुकोत्पन्नो गकारः, अयं शुकोच्चारितो गकार नष्ट इत्यादीनामुत्पत्त्यादिसाक्षात्काररूपप्रत्ययानां; सर्वलोकसिद्धानां शुकोच्चारितो गकारोऽयं वर्तते, श्रोत्रे शुकगकार इत्याद्यभिज्ञानां; यः पूर्वं गकारः श्रुतः स एवेदानीमपि, योऽन्यत्र स एवात्रापि, यश्चैत्रोच्चारितः स एव मैत्रोच्चारितः, एकोच्चारितेऽपि यः प्राच्येन श्रुतः स एव प्रतीच्येनाऽपि, यो निकटस्थेन श्रुतः स एव दूरस्थेनाऽपीत्यादिप्रत्यभिज्ञानां च; बाधकत्वेन त्वन्मत एव बहुबाधात् ।।

न हि त्वत्पक्षे शुकोत्पन्नस्येदन्त्वेन, साक्षात्क्रियमाणत्वेन, वर्तमानत्वेन, श्रोत्रस्थत्वेन च सामानाधिकरण्यम् । न वा एकोच्चारितेऽपि कदम्बगोलकन्यायपक्षे प्राच्यप्रतीच्ययोरेकत्वम् । यद्यपि वीचीतरङ्गन्यायपक्षे तयोरैक्यम् । तथापि निकटदूरस्थयोरैक्यं नास्त्येव । तस्माद्बहूनामबाधायोत्पत्त्यादिधीरेव भ्रान्तिरस्तु ।।

न्यायदीपः

मण्युक्तमन्यदपि निराह ।। **एतेनेति** ।। उत्पत्त्यादीत्यादिपदेन विनाशतारमन्दत्वादिप्रत्ययग्रहः ।। **उक्तत्वादिति** ।। ''न च भेदधीर्बाधिके''त्यादिग्रन्थेनोक्तत्वादित्यर्थः ।

ननूत्पन्नो गकारो नष्टो गकार इति प्रतीतेः कथं ध्वनिविषयतेत्यत आह ।। **किं चेति** ।। बहुबाधस्यान्याय्यत्वादित्युक्तिं च निराह ।। **त्वन्मत इति** ।। त्वदभिमतानामित्यस्य प्रत्ययानामिति षष्ट्यन्तेनान्वयः । सर्वलोकसिद्धानामित्यस्य वक्ष्यमाणषष्ठ्यन्ताभ्यामन्वयः ।।

ननूक्तत्रिरूपप्रतीतीनां कुतो बाधो न्यायमत इत्यत आह ।। **न हीति** ।। शब्दोत्पत्तिदेशात् कदम्बगोलकन्यायेन शब्दानां दशस्वपि दिक्षु

दशधा, शब्दाच्छब्दान्तरोत्पत्तिक्रमेण कर्णदेशप्राप्त्युपगमेन कर्णदेशसम्बद्धस्य शुकमुखोत्पन्नशब्दजातीयत्वेन साक्षात्तदुत्पन्नत्वाभावात् । एवं तत्तद्दिगवस्थितपुरुषैः श्रूयमाणस्यापि दिगन्तरस्थितपुरुषान्तरश्रुतशब्द-जातीयत्वेन साक्षात्तदभेदाभावादिति भावः ।

ननु तटाकादिमध्ये पाषाणाद्यभिघाताद्दशदिक्सम्बन्धिन्य एकैका एव वीच्यस्तरङ्गाश्च जायन्त इति न्यायेन दशदिक्सम्बन्ध्येकैकशब्द-परम्परोत्पत्तिपक्षे प्राच्यादिशब्दस्यैक्यमेवेति न तत्प्रत्यभिज्ञाबाध इत्याशङ्क्य निराह ।। **यद्यपीति** ।। वीची नाम सूक्ष्मरूपस्त्रीतरङ्गः । तरङ्गस्तु स्थूलः ।। **निकटेति** ।। शब्दोत्पत्तिदेशनिकटस्थदूरस्थयोरित्यर्थः ।।

तर्कताण्डवम्

ननूत्पत्त्यादिधीर्न तावत्स्मर्यमाणारोपः । सदृशादर्शनात् । गृह्यमाणारोपत्वे रक्तः स्फटिक इत्यादाविवोपाधिर्वाच्यः । स च न तावत्कुङ्कुमारुणा तरुणीतिवदानुभाविकः । गकारोऽस्ती[1]त्यादा-वुपाधेर्ध्वनेरननुभवात् । नाप्ययो दहतीतिवदौपपत्तिकः । तत्रान्वय-व्यतिरेकवतोऽग्नेरिवेह तद्वतः कस्यचिदभावादिति चेन्न । इहाऽपि ध्वनेः सत्त्वात् ।।

तत्राग्नेरग्नित्वेनाननुभवेऽप्यारोप्येण दग्धृत्वेनानुभवोऽस्तीति चेदिहापि ध्वनेर्ध्वनित्वेनाननुभवेऽप्यारोप्येणोत्पन्नत्वादिना अनुभवोऽ-स्तीति समम् ।।

नच प्रत्यभिज्ञारूपे ऐक्यसाक्षात्कारे सति कथं तद्विरुद्धोत्पत्त्यादि-भ्रम इति वाच्यम् । उत्पत्त्यादेरैक्याभावानात्मकत्वेन साक्षादविरोधात् ।

१. "नास्तीति" पाठान्तरम् ।

ऐक्यव्यापकाभावप्रतियोगित्वरूपे विरोधे सत्यपि तदग्रहदशायामारोप-सम्भवात् । तद्ग्रहदशायां चारोपाभावस्येष्टत्वात् ।

तस्मात्प्रत्यभिज्ञाबाधितानि शब्दानित्यत्वानुमानानि ।

न्यायदीपः

उत्पत्त्यादिधियो भ्रान्तित्वमयुक्तमिति **मण्युक्तरीत्या** शङ्कते ।। **नन्विति** ।। **सदृशेति** ।। शुक्ताविदं रूप्यमित्यारोपे शुक्तिसदृशस्य रजतस्येवेह वर्णसदृशस्योत्पत्त्यादिमतोऽभावादित्यर्थः ।। **आनुभाविक इति** ।। कुङ्कुमेनारुणा न स्वत इति कुङ्कुमस्योपाधित्वमनुभूयमानमित्यानुभाविकः कुङ्कुमरूप उपाधिः । एवं गकारो ध्वन्युत्पन्नो न स्वत इत्यनुभवाभावा-दित्यर्थः ।। **औपपत्तिक इति** ।। उपपत्तिसिद्ध इत्यर्थः । उपाधिरित्यनुषङ्गः । वह्निधर्मस्य दग्धृत्वस्यायस्यारोपाद्वह्निरूपोपाधिनैवायो दग्धृ न तु स्वत इत्यनुभवः[१] । तत्रायसि वह्नित्वेन वह्नेरननुभवात् । किन्तु वह्निसम्बन्धे सति दग्धृत्वमन्यथा तु नेत्यन्वयव्यतिरेकगम्यं वह्नेरुपाधित्वमित्यौपपत्तिक इत्युक्तम् ।

यद्यपि **मणौ** [२]''कृपाणे मुखदीर्घत्वमौपपत्तिकं कृपाणान्वयव्यतिरेकानु-विधानात्'' इत्युक्तम् । तथापि तत्रानुभाविकत्वमेव कथञ्चिद्वक्तुं शक्यम् । कृपाणत्वेन तस्यानुभवादित्यरुचिं मन्वानः अयो दहतीत्युदाहरदित्यदोषः ।।

।। **तद्वतः** ।। अन्वयव्यतिरेकवतः । उत्पत्त्यादिधर्मकस्येत्यर्थः ।

---

१. ''इत्यनुभवः न'' इति चेत् पाठः स्वरसः इति भाति । वह्निरूपोपाधेः औपपत्तिकत्वस्येष्टत्वात् ।

२. ''न च कृपाणान्वयव्यतिरेकानुविधानात् कृपाणे मुखदीर्घत्ववत् औपपत्तिकमौपाधिकत्वम् । अन्यानुविधानाभावात्'' । (श.ख.च.भा.प्र.प. शब्दानित्यत्ववादसिद्धान्ते ४३५ पुटे)

विशेषदर्शनसत्वेनारोपासम्भवमाशङ्क्य निराह ।। **न च प्रत्यभिज्ञेति** ।। किं साक्षादारोप्याभावावगाहित्वेन प्रत्यभिज्ञा विरोधिनी उतारोप्याभावं प्रति व्याप्यविषयकतया । आद्य आह ।। **उत्पत्त्यादेरिति** ।। अन्त्य आह ।। **ऐक्येति** ।। **प्रतियोगित्वेति** ।। उत्पत्त्यादेरित्यनुषङ्गः ।। **विरोध इति** ।। प्रत्यभिज्ञया सहेत्यर्थः ।। **तदग्रहेति** ।। उक्तरूपप्रतियोगित्वाग्रहेत्यर्थः ।। **तस्मादिति** ।। प्रत्यभिज्ञायाः गकारादिव्यक्त्यैक्यादन्यविषयकत्वभ्रान्तित्वयोरयोगादित्यर्थः ।

।। इति वर्णानामनित्यत्वे प्रत्यभिज्ञाविरोधः ।। २५ ।।

वर्णानां नित्यत्वेऽनुमानानि

सत्प्रतिपक्षाणि च । तथा हि–

(१) शब्दत्वं नित्यवृत्ति द्रव्यत्वव्याप्यजातिमदसमवेताद्विष्ठवृत्तित्वात् आत्मत्ववत् ।

(२) घ्राणभिन्नबहिरिन्द्रियव्यवस्थापकतावच्छेदकत्वात् रूपत्ववत् ।

(३) आत्मत्वमूर्तत्वासमानाधिकरणाद्विष्ठवृत्तित्वात् कालत्ववत् ।

(४) स्वाश्रयभिन्नविशेषगुणासमानाधिकरणप्रत्यक्षवृत्तित्वात् आत्मत्ववत् ।

(५) पृथिवीवृत्त्यवृत्तित्वे आत्मवृत्त्यवृत्तित्वे च सति सत्तासाक्षाद्व्याप्यसाक्षा-द्व्याप्यत्वात् जलत्ववत् ।

(६) व्योमेतरावृत्तिजातिमद्वृत्तित्वादात्मत्ववत् ।

(७) सकलशब्दवृत्तित्वात् सत्तावत् ।

(८) श्रोत्रं नित्यवृत्तिसत्ताव्याप्यव्याप्यजातिग्राहकम् अपार्थिवेन्द्रियत्वाच्चक्षुर्वत् ।

(९) वर्णो नित्यो ध्वनिशब्दत्वव्याप्यभिन्नत्वे सति श्रावणत्वाच्छब्दत्ववत् इत्याद्यनुमानैः प्रतिरोधात् ।।

न्यायदीपः

प्रतिज्ञादोषयोर्बाधप्रतिपक्षयोः प्रबलं बाधकं पूर्वमुक्त्वा प्रतिपक्षदोषं चाह ।। **सत्प्रतिपक्षाणि चेति** ।। शब्दानित्यत्वानुमानानीत्यनुषङ्गः । शब्दो नित्य इत्येव प्रतिज्ञोक्तौ द्वितीयादिकतिपयहेत्वसिद्धिः । ध्वन्यंशे बाधश्च । अतः शब्दत्वं नित्यवृत्तीति प्रतिज्ञाय द्वितीयादिहेत्वनुगमाय तु वर्णत्वमित्येव न कृतम् । नित्यवृत्तित्त्वं च जगदाधारताप्रयोजकसम्बन्धभिन्नसबन्धेनेति ज्ञेयम् । स च सम्बन्धो न्यायमते समवायः । सिद्धान्ते स्वरूपसम्बन्धः । तेन कालवृत्तित्वमादाय न सिद्धसाधनतावकाशः । ध्वन्यंशे बाधाद्वर्णवृत्तित्वेन साध्यपर्यवसानमिति भावः ।

।। **द्रव्यत्वेति** ।। द्रव्यत्वव्याप्यजातयः पृथिवीत्वजलत्वादयः । तद्वत्सु पृथिव्यादिष्वसमवेतं यदद्विष्ठं अव्यासज्यवृत्तितद्वृत्तित्वादित्यर्थः । शब्दस्तु तादृशपृथिव्यप्तेजोवाय्वात्ममनस्स्वसमवेतोऽद्विष्ठश्चेति तद्वृत्तिशब्दत्वे हेतुसत्त्वमिति भावः । एते च हेतवः पररीत्यैव । परसिद्धैर्दूषणमित्याचार्योक्तेः । अत एव सत्प्रतिपक्षाणीत्युपक्रमः । अन्यथा नित्यत्वे मानं त्विति ब्रूयात् । सिद्धान्तेऽनुगतजातेरभावात् पञ्चीकरणप्रक्रियायां शब्दस्य पृथिव्यादिष्वपि सत्त्वेन तादृशजातिमदसमवेतत्वाभावात् । अत एव सुधायां प्रकृतिनये ''गगनादेश्च सत्यत्वं'' इत्यत्र पृथिव्यादिगुणत्वेनापि शब्द-

स्योत्पत्तिरुक्ता । पञ्चीकरणप्रक्रियामविवक्षित्वा जातिपदस्य सदृशधर्मपरत्व-मुपेत्य स्वरीत्याऽपि वा । तेन मन्मत इत्यग्रिमग्रन्थाविरोध इत्याहुः । विशेषणकृत्यमग्रे स्फुटम् ।। **आत्मत्ववदिति** ।। तच्च काप्यसमवेताद्विष्ठात्म-वृत्तित्वाद्धेतुसाध्ययोः सत्त्वं स्पष्टम् । न्यायमते विभुत्वेन आत्मनोऽवृत्तित्वात् ।

।। **घ्राणेति** ।। घ्राणभिन्नं यद्बहिरिन्द्रियं श्रोत्ररूपं तदस्तित्वा-वधारकतानियामकत्वादित्यर्थः । शब्दज्ञानं हि कार्यं स्वकारणभूतं श्रोत्राख्य-मिन्द्रियस्वरूपमनुमापयति । अकारणकस्यानित्यज्ञानस्य अनुदयात् । अन्यस्य चक्षुरादेः शब्दज्ञाने करणत्वायोगात् । शब्दस्य तादृशेन्द्रिय-व्यवस्थापकतायां शब्दत्वस्यावच्छेदकत्वादिति भावः । चक्षुरिन्द्रियादि-व्यवस्थापके रूपत्वरसत्वादौ हेत्वनुगमाय ।। **बहिरिन्द्रियेति** सामान्योक्तिः । न तु श्रोत्रेति विशिष्य ।। **रूपत्ववदिति** ।। रूपत्वरसत्वस्पर्शत्ववदित्यर्थः । बहिरिन्द्रियव्यवस्थापकतावच्छेदकानां रूपरसगन्धस्पर्शशब्दत्वानां एकस्य पक्षत्वेऽपि गन्धस्य पृथिवीमात्रगुणत्वेन पार्थिवपरमाणुषु गुणानां पाक-जत्वेनानित्यतायां गन्धत्वस्य नित्यवृत्तित्वरूपसाध्याभावेऽपि जल-परमाण्वादिगतरूपरसस्पर्शानामपाकजत्वेन रूपत्वादित्रयस्य नित्यवृत्ति-त्वात् । आधिक्यदोषनिरासाय रूपत्ववदित्येवोक्तम् ।।

।। **आत्मत्वेति** ।। आत्मत्वमूर्तत्वाभ्यां असमानाधिकरणं यदद्विष्टं तन्निष्ठत्वादित्यर्थः । मूर्तत्वं नाम इयत्तावच्छिन्नपरिमाणयोगित्वम् । पृथिव्यप्तेजोवायुमनसां धर्मः । पक्षदृष्टान्तभूतयोः शब्दत्वकालत्वयोस्तादृश-शब्दकालनिष्ठत्वात् कालस्य नित्यत्वाच्च हेतुसाध्यानुगम इति भावः ।

।। **स्वेति** ।। स्वस्य शब्दत्वस्याश्रयः शब्दः, तद्भिन्नविशेषगुणो रूपादिः, तदसमानाधिकरणम् प्रत्यक्षम् च यत्, शब्द एव, तद्वृत्तित्वा-दित्यर्थः । दृष्टान्ते स्वस्यात्मत्वस्य आश्रयः आत्मा । तदतिरिक्तविशेष-गुणेनासमानाधिकरणं प्रत्यक्षं च अवृत्तिभूतमात्माख्यं वस्तु तद्वृत्तित्वादिति

हेत्वनुगमो ध्येयः । स्वशब्दस्य समभिव्याहृतपरत्वात् । शब्दत्वमात्र-परत्वेऽप्यदोषात् ।

।। **पृथिवीति** ।। पृथिवीवृत्ती रूपादिः । अत्मवृत्तिर्ज्ञानादिः । तदुभयावृत्तित्वे सति सत्तासाक्षाद्व्याप्यं पक्षे गुणत्वम् । दृष्टान्ते च द्रव्यत्वम् । तेन साक्षाद्व्याप्यं शब्दत्वं जलत्वं चेति पक्षदृष्टान्तयोर्हेत्वनुगमः । दृष्टान्ते साध्यानुगमश्च जलपरमाणुवृत्तित्वेन ज्ञेयः । साक्षाद्व्याप्यत्वं नाम व्याप्याव्याप्यत्वे सति व्याप्यत्वम् । गुणत्वद्रव्यत्वयोः सत्ताजातेश्च मध्ये तथा गुणत्वद्रव्यत्वयोः शब्दत्वजलत्वयोर्मध्ये च व्याप्यधर्मान्तरस्याभावात् ।

।। **व्योमेति** ।। व्योमेतरस्मिन्नविद्यमानो यो जातिमान् शब्दः आत्मा च तद्वृत्तित्वाच्छब्दत्वस्य आत्मत्वस्य चेति पक्षदृष्टान्तयोर्हेत्वनुगतिः ।।

।। **श्रोत्रमिति** पक्षः । नित्यवृत्तिर्या सत्ताव्याप्यगुणत्वव्याप्य-शब्दत्वरूपा जातिः तद्ग्राहकत्वेन पक्षे, दृष्टान्ते च तादृशरूपत्वग्राहकत्वेन साध्यानुगमः । रूपत्वस्यापि नित्यं यज्जलपरमाण्वादिरूपं तद्वृत्तित्वात् ।। **अपार्थिवेति** ।। परमते घ्राणस्यैव पार्थिवत्वेन तदन्येषामपार्थिवत्वान्ना-सिद्ध्यादिः ।।

।। **ध्वनीति** ।। ध्वनिश्च शब्दत्वव्याप्यं तारत्वादिकं च ताभ्यां भिन्नत्वे सतीत्यर्थः ।। **प्रतीरोधादिति** ।। सत्प्रतिपक्षाणीत्यन्वयः ।

तर्कताण्डवम्

अत्राद्ये हेतौ कालाकाशगतद्वित्वनिष्ठद्वित्वत्वेऽव्यभिचारायाद्विष्ठे-त्युक्तम् । गन्धत्वदुःखत्वादावव्यभिचाराय असमवेतेत्युक्तम् । असमवेतवृत्तित्वस्य प्रतिवादिनं प्रत्यसिद्धिनिरासाय द्रव्यत्वव्याप्य-जातिमदित्युक्तम् ।

द्वितीये गन्धत्वेऽव्यभिचाराय घ्राणभिन्नेति । दुःखत्वादाव-व्यभिचाराय बहिरिति चोक्तम् ।

तृतीयेऽप्यद्विष्ठपदस्याद्यहेताविव प्रयोजनं द्रष्टव्यम् । दुःखत्वादौ वेगत्वादौ चाव्यभिचारायात्मत्वमूर्तत्वासमानाधिकरणेत्युक्तम् ।।

चतुर्थे गन्धत्वे दुःखत्वादौ चाव्यभिचाराय विशेषगुणासमानाधि-करणेत्युक्तम् । विशेषगुणासमानाधिकरणमनोगतवेगवर्तिनि वेगत्वेऽ-व्यभिचाराय प्रत्यक्षेत्युक्तम् । मनोगतवेगस्त्वप्रत्यक्षः । तावत्युक्ते गकारस्यापि ककाररूपविशेषगुणसमानाधिकरणत्वात् परं प्रत्यसिद्धिः । तदर्थं स्वाश्रयभिन्नेत्युक्तम् । एवं च ककारस्यापि शब्दत्वाश्रयत्वेन तद्भिन्नत्वाभावान्नासिद्धिः ।।

पञ्चमे गन्धत्वादावव्यभिचाराय पृथिवीवृत्त्यवृत्तित्वे सतीत्युक्तम् । दुःखत्वादावव्यभिचाराय आत्मवृत्त्यवृत्तित्वे सतीत्युक्तम् । प्रभात्वा-दावव्यभिचाराय सत्तेत्याद्युक्तम् ।।

एवं च सत्तासाक्षद्व्याप्यं द्रव्यत्वं प्रति तेजस्त्वमेव साक्षाद्व्याप्यम् न तु प्रभात्वादिकमिति न व्यभिचारः । शब्दत्वं तु मन्मते सत्ता-साक्षाद्व्याप्यं द्रव्यत्वं प्रति, परमते च गुणत्वं प्रति साक्षाद्व्याप्यमिति नासिद्धिः ।।

षष्ठे ध्वनिप्रागभावत्वेऽव्यभिचाराय जातिमदित्युक्तम् । गन्धत्वा-दावव्यभिचाराय व्योमेतरावृत्तीत्युक्तम् ।।

न्यायदीपः

।। द्वित्वत्व इति ।। अनुमानोपनीतकालाकाशाद्य[१]गोचरमानसापेक्षा-

१. "आदिगोचरेति" चेत् स्वरसः । तस्मिन्नर्थे "आद्यगोचर" इति वा ।

बुद्धिजन्यस्य कालाकाशोभयगतद्वित्वस्य द्रव्यत्वव्याप्यजातिमत्सु पृथिव्यप्तेजोवाय्वात्ममनस्स्वसमवेतत्वेन द्वित्वत्वे तादृशद्वित्ववृत्तित्व-हेतुसत्त्वेऽपि नित्यवृत्तित्वाभावाद्व्यभिचारनिरासायाद्विष्ठेत्युक्तमित्यर्थः । तर्ह्यद्विष्ठवृत्तित्वादित्येवास्त्वित्यत आह ।। **गन्धत्वेति** ।। गन्धत्वादेः पृथिव्यात्मादिसमवेतगन्धादिवृत्तित्वादव्यभिचार इत्यर्थः । रूपत्वादिकं तु नित्यवृत्तीति गन्धत्वेत्युक्तम् । पार्थिवगुणानां पाकजत्वेन गन्धो न नित्य इति भावः ।।

तर्ह्यसमेवताद्विष्ठेत्येवास्त्वित्यत आह ।। **असमवेतेपि । प्रतिवादिनं प्रतीति** ।। तार्किकं प्रतीत्यर्थः । सत्प्रतिपक्षानुमानप्रयोक्तृदशायां सिद्धान्तिनः स्थापनावादित्वेन परस्यैव प्रतिवादित्वात् ।। **असिद्धिनिरासायेति** ।। न चासिद्धिनिरासकं व्यर्थम् । व्याप्तिवत् पक्षधर्मताया अप्यनुमित्यङ्गत्वेन तत्सम्पादकस्यापि सार्थक्यात् । ''यन्निष्ठा यन्निरूपिता व्याप्तिर्येन विशेषणेन विना न परिच्छिद्यते तद्विशेषणमर्थवत्'' इति न्यायेन विशिष्टहेतुनिष्ठ-व्याप्तेरुक्तविशेषणेन विना गृहीतुमशक्यत्वेन व्याप्तिग्रहौपयिकत्वाच्चेति भावः ।।

।। **गन्धत्व इति** ।। पृथिवीगुणस्य पाकजत्वेन गन्धत्वे नित्यवृत्तित्व-रूपसाध्याभावेऽपि घ्राणरूपबहिरिन्द्रियव्यवस्थापकतावच्छेदकत्वाद्घ्राण-भिन्नेत्युक्त्या न दोष इत्यर्थः ।। **दुःखत्वेति** ।। तस्यान्तरिन्द्रिय-व्यवस्थापकतावच्छेदकत्वादिति भावः ।

आत्मत्वमूर्तत्वान्यतरासमानाधिकरणाद्विष्ठवृत्तित्वादित्युक्तावाह ।। **दुःखत्वादाविति** ।। मूर्तत्वासमानाधिकरणदुःखादिनिष्ठदुःखत्वादौ नित्यवृत्तित्वाभावेन तत्राव्यभिचाराय आत्मत्वासमानाधिकरणेत्यद्विष्ठ-विशेषणम् । आत्मत्वासमानाधिकरणं यदद्विष्ठं तद्वृत्तित्वादित्येवोक्तौ पृथिव्यप्तेजोवायुमनोधर्मवेगरूपगुणस्यात्मत्वासमानाधिकरणत्वेन वेगत्वे

यथोक्तहेतुसत्वेऽपि नित्यत्वाभावात् मर्तत्वासमानाधिकरणेति अद्विष्ठविशेषणमित्यर्थः ।।

प्रत्यक्षवृत्तित्वादित्येवोक्तौ दोषमाह ।। **दुःखत्वादौ चेति** ।। तर्हि प्रत्यक्षेत्यस्य बाह्यप्रत्यक्षेत्यर्थं मत्वोक्तम् ।। **गन्धत्वेति** ।। **परं प्रतीति** ।। तार्किकं प्रतीत्यर्थः ।। **नासिद्धिरिति** ।। असिद्धिवारकस्यापि सार्थक्यं पूर्ववत् ।

आत्मेत्याद्युक्तौ दोषमाह ।। **गन्धत्वादाविति** ।। व्योमेतरावृत्तिवस्तुवृत्तित्वादित्येवोक्तौ दोषमाह ।। **ध्वनिप्रागभावत्व इति** ।।

तर्कताण्डवम्

सप्तमे शब्दपदम् केवलान्वयिनो गुणत्वादेरपि सङ्ग्राहकत्वेन विकासकत्वान्न व्यर्थम् ।

अष्टमे साध्ये नित्यवृत्तिसत्ताद्रव्यत्वयोः सत्तागुणत्वयोर्वा ग्राहकत्वेनार्थान्तरमिति शङ्कानिरासाय सत्ताव्याप्यव्याप्येत्युक्तम् । हेतोर्घ्राणेऽव्यभिचारायापार्थिवेत्युक्तम् ।।

नवमे ध्वनौ शब्दत्वव्याप्ये तारत्वादौ चाव्यभिचाराय ध्वनिशब्दत्वव्याप्यभिन्नेत्युक्तम् । अत्र विपक्षे प्रत्यभिज्ञानुपपत्तिगौरवादीनि बाधकानि ।

केचित्तु श्रोत्रं नित्यद्रव्यग्राहकम् निरवयवेन्द्रियत्वात् मनोवत् इत्याहुः ।।

न्यायदीपः

ननु सप्तमे सकलवृत्तित्वादित्येवोक्तौ प्रमेयत्वादौ केवलान्वयिनि नित्य-

वृत्तित्वसाध्यस्यापि सत्त्वेन व्यभिचाराभावाच्छब्देति व्यर्थम् । स्वरूपासिद्धिवारकत्वेऽपि व्यर्थत्वादित्यत ईश्वरवादोक्तदिशा व्याप्याश्रयाणामनेकत्वसम्पादकत्वेन सार्थक्यादिति भावेनाह ।। **सप्तम इति** ।। **केवलान्वयिन इति** ।। शब्दनिष्ठस्येत्यपि ग्राह्यम् । न केवलं केवलान्वयिनः प्रमेयत्वादेरपीत्यपेरर्थः । आकाशसमवेतत्वादिरादिपदार्थः ।।

।। **अष्टम इति** ।। अपार्थिवेन्द्रियत्वादिति हेतौ यत्साध्यं नित्यवृत्तीत्यादि तस्मिन्नित्यर्थः ।। **नित्यवृत्तिसत्ताद्रव्यत्वयोरिति** ।। नित्यवृत्तिजातिग्राहकमित्युक्ते शब्दगतसत्ताग्राहकत्वेन अर्थान्तरम् । शब्दस्यानित्यत्वेऽप्याकाशादिनित्यवृत्तित्वात्सत्तायाः । अतो नित्यवृत्तिसत्ताव्याप्यजातिग्राहकमिति ।। तावत्युक्ते शब्दो द्रव्यमिति मते द्रव्यत्वस्य, गुण इति मते गुणत्वस्य ग्राहकत्वेनार्थान्तरम् । अतः सत्ताव्याप्यव्याप्येत्युक्तमित्यर्थः । सिद्धसाधनताव्युदासाय शब्दस्य नित्यत्वसिद्धये नित्यवृत्तीति जातिविशेषणमिति स्पष्टमिति भावः ।

।। **नवम इति** ।। ध्वनिशब्दत्वव्याप्यभिन्नत्वे सति श्रावणत्वादित्यत्र ध्वनिपदस्य कृत्यम् ।। **ध्वनाविति** ।। ध्वनिभिन्नत्वे सति श्रावणत्वादित्येवोक्तौ दोषः ।। **शब्दत्वव्याप्यतारत्वादाविति** ।। ध्वनिशब्दत्वव्याप्याभ्यां भिन्नत्वे सतीत्युक्तमित्यर्थः । श्रावणत्वादिति तु घटादावव्यभिचारायेति व्यक्तमिति भावः ।। **कल्पनागौरवादीति** ।। विवरिष्यते चैतदुत्तरभङ्गे व्यक्त्यानन्त्यादिकल्पना विचीतरङ्गादिन्यायेन पूर्वशब्दस्योत्तरोत्तरशब्दान्तरजनकत्वमुत्तरशब्दस्य पूर्वपर्वूशब्दनाशकत्वमन्त्योपान्त्ययोरन्योन्यनाशकत्वमित्युत्तरत्र वक्ष्यमाणगौरवमित्यर्थः । आदिपदेन बहुबाधादिग्रहः ।। **नित्यद्रव्येति** ।। शब्दत्वादिग्राहकत्वेनार्थान्तरपरिहाराय द्रव्यपदम् । एवं च शब्दस्य द्रव्यत्वं नित्यत्वं चादाय साध्यं पर्यवस्यति ।

व्योमादिनित्यद्रव्यग्राहकत्वेन पर्यवसानस्य बाधितत्वात् । इन्द्रियत्वमात्रस्य चक्षुरादौ व्यभिचारान्निरवयंवेत्युक्तिः ।। **मनोवदिति** ।। तस्यात्मग्राहकत्वादिति भावः ।।

अत्रारुचिबीजं तु, आत्मनो मानसत्वे कदाचिदहमनहं वेत्यादिसन्देहापातेन सुदृढनिर्णयरूपसाक्षिवेद्यत्वादात्मनः साध्यवैकल्यं दृष्टान्तस्य वस्तुमात्रस्येश्वरवादोक्तरीत्या संयोगित्वयुक्त्या सावयवत्वेन निरवयवत्वासिद्धेरित्यादि ध्येयम् ।

।। इति वर्णनित्यत्वेऽनुमानानि ।। २६ ।।

वर्णानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वम्

ननु वर्णानां नित्यत्वे सर्वदोपलब्धिः स्यात् । नचोच्चारणजन्यस्य ध्वनिरूपव्यञ्जकस्य कादाचित्कत्वान्न दोष इति वाच्यम् । तस्य हि व्यञ्जकत्वं न तावदावरणापसारणवदिन्द्रियसन्निधापकत्वेन[1] । श्रोत्रगुणत्वपक्षे विभुत्वपक्षे च वर्णानां सर्वेदेन्द्रियसम्बन्धात् । नापि चक्षुरादावञ्जनादेरिव श्रोत्रे संस्काराधायकतया । संस्कृतेन श्रोत्रेण चक्षुषेव विविच्य स्वसम्बद्धसर्ववर्णसमूहालम्बनस्यैकस्य ज्ञानस्योत्पत्त्यापातादिति चेन्न । त्वन्मते वर्णोत्पादकानामिव मन्मते तद्व्यञ्जकानामपि नियतत्वात् ।।

न्यायदीपः

''अत आकाशगुणे शब्दे व्यज्यमाना वर्णादय'' इति तत्त्वनिर्णयवाक्यस्य टीकायां शङ्कितं वर्णनित्यत्वबाधकं **मण्या**द्युक्तमाशङ्कते ।। **नन्विति**

१. ''सन्निधायकत्वेन'' इति पाठान्तरम् ।

।। **श्रोत्रगुणत्वपक्ष इति** ।। परिमाणवच्छब्देन सर्वदा श्रोत्रस्य सम्बन्धादित्यर्थः । बुभुत्सायाः नियामकत्वमाशङ्क्योक्तम् ।। **चक्षुषेवेति** ।।

"सकृच्च संस्कृतं श्रोत्रं सर्वशब्दान् प्रकाशयेत् ।
घटायोन्मीलितं चक्षुः पटं न हि न बुध्यते ।।"

इति प्राचीनोक्तेरिति भावः ।। **त्वन्मत इति** ।। यथैकवर्णोत्पादकेनैव न सर्ववर्णोत्पत्तिः, तथैकवर्णव्यञ्जकेनैव न सर्ववर्णव्यक्तिरिति न सर्वोपलम्भ इत्यर्थः ।।

तर्कताण्डवम्

ननु वर्णा न प्रतिनियतव्यञ्जकव्यङ्ग्याः, एकावच्छेदेन समानदेशत्वे सति समानेन्द्रियग्राह्यत्वाद् घटगतैकत्वपरिमाणवत् । अत्र च साध्ये व्यञ्जकशब्देन विषयसन्निकर्षातिरिक्तो ज्ञानहेतुर्विवक्षित इति न बाधः । हेतौ भिन्नेन्द्रियग्राह्यरूपरसादौ व्यभिचारनिरासाय समानेन्द्रियेति विशेषणम् । एकेन श्येनचरणावच्छेदेन वर्तमानयोर्भिन्नसंयोगिव्यङ्ग्ययोः श्येनस्य स्थाणुतदवयवाभ्यां संयोगयोर्व्यभिचारनिरासाय समानदेशत्वे सतीति विशेषणम् । इह च समानदेशत्वमनतिरिक्तदेशत्वं विवक्षितम् । तेनोक्तयोः संयोगयोरेकस्मिन् श्येने वृत्तावपि स्थाणुसंयोगस्य अवयवसंयोगानाश्रये स्थाणौ, अवयवसंयोगस्य च स्थाणुसंयोगानाश्रयेऽवयवे वृत्त्यातिरिक्तदेशत्वान्न व्यभिचारः ।

न्यायदीपः

वर्णानित्यत्ववादे पूर्वपक्षे **मणि**कृताशङ्क्य च निरस्तमप्यनुमानं दोषान्तरविवक्षया शङ्कते ।। **नन्विति** ।। **प्रतिनियतेति** ।। अत्र प्रतिनियतव्यञ्जकव्यङ्ग्यत्वं परस्परव्यभिचारिव्यञ्जकव्यङ्ग्यत्वं दोषाभावे परस्पराविषयक-

साक्षात्कारविषयत्वमिति यावत् । तेनैकत्र द्वित्वभ्रमजनकेन परिमाणग्राहिणा परिमाणभ्रमजनकेनैकत्वग्राहिणा च[1] न व्यभिचार इति व्याचक्षते ।। **एकेति** ।। कवर्णाद्येकावच्छेदकश्रोत्ररूपसमानदेशत्वे सति श्रोत्रेन्द्रिय-ग्राह्यत्वाद्वर्णानां पक्षे हेतुसत्त्वं ध्येयम् । एकावच्छेदकत्वं देशतः कालतश्चेत्यग्रे व्यक्तम् । अन्यूनानतिरिक्तदेशकालत्वे सतीति पदद्वयतात्पर्यमित्येके ।। **घटगतेति** ।। घटगतैकत्वपरिमाणयोरेकघटत्वावच्छेदेन समानदेशत्वं समानेन्द्रियचक्षुर्गाह्यत्वमिति हेत्वनुगमः । परिमाणव्यञ्जकालोक-व्यङ्ग्यत्वादेकत्वस्य प्रतिनियतव्यञ्जकत्वाभावरूपसाध्यानुगम इति भावः । ननु व्यञ्जकपदेन सन्निकर्षस्यापि ग्रहणे समवायस्यैकत्वेऽपि तत्तद्वर्णनिरूपित-श्रोत्रसमवायस्य नियतत्त्वात्तदभावसाधने बाधो दृष्टान्ते साध्यवैकल्यं चेत्यत अह ।। **अत्र च साध्य इति** ।। न बाध इत्युपलक्षणम् । दृष्टान्ते साध्यवैकल्यं च नेत्यपि ध्येयम् ।।

सत्यन्तमात्रं हेतुरस्त्वित्यत आह ।। **हेताविति** ।। रूपादेरालोक-लवणादिभिन्नव्यञ्जकव्यङ्ग्यत्वादिति भावः । समानदेशत्वे सतीत्यस्य कृत्यमभिमतं मण्युक्तं व्यनक्ति ।। **एकेनेति** ।। साध्याभावोपपादनायोक्तं भिन्नसंयोगिव्यङ्ग्ययोरिति । कारणाकारणसंयोगात्कर्याकार्यसंयोग इति संयोगजसंयोगपक्षे स्थाणुश्येनसंयोगस्थाने स्थाण्ववयवसंयोगस्यापि सत्त्वात् स्थाणुतदवयवाभ्यां संयोगयोरित्युक्तम् । तथाच कथं न व्यभिचार इत्यत आह ।। **इह चेति** ।।

तर्कताण्डवम्

अत एव–

''प्रदीपे व्यज्यते जातिर्न तु नीरजनीलिमा''

---

१. ''एकत्वग्राहिणा च परस्परागृहणात्'' इति चेत् पाठः स्वरसः इति भाति ।

इत्युक्तत्वादुत्पलत्वव्यञ्जकप्रदीपाव्यङ्ग्ये नैल्ये न व्यभिचारः । उत्पलत्वस्यातिरिक्तदेशवृत्तित्वात् । कालरूपावच्छेदकभेदेन एकघटनिष्ठयोरूपतद्ध्वंसयोर्व्यभिचारनिरासायैकावच्छेदेनेति विशेषणम् । एकावच्छेदश्च न केवलं कालतः । किं तु देशतोऽपि । तेनावयवद्वयवृत्त्योरवयवद्वयारब्धयोरवयविसंयोगयोर्व्यभिचारो निरस्तः । अवयविनो व्याप्यवृत्तित्वेन अवयवसंयोगस्य चाव्याप्यवृत्तित्वेन देशतोऽवच्छेदकभेदात् । अत्र च हेतुमत्सु सङ्ख्यादिसामान्यगुणेषु द्रव्यग्रहणयोग्यतान्तर्गतयोग्यताकत्वस्य द्रव्यग्राहकबहिरिन्द्रियग्राह्यत्वस्य च सत्त्वान्न व्यभिचारशङ्का । नचोक्तहेतुनैव प्रतिनियतोत्पादकाभावोपि साध्यः । भिन्नहेतुजन्ययोर्वेगकर्मणोर्व्यभिचारादिति चेन्मैवम् । तथापि त्वचा ग्राह्ययोर्घटगतस्पर्शपृथक्त्वयोः व्यभिचारात् । तत्र पृथक्त्वस्य स्पर्शाव्यञ्जकेनावधिना व्यङ्ग्यत्वात् ।।

नच समानेन्द्रियग्राह्यपदेन परस्पराग्राहकेन्द्रियाग्राह्यत्वं विवक्षितम्, एवं च न व्यभिचारः; स्पर्शस्य पृथक्त्वग्राहकत्वगिन्द्रियमात्रग्राह्यत्वेन तदग्राहकाग्राह्यत्वेऽपि पृथक्त्वस्य स्पर्शाग्राहकचक्षुर्गाह्यतया तदग्राह्यत्वाभावादिति वाच्यम् । भिन्नपुरुषनिष्ठापेक्षाबुद्धिभ्यां जन्ययोर्व्यङ्ग्ययोश्चैकदेशकालयोर्द्वित्वयोर्व्यभिचारात् । त्वयापेक्षाबुद्धिर्व्यञ्जिकेत्यपि स्वीकारात् ।।

नच प्रतिनियताप्रतिपत्तृकत्वमपि हेतुविशेषणं विवक्षितम्, द्वित्वे तु प्रतिनियतप्रतिपत्तृके इति वाच्यम् । अवयविव्यञ्जकमात्राव्यङ्ग्येनावयवबहुत्वेनैकत्वव्यञ्जकमात्राव्यङ्ग्येन पृथक्त्वदीर्घत्वादिना च व्यभिचारात् ।।

न्यायदीपः

अन्यत्रापि व्यभिचारनिरासः फलमित्यत आह ।। **अत एवेति** ।। समानदेशत्वे सतीत्यस्यैवं विवक्षाकरणादेवेत्यर्थः ।। **प्रदीप इति** ।। प्रदीपे सत्येवेत्यर्थः । जातिरुत्पलत्वम् । न तु व्यज्यत इत्यन्वयः । नीरजनीलिमा तु तस्मिन्सत्येव व्यज्यत इत्युक्तत्वात्प्राचीनैरित्यर्थः ।। **अतिरिक्तेति** ।। रुक्तोत्पलेपि सत्त्वादिति भावः ।। **कालरूपेति** ।। कालाख्येत्यर्थः ।। **अवयवीति** ।। अवयवी च संयोगश्चेति द्वन्द्वः । तन्तुद्वयनिष्ठस्य पटरूपावयविनः तन्तुद्वयसंयोगस्य च यथाक्रममालोकेन तन्तुद्वयेन च व्यङ्ग्यत्वात्साध्याभावेपि हेतुरपि तत्र नेत्याह ।। **अवयविन इति** ।। **अवच्छेदकेति** ।। व्यक्त्यंशावच्छेदेन संयोगस्य, सर्वावयवावच्छेदेनावयविनो वृत्तेरिति भावः ।।

नन्वेवमपि सङ्ख्यापरिमाणपृथक्त्वेषु एकावच्छेदेन समानदेशत्वे सति समानेन्द्रियग्राह्यत्वहेतोः सत्त्वाद्व्यभिचार इत्यतः साध्यस्यापि सत्त्वान्न दोष इत्याह ।। **अत्र हेतुमत्स्विति** ।। **भिन्नहेत्विति** ।। वेगस्य कर्मजन्यत्वात्कर्मणो नोदनादिजन्यत्वादिति भावः ।। **तथापीति** ।। उक्तस्थलेषु व्यभिचाराभावेऽपीत्यर्थः । हेतुसत्त्वायोक्तम् ।। **त्वचा ग्राह्ययोरिति** ।। सत्यन्तांशसत्त्वं तु व्यक्तम् । साध्यसत्त्वं व्यनक्ति ।। **तत्रेति** ।। **अवधिनेति** ।। अयमस्मात्पृथगिति प्रतीत्या पञ्चम्यन्तनिर्दिष्टावधिपदार्थेनेत्यर्थः । तावता कथं न व्यभिचार इत्यत आह ।। **स्पर्शस्येति** ।। **भिन्नेति** ।। यत्र घटपटस्थळे चैत्रनिष्ठापेक्षाबुद्ध्या मैत्रनिष्ठापेक्षाबुद्ध्या च द्वित्वद्वयमुपपन्नं तत्र द्वित्वद्वये एकावच्छेदेन समानदेशत्वे सति परस्पराग्राहकेन्द्रियाग्राह्यत्वरूपहेतोः सत्त्वात् द्वित्वत्वावच्छिन्नद्वित्वग्राहकेन्द्रियस्येकत्वेन नानात्वाभावादित्यर्थः । साध्यसत्त्वं नेति भावेनोक्तम् ।। **व्यङ्ग्ययोश्चेति** ।। उक्तरूपबुद्धिभ्यां व्यङ्ग्ययोश्चेत्यर्थः ।।

तद्व्यञ्जकत्वमसिद्धमित्यत आह ।। **त्वयेति** ।। **अवयवीति** ।। पटावयवगतबहुत्वस्य पटेन सहैकावच्छेदेन समानदेशत्वे सति समानेन्द्रिय-ग्राह्यत्वरूपहेतुमत्त्वेपि साध्यवत्त्वं नेत्युपपादनाय ।। **अवयविव्यञ्जक-मात्राव्यङ्ग्येनेत्युक्तम्** ।। अपेक्षाबुद्ध्यापि व्यङ्ग्यत्वस्वीकारादिति भावः ।। **एकत्वेत्यादि** ।। अवधिपदार्थेनाऽपि व्यङ्ग्येनेत्यर्थः । हेतुसत्त्वं तु व्यक्तमिति साध्याभाव एवोपपादितः । तथा चैकत्वदीर्घत्वयोरेकत्वपृथक्त्वयो व्यभिचार इत्यर्थः ।

तर्कताण्डवम्

ननु परस्परव्यभिचारिव्यञ्जकाव्यङ्ग्यत्वं साध्यम्, एवं च न व्यभिचारः । अवयव्येकत्वव्यञ्जकर्योबहुत्वपृथक्त्वव्यञ्जकाभ्यां व्यभिचारेऽपि बहुत्वपृथक्त्वव्यञ्जकयोरवयव्येकत्वव्यञ्जकाभ्याम-व्यभिचारेण परस्परव्यभिचारिव्यञ्जकाव्यङ्ग्यत्वरूपसाध्यस्य सत्त्वा-दिति मणावुक्तमिति चेन्न ।

तथाप्यवयवबहुत्वग्रहव्यतिरेकेणावयविग्रहवदश्चले अवयविग्रह-व्यतिरेकेणावयवबहुत्वग्रहदर्शनेनानैकान्त्यात् । भिन्नप्रतियोगि-व्यङ्ग्ययोर्भूतलगतयोः समवायिनाशजन्ययोः विरलावयवतया समानदेशालोकजलप्रतियोगिकयोः आलोकजलध्वंसयोर्ब्राह्मणत्वा-त्यन्ताभावतद्व्यञ्जकात्यन्ताभावयोश्च व्यभिचाराच्च । देशशब्देन समवायिविवक्षायामपि वर्णानां नित्यद्रव्यत्ववादिनं मां प्रत्यसिद्धेः । घटगतयोरेकत्वैकपृथक्त्वयोर्भिन्नव्यक्तिव्यङ्ग्यगोत्वाश्वत्वादौ च व्यभिचाराच्च । जातिः सर्वगतेति पक्षस्येव प्रामाणिकत्वात् । वर्णाः परस्परव्यभिचारिप्रमापकप्रमाप्याः आश्रयेण सहैकेन्द्रियग्राह्यत्वात् गन्धरसवदित्यनेन सत्प्रतिपक्षता च । द्रव्यग्रहणयोग्यतान्तर्गत-योग्यताकत्वं मूर्तवृत्तित्वं चोपाधिश्च ।।

न्यायदीपः

कथं न व्यभिचार इत्यत उक्तस्थले साध्यसत्त्वं व्यनक्ति ।। **अवयवीति** ।। अवयव्येकत्वयोः ये व्यञ्जके तयोरित्यर्थः ।। **व्यभिचारेऽपीति** ।। बहुत्वव्यञ्जकापेक्षाबुद्धेरवयविव्यञ्जकत्वाभावात् । तथा पृथक्त्वव्यञ्जकावधेरेकत्वाव्यञ्जकत्वादिति भावः ।। **अव्यभिचारेणेति** ।। अवयव्यादेरग्रहे तन्निष्ठबहुत्वाद्यग्रहात् अवयव्यादिव्यञ्जकालोकाद्यव्यभिचार आवश्यक इति भावः ।। **मणाविति** ।। वर्णानित्यत्ववादे पूर्वपक्षे ।। **अञ्चल इति** ।। वस्त्रान्त्यभाग इत्यर्थः । तथा च परस्परव्यभिचारव्यञ्जकव्यङ्ग्यत्वमेव न तु तदभावरूपसाध्यसत्त्वमिति व्यभिचार इत्यर्थः ।

ननु बहुत्वस्य पटावयवैकदेशवृत्तित्वेन पटस्य तदधिकवृत्तित्वात् । बहुत्वस्याशुविनाशिताया पटस्याधिककालत्वाच्च । एकावच्छेदेन समानदेशत्वे सति समानेन्द्रियग्राह्यत्वरूपहेत्वभावान्नानैकान्त्यमित्यन्यत्र व्यभिचारमाह ।। **भिन्नेति** ।। साध्याभावोपपादनाय **भिन्नेत्यादि** । समानदेशतोक्त्यर्थं **भूतलगतयोरिति** । समवायिगतत्वाद् ध्वंसस्य कथं भूतलस्थतेत्यत उक्तम् । **समवायीत्यादि** । ध्वंसयोरित्यन्वयः । प्रतियोगिनोः समानदेशत्वे तद् ध्वंसयोरपि तथात्वादिति भावेनाह ।। **विरलावयवेति** ।। पाषणादिवन्निबिडद्रव्यत्वाभावेन समानदेशे ये आलोकजले तद् ध्वंसयोरित्यर्थः । निर्मलजलान्तस्थभूतलेऽप्यालोकोपलम्भादिति भावः ।। **ब्राह्मणत्वात्यन्ताभावतद्व्यञ्जकात्यन्ताभावयोरिति** ।। भिन्नप्रतियोगिव्यङ्ग्ययोः भूतलगतयोरित्येतदत्राप्यन्वेति । ब्राह्मणत्वव्यञ्जकं ब्राह्मणमातापितृकत्वादिकम् ।। **देशशब्देनेति** ।। समानदेशत्वे सतीति हेतुशरीरप्रविष्टदेशशब्देनेत्यर्थः । तथा च हेत्वभावान्न तत्र व्यभिचार इति भावः । नन्वेकावच्छेदेन समानदेशत्वे सति समानेन्द्रियग्राह्यत्वाभावादिति हेत्वर्थोस्त्वित्यत

आह ।। **घटगतयोरिति** ।। एकपृथक्त्वस्यावधिव्यङ्ग्यत्वादेकत्वस्य तदभावाद्भिन्नव्यङ्ग्यत्वेन साध्यासत्त्वेऽप्युक्तहेतुसत्त्वादिति भावः । अवध्यनभिव्यङ्ग्यत्वेनापि हेतुर्विशेष्यत इत्यत आह ।। **भिन्नेत्यादि** ।।

ननु कथं गोत्वाश्वत्वादौ हेतुसत्त्वम् । समानदेशत्वाभावादित्यत आह ।। **जातिः सर्वगतेतीति** ।। गोत्वस्य देशादिव्यवहितानेकगोपिण्डगतत्वपक्षे मध्यगताश्वादिपिण्डैः असम्बन्धायोगादश्वादावपि सम्बन्धेन तत्रापि वृत्तेरङ्गीकारस्य युक्तिसिद्धत्वात् । अश्वादौ गोत्वाद्यनुपलम्भस्य गोव्यक्तिरूपव्यञ्जकाभावेनोपपत्तेः । एवमश्वत्वादिजातिर्गवादिपिण्डसम्बद्धेति जातेः सर्वगतत्वात् समानदेशत्वमिति भावः ।

उक्तं हि तत्त्वनिर्णयटीकायां ''गोत्त्वाश्वत्वादीनां प्रतिनियतव्यक्तिव्याप्यत्वस्य परैरपि स्वीकृतत्वात्, गोत्वादीनां व्यक्तिसर्वगतत्वेन समानदेशत्वं नास्तीति चेन्न । प्रत्यासत्तेरवर्जनीयत्वात् । समवायाभावस्य वर्णेष्वपि सत्त्वात्'' इत्यादि ।।

नन्वितरनिरूपणानधीननिरूपणत्वे सतीत्यपि हेतुर्विशेष्यते । पूर्वोक्तव्यभिचारस्थळानि सर्वाण्यप्यन्यनिरूपणाधीननिरूपणान्येव, अतो हेत्वभावान्न व्यभिचार इति पूर्वपक्षे मण्युक्तमेव प्रतिपक्षदोषं चाह ।। **वर्णा इति** ।। परस्परव्यभिचारिणः प्रमापकाः ध्वनयस्तत्प्रमाप्यत्वेन साध्यसिद्धिः ।। **आश्रयेणेति** ।। शब्दस्यैकेन्द्रियग्राह्यत्वेऽपि तार्किकमते वर्णाश्रयेण गगनेन सहैकेन्द्रियाग्राह्यत्वाद्गगनस्यातीन्द्रियत्वात् आश्रयग्राहकेन्द्रियाग्राह्यत्वादिति फलितार्थत्वान्नासिद्धिः ।।

न चैवमसिद्धिवारकत्वात्सहेत्यन्तं व्यर्थम्, तद्विना कृतस्यैव व्याप्यत्वादिति वाच्यम् । असिद्धिवारकस्यापि व्यभिचारवारकस्येव सार्थक्यादित्युक्तत्वात् । अखण्डाभावेऽवैयर्थ्याच्च । शरीराजन्यत्ववत् ।।

न च द्व्यणुकादौ व्यभिचार इति वाच्यम् । प्रत्यक्षत्वे सतीति हेतु-विशेषणादित्येके । आश्रयाग्राहकेन्द्रियग्राह्यत्वादित्यर्थ इत्यन्ये ।। **गन्धेति** ।। गन्धरसयोर्घ्राणरसनग्राह्यत्वात्तदाश्रयस्य चक्षुरादिग्राह्यत्वाद्भिन्नप्रमापकप्रमाप्य-त्वाच्च हेतुसाध्ययोरनुगमो व्यक्तः । सत्प्रतिपक्षता चेत्युपलक्षणम् । न्यायमते वर्णानां क्रमिकोत्पादित्वेनाव्याप्यवृत्तित्वेन च तुल्यदेशकालत्वाभावात् । एकावच्छेदेनेत्यादिहेतोरसिद्धिः । किञ्च तत्तद्वर्णमात्रविषयकसाक्षात्कार-सम्भवाद्बाधश्चेत्यपि ध्येयम् ।।

एकावच्छेदेनेति हेतावुपाधी चाह ।। **द्रव्येति** ।। यत्र घटगतैकत्व-परिमाणयोरेकव्यञ्जकव्यङ्ग्यत्वं तत्र द्रव्यग्रहणेत्याद्युपाधी स्त इति साध्यव्यापकत्वम् । साधनवति पक्षे वर्णे द्रव्यग्रहणेत्याद्युक्तोपाधी न स्त इति साधनाव्यापकत्वं च व्यक्तमिति भावः ।।

तर्कताण्डवम्

किं चैवं सति वर्णाः परस्परं व्यभिचार्युत्पादकोत्पाद्या न, अपाकजत्वे सति भूतविशेषगुणत्वात्, जलगतरूपरसवदित्याद्यनु-मानेनोत्पादकानियमोऽपि किं न साध्यते । जन्यजलगतरूपरसादीनां कारणगुणपूर्वकत्वेन तदुत्पादकानां परस्परव्यभिचाराभावात् । यदि फलबलाच्छब्दे उत्पादकनैयत्यं तर्हि तत एव व्यञ्जकनैयत्यमप्यस्तु ।।

किञ्चोत्पत्तिपक्षे कदम्बगोलकन्यायेन लाघवप्रत्यभिज्ञाभ्या-मनुगृहीतेन वीचीतरङ्गन्यायेन वा प्रतिपुरुषं प्रत्युच्चारणं क्षणमात्र-स्थितिकवर्णधारायास्तत्प्रागभावानां तद् ध्वंसानामन्यत्रादृष्टस्य पूर्व-पूर्ववर्णे उत्तरोत्तरवर्णोत्पादकत्वस्य, उत्तरोत्तरवर्णे च पूर्वपूर्ववर्णनाशक-त्वस्य, अन्त्योपान्त्यवर्णयोश्च सुन्दोपसुन्दन्यायेनान्योन्यं वध्यघातक-भावस्य, अन्त्यशब्दे तु स्वोत्पत्तिचरमकारणस्योपान्त्यशब्दस्यैव

स्वनाशचरमकारणत्वेन स्वोत्पत्त्यव्यवहितोत्तरक्षणवृत्तिध्वंस-प्रतियोगित्वरूपबौद्धाङ्गीकृतक्षणिकत्वस्य च कल्पनमित्यतिगौरवम् ।।

न्यायदीपः

प्रागुक्तहेतोरनैकान्त्योक्तेर्हेत्वन्तरमाह ।। **अपाकजत्वे सतीति** ।। गुणत्वादित्युक्तौ भिन्नोत्पादकोत्पाद्ये घटादिगतसङ्ख्यापरिमाणादिसामान्यगुणे व्यभिचाराद् ।। **विशेषेति** ।। आत्मगुणेषु भिन्नोत्पादकोत्पाद्येषु ज्ञानादिष्व-व्यभिचाराय ।। **भूतेति** ।। पृथिवीगतरूपादिष्वव्यभिचाराय सत्यन्तम् ।। दृष्टान्ते तु साध्यानुगतिं दर्शयति ।। **जन्येति** ।। समवायिकारणसमवायि-कारणमात्रप्रत्यासन्नगुणसमवायिकरणकत्वं कारणगुणपूर्वकत्वं नाम । तथा च जलसमवायिकरणगतरूपरसादीनां परस्परव्यभिचारे कार्ये कुले रूपादयो न स्युरिति परस्परव्यभिचार्युत्पाद्यत्वाभावोस्तीति भावः ।। **फलेति** ।। एकवर्णोत्पादकेन तन्मात्रोत्पादरूपफलबलादित्यर्थः ।। **तत एवेति** ।। एकवर्णोपलम्भरूपफलबलादेवेत्यर्थः ।

विपक्षे कल्पनागौरवाच्च वर्णानां नित्यत्वमुपेत्य प्रतिनियतव्यञ्जक-व्यङ्ग्यत्वमुपेयमिति भावेन कल्पनागौरवादिति पूर्वोक्तं व्यनक्ति ।। **किञ्चेत्यादिनातिगौरवमित्यन्तेन** ।। **लाघवेति** ।। दशसु दिक्षु दशविधशब्दोत्पत्त्यङ्गीकारादप्येकैकस्यैकस्यैव गकारादेः दशदिक्सम्बन्धिनः कल्पनस्यैव लघुत्वाल्लाघवयुक्त्या प्राच्यप्रतीच्ययोरेकत्वप्रत्यभिज्ञया चानुगृहीतेनेत्यर्थः । षष्ट्यन्तानां कल्पनमित्यनेनान्वयः ।

तर्कताण्डवम्

नचेदं गौरवं फलमुखम् । फलस्याद्याप्यसिद्धेः । वर्णस्थले ध्वनिस्तु त्वयापि स्वीकार्य एव । दूरस्थस्य ध्वनिमात्रं मया श्रुतं

न तु वर्ण इत्यनुभवात् । शब्दत्वं सजातीयव्यञ्जकव्यङ्ग्यवृत्ति-बहिरिन्द्रियव्यवस्थापकवृत्तिजातित्वात् रूपत्ववदित्यनुमानाच्च । दृष्टं हि घटरूपकुङ्कुमगन्धादेः आलोकरूपघृतगन्धादिव्यङ्ग्यत्वम् ।।

नच पूर्वपूर्ववर्णस्योत्तरोत्तरवर्णव्यञ्जकत्वेन वा वर्णस्यैव ध्वनि-व्यञ्जकत्वेन वार्थान्तरमिति वाच्यम् । आदावेव श्रोत्रोत्पन्नं वर्णं प्रति पूर्ववर्णाभावात् । भेर्यादिध्वनिस्थले वर्णाननुभवाच्च ।।

तस्माद् व्यञ्जकानां प्रतिनियतत्वान्न सर्वदोपलब्धिप्रसङ्गः । तदुक्तं भगवत्पादैः–

'अत आकाशगुणे शब्दे व्यज्यमाना वर्णादय'' इति ।

न्यायदीपः

।। **फलमुखमिति** ।। वर्णोत्पत्तिलक्षणफलमेव मुखमुपस्थितिजनकं यस्य तत्फलमुखं तेनेत्यर्थः ।। **असिद्धेरिति** ।। येन गौरवं न दोषायेति स्यादिति भावः ।।

ननु वर्णनित्यत्वपक्षे व्यञ्जकध्वनिः वर्णभिन्नः कल्पनीयः, तस्योत्पत्तिस्थानात्कर्णदेशपर्यन्तं शब्दान्तरोत्पादकत्वमाशुतरविनाशित्व-मित्यादिकल्पनीयमित्यत आह ।। **वर्णस्थल इति** ।। ''दूराद्वर्णाग्रहणेपि । ध्वनिग्रहणादि''ति टीकोक्तमाह । दूरस्थस्येति । टीकोक्तेरुपलक्षणत्वं मत्वा ध्वनिसत्त्वेनुमानं चाह ।। **शब्दत्वमिति** ।।

यद्वा वायुविशेषसंयोग एव वर्णव्यञ्जक इति पक्षं निरसितुमाह ।। **शब्दत्वं इति** ।। सजातीयं यत् व्यञ्जकं ध्वनिलक्षणमेव तद्व्यङ्ग्यवृत्ती-त्यर्थः । जातित्वमात्रस्य घटत्वादौ व्यभिचारादिन्द्रियेत्यादि । तावन्मात्रस्य

ज्ञानत्वेच्छात्वादावपि सत्त्वाब्दहिरित्युक्तम् । प्रमेयत्वादाव्यभिचाराय ।। **जातित्वादिति** ।। न च ध्वनित्वे व्यभिचारः । तारत्वादिना साङ्कर्येण तस्याजातित्वादित्याहुः । वर्णानामेवेन्द्रियव्यवस्थापकत्वं न ध्वनेरित्यन्ये ।।

रूपादेरालोकादिव्यङ्ग्यत्वात्साध्यवैकल्यमाशङ्क्य च रूपत्वादौ साध्यानुगतिं व्यनक्ति ।। **दृष्टं हीति** ।। शङ्कितद्वयमपि निराह ।। **आदावेवेति** ।। भेर्यादीति च ।। **तदुक्तमिति** ।। प्रतिनियतव्यञ्जकव्यङ्ग्यत्वं वर्णानामित्येतत्तत्त्वनिर्णय उक्तमित्यर्थः ।। **अत इति** ।। प्रत्यभिज्ञाबलादित्यर्थः । आदिपदेन वर्णधर्मग्रहः ।

।। इति वर्णानां प्रतिनियतव्यञ्जकव्यङ्ग्यत्वम् ।। २७ ।।

वर्णानां नित्यत्वेऽपि क्रमोपपादनम्

नच नित्यत्वे कालादिकृतक्रमाभावादुच्चारणक्रमस्य च मौनिश्लोकादावभावादभिव्यक्तिक्रमस्य च लिप्यादिदर्शनजनितसमूहालम्बनस्मृतिविषयवर्णेष्वभावात् क्रमहीनवर्णमात्रस्य च राजाजारेत्यादौ भिन्नार्थबोधकत्वायोगात् घसमानकालीनप्रागभावप्रतियोगित्वं टस्य टसमानकालीनध्वंसप्रतियोगित्वं च घस्य क्रमो वाच्य इति वर्णनित्यत्वे क्रमानुभवो बाधक इति वाच्यम् ।

यत्र मौनिश्लोकादौ वर्णोत्पत्तिरेव न यत्र च घटेति वक्तव्ये टघेति विपरीत एवोत्पत्तिक्रमः तत्र त्वदुक्तस्यापि क्रमस्य अभावात् । दृश्यते च टघेत्युक्तेः प्रामादिकत्वं जानतो व्युत्पन्नस्यार्थधीः ।

यदि कालान्तरीयोत्पत्तिक्रमानुसन्धानात्तत्रार्थधीस्तर्हि समूहालम्बनस्मृतिस्थलेऽपि कालन्तरीयाभिव्यक्तिक्रमानुसन्धानादर्थधीरिति समम् ।।

न्यायदीपः

तार्किकैकदेशमतं वर्णोत्पत्तिसाधनमाशङ्क्य निराह ।। **न चेत्यादिना** ।। यद्यपीदं मणावेव ''यत्तु श्रोत्रानुविधानात्पदं श्रुणोमीत्यबाधितानुव्यवसाया'' दित्यादिनाशङ्क्य निरस्तम् । तथापि दोषान्तरविवक्षया शिष्यव्युत्पादनाय च पुनरत्रोपन्यास इत्यदोषः । नित्यत्वे विभुत्वे च वर्णानामिति योज्यम् । प्रतिपदादितिथ्यादीनामिव कालकृतपौर्वापर्यस्य, मालाभूतबलाकानामिव देशकृतपौर्वापर्यस्य चाभावादित्यर्थः ।। **समूहालम्बनेति** ।। तत्रापि घटाद्यर्थधीदर्शनेन घटाद्यानुपूर्व्या वाच्यत्वादिति भावः ।।

मास्तु क्रमः वर्णानामेवास्तु पदत्वमित्यत आह ।। **क्रमहीनेति** ।। अभिव्यक्तिक्रम एव वर्णानां पदे क्रम इति भावेन तत्रोक्तदोषं प्रतिबन्धा परिजिहीर्षुः परोक्तक्रमदोषं तावदाह ।। **यत्रेति** ।। **उत्पत्तिरेव नेति** ।। वर्णानामुच्चारणजन्यत्वात्तत्र च तदभावादिति भावः । तथाच तत्र प्राग-भावादिप्रतियोगित्वमप्रामाणिकमिति न क्रमः । विपरीतक्रमस्थले तु व्यक्तम् ।

ननु विपरीतक्रमस्थले घटानुपूर्व्येव नास्ति कथमव्याप्तिरित्यतस्तत्र घटार्थबोधरूपकार्यबलेन घटानुपूर्व्यस्तीति वाच्यमिति भावेनाह ।। **दृश्यते चेति** ।। **इति सममिति** ।। तथा च घकाराभिव्यक्तिसमानकालीन-प्रागभावप्रतियोग्यभिव्यक्तित्वं टस्य टकाराभिव्यक्तिसमानकालीनध्वंस-प्रतियोग्यभिव्यक्तिकत्वं घकारस्येत्यादिरूपेण घटाद्यानुपूर्वी सम्भवत्येव ।।

न च समूहालम्बनस्थले घटाद्यर्थधीदर्शनेन तत्र घटाद्यानुपूर्व्या-मव्याप्तिरिति वाच्यम् । तत्रापि स्मृतकालान्तरीयोक्तरूपानुपूर्व्या एवार्थधी-जनकत्वेनादोषत्वादिति भावः ।।

तर्कताण्डवम्

नचैवं पदादिभावस्याभिव्यक्तिघटितत्वे इदमेकं पदमित्यादि-प्रतीतिः श्रावणी न स्यात् । पदाद्युपाधेरभिव्यक्तेः अश्रावणत्वादिति वाच्यम् । मनसोपनीतस्याभिव्यक्तिक्रमस्य श्रावणत्वोपपत्तेः ।।

तस्माद्वर्णानां नित्यत्वेन तदनित्यत्वरूपस्य बाधकस्य अभावा-न्नित्य एव वेदः ।।

अभ्युपेत्य चेदमुदितं वर्णानित्यत्वं वेदनित्यत्वबाधकमिति । वस्तुतस्तु वर्णानामनित्यत्वेपि नियतानुपूर्वीकत्वरूपस्य नित्यत्वस्य न हानिः । वर्णनित्यत्वोक्तिस्तु वस्तुस्थितिप्रदर्शनार्था । उक्तं हि सुधायां, ''वस्तुतत्त्वविचारकं प्रति वर्णानां कूटस्थनित्यत्व-मुपपादितम्'' इति ।

न्यायदीपः

अभिव्यक्तेरित्युपलक्षणम् । कालस्येत्यपि ज्ञेयम् ।। **मनसेति** ।। पररीत्या ध्येयम् । अभिव्यक्तेः ज्ञानत्वेन तस्य परमते मानसत्वात् । कालस्य चानुमानिकत्वात् । सिद्धान्ते तु साक्षिणेति ध्येयम् । ज्ञानसामान्यसामग्री-मादायानुपनीतोपि कालो भासत इति कैश्चिदङ्गीकाराक्कालो नोक्त इत्याहुः ।

''ननु तथापि वर्णसमुदायरूपस्य वेदस्य न नित्यत्वमित्या''दिनोक्त-चोद्यनिरासमुपसंहरति ।। **तस्मादिति** ।। **उक्तं हीति** ।। ''प्रत्यक्षः कस्यचिद्धर्म'' इत्येतत्पद्यव्याख्यावसाने वर्णनित्यत्वस्य वेदनित्यत्वानुपयोग-मुक्त्वा तर्हि तत्त्वनिर्णये वर्णनित्यत्वं किमर्थमुक्तमित्यतः तत्कथनस्य कृत्यमुक्तं सुधायामित्यर्थः ।

।। इति वर्णानां नित्यत्वेपि क्रमोपपादनम् ।। २८ ।।

।। इति श्रीराघवेन्द्रयतिविरचिते तर्कताण्डवव्याख्याने न्यायदीपे वर्णनित्यत्ववादः समाप्तः ।।

समवायवादः

समवाये प्रमाणभङ्गः

यच्चोच्यते । आकाशात्मकश्रोत्रगुणा वर्णाः समवायेन सम्बन्धेन गृह्यन्त इति तन्न । वर्णानां नित्यविभुद्रव्यत्वात् समावाये मानाभावाच्च ।।

ननु यद्यपि समवाये प्रत्यक्षं न प्रमाणम् । इमौ संयुक्तावित्यादिवदिमौ समवेताविति वाऽनयोः समवाय इति वा अननुभावात् । समवायं जानामीत्यननुव्यवसायाच्च । रूपी घट इत्यादेश्चाभाववद्भूतलमित्यादिवदुपपत्तेः ।।

न्यायदीपः

ननु ''आकाशगुणे शब्दे व्यज्यमाना वर्णादय'' इति ध्वनेरेवाकाशगुणत्वोक्तिरयुक्ता । वर्णानामप्याकाशगुणत्वात् । अन्यथा श्रोत्रेण सह सम्बन्धायोगेन वर्णग्रहणानुपपत्तेः । आकाशगुणत्वे त्वाकाशात्मकश्रोत्रेण तद्गुणस्य वर्णस्य समवायेन ग्रहणोपपत्तेरित्यतः संयोगसम्बन्धेनैव तद्ग्रह इति भावेन ''समवायाभ्युपगमाच्चेति'' सूत्रदूषितं समवायं निरसितुमाह ।। **यच्चेति** ।। **नित्यविभुद्रव्यत्वादिति** ।। अन्यानुविधानाभावादिना घटादेरिव द्रव्यत्वस्य, पूर्वोक्तदिशा नित्यत्वस्य, काश्यां श्रुत एव गकारोत्रापि श्रूयत इति प्रत्यभिज्ञानात्, ''तावती वाक्'' इति श्रुतेर्विभुत्वस्य, च सिद्धेर्गुणत्वे मानाभावाच्चेत्यर्थः ।

न च शब्दो गुणः सामान्यवत्त्वे सत्यस्मदादिबाह्यैकेन्द्रियग्राह्यत्वाद्रूपवदित्यनुमानं गुणत्वे मानमिति वाच्यम् । ध्वनिशब्देन सिद्धसाधनत्वात् । वर्णात्मक इत्युक्तावपि हेतोरप्रयोजकत्वात् । घटादीनामेकेन्द्रियाग्राह्य-

त्वेप्यात्मनस्तथात्ववद्द्रव्यस्यैव सतो बाह्यैकेन्द्रियग्राह्यत्वेपि विरोधाभावात् । निरवयवद्द्रव्यत्वे बाह्येन्द्रियग्राह्यत्वविरोध इति चेत् । निरवयवस्यात्मन इन्द्रियग्राह्यत्ववत् । बाह्यैकेन्द्रियग्राह्यत्वेपि बाधकाभावेन व्याप्यनिश्चयादिति सुधायामेव व्यक्तत्वादिति भावः । यद्यपीत्यस्य तथापीति वक्ष्यमाणेनान्वयो ध्येयः ।।

समवायवादे पूर्वपक्षे मण्युक्तदिशा निराह ।। **इमाविति** ।। अननुभवोऽसिद्ध इत्यत आह ।। **समवायं जानामीति** ।।

यद्वा समवायो हि विशेषणत्वेन वा विशेष्यत्वेन वा अयं घट इतिवदयं समवाय इति समवायत्वरूपस्वरूपेण वा संसर्गविधया वा भासेत । तत्राद्य आह ।। **इमाविति** ।। द्वितीय आह ।। **अनयोरिति** ।। तृतीय आह ।। **समवायमिति** ।। तथा च समवायत्वेन समवाय प्रत्यक्षमसिद्धमिति भावः । चतुर्थ आह ।। **रूपीति** ।। संसर्गविधयैव प्रतीयमानसम्बन्धस्याभावभूतलसम्बन्धवत् समवायभिन्नसम्बन्धत्वेनाप्युपपत्त्या समवायत्वासिद्धेरित्यर्थः । ज्ञातमिष्टमित्यादिप्रत्यय आदिपदार्थः ।

तर्कताण्डवम्

एतेनायं तन्तुपटसम्बन्धप्रत्ययश्चाक्षुषः चक्षुरन्वयव्यतिरेकानुविधायित्वात् घटप्रत्ययवदिति समवायप्रत्यक्षत्वसाधनमप्यपास्तम् । उपादानोपादेयाभेदवादे आश्रयासिद्धेः । तद्भेदवादेपि घटाभावभूतलयोरिवेहापि स्वरूपसम्बन्धस्य चाक्षुषत्वेनार्थान्तरात् ।।

(१) एतेन रूपी घट इति धीर्विशेषणविशेष्यसम्बन्धविषया विशिष्टधीत्वात् दण्डीति धीवत्; (२) इह तन्तुषु पट इत्यादिरिह प्रत्ययः आधाराधेयसम्बन्धनिमित्तकः अबाधितेहप्रत्ययत्वात् । इह

कुण्डे बदरमिति धीवत्; (३) जात्यादिगोचरो विशिष्टव्यवहारः सम्बन्धनियतः भावमात्रविषयाबाधितविशिष्टव्यवहारत्वात् सघटं भूतलमिति व्यवहारवत्; (४) एते तन्तवः एतत्पटसम्बद्धाः एतदाश्रयत्वात् भूतलवत्; (५) भूतलरूपादयो भूतलसम्बद्धाः भूतल-विशेषणत्वात् घटवदित्याद्यनुमानमप्यपास्तम् । स्वरूपसम्बन्धे-नार्थान्तरात् । अयं संयोगः एतदन्यसंयोगत्वरहितसम्बन्धान्यः मेयत्वादित्यादि तु स्वव्याहतम् । रूपादिरिन्द्रियसम्बद्धः प्रत्यक्षत्वात् घटवदित्यत्र तु अभावादाविव संयुक्तविशेषणतादिरूपसम्बन्धे-नार्थान्तरम् ।।

न्यायदीपः

।। **सम्बन्धप्रत्यय इति** ।। तन्तुषु पट इति संसर्गविधया तन्तुपट-सम्बन्धविषयकः प्रत्यय इत्यर्थः । विशेषणत्वादिना तत्प्रत्ययस्यासिद्धे-रुक्तत्वाद्वक्ष्यमाणार्थान्तरानवकाशाच्च । स्वरीत्याह ।। **उपादानेति** ।। पररीत्याह ।। **तद्भेदेति** ।।

समवायसाधकप्राचीनानुमानान्याशङ्क्य च मण्युक्तदोषोक्त्या निराह ।। **एतेनेत्यादिना** ।। भूतले अभावप्रत्ययवदन्यथोपपत्तिकथनेनेत्यर्थः । अपास्तमित्यन्वयः । भ्रमे व्यभिचारनिरासायाबाधितेति हेतुविशेषणोक्तिः ।। **जात्यादीति** ।। ब्राह्मणोयं, शुक्लः पटः, चलति गौः, विशिष्टः परमाणु-रित्यादिजातिगुणक्रियाविशेषविशिष्टव्यवहार इत्यर्थः ।। **सम्बन्धनियत इति** ।। स्वविषयसम्बन्धव्याप्त इत्यर्थः । तेन श्रोत्रादिसम्बन्धनैयत्येन नार्थान्तरम् । जातिरित्याद्यविशिष्टव्यवहारे अव्यभिचाराय विशिष्टेति हेतुविशेषणम् । इदं रूप्यमित्यादिबाधितसम्बन्धकविशिष्टव्यवहारे अव्यभिचाराय अबाधितेति । अभाववद्भूतलमित्यादिभावाभावगोचरतादृश-

व्यवहारेऽव्यभिचाराय ।। **भावमात्रेति** ।। **सघटमिति** ।। संयोगस्तत्र सम्बन्ध इति भावः ।

।। **भूतलवदिति** ।। संयोगसम्बन्धेन पटाश्रयभूतलवदित्यर्थः । पक्षे च संयोगस्य बाधात् समवाय एव सिध्यतीति भावः । रूपवद्भूतलमिति प्रतीतिमनुरुध्याह ।। **भूतलविशेषणत्वादिति** ।। यद्वा भूतलविशेषणत्वादित्यस्य भूतलाश्रितत्वादित्यर्थः । अत एव घटवदित्युक्तिः । अन्यथा घटवद्भूतलमिति प्रतीयमानघटवदिति व्याख्येयम् ।

।। **स्वरूपसम्बन्धेनार्थान्तरादिति** ।। न च स्वरूपाणामनेकत्वेन गौरवापत्तेः ईश्वरानुमाने कर्त्रैकत्ववल्लाघवादेकः समवाय एव सिध्यतीति वाच्यम् । तथात्वे अभाववद्भूतलं ज्ञातो घटः इष्टो घट इत्यादावपि तादृशसम्बन्धाङ्गीकारापत्तेः । तत्र तादृशसम्बन्धस्य बाधात्स्वरूपाणामनेकत्वेपि क्लृप्तत्वेन गौरवस्यादोषत्वात् स्वरूपम्बन्धेनैव विशिष्टप्रत्ययाद्युपपत्तेर्नैकसम्बन्धकल्पनेति चेत् । समं प्रकृतेपि । विवरिष्यते चैतदग्रे नापि गुणक्रियेत्यादि**मण्युक्तानुमानान्तरखण्डनप्रस्ताव** इति भावः ।। **अयं संयोग इति** ।। बुद्धिस्थः कश्चिद्घटपटसंयोगः पक्षः ।। **एतदिति** ।। पक्षभूतसंयोगपरामर्शः । एतदन्यो यः संयोगः एतदन्यसंयोगः स्तम्भकुम्भादिसंयोगस्तस्य भावः एतदन्यसंयोगत्वम् । तद्रहितो यः सम्बन्धः पक्षीकृतसंयोगस्तदन्यः कश्चित्सम्बन्धश्च भवति । तथा च पक्षे पक्षीकृतसंयोगान्यत्वस्य बाधात् अपूर्वसम्बन्धान्तरादन्यत्वमादाय साध्यपर्यवसानमिति समवायसिद्धिः । दृष्टान्ते च घटादौ पक्षभूतसंयोगरूपसम्बन्धान्यत्वेन साध्यानुगमो बोध्य इत्यादि तु विशिष्टव्यतिरेक्यनुमानमित्यर्थः ।। **स्वव्याहतमिति** ।। अद्यापि समवायरूपसम्बन्धान्तरस्यासिद्ध्या तदादाय साध्यपर्यवसाने बाधात्स्वान्यत्वेनैव साध्यपर्यवसानं वाच्यम् । तद्व्याहतमित्यर्थः ।।

कुण्डे बदरमिति धीवत्; (३) जात्यादिगोचरो विशिष्टव्यवहारः सम्बन्धनियतः भावमात्रविषयाबाधितविशिष्टव्यवहारत्वात् सघटं भूतलमिति व्यवहारवत्; (४) एते तन्तवः एतत्पटसम्बद्धाः एतदाश्रयत्वात् भूतलवत्; (५) भूतलरूपादयो भूतलसम्बद्धाः भूतल-विशेषणत्वात् घटवदित्याद्यनुमानमप्यपास्तम् । स्वरूपसम्बन्धे-नार्थान्तरात् । अयं संयोगः एतदन्यसंयोगत्वरहितसम्बन्धान्यः मेयत्वादित्यादि तु स्वव्याहतम् । रूपादिरिन्द्रियसम्बद्धः प्रत्यक्षत्वात् घटवदित्यत्र तु अभावादाविव संयुक्तविशेषणतादिरूपसम्बन्धे-नार्थान्तरम् ।।

न्यायदीपः

।। **सम्बन्धप्रत्यय इति** ।। तन्तुषु पट इति संसर्गविधया तन्तुपट-सम्बन्धविषयकः प्रत्यय इत्यर्थः । विशेषणत्वादिना तत्प्रत्ययस्यासिद्धे-रुक्तत्वाद्वक्ष्यमाणार्थान्तरानवकाशाच्च । स्वरीत्याह ।। **उपादानेति** ।। पररीत्याह ।। **तद्भेदेति** ।।

समवायसाधकप्राचीनानुमानान्याशङ्क्य च मण्युक्तदोषोक्त्या निराह ।। **एतेनेत्यादिना** ।। भूतले अभावप्रत्ययवदन्यथोपपत्तिकथनेनेत्यर्थः । अपास्तमित्यन्वयः । भ्रमे व्यभिचारनिरासायाबाधितेति हेतुविशेषणोक्तिः ।। **जात्यादीति** ।। ब्राह्मणोयं, शुक्लः पटः, चलति गौः, विशिष्टः परमाणु-रित्यादिजातिगुणक्रियाविशेषविशिष्टव्यवहार इत्यर्थः ।। **सम्बन्धनियत इति** ।। स्वविषयसम्बन्धव्याप्त इत्यर्थः । तेन श्रोत्रादिसम्बन्धनैयत्येन नार्थान्तरम् । जातिरित्याद्यविशिष्टव्यवहारे अव्यभिचाराय विशिष्टेति हेतुविशेषणम् । इदं रूप्यमित्यादिबाधितसम्बन्धकविशिष्टव्यवहारे अव्यभिचाराय अबाधितेति । अभाववद्भूतलमित्यादिभावाभावगोचरतादृश-

व्यवहारेऽव्यभिचाराय ।। **भावमात्रेति** ।। **सघटमिति** ।। संयोगस्तत्र सम्बन्ध इति भावः ।

।। **भूतलवदिति** ।। संयोगसम्बन्धेन पटाश्रयभूतलवदित्यर्थः । पक्षे च संयोगस्य बाधात् समवाय एव सिध्यतीति भावः । रूपवद्भूतलमिति प्रतीतिमनुरुध्याह ।। **भूतलविशेषणत्वादिति** ।। यद्वा भूतलविशेषणत्वादित्यस्य भूतलाश्रितत्वादित्यर्थः । अत एव घटवदित्युक्तिः । अन्यथा घटवद्भूतलमिति प्रतीयमानघटवदिति व्याख्येयम् ।

।। **स्वरूपसम्बन्धेनार्थान्तरादिति** ।। न च स्वरूपाणामनेकत्वेन गौरवापत्तेः ईश्वरानुमाने कर्त्रैकत्ववल्लाघवादेकः समवाय एव सिध्यतीति वाच्यम् । तथात्वे अभाववद्भूतलं ज्ञातो घटः इष्टो घट इत्यादावपि तादृशसम्बन्धाङ्गीकारापत्तेः । तत्र तादृशसम्बन्धस्य बाधात्स्वरूपाणामनेकत्वेपि क्लृप्तत्वेन गौरवस्यादोषत्वात् स्वरूपम्बन्धेनैव विशिष्टप्रत्ययाद्युपपत्तेर्नैकसम्बन्धकल्पनेति चेत् । समं प्रकृतेपि । विवरिष्यते चैतदग्रे नापि गुणक्रियेत्यादि**मण्यु**क्तानुमानान्तरखण्डनप्रस्ताव इति भावः ।। **अयं संयोग इति** ।। बुद्धिस्थः कश्चिद्घटपटसंयोगः पक्षः ।। **एतदिति** ।। पक्षभूतसंयोगपरामर्शः । एतदन्यो यः संयोगः एतदन्यसंयोगः स्तम्भकुम्भादिसंयोगस्तस्य भावः एतदन्यसंयोगत्वम् । तद्रहितो यः सम्बन्धः पक्षीकृतसंयोगस्तदन्यः कश्चित्सम्बन्धश्च भवति । तथा च पक्षे पक्षीकृतसंयोगान्यत्वस्य बाधात् अपूर्वसम्बन्धान्तरादन्यत्वमादाय साध्यपर्यवसानमिति समवायसिद्धिः । दृष्टान्ते च घटादौ पक्षभूतसंयोगरूपसम्बन्धान्यत्वेन साध्यानुगमो बोध्य इत्यादि तु विशिष्टव्यतिरेक्यनुमानमित्यर्थः ।। **स्वव्याहतमिति** ।। अद्यापि समवायरूपसम्बन्धान्तरस्यासिद्ध्या तदादाय साध्यपर्यवसाने बाधात्स्वान्यत्वेनैव साध्यपर्यवसानं वाच्यम् । तद्व्याहतमित्यर्थः ।।

यद्वा एवमेव संयोगसमवायविशेषावपि पक्षीकृत्य एतदन्यसंयोग-समवायत्वरहितसम्बन्धान्यः मेयत्वाद्घटवत्, अयं घटः एतदन्यघटत्वरहित-घटान्यः मेयत्वात्पटवदित्यादिप्रयोगस्यापि सम्भवेन संयोगसमवायान्यसम्बन्धः अपूर्वघटादिश्च सिध्येदिति स्वव्याहतमित्यर्थः ।।

अन्ये त्वित्यादिना **मण्युक्तमेवाशङ्क्य** निराह ।। **रूपादिरिति** ।। क्रियाजात्यादिरादिशब्दार्थः । प्रत्यक्षत्वात्प्रत्यक्षविषयत्वादित्यर्थः । अत्र संयोगबाधे इन्द्रियसम्बन्धघटकतया समवायसिद्धेरिति भावः ।। **अभावादा-वितिं** ।। यथा अभाववद्भूतलमिति गृह्यमाणो घटाभावादिः चक्षुःसंयुक्त-भूतलविशेषणतया त्वन्मते गृह्यते यथा च घटादौ रूपादिसमवायः चक्षुः-संयुक्तघटादिविशेषणतया गृह्यते अभावसमवायाभ्यां चक्षुषः समवायादेरभावात् । एवमेव रूपादिरप्यस्तु । तथा च समवायासिद्ध्या अर्थान्तरमित्यर्थः ।

तर्कताण्डवम्

तथापि मण्युक्तं गुण्यादिना सह गुणक्रियाजातिविशिष्टयथार्थबुद्धयः सम्बन्धिभिन्नसम्बन्धविषयाः निर्विषयकभावमात्रविषयकविशिष्ट-बुद्धित्वात् इतरनिरूपणाऽनिरूप्यविषयकविशिष्टबुद्धित्वाद्वा दण्डीति बुद्धिवदित्यनुमानमिति । तन्न । काले घटरूपमित्यादिप्रतीतौ व्यभि-चारात् । त्वन्मते घटगतस्य रूपस्य कालेन सह सम्बन्धिभिन्न-सम्बन्धाभावात् ।

तदुक्तं भगवता सूत्रकृता । ''समवायाभ्युपगमाच्च साम्यादन-वस्थितेः'' इति । हेतोः पक्षसपक्षयोरिव काले घटरूपमिति-प्रतीतिरूपविपक्षेपि सत्त्वसाम्यात्साध्येनैव सम्बन्ध इति व्यवस्थित्य-भावादित्यर्थः ।

न्यायदीपः

नव्यास्त्वित्यादिनोक्तमाह ।। **तथापि मण्युक्तमिति** ।। **गुण्यादिनेति** ।। क्रियावदादिरादिपदार्थः । भ्रमबुद्धिषु बाधवारणाय ।। **यथार्थेति** ।। आरोपित-सम्बन्धविषयत्वेन अर्थान्तरवारणाय वा यथार्थेत्युक्तिः । गुणगुण्यादिसमूहा-लम्बने बाधनिरासाय ।। **विशिष्टेति** ।। विशेषणत्वावगाहीत्यर्थः । स्वरूप-सम्बन्धेनार्थान्तरवारणाय साध्ये सम्बन्धिभिन्नेत्युक्तिः । आद्ये हेतौ निर्विकल्पकादावव्यभिचाराय विशिष्टेति विशेषणम् । अभाववद्भूतलमिति बुद्धावव्यभिचाराय ।। **भावमात्रविषयकेति** ।। ज्ञातो घट इत्यादिबुद्धाव-व्यभिचाराय ।। **निर्विषयकेति** भावविशेषणम् ।। **इतरेति** ।। इतरनिरूप-णेनानिरूप्यविशेष्यविशेषणविषयकबुद्धित्वादित्यर्थः । अभाववद्भूतलं ज्ञातो घट इत्यादिबुद्धावव्यभिचाराय इतरनिरूपणानिरूप्येति । निरूपणं नाम ज्ञानमभिलपनं वा ।। **इत्यादीति** ।। इदानीमाकाशः वीणायां शब्द इत्यादि-प्रतीतिरादिपदार्थः ।। **व्यभिचारादिति** ।। द्वयोरपि हेत्वोरिति भावः ।

उक्तप्रतीतौ साध्याभावं व्यनक्ति ।। **त्वन्मत इति** ।। स्वमते कालेन सह सर्वस्य वस्तुमात्रस्य संयोगे बाधकाभावात् त्वन्मत इत्युक्तिः । संयोगस्य सम्बन्धिना भिन्नाभिन्नत्वेन भिन्नत्वस्यापि सत्त्वात् ।

ननु बुद्धित्वादित्यस्य प्रत्यक्षत्वादित्यर्थ इति चेत् तथापि तादृशोपनीत-प्रत्यक्षबुद्धौ व्यभिचारात् । नच लौकिकप्रत्यक्षबुद्धित्वादिति तदर्थ इति वाच्यम् । सुरभिचन्दनमित्याद्यलौकिकविशिष्टबुद्धौ भागासिद्धेः । तदन्य-विशिष्टबुद्धिपक्षीकारे चार्थान्तरता । विशिष्टबुद्धिमात्रस्यैव तादृशसम्बन्ध-विषयकत्वे विवादात् । एवं सति निर्विषयकेति विशेषणवैयर्थ्यापत्तेश्च । ज्ञातो घट इत्यादिबुद्धावुपनीतज्ञानादिविशिष्टबुद्धेरलौकिकत्वादेव व्यभिचारा-प्रसक्तेः ।

न च ज्ञानसत्त्ववेलायामात्मा ज्ञात इति वर्तमानविशिष्टात्मबुद्धौ दोषवशात्समवायसम्बन्धाभानेन विषयविषयिभावमात्रभानं तत्राव्यभिचाराय निर्विषयकेत्युक्तिरिति वाच्यम् । एवमपि रूपं समवेतमित्यादि-समवायविशिष्टबुद्धौ त्वन्मते व्यभिचारापरिहारात् ।।

न च समवायासिद्धिदशायां तत्प्रतिसन्धानं नेति वाच्यम् । आपाततः प्रतीतेः सम्बन्धे व्यभिचारं पश्यतो व्याप्तिग्रहवैमुख्येन तद्ग्रहासम्भवादिति वक्ष्यमाणदोषात् । वस्तुगत्या व्यभिचारजन्यानुमितेर्भ्रमत्वावश्यम्भावाच्च । विषयाबाधस्याद्याप्यसिद्ध्या विषयाबाधात् प्रमात्वमित्यस्यापि अयोगाच्चेति भावः ।

।। **तदुक्तमिति** ।। समवायसाधकहेतोरनैकान्त्यमित्येतत् समयपादे वैशेषिकाधिकरणे उक्तमित्यर्थः । ननु कथमेषोऽर्थः सूत्राक्षराल्लब्ध इत्यतः पूर्वभागस्य समवायाभ्युपगमाच्च वैशेषिकमतमसमञ्जसमिति व्यक्तमित्युपेत्य सुधाद्यनुक्तमुत्तरांशस्यार्थान्तरं स्वयं व्यनक्ति ।। **हेतोरिति** ।। सूत्रस्य विश्वतोमुखत्वान्नानेकार्थत्वं दोषः, प्रत्युत गुण एवेति भावः ।

तर्कताण्डवम्

किञ्च समवायसिद्ध्यनन्तरमपि समवायेतरसम्बन्धिभिन्नसम्बन्ध-विषया इत्यपि सुसाधम्, एवं तत्सिद्ध्यनन्तरं तदुभयेतरसम्बन्धिभिन्न-सम्बन्धविषया इत्यपि सुसाधम्, एवं तत्सिद्ध्यनन्तरं तत्त्रितयेतर-सम्बन्धिभिन्नसम्बन्धविषया इत्यपि सुसाधमिति सम्बन्धानन्त्य-प्रसङ्गः ।।

एतदप्युक्तं ''अनवस्थितेः'' इति । साध्ये सम्बन्धिभिन्नेति-वत्सम्बन्धिसमवायभिन्नेत्यपि विशेष्टुं शक्यत्वसाम्यात्सम्बन्धानन्त्य-प्रसङ्गादित्यर्थः ।।

अपि च त्वदभिमते पटस्तन्तुसमवेत इति विशिष्टज्ञाने व्यभिचारः । तन्तुपटयोरिव समवायिसमवाययोरपि सम्बन्धान्तराङ्गीकारे त्वनवस्था । न च समवायस्य सिद्धौ व्यभिचारः किं करिष्यति असिद्धौ कानैकान्त्यमिति वाच्यम् । आपाततः प्रतीते सम्बन्धे व्यभिचारं पश्यतः व्याप्तिग्रहे वैमुख्येन तद्ग्रहासम्भवात् । अन्यथा तव निर्विकल्पकसाध्यके विशिष्टप्रत्ययत्वादिति हेतौ विशिष्टपदं व्यर्थं स्यात् एतदप्युक्तमनवस्थितेरिति । अर्थस्तु प्रथमपक्षवद्द्रष्टव्यः ।

न्यायदीपः

बुद्धिपदं लौकिकप्रत्यक्षपरमतो न दोष इत्यतो दोषान्तरं तर्कपराहतिमनुमानस्याह ।। **किञ्चेति** ।। समवायसिद्ध्यसिद्धिभ्यां तर्कपराहतेरपहतिरिति त्वापातत इत्यादिग्रन्थेन निरसिष्यत इति भावः ।। **समवायेतरेति** सम्बन्धविशेषणम् ।। **समवायानन्त्येति** ।। द्वित्वसमवायसिद्ध्यनन्तरमपि तद्भिन्नेत्यपि सुवचत्वादिति भावः ।

सुधोक्तं व्यभिचारमेवाह ।। **अपि चेति** ।। तन्तुसमवायविशेषणकपटविशेष्यकज्ञान इत्यर्थः । सुधोक्ते एव शङ्कोत्तरे आह ।। **न चेत्यादिना** ।। समवायस्यान्यनिरूपणनिरूप्यत्वाद्धेतावन्यनिरूपणानिरूप्येत्युक्तत्वात् न व्यभिचार इति चेत् । आद्यहेत्वभिप्रायेणैवैतद्ग्रन्थप्रवृत्तेः । अत एव सुधोक्तव्यभिचारस्य पश्चादुक्तिः ।। **व्यर्थमिति** ।। जात्यादिविशिष्टप्रत्ययो विशेषणज्ञानजन्यः विशिष्टप्रत्ययत्वादित्यत्र विशिष्टपदस्य निर्विकल्पके व्यभिचारवारणार्थत्वात् । तत्रापि निर्विकल्पकस्य सिद्धौ व्यभिचारः किं करिष्यति, असिद्धौ तु कानैकान्त्यमिति सुवचत्वादिति भावः ।। **प्रथमपक्षवदिति** ।। काले घटरूपमिति प्रतीतिरूपेतिपदस्थाने पटस्तन्तुसमवेत इति विशिष्टज्ञानरूपेति बोध्यम् । सुधायां तु ''अनवस्थितेरिति सूत्रमस्मिन् पक्षे कथं

इत्थम् । यदि व्यभिचारपरिहाराय समवायस्यापि समवायान्तरमुपेयते तदाऽनवस्थितिः'' इति योजितम् ।

तर्कताण्डवम्

किञ्चाभाववद्भूतलमित्यभावविशिष्टबुद्धिवत् ज्ञातो घट इष्टो घट इति सविषयकज्ञानादिविशिष्टबुद्धिवच्च गुणादिविशिष्टबुद्धेरपि स्वरूप-सम्बन्धेनैवोपपत्त्या अप्रयोजकत्वम् ।

अन्यथा हि ज्ञानेच्छाद्वेषकृतीनां स्वविषयैः सह विशिष्टसत्य-बुद्धयः, असंयुक्तयुतसिद्धानां परस्परं विशिष्टसत्यबुद्धयो वा, सम्बन्धिभिन्नसम्बन्धविषयाः युतसिद्धविषयकविशिष्टबुद्धित्वात् दण्डीति बुद्धिवदित्यनुमानेन युतसिद्धानां ज्ञानादीनां स्वविषयैः सह दण्डस्य पुरुषेणेव सम्बन्धिभिन्नसम्बन्धः; अयुतसिद्धानां गुणादीनां तु गुण्यादिभिः सहाभावस्य भूतलेनेव स्वरूपसम्बन्ध इति विपरीतं स्यात् ।

न्यायदीपः

हेतुद्वयस्याप्यप्रयोजकत्वं क्रमाद्दृष्टान्तोक्तिपूर्वकमाह ।। **किञ्चेति** ।। गुणादिविशिष्टबुद्धेरपीत्यपिपदस्य भावमात्रविषयकत्वेपि इतरनिरूपणा-निरूप्यविशिष्टबुद्धित्वेपीत्यर्थः । अनुकूलतर्कादेः अभावादिति भावः ।

अनुकूलतर्कादेरभावेप्यभावादिविशिष्टबुद्धिव्यावर्तकविशेषणयुक्तहेतु-मात्रेणोक्तरूपसाध्यसाधनं चेत्तर्हि गुणादिविशिष्टबुद्धिव्यावर्तकविशेषणयुक्तहेतु-मात्रेणाप्य[1]भावादुक्तरूपसाध्यसिद्ध्यापातेन गुणादिविशिष्टबुद्धौ स्वरूप-सम्बन्धोन्यत्राभावादिविशिष्टबुद्धावतिरिक्तसम्बन्ध इति स्यादित्याह ।।

१. ''अभावादौ'' इति स्यात् ।

अन्यथेति ।। अभावादिविशिष्टबुद्धिव्यावर्तकविशेषणयुक्तहेतुमात्रेणोक्त-रूपसाध्यसिद्धावित्यर्थः । वैपरीत्यं स्यादित्यन्वयः । वैपरीत्यं व्यनक्ति ।। **ज्ञानेति** ।। ज्ञातो घटः, [1]दृष्टो घटः, द्विष्टः, कृत, इति ज्ञानादि-विशेषेणकघटादिविशेष्यकयथार्थबुद्धय इत्यर्थः । आरोपितसन्बन्धविषयकत्वे-नार्थान्तरवारणाय सत्येत्युक्तिः ।।

अभावादिविशिष्टबुद्धावपि पक्षनिर्देशमाह ।। **असंयुक्तेति** ।। **परस्पर-विशिष्टेति** ।। अभाववद्भूतलं डित्थोयं ज्ञातो घट इत्यादिविशिष्टयथार्थबुद्धयो वेत्यर्थः ।

।। **ज्ञानादीनामिति** ।। ज्ञानेच्छाद्वेषकृत्यभावनाम्नामित्यर्थः ।। **स्वविषयैरिति** ज्ञानाद्यपेक्षयोक्तम् । अभावादेस्तु स्वविशेष्येण सहेति ज्ञेयम् ।।

तर्कताण्डवम्

एवमसंयुक्तविषयकसत्यविशिष्टबुद्धयः सम्बन्धिभिन्नसम्बन्ध-विषयाः विशिष्टबुद्धित्वात् दण्डीति बुद्धिवदित्यनुमानेन गुणादीनां गुण्यादिभिर्ज्ञानादीनां ज्ञेयादिभिरभावस्य चाधिकरणेन सह दण्डस्य पुरुषेणेव सम्बन्धिभिन्नसम्बन्धः सिद्ध्येत् । एवं च सम्बन्धिभिन्न-सम्बन्धविषयत्वे विशिष्टबुद्धित्वस्यैव तन्त्रतया [2]लाघवेनैकरूप्यं च भवति ।

एतदप्युक्तं ''अनवस्थितेः'' इति । युतसिद्धत्वसाम्येपि ज्ञाना-दीनां स्वविषयैः सह स्वरूपसम्बन्धः चैत्रदण्डयोस्तु संयोगः; एवमयुतसिद्धत्वसाम्येपि भूतलाभावयोः स्वरूपसम्बन्धः गुणगुण्यादेः समवायः इत्यादित्वदुक्तव्यवस्थितिभङ्गादित्यर्थः ।।

१. 'इष्ट'' इति स्यात् । २. 'लाघवमैक' इति पाठान्तरम् ।

न्यायदीपः

एवं वैपरीत्यमापाद्य सर्वत्रैकरूप्यलक्षणमतिप्रसङ्गान्तरमप्याह ।। **एवमिति** ।। अन्यथेत्यनुकर्षः । यथा वैपरीत्यं तथा हेतौ विशेषमात्रानुपादानेन सर्वत्रैकरूप्यमपि स्यादित्येवंशब्दार्थः । हेतोरप्रयोजकत्वं निरस्य फलितमाह ।। **एवं चेति** ।।

तर्कताण्डवम्

नापि गुणक्रियाजातिविशिष्टसत्यबुद्धयः विशेषणसम्बन्धविषयाः विशिष्टबुद्धित्वात् दण्डीति बुद्धिवत् । ज्ञातो घट इत्यादिबुद्धिरपि स्वरूपसम्बन्धविषयेति न व्यभिचारः । न चात्रापि तेनैवार्थान्तरं स्वरूपाणामनन्ततया गौरवेण लाघवादेकस्यैव सम्बन्धस्य सिद्धेरिति वाच्यम् । समवायस्वरूपस्य च तद्वतसम्बन्धत्वस्य कल्पनादपि धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायेन सिद्धानां गुणादिस्वरूपाणां भूतलघटाभावादौ कृप्तस्य सम्बन्धत्वरूपधर्ममात्रस्य कल्पने लाघवात् ।।

अन्यथा अभावमात्रविशिष्टसत्यबुद्धिं पक्षीकृत्य सम्बन्धविषयत्वसाधने लाघवादभावमात्रानुगत एको नित्यः सम्बन्धः सिध्येत् ।।

एवमभावावयविगुणक्रियाजातिविशिष्टसत्यबुद्धिं ज्ञातो घट इत्यादिबुद्धिं च पक्षीकृत्य सम्बन्धविषयत्वसाधने लाघवादभावे गुणगुण्यादौ ज्ञानेच्छादौ चैको नित्यः सम्बन्धः सिद्ध्येत् । एतदप्युक्तं ''अनवस्थितेः'' इति । लाघवतर्कानुग्रहस्य धर्मिकल्पनातो वरं धर्मकल्पनेति न्यायस्य च साम्येपि अभावादौ स्वरूपसम्बन्धः गुणादौ तु तदन्य इति व्यवस्थित्ययोगादित्यर्थः ।

न्यायदीपः

उच्यत इत्यादिना **मणि**कृता सिद्धान्तितमनुमानान्तरं च निराह ।। **नापीति** ।। पूर्ववदेव सत्यपदकृत्यं बोध्यम् । तदुक्तरीत्यैव परिष्करोति ।। **ज्ञात इत्यादिना** ।। **एकस्येति** ।। सकर्तृत्वानुमाने एकस्य कर्तुरिवेति भावः । अन्यथोपपत्तावपि लाघवतर्कानुसरणे प्रतिबन्दीरूपातिप्रसङ्गं चाह ।। **अन्यथेति** ।। मात्रपदं प्रागभावादिसर्वाभावपरम् ।

नन्वत्र विशिष्टबुद्धित्वं सम्बन्धबुद्धित्वं वा सविकल्पकबुद्धित्वं वा द्वयोरपि सम्बन्धविषयबुद्धिपर्यवसानेन साध्याविशेष इति चेन्न विशेषणधी-जन्यबुद्धित्वं वा व्यावृत्तिबुद्धिजनकबुद्धित्वमित्युपपत्तेः । अन्यथा तव प्रयोगेप्यस्य [१]दोषसाम्यात् । विशेषणधीजन्यत्वस्य अविशिष्टव्यावृत्तिधी-जनकत्वस्य च बुद्धेः सम्बन्धविषयकत्वज्ञानं विना दुर्ज्ञानत्वं चेत्तावाप्येष दोषः समान एव । विशेषणताबुद्धिगोचरबुद्धित्वेन तद्गृहे च उपजीव्यत्वेन तस्यैव हेतुत्वमस्त्वित्येतदपि समानमिति भावः ।

तर्कताण्डवम्

ननु तथात्वे पटाभाववति घटवति घटाभावधीः स्यात् । अभाव-मात्रे वैशिष्ट्यस्यैकत्वात् । एवं घटादेः स्वविषयकज्ञानादिना नित्यसम्बन्धवत्त्वे आत्मत्वं स्यादिति चेत् । तर्हि तवापि स्पर्शवति रूपाभाववति वायौ रूपधीः स्यात् । समवायस्यैकत्वात् । एवं घटादे-रप्यात्मत्वं स्यात् । घटत्वसमवायस्यैव ज्ञानसमवायत्वादिति समम् ।।

यदि च वायौ रूपसमवायस्य सत्त्वेपि रूपेण सह विशेषणता-विशेषस्वरूपसम्बन्धाभावात् रूपाऽप्रतीतिः । तर्हि भूतले घटसत्त्व-

---

१. ''दोषस्य'' इति स्यात् ।

काले घटाभाववैशिष्ट्यस्य सत्त्वेपि घटाभावेन सह विशेषणता-विशेषाभावात् घटाभावाप्रतीतीतिरिति समम् ।

ननु रूपसमवायवत्यपि वायौ रूपाप्रतीतिरधिकरणस्वभावात् । न चात्रतादृशः स्वभावः कल्प्यः । घटापसरणानन्तरं तत्रैव घटाभावप्रतीतेः । वायौ तु न कदापि रूपप्रतीतिरिति चेत् । तर्हि घटे श्यामतादशायां भविष्यद्रक्तरूपसमवायस्य सत्त्वेन तदा रक्तरूपधीः स्यादिति समम् । न चात्र वायाविवाधिकरणस्वभावः कल्प्यः । तत्रैव कदाचिद् रक्तरूपप्रतीतेः ।

न्यायदीपः

प्रतिबन्दीरूपेणाभावादिविशिष्टबुद्धावप्येकनित्यसम्बन्धापादनमयुक्तम् । तत्र बाधकसत्त्वादिति भावेन **मण्युक्तमेव** बाधकमाशङ्कते ।। **नन्विति** ।। तथात्वे अभावादावेकनित्यसम्बन्धसत्त्वे इत्यर्थः । घटाभावसम्बन्धसत्त्वोपपादनायोक्तम् **पटाभाववतीति** ।। तादृशस्थले घटाभावबुद्धेरिष्टत्वनिरासायोक्तम् **घटवतीति** ।। **आत्मत्वं स्यादिति** ।। आत्मनीवेति भावः । अतः समवायत्याग एव युक्त इति भावेन प्रतिबन्द्या समाधत्ते ।। **तर्हि तवापीति** ।। गुणादावेकनित्यसम्बन्धवादिनोपीत्यर्थः ।

''वायौ रूपसमवाये सत्यपि रूपात्यन्ताभावोस्ति । न घटे । कथमेवम् । अधिकरणस्वभावादबाधितरूपनिरूपप्रतीतेश्चेति'' **मण्युक्तमाशङ्क्य** निराह ।। **ननु रूपसमवायवत्यपीति** ।। अयोग्यत्वरूपाधिकरणस्वभावादित्यर्थः ।। **न चात्रेति** ।। घटाभावाधिकरणभूतलादावित्यर्थः । तथात्वे वायौ रूपस्येव भूतले घटाभावधीः कदापि न स्यादिति भावेनाह ।। **घटापसरणेति** ।। **कदाचिद्रक्तरूपप्रतीतेरिति** ।। वायाविव तत्राप्ययोग्यातालक्षणाधिकरणस्वभावकल्पने च सा न स्यादिति भावः ।।

तर्कताण्डवम्

ननु तदा रक्तरूपाभावात्तदप्रतीतिः । लौकिकप्रत्यक्षे विषयस्यापि हेतुत्वात् । तव तु घटापनयनकाले सतो घटाभावस्य घटोपनयन-कालेपि सत्त्वेन तत्प्रतीतिर्दुर्वारा । न हि घटसत्त्वकाले घटाभावोऽन्यत्र गतः । अमूर्तत्वात् । नापि नष्टः । नित्यत्वादिति चेन्न । मया घटोप-नयापनयकाले भूतले घटसंयोगतदभावयोरेव स्वीकृतत्वेन अपनयकाले सतः संयोगाभावस्योपनयनकाले अभावात् ।।

न्यायदीपः

ननु आमघटे श्यामतादशायां रक्तरूपधीरुपनीतप्रत्यक्षरूपापाद्यतेऽथ लौकिकप्रत्यक्षरूपा । नाद्यः । इष्टापत्तेः । अन्त्ये विषयसत्त्वस्य तत्र हेतुत्वेन तदभावादेव तत्र रक्तरूपाप्रत्यक्षतोपपत्तेरिति भावेन **पक्षधरा-द्युक्तमाङ्क्य** निराह ।। **नन्वित्यादिना** ।। मयाप्येवं वक्तुं शक्यमित्यत आह ।। **तव त्विति** ।। अभावविशिष्टबुद्धावप्येकनित्यसम्बन्धवादिन इत्यर्थः ।

।। **काल इति** ।। कालयोरित्यर्थः ।। **स्वीकृतत्वेनेति** ।। ''एतद्घटैतद्भूतलसंसर्गाभावस्यापि यथासम्भवं प्रागभावादिष्वन्तर्भावादिति'' तत्त्वसङ्ख्यानटीकोक्तेः । तथैव **वर्धमानाद्युक्तेश्च** । विवृतश्चायमर्थो न्यायामृते असतो निषेधप्रतियोगित्वसमर्थनवादे इति भावः ।।

।। **अभावादिति** ।। ननु उपनेष्यमाणघटसंयोगस्य पूर्वं सतोऽभावस्य प्रागभावत्वेन पश्चात् तदभावेपि प्राक्सतो घटस्यापयनकाले सतोऽभावस्य घटसंयोगध्वंसरूपत्वेन तस्य घटोपनयकालेपि सत्त्वात् कथमप्रतीतिरिति चेत् न । प्राचीनघटसंयोगध्वंसमादायेदानीं घटवत्यपि प्रतीत्यापादन इष्टापत्तेः । पूर्वं घटोत्रस्थ एवान्यत्रापनीतः पुनरत्रोपनीत इति प्रतीत्यान्यत्र नीत इति प्रतीतेरेव तत्प्रतीतित्वादिति भावः ।।

तर्कताण्डवम्

किञ्च त्वद्रीत्याश्रयणेपि किमत्यन्ताभावस्य धीरापाद्यते उत्पाद-विनाशशीलस्य तुरीयाभावस्य वा । नाद्यः । तस्य त्वत्पक्षे घटकालेपि स्वरूपात्मकप्रत्यासत्त्या तत्र सत्त्वेन तत्प्रतीतेर्दुर्वारत्वात् ।

नान्त्यः । श्यामतादशायां रक्तरूपस्येव घटसत्त्वकाले तुरीया-भावस्यासत्त्वेन साम्यात् । रक्तरूपस्यापि श्यामतादशायामेव जपा-कुसुमादौ सत्त्वाच्च । इह नास्तीति चेन्न । विशेषणे तस्य विशेष्येण संसर्गे च सति विशेष्ये विशेषणाभावस्यासम्भवात् । नहि प्रतियोगिनि रूपे प्रतियोगितावच्छेदके संसर्गे च सति रूपसंसर्गाभावः सम्भवी ।।

न्यायदीपः

नन्वस्त्वेवं भूतले घटो नेति धीस्तत्संयोगाभावविषयेति भवदभिमते दोषाभावः, तार्किकमते भट्टादिमते च स्यादेव दोष इत्यत आह ।। **किञ्चेति** ।। **त्वद्रीत्येति** ।। **मणि**कृद्रीत्येत्यर्थः ।।

ननु प्राचीनरीत्यापि इह भूतले घटो नास्तीति तत्संयोगो निषिध्यत **इत्युदय**नोक्तेः उत्पादविनाशशीलोपि प्रागभावादित्रितयान्यश्चतुर्थः कश्चित्संसर्गाभावोस्तीति मतेनाह ।। **उत्पादविनाशेति** ।। उक्तं च **वर्धमानेन** ''प्रतियोगिभेदेनेव प्रतियोगितावच्छेदकभेदेनाप्यभावभेदात् संयुक्तघटाभावोयं विशिष्टान्तराभाववदुत्पादविनाशशीलोन्य एवेति'' ।।

।। **स्वरूपात्मकेति** ।। एतेन तदानीन्तनयोर्विशिष्टप्रत्ययजनन-योग्यत्वाभावात् न स्वरूपप्रत्यासत्तित्वमिति निरस्तम् । द्वयोः स्वरूपसत्त्वे प्रत्यासत्तित्वं नेत्यस्य रिक्तवचनत्वात् ।।

यदुक्तं **वर्धमानेन** घटात्यन्ताभावस्य भूतलेन सह तत्संयोगध्वंसादिरेव सम्बन्ध इति न तदा प्रतीत्यापत्तिरिति । तन्न । अभावाधिकरणयोः सम्बन्धान्तरमन्तरेण तदुपश्लिष्टस्वभावत्वरूपक्लृप्तसम्बन्धत्यागेनार्थ-संयोगध्वंसादेः सम्बन्धत्वकल्पने आवश्यकतत्संयोगध्वंसादेरेव तद्धी-विषयत्वोपपत्तेः अन्यथा घटस्य कपालेष्वत्यन्ताभावः स्यात् । घटभावे त्वाश्रयाश्रयिभावध्वंसादिरूपसम्बन्धाभावादप्रतीत्युपपत्त्या बाधकाभावात् । तथा च घटाद्यत्यन्ताभावस्याप्याकाशाद्यत्यन्ताभावस्येव केवलान्वयित्वा-पत्तेरिति भावः ।।

यत्तु तदा रक्तरूपाभावादप्रतीतिरिति पूर्वमुक्तं तन्न । घटे श्यामतादशायां जपाकुसुमे रक्तरूपभावात् घटो रक्त इति धीरवर्जनीयैव । समवायस्यैकत्वेन श्यामरूपसमावायस्य घटे सत्त्वे तदानीमेवान्यत्र विद्यमानरक्तरूपसमवाय-स्यापि सत्त्वादिति भावेनाह ।। **रक्तरूपस्यापीति** ।। **इहेति** ।। घटे रक्तरूपं नास्तीति चेदित्यर्थः ।। **विशेषण इति** ।। सतीत्यन्वयः ।। **तस्य** विशेषणस्य ।। **प्रतियोगितावच्छेदक इति** ।। रूपं न समवेतमित्यत्र संसर्गस्यावच्छेदकत्वादेवमुक्तम् ।।

तर्कताण्डवम्

किञ्च रूपसमवायवतोपि वायो रूपराहित्यस्वभाववत् प्रतियोगि-मदधिकरणस्यापि प्रतियोगिकाले स्वस्मिन् तत्प्रतियोगिकाभाव-विशिष्टप्रमित्यजनकत्वस्वभावः कल्प्यताम् ।

अपिच यथा तव चत्वरीयाभावगेहस्वरूपयोर्न प्रतियोगिकाले सम्बन्धत्वं तदाऽभावाप्रतीतेः, किन्तु कदाचिदेव, तथा घटसत्त्वकाले वैशिष्ट्यस्य सत्त्वेपि न तदा तस्य सम्बन्धत्वमिति न घटवति घटा-भावधीप्रसङ्गः ।

न्यायदीपः

पूर्वं पररीतिमाश्रित्य प्रतिबन्द्या अभावप्रतीत्यापादनमयुक्तमित्युक्तम्, इदानीं भूतलाभावयोः नित्यसम्बन्धसत्त्वेपि घटदशायामप्रतीत्युपपादकमाह ।। **किञ्चेति** ।। प्रतियोगिकाल इत्याद्युक्त्या न चात्र तादृशः स्वभावः कल्प्यः घटापसरणानन्तरं घटाभावप्रतीतेरित्युक्तदोषोऽपास्तो ध्येयः ।।

अत्यन्ताभावस्वीकारवादिना त्वया भूतले घटाभावस्य घटदशायां सतोप्यप्रतीतेरुपपादकत्वेन प्रतियोगिदेशान्यदेशत्वं वा तत्संयोगध्वंसादिरूपो वा सम्बन्धो नेत्युच्यते यथा, तथैवात्र नित्यसम्बन्धपक्षेप्यस्तु तथा च घटापसरणानन्तरमभावधीर्न स्यादितिशङ्कानवकाशोपीत्याह ।। **अपि चेति** ।। **चत्वरीयः** ।। चत्वरनिष्ठो योऽभावः यच्च गृहं तयोर्ये स्वरूपे तयोर्ग्रहे पटादिलक्षणप्रतियोगिकाले सम्बन्धत्वं नास्ति यथा तथा कादाचित्क-प्रतीत्यन्यथानुपपत्त्या प्रकृतेप्यस्त्वित्यर्थः ।

तर्कताण्डवम्

ननु अभावस्य स्वाश्रयेण नित्यसम्बन्धश्चेत् ध्वंसस्यापि स्वाश्रय-नाशेन नाशापत्त्या घटोन्मज्जनं स्यात् । कार्यनाशं प्रति नित्य-सम्बन्धवत्कारणनाशरूपं समान्यमेव तन्त्रम् । न तु तद्विशेष-समवायिनाशः । असति बाधके सामान्यस्य त्यागायोगात् । किञ्च समवायत्वं न जातिः, किं तु वैशिष्ट्यान्यनित्यसम्बन्धत्वमिति कल्पनीयत्वाद्गौरवमिति चेन्न । तथा सति ध्वंसातिरिक्ताभावे वैशिष्ट्याभ्युपगमे बाधकाभावात् । नचैकस्मिन्नभावे स्वरूपसम्बन्ध-श्चेदभावान्तरेपि तथा । भावेपि ज्ञातो घट इत्यादौ स्वरूपस्य सम्बन्धत्वे [१]रूपे घट इत्यादावपि तथात्वापत्तेः ।।

१. "रूपी" इति स्यात् ।

न्यायदीपः

एवमभावविशिष्टबुद्धावप्येको नित्यः कश्चित्सम्बन्धः सिद्धः स्यादित्युक्त-प्रतिबन्द्या घटदशायामपि घटाभावाधीः स्यादिति **मण्या**द्युक्तं बाधकं निरस्येदानीं बाधकान्तरमप्याशङ्क्य च निराह ।। **नन्वभावस्येत्यादिना** ।।

ननु आश्रयनाशहेतुककार्यनाशे समवायिकारणनाश एव प्रयोजकः । पटादौ तथा दर्शनात् । एवं च ध्वंसरूपकार्यनाशः स्वनिरूपितनित्य-सम्बन्धयुक्तस्वाश्रयस्य नाशमात्रेण कथं चोद्यते । न हि विशिष्टबुद्धित्वहेतुना अभावविशिष्टबुद्धौ सिद्ध्यन् समवायो भवति । अयुतसिद्धत्वाभावात् । किं तु तदन्यः कश्चिदेव । तथा च कथमेवमापादनमित्यत आह ।। **कार्यनाशं प्रति हीति** ।। न केवलं त्यागे कारणाभावो, गौरवं चास्तीत्याह ।। **किञ्चेति** ।। **न जातिरिति** ।। एकव्यक्तित्वादिति भावः । अभावादिविशिष्टबुद्धौ यद् वैशिष्ट्यं तदन्यनित्यसम्बन्धत्वमित्यर्थः ।। **न चेति** ।। अभावान्तरेपि तथा न चेत्यन्वयः । कुत इत्यत आह ।। **भावेपीति** ।। तथात्वापत्ते-रित्यन्वयः । युतसिद्धत्वायुतसिद्धत्वादिना भावपदार्थेषु वैषम्यं चेदभावेष्वपि कार्यत्वाकार्यत्वादिना वैषम्यमिति समम् ।

ननु ज्ञानादेर्घटेन नित्यसम्बन्धे सदा घटप्रकाशः स्यादिति चेत् । रूपादेर्घटादिना नित्यसम्बन्धे सदा घटे श्यामरक्तरूपादिधीप्रसङ्गः स्यादिति समम् । श्यामरूपादेः कादाचित्कत्वान्न दोष इति चेत् । ज्ञानादेरपि तथात्वादिति तुल्यम् । किं च यथाकथञ्चिद् बाधकवशाद्भावे द्वैरूप्यं चेदभावेप्युक्तादेव बाधकाद् द्वैरूप्यमस्त्विति सामान्यमेवेति भावः ।।

तर्कताण्डवम्

किञ्च यदि लाघवान्नित्यसम्बन्धिकारणनाशः कार्यनाशे तन्त्रं तर्हि

ततोपि लाघवान्नित्यसम्बन्धिनाश एव तत्र तन्त्रं स्यात् । न चेष्टापत्तिः ।

घटनाशेन पटरूपनाशापत्तेः । भवति हि पटरूपाहेतुरपि घटः पटरूपसमवायी । एवं सम्बन्धस्य नाश्यत्वे सम्बन्धत्वमेव तन्त्रम्, लाघवात्, न तु तद्विशेषः संयोगत्वमिति समवायस्यापि नाशः स्यात् ।।

यदि च समवायरक्षार्थं तत्र कारणत्वादिकं विशेषणं तर्हि वैशिष्ट्यरक्षार्थं वैशिष्ट्यान्यत्वविशेषणमप्यस्तु । साम्यात् ।

केचित्तु समवायिकरणनाशस्य हेतुत्वकल्पने समवायत्वं न प्रविष्टम् । येन गौरवं स्यात् । किं त्वनतिप्रसक्तमुण्डितसमवाय-व्यक्तिमात्रमित्याहुः ।।

न्यायदीपः

नन्वयुतसिद्धभावमात्रे अस्त्यैकरूप्यं, संसर्गाभावमात्रे नास्त्यैकरूप्यं, ध्वंसातिरिक्ताभाव एव नित्यसम्बन्धोपगमादित्यतो, अभावमात्र एवास्तु नित्यसम्बन्धः, न चोक्तदोषः, कार्यनाशं प्रति समवायिकारणनाशस्यैव प्रयोजकत्वाद्गौरवस्य चाकिञ्चित्करत्वादिति भावेन कार्यनाशं प्रति हीत्यादिनोक्तं निराह ।। **किञ्चेति** ।। **नित्यसम्बन्धीति** ।। नित्यो यः सम्बन्धः तद्युक्त इत्यर्थः ।। **ततोपि लाघवादिति** ।। कारणपदत्यागादिति भावः ।।

कार्यनाशे समवायिनाशस्य तन्त्रत्वमनुक्त्वा नित्यसम्बन्धिनाशस्यैव लाघवेन प्रयोजकत्वस्वीकारेऽतिप्रसङ्गान्तरं चाह ।। **एवमिति** ।। लाघवमनुसृत्य विशेषत्यागेन सामान्यादरे सति कार्यनाशे नित्यसम्बन्धि-

नाशवत् सम्बन्धनाशे सम्बन्धत्वमेव तन्त्रं स्यादित्यर्थः ।। **तत्रेति** ।। नाशप्रयोजकसम्बन्धत्वे कारणीभूतसम्बन्धत्वं समवायान्यसम्बन्धत्वमिति विशेषणं यदीत्यर्थः ।। **वैशिष्ट्येति** ।। अभावविशिष्टबुद्धिविषयीभूत-वैशिष्ट्यान्यसम्बन्धत्वमेव सम्बन्धनाशे तन्त्रमित्यस्तु । एवं चाभावेपि नित्यसम्बन्धः स्यादेवेति भावः ।।

कार्यनाशे समवायनाशो हेतुरित्यत्र किञ्च समवायत्वमित्यादिना यद्गौरवमुक्तं तदुद्धारं प्रकारान्तरेणाह ।। **केचित्त्विति** ।। समवायत्वाप्रवेशेपि सम्बन्धत्वेनाप्रवेशे किञ्चिद्युक्तकारणनाशस्तन्त्रमित्यपि प्राप्त्यातिप्रसङ्गेन नित्यकारणभूतसम्बन्धवन्नाशस्तन्त्रमित्येव वाच्यत्वात् किमनेनेत्यरुचिबीज-मत्रेति ध्येयम् ।।

तर्कताण्डवम्

एतेनैव सत्यलौकिकप्रत्यक्षजातिगुणक्रियाविशिष्टबुद्धयः विशेषण-सम्बन्धनिमित्तकाः सत्यलौकिकप्रत्यक्षविशिष्टबुद्धित्वात् । दण्डीति सत्यलौकिकप्रत्यक्षबुद्धिवत् । अत्र च क्षित्यादौ कर्तैव लाघवा-द्विशेषणसम्बन्धोपि एक एव सिध्यति । अनुगतकार्यस्यानुगतकारण-जन्यत्वात् । स्वरूपसम्बन्धानामननुगतत्वाच्च । अत एव नाप्रयोज-कता । सम्बन्धं विनापि विशिष्टबुद्धौ गवाश्वादावपि तत्प्रसङ्गादिति निरस्तम् । अभावादौ क्लृप्तेन स्वरूपसम्बन्धत्वेनानुगतीकृतानां गुणादिस्वरूपाणामेवानुगतकार्यहेतुत्वोपपत्तेः । तस्मादभावादाविव गुणादावपि धर्मिकल्पनात इति न्यायसाम्येन स्वरूपमेव सम्बन्धः ।

न्यायदीपः

एवमभावविशिष्टप्रतिबन्दीदुरुद्धारेत्यभावस्थल इव क्लृप्तस्वरूपसम्बन्धेनैव

विशिष्टप्रतीत्युपपत्तौ न समवायकल्पनेत्युक्त्वा विशिष्टबुद्धित्वादिति हेतुरप्रयोजक इति निरस्येदानीं ''अथवा सम्बन्धविशेषणनिमित्तका इति साध्य''मित्यादिना **मण्युक्तमनुमानान्तरं** चानूद्य निराह ।। **एतेनेति** ।। स्वरूपसम्बन्धेनैवान्यथोपपत्तिकथनेनेत्यर्थः । निरस्तमित्यन्वयः ।।

हेतौ च सत्यत्वं विशेषणमिति **मण्युक्त्यैव** पक्षेपि तदनुमतमिति भावेन सत्यपदम् । तत् कृत्यं पूर्ववत् । **मणौ** विशिष्टबुद्धय इत्येव पक्षोक्तावप्यत्र पक्षहेतुदृष्टान्तेषु विशिष्टबुद्धिपदं लौकिकप्रत्यक्षपरमिति तट्टीकोक्तेर्लौकिके-त्याद्युक्तिः । अलौकिकप्रत्यक्षे बाधनिरासाय **लौकिकेति** ।। अनुमित्यादौ बाधनिरासाय **प्रत्यक्षेति** ।। निर्विकल्पके तन्निरासाय विशिष्टपदम् । भ्रमे व्यभिचारवारणाय हेतौ सत्यपदम् । साध्यसाधनतावैकल्याय दृष्टान्त-विशेषणानि ।

तावता समवायसिद्धिः कुत इत्यत आह ।। **अत्र चेति** ।। **पक्षधरा-द्युक्तमाह** ।। **क्षित्यादौ कर्तेवेति** ।। अत एवेत्युक्तं हेतूच्छेद(क)बाधकं व्यनक्ति ।। **सम्बन्धमिति** ।।

सम्बन्धनिमित्तका इत्यत्र सम्बन्धस्य निमित्तत्वं किं विषयत्वेनाथ समवायत्वेन आद्ये गुणादिस्वरूपाणामेव केनचिद्धर्मेणानुगतानां तथा हेतुत्वमस्तु । किं समवायेन । अन्त्ये तु समवायत्वं नित्यसम्बन्धत्वं तथा च लाघवेन सम्बन्धत्वेनैव हेतुत्वमस्तु । तच्च स्वरूपसम्बन्ध-साधारणमिति तेनानुगतीकृतानां गुणादीनामेव हेतुत्वमस्तु ।

अवच्छेदकलाघवे व्यक्तिगौरवस्यादोषत्वादिति भावेन निराह ।। **अभावादाविति** ।। आदिपदेन तन्मतसिद्धसमवायविशिष्टबुद्धिपरिग्रहः ।

एतच्च सत्यलौकिकजात्यादिविशिष्टप्रत्यक्षत्वं कार्यतावच्छेदकमुपेत्योक्तम् । वस्तुतस्तु तादृशानुमितित्वादिकमिव तादृशप्रत्यक्षत्वमपि नावच्छेदकं

मानाभावात् । स्वावच्छिन्नकार्यतानिरूपितानुगतैककारणासिद्ध्या अनित्य-प्रमात्वानित्यप्रत्यक्षत्वादेरिव बाधकोपपन्नत्वेनावच्छेदकत्वासम्भवाच्च । न च नित्यैकरूपसम्बन्धरूपसमवाय एवानुगतकारणमिति युक्तम् । अन्योन्या-श्रयापत्तेः । विषयस्य प्रत्यक्षं प्रत्यहेतुत्वस्य प्रामाण्यवादे व्युत्पादनाच्चेति ज्ञेयम् ।।

तर्कताण्डवम्

यत्तु युतसिद्धसम्बन्धिद्वयविषयाणां दण्डादिविशिष्टबुद्धीनामि-वायुतसिद्धसम्बन्धिद्वयविषयाणां अवयविगुणक्रियाजातिविशिष्ट-बुद्धीनामन्योन्यं स्फुटतरविवेकप्रकाशराहित्यरूपं साजात्यमन्यविशिष्ट-बुद्धितो व्यावृत्तमनुभवसाक्षिकम् । तथा च दण्डादिविशिष्टप्रतीतिं प्रति संयोग इव गुणादिविशिष्टप्रत्यक्षप्रतीतिरूपमनुगतकार्यं प्रति निमित्ततया समवायः सिध्यतीति । तन्न ।

तस्य भेदाविषयत्वेन, स्फुटतरविवेकप्रकाशसामग्रीराहित्येन वा, त्वदभिमतसमवायनियामकायुतसिद्धिविषयत्वेन वा, भेदाऽभेद-विषयत्वेन वा, सविशेषाभेदविषयत्वेन वोपपत्तेः ।।

न्यायदीपः

पक्षधराद्युक्तमनूद्य निराह ।। **यत्त्वित्यादिना** ।। **अन्योन्यमिति** ।। अवयवावयविविशिष्टबुद्धेर्गुणादिविशिष्टबुद्ध्या तस्याः जातिविशिष्टबुद्ध्या जातिविशिष्टबुद्धेः गुणविशिष्टबुद्ध्येत्यादिरूपेणान्योन्यं साजात्यमित्यन्वयः ।।

तत्स्वरूपमाह ।। **स्फुटतरेति** ।। विवेको भेदः । तद्विषयकत्वराहित्य-रूपमित्यर्थः । अवयवावयव्यादेरन्योन्यं भेदस्याङ्गुलिद्वयवदप्रतीतेरिति भावः

।। **अन्येति** ।। दण्डीकुण्डलीत्यादिविशिष्टबुद्धीनामन्योन्यं साजात्यमिवेहायुतसिद्धविशिष्टबुद्धीनामंन्योन्यसाजात्येपि दण्डीत्यादिबुद्धितो व्यावृत्तं तादृशबुद्धावविद्यमानं अनुभवसाक्षिकमस्तीत्यर्थः ।

तादृशं साजात्यं अन्यतो व्यावृत्तं गुणक्रियादिविशिष्टबुद्धिगतमनुभवसिद्धमुक्तम् । तत्किं जातिकृतमुत स्फुटतरविवेकप्रकाशराहित्यरूपमेव [१]बाधविषयविशेषकृतं वा । नाद्यः जातित्वे मानाभावात् । तादृशानुमितित्वादिना साङ्कर्यापत्तेश्च । द्वितीये समवायेन विनापि तादृशविशिष्टबुद्धित्वस्योपपत्तेरप्रयोजको हेतुरिति भावेन तादृशविशिष्टबुद्धेः अन्यथासिद्धिमाह ।। **तस्येति** ।। अवयव्यादिविशिष्टबुद्धिगतसाजात्यस्येत्यर्थः । तृतीयं प्रत्याचष्टे ।। **त्वदिति** ।। त्वदभिमता या समवायनियामकायुतसिद्धिरित्यर्थः ।।

ननु नित्यसम्बन्धसम्बन्धित्वमेवायुतसिद्धिरित्यतोऽयावद्द्रव्यभाविगुणक्रियावयव्याद्यभिप्रायेण विषयान्तरमाह ।। **भेदाभेदेति** ।। यावद्द्रव्यभाविगुणाद्याशयेनाह ।। **सविशेषेति** ।।

तर्कताण्डवम्

अभावप्रतियोगिनोर्ज्ञानज्ञेयादीनां च विवेकप्रकाशस्य स्फुटतया न्यायसाम्येन तत्र संयोगापत्तेश्च ।।

अभावाधिकरणयोस्तन्मते सुवर्णतदुपष्टम्भकपीतद्रव्ययोश्च विवेकप्रकाशस्यास्फुटत्वेन न्यायसाम्येन तत्र समवायापत्तेश्च ।।

युतसिद्धेषु संयोगस्येवायुतसिद्धेषु समवायस्यापि न्यायसाम्येन नानात्वापाताच्च । तस्मान्न समवाये प्रमाणमस्तीति ।

---

१. "वा अथ" इति स्यात् ।

न्यायदीपः

यद्वाऽद्या विषयोक्तिर्न्यायमतरीत्या द्वितीया मीमांसकरीत्या तृतीया सिद्धान्तरीत्येति ध्येयम् । तन्तुपटादिबुद्धिः कुण्डेबदरादिबुद्धेर्विलक्षणेत्यभेद-विषयैवावसीयत इति सुधोक्तेरिति भावः । एवं वदता त्वया स्फुटतरविवेक-प्रकाशोपेतविशिष्टबुद्धौ संयोग इत्युक्तः स्यात् । तच्चायुक्तमित्याह ।। **अभावेति** ।। आदिपदेनेच्छेष्यमाणादेर्ग्रहः ।। **न्यायेति** ।। स्फुटतरविवेक-प्रकाशराहित्यस्थले समवाय इतिवत् तादृशप्रकाशवद्विशिष्टबुद्धौ दण्डीत्यादि-बुद्धाविव संयोगः स्यादित्यर्थः ।। **नानात्वेति** ।। उक्तप्रकाश[1]राहित्यरूप-साजात्यस्यानुगतस्य दण्डीत्यादिबुद्धौ सत्त्वेपि तत्र संयोगनानात्ववत् समवायस्यापि नानात्वापत्तेरित्यर्थः ।

यत्त्वाश्रयनाशजन्यकार्यनाशस्थले कार्यनाशं प्रति समवायिरूपाश्रयनाश एव हेतुर्वाच्यो न त्वाश्रयमात्रनाशः । तथात्वे कपालनिष्ठघटध्वंसस्य कपालनाशेनापि नाशप्रसङ्गेन घटोन्मज्जनापत्तेरतः समवायोभ्युपेय इति तन्न । समवायत्वं हि नित्यसम्बन्धत्वं न तु जातिरनभ्युपगमात् । तथा च लाघवात्सम्बन्धिकारणरूपाश्रयनाश एव वा कारणीभूताश्रयनाश एव वाश्रितकार्यनाशहेतुरिति स्वीकृतौ ध्वंसनाशाप्रसक्त्या समवायस्यानुपेयत्वात् ।।

वस्तुतस्तु परिणामवादे ध्वंसस्य भूतलादिनिष्ठत्वेन कपालनाशेपि तन्नाशाप्रसक्तेः । अत एव प्राग् भेदाभेदविषयत्वेनेत्याद्युक्तिरिति ।

।। इति समवाये प्रमाणभङ्गः ।। २९ ।।

---

१. ''साहित्य'' इति स्यात् ।

समवाये बाधकम्

किञ्च कालस्य स्वगतेन सङ्ख्यापरिमाणादिना त्वयापि स्वरूप-सम्बन्धः स्वीकृत इति किं तत्र समवायेन ।

यदि च कालस्य तेन सह समवायस्य सत्त्वान्न स्वरूपसम्बन्धः । तर्हि कालस्य घटेन सह संयोगस्य सत्त्वात् स्वरूपसम्बन्धो न सिद्ध्येत् । साम्यात् ।।

न्यायदीपः

एवं समवायस्याप्रामाणिकत्वमुक्त्वानुव्याख्यानसुधयोरुक्तमन्यत्समवायोप-गमे बाधकजातमाह ।। **किञ्चेति** ।। यद्वा प्रागुक्तानुमानेषु गुणादि-विशिष्टबुद्धिनिमित्तसम्बन्धतया हि समवायसिद्धिरभिमता सा न युक्ता । तद्बुद्धेरन्यथोपपत्तेरिति । चतुर्थान्यथोपपत्तिमाह ।। **किञ्चेत्यादिना** ।।

अथवा

''समवायश्च सम्बन्धो नित्यः स्यादेक एव सः''

इति नित्यत्वे सत्येकत्वे सति सम्बन्धत्वमिति यत्समवायलक्षणमुक्तं तत्र सम्बन्धत्वं तावदन्यथोपपत्तिचतुष्टयेन निराह ।। **किञ्चेत्यादिना** ।।

तत्रादौ तावत्साम्यादनवस्थितेरिति सूत्रखण्डस्य स्वगतसङ्ख्यादिगुणेन कालस्य पदार्थान्तरेणेव स्वरूपसम्बन्धस्वीकारसाम्यात्समवायस्यानवस्थितेर-सत्त्वापातादित्यर्थमुपेत्याह ।। **कालस्येति** ।। कालपरिमाणं सदास्तीति कालस्यैकत्वसख्या सदास्तीत्यादिप्रतीत्या कालस्य जगदाधारताप्रयोजकत्वेन स्वगतधर्मैरन्यैश्च सर्वैः स्वरूपसम्बन्धः स्वीकृत इति तेनैव सम्बन्धेनैकः कालो परिच्छिन्नपरिमाणः काल इति विशिष्टबुद्ध्युपपत्तौ तत्र समवायस्या-वस्थित्यभावः स्यादित्यर्थः ।

स्वगतसङ्ख्यादिना समवायसत्त्वस्येव घटादिद्रव्येण संयोगसत्त्वस्यापि साम्यादिदानीं घट इत्यादिधीबलेन घटादिना स्वीकृतस्वरूपसम्बन्ध-स्यावस्थित्यभावापत्तेरित्यर्थान्तरं चोपेत्याह ।। **यदि चेति ।। तेन ।।** स्वगतसङ्ख्यादिना ।।

तर्कताण्डवम्

अपि च गुणादेरपि त्वन्मते स्वाभावस्वज्ञानस्वकालैः सह स्वरूपसम्बन्धत्वं तावदस्ति । तच्च गुणादेरभावज्ञानादीन्प्रति स्वरूप-सम्बन्धत्वं न प्रतियोगित्वविषयत्वादिना । अननुगमात् । गौरवाच्च । किन्तु विशेषत्वेनानुगमाल्लाघवाच्च । विशेषणत्वं च गुणादेर्गुण्यादावपि सममिति गुण्यादावपि गुणादेः स्वरूपसम्बन्धत्वं क्लृप्तमेवेति क्व समवायस्य अवकाशः ।

अपि च घटरूपसमवाया इति समूहालम्बनज्ञानात् रूपी घट इत्यादिबुद्धेर्वैलक्षण्यायावश्यमङ्गीकार्येण रूपस्य घटेन सह विशेषण-ताविशेषेणैव विशिष्टबुद्ध्युपपत्तौ किं समवायेन । एवं रसादावपीति न समवायस्यावकाशः ।

किञ्च समवायस्यापि स्वसम्बन्धिना सह सम्बन्धाङ्गीकारे अनवस्था । तत्र स्वरूपसम्बन्धाङ्गीकारे च गुणादेरेव गुण्यादिना स्वरूपसम्बन्धोस्तु । साम्यात् । किं दूरगमनेन । कालस्य स्वगत-सङ्ख्यादिना समवायानुपपत्तिः, गुणादेः, स्वाभावादिनेव गुण्यादिनापि स्वरूपसम्बन्धेनैवोपपत्तिः, समूहालम्बनाद्वैलक्षण्यानुपपत्तिः, अनवस्था चेति बाधकचतुष्टयं दुष्परिहरम् ।।

न्यायदीपः

नन्वस्त्वेवं तथापीदानीं घटरूपमित्यादिधीबलाद्घटरूपादिनैव स्वरूपसम्बन्धः कालस्य नान्येनेत्यत आह ।। **अपि चेति** ।। यद्वा काले गुणविशिष्टबुद्ध्युपपादकसम्बन्धत्वेन समवायासिद्धावप्यन्यत्र तथात्वेन सिद्धिरस्त्वित्यत आह ।। **अपि चेति** ।। तच्च स्वरूपसम्बन्धत्वमित्यन्वयः । विषयत्वादिनेत्यादिपदेन विशेषणविशेष्यभावग्रहः ।। **अननुगमादिति** ।। स्वाभावेन प्रतियोगित्वरूपः, ज्ञानादिना विषयत्वरूपः, कालेन विशेषणत्वादिरित्यननुगमात् अनेककल्पने गौरवाच्चेत्यर्थः ।।

।। **सममिति** ।। एतेन गुणादेर्विशेषणत्वसाम्यात्समवायस्यावस्थित्यभावात् इत्यर्थ उक्तो भवति ।। **वैलक्षण्यायेति** ।। समूहालम्बनेपि घटतद्रूपतत्समवायानां प्रतीतिवद्रूपी घट इति प्रतीतावपि रूपादित्रयस्यैव भानेऽनुभवसिद्धस्य ततो वैलक्षण्यस्यायोगेन रूपादौ विशेषणत्वादिरेव समूहालम्बने अप्रतीतोत्र प्रतीयत इति वाच्यमिति तेनैवोपपत्तौ किं समवायेनेत्यर्थः । एतेन अभावविशिष्टबुद्धिसाम्यात् रूपी घटः इत्यादावपि समवायस्य अवस्थित्यभाव इत्यर्थः सूत्रांशस्य सूचितः ।

''भिन्नत्वसाम्यतस्तस्य ताभ्यां योगो भवेद्ध्रुवम्''

इत्यनुव्याख्यानसुधयोरुक्तमाह ।। **किञ्चेति** ।। सम्बन्धिना गुणगुण्यादिरूपेणेत्यर्थः । समवायस्य अवस्थित्यभाव इत्यर्थः । समवायविशिष्टबुद्धिसाम्यात्समवायस्यावस्थित्यभावो गुणादावपीत्यर्थमुपेत्याह ।। **तत्रेति** ।। समवेतः पट इत्यादिसमवायविशिष्टबुद्धौ प्रतीतसमवायसमवायिनोरित्यर्थः ।। **दूरेति** ।। गुणादिविशिष्टबुद्धौ समवायः, समवायविशिष्टद्धौ स्वरूपसम्बन्ध, इत्यभ्युपगमेन किमित्यर्थः । उपपादितबाधकानि बुद्ध्यारोहाय संगृह्याह ।। **कालस्येति** ।।

तर्कताण्डवम्

किञ्च समवायस्यैकत्वमयुक्तम् । तथाहि । धूमाद्यनुमानेन हि धर्मिमात्रं धर्ममात्रं वा न साध्यम् । तयोः प्रागेव सिद्धत्वात् । अन्यथा आश्रयासिद्ध्यप्रसिद्धविशेषणत्वे स्याताम् । किन्तु तयोः सम्बन्धः । स च क्वचित्संयोगः यथा पर्वताग्न्योः । क्वचित्समवायः यथा रसाद्रूपानुमाने । अग्निसंयोगोपि महानसादौ सिद्ध इति नानुमानसाध्यः । किन्तु पर्वतस्य अग्निसंयोगः । तत्र च षष्ठ्यर्थः समवाय एव । स च एक एवेत्यनुमानमात्रं सिद्धसाधनं स्यात् । एवं शब्दमात्रमपि ज्ञातज्ञापकं स्यात् । तत्रापि पदार्थानां संसर्गाणां च विशकलितानां सिद्धत्वात् । तदुक्तमनुव्याख्याने

"भूधरस्याग्निसंयोगो यदि षष्ठ्यर्थ एव कः ।
समवायो यदि ह्यस्य चैकत्वात्सिद्धसाधनम्" इति ।

सिद्धसाधनं ज्ञातज्ञापनम् । एवं सुखस्यात्मान्तरे सिद्धत्वात्स्वसम्बन्ध एव कृतिसाध्य इति वक्तव्यम् । तच्चाशक्यम् समवायस्यानादित्वेनासाध्यत्वात् । एतदप्युक्तं "समवाय" इत्यादिना । सिद्धसाधनं निष्पन्ननिष्पादनम् ।

एवं दुःखस्यात्मान्तरे निवर्तयितुमशक्यत्वात्स्वसम्बन्ध एव निवर्त्य इति वाच्यम् । तच्चाशक्यम् । समवायस्य अविनाशित्वात् ।

न्यायदीपः

एवमन्यथोपपत्त्या समवायस्य स्वरूपमेव (स्य सम्बन्धित्वेन सिद्धिं) निरस्येदानीमस्तु नाम गुणगुण्यादौ कश्चनातिरिक्तः सम्बन्धः, तस्यैकत्वं तु न, तथात्वेऽनुमानशब्दप्रमाणमात्रोच्छेद इति भावेन सुधोक्तं विवृण्वन्नाह

।। **किञ्चेति** ।। **धर्मीति** ।। पर्वतादिमात्रं वह्न्यादिमात्रमित्यर्थः ।। **षष्ठ्यर्थः** ।। पर्वतस्येति·षष्ठ्यर्थ इत्यर्थः ।। **स च एक एवेति** ।। रूपी घट इत्यादिप्रतीतौ सिद्धश्चेत्यपि ध्येयम् ।। **विशकलितानामिति** ।। न च विशिष्टं नान्यत्र सिद्धमिति वाच्यम् । विशिष्टस्य त्वन्मते पदार्थान्तरत्वाभावाद्घटोस्तीत्यादिवाक्यबोध्यस्य घटतत्सत्तयोः समवायस्यैकत्वेनात्र तस्य ज्ञातत्वाच्चेति भावः ।। **तदुक्तमिति** ।। वैशेषिकाधिकरणानुव्याख्यान इत्यर्थः ।

शब्दसाधारण्यलाभार्थमाह ।। **ज्ञातज्ञापनमिति** ।। धूमाद्यनुमानमिति शेषः । इति सुधोक्तिरुपलक्षणम् । पर्वते वह्निरस्तीत्यादिशब्दजातमित्यपि ध्येयम् । अत एव सुधायां समवायैकत्वनिरासप्रकरणावसाने आगमापह्नवश्च समवायैक्ये स्यात्पदार्थानां तत्संसर्गाणां (सिकतावद्विशकलितानां) सिद्धत्वादित्युक्तमिति भावः ।

समवायो यद्युपेयते तर्ह्यस्यैकत्वात्सिद्धस्यैव साधनमुत्पादनमिति प्राप्तमित्यर्थान्तरं चोत्तरार्धस्योपेत्य समवायस्यैकत्वे बाधकान्तरं चाह ।। **एवमिति** ।। **स्वेति** ।। स्वस्य सुखेन यः समवायस्तस्येत्यर्थः । सिद्धसाधनमित्युपलक्षणम् । सिद्धस्यैव नित्यस्यैव दुःखादिसम्बन्धस्यावसानमित्यपि ध्येयमिति भावेनाह ।। **एवं दुःखस्येति** ।। इष्टानिष्टप्राप्तिपरिहारार्थं प्रयत्नाभावापत्तिः समवायैक्ये बाधिकेत्युक्तं भवति ।

तर्कताण्डवम्

अपि चात्माकाशकालादौ रूपरसादिसमवायस्य चलनादिसमवायस्य, घटपटादौ ज्ञानेच्छादिसमवायस्य, पटादौ घटत्वादिसमवायस्य, सुखादौ दुःखत्वादिसमवायस्य च, सत्त्वेन सर्वपदार्थेषु सर्वधर्मसम्बन्धस्य साम्यात् सर्वसङ्कररूपाव्यवस्था स्यात् । नन्वा-

त्मादौ रूपादिसमवायस्य सत्त्वेपि घटादाविव रूपादिना सह विशेषणताविशेषाभावाद्वा अधिकरणस्वभावाद्वा आधेयस्वभावाद्वा न सङ्कर इति चेत् । एवं हि तैरेव सर्वव्यवस्थोपपत्तौ किं व्यवस्थित्यहेतुना समवायेन ।।

किञ्चैवं सर्वेषामपि वस्तूनां सर्वैः सह एक एव सम्बन्ध इति वा कस्यापि केनापि सह न सम्बन्धः इति वा स्यात् । आद्ये आधारस्य वा आधेयस्य वा सम्बन्धस्य वा स्वभावात् कुत्रचिदसम्बन्धव्यवहार इति द्वितीये आधारस्य वा आधेयस्य वा स्वभावात्कुत्रचित्सम्बन्धव्यवहार इति च सुवचत्वात् ।।

किञ्च संयोगोप्येक एव लाघवात् । व्यवस्था तु स्वभाववैचित्र्यादिति स्यात् । नाशाद्यनुभवस्तु उभयत्रापि समः । पाकेन श्यामरूपमिव तत्सम्बन्धोपि नष्टः, रक्तरूपमिव तत्सम्बन्धोप्युत्पन्न इत्यनुभवात् ।

न्यायदीपः

समवायैकत्वदूषणं सूत्रारूढं दर्शयितुं साम्यादनवस्थितेरिति सूत्रांशस्यार्थान्तरमुपेत्य अतिप्रसङ्गान्तरमाह ।। **अपि चात्मेति** ।। षष्ट्यन्तानां पूर्वपूर्वेणैव सप्तम्यन्तेनान्वयः ।। **सत्त्वेनेति** सर्वषष्ठ्यन्तेन सम्बन्धः । समवायस्यैकत्वपक्ष इति योज्यम् ।।

यत्तु **मणौ** ''ननु समवायस्यैकत्वे कथं रूपिनिरूपिव्यवस्थे''त्यादिनैतदेव साङ्कर्यमाशङ्क्य अधिकरणस्वभावादिना समाहितं, तदनूद्य निराह ।। **नन्वात्मादाविति** ।। समवायस्यैकत्वपक्षे मण्याद्युक्तसमाधावतिप्रसङ्गान्तरमाह ।। **किञ्चैवमिति** ।। पक्षद्वयेप्युपपत्तिप्रकारं परोक्तन्यायेनाह

।। **आद्य इत्यादिना** ।। ननु संयोगस्यैक्ये घटसंयोगो नष्टः पटसंयोग उत्पन्न इति धीः कथमित्यत आह ।। **नाशादीति** ।। सम इत्युक्तसाम्यं समवायेन व्यनक्ति ।। **पाकेनेति** ।।

तर्कताण्डवम्

न हि सम्बन्धनाशेपि सम्बन्धिनः स्थितिवत् सम्बन्धिनाशेपि सम्बन्धस्थितिः कुत्रचिद्दृष्टा ।

एतेनात्मादिनिष्ठे समवाये रूपादिप्रतिसम्बन्धिकत्वस्य अभावान्न सङ्कर इति निरस्तम् । आत्मनिष्ठस्य समवायस्य घटादिनिष्ठाद्भेदे अपसिद्धान्तात् । अभेदे घटादिनिष्ठेपि रूपादिप्रतिसम्बन्धिकत्वा-भावापातात् ।।

एतेनैव समवायस्य स्वभावतः एकत्वेपि औपाधिको भेदोस्ति । रूपसुखाद्युपाधीनां भिन्नत्वादिति निरस्तम् । एवं हि रूपादिः संयोगादिश्चैक एव भेदस्त्वौपाधिक इति स्यात् ।

किञ्चौपाधिकत्वं उपाधिज्ञेयत्वं चेत् । ज्ञानस्य प्रमात्वे भेदासिद्धिः । भ्रमत्वे तु पदार्थानां सङ्करतादवस्थ्यम् । उपाधिजन्यत्वं चेत् । सिद्धः समवायस्य सत्यो भेदः । अपसिद्धान्तश्च ।

तदुक्तमनुव्याख्याने ।

''उपाधिजन्यं तद्गम्यमिति चौपाधिकं भवेत् ।
उभयत्राप्यनन्ताः स्युः समवाया इतस्तत'' इति ।

न्यायदीपः

अयमनुभवो भ्रमोस्त्वित्यतो बाधकाभावादिति भावेनाह ।। **न हीति**

।। **रूपादिप्रतिसम्बन्धिकत्वस्येति** ।। रूपादिनिरूपितत्वस्येत्यर्थः ।। **रूपादिरिति** ।। रसगन्धादिरादिपदार्थः । तत्रोपाधिः पटादिराश्रय एव । तथा च घटपटादिगतरूपमेकमेव । भेदकार्यं तु घटाद्याश्रयलक्षणोपाधि-भेदनिमित्तभेदसत्त्वाद्युक्तमित्यस्तु इत्यर्थः । संयोगादिः इत्यादिपदेन विभागस्य वा विशेषणविशेष्यभावादिसम्बन्धस्य वा ग्रहः ।। **औषाधिक इति** ।। घटादिस्वरूपनिरूपकभेदनिमित्तक इत्यर्थः । उपाधिशब्दात् तृतीया-समर्थाज्जन्यगम्यार्थे शैषिके ठकि कृते औपाधिकशब्दो निष्पन्नः ।

औपाधिकमित्युपाधिगम्यमुतोपाधिजन्यमिति कल्पद्वयलाभं हृदि कृत्वा आद्येपि ज्ञानं प्रमा भ्रमो वेति क्रमेण निराह ।। **किञ्चौपाधिकत्वमिति** ।। **तदुक्तमिति** ।। वैशेषिकनये ।। **उभयत्रेति** ।। उपाधिना जन्यत्वपक्षे प्रमीयमाणत्वपक्षे चेत्यर्थः । कथमानन्त्यमित्यत उक्तम् ।। **इतस्तत इति** ।। अत्र तत्रेत्यर्थः । नानादेशकालेषु स्थितानामवयवावयव्याद्युपाधीना-मनन्तत्वादिति शेषः । ज्ञानस्य भ्रमत्वपक्षे साङ्कर्यदोषोक्तिस्तु ।।

"अविद्यमान एवान्यः समवायोवगम्यते ।
उपाधिना तद्गमकमनुमानं न मा भवेत् ।।"

इत्यनुव्याख्यानोक्तमुपलक्षणमिति भावेनेति ज्ञेयम् । अत एव तत्र सुधायां "इत्यादि द्रष्टव्यम्" इत्युक्तम् ।

तर्कताण्डवम्

एतेन लाघवतर्कसहकृतेन धर्मिग्राहकानुमानेन समवायस्य एकत्वं नित्यत्वं च सिद्धमिति निरस्तम् । एकत्वादौ प्रत्यक्षविरोधस्योक्त-त्वेनानुमानस्य तदविरुद्धनानासम्बन्धसाधनेन कृतार्थत्वात् ।।

अन्यथा संयोगोपि लाघवतर्कसहकृतेन प्रत्यक्षेण, अभावाधिकरणयोर्ज्ञानज्ञेयादिनां सम्बन्धोपि तत्सहकृतैरुक्तानुमानैरेको नित्यश्च सिध्येत् । द्व्यणुकादीनां सोपादानकत्वसाधने कार्यत्वहेतुनापि तत्सहकृतेन नित्यमेकं उपादानं सिध्येत् । लाघवतर्कस्य साम्यात् । ईश्वरानुमानेपि कर्त्रैकत्वसिद्धिर्नेत्युक्तम् ।।

तस्मात्समवायस्य नित्यत्वमेकत्वं वाऽयुक्तम् । समवायाभावे तु अयुतसिद्धयोराधाराधेयभावनिमित्तसम्बन्धः न सम्बन्धिभिन्नः अयुतसिद्धयोरेवान्योन्यं सम्बन्धत्वात् । भूतलघटाभावसम्बन्धवत्, संयोगभिन्नः साक्षात्सम्बन्धः न संयोगविशेषणतोभयभिन्नः साक्षात्सम्बन्धत्वात् संयोगवत्, साक्षात्सम्बन्धत्वं संयोगविशेषणतान्यान्यत्वव्याप्यम् साक्षात्सम्बन्धमात्रवृत्तित्वात् संयोगत्ववत्, सम्बन्धत्वं न सम्बन्धिद्वयध्वंससमानकालीनसम्बन्धवृत्ति न सम्बन्धिद्वयप्रागभावसमानकालीनसम्बन्धवृत्ति वा सम्बन्धमात्रवृत्तित्वात् संयोगत्ववदित्याद्यनुमानानि प्रमाणानि ।।

न्यायदीपः

धर्मिग्राहकमानबाधितं समवायानन्त्यापादनमित्याशङ्क्य निराह ।। **एतेनेति** ।। **धर्मीति** ।। सत्यलौकिकप्रत्यक्षजातिगुणक्रियाविशिष्टबुद्धयो विशेषणसम्बन्धनिमित्तकाः, इति प्रागुक्तानुमानेनेत्यर्थः ।। **उक्तत्वेनेति** ।। नाशाद्यनुभवस्तूभयत्र सम इत्यादिग्रन्थेनेत्यर्थः ।। **उक्तानुमानैरिति** ।। पूर्वत्र समवायानुमानभङ्गे उक्तैर्विशिष्टबुद्धित्वात् तद्विशिष्टविषयकविशिष्टबुद्धित्वादित्याद्यनुमानैः इत्यर्थः ।। **तत्सहकृतेन** ।। लाघवतर्कसहकृतेनेत्यर्थः ।

नन्वेवमीश्वरानुमानेपि लाघवतर्केण कर्त्रैक्यसिद्धिर्न स्यादित्यत आह ।। **ईश्वरेति** ।। उक्तमीश्वरानुमानभङ्ग इत्यर्थः ।

समवायाभावे मानाभावादेव समवायसिद्धिरस्त्वित्यत आह ।। **समवायाभावे त्विति** ।। इत्याद्यनुमानानि प्रमाणानीत्यनेनान्वयः । अयुतसिद्धौ यौ भावौ अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेत्येवं द्वन्द्वीभूतौ द्वौद्वौ पदार्थौ तयोरित्यर्थः । अत्र सम्बन्ध इत्यस्यैव पक्षत्वे स्वरूपसम्बन्धेन सिद्धसाधनं अतोन्योन्य-मित्यन्तम् । कालसम्बन्धेन तद्वारणाय वान्योन्यमित्युक्तिः । न्यायमते जगदाधारताप्रयोजकतया कालस्य सर्वेणापि स्वरूपसम्बन्धोपगमात् । अयुतसिद्धभावयोरपि प्रत्येकं स्वस्वनिष्ठाभावादिना स्वरूपसम्बन्धस्योपगमेन तेन सिद्धसाधनवारणाय वा अवयवावयविनोः प्रत्येकमन्येन संयोगे बाधनिरासाय वान्योन्यमित्युक्तिः । भूतलघटाभावयोरन्यसम्बन्धेनार्थान्तर-वारणाय ।। **भावयोरिति** ।। अपृथक् गृह्यमाणत्वरूपत्वादयुतसिद्धत्वस्य घटपटसंयोगे बाधनिरासायायुतसिद्धेत्युक्तिः । संयोगस्य परमते सम्बन्धि-नात्यन्तं भिन्नत्वात् । सिद्धान्तेपि भिन्नाभिन्नत्वात् । अत एव संयोगे व्यभिचारवारणाय हेतावयुतसिद्धयोरित्युक्तिः । अत एवावयवावयविनोः प्रत्येकमन्येन सह संयोगे व्यभिचारवारणाय अन्योन्यमित्युक्तिः । पक्षे भावपदस्याधिकस्योपादानान्न हेतुतावच्छेदकैक्यनिमित्तसिद्धसाधनत्वं शङ्क्यम् । अभावभूतलयोरयुतसिद्धत्वमसिद्धमिति चेत् न । तस्यापृथ-ग्गृह्यमाणत्वमात्ररूपत्वादन्यस्यानिरूपणात् । नित्यसम्बन्धत्वादेः समवाय-सिद्ध्युत्तरकालीनत्वात् ।

अभावव्यावृत्तमन्यदेव किञ्चिदयुतसिद्धत्वमिति वादिनं प्रति प्रयोगान्तर-माह ।। **संयोगेति** ।। सम्बन्ध इत्येवोक्तौ रक्तः स्फटिकः कृष्णं वस्त्रमित्यादौ स्फटिकवस्त्रसंयुक्तजपाकुसुमकर्दमसम्बन्धरक्तिमकालिमादिसम्बन्धे बाधवारणाय साक्षादित्युक्तिः । संयोगेनार्थान्तरवारणाय संयोगभिन्न इति । केचि-

द्विशेषणतारूपसम्बन्धेनार्थान्तरनिरासाय साक्षादित्युक्तिरित्याहुः ।। **न संयोगेति** ।। संयोगविशेषणतान्यतररूप एवेत्यर्थः । तथैवोक्तौ वक्ष्यमाण-साध्यांशेऽविशेषापत्त्या नञ्द्वयेनोक्तिः । तत्र संयोगभिन्नत्वाभावेन साध्य-पर्यवसाने बाधात् । विशेषणताभिन्नत्वाभावेनैव साध्यपर्यवसानात् संयोगान्य-साक्षात्सम्बन्धस्य विशेषणतारूपत्वस्यैव सिद्धिरिति भावः । हेतौ प्रागुक्त-परम्परासम्बन्धेऽव्यभिचाराय साक्षादित्युक्तिः ।

।। **साक्षादिति** ।। प्रागुक्तपरम्परासम्बन्धे बाधनिरासाय साक्षादित्युक्तिः ।। **संयोगेति** ।। संयोगाविशेषणतान्यतरत्वव्याप्यमित्यस्यार्थनिर्देशः संयोग-विशेषणताभ्यामन्यज्जगत् तदन्यत्वं संयोगविशेषणतयोरेव तद्व्याप्यत्वमिति । तथा च संयोगविशेषणतारूपौ द्वावेव साक्षात्सम्बन्धौ सिध्यतो न त्वतिरिक्तः कश्चित्समवाय इति भावः । हेतौ साक्षात्पदकृत्यं प्राग्वत् । प्रमेयत्वादाव-व्यभिचाराय मात्रेत्युक्तिः ।।

एवं सम्बन्धैकत्वविरोध्यनुमानान्युक्त्वा नित्यत्वविरोध्यनुमानमाह ।। **सम्बन्धत्वमिति** ।। सम्बन्धिद्वयमवयवावयव्यादि । अनादित्वविरोधि-साध्यान्तरमाह ।। **न सम्बन्धिद्वयप्रागभावेति** ।। मात्रपदकृत्यं प्राग्वत् ।

।। इति समवाये बाधकम् ।। ३० ।।

।। इति श्रीराघवेन्द्रयतिविरचिते तर्कताण्डवव्याख्याने
न्यायदीपे समवायवादः समाप्तः ।।

निर्विकल्पकवादः

निर्विकल्पके प्रमाणभङ्गः

यच्चोच्यते समवायसम्बन्धेन पूर्वं गत्वादिजातिविषयकं निर्विकल्पकं अनन्तरं जातिविशिष्टगकारविषयकं सविकल्पकमिति । तन्न । निर्विकल्पके मानाभावात् ।।

ननु यद्यपि निर्विकल्पके न प्रत्यक्षं प्रमाणम् । तस्यातीन्द्रियत्वाभ्युपगमात् । नापि व्यवहारः । तस्य च सविकल्पकसाध्यत्वात् । नापीदं पूर्वं मया संमुग्धेन ज्ञातमित्यनुभवः । तस्याल्पविशेषणज्ञानेनैवोपपत्तेः । नापि ज्ञानत्वं निष्प्रकारकत्वसमानाधिकरणम् सकलज्ञानवृत्तित्वात् सत्तावत्, चक्षुः चाक्षुषसविकल्पकातिरिक्तज्ञानकरणं ज्ञानकरणत्वाद् घ्राणवदित्यनुमानम् । अप्रयोजकत्वात् । अतिप्रसङ्गाच्च । नापि जागराद्यं गौरिति ज्ञानं जन्यविशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वात् दण्डी पुरुष इति ज्ञानवदित्यनुमानम् । दृष्टान्तस्य साध्यवैकल्यात् । दण्डपुरुषयो रुभयोर्युगपदिन्द्रियसन्निकर्षे असंसर्गाग्रहे च सति विनैव दण्डज्ञानं दण्डीति ज्ञानोत्पादानुभवात् ।।

न्यायदीपः

ननु समवायाभावे निर्विकल्पकादिभेदेन प्रत्यक्षप्रमाद्वैविध्यानुपपत्तिः । तस्य समवायरूपवैशिष्ट्यावगाहित्वानवगाहित्वाभ्युपगमेनैव द्वैविध्यस्य वाच्यत्वादित्यतः द्रव्यादिविकल्पानां प्रथममेवोत्पत्तौ बाधकाभावेन निर्विकल्पकानुपपत्तेरिति पद्धतिवाक्यं विवृण्वानो नास्त्येव निर्विकल्पकं विशिष्टज्ञानं च स्वरूपसम्बन्धावगाहीति भावेनाह ।। **यच्चेति** ।। **समवायेति** ।। वस्तुगत्या समवायसम्बन्धेन स्थिता या गत्वादिजातिः

तद्विषयमित्यर्थः । यद्वा श्रोत्रसन्निकर्षरूपेण समवायसम्बन्धेन जायमानं गत्वादिजातिविषयकं वैशिष्ट्याविषयकं ज्ञाननिर्विकल्पकं, तेनैव सन्निकर्षेण पश्चाज्जायमानं जातिविशिष्टज्ञानं सविकल्पकमित्यर्थः ।

सम्भावितपक्षान्मण्युक्तखण्डनरीत्या निराकुर्वन्नेव पूर्वपक्षयति ।। **यद्यपीत्यादिना** ।। तथापीति वक्ष्यमाणेनान्वयः । व्यवहारो गौरित्याद्यभिलपनरूपः ।। **तस्येति** ।। तादृशानुव्यवसायस्येत्यर्थः । सविकल्पकज्ञानत्वे अव्यभिचाराय सकलेति हेतुविशेषणम् । निष्प्रकारकघटादिवृत्तित्वे बाधात् तादृशज्ञानवृत्तित्वेनैव साध्यपर्यवसानमिति भावः ।। **अतिप्रसङ्गाच्चेति** ।। ज्ञानत्वं घटत्वसमानाधिकरणमिति, तथा चक्षुः चाक्षुषनिर्विकल्पकसविकल्पकातिरिक्तं ज्ञानजनकमित्यपि त्वदुक्तप्रयोगाभ्यां साधयितुं शक्यत्वादिति भावः ।। **गौरिति** ।। ज्ञानमात्रपक्षत्वे द्वितीयादिसविकल्पके प्राथमिकसविकल्पकजन्यत्वेनार्थान्तरनिरासाय जागराद्यमित्युक्तिः । साध्ये ईश्वरज्ञानजन्यत्वेन अर्थान्तरवारणाय जन्येति ज्ञानविशेषणम् ।।

तर्कताण्डवम्

तथापि ''एतज्जन्मनि प्राथमिकं गौरिति प्रत्यक्षं जन्यविशेषणज्ञानजन्यं जन्यविशिष्टज्ञानत्वादनुमितिवत्'' इति मण्युक्तमनुमानं मानम् । नच तत्र विशेषणज्ञानं स्मृतिरूपम् । एतज्जन्मनि तेन गोत्वस्याननुभवात् । न चाद्यस्तनपानादाविवात्रा दृष्टमेव जन्मान्तरियसंस्कारोद्बोधकम् । तद्वदनन्यगतिकत्वाभावात् । अन्यथातिप्रसङ्गात् । तद्वदेव सन्निकर्षेपि प्रथमं गोत्वस्मृत्यापाताच्च । गोत्वसन्निकर्षस्याप्यपेक्षायां तु सन्निकर्षाद्गोत्वानुभव एवोचितः । तस्यानुभव एव हेतुत्वस्य कल्पत्वात् । स्मृतिसामग्रीतोनुभवसामग्र्याः बलवत्त्वात् । अन्यथा जन्मान्तरानुभूतानां एतज्जन्मनि इन्द्रियसन्निकृष्टानां नित्यानां

वैदिकानां चार्थानां स्मृतिरेव स्यान्न त्वनुभवः । न च गोत्वरूप-विशेषणानुभवः सविकल्पकः । तथात्वे तस्यापि विशेषणज्ञानजन्य-त्वावश्यम्भावेनानवस्थानात् ।

न्यायदीपः

मणिकृता सिद्धन्तितमनुमानमाह ।। **तथाप्येतज्जन्मनीति** ।। एतज्जन्मनीत्यस्य कृत्यमग्रे व्यक्तम् । द्वितीयादिज्ञाने प्राथमिकसविकल्पक-जन्यत्वेनार्थान्तरनिरासाय प्राथमिकमित्युक्तिः । साध्ये जन्येति विशेषण-मीश्वरज्ञानेनार्थान्तरनिरासाय । हेतौ चाव्यभिचारायेति भावः ।

मण्युक्तदिशैव परिष्करोति ।। **न च तत्रेति** ।। **तद्विदिति** ।। इह निर्विकल्पकेनाप्युपपत्त्या जन्मान्तरीयसंस्कारोब्दोधकादृष्टकल्पनानुपपत्तेरिति भावः ।। **अतिप्रसङ्गादिति** ।। सविकल्पक प्रत्यक्षादेरप्येवमपलापप्रसङ्गा-दित्यर्थः ।। **तद्वदेवेति** ।। स्तनपानादिवदेवेत्यर्थः ।

नन्वस्तु सन्निकर्षाद्गोत्वानुभवः । स च विशिष्टज्ञानरूप एव सविकल्पकहेतुरस्त्वित्याशङ्क्याह ।। **न च गोत्वरूपेति** ।।

तर्कताण्डवम्

तस्मादर्थान्निर्विकल्पकसिद्धिः । न चाप्रयोजको हेतुः । अनुमिति-शाब्दज्ञानादौ हि साध्यप्रसिद्धिपदार्थोपस्थित्यादिः हेतुः । साध्यादीनि च विशेषणानि । एवं च यद्विशेषयोः कार्यकारणभावः असति बाधके तत्सामान्ययोरपि स इति न्यायेन साध्यप्रसिद्ध्यादेर्जन्यविशिष्टज्ञान-सामान्ये जन्यविशेषणज्ञानत्वेन हेतुत्वसिद्धिरिति । तन्न ।

अनुमित्यादौ साध्यप्रसिद्ध्यादेरेवाहेतुत्वेन यद्विशेषयोरिति

न्यायानवकाशात् । न हि व्याप्त्यादिज्ञाने सति तद्विलम्बेनानुमित्यादिविलम्बः ।।

नच व्याप्त्यादिधीरेव तेन विना नेति वाच्यम् । एवं हि तस्य हेतुहेतुत्वेनान्यथासिद्धत्वान्नानुमित्यादिहेतुता ।।

न्यायदीपः

पूर्वपक्षदशायां मण्युक्तमेवानुकूलतर्कमत्राह ।। **अनुमितीति** ।। आदिपदद्वयेन क्रमादुपमितिवाचकज्ञानयोर्ग्रहः ।। **यद्विशेष(ण)योरिति** ।। साध्यप्रसिद्ध्यनुमित्योः पदार्थोपस्थितिशाब्दज्ञानयोः वाचकज्ञानोपमित्योरित्यर्थः ।।

नन्वेवं दण्डघटयोः कार्यकारणभावे यत्सामान्ययोर्द्रव्यमात्रपृथिवीमात्रयोः कार्यकारणभावः स्यादित्यत आह ।। **असति बाधक इति** ।। तत्र व्यभिचारस्यैव बाधकत्वादिह च तदभावादिति भावः ।। **साध्यप्रसिद्ध्यादेर्हेतुत्वेनेति** ।। तदहेतुत्वं च द्वितीयतृतीयपरिच्छेदयोर्विवरिष्यत इति भावः ।।

''असिद्धसाधने दोषः को व्याप्तिर्यदि विद्यते''

इत्यनुव्याख्यानोक्तं हृदि कृत्वाह ।। **न हीति** ।। आदिपदेन शब्दज्ञानसङ्केतस्मरणयोः सत्त्वे इति ग्रहः ।। **तद्विलम्बेन** ।। साध्यप्रसिद्धिपदार्थस्मृतिविलम्बेनेत्यर्थः । ननु सम्बन्धिनोरज्ञाने तन्निरूपितव्याप्तिशक्त्योर्धीरेव नेत्याशङ्क्य निराह ।। **न चेति** ।।

तर्कताण्डवम्

अस्तु वा साध्यप्रसिद्ध्यादिरनुमित्यादिहेतुः । तथापि वह्निमा-

नित्यादिज्ञानं प्रति वह्न्यादिज्ञानस्य न विशेषणज्ञानत्वेनैव कारणता । द्रव्यत्वादिना वह्निज्ञानेपि तदभावात् । नापि विशेषणतावच्छेदक-प्रकारकविशेषणज्ञानत्वेन । तेन निर्विकल्पकासिद्धेः । गौरवाच्च । किं तु विशेषणतावच्छेदकप्रकारकज्ञानत्वेन । तथाच न निर्वि-कल्पकसिद्धिः ।

ननु तत्र विशेषणज्ञानत्वमप्यस्ति । एवं च विशिष्टवैशिष्ट्याव-गाहिज्ञानं प्रति विशेषणतावच्छेदकप्रकारकविशेषणज्ञानत्वेन हेतुता सेत्स्यति । यद्विशेषयोरिति न्यायादिति चेत् ।

एवं ह्यनुमितौ करणविशेषलिङ्गज्ञानस्य हेतुत्वाद् यद्विशेषयोरिति न्यायेन जन्यज्ञानमात्रे करणमात्रज्ञानं हेतुः स्यात् । तथा च प्रत्यक्षेपि चक्षुरादिविषयकमतीन्द्रियं निर्विकल्पककल्प्यं स्यात् ।

न्यायदीपः

परप्रक्रियामुपेत्यादिनिर्विकल्पकासिद्धिमाह ।। **अस्तु वेति** ।। अस्त्वेवं को दोष इत्यत आह ।। **तथा च न निर्विकल्पकेति** ।। तस्य निष्प्रकारकत्वेन यद्विशेषन्यायेनापि विशेषणतावच्छेदकप्रकारकज्ञानस्यैव सिद्धिरिति भावः ।

एवमपि निर्विकल्पकसिद्धिरिति भावेन मण्युक्तमाशङ्कते ।। **ननु तत्रेति** ।। वह्निज्ञानादावित्यर्थः ।। **विशिष्टवैशिष्ट्येति** ।। वह्निमानित्यादि-ज्ञानमित्यर्थः । तत्र वह्नित्वविशिष्टवैशिष्ट्यस्य पर्वते भानाद्गौरित्यादि तु विशिष्टज्ञानमात्रमित्यर्थः ।

अतिप्रसङ्गेन न्यायस्याभासत्वमाह ।। **एवं हीति** ।। अनुभवबाध-परिहारायाह ।। **अतीन्द्रियनिर्विकल्पकमिति** ।।

तर्कताण्डवम्

अपि चैवं प्रत्यक्षविशिष्टज्ञानं प्रति विशेष्यज्ञानस्यापि हेतुता स्यात् । संशयादौ धर्म्यादिज्ञानस्यानुमित्यादौ पक्षादिज्ञानस्य हेतुत्वेन क्लृप्तत्वात् । नच इष्टापत्तिः दण्डत्वविषयके निर्विकल्पके सामग्रीसत्त्वेन दण्डस्यापि स्वरूपेण भानादिति वाच्यम् । त्वदनङ्गीकृतविशेष्य-ज्ञानत्वेन हेतुत्वस्यापादनात् ।

किं च सामान्यप्रत्यासत्तिर्नेति पक्षे वयाप्तिग्रहकाले अनुभूतो वह्निः पर्वतं प्रति न विशेषणम् । अन्यविशेषणज्ञानस्य हेतुत्वे चाति-प्रसङ्गः ।।

न्यायदीपः

अतिप्रसङ्गान्तरोक्त्या यद्विशेषयोरिति न्यायस्याभासतामाह ।। **अपि चैवमिति** ।। यद्विशेषयोरिति न्यायेन विशिष्टज्ञानमात्रं प्रति विशेषणज्ञानत्वेन हेतुत्व इत्यर्थः । कुत इत्यत आह ।। **संशयादाविति** ।। संशयरूपविशिष्ट-प्रत्यक्षविशेषं प्रति, तथा इदं रजतमित्यादिविपरीतविशिष्टप्रत्यक्षविशेषं प्रति च धर्मिज्ञानस्याधिष्ठानज्ञानस्य च हेतुत्वमस्ति । अन्यथा कोटिस्मरणस्य उत्कटकोटिकसंशयादेश्चानुपपत्तेः । तथा अनुमितौ पक्षज्ञानस्य शाब्दे बोधे पदार्थज्ञानस्य च हेतुत्वमस्ति । एवं च यद्विशेषयोरिति न्यायेन धर्म्यादि-ज्ञानसंशयप्रत्यक्षादिरूपज्ञानयोः कार्यकारणभावो तत्सामान्ययोः प्रत्यक्ष-विशिष्टज्ञानाविशेष्यज्ञानयोरपि कार्यकारणभावापत्तिः स्यादित्यर्थः ।

इष्टापत्तिं व्यनक्ति ।। **दण्डत्वेति** ।। **सामग्रीति** ।। दण्डेन्द्रिय-सम्प्रयोगादिरूपेत्यर्थः । विशेषणज्ञानस्येव विशेषणज्ञानत्वेन दण्डत्व-विशिष्टसविकल्पके दण्डरूपविशेष्यज्ञानस्य हेतुत्वं नानिष्टमिति भावः ।

।। **विशेष्यज्ञानत्वेनेति** ।। विशेषणज्ञानस्य तत्त्वेन यथा हेतुत्वं तथेति भावः । यद्विशेषन्यायेनापि न विशेषणज्ञानत्वेन हेतुत्वं कल्पयितुं शक्यम् । येन तद्बलान्निर्विकल्पकत्वसिद्धिरिति भावेनाह ।। **किञ्चेति** ।। सामान्यप्रत्यासत्तिरस्तीति न्यायमते यो धूमवानसौ वह्निमानिति व्याप्ति-ग्रहदशायां पर्वतीयवह्नेरपि पर्वतविशेषणतया भानेनोक्तदोषासम्भवात् । सामान्यप्रत्यासत्तिर्नेति पक्ष इत्युक्तम् ।। एतन्मतेनुमानप्रवृत्तेस्तृतीयपरिच्छेदे उपपादयिष्यमाणत्वादिति भावः ।।

तर्कताण्डवम्

अपि च त्वयापि घटाभाववद्भूतलामिति ज्ञाने अभावरूप-विशेषणस्य संयुक्ताविमौ समवेताविमावित्यादिज्ञाने च संयोग-समवायादिरूपस्य विशेषणस्य, अनुव्यवसाये व्यवसायगतस्य रजतत्वप्रकारकत्वरूपस्य विशेषणस्य, अभावज्ञाने प्रतियोगित्वादि-रूपस्य विशेषणस्य च, पूर्वमज्ञातस्यैव भानमिति स्वीकृतत्वात्तत्र व्यभिचारः ।।

भूतले अभाव इत्याभावादिविशेष्यकज्ञानानन्तरमेव भूतलमभाव-वदित्यभावविशेष्यकज्ञानमिति कल्पने त्वन्योन्याश्रयः । एतत्कल्पनस्य-विशिष्टज्ञानविशेषणज्ञानयोः कार्यकारणभावसिद्ध्यधीनत्वात् ।।

एतेनानुगतस्य विशेषणज्ञानस्याहेतुत्वे अनुगतं विशिष्टज्ञानरूपं कार्यमाकस्मिकं स्यात् । अन्यस्य तदनुगतस्य हेतोरभावादिति निरस्तम् । व्यभिचारस्योक्तत्वात् । उभयसम्मतादिच्छादिव्यावृत्ता-दात्ममनोयोगादिरूपज्ञानसामान्यहेतुत एव विशिष्टज्ञानसम्भवाच्च ।।

न्यायदीपः

व्यभिचाररूपबाधकसत्त्वादसति बाधके यत्सामान्ययोरिति न्यायावतारोप्ययुक्तः । यद्बलाद् विशेषणज्ञानहेतुतासिद्ध्या निर्विकल्हपकसिद्धिरिति भावेनानेकस्थलेषु व्यभिचारमाह ।। **अपि चेति** ।।

यत्तु मणावेतदेवाशङ्क्य प्रथमं भूतले घटो नास्तीति बुद्धिरित्यादिना समाधानमुक्तं तदनूद्य निराह ।। **भूतले भाव इत्यादिना** ।। अन्योन्याश्रय इत्युक्तं व्यनक्ति ।। **एतदिति** ।। प्रथमं विशेष्यत्वेन ज्ञानमिति कल्पनस्येत्यर्थः । विशिष्टज्ञानविशेषणज्ञानयोः कार्यकारणभावे सिद्धे हि व्यभिचारस्य गत्यन्तरकल्पनं सिद्धे च तस्य गत्यन्तरे तयोः कार्यकारणभावसिद्धिरिति भावः ।। **व्यभिचारस्य उक्तत्वादिति** ।। तथा चानुगतकारणाभावाद्विशिष्टज्ञानत्वं कार्यतावच्छेदकमेव नेति भावः । तस्य कार्यतावच्छेदकत्वमुपेत्याप्यन्यदेवानुगतकारणमाह ।। **उभयेति** ।।

तर्कताण्डवम्

यदि ह्यननुमित्यनुमितिरूपज्ञानद्वयवन्निर्विकल्पक-सविकल्पकरूपज्ञानद्वयं प्रामाणिकं स्यात् । तदा ज्ञानसामान्यसामग्रीत एव विशिष्टज्ञानोत्पत्तौ सर्वमपि ज्ञानं सविकल्पकं स्यादिति भयेन विशेषसामग्री कल्प्येत । न च तदस्ति । निर्विकल्पकस्याद्याप्यसिद्ध्या सर्वस्यापि ज्ञानस्य सविकल्पकत्वात् । इदमित्थमिति हि सर्वापि धीः । अन्यथा निष्प्रकारकधीवन्निर्विषयापि धीः स्यात् । इच्छापि काचिन्निष्प्रकारिकातीन्द्रिया च स्यात् । एवं द्वेषोपि ।।

एतेनैव व्यभिचारेण रूप्यादिस्मृतेर्भ्रमे विशेषणज्ञानत्वेन कारणत्वं क्लृप्तमतोन्यत्रापि विशिष्टज्ञाने तत्करणमिति निरस्तम् । आवश्यक-

विशेषणसन्निकर्षत्वेनैव तस्य तत्र हेतुत्वात् । भ्रमं प्रति विशेष्य-ज्ञानस्यापि हेतुतायाः क्लृप्तत्वेन अन्यत्रापि विशिष्टज्ञाने तस्यापि हेतुत्वापत्तेश्च ।।

न्यायदीपः

ननु कथमेतत् निर्विकल्पकसाधारणकारणस्य विशिष्टज्ञानहेतुत्वम् । अन्यथा तदपि विशिष्टज्ञानमापद्येतेत्यत आह ।। **यदि हीति ।। विशेषेति ।।** विशेषणज्ञानरूपविशेषसामग्रीत्यर्थः ।। **इति हीति ।।** हि शब्देन सर्वानुभवसिद्धत्वं सूचयति ।।

ननु निर्विकल्पकस्यातीन्द्रियत्वादेव नानुभव इत्यत आह ।। **अन्यथेति ।। एवं द्वेषोपीति ।।** निष्प्रकारको अतीन्द्रियश्च स्यादित्यर्थः ।। **एतेनैवेति ।।** व्यभिचारविशिष्टज्ञानान्यथासिद्ध्यतिप्रसङ्गानां कथनेनैवेत्यर्थः । रूप्यादिस्मृतेर्व्यभिचारेणेत्यन्वयः । गृह्यमाणारोपस्थले स्मृतेरभावान्न स्मृतित्वेन आरोप्यभूतरूप्यादिज्ञानस्य हेतुता । किं तु विशेषणज्ञानत्वेनेत्यर्थः । कथं तर्हि हेतुतेत्यत आह ।। **आवश्यकेति ।। हेतुत्वापत्तेश्चेति ।।** इष्टापत्तिस्तु प्रागेव निरस्तेति भावः ।।

तर्कताण्डवम्

ननु विशेषणज्ञानस्याजनकत्वे कथं विशेषणस्यैव प्रकारत्वमिति नियमः । सन्निकर्षस्य विशेष्येपि सत्त्वादिति चेत् । निर्विकल्पकाङ्गीकारेपि कथम् । त्वन्मते विशष्येपीन्द्रियसम्प्रयोगादिनिर्विकल्पकसामग्र्याः सत्त्वेन निर्विकल्पकस्य विशेष्येपि सत्त्वात् । कथं चाभावादिज्ञाने अभावत्वादेः प्रकारत्वम् ।

किं च फलीभूतज्ञाने यद्विशेषणत्वेन भासते तद्विषयकज्ञानेन

जन्यं यज्ज्ञानं तत्तत्प्रकारकमिति वा नियमः, यज्ज्ञानजन्यं यज्ज्ञानं तत्तत्प्रकारकमिति वा । नाद्यः । आत्माश्रयात् । नान्त्यः । अनुमित्यादौ व्याप्त्यादेः प्रकारत्वापातात् । तस्मात्त्वयापि प्रकारत्वनियमो भोजकादृष्टादिभिरेव वाच्यः ।

उक्तेन व्यभिचारेणैव विशिष्टज्ञानं सम्बन्धविषयकं सम्बन्धज्ञाने च सम्बन्धिज्ञानं हेतुः सम्बन्धि च विशेषणमिति निरस्तम् । सम्बन्धिनोर्युगपदिन्द्रियसन्निकर्षे तयोरसंसर्गाग्रहे च ताभ्यां सहैवेन्द्रियसन्निकृष्टसम्बन्धस्यापि धीरित्युक्तत्वाच्च ।।

इयांस्तु भेदः, सम्बन्धः सम्बन्धिनौ विना न भाति तौ तु तेन विनापि भात इति ।

न्यायदीपः

यदपि गोत्वादेः प्रकारत्वनियमान्यथानुपपत्त्या विशेषणज्ञानहेतुत्वसिद्धिः । विशिष्टधीहेतुताविषयत्वस्यैव प्रकारत्वादिति तदप्याशङ्क्य निराह ।। **नन्विति** ।। सन्निकर्षो नियामक इत्यत आह ।। **सन्निकर्षस्येति** ।। **कथमिति** ।। विशेषणस्यैव प्रकारंत्वनियम इत्यनुषङ्गः । कुत इत्यत आह ।। **त्वन्मत इति** ।। अभावादिज्ञान इत्यादिपदेन प्राग्व्यभिचारस्थलोक्तसंयोगसमवायादिग्रहः । त्वदुक्तरीत्या भूतले घटाभाव इत्यभावविशेष्यकज्ञानस्य प्राथमिकत्वेप्यभावत्वस्य तत्राज्ञाततस्यैव प्रकारत्वात् । भावस्थल एवायं नियम इत्युक्तावपीमौ संयुक्तौ इत्यादावभावादिति भावः ।

ननु तर्हि गोत्वादेरिव प्रकारत्वनियमे किं बीजमित्यतस्तत्परमुखेनैव वाचयितुं परोक्तं विशिष्टधीहेतुधीविषयत्वरूपं प्रकारत्वं विकल्प्य निराह ।। **किञ्चेति** ।। **फलभूतज्ञाने** ।। विशिष्टज्ञान इत्यर्थः । विशेषणत्वेन

प्रकारत्वेनेत्यर्थः ।। **आत्माश्रयादिति** ।। विशेषणत्वेनेत्यस्य प्रकारत्वेनेत्यर्थतया प्रकारत्वज्ञाने प्रकारत्वज्ञानस्यापेक्षितत्वादिति भावः ।। **तस्मादिति** ।। जनकज्ञानविषयत्वस्य प्रकारत्वरूपत्वासम्भवादित्यर्थः ।। **उक्तेनैवेति** ।। अपि च त्वयापि इत्यादिग्रन्थेनोक्तेनेत्यर्थः । अभाववद्भूतलमित्यादौ सम्बन्धिनोऽभावादेरज्ञानेपि विशिष्टज्ञानोदयेन न तस्य हेतुत्वमिति भावः ।

दोषान्तरं चाह ।। **सम्बन्धिनोरिति** ।। **उक्तत्वाच्चेति** ।। त्वन्मते विशेष्येपीत्यादिना ग्रन्थेनोक्तप्रायत्वादित्यर्थः । यद्वा दण्डपुरषयोर्युगपदिन्द्रियसन्निकर्षेत्यादिना ग्रन्थेनोक्तत्वादित्यर्थः । नन्वेवं सम्बन्धिवत्सम्बन्धस्यापिनिरपेक्षधीः स्यादित्यत आह ।। **इयांस्त्विति** ।। अयं भेदो वस्तुस्वभावकृत इतिभावः ।।

तर्कताण्डवम्

किञ्च विशेष्यस्यापि सम्बन्धित्वेन तज्ज्ञानस्यापि हेतुता स्यात् । न च विशेष्यस्य सम्बन्धित्वेपि न प्रतियोगित्वं किं तु विशेषणस्यैवेति तज्ज्ञानमेव हेतुरिति वाच्यम् । अभावादिबुद्धाविव प्रतियोगितावच्छेदकप्रकारकज्ञानस्यैव हेतुताया वक्तव्यत्वेन निर्विकल्पकासिद्धेः ।

किञ्चास्तु विशेषणज्ञानं कारणं तथापि न निर्विकल्पकसिद्धिः । तथा हि । न तावज्जन्यविशिष्टज्ञानत्वं जन्यविशेषणज्ञानजन्यतावच्छेदकम् । स्मृतावतिप्रसक्तेः । न च तत्रापि पूर्वानुभवो विशेषणज्ञानतया संस्कारद्वारा हेतुरिति वाच्यम् । विशेषणज्ञानत्वेन जनकतायां संस्कारस्य द्वारत्वायोगात् । यज्जातीयस्य यं जनयित्त्वैव यज्जातीयजनकत्वं स एव हि तत्र व्यापारः । अन्यथा दण्डादिरपि

कुलालव्यापारः स्यात् । न चात्र तत्सम्भवति । विशेषणज्ञानस्य संस्कारमजनयित्वापि विशिष्टज्ञानजनकत्वात् । तथा च जन्यानुभवत्वमेव जन्यविशेषणज्ञानजन्यताच्छेदकमस्तु । लाघवात् । वैशिष्ट्यप्रवेशे एव गौरवात् ।।

तथा च निर्विकल्पकाभिमतमपि विशेषणज्ञानजन्यम् । अत एव विशिष्टज्ञानं वास्तु । न चैवमनवस्था । क्वचिद्विशिष्टज्ञानस्य स्मरणरूपतया तत्र विशेषणज्ञानानपेक्षणात् । जन्यविशिष्टानुभवं प्रत्येव हि जन्यविशेषणज्ञानं हेतुः । न तु स्मृतिं प्रत्यपीत्युक्तम् ।।

न्यायदीपः

विशेषणस्य प्रतियोगित्वात्तन्निमित्तं विशेषणज्ञानस्य विशिष्टज्ञानहेतुत्वं चेत्तदा दोषमाह ।। **अभावादिबुद्धाविवेति** ।। इमौ संयुक्तावित्यादिबुद्धिरादिपदार्थः । व्यवहितेऽनुभवनाशादाह ।। **संस्कारद्वाराहेतुरिति** ।। **यज्जातीयस्येति** ।। चक्षुरादीन्द्रियजातीयस्य सन्निकर्षं जनयित्त्वैव चाक्षुषादिसाक्षात्कारजातीयजनकत्वं दृष्टमिति सन्निकर्ष एवेन्द्रियस्य व्यापारः । तथा दण्डजातीयस्य चक्रभ्रमं जनयित्त्वैव घटजातीयजनकत्वमिति भ्रमिः दण्डस्य व्यापारो दृष्ट इत्यर्थः । कदापि फलोपधानरहितवनस्थदण्डादेर्व्यापारवत्त्वाय यज्जातीयस्येत्युक्तिः ।। **अन्यथेति** ।। सापेक्षत्वमात्रेण व्यापारत्व इत्यर्थः ।

नन्वस्त्वेवं व्यापारत्वं तादृशमपि संस्कारस्यास्त्वित्यत आह ।। **न चात्रेति** ।। ननु विशिष्टज्ञानत्वस्योक्तविधया कार्यतानवच्छेदकत्वेपि निर्विकल्पकासिद्धिः कुत इत्यत आह ।। **तथाचेति** ।। जन्यविशिष्टज्ञानत्वस्यानवच्छेदकत्वे सतीत्यर्थः ।। **तत्रेति** ।। स्मरण इत्यर्थः ।

अननुभूतगोव्यक्तेः प्रथमतो गोत्वविशिष्टज्ञानमपि प्राग्भवीयसंस्कार-जन्यस्मरणमस्तु । स्तनपानादाविवेति भावः ।

ननु स्मरणस्य विशेषणज्ञान जन्यत्वादनवस्थेत्यत आह ।। **जन्येति** ।। **उक्तमिति** ।। स्मृतावतिप्रसक्तेरित्यादिपूर्वग्रन्थे उक्तमित्यर्थः ।।

तर्कताण्डवम्

केचितु–

अस्तु वा स्मृतिसाधारणं जन्यज्ञानत्वमेव कार्यतावच्छेदकम् । तथापि वैशिष्ट्यप्रवेशे गौरवमेव । न चैवमनवस्था । बीजाङ्कुरवत् प्रामाणिकत्वेन वस्त्वनवस्थाया अदोषत्वात् । प्रथमप्रवृत्तेन प्रमाणेन लाघवसहकारिणा जन्यज्ञानपरम्परायामेव विशेषणज्ञानस्य कारण-त्वावधारणात् । अन्यथा सामग्री सामग्र्यन्तरसापेक्षेत्यनवस्थापि दोषः स्यात् ।।

न च जन्यस्य सर्वस्यापि ज्ञानस्य विशेषणज्ञानजन्यत्वे पूर्व-पूर्वज्ञानधाराया अविच्छेदे प्रायणाद्यनुपपत्त्या ज्ञानानवस्थादोषः । एतज्जन्मनि प्राथमिकानुभवे स्मरणं हेतुः । तत्र च संस्कारद्वारा जन्मान्तरीयानुभवः । तत्रापि पूर्वजन्मान्तरीयानुभव इति स्वीकारेणा-विरललग्नज्ञानधाराया अभावेन प्रायणाद्युपपत्तेः ।।

न च पुरुषप्रयोज्यशब्दवृत्तिजातिविशिष्टप्रत्यक्षे विशेषणज्ञानं न स्मृतिरूपं, तस्या जातेः पूर्वमननुभवादिति वाच्यम् । शब्दस्य शब्दत्वादिना स्मरणानन्तरं शब्दविशेषणकजातिविशेष्यकज्ञाने जाते, पश्चाज्जातिविशेषणकशब्दविशेष्यकज्ञानसम्भवात् । त्वत्पक्षे अभाव-विशेष्यकज्ञानानन्तरं तद्विशेषणकज्ञानवत् ।।

एवं प्रत्यग्रोत्पन्नरूपादिविशिष्टप्रत्यक्षेपि द्रष्टव्यम् । अन्यथा त्वत्पक्षेपि निर्विकल्पकस्यादृष्टद्वारा जन्यज्ञानजन्यत्वादनवस्था स्यात् इत्याहुः ।

न्यायदीपः

स्मृतिव्यावृत्तमेव कार्यतावच्छेदकं स्वयमुपपाद्य स्मृतिसाधारणमेव कार्यतावच्छेदकमस्त्विति मतान्तरमाह ।। **केचिदिति** ।। इत्याहुरित्यन्वयः ।। **नचैवमिति** ।। स्मरणस्यापि जन्यविशेषणज्ञानजन्यत्व इत्यर्थः । प्रामाणिकत्वं व्यनक्ति ।। **प्रथमेति** ।। **लाघवेति** ।। वैशिष्ट्यप्रवेशापेक्षया जन्यज्ञानत्वस्य लाघवादिति भावः ।। **सामग्र्यन्तरेति** ।। स्वजनक-सामग्र्यन्तरेत्यर्थः ।। **प्रायणादीति** ।। मरणमूर्च्छादिरित्यर्थः ।। **अदृष्टद्वारा जन्यज्ञानेति** ।। हविरादिगोचरजन्यज्ञानेत्यर्थः । आहुरित्यरुचिबीजं तु स्मृतावतिप्रसक्तेरित्यादिना पूर्वोक्तमेव ज्ञेयम् ।

।। इति निर्विकल्पके प्रमाणभङ्गः ।। ३१ ।।

निर्विकल्पके बाधकम्

किञ्चातीन्द्रियज्ञानोपगमे योग्यानुलब्धेरभावेन ज्ञानाभावस्य निश्चेतुमशक्यतया अनुपलब्धिलिङ्गजन्या घटाद्यभावधीर्न स्यात् ।।

न्यायदीपः

निर्विकल्पके साधकाभावमात्रं न बाधकं चास्तीत्याह ।। **किञ्चेति** ।। **योग्येति** ।। यद्यत्र मयि ज्ञानं स्यादुपलभ्येतेति प्रतियोगिसत्त्वप्रसञ्जित-प्रतियोगित्वरूपमण्युक्तयोग्यानुपलब्धेरित्यर्थः ।। **लिङ्गजन्येति** ।। यद्यपि घटाद्यभावो योग्यानुपलब्धिसहकृतप्रत्यक्षवेद्यस्तथापि क्वचिदन्धकाराद्या-

वृतस्थले परामर्शेन गृह्यमाणो घटाद्यभावोत्र घटो नास्ति योग्यत्वे सत्यनुपलभ्यमानत्वादिति लिङ्गगम्य इत्यभ्युपगमात् । ज्ञानाभावज्ञानस्यावश्यकत्वद्योतनाय लिङ्गजन्या घटाद्यभावधीरित्युक्तम् ।

न च सविकल्पकाभाव एव घटाभावबुद्धौ लिङ्गमस्तु सविकल्पकस्य योग्यतया तदभावज्ञानसम्भवादिति वाच्यम् । उपलब्धिसामान्याभावस्यैवार्थाभावे लिङ्गत्वादन्यथातिप्रसङ्गादिति भावः ।

तर्कताण्डवम्

न च सविकल्पकाभाव एव निर्विकल्पकाभावे लिङ्गम् । निर्विकल्पके सति सविकल्पकावश्यम्भावाभावेन निर्विकल्पकं प्रति सविकल्पकस्याव्यापकत्वात् ।।

अपि च निर्विकल्पकजन्यसविकल्पकोत्पत्तिदशायामतीन्द्रियनिर्विकल्पकसामग्रीसत्त्वेन सत्प्रतिपक्षवत् सामग्रीद्वयस्य परस्परप्रतिबन्धादेकमपि ज्ञानं नोत्पद्येत ।।

न च पूर्वनिर्विकल्पकमेवोत्तरनिर्विकल्पकप्रतिबन्धकम् । धारावाहिकसाक्षात्कारदर्शनेन त्वत्पक्षेपि प्रत्यक्षस्थले सिद्धेः सिद्ध्यन्तराप्रतिबन्धकत्वात् ।

न च समूहालम्बनवत् सामग्रीद्वयादार्थसमाजादेकं ज्ञानमस्त्विति वाच्यम् । तद्वदिह फलाविरोधाभावात् । न हि सम्भवत्येकमेव ज्ञानमेकस्मिन्नेव घटे घटत्वप्रकारकं तदप्रकारकं चेति ।।

अपि च दण्डपुरुषोभयसन्निकर्षे सति दण्डदण्डत्वोभयनिर्विकल्पकानन्तरं दण्डे दण्डत्ववैशिष्ट्यज्ञानात्पूर्वं मुण्डितदण्डविशिष्ट-

पुरुषधीः स्यात् । सामग्र्याः सत्त्वात् । न चेष्टापत्तिः । तादृशज्ञानाननुभवात् ।।

न हि दण्डपुरुषसन्निकर्षानन्तरं दण्डे दण्डत्ववैशिष्ट्यज्ञानात्पूर्वं मुण्डितदण्डविशिष्टपुरुषज्ञानमनुभूयते । न चेदमपि ज्ञानमतीन्द्रियम् । सविकल्पकत्वात् । मम तु इन्द्रियसन्निकर्षादादावेव विशिष्टवैशिष्ट्यज्ञानोत्पत्तेर्नायं प्रसङ्गः ।।

न्यायदीपः

ननु निर्विकल्पकस्यातीन्द्रियत्वेन तदभावस्याप्रत्यक्षत्वेपि तज्ज्ञानमनुमितिरूपमस्तु । सविकल्पकस्य निर्विकल्पव्यापकतया सविकल्पकाभावस्यैव तत्र लिङ्गत्वात्तस्य च प्रत्यक्षत्वादित्याशङ्क्य निराह ।। **न चेति** ।। **सविकल्पकावश्यम्भावाभावेनेति** ।। निर्विकल्पकमात्रस्य सविकल्पकं प्रत्यसामग्रीत्वात्कारणान्तराभावादिना तदभावसम्भवादिति भावः ।

बाधकान्तरमाह ।। **अपि चेति** ।। सविकल्पकदशायां निर्विकल्पकसामग्र्येव नास्ति निर्विकल्पकाभावसहकृतेन्द्रियसंयोगादेरेव निर्विकल्पकसामग्रीत्वादेवं च नोक्तदोष इति भावेनाशङ्क्य निराह ।। **न च पूर्वेति** ।। सामग्रीद्वयसत्त्वेप्यविरोधमाशङ्क्य निराह ।। **न च समूहेति** ।। तत्तदिन्द्रियसन्निकर्षरूपानेकसामग्रीसत्त्वेपि अनेकगोचरमेकं ज्ञानं जायते न तु प्रतबिन्ध एवमस्त्वित्यर्थः । विरोधं व्यनक्ति ।। **न हीति** ।।

ननु स्मृतिसामग्रीतोनुभवसामग्र्या इवानुमितिसामग्रीतः प्रत्यक्षसामग्र्या इव च निर्विकल्पकसामग्रीतः सविकल्पकसामग्र्या बलवत्त्वात् सविकल्पकस्यैवोत्पत्तिरित्यस्त्वित्यतो दोषान्तरमाह ।। **अपिचेति** ।। **मुण्डितदण्डेति** ।। दण्डत्वानुल्लेखिदण्डविशिष्टपुरुषधीरित्यर्थः ।। **सामग्र्या इति** ।। विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयाससंर्गाग्रहरूपविशिष्टज्ञानसामग्र्या इत्यर्थः ।

तर्कताण्डवम्

किञ्च दण्डपुरुषसन्निकर्षे तदुभयस्वरूपमात्रविषयकनिर्विकल्पकवत् सम्बन्धस्यापि सन्निकर्षे तत्स्वरूपमात्रविषयकं निर्विकल्पकमपि कस्मान्न स्यात् ।

अपि चास्य निर्विकल्पकजातीयस्य ज्ञानकार्यं व्यवहारं संस्कारं इच्छादिकं च कदाप्यजनयतो न ज्ञानत्वं युक्तम् । नतरां चास्य स्वविषये कदापि संशयाद्यविरोधिनो निश्चयत्वम् । नतमां चास्य स्वविषयासिद्धिमकुर्वतः प्रमात्वम् । न च निर्विकल्पकेन कस्यचिदपि वस्तुनः कदापि सिद्धिर्दृष्टा । नच प्रमाभ्रमविजातीयं ज्ञानमस्ति ।।

न्यायदीपः

ननु मुण्डितदण्डज्ञानमग्रीसम्पत्तिवद्दण्डे दण्डत्व वैशिष्ट्यज्ञानसामग्र्यामपि सत्त्वात् । मुण्डितदण्डविशिष्टज्ञानोत्पत्तिवेळायां दण्डत्ववैशिष्ट्यमपि दण्डे भात्येवेतित्वन्मत वन्न्यायमते विशिष्टवैशिष्ट्यधीरस्त्वित्यत आह ।। **किञ्च दण्डपुरुषेति ।। सन्निकर्षेणेति ।।** संयुक्तविशेषणतादिरूपेणेत्यर्थः ।

ननु सम्बन्धभाने सन्निकर्षमात्रं न हेतुः । किं तु सम्बन्धिज्ञानमपीति चेत् न । सम्बन्धत्वेन सम्बन्धज्ञास्य तथात्वेपि सम्बन्धस्वरूपज्ञाने तदनपेक्षणात् । अन्यथा सम्बन्धितावच्छेदकसम्बन्धिज्ञानेनैव सम्बन्धज्ञान-दर्शनात् । विशिष्टज्ञानेपि सम्बन्धस्याभानापातात् ।

अभ्युपेत्य वा दोषान्तरमाह ।। **अपि चास्येति ।।** कचित्कार्याजननेपि निर्विकल्पकान्तरे ज्ञानकार्यबलात् निर्विकल्पकमात्रे ज्ञानत्वादिकमविरुद्ध-मित्यतोऽस्येत्यस्य विवरणम् ।। **निर्विकल्पकजातीयस्येति ।।** नतरान्नतमां इति चाव्ययमतिशयार्थकम् ।

सिद्धिमकुर्वत इत्येतद् व्यनक्ति ।। **न चेति** ।। नन्वीश्वरज्ञानमिव-निर्विकल्पकमपिं प्रमाभ्रमविजातीयज्ञानमनित्यमित्यत आह ।। **न चेति** ।। तथात्वे घटादिरपि कुतो न ज्ञानं स्यादिति भावः ।।

तर्कताण्डवम्

अपि चैवं निर्विकल्पकज्ञानं प्रत्यक्षविशेषवत् अनुमितिविशेषोऽपि स्यात् । निर्विकल्पकाभावे तु ज्ञानत्वाश्रयो न सविकल्पकत्वा-वच्छिन्नभिन्नः ज्ञानत्वात् । दण्डीति ज्ञानवत्, सविकल्पकत्वं ज्ञान-निष्ठात्यन्ताभावाप्रतियोगी सविकल्पकवृत्तित्वात् ज्ञानत्ववत्, ज्ञानं न सविकल्पकत्वासमानाधिकरणधर्मवत् ज्ञानत्वात् अनुमितिवत्, अपरोक्षत्वं विशिष्टज्ञानत्वव्याप्यं ज्ञानविभाजकधर्मत्वात् परोक्षत्व-वदित्यादि द्रष्टव्यम् ।

एतदेवाभिप्रेत्योक्तं पद्धतौ ''द्रव्यादिविकल्पानां प्रथममेवोत्पत्तौ बाधकाभावेन निर्विकल्पकानुपपत्तेः'' इति । यद्विशेषयोरित्यादि-न्यायरूपस्यानुगतकारणं विनानुगतकार्यानुत्पत्तिरूपस्य विशेषणस्य पूर्वमभाने विशिष्टज्ञाने प्रकारत्वानुपपत्तिरूपस्य सम्बन्धिज्ञानं विना सम्बन्धज्ञानानुपपत्त्यादिरूपस्य च विपक्षे बाधकस्योक्तरीत्या अभावेनेत्यर्थः ।।

उपलक्षणं चैतत् । प्रत्युत निर्विकल्पकाङ्गीकार एवानुपलब्धि-लिङ्गकघटाभावज्ञानानुपपत्तिरूपस्य, निर्विकल्पकसविकल्पक-सामग्र्योः परस्परं प्रतिबन्धकत्वप्रसङ्गरूपस्य, मुण्डितदण्डविशिष्ट-पुरुषज्ञानप्रसङ्गरूपस्य, सम्बन्धांशेपि निर्विकल्पकप्रसङ्गादिरूपस्य, बाधकस्य च सद्भावेनेत्यपि ग्राह्यम् ।।

तस्मात्सर्वमपि ज्ञानं सविकल्पकमेव ।

तदेवं वर्णस्य गुणत्वे उक्तरीत्या ग्रहणासम्भवात् नित्यविभुद्रव्यात्मकवर्णसमुदायात्मकस्य वेदस्यापौरुषेयत्वं युक्तमिति ।

।। निर्विकल्पके बाधकम् ।। ३२ ।।

।। इति श्रीमद्ब्रह्मण्यतीर्थपूज्यपादानां शिष्येण
व्यासयतिना विरचिते तर्कताण्डवे प्रथमः परिच्छेदः ।।

न्यायदीपः

यदपि ''प्रत्यक्षं द्विविधं निर्विकल्पकं सविकल्पकं चे''ति मण्यादौ प्रत्यक्षत्वकथनं तदप्ययुक्तमित्याह ।। **अपि चैवमिति** ।। साक्षात्कारकार्यमकुर्वतोपि प्रत्यक्षज्ञानविशेषत्वेनुमितिकार्यमकुर्वतोप्यनुमितिविशेषत्वं स्यादित्यर्थः ।।

प्रमाणविरुद्धं च निर्विकल्पकमिति भावेनाह ।। **निर्विकल्पकाभावे त्विति** ।। इत्यादिद्रष्टव्यमित्युत्तरेणान्वयः । एतेन निर्विकल्पकाभावे मानाभावादेव निर्विकल्पसिद्धिरिति निरस्तम् । सविकल्पकस्यापि सविकल्पकान्तरभिन्नत्वाद् बाधनिरासाय सविकल्पकत्वावच्छिन्नभिन्नेति साध्योक्तिः । यत्किञ्चित्सविकल्पकत्वे व्यभिचारनिरासाय सकलेति सविकल्पकविशेषणम् ।।

उक्तप्रमेयस्य बाधकाभावेनेत्येतदारूढतां व्यनक्ति ।। **यद्विशेषेत्यादिना** ।। **उपलक्षणं चैतदिति** ।। बाधकाभावेनेत्येतद् बाधकभावेनेत्यस्याप्युपलक्षणमित्यर्थः । तदेवं व्यनक्ति ।। **प्रत्युतेति** ।। भङ्गाद्वयार्थमुपसंहरति ।। **तस्मादिति** ।।

प्रसक्तानुप्रसक्तप्रमेयोपपादनस्यादिवर्जितैरित्युक्तविशेषणसमर्थनंफलमिति दर्शयन् परिच्छेदार्थमुपसंहरति ।। **तदेवमिति** ।। **उक्तेति** ।। समवायरूप-प्रत्यासत्तिर्नेत्युक्तरीत्येत्यर्थः ।। युक्तमिति ।। तथाचाम्नायैरादिवर्जितैरित्युक्तं साध्विति भावः ।।

।। इति निर्विकल्पकवादः ।। ३२ ।।

।। इति श्रीमत्सुधीन्द्रतीर्थपूज्यपादशिष्यराघवेन्द्रयतिकृते
तर्कताण्डवविवरणे न्यायदीपे प्रथमः परिच्छेदः ।।

Tarkatāṇḍavam of Śri Vyāsatirtha

Epistemology is an important aspect of Philosophy. Every school of Philosophy develops its own epistemology. In Indian Philosophy the Nyāya school is exclusively devoted to the development of epfstemology. It is designated as प्रमाणशास्त्र However, the other schools differ from it on some important epistemological issues. These differences are noted in the Manuals on epistemology of respective schools. Tarkatāṇḍava of Vyāsatirtha gives a consolidated and comparitive exposition of all major issues of epistemology. Tatvachintāmaṇi of Gangeśa is taken as a representative text of Nyāya. Prakaraṇapañcikā of Śālikanātha is taken as a representative text of Prābhākara mimāmsā. The views of these two schools are particularly reviewed.

The theory of knowledge, the theory of the impersonal nature of Veda, the theory of the meaning of the word and sentence, the import of the injunction are discussed in detail and a comparative and critical presentation of the Nyāya, Mimāmsa and Vedānta views is made.

Vyāsatirtha has developed a new style of presenting philosophical and epistemological issues in his Nyāyāmṛta and Tarkatāṇḍava. It is hailed as

न्यायामृतेनार्जिता कीर्तिः ताण्डवेन विभूषिता

His critical review of Tatvachintāmaṇi of Gangeśa needs serious attention of Nyāya Research Scholars and clarification on many crucial points. Pakṣadhara Miśra a contemporary Navyanyāya scholar who met Śri Śri Vyāsatirtha records his appreciation.

यदधीतं तदधीतं यदनधीतं तदप्यधीतम् ।
पक्षधरविपक्षो नावेक्षि विना नवीनव्यासेन ।।